भगवद्बादरायणप्रणीतम्

श्रीमद्भागवतम्

प्रथमः स्कन्धः

अथ प्रथमोऽध्यायः

ॐ नमो भगवते वासुदेवाय

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदाय आदिकवये मुह्यन्ति यं सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ १ ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः श्रीमद्भागवततात्पर्यनिर्णयः

ॐ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

सृष्टिस्थित्यप्ययहानियतिदृशितमोबन्धमोक्षाश्च यस्माद्
अस्य श्रीब्रह्मरुद्रप्रभृति सुरनरस्त्रीशशश्वात्मकस्य ।
विष्णोर्व्यस्ताः समस्ताः सकलगुणनिधिः सर्वदोषव्यपेतः
पूर्णानन्दोऽव्ययो यो गुरुरपि परमश्चिन्तये तं महान्तम् ॥

जन्माद्यस्येत्यादि । तं परं धीमहि । अन्वयात् । 'यतो वा इमानि भूतानि जायन्त' इत्यादिश्रुतिस्मृतिभ्यः । इतरतः तर्कतः । चेतनाद्धि पित्रादेः पुत्रादिरुत्पद्यते । अभिज्ञः सर्वज्ञः । अतो युज्यते । 'यं कामये तं तमुग्रं कृणोमि' । 'मम योनिरि'त्यन्येषां तदपेक्षत्वात् । न चान्यापेक्षोऽसौ । स्वराट् । कुतः । तेने ब्रह्म हृदा य आदिकवये । स हि 'विश्वा जातानि परिता बभूव' । नान्यः । हृदा स्नेहेन । 'यो ब्रह्माणं विदधाति पूर्वमि'ति च । आत्मत एव हि तस्य बुद्धिप्रकाशः । न च प्रसादं विना ज्ञातुं शक्यः । मुह्यन्ति यं सूरयः । न च तृप्तः प्रवर्तते । किन्तु मृषा वृथैव । भित्वा मृषाश्रुरितिवत् । 'देवस्यैष स्वभावोऽयमि'ति । यत्रेतिविशेषणान्नान्यत्र । स्वविषय एव वृथा । जीवेश्वरजडानां सर्गस्त्रिसर्गः । एकस्य तेजसो बहुत्ववदीश्वरसर्गः ।

वारिनिमित्तप्रतिबिम्बवज्जीवसर्गः । मृदो घटादिवदव्यक्ताज्जडसर्गः । न च मायामयी सृष्टिः । धाम्ना स्वेन सदा निरस्तकुहकम् । तद्धाम्ना श्रियोऽपि निरस्तकुहकत्वं मुक्तानां च । न च मुक्तवत्पूर्वं बन्धभाक्त्वम् । सदा निरस्तकुहकत्वात् । सत्यं निर्दुःखनित्यनिरतिशयानन्दानुभवरूपम् । परं सम्पूर्णगुणम् । परत्वसाधकं जन्मादीत्यादि । तन्त्रभागवते च ।

'सृष्टिस्थित्यप्ययेहादेः श्रुतिस्मृतिसमन्वयात् ।
युक्तितश्चेतृपूर्वादेः श्रीब्रह्मभवपूर्विणः ॥
सुरगन्धर्वमनुजपितृदैत्यात्मनः पृथक् ।
कर्ता विष्णुरजो नित्यः सर्वज्ञत्वान्न चापरः ।
अनन्याधिपतिश्चासौ गरीयान् ब्रह्मणो यतः ।
तत्प्रसादमृते तस्य नान्यो वेत्ताऽस्ति कश्चन ॥
तेजसो रूपवद्रूपं बहुधा कुरुते हरिः ।
वारिस्थतेजःप्रतिमा जीवास्तस्माद्विनिर्गताः ॥
कुलालेन मृदा यद्वन्निर्मीयन्ते घटादयः ।
विष्णुनैवं प्रकृत्यैव निर्म्यते जगदीदृशम् ॥
एष त्रिसर्गो विष्णोस्तु वृथा लोकस्य चावृथा ।
इन्द्रजालविधां सृष्टिं मन्यन्ते ज्ञानदुर्बलाः ॥
नित्यं निरस्तेन्द्रजाले स्वत एव कथं भवेत् ।
अक्षमाः सत्यसृष्टौ हि मायासृष्टिं वितन्वते ।
अनन्ताचिन्त्यविभवः कथं तामीहते हरिः ।
निर्दुःखपूर्णानन्दत्वाद्यमाहुः सत्यमच्युतम् ॥
निर्दोषगुणपूर्णत्वात्परं चाहुर्जनार्दनम् ।
एवं विधानुभावो यः स कथं निन्दितं सृजेत् ॥
स्वप्नादिकं परो देवः प्राणादिस्थस्तनोत्यसौ ।
केवलस्य परस्यास्य माया सृष्टिर्न युज्यते ॥
तस्माद्बाधायुताः सर्वे स्वप्नाद्या ये त्वकेवलाः ।
इदं न बाध्यते सर्वं जगत्केवलजं यतः ॥
मोक्षवत्केवलस्यास्य शक्त्या सम्यग्विजृम्भितम् ।
एतद्रहस्यं परमं ब्रह्मसूत्रपदोदितम् ॥

ये त्वेवं न विजानन्ति ते हि यान्त्यधरं तमः ।
ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ॥
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ।
ये त्वेतदनुतिष्ठन्ति पारम्पर्यागतं मम ॥
ते यान्ति परमं स्थानं मयैवोदितमञ्जसे'त्यादि ।

'वैधर्म्याच्च न स्वप्नादिवदि'ति च । 'प्रधान्वस्य महतो महानि सत्यासत्यस्य करणानि वोचमि'त्यादि । ब्रह्मसूत्रमहाभारत गायत्रीवेदसम्बन्धश्चायं ग्रन्थः । उक्तं च गारुडे ।

'अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः ।
गायत्रीभाष्यरूपोऽसौ वेदार्थपरिबृंहितः ।
पुराणानां साररूपः साक्षाद्भागवतोदितः ।
द्वादशस्कन्धसंयुक्तः शतविच्छेदसंयुतः ।
ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिध' इति ॥ १ ॥

श्रीमद्धनुमद्भीम मध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्री यादवार्यविरचिता भागवतप्रकाशिका

सकलगुणसुपूर्णः सर्वदोषातिदूरः श्रुतिततिहृदयाप्यः सौख्यपूर्णो गुरुर्यः ॥
जनिभृतिमृतिपूर्वं यस्तनोति स्वयोग्यं प्रकृतिविधिभवादेः सोऽस्तु चित्ते रमेशः ॥ १ ॥

भूखण्डप्रकटीकृतामलवपुर्विस्तारिताशेषगु-
वेंदान्ताब्जविकासको हरिर्जगत्तत्त्वप्रकाशप्रदः ।
ध्वस्तध्वान्ततति: शरण्यजनसन्मार्गप्रदर्शी मुहु-
र्वेदव्यासदिवाकरो लसतु मे हार्दाम्बरे सर्वदा ॥ २ ॥

मध्ववाक्कामधेनुर्नो भूयात्सुमतिदुग्धदा ।
स्वपोषकाणां या दोग्धि सतां सर्वमभीप्सितम् ॥ ३ ॥

वाणि ते करवाण्यम्ब चरणौ हृदि सर्वदा ।
मद्वाक्यसरणिर्भूयाच्छ्रीमदाचार्यभावगा ॥ ४ ॥

उमेशाद्याः सुरा वोऽहमीडे चेतोभिमानिनः ।
यूयं सर्वे प्रकुरुत मनो मे मध्वभावगम् ॥ ५ ॥

श्रीमज्जयार्यान्विजयध्वजादीन् टीकाकृतः पूर्वतनान्मुनीन्द्रान् ।
वेदेशतीर्थाभिधमद्गुरूंश्च वन्दे मरुच्छास्त्रविशुद्धबुद्धीन् ॥ ६ ॥

श्रीमद्भागवतस्यार्थतात्पर्यं यत्प्रदर्शितम् ।
श्रीमदानन्दतीर्थार्यैर्व्याकुर्वे तद्यथामति ॥ ७ ॥

न पाण्डित्यान्न मात्सर्यान्न चार्थादिव्यपेक्षया ।
यत्नोऽयं किन्तु वाग्बुद्धि शुद्ध्यर्थः केवलं मम ॥ ८ ॥

भगवता बादरायणेन प्राणिनां निःश्रेयसाय प्रणीतमपि श्रीभागवताख्यं पुराणम् असाधु निबन्धान्धतमसावगुण्ठितत्वेनाप्रणीतमिव मन्यमानो भगवानानन्दतीर्थमुनिर्यथाचार्याभिप्रायमस्य तात्पर्यं विवक्षुर्विलीनप्रकृतितयांऽतरायविधुरोऽपि अनवरतमीश्वरप्रवणकायकरणप्रवृत्तिरपि परब्रह्मचिन्तनादिरूपं मङ्गलं प्रारिप्सितस्यानन्तरायपरिसमाप्तेः प्रचयस्य च हेतुतयाऽविगीतशिष्टाचारादिनाऽवगतमवश्यकरणीयं शिष्यादीन्ग्राहयितुं ग्रन्थादौ निबध्नाति ॥ सृष्टीति । इदं पद्यं श्रीमद्भागवताद्यपद्यगतविशेषणविवरणपरमतस्तेषां यानि प्रयोजनानि भगवत्पादैरग्रे वक्ष्यन्ते तान्येवात्रत्यविशेषणानां प्रयोजनानि ज्ञातव्यानि । अप्ययः संहारः । ईहा इच्छा प्रवृत्तिर्वा । नियतिर्नियमनम् । दृशिर्ज्ञानम् । तमोऽज्ञानम् । जन्मादीति पदार्थव्याख्यानमेतत् । यत इत्यस्यार्थो यस्मादिति । अस्येत्यनूद्य श्रीब्रह्मेत्यादि व्याख्यानम् । श्रीब्रह्मरुद्राः प्रभृतयो येषां ते तथा ते च ते सुराश्च नराश्च द्यीशा द्युपतयो देवास्तेषां शत्रवश्च तदात्मकस्यास्येत्यन्वयः । क्षितिपऋषिगन्धर्वपित्रादेर्जडस्य चोपलक्षकमेतत् । सृष्ट्यादयः सर्वे न सर्वत्र । अचेतने ज्ञानादेरभावात् । श्रीदेव्यां तम आदेरभावादत आह ॥ व्यस्ताः समस्ता इति । क्वचिद्व्यस्ता विस्तृताः । सकला इति यावत् । क्वचित्समस्ताः सङ्कुचिताः । कतिपया इति यावत् । भवन्तीति शेषः । परमित्यस्य विवरणम् ॥ सकलेति । अग्रे तथा वक्ष्यमाणत्वात् । सकलगुणा नितरां धीयन्तेऽस्मिन्निति सकलगुणनिधिः । सदा निरस्तकुहकमित्यस्य तात्पर्यम् ॥ सर्वदोषव्यपेत इति । तथा च कुहकपदं सर्व-दोषोपलक्षकमिति भावः । सत्यमित्यस्य विवरणम् ॥ पूर्णेति । पूर्णानन्दस्य व्ययो नाशो न विद्यते यस्येत्यर्थः । निरतिशयनित्यानन्द इति यावत् । एतच्चाग्रे प्रदर्शयिष्यामः । तेने ब्रह्मेत्यस्य तात्पर्यम् ॥ गुरुरिति । अभिज्ञ इत्यस्य विवरणम् ॥ परम इति । परा सर्वविषया मा ज्ञानं यस्येति व्याख्यानात् । धीमहीत्यस्य विवरणम् ॥ चिन्तय इति । स्वराडित्यस्य तात्पर्यम् । महान्तमिति । पूर्णानन्दत्वोक्त्या यत्र त्रिसर्गो मृषेत्यस्यापि तात्पर्यं सूचितमिति ज्ञातव्यम् । परम इत्येतदेवान्वयादितरत इत्यस्यापि विवरणम् । परा निर्दोषत्वेनोत्तमाः माः श्रुत्याद्याः यस्मिन्नुक्तगुण इत्यपि व्याख्यानात् । एवं सङ्क्षेपतः पद्यरूपेणाद्यपद्यं व्याख्याय विस्तरतोऽपि व्याचिख्यासु प्रतीकं गृह्णाति ॥ जन्माद्यस्येत्यादीति । अत्र

तच्छब्दमध्याहृत्य तस्य विशेष्यद्वारा क्रियान्वयं दर्शयति ॥ तं परमिति । अत्र परशब्दो ध्यानविषयस्य भगवतो जीवभेदकं गुणपूर्णत्वं लक्षणं वक्तुमुक्तः । एतल्लक्षणसाधनाय जन्माद्यस्य यत इत्यनेन सृष्ट्यादिकर्तृत्वरूपमपरं च लक्षणमुक्तम् । एतदुभयलक्षणविशिष्टे भगवति किं मानमित्यपेक्षायाम् । अन्वयादितरतश्चेत्युक्तम् । कार्येषु सद्रूपेणान्वयादनुवृत्तेर्मृत्सुवर्णादिवद्ब्रह्म कारणम् । इतरतो व्यावृत्तत्वाद्विश्वं कार्यमित्याद्यन्यथाप्रतीतिवारणाय तत्पदद्वयं क्रमेणानूद्य व्याख्याति ॥ अन्वयादिति । आदिपदेन स इदं सर्वमसृजतेत्याद्या ग्राह्याः ।

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथेत्यादिका स्मृतिः ।

अनेन श्रुतिस्मृतीनामन्वयात् उक्तार्थे शक्तितात्पर्यलक्षणसम्बन्धादिति मूलव्याख्यानं सूचयति । अनुमानापरपर्यायं तर्कमेव दर्शयति ॥ चेतनादिति । अप्रचेतनात्कुलालादेर्घटादिसृष्टिर्दृष्टेत्येव वक्तव्यम् । तथाऽपि चेतनाच्चेतनसृष्टिर्न दृष्टा । तथा चास्येत्यस्य श्रीब्रह्मरुद्रप्रभृतीत्यादि व्याख्यानमयुक्तमित्याशङ्कापरिहारायैवमुक्तमिति ध्येयम् । अनेनादिकालीनं चेतनाचेतनात्मकं जगत् चेतनपूर्वकं कार्यत्वात्पुत्रादिवत् । इति सामान्यतश्चेतने कर्तरि सिद्धे इतरेषां तदसम्भवात् परिशेषाद्भगवानेव कर्ता सिद्ध्यतीत्युक्तं भवति । ननु चेतनत्वेनास्मदादिवदसर्वज्ञस्य कथं जगत्कर्तृत्वादिकमित्यत उक्तं मूले ॥ अर्थेष्वभिज्ञ इति । तत्राभिज्ञपदमागमज्ञपरत्वप्रतीति वारणायानूद्य व्याख्याति ॥ अभिज्ञ इति ॥ अभीत्यस्यार्थः ॥ सर्वेति । अनेनार्थेषु प्रवृत्त्यादिषु येऽभि तो विद्यमाना विशेषास्तान् सर्वान् जानातीत्यर्थेष्वभिज्ञ इति व्याख्यानं सूचयति । धर्मिग्राहकप्रमाणबाधितं चेतनत्वानुमानं न असार्वज्ञ्यसाधनायालमिति भावः । ततः किमित्यत आह ॥ अत इति । जगत्कर्तृत्वादिकमिति शेषः । अनेन यतोऽर्थेष्वभिज्ञ इति हेतुगर्भविशेषणमिति सूचयति । नन्वन्याधीनस्यास्मदादिवन्न सर्वकर्तृत्वं युक्तमित्याशङ्कापरिहारायोक्तम् ॥ स्वराडिति । तत्प्रमाणेनोपपादयन्व्याख्याति यं कामय इति । उग्रमित्यनन्तरमित्याद्युक्त्वेति मम योनिरितीत्यनन्तरमुक्तत्वेनेति च शेषः । अन्येषां श्रीप्रभृतीनाम् । तदपेक्षत्वात् भगवदपेक्षत्वावगमात् । न चान्यापेक्षोऽसावित्यनन्तरमित्याहेति स्वराडित्यस्यानन्तरमितीति च शेषः । स्वराट् स्वतन्त्र इति व्याख्यानादुक्तार्थलाभः । ततश्चायमर्थः । अम्भ्रणीसूक्ते श्रिया यं कामय इत्यादिना ब्रह्मरुद्रादीनां स्वाधीनत्वमुक्त्वा मम योनिरिति वाक्येन स्वसत्ताऽपि भगवदधीनेत्युक्तत्वेन सर्वाधिकायाः श्रियोऽपि भगवदधीनत्वावगमात् भगवानेव स्वराट् स्वतन्त्रोऽनन्याधीन इति सिध्यतीति । अत्रापि यतः स्वराट् अतो युज्यत इति योजना द्रष्टव्या । तेने ब्रह्मेत्येतन्निवर्त्याशङ्कां प्रदर्शयन्नवतारयति ॥ कुत इति । अत्रापि कुत इत्यनन्तरमित्यत आहेति कवय इत्यनन्तरमितीति च शेषो ज्ञातव्यः । तथा चार्थेष्वभिज्ञत्वं स्वराट्त्वं च भगवतः कुतः सिद्धमिति प्रश्नपरिहारार्थं तेन इत्यादिकमुक्तमित्यर्थः ।

नन्विदं प्रश्नद्वयमनुपपन्नम् । श्रुत्यादिसिद्धजगत्कर्तृत्वाद्यन्यथाऽनुपपत्त्या सार्वज्ञतासिद्धेरभिज्ञ इत्यत्राभिप्रेतत्वात् । अन्यथा प्रतिज्ञामात्रेणोक्तशङ्कानिरासासम्भवात् । स्वराट्त्वस्यापि स्वयमेव वांऽभ्रणीसूक्तार्थपर्यालोचनया सिद्धत्वादिति चेन्मैवम् । जगत्कर्तृत्वान्यथाऽनुपपत्त्या लब्धं सार्वज्ञं जगद्विषय एव । न सर्वत्र । तच्च साधारणम् । ईशादन्यत्रालोचने तज्ज्ञानस्यापि सर्वविषयकत्वात् । तथा च ब्रह्मापेक्षयाऽधिकं सार्वज्ञ्यं कुत इत्याद्यप्रश्ने विवक्षितत्वात् । द्वितीयप्रश्नेऽपि तं ब्रह्माण-मित्यस्य बृहस्पतिपरतयाऽपि सावकाशत्वेन श्रियो विरिञ्चाधिकताया अलाभादित्याशयात् । एवं च तेने इत्यादिना ब्रह्मोपदेष्टृत्वकथनेन ब्रह्मापेक्षयाऽधिकं सार्वज्ञ्यं सर्वाधिकब्रह्माधिकत्वोक्त्याऽ-नन्याधीनत्वं चोच्यमानं श्लिष्टतरमिति ज्ञातव्यम् । अत्र श्रियो भगवदधीनत्वस्यालाभाद्यं कामय इत्याद्युपपादनमपि सार्थकम् । न च प्रसिद्धार्थं विनाऽन्योऽर्थो युज्यत इति भाष्योक्तन्यायेन ब्रह्म शब्दस्यान्यपरत्वशङ्कापरिहारसम्भवादिति ध्येयम् । अनेनादिकवये विरिञ्चाय ब्रह्म वेदरूपशब्दराशिं तेने साकल्येनोपदिष्टवानिति मूलं व्याख्येयमिति सूचितम् ।

नन्वनेन ब्रह्मण एव भगवदधीनत्वं लब्धम् । न सर्वस्य जगतः । अतः कथमनेनोक्तरूपं स्वराट्त्वं सिद्ध्यतीत्याशङ्कायां सर्वस्यापि जगतो ब्रह्माधीनत्वप्रतिपादकं 'प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूवे'ति मन्त्रमर्थतः पठन्ति ॥ स हीति । हि यस्मात्स ब्रह्मा विश्वकार्य-परिभवनकर्ताऽस्मिन्मन्त्र उक्तस्तस्मादेतादृशब्रह्मोपदेष्टृत्वेनोक्तरूपं स्वराट्त्वं सिद्ध्यतीत्यर्थः । हे प्रजापते, भवान् जातान्युत्पत्तिमन्ति विश्वानि सर्ववस्तूनि परिभूतवान् । तत्स्वामित्वेन वर्तते । त्वदन्यस्तु न परिबभूवेति मन्त्रार्थः । हृदेत्यस्य मनसेति व्याख्यानं न प्रकृतसङ्गतमित्याशयेन तदनूद्य व्याचष्टे ॥ हृदेति ॥ स्नेहेनेति । प्रसादेनेत्यर्थः । तेन इत्यादिनोक्तं ब्रह्मोपदेष्टृत्वमेव कुतः सिद्धमित्यत आह ॥ यो ब्रह्माणमिति । 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्य इति च श्रुतिरुक्तार्थेऽस्तीति शेषः । ननु यदि विष्णोरप्यन्य उपदेष्टा तर्हि तस्यैव निरुपचरितं सार्वज्ञ्यं स्यादित्याशङ्कापरिहारायोदाहृत-श्रुतिगतमात्मबुद्धिप्रकाशमित्येतदर्थतोऽनुवदति ॥ स्वात्मत एवेति । हि यस्मादुदाहृतश्रुता-वात्मबुद्धिप्रकाशमित्यनेन स्वात्मत एव तस्य विष्णोर्बुद्धिप्रकाशो बुद्ध्याविर्भाव उक्तस्तस्मात्तस्यान्य उपदेष्टा नास्तीति निश्चीयत इति शेषः । मुह्यन्ति यं सूरय इत्येतत्प्रकृतसङ्गतत्वेनावतारयति ॥ न च प्रसादमिति । शक्य इत्यनन्तरमित्याहेति सूरय इत्यनन्तरमितीति च शेषः । तथा च हृदेत्यनेन प्रसादपूर्वकं वेदं वेदार्थभूतं विष्णुं चोपदिष्टवानित्युक्तं भवति । तत्र किं प्रसादेनेत्याशङ्कायां प्रसादाभावे वेदार्थभूतो विष्णुः सूरिभिरप्युपदेशादिना न सम्यग्ज्ञातुं शक्य इत्याह 'मुह्यन्ति यं सूरय' इति वाक्येनेत्यर्थः । अतो हृदेत्यनेनोक्तः प्रसाद आवश्यक इति भावः । यत्र त्रिसर्गो

मृषेत्येतत्प्रकृतसङ्गतत्वेनावतार्य व्याख्यातुमाह ।। न चेति अतृप्तोऽपूर्णः । स्वप्रोजनार्थमिति शेषः । ननु तर्हि पूर्णस्य किमर्थं प्रवृत्तिरित्याक्षिपति ।। किं त्विति । इत्याहेति शेषः । मृषेत्यनन्तरमितीति च । मिथ्यार्थताप्रतीतिवारणाय व्याख्याति ।। वृथैवेति । न स्वप्रयोजनायेत्येवकारार्थः । मृषेत्यस्य वृथेत्यर्थत्वे प्रयोगं दर्शयति ।। भित्वेति । 'भित्वा मृषाऽश्रुर्दपदम्भना रहो जघास हैय्यङ्गवमन्तरं गत' इति वक्ष्यमाणप्रयोग इवेत्यर्थः । तत्र प्रत्यक्षबलान्न मिथ्यार्थत्वमिति भावः । नन्वेवं प्रवृत्तिरनुपपत्ति-रित्याशङ्कायां स्वभावादेव प्रवृत्तिरित्याशयेनात्र श्रुतिमेव पठति ।। देवस्येति । अयं जगत्सृष्ट्यादि-लक्षण एष इच्छारूपः । परप्रयोजनार्थत्वेऽपि तदुपपत्तिरिति यत्रेति विशेषणात्सूचितमित्याह ।। यत्रेतीति । कथमिदं लब्धमित्यतस्तदभिप्रायमाह ।। स्वविषय एवेति । तथा च यत्रेति विषयसप्तमी । वृथैवेत्यध्याहृतैवकारस्य यत्रेत्यनेनापि सम्बन्धस्तेन चोक्तार्थलाभ इति भावः । त्रयाणां तमोरजः-सत्त्वानां सर्गो भूतेन्द्रियदेवतारूप इति व्याख्यानं वक्ष्यमाणप्रमाणविरुद्धमित्याशयेन सर्ग इत्येतद्व्याख्याति ।। जीवेश्वरेति । तेजोवारिमृदां विनिमय इत्यनेन मृषेत्युक्तमिथ्यात्वे दृष्टान्त उच्यते । तेजोवारिमृदां यथा विनिमयो व्यत्ययः । अत्र यद्यपीश्वरस्याभ्यर्हितत्वादीश्वरशब्दः प्रथममुद्देष्टव्य-स्तथाऽपि जीव शब्दो न जडापेक्षया प्राधान्येन प्रथमोद्देश्यः । अन्यस्मिन्नन्यावभासः स यथेति । तत्र तेजसि वारिबुद्धिर्मरिचितोये प्रसिद्धा मृदि च काचादौ वारिबुद्धिर्वारिणि च काचादिबुद्धिरित्यादि यथायथमूह्यमिति व्याख्यानं वक्ष्यमाणप्रमाणविरुद्धमित्याशयेन तद्यथावद्दृष्टान्तदार्ष्टान्तिकभावं दर्शयन्व्याचष्टे ।। एकस्येति । अत्र चाभ्यर्हितत्वाभिप्रायेणेश्वरसर्ग आदितो व्याख्यात इति ज्ञातव्यम् । तथा च त्रिसर्ग इत्यत्रैवायं दृष्टान्तो न मृषेत्यत्र । विनिमय शब्दश्चावस्थान्तरतापत्तिरूपव्यत्यय-वाचीत्युक्तं भवति । ननु जगत्सृष्टेरैन्द्रजालिकपदार्थसृष्टिवन्मायानिर्मितत्वान्मिथ्याभूतजन्मादिकर्तृ-त्वेनभगवतः कथमनन्तगुणपूर्णत्वं जीवभेदलक्षणं पारमार्थिकं सिध्येत् । जीवस्य स्वप्रकाशकतया नित्यसिद्धत्वादतः कथं तज्जिज्ञासारूपचिन्तनमुपपद्यत इति शङ्कानिरासाय अमृषेति छेदं मृषेत्यस्य मिथ्यार्थत्वं चाभिप्रेत्य तत्तात्पर्यं दर्शयति ।। न चेति । कुत इत्याशङ्कायां धाम्ना स्वेन सदा निरस्तकुहकमिति हेतुगर्भविशेषणमुक्तमित्याशयेन तदनुवदति ।। धाम्नेति । तत्र स्वेनेत्यस्य व्यावर्त्यं दर्शयति ।। तद्धाम्नेति । मुक्तानां चेत्यनन्तरमतस्तद्व्यावृत्तये स्वेन धाम्नेत्युक्तमिति शेषः । सदेत्यनेन सूचितमर्थं दर्शयति ।। न च मुक्तवदिति । इति सूचनाय सदेत्युक्तमिति शेषः । अनेन कुहकपदं बन्धापादकदोषमात्रोपलक्षकमिति सूचयति । तथा च स्वसामर्थ्येनापि कुहकस्य न मुक्तवत्पूर्वं प्रसक्तस्य निरास इति वस्तुस्थितिज्ञापनाय सदेत्युक्तमिति भावः । धाम्ना स्वेनेत्यादेरुक्तप्रतिज्ञायां हेतुत्वं दर्शयति ।। सदेति । धाम्ना स्वेनेत्यपि ग्राह्यम् । पञ्चमीप्रयोगेन मूले यत इत्यध्याहारं सूचयति । न च मायामयी सृष्टिरिति सम्बन्धः । अत्रैव हेतुगर्भं सत्यं परमिति विशेषणद्वयम् ।

तत्क्रमेणोपादायोक्तार्थहेतुत्वं यथा स्यात्तथा व्याख्याति ॥ सत्यमिति । अत्र सदित्यस्यार्थः ॥ नित्यनिर्दुःखेति । त्वित्यस्यार्थः ॥ निरतिशयेति । येत्यस्यार्थः ॥ अनुभवेति । यतेर्गत्यर्थत्वात् । आनन्देत्यस्य योग्यतया साधुभाववाचिसच्छब्देन वा लाभः । कर्मधारयार्थः ॥ रूपमिति ॥ परं सम्पूर्णगुणमिति । पृ पालनपूरणयोरिति धातोरिति भावः । गुणानां योग्यतया सम्बन्ध इति ध्येयम् । तथा चैवं विधानुभावस्य सृष्टिः कथं मायामयी स्यादिति भावः । एवमर्थेष्वभिज्ञ इत्यादीनि विशेषणानि परत्वसाधकस्य जन्माद्यस्य यत इत्यस्य समर्थनपराणीति व्याख्यायेदानीं तानि सर्वाण्यपि विशेषणानि साक्षात्परत्वसाधनपराण्येवेत्यपि व्याख्याति ॥ परत्त्वसाधकमिति । अत्रादि पदेन सत्यमित्यन्तं सर्वं ग्राह्यम् । ततश्च जन्मादिकर्तृत्वात्सर्वज्ञत्वादनन्याधि पतित्वाद्विरिञ्चगुरु-त्वात्स्वानुग्रहमन्तरेण ज्ञातुमशक्यत्वाच्च स्वप्रयोजनानुद्देशेऽपि स्वभावेनैव प्रवृत्तिमत्वात्स्वसामर्थ्येनैव निरस्तसमस्तदोषत्वान्नित्यनिर्दुःख निरतिशयानन्दानुभवस्वरूपत्वाच्च परं पूर्णगुणं ब्रह्म धीमहीति व्याख्येयमित्यर्थः । उक्तार्थसमर्थनाय तन्त्रभागवतसम्मतिमाह ॥ तन्त्र भागवत इति । न केवलमस्माभिरेवैवं व्याख्यातमिदं पद्यं किन्तु तन्त्रभागवते चैवमेव व्याख्यातमित्यर्थः। सृष्टि-स्थित्यप्ययेहादेः । कर्ता विष्णुरिति सम्बन्धः । अनेन जन्माद्यस्य यत इत्येतद्विवृतम् । अन्वया-दित्यस्य व्याख्यानम् । श्रुतीति । इतरत इत्यस्यार्थः ॥ युक्तित इति । तामेव युक्तिं दर्शयति ॥ चेन्निति । चेतनाचेतनः । भावप्रधानो निर्देशः । चेतनपूर्वकत्वादेरित्यर्थः । आदिपदेन कार्यत्वसङ्ग्रहः। ततश्च विमतं कार्यं चेतनपूर्वकं कार्यत्वाद्धटवदिति । सामान्यतश्चेतने कर्तरि सिद्धे ब्रह्मादीनां परिच्छिन्नशक्त्यादिमत्त्वेन तत्कर्तृत्वे बाधिते विमतं भगवत्कर्तृकमसम्भवदितरचेतनकर्तृत्वे इति चेतनकर्तृत्वात् । यद्यसम्भववद्यदितरकर्तृत्वे सति सकर्तृकं तत्तत्कर्तृकमिति सामान्यसिद्ध-परिशेषलक्षणा युक्तिरुक्ता भवतीति ज्ञातव्यम् । चेतनकर्तृकमित्यत्र चेतनपदं साङ्ख्यमतनिरासायेति ज्ञातव्यम् । अस्येत्यस्य व्याख्यानम् ॥ श्रीब्रह्मेति । पृथगित्यनेन यथायोग्यमिति सूचयति । विष्णोर्जन्मादिमत्त्वे सर्वकर्तृत्वमसम्भवि स्यादतोऽजो नित्य इति विशेषणद्वयमुक्तम् । इदं च मूलेऽप्युपलक्षणतया ग्राह्यम् । अर्थेष्वभिज्ञ इत्यनेन तदुक्तार्थे हेतुकथनायोक्तमित्याशयेनाह ॥ सर्वज्ञत्वादिति । न चापर इत्यमेनोक्तपरिशेषानुमाने विशेषणासिद्धिः परिहृता । स्वराडित्येतदपि हेतुगर्भमित्याशयेनाह ॥ अनन्याधिपतिरिति । तेने ब्रह्मेत्यादिकमपि हेतुसूचकमित्याशयेनाह ॥ गरीयानिति । मुह्यन्ति यं सूरय इत्यस्य तात्पर्यम् ॥ तत्प्रसादमृते इति । तेजोवारीत्यादिकं त्रिसर्ग इत्यत्रैव दृष्टान्तो न मृषेत्याशयेन तद्व्याख्याति ॥ तेजसो रूपवदिति । अत्र रूप शब्दः स्वरूपपरः । तथा च तेजसः स्वरूपेण तुल्यं हरिः स्वस्वरूपं बहुधा कुरुत इत्येष ईश्वरसर्ग आद्य इति योज्यम् । अभिमानिदेवतापेक्षयैवैतदिति ज्ञातव्यम् । वारिस्थं तेजः सूर्यादिप्रतिबिम्बरूपं तद्वदीश्वरप्रतिबिम्बभूता

इत्यर्थः । विनिर्गता इत्यनन्तरमित्ययं जीवसर्गो द्वितीय इति पूरणीयम् । ईदृशमित्यनन्तरमयं जडसर्गस्तृतीय इति शेषः । मृषेत्यस्य व्याख्यानम् ॥ एष त्रिसर्ग इति । यत्रेत्यस्य तात्पर्यम् ॥ विष्णोरिति । तु शब्दोऽवधारणार्थः । अनेन मूलेऽवधारणमध्याहार्यमिति सूचयति । वृथैवेति सम्बन्धः । विष्णोरेवेति च तत्सम्बन्धमभिप्रेत्य तल्लब्धमर्थं दर्शयति ॥ लोकस्येति । अवृथा चेति सम्बन्धः । मृषेत्यस्य मिथ्येति व्याख्यानं कुर्वन्तो न तत्त्वज्ञानिन इत्याह ॥ इन्द्रजालेति । मन्यन्ते । मृषा पदेनेति शेषः । ज्ञानदुर्बला ज्ञानशून्याः । अनेन मूले मृषेत्यपि छेदं दर्शयति । कुत एतदित्याकाङ्क्षायां धाम्ना स्वेनेत्यादिविशेषणमुक्तमित्याशयेन तद्व्याख्याति ॥ नित्यमिति । कुहकमित्यस्यार्थः ॥ इन्द्रजालेति । स्वेन धाम्नेत्यस्य तात्पर्यम् ॥ स्वत एवेति । स्वसामर्थ्येनैवेत्यर्थः । कथं सम्भवेत् । इन्द्रजालविद्यासृष्टिरिति शेषः । हेतोरप्रयोजकतां परिहरति ॥ अक्षमा इति धाम्ना स्वेनेत्यादेरनुवादः ॥ अनन्ताचिन्त्यविभव इति । सत्यं परमपि विशेषणद्वयमप्यत्र हेतुकथनाय प्रवृत्तमिति दर्शयन्स्तद्व्याचष्टे ॥ निर्दुःखेति । यमाहुरिति यच्छब्दस्य स कथमिति वक्ष्यमाणेनान्वयः । एवं विधानुभावो निर्दोषगुणपूर्णः । निन्दितमिन्द्रजालविधम् । किं चेदं न मायामयमबाध्यत्वात् । अबाध्यत्वं च केवलैश्वरजत्वादित्यनुमानं वक्तुं तस्य स्वप्नादौ व्यभिचारपरिहाराय व्यतिरेकव्याप्तिमुपपादयितुमाह ॥ स्वप्नादिकमिति । अत्र स्वप्न पदेन तदारोपितजाग्रत्त्वं ग्राह्यम् । आदिपदेनेन्द्रजालम् । प्राणादिस्थः स्वप्ने प्राणस्थ इन्द्रजालमायाविपुरुषस्थ इति विवेकः । तनोति प्रदर्शयति । कुत इत्यत आह ॥ केवलस्येति । केवलस्यान्यानधिष्ठितस्य परस्य परमात्मनः । सकाशादिति शेषः । मायासृष्टिर्मिथ्यात्वप्रदर्शनरूपा न युज्यते । सदा निरस्तसमस्तकुहकत्वादित्यादियुक्तिविरोधादिति भावः । तथा च स्वप्नादौ हेतोरेवाभावान्न व्यभिचार इत्याह ॥ तस्मादिति । तस्मादित्युक्तमेव दर्शयति ॥ यद्यस्मात्केवला इति । अन्यानधिष्ठितेश्वरप्रदर्शिता न भवन्तीत्यर्थः । एवं व्याप्तिमुपयोगं दर्शयति ॥ इदमिति । पक्षधर्मतामपि दर्शयति ॥ केवलस्येति । विजृम्भितं जातम् । सृष्टित्रयमिति । प्रसिद्धमिति शेषः । अनेन मूलेऽस्य जन्मादि यत एवेत्यपि योजनां सूचयति । आगमानुग्रहीतत्वान्नात्रोपाध्यादिशङ्केत्याशयेन ब्रह्मसूत्रसंवादं तावदाह ॥ एतदिति । जगतो मायामयत्वादिकमित्यर्थः । परमं रहस्यं सकलागमानां महातात्पर्यविषयभूतम् । अनेनान्वयादित्यस्य मृषेत्यत्रापि सम्बन्ध इति दर्शयति । नन्वागमानां कुतस्तत्र तात्पर्यमित्याशङ्कापरिहाराय तदज्ञानेनानर्थं तज्ज्ञानेन मोक्षं च फलं दर्शयति ॥ ये त्वेवमिति । संनिहितज्ञानित्वासुरत्वादिरूपविशेषसूचनाय तु शब्दः । तदुपदेशादिनेति शेषः ।

असुराणां तमःप्राप्तिस्तदा नियमतो भवेत् ।
यदा तु ज्ञानिसद्भावे नैव गृह्णन्ति तत्परम् ।

इत्यादिप्रमाणप्रसिद्धिं हि शब्देन दर्शयति । ननु ज्ञानिसन्निधानेऽपि कुतो जानन्तीत्यतोऽत्र कारणमाह ।। ये त्वेतदिति । तु शब्दस्य पूर्व एवार्थः । अभ्यसूयन्तो द्विषन्तः । सर्वज्ञानेत्यत्र ज्ञानपदं ज्ञेयपरम् । परापरतत्त्वविषये भ्रान्तानित्यर्थः । नष्टान्दुष्टान् । अचेतसोऽशुद्धमनसः । अनेन तेषां स्वरूपयोग्यतां लक्षयति । ये त्वेतदित्यत्र तु शब्दः सत्स्वरूपत्वादिरूपविशेषसूचकः । मम स्थान-मिति सम्बन्धः । अञ्जसैवादरेणैव मयोदितमनुतिष्ठन्तीति सम्बन्धः । ननु वेदानां व्यवहितत्वात्कथं त्वदुदितमनुतिष्ठन्तीत्यत उक्तम् ।। पारम्पर्यागतमिति । अनेन मूले यत्रेति विशेषणान्नान्यत्र वृथेति यल्लब्धं तत्प्रदर्शितमिति ज्ञातव्यम् । ब्रह्मसूत्रपदोदितमित्युक्तं किञ्चिद्दर्शयति ।। वैधर्म्यादिति । श्रुतिसंवादमपि दर्शयति ।। प्रधान्विति । नु इदानीमस्य महतः सत्यस्य परमेश्वरस्य महान्ति सत्यानि कर्माणि प्रावोचमेवेति श्रुत्यर्थः । कर्मणां सत्यत्वं विषयसत्यतामन्तरेण नोपपद्यत इति विश्वसत्यता-सिद्धिरिति ज्ञातव्यम् । इत्यादि यथा स्यात्तथा । उक्तमिति शेषः । जन्माद्यस्य यत इत्यादीनां प्रकारान्तरेणापि सार्थक्यं दर्शयति ।। ब्रह्मसूत्रेति । अयं ग्रन्थ इत्यनन्तरमिति दर्शयितुं जन्मादी-त्यादिकमुक्तमिति शेषः । तथा च प्रमाणत्वे सतीष्टसाधनावबोधकब्रह्मसूत्रादिसम्बन्धेनास्यापि प्रामा-ण्यादिसम्भवान्नारम्भणीयत्वशङ्केति दर्शयितुं जन्माद्यस्येत्यादिकमुक्तमिति भावः । सम्बन्धप्रदर्शनं च तत्रत्यपदानामाद्यपद्ये व्यवहारेणेति ज्ञातव्यम् । जन्माद्यस्य यतोऽन्वयादिति सूत्रसम्बन्धप्रदर्शनम् । इतरतोऽर्थेष्वभिज्ञ इत्यारभ्य सत्यं परमित्यन्तैर्भारतवेदसम्बन्धो दर्शितः । एतादृशानामेव शब्दानां तत्रोभयत्र सम्भवात् । धीमहीति गायत्रीसम्बन्धप्रदर्शनम् । सूत्रादिसम्बन्धश्च तत्प्रतिपाद्यप्रति-पादकत्वरूप इति द्रष्टव्यम् । ननूक्तरीत्या प्रदर्शितः सूत्रादिसम्बन्धोऽस्य ग्रन्थस्य कुत इत्यतोऽत्र प्रमाणं दर्शयति ।। उक्तं चेति । अयं भागवतोक्तोऽर्थो ब्रह्मसूत्राणामर्थः प्रतिपाद्यः । भारतार्थस्य विनिर्णयो यस्मात्स भारतार्थविनिर्णयः । ग्रन्थ इत्यन्वयः । वेदार्थो परिबृंहितः पूर्णः । प्रतिपदम् । वेदार्थप्रतिपादक इति यावत् । साक्षान्मुख्यत एव न तु नारदादिवदुपचारेण भगवता व्यासेनोदितः कृतः । स्कन्धविच्छेदशब्दार्थौ ग्रन्थान्तरादवगन्तव्यौ । अष्टादशसहस्राणि परिमाणमस्येत्यष्टादश सहस्रः ।। ततश्चायं श्लोकार्थः ।। श्रीनारायणपरतनुर्भगवान्व्यासो मन्दबुद्ध्यादिमन्मनुजानुजिघृक्षया श्रीमद्भागवताभिधं पुराणं चिकीर्षुः स्वयमन्तरायविधुरोऽपि शिष्टाचारपरिपालनाय प्रारिप्सितपरि-समाप्त्यादिप्रयोजनतयाऽविगीतशिष्टाचारपरम्परागतमीश्वरचिन्तनरूपं मङ्गलं ग्रन्थादावुपरि निबध्नाति ।। जन्माद्यस्य यत इति । अत्र यच्छब्दश्रवणात्तमित्यध्याहार्यम् । तं परं धीमहीत्यन्वयः । ध्यायते-र्लिङि छान्दसं रूपम् । ध्यायेमेत्यर्थः । जीवव्यतिरिक्तेश्वराभावाज्जीवस्य च स्वप्रकाशतया नित्य-सिद्धत्वान्न ध्येय इत्याशङ्कानिवारणाय परमित्युक्तम् । गुणपूर्णमित्यर्थः । पृ पालनपूरणयोरिति धातोः । तथा च परापरमित्यादिश्रुतौ ध्येये परशब्दश्रवणात्तस्य च गुणपूर्तिवाचित्वाज्जीवस्य

चाल्पगुणतयाऽनुभव सिद्धत्वाज्जीवव्यतिरिक्तं गुणपूर्णं वस्तु ध्येयं भविष्यतीति भावः । अनेन ब्रह्मजिज्ञासा कर्तव्येति सूत्रान्तरांशस्य तात्पर्यमुक्तमिति ज्ञातव्यम् । ननु पर शब्दोक्तं गुणपूर्णत्वरूपं जीवभेदक लक्षणं ब्रह्मण्यसम्भावितमित्यतोऽस्यासम्भावनापरिहाराय लक्षणान्तरं द्वितीयसूत्रे उक्तं तदनुवदति ॥ जन्माद्यस्य यत इति । आदि पदेन सृष्टिस्थितिसंहारेच्छानियतिर्ज्ञानाज्ञानबन्धमोक्षादयो ग्राह्याः । नन्विदमपि ब्रह्मण्यसम्भावितमित्यत उक्तम् ॥ इतरत इति । युक्तित इत्यर्थः । क्षित्यादिकं सकर्तृकं कार्यत्वादित्यादिसामान्यसिद्धिपरिशेषरूपयुक्तिसिद्धत्वात् । गुणपूर्णत्वे च जगत्सृष्ट्यादि-कर्तृत्वमेव युक्तिरिति भावः । केवलयुक्तेरसाधकत्वात्तदनुग्राहकमागममप्यत्र दर्शयति ॥ अन्वयादिति । 'यतो वा इमानि भूतानि जायन्त' इत्यादिश्रुतीनाम् ।

सृष्टिः स्थितिश्च संहारो नियतिर्ज्ञानमावृतिः ।
बन्धमोक्षौ च पुरुषाद्यस्मात्स हरिरेकराट्

इत्यादिस्मृतीनां चात्र समन्वयाच्छक्तितात्पर्यलक्षणसम्बन्धादित्यर्थः । नन्वस्मदादेरिवासर्वज्ञ-स्यान्याधिपतियुक्तस्य च न सर्वसृष्ट्यादिकर्तृत्वं युक्तमित्यत उक्तम् ॥ अर्थेष्वभिज्ञः स्वराडिति । यतः प्रकृत्यादिष्वर्थेषु विषयेषु सर्वज्ञो यतश्च स्वराडनन्याधिपतिः । अतो जन्माद्यस्य यत इत्यन्वयः । ननु सर्वज्ञत्वानन्याधिपतित्वे एवास्य कुतः सिद्ध इत्यत उक्तम् ॥ तेन इत्यादि । आदिकवये । सर्वगुरव इति यावत् । विरिञ्चाय ब्रह्म वेदादिरूपं शब्दराशिं तदर्थभूतं परब्रह्म च तेने उपदिष्टवान् । नायमुपदेशो ब्रह्मणा विरोचनं प्रतीवेत्याह ॥ हृदेति । स्नेहेनेत्यर्थः । प्रसादपूर्वकमिति यावत् । तथा च सर्वाधिकब्रह्मगुरुत्वादुक्तं विशेषणद्वयमवश्याङ्गीकार्यम् । ब्रह्मणः सर्वाधिक्यं तद्गुरुत्वं चेश्वरस्योदाहृतश्रुत्यादिसिद्धमिति भावः । प्रसादाभावे सर्वथा न संज्ञातुं शक्य इति दर्शयति ॥ मुह्यन्तीति । यं प्रति सूरयो ज्ञानिनोऽपि गुरूपदेशं प्राप्ता अपि मुह्यन्ति । प्रसादाभाव इति शेषः । अतः प्रसाद आवश्यक इति भावः । नन्वथाऽपि न जगत्सृष्ट्यादिकर्तृत्वं युक्तम् । अवाप्त-समस्तकामस्य तेन प्रयोजनाभावादित्याशङ्कायां तस्य प्रयोजनाभावेऽपि सृष्ट्यादिव्यापार इत्याह ॥ यत्र त्रिसर्गो मृषेति । तेजोवारिमृदां यथा विनिमय एवं त्रयाणामीश्वरजीवजडानामुक्तरीत्या सर्गस्त्रिसर्गः । यत्र यस्मिन्विषये मृषा वृथैव । तथाऽपि स्वभावेन प्रवर्तत इति भावः । अथवा । यत्रैवेति योजनायामितरत्र प्रयोजनसद्भावसूचनेन स्वप्रयोजनाभावेऽपि परप्रयोजनसद्भावात्सृष्ट्यादि-प्रवृत्त्युपपत्तिरुक्ता भवतीति ज्ञातव्यम् । ननु सृष्टेरैन्द्रजालसृष्टिवन्मिथ्यात्वात्कथं तत्कर्तृत्वेन पारमार्थिकं गुणपूर्णत्वं जीवभेदकत्वं च सिद्ध्येत् । जीवश्च स्वप्रकाशतया नित्यसिद्धः । अतो विषयाभावान्न ध्यानमुपपन्नमित्यत आह ॥ अमृषेति । अत्र मृषा शब्दो मिथ्यार्थकः । कुत इत्यत आह ॥ धाम्ना स्वेन सदा निरस्तकुहकमिति । अत्र कुहक शब्दः कपटादिसर्वदोषोपलक्षकः ।

मुक्तव्यावृत्त्यर्थं सदेत्युक्तम् । रमाव्यावृत्तये स्वेन धाम्ना सामर्थ्येनेति । न चैवं सदेति व्यर्थम् । स्वसामर्थ्येनापि मुक्तानामिव न पूर्वं प्रसक्तस्य बन्धापादकदोषस्य निरासः किन्तु सदैवेति वस्तुस्थितिज्ञापनायैव सदेत्युक्तं न व्यर्थमिति द्रष्टव्यम् । तथा च स्वेन धाम्ना सदैव समस्तनिरस्तदोषत्वान्न परमेश्वरस्य मायादिदोषसम्भावना येनेन्द्रजालविधां मिथ्यासृष्टिं कुर्यादिति भावः । अमृषेत्यत्र पुनरपि हेतुद्वयं दर्शयति ॥ सत्यं परमिति । सन्निर्दुःखं नित्यं साधुभावापरपर्यायं सुखं त्वपरिच्छिन्नं यमनुभवतीत्यर्थः । परं गुणपूर्णं यतोऽतो न मृषेत्यन्वयः । एवं विधानुभावस्य मिथ्यासृष्टिकर्तृत्वमसम्भावितमेवेति भावः । अथवा । पर शब्दोक्तगुणपूर्णत्वसाधनायैव जन्माद्यस्येत्यारभ्य सत्यमित्यन्तानि सर्वाण्यपि विशेषणानि योज्यानि । अस्मिन्पक्षे योजना प्रागेवोक्ता । यद्वा । नेदं पुराणमारम्भणीयम् । प्रमाणत्वे सतीष्टसाधनावबोधकत्वशून्यत्वादित्याशङ्कायां प्रामाण्याद्युपेतब्रह्मसूत्रमहाभारतवेदगायत्रीसम्बन्धत्वादस्यापि प्रामाण्यादिकमस्ति । अत इदमारम्भणीयमेवेति भावेनास्य ग्रन्थस्य ब्रह्मसूत्रादिसम्बन्धं दर्शयितुमेतानि पदानि । अस्य पुराणस्य ब्रह्मसूत्रादिसम्बन्धस्तत्प्रतिपाद्यप्रतिपादकत्वरूपस्तत्प्रदर्शनं चाद्यपद्ये ब्रह्मसूत्रादिगतशब्दोच्चारणेनैवेति ज्ञातव्यम् । तच्च प्रागेव प्रदर्शितमिति ॥ १ ॥

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किं वाऽपरैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥ २ ॥

तात्पर्यम् - अधिकारिविषयफलान्युच्यन्ते धर्म इति । प्रोज्झितकैतवः फलानपेक्षया । ईश्वरार्पणेन परमः ।

'तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम् ।
अजातशत्रवः शान्ताः साधवः साधुभूषणाः ।
मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम्'

इत्यादि सतां लक्षणम् । सतां मात्सर्यमर्जुनस्य एकलव्य इव कुत्रचिद्दृश्यते । तद्वर्जनीयमुत्तमेषु ज्ञानार्थिना । महासंहितायां च

'उत्तमेष्वात्मनो नित्यं मात्सर्यं परिवर्जयेत् ।
कुरुते यत्र मात्सर्यं तत्तत्तस्याविहीयत'

इति । नित्यनिरस्तदोषपूर्णगुणं वास्तवम् । नित्यसंहितायां च

'निरस्ताखिलदोषं यदानन्दादिमहागुणम् ।
सर्वदा परमं ब्रह्म तस्माद्वास्तवमीयत'

इति । वस्तु अप्रतिहतं नित्यम् । स्कान्दे च

'वसनाद्वासनाद्वस्तु नित्याप्रतिहतं यतः ।
वासेनेदं यतस्तुन्नमतस्तद् ब्रह्म शब्यत'

इति । किं वा परैः अर्थकामादिकथनैः । गारुडे च

'धर्मार्थकाममोक्षाणामेकमेव पदं यतः ।
अवरोधो हृदीशस्य पृथग्वक्ष्ये न तानहम्'

इति । सद्यःशब्दः आपेक्षिक इति तत्क्षणादिति । न चासम्पूर्णाधिकारिणां तत्क्षणादवरुध्यत इति सद्यः शब्दः । अधिकारिविषयफलानां स्मरणात्फलाधिक्यं भवति । वामने च

'अधिकारं फलं चैव प्रतिपाद्यं च वस्तु यत् ।
स्मृत्वा प्रारभतो ग्रन्थं करोतीशो महत्फलम्' इति ॥ २ ॥

प्रकाशिका - धर्मः प्रोज्झितेति श्लोकेऽसङ्गतं किमुच्यत इत्यतस्तत्प्रतिपाद्यं दर्शयति ॥ अधिकारीति । प्रवृत्तधर्मव्यावृत्यर्थं प्रोज्झितकैतवः, परम इति धर्मस्य विशेषणद्वयमुक्तम् । तद्यथा तद्व्यावर्तकं स्यात्तथा व्याख्याति ॥ प्रोज्झितेति । फलानपेक्षयेत्यनेन प्रकर्षेणोज्झितं कैतवं स्वर्गादिफललक्षणं यस्मिन्स तथोक्तः । फलस्योज्झितश्च न स्वरूपेण किन्तु कामनात्यागेनैवेति व्याख्यानं सूचयति । वस्तुतो मोक्षार्थं निवृत्तकर्मपरं वेदमापाततः प्रतीतिमनुसृत्य काम्यकर्मपरं वदकिनूतव उच्यते । ततश्च स्वर्गादिफलस्यापातप्रतीत्यनुसारित्वात्कैतवत्त्वमिति ज्ञातव्यम् ॥ ईश्वरार्पणेति । 'नाहं कर्ता हरिः कर्ता तत्पूजा कर्म चाखिलमि'त्याद्यनुसन्धान रूपेणेत्यर्थः । अनेन परः परमात्मा मीयते ज्ञायते कर्तृत्वेन यत्र स परम इति व्याख्यानं सूचयति । ततश्चानेन विशेषणद्वयेन निवृत्तकर्मस्वरूपं दर्शितम् । 'निष्कामं ज्ञानपूर्वं तु निवृत्तमि'ति वचनात् । अधिकारि निरूपणाय निर्मत्सराणां सतामित्युक्तम् । तत्र सतां किं लक्षणमित्याकाङ्क्षायां कपिलेन देवहूतिं प्रति वक्ष्यमाणं सतां लक्षणं दर्शयति ॥ तितिक्षव इति । लक्षणं वक्ष्यामीति शेषः । नन्वेयं विधानां मात्सर्यमसम्भावितमेवातो निर्मत्सराणामिति व्यर्थमित्यतस्तत्प्रयोजनं वक्तुमाह ॥ सतां चेति । तथा च सतां

मात्सर्यमसम्भावितमित्येतन्न युक्तमिति भावः । नन्वेकलव्यस्य मणिमन्नामकासुरांशत्वात्तत्र मात्सर्य-मर्जुनस्य गुण एवातः कथं तद्वर्जनं विधीयत इत्यत आह ॥ तद्वर्जनीयमिति । तन्मात्सर्यं कुत इत्यत उक्तम् ॥ ज्ञानार्थिनेति । तद्वर्जनस्य ज्ञानादिगुणकारणत्वादिति भावः । इति वक्तुं निर्मत्सराणां सताम् । इत्युक्तमिति शेषः । अनेन निर्मत्सराणामित्यत्रोत्तमेष्वित्यध्याहारं सूचयति । उक्तार्थे प्रमाणमाह ॥ महासंहितायामिति । नित्यं सर्वथा तत्तदिति तच्छब्देन वीप्साश्रवणाद्यत्र यत्रेति योज्यम् । तथा च यत्र यत्र ज्ञानादौ विषये य आत्मन उत्तमेषु मात्सर्यं कुरुते तस्य मात्सर्य-कर्तुस्तत्तज्ज्ञानभक्त्यादिकं विहीयते विगतं भवतीत्यर्थः । धर्मः प्रोज्झित इत्यादिनाऽवान्तर-विषयमुक्त्वा प्रधानविषयं दर्शयितुं वेद्यं वास्तवमत्रेत्यादिकं वाक्यम् । तत्र वस्तुनो ब्रह्मणः सम्बन्धि चेतनाचेतनात्मकं जगद्वास्तवं तद्वस्तु वस्त्वेव न ततोऽतिरिक्तमिति । अत्र वेद्यमयत्नेनैव ज्ञातुं शक्यमिति व्याख्यानमप्रामाणिकं प्रमाणविरुद्धं चेति भावेन वास्तववस्तुशब्दयोरभिमतमर्थं सप्रमाण-कमाह ॥ नित्यनिरस्तेति । नित्यं सर्वदा निरस्तदोषं च तत्पूर्णं पूर्णगुणं चेति विग्रहः । यत्तु यस्मात्सर्वदा निरस्ताखिलदोषमिति सम्बन्धः । इदं च मुक्तानामिव निर्दोषत्वं न कादाचित्कमिति प्रदर्शनाय । एतत्प्रमाणबलादेव वास्तव शब्दादुक्तार्थलाभ इति मन्तव्यम् । अप्रतिहतं देशतोऽ-परिच्छिन्नम् । नित्यं कालतोऽप्यपरिच्छिन्नम् । इदं वस्तुशब्दस्यार्थद्वयं पौराणिकरूढिमाश्रित्योक्तम् । वसनाद्वासनादित्यनेन जगति वसतीति जगत्स्वस्मिन्वासयतीति च वस्तु शब्दो यौगिको व्याख्यातः । रूढिमाश्रित्यापि व्याख्याति ॥ नित्येति । नित्यमप्रतिहतं च यतोऽतोऽपि वस्त्वित्यर्थः । प्रकारान्तरेणापि प्रयोगं दर्शयति ॥ वासनेति । इदं जगत्तुन्नं व्यथनविषयीकृतम् । संसारिकृतमिति यावत् । अतो ब्रह्म तत्तद्वस्तु शब्द्यत इत्यर्थः । धर्मादीनां मध्ये निवृत्तधर्मः प्रतिपाद्य इत्युक्तम् । प्रवृत्तधर्मस्यार्थकामयोश्चात्र कुतो न कथनमित्यत उक्तम् ॥ किं वा परैरिति । अत्र प्रक्रमानुगुण्याय कथितैरिति शेषमभिप्रेत्य तात्पर्यमाह ॥ अर्थकामादिकथनैरिति । सतः प्रति अर्थादीनां निरूपणस्य गुर्वादितुष्टिद्वारेश्वरस्य हृद्यवरोधनमेव साध्यं फलम् । तच्चात्र साक्षादेव श्रवणादिना लभ्यतेऽतो न तेषामप्यत्र कथनमिति भावः । अत्र पुराणसंमतिमाह ॥ गारुडे चेति । धर्मार्थकाममोक्षाणां प्रति-पादितानां सकाशाद्धृदीशस्यावरोध इति यत्तदेवैकं मुख्यं पदं प्राप्यं फलं यतो यतश्च तत्फल-निवृत्तधर्मादिप्रतिपादकैतत्पुराणश्रवणमात्रेण भवति । अतस्तान्धर्मादीन् पृथक् निवृत्तधर्मादिव-द्विस्तरेण न वक्ष्य इति पुराणकर्तुरेव वाक्यम् । सद्य इत्युक्तत्वात्तत्क्षणादिति व्यर्थमित्यतस्तत्कृत्यमाह ॥ सद्यः शब्द इति ॥ आपेक्षिक इति । मासाद्यपेक्षया दिवसादेरपि सद्यः शब्दार्थत्वादित्यर्थ इति हेतोः सद्यःशब्दार्थभूतं कालविशेषं दर्शयितुं तत्क्षणादित्युक्तमित्यर्थः । तर्हि सद्यःशब्दो व्यर्थ इत्यतस्तस्यापि प्रयोजनमाह ॥ न चेति । अधिकारिभेदादुभयं सार्थकमिति भावः । नन्वत्राधि-कार्यादिकथनं व्यर्थम् । ब्रह्मसूत्रादिसम्बन्ध पददर्शनेनैव अनारम्भणीयत्वशङ्कायाः निरस्तत्वादित्यत आह ॥ अधिकारीति । स्मरणात्कथनात् । अत्र प्रमाणमाह ॥ वामने चेति । तत्स्मृत्यैवेति सम्बन्धः।

ततश्चायं श्लोकार्थः ।। प्रधानविषयप्रतिपत्त्यर्थत्वादवान्तरविषयं प्रथमं दर्शयति ।। धर्म इति । अत्र श्रीमद्भागवतधर्मः प्रतिपाद्यः । प्रवृत्तधर्मं व्यावर्तयितुं प्रोज्झितकैतवः परम इति विशेषणद्वयम् । प्रकर्षेणोज्झितं कैतवं स्वर्गादिफललक्षणं यस्मिन्स तथोक्तः । उज्झितश्च न स्वरूपेण किन्तु कामनात्यागेनैव । मोक्षफलकं वेदं स्वर्गादिफलकं वदन्कितव उच्यते । तत्सम्बन्धित्वात्स्वर्गादिकं कैतव शब्दवाच्यमिति हृदयम् । परः परमात्मा मीयते ज्ञायते कर्तृत्वेन यत्र स परमः । नाहं कर्तेत्याद्यनुसन्धानेन क्रियमाणमित्यर्थः । ततश्चानेन निवृत्तधर्मस्वरूपं निरूपितं भवति । निष्कामं ज्ञानपूर्वं तु निवृत्तमिति वचनात् । अधिकारिनिरूपणाय निर्मत्सराणां सतामित्युक्तम् । सतामपि दुष्टेषु मात्सर्यं दृश्यते । तत्सर्वथा न कार्यं स्वोत्तमेष्विति प्रदर्शनाय निर्मत्सराणामित्युक्तम् । इदानीं प्रधानप्रतिपाद्यं दर्शयति ।। वेद्यमिति । वास्तवं नित्यनिरस्तदोषं पूर्णगुणं वस्तु कालतो देशतश्चापरिच्छिन्नम् । वेद्यं प्राधान्येन प्रतिपाद्यम् । वास्तववस्तुशब्दाभ्यां देशतः कालतो गुणतश्च परिपूर्णं सर्वदा निर्दोषं ब्रह्म प्रतिपाद्यतयोक्तमिति ज्ञातव्यम् । ननु यज्ज्ञानादात्यन्तिकानिष्टनिवृतीष्टप्राप्तिरूपो मोक्षस्तस्यैव प्राधान्येन विषयत्वं युक्तम् । न चोक्तरूपस्य ब्रह्मज्ञानस्य तदस्ति । सुराणकादिष्वदर्शनात् । अतः कथमेतदित्यत उक्तम् ।। अत्र निर्मत्सरेषु सत्सु शिवदं तापत्रयोन्मूलनमिति । स्वज्ञानेनेति शेषः । शिव शब्देन स्वरूपानन्दाविर्भावादिकम् । तापत्रयशब्देन चात्यन्तिकमनिष्टं ग्राह्यम् । सुराणकादयश्च नोक्तरूपा इति भावः । अनेन फलमुक्तमिति ज्ञातव्यम् । भागवतस्य श्रीमत्वं नामेतरपुराणेभ्य आधिक्येन पुरुषार्थप्रदत्वम् । तत्कुत इत्यत उक्तम् ।। महामुनिकृत इति । यद्यपीदं शैवादिपुराणसाधारणं तथापि महान्पूज्यो मुनिर्नारदो यस्य प्रेरकः स तथोक्तस्तेन कृत इति व्याख्यानाददोषः । नारदेन हि प्रार्थितो व्यासो मनुष्योत्तमानुजिघृक्षयेदं पुराणं कृतवान् । अत इदं सतां मनुष्याणामितरपुराणापेक्षयाऽऽधिक्येन पुरुषार्थप्रदं ज्ञातमिति भावः । यद्वा । 'वेत्ता वेद्यस्य सर्वस्य मुनिः सद्भिरुदाहृत' इति वचनान्मुनयो ब्रह्माद्यास्तेभ्योऽप्यतिशयेन सार्वज्ञान्महामुनिव्यासस्तेन कृते प्रणीते इत्यर्थः । इतर पुराणानि तु न व्याससार्वज्ञमूलानि किन्तु मोहार्थमेव प्रणीतानीति भावः । ननु निवृत्तधर्मादिवदर्थकामादिकमपि कुतोऽत्र न कथ्यत आह ।। किं वाऽपरैरिति । अपरैरर्थकामादिभिः कथितैः किं वा फलं स्यान्न किमपि । कुत इत्यत आह ।। ईश्वर इत्यादि । अत्र श्रीमद्भागवते कृतिभिः शिक्षितबुद्धिभिः शुश्रूषुभिर्गुर्वादिसेवाकरणकुशलैः श्रोतुमिच्छद्भिर्वा ईश्वरो हृदि स्वहृदये सद्यः शीघ्रं तत्क्षणाद्व्यवधानमन्तरेणावरुद्ध्यते भक्तिपाशेन बद्धो भवतीत्यर्थः । अत्र सद्यस्तत्क्षणशब्दावधिकारिभेदविवक्षयोपात्तौ । ये सम्यक् सामग्री सम्पन्नास्तेषां तत्क्षणात्, ये तु न तादृशास्तेषामपि सद्यः शीघ्रमेव नेतरपुराणाभ्यासिनामिव विलम्बेनेति । सज्जनान्प्रत्यर्थकामादिकथनस्य हि गुर्वादितुष्टिद्वारेश्वरस्य हृद्यवरोधनमेव फलतया वाच्यम् । तच्चेश्वरपरभागवतश्रवणादिनैव लभ्यते । अतस्तदप्यत्र न वाच्यमिति भावः । अनेन भागवतस्यैवोक्तं श्रीमत्वमप्युपपादितं भवतीति ज्ञातव्यम् ।। २ ।।

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसम्युतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ३ ॥

तात्पर्यम् - ज्ञातफलस्यापि प्रशंसाविधिभ्यां क्षिप्रप्रवृत्तिर्भवतीति प्रशस्य विधत्ते । निगमकल्पतरोरिति । भगवता गलितम् । शुकेन द्रवीकृतम् । उक्तं च ब्रह्माण्डे 'धर्मपुष्पस्त्वर्थपत्रः कामपल्लवसंयुतः। महामोक्षफलो वृक्षो वेदोऽयं समुदीरितः। शातितानि फलानीह कृष्णद्वैपायनेन तु । भारतादीनि यानीह तथा भागवतं भुवि । आर्द्रीकृतानि तानीह शुकप्रभृतिर्जनैः । ख्यापयद्भिर्गुरुप्रोक्तान्वेदार्थान् ग्रन्थनिष्ठितान् । कानिचिद्दर्शयामास वृक्षस्याग्रे फलानि तु । व्याचक्षमाणो वेदार्थं भगवाँल्लोकपूजितः । एतेषामथ तेषां वा रसं पिबत सज्जनाः । आमोक्षान्महती तृप्तिरहो मे पश्यतो भवेदि'ति ॥ ३ ॥

प्रकाशिका - पूर्वश्लोके फलादीनामुक्तत्वेनात्र प्रेक्षावत्प्रवृत्तिसम्भवात्किमर्थं निगमकल्पतरोरित्युत्तरश्लोके भागवतं प्रशस्य तच्छ्रवणं विधीयत इत्याशङ्कामपाकुर्वन् उत्तरश्लोकमवतारयति ॥ ज्ञातफलस्यापीति । फल शब्देन विषयादिकमपि ग्राह्यम् । ज्ञातं फलं येन स तथोक्तस्तस्य पुरुषस्येत्यर्थः । प्रशंसाग्रन्थस्य विधिस्तच्छ्रवणस्य ताभ्यामित्यर्थः । क्षिप्रप्रवृत्तिः । ग्रन्थश्रवणेनेति शेषः । इति शब्दो हेतौ । प्रशस्य निगमवृक्षफलत्वादिना । भागवतमिति शेषः । विधत्ते । तच्छ्रवणं पिबतेत्यनेन विधत्त इत्यर्थः । प्रेक्षावतां क्षिप्रप्रवृत्यर्थे ग्रन्थप्रशंसादिकमत्र क्रियत इति भावः । गलितमित्यस्य स्वत एव पतितमित्यन्यथाप्रतीतिवारणायार्थमाह ॥ भगवतेति । व्यासेनेत्यर्थः । तथा च गलितमित्यस्य शातितमित्यर्थ इति भावः । शातितमिति वक्तव्ये गलितमिति वचनं वक्तुरायासाभावसूचनाय । शुकमुखादमृतद्रवसंयुतमित्यस्य तात्पर्यं दर्शयति ॥ शुकेनेति । तथा च शुकः शुकमुनिर्मुखो मुख्यं प्रधानो यस्य सूतादिवक्तृसमूहस्य स तथोक्तस्तस्मादित्यर्थ उक्तो भवति । मुख शब्दस्य वक्तृवाचित्वे शुखमुखेनेत्यत्वक्षत् । प्राधान्यार्थत्वे तु शुकप्रभृतिभिरिति वक्ष्यमाणप्रमाणमप्यनुसृतं भवतीति ज्ञातव्यम् । समग्रश्लोकतात्पर्यं प्रमाणेनैव दर्शयति ॥ उक्तं चेति । निगमकल्पतरोरित्यस्य विवरणम् ॥ धर्मपुष्प इत्यादि । पुष्पस्य फलहेतुत्वाद्धर्मस्य च मोक्षरूपफलहेतुत्वात्पुष्पत्वेन निरूपणम् । पत्राणां पुष्पकारणत्वादर्थस्य च धर्मकारणत्वात्पत्रत्वेन निरूपणम् । पल्लवानां पत्रकारणत्वात्कामस्य चार्थकारणत्वात्पल्लवत्वेनोक्तिः । फलस्य महत्वविशेषणं वक्ष्यमाणभारताद्यवान्तरफलव्यावृत्त्यै । गलितमित्यस्य विवरणम् ॥ शातितानीति । कृष्णद्वैपायनेत्यनेन कर्तृपदस्याध्याहारं सूचयति । आदि पदेन भागवतस्यापि लाभेऽपि तथा भागवतमित्युक्तिर्भागवतस्येतरपुराणवैलक्षण्यद्योतनाय । शुकमुखादमृतद्रवसंयुतमित्यस्य तात्पर्यम् ॥

आर्द्रीकृतानिति । द्रवीकृतानीत्यर्थः । आद्रीकरणमेवाह । ख्यापयद्भिरिति । गुरूपदेशानुसारेण वेदार्थप्रतिपादकत्वप्रदर्शनसेवाद्रीकरणमत्र विवक्षितमिति भावः । प्रसिद्धवृक्षे हि केचन पुरुषेण फलेषु शातितेष्वप्यग्रे तदशातितानि फलानि तिष्ठन्ति । तथा च कृष्णद्वैपायनेन शातितानि फलानि कानीत्यपेक्षायामाह ॥ कानिचिदिति । पञ्चरात्रमूलरामायणादीनीत्यर्थः । वृक्षस्य निगमवृक्षस्याग्रे पूर्वम् । विद्यमानानीति शेषः । अनेन कृष्णद्वैपायनेन वेदार्थव्याख्यानरूपा निबन्धाः केचन पूर्वं विद्यमानाः शिष्येभ्यो व्याख्याताः । केचन स्वेनैव कृता इत्युक्तं भवति । रसं पिबतेत्यस्य तात्पर्यमाह ॥ एतेषामिति । एतेषां व्यासकृतानाम् । तेषां पूर्वतनानाम् । वा शब्दश्च शब्दार्थः । रसांस्तत्पर्यविषयीभूतान्पिबतपानं कुरुत । श्रवणादिनाऽऽस्वादयतेत्यर्थः । रसिका इत्यस्य तात्पर्यम् ॥ सज्जना इति । आलयमित्यस्य तात्पर्यम् ॥ आमोक्षादिति । मोक्षमभिव्याप्येत्यर्थः । तथा च मोक्षेऽप्येतत्पानं न त्याज्यमिति भावः । अहो इत्यनेन सूचितं पानफलं दर्शयति ॥ महतीति । अत्र अहो इत्यनुवादः। पश्यतः पानकर्तॄनिति शेषः । भगवद्वाक्यमिदम् । तेन भगवत्प्रीतिरेव दानफलमित्युक्तं भवति । अत्र भागवतस्यापि निगमकल्पतरोः शातित्वादेरुक्तत्वात्प्रकृतसङ्गतिरिति ध्येयम् ॥ ततश्चायं श्लोकार्थः ॥ भुवि मर्त्यलोके भावुका भवनशीला रसिका रसज्ञाः सज्जना यूयं निगमो वेदः स एव कल्पतरुः सर्वपुरुषार्थप्रदत्वात् । तस्माद्भगवता व्यासेन गलितं शातितं फलं वेदार्थसारत्वात्फलस्थानीयं यद्भागवतं तस्य रसमास्वाद्यत्वात् । रसस्थानीयं तात्पर्यविषयीभूतमर्थं मुहुर्मुहुर्वारंवारमालयं मोक्षमभिव्याप्य पिबत पानं कुरुत । श्रवणादिनेति शेषः । आस्वादयतेत्यर्थः । ननु लोके फलं शुकपक्षिमुखस्पृष्टममृतद्रवसंयुतं भवतीति प्रसिद्धं तदत्र कथमित्यपेक्षायामुक्तम् ॥ शुकमुखादमृतद्रवसंयुतमिति । शुको मुनिः स एव मुखः प्रधानो यस्य सूतादिव्याख्यातृसमूहस्य स तथोक्तस्तस्मादमृताय मोक्षाय द्रवो द्रवणं गुरूपदेशानुसारेण वेदव्याख्यानरूपत्वप्रदर्शनं तेन संयुतमिति ग्रन्थपक्षे व्याख्येयम् । फलपक्षे तु शुकः पक्षिविशेषस्तस्य मुखं मुखस्पर्शस्तस्मादमृतोऽमृततुल्यो द्रवे रसस्तेन संयुतमित्यर्थो द्रष्टव्यः । अहो इत्यास्वादनेनेदं सूचयति । भगवान्व्यासो मच्छातितरसपानकर्तॄन् भवतोऽवलोक्य मम युष्मासु महती प्रीतिर्भवति यथा युष्माकमशेषपुरुषार्थप्राप्तिर्भविष्यतीति ॥ ३ ॥

नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः ।
सत्त्रं स्वर्गाय लोकाय सहस्रसममासत ॥ ४ ॥

त एकदा तु मुनयः प्रातर्हुतहुताशनाः ।
सत्कृतं सूतमासीनं प्रपच्छुरिदमादृताः ॥ ५ ॥

तात्पर्यम् - **प्रकारान्तरेण पुरुषार्थशङ्कानिवृत्त्यर्थमाख्यायिका । पाद्मे च 'आख्यायिकाः प्रदर्श्यन्ते सर्ववेदेषु सर्वशः । द्योतयन्त्यस्तु महतां तात्पर्यं तत्र तत्र ह । अलाभः पुरुषार्थस्य प्रोक्तमर्थमृते त्विति । द्योतनाय महाराज श्रद्धावृद्ध्यर्थमेव चे'ति ॥ ४ ॥**

प्रकाशिका - ननु नैमिष इत्यादिनोत्तरग्रन्थेन किमसङ्गतमुच्यत इत्यतस्तत्प्रयोजनमाह ॥ प्रकारान्तरेणेति । शिवदं तापत्रयोन्मूलनमिति भगवत्ज्ञानस्य मोक्षहेतुत्वमुक्तं तद्युक्तम् । अपामसोममृता अभूमेति कर्मणोऽपि मोक्षश्रवणादिति प्रकारान्तरेणोक्तप्रकारादन्येन प्रकारेण मोक्षशङ्कायां तन्निवृत्त्यर्थं नैमिष इत्यादिनाऽऽख्यायिका । उच्यत इति शेषः । यदि कर्मणैव मोक्षस्तर्हि कर्मकर्तॄणां सनकादीनां तत्र तत्राञ्जसाऽऽयुष्मन् भवता यद्विनिश्चितम् । पुंसामेकान्ततः श्रेयस्तन्नः शंसितुमर्हसीत्यादिना हरिमाहात्म्यकथनप्रार्थनमयुक्तं स्यात्तेन ज्ञायते न कर्म साक्षान्मोक्ष-साधनं किन्तु ज्ञानद्वारैवेति वक्ष्यमाणाख्यायिकयोक्तशङ्कानिवृत्तिर्ज्ञातव्या । तथा चोक्तार्थसमर्थ-नायाख्यायिकोच्यतेऽतो नासङ्गतिरिति भावः । आख्यायिकानामुक्तार्थसमर्थनार्थत्वे प्रमाणमप्याह ॥ पाद्मे चेति । सर्वशः सर्वास्तत्र तत्र प्रमेयविशेषेषु । हेत्यनेनाख्यायिकानां पुराकल्परूपार्थवादित्वेन तात्पर्यलिङ्गत्वं युक्तमेवेति सूचयति । पुरुषार्थस्य मोक्षादिरूपस्य श्रद्धावृद्ध्यर्थम् । उक्तार्थ इति शेषः। अलाभ एवेत्यन्वयः । तथा च काश्चनाख्यायिकास्तात्पर्यद्योतनाय काश्चनोक्तार्थे पुरुषार्थलाभकथनाय काश्चन श्रद्धावृद्ध्यर्थं प्रदश्यन्त इत्यर्थः ॥ स्पष्टत्वात्त्यक्तस्य नैमिष इत्यादिश्लोकद्वयस्यायमर्थः ॥ शुनकस्यापत्यं शौनकः । तन्नामकऋषिरादिर्येषां ते शौनकादयः । ऋषयस्त्रिलोकदर्शिनो नैमिषे निमिषमात्रेण यत्र दानवबलं निहतं तदरण्यं नैमिषमित्युच्यते । नैमिषारण्य इत्यर्थः ॥ यथोक्तं वराहपुराणे ॥ एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा । उवाच निमिषेणेदं निहतं दानवं बलम् । अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितम् । भविष्यति यथार्थं वै ब्राह्मणानां विशेषकमिति । अनिमिपक्षेत्रे । अनिमिषो विष्ण्वादयो देवास्तेषामावासस्थाने । सत्रं बहुकर्तृकं यागविशेषमुद्दिश्य स्वः स्वरतो विष्णुः गः गतो यस्मिन्स स्वर्गो वैकुण्ठाख्यः । तस्मै लोकाय तल्लोकप्राप्तये । सहस्रं समाः संवत्सरा अनुष्ठानकाले यस्य तत्सहस्रसमम् । सत्रविशेषणमेतत् । आसत उपाविशन् अदीक्षयन्नित्यर्थः । ये सत्रयागे दीक्षितास्ते मुनयः सर्वज्ञा अपि । एकदा तु कस्मिंश्चित्कालविशेषे स्वाश्रमं प्रत्यागतं सत्कृतं तत्तद्योग्यपूजासाधनैः पूजितमासीनम् । स्वदत्तपीठ इति शेषः । इदं वक्ष्यमाणं कथं भूताः । आदृतास्तेनापि पूजिताः ॥ ४, ५ ॥

ऋषय ऊचुः -

त्वया खलु पुराणानि सेतिहासानि चानघ ।
आख्यातान्यप्यधीतानि धर्मशास्त्राणि तान्युत ॥ ६ ॥

प्रकाशिका— पृष्टव्यार्थं वक्तुं तव ज्ञानमस्तीत्याशयेन सम्यगुत्तरदानाय सूतं स्तुवन्तीत्याह ॥ त्वयेति । च शब्दादुपपुराणानि । यानि मनुयाज्ञवल्क्यादि प्रणीतानि तानि धर्मशास्त्राणि तान्युत तान्यपि । अधीतानि आख्यातान्यपीत्यन्वयः ॥ ६ ॥

यानि वेदविदां श्रेष्ठो भगवान् बादरायणः ।
अन्ये च मुनयः सूत परावरविदो विदुः ॥ ७ ॥

वेत्थ त्वं सौम्य तत्सर्वं तत्वतस्तदनुग्रहात् ।
ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ ८ ॥

तात्पर्यम्— यानि भगवज्ज्ञातान्यन्यैरप्यृषिभिर्ज्ञायन्ते तानि वेत्थ । उक्तं हि ब्रह्माण्डे 'द्वैपायनेन यद्बुद्धं ब्रह्माद्यैस्तन्न बुध्यते । सर्वबुद्धं स वै वेद तद् बुद्धं नान्यगोचरमि'ति ॥ ७-८ ॥

प्रकाशिका— त्वं बादरायणसम्प्रदायाभिज्ञोऽसीत्याशयेनाहुरित्याह ॥ यानीति । अत्र यानि बादरायणो वेद । अन्ये च मुनयो यानि विदुस्तत्सर्वं वेत्थेत्युक्त्या बादरायणाज्ञातज्ञानित्वं मुनीनां प्रतीयते । न चेदं युक्तम् । विदां श्रेष्ठ इति तस्य सर्वज्ञत्वाभिधानात् । अतोऽत्र विवक्षितं तात्पर्यं दर्शयति ॥ यानीति । यानि भगवत्ज्ञातानीति पूर्वार्धतात्पर्यम् । तान्यन्यैरपि ऋषिभिर्ज्ञायन्त इति द्वितीयार्धस्य । तानि वेत्थेति तृतीयार्धस्य । प्रतीतार्थे प्रमाणविरोधं दर्शयति ॥ उक्तं हीति । तदित्यनन्तरं सर्वमिति शेषः । सर्व बुद्धं स वै वेदेत्यनेन विदां श्रेष्ठ इत्येतदुक्तार्थम् । तद्बुद्धं ब्रह्मादि-बुद्धम् अत्रापि । सर्वमिति शेषः । अन्येषां सूतादीनां बुद्धिगोचरं नेत्यर्थः । ततश्चायं श्लोकार्थः ॥ निरुपचरितं सार्वज्ञं सूचयितुं विदां श्रेष्ठ इत्युक्तम् । तदुपपादनाय भगवानिति । तथा च विदां सर्वज्ञानां श्रेष्ठो भगवान् बादरायणो यानि प्रमेयानि वेद परावरविदः परावरतत्त्वविदः । अतीताना-गतविद इति वा । अन्ये ब्रह्मादयः शुकादयश्च । चशब्दोऽपिशब्दार्थः । मुनयोऽपि सर्वज्ञा अपि तान्येव स्वस्वयोग्यतानुसारेण तत्त्वतस्तदनुग्रहाद् बादरायणानुग्रहाद्विदुर्न तदविदितानि । हे सौम्य साधो । त्वं तत्सर्वं तस्य मुनिविदितस्य मध्ये सर्वं वैदिकव्यतिरिक्तं सर्वं पुराणादिकं तेषामनुग्र-हात्तत्त्वतो वेत्थेति । तत्त्वतो ज्ञानहेतुमाह ॥ ब्रूयुरिति । स्निग्धस्य भक्तिसम्पन्नस्य । प्रेमवत इति वा । अत एव गौप्यमपि ब्रूयुरेवेत्यर्थः ॥ ७ ॥

तत्र तत्राञ्जसाऽऽयुष्मन् ! भवता यद्विनिश्चितम् ।
पुंसोमेकान्ततः श्रेयस्तन्नः शंसितुमर्हसि ॥ ९ ॥

प्रकाशिका— इदानीमभिमतार्थं वक्तुं प्रार्थयन्तीत्याह ॥ तत्र तत्रेति । हे आयुष्मन्प्रशस्तायुषसम्पन्न । तत्र तत्र ग्रन्थेषु । अञ्जसा उपक्रमादितात्पर्य लिङ्गानुसारेण पुंसामधिकारिणामेकान्ततो नियमेन श्रेयः श्रेयःसाधनं भवता यद्विनिश्चितं निर्णीतम् । परधर्म एव तादृशश्चेत्स एव कीदृश इति प्रश्नाशयः ॥ ९ ॥

प्रायेणाल्पायुषो मर्त्याः कलावस्मिन् युगे जनाः ।
मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ॥ १० ॥

प्रकाशिका— अधिकारिणां पुंसां बहुकालेन बहुशास्त्रश्रवणादिना श्रेयःसाधननिर्णयो भविष्यत्यतः किं मदीयेन तच्छंसनेनेति शङ्कायां नेत्याहुरित्याह ॥ प्रायेणेति । अल्पायुषस्तत्रापि मन्दा अलसास्तत्रापि सुमन्दमतयस्तत्रापि मन्दभाग्या अल्पपुण्याः । विघ्नाकुला इति यावत् । तत्राप्युपद्रुता रोगादिपीडिताः । प्रायेणेति प्रत्येकमभिसम्बद्ध्यते ॥ १० ॥

भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः ।
अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया ।
ब्रूहि भद्राय भूतानां येनात्माऽऽशु प्रसीदति ॥ ११ ॥

प्रकाशिका— ननु श्रेयःसाधने विप्रतिपत्त्यभावान्न मदीयशंसनस्य कृत्यमस्तीत्यत उक्तम् ॥ भूरीणीति । भूरिकर्माणि भूरीणि कर्माणि अनुष्ठेयानि येषु तानि तथोक्तानि । कष्टसाध्यानीति यावत् । विभागशो वादिनां विभागेन यतः सन्तीति शेषः । तथा च वादिनां शैवादीनां विभागेनानेकत्वेन तत्तद्वाद्युदितानि कष्टसाध्यानि बहूनि श्रोतव्यानि श्रेयःसाधनानि यतः संत्यतो विप्रतिपत्तिसद्भावेन निश्चयासम्भवाद्यत्सारं श्रेष्ठमव्यभिचारि ऋजुमार्गेणानुष्ठेयं वा । श्रेयःसाधनं समुद्धृत्य निश्चित्य भद्राय मोक्षायात्मा परमात्मा मनो वा प्रसीदति निर्मलं भवतीति ॥ ११ ॥

सूत जानासि भद्रं ते भगवान् सात्वतां पतिः ।
देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया ॥ १२ ॥

तन्नः शुश्रूषमाणानामर्हस्यङ्गानुवर्णितुम् ।
यस्यावतारो भूतानां क्षेमाय विभवाय च ॥ १३ ॥

प्रकाशिका— प्रश्नान्तरं कुर्वन्तीत्याह ॥ सूत जानासीति । कृष्णावतारकृत्यादिकमिति शेषः । भद्रं त इत्यौत्सुक्यं नाशीर्वादः । सात्त्वतां पञ्चरात्रोक्तकर्मकुर्वतां यादवादीनां पतिः पालकः । यस्य

कार्यविशेषस्य । अङ्ग प्रियेति सम्बोधनम् । मूलरूपस्य हरेर्यशः श्रवणस्यावश्यकतामुपपादयन्तीत्याह ।। यस्यावतार इत्यादिना कलिमलापहमित्यन्तेन । यस्य हरेरवतारो भूतानां सज्जनानां क्षेमाय प्राप्त-संरक्षणाय । विभवायाप्राप्तैश्वर्यादि प्राप्तये । तस्य यशः को वा न शृणुयादित्यन्वयः । परोप-कारिपुरुषयशःश्रवणं मनः शुद्धिकरमिति प्रसिद्धमेवेति भावः । तथा च मनः शुद्धिकरत्वाद्धरिचरित्र श्रवणमावश्यकमित्युक्तं भवति ।। १२, १३ ।।

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणान् ।
ततः सद्यो विमुच्येत यं बिभेति स्वयं भवः ।। १४ ।।

तात्पर्यम्— विवशः बह्वभ्यासात् । उक्तं च ब्रह्मवैवर्ते । 'शारीराद्वाचिकाभ्यासो वाचिका-न्मानसो भवेत् । मानसाद्विवशान्मुच्येन्नान्यथा मुक्तिरिष्यत' इति ।। १४ ।।

प्रकाशिका— कैमुत्यन्यायेनापि हरिचरित्र श्रवणस्य शुद्धिकरत्वमुपपादयन्तीत्याह ।। आपन्न इति द्वाभ्याम् । अत्र यन्नामविवशोगृणन्संसारात्सद्यो विमुच्यत इत्युच्यते । न चेदं सम्भवति । परवशस्य नामग्रहणस्यैवासम्भवात् । सम्भवे वा तेन सद्यो विमुक्तेश्चासम्भावितत्वादित्या शङ्कायामे-तदुभयमुपपादयति ।। विवश इति । मानसात् बह्वभ्यासादित्यर्थः । तथा च निरन्तरं हरिस्मरण-रूपान्मानसाऽभ्यासाद्विवशः शरीरादिबाह्यविषयवशो न भवतीत्यर्थस्यात्र विवक्षिततत्वान्नोक्तदोष इति भावः । एतादृशमानसाभ्यासस्य कारणं कार्यं च दर्शयितुं प्रमाणं पठति ।। उक्तं चेति । शरीरात्कायात् । विष्णुवैष्णवसेवारूपादभ्यासात् चिकाभ्यासोऽध्ययनव्याख्यानादिरूपो वा मानसो निरन्तरहरिस्मरण रूपः । मानसादभ्यासाद्विवशो विषयादिरूपपरवशतारहितः ।। ततश्चायमा-पन्नःसंसृतिं घोरामित्यादेरयमर्थः । घोरां संसृतिमापन्नः प्राप्तोऽधिकारी विवशो विषयासक्तिशून्यः सन् यस्य हरेर्नाम गृणन् अर्थानुसन्धानपूर्वकमुच्चारयंस्ततः संसृतेः सद्यः शीघ्रं विमुच्यते । कुत इत्यत उक्तम् । यं हरिं प्रतिभवः संसारः स्वयं बिभेति । तथा च हरिनामोच्चारणं संसारान्मोचकम् । संसारभीषकस्य नामोच्चारणत्वात् । यद्यद्भीषकनामोच्चारणं तत्तस्मान्मोचकम् । यथा सर्पभीष-कगरुडनामोच्चारणं सर्पान्मोचकमित्यनुमानमत्राभिप्रेतम् । एवं चोक्तमानसाभ्यासाद्विवशस्य यदा नामोच्चारणमात्रं संसारनिवर्तकं तदा तस्य तद्यशः श्रवणं शुद्धिकरमिति किं वक्तव्यमिति कैमुत्यमत्र द्रष्टव्यम् ।। १४ ।।

यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः ।
सद्यः पुनन्त्युपस्पृष्टाः स्वर्धुनीवानुसेवया ।। १५ ।।

को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः ।
शुद्धिकामो न शृणुयाद्यशः कलिमलापहम् ॥ १६ ॥

प्रकाशिका— यस्य हरेः पादावाश्रयौ येषां ते तथोक्ताः । कचित्पादसंश्रयादिति पाठः । प्रकृष्टः शमो भगवन्निष्ठबुद्धिस्तस्य अप्ययनाऽऽश्रया । तद्वन्त इति यावत् । उपस्पृष्टा यैः प्राणिभिः सेवितास्तान्सद्यः शीघ्रं पुनन्ति । तत्त्वोपदेशादिना पवित्रीकुर्वन्ति । स्वर्धुनी स्वर्नदी गङ्गेव । सेवया स्नानपानादिरूपया । अनुपश्चात् । गङ्गा हि स्नानादिना सेविता सती गुरूपदेशं प्रापयित्वा पुनाति । सेविता मुनयस्तु तत्कालमेवेति सूचयितुं सद्य इति । अन्विति चोक्तम् । स्वर्धुन्यां पादसंश्रयत्वं पादान्निःसृतत्वरूपं द्रष्टव्यम् । अत्र यदा यस्य भक्तानामपि सेवा शुद्धिकरी तदा तस्य यशःश्रवण-रूपा सेवा शुद्धिकरीति किं वक्तव्यमिति कैमुत्यमुक्तमिति ज्ञातव्यम् । स्वर्धुन्यापः इति पाठे गङ्गोद-कमिवेति लुप्तोपमा । पुण्यश्लोकैर्ब्रह्मादिभिरीड्यानि कर्माणि कंस हननादीनि यस्य स तथोक्तस्तस्य । शुद्धिकामो मनःशुद्धिकामो यशश्चरितं कलिनिमित्तं मलं पापमपहन्तीति कलिमलापहम् ॥१५,१६॥

तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः ।
ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः ॥ १७ ॥

प्रकाशिका— प्रश्नान्तरं कुर्वन्तीत्याह ॥ तस्य कर्माणीति । तस्य मूलरूपस्य हरेः कर्माणि सृष्ट्यादीनि । कलाश्चतुः पञ्चदशद्वादशशतसहस्रादिव्यूहान् ॥ १७ ॥

अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः ।
लीला विदधतः स्वैरमीश्वरस्यात्ममायया ॥ १८ ॥

तात्पर्यम्— आत्ममायया स्वरूपभूतेच्छया । 'महामायेत्यविद्येति नियतिर्मोहिनीति च । प्रकृतिर्वासनेत्येव तवेच्छाऽनन्त कथ्यत' इति स्कान्दे । विष्णुसंहितायां च 'इच्छाशक्ति-र्ज्ञानशक्तिः क्रियाशक्तिरिति त्रिधा । शक्तिशक्तिमतोश्चापि न भेदः कश्चनेष्यत' इति ॥ १८ ॥
इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भागवततात्पर्य निर्णये प्रथमस्कन्धे प्रथमोऽ-ध्यायः ॥ १ ॥

प्रकाशिका— अथेति प्रश्नान्तरे तस्मादित्यर्थेवा । उक्तरीत्या तत्कथाश्रवणस्य मनःशुद्धिकर-त्वादित्यर्थः । अवताराणां मत्स्यादीनाम् । यतः शुभा मङ्गलरूपा लीलाः प्रलयजलविहरणादिक्रीडा विदधतः कुर्वतः । पराधीनं करणमिति शङ्कापरिहाराय स्वैरमित्युक्तम् । यथेष्टमित्यर्थः । नन्वीश्वरस्य

जडान्तःकरणाभावात्कथं तत्कार्येच्छेत्याशङ्कायां यथेष्टमित्युक्तं विवृणोति ॥ आत्ममाययेति । अनेनोक्तशङ्कापरिहारो यथा स्यात्तथाऽनूद्य व्याख्याति ॥ आत्ममाययेति । तथा च जडान्तःकरणजन्येच्छाभावेऽपि स्वस्वरूपभूतेच्छानुसारेणैव करोति । अतः स्वैरमित्युपपन्नमिति भावः । माया शब्दस्येच्छावाचित्वे प्रमाणान्तरमाह ॥ महामायेति । अत्र यद्यपि न माया शब्दोऽस्ति तथाऽपि मायां तु प्रकृतिं विद्यादिति प्रमाणान्मायाशब्दपर्यायत्वं प्रकृति शब्दस्यास्ति । ततश्च प्रकृतिशब्दस्येच्छावाचित्वे प्रदर्शितमायाशब्दस्यापि तत्सेत्स्यतीत्यभिप्रेत्येदमिति ज्ञातव्यम् । इच्छाया भगवत्स्वरूपत्वे च प्रमाणं दर्शयति ॥ विष्ण्वति । इच्छादिरूपा शक्तिरिति व्याख्येयम् । त्रिधेत्यनन्तरं हरेः शक्तिरिति शेषः । चशब्दोऽवधारणार्थः कश्चन वैलक्षण्यरूपो वा । अन्योन्याभावरूपो वा । भेदोऽपि नैवेष्यत इत्यन्वयः ॥ १८ ॥

वयं तु न वितृप्याम उत्तमश्लोकविक्रमैः ।
यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥ १९ ॥

प्रकाशिका— बहुशः श्रुतहरिविक्रमाणां युष्माकं किमर्थमेवं प्रश्न इत्यत आहुरित्याह ॥ वयं त्विति । नान्यपुरुषवद्वयमिति विशेषसूचनाय तु शब्दः । उद्गच्छति तमो यस्मात्स उत्तमः । तथाभूतलोको यशो यस्य स तथा । तस्य विक्रमैश्चरित्रैः । श्रुतैरिति शेषः । न वितृप्यामो न विशेषेणालम्बुद्धिं प्राप्नुमः । यद्विक्रमजातम् । रसज्ञानां सारविदुषाम् । शृङ्गारादिनवरसज्ञानिनां वा । स्वादुतोऽपि स्वादु । पदे पदे प्रतिपदम् । उपलक्षणमेतत् । वाक्ये वाक्ये श्लोके श्लोके इत्याद्यपि ग्राह्यम् ॥ १९ ॥

कृतवान् किल वीर्याणि सह रामेण केशवः ।
अतिमर्त्यानि भगवान् गूढः कपटमानुषः ॥ २० ॥

प्रकाशिका— ''देवक्यां वसुदेवस्य जातो यस्या चिकीर्षये''त्यत्र यत्सामान्यतः पृष्टं कृष्णावतारचरितं तदेव पुनरौत्कण्ठ्यविशेषाद्विशेषाकारेणापि पृच्छन्तीत्याह ॥ कृतवानिति वीर्याणि पराक्रमान् । अतिमर्त्यानि मर्त्यानतिक्रान्तानि । मनुष्येष्वसम्भावितानित्यर्थः । गूढो जनानुपलब्धमाहात्म्यः कपटमानुषः कपटो भ्रान्तिकल्पितो मानुषो मनुष्य देहो यस्य स तथोक्तः ॥ २० ॥

कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम् ।
आसीना दीर्घसत्रेण कथायां सक्षणा हरेः ॥ २१ ॥

प्रकाशिका— ननु याजनाध्यापनादि व्यापारेषु व्याग्राणां भवतां कुत एतच्छ्रवणावकाशः स्यादित्यत आहुरित्याह ॥ कलिमागतमिति । आज्ञया सम्यग्ज्ञातत्वात्तद्भिया व्यापारान्तरं विहाय दीर्घसत्रेण निमित्तेनास्मिन्वैष्णवक्षेत्रे यत आसीना वयमतो हरेः कथायाः सक्षणाः सावसरा इत्यर्थः ॥ २१ ॥

त्वन्नः सन्दर्शितो धात्रा दुस्तरं निस्तितीर्षताम् ।
कलिं सत्वहरं पुंसां कर्णधार इवार्णवम् ॥ २२ ॥

प्रकाशिका— अस्मिंश्च समये त्वद्दर्शनमीश्वरेणैव सम्पादितमित्यभिनन्दन्तीत्याह ॥ त्वं न इति । धात्रा दैवेन पुंसां सत्त्वहरं सत्वकायज्ञानादिनाशकं दुस्तरं तर्तुमशक्यं कलिं निस्तितीर्षतां निश्चयेन तर्तुमिच्छताम् । क इव । दुस्तरमर्णवं निस्तितीर्षतां कर्णधार इव नाविक इव ॥ २२ ॥

ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मकर्मणि ।
स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः ॥ २३ ॥

प्रकाशिका— प्रश्नान्तरं कुर्वन्तीत्याह ॥ ब्रूहीति । ब्राह्मणेषु साधुर्ब्रह्मण्यस्तस्मिन् । धर्मरूपाणि कर्माणि यस्य स धर्मकर्मा तस्मिन्स्वां काष्टां स्वमूलरूपम् । धर्मः पूर्वं कृष्णेन रक्षितो भक्तिज्ञानादि-लक्षणो धर्मः । शरणं रक्षकम् । कृष्णगमनानन्तरं धर्मरक्षकः को जात इति प्रश्नाशयः ॥ २३ ॥

इति श्रीमद्भागवते प्रथमस्कंधे प्रथमाध्याय टिप्पण्यां वेदेशतीर्थपूज्यपादशिष्य-यदुपतिविरचितायां प्रथमोऽध्यायः ॥ १-१ ॥

अथ द्वितीयोऽध्यायः

इति सम्प्रश्नसम्पृष्टो विप्राणां रौमहर्षणिः ।
प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे ॥ १ ॥

प्रकाशिका— हरिः ॐ ॥ विप्राणां शौनकादीनां सम्प्रश्नैर्भगद्विषयतया समीचीनैः प्रश्नैः सम्यक् श्रद्धापूर्वकं पृष्टो रोमहर्षणस्यापत्यं रौमहर्षणिः सूतः प्रतिपूज्य सत्कृत्य प्रवक्तुं तदुत्तरत्वेन श्रीमद्भागवतं वक्तुमुपचक्रमे उपक्रान्तवान् ॥ १ ॥

सूत उवाच -
यं प्रव्रजन्तमनुपेतमपेतकृत्यं
द्वैपायनो विरहकातर आजुहाव ।
पुत्रेति तन्मयतया तरवोऽपि नेदु-
स्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥ २ ॥

तात्पर्यम्— **अनुपेतं देहादिभिः । अनभिमानात् । अकातरः कातरवद्दर्शयन् । उक्तं च स्कान्दे 'नित्यतृप्तः परानन्दो योऽव्ययः परमेश्वरः । यस्य पुत्रफलं नैव यज्जातं जगदीदृशम् । यदधीनश्रियोऽपाङ्गाद् ब्रह्मरुद्रादिसंस्थितिः । स पुत्रार्थं तपस्तेपे व्यासो रुद्रस्य चेश्वरः । कातर्यं दर्शयामास वियोगे लौकिकं हरिः' । 'कर्माणि कुरुते विष्णुः कीनाश इव दुर्बल' इति चोद्योगे । 'देवत्वे देववच्चेष्टा मानुषत्वे च मानुषी'ति विष्णुधर्मे । सर्वभूतहृदयम् । अहङ्कारात्मकत्वात् । 'अहङ्कारात्मको रुद्रः शुको द्वैपायनात्मज' इति स्कान्दे ॥ २ ॥**

प्रकाशिका— आदौ तावच्छिष्टाचारपरिपालनाय सूतः स्वगुरुं शुकं नम्यत्वप्रयोजकं माहात्म्यं तस्य दर्शयन् प्रणमतीत्याह ॥ यं प्रव्रजन्तमिति । अत्रानुपेतं मामुपनयस्वेत्युपनयनार्थमनुपपन्नमिति व्याख्यानं न प्रव्रजनोक्त्यनुगुणम् । अनुपनीतस्य संन्यासाय गमनासम्भवात् । अतोऽध्याहारेण यथावद्व्याख्याति ॥ अनुपेतमिति । ननु देहेन्द्रियादेः प्रत्यक्षेणोपलम्भात्कथमेतदित्यत आह ॥ अनभिमानादिति । तथा च देहादौ सत्यपि तत्राभिमानाभावाच्छुको देहाद्यनुपेत इत्युच्यत इति भावः। अभिमानाभावश्च प्रव्रजनोपयोगीति प्रसिद्धम् । विरहकातर इत्युक्त्या व्यासस्य कातर्यमधैर्यापरपर्यायं प्रतीयते । न च भगवदवतारे तस्मिंस्तद्युज्यतेऽतोऽत्र तात्पर्यं दर्शयति ॥ अकातर इति । अदर्शयत् । आत्मानमिति शेषः । तथा च कातर इत्येतत्कातर इव दृश्यमान इति लक्षणया व्याख्येयमिति सूचयति । उक्त एवार्थ इत्यत्र प्रमाणमाह ॥ उक्तं चेति । तपस्तेपे । रुद्रं प्रतीति शेषः । रुद्रस्य च रुद्रस्यापि नित्यतृप्त्यादिविशेषणैर्वस्तुतो व्यासः पुत्रकामादिशून्य इति दर्शयति ॥ तपस्तेप इति । दर्शयामासेत्यन्वयः । कातर्यं चेत्यपि चशब्दसम्बन्धः । दर्शयामास । दुष्टानां मोहनायेति शेषः । वियोगे संन्यासार्थं शुके गते सति । लौकिकं पामरजनेषु विद्यमानं स्वयमतथाभूतोऽपि लोके मोहनाय कर्माणि करोतीत्यत्र प्रमाणान्तरमप्याह ॥ ईशमपीति । हीति तत्र प्रमाणप्रसिद्धिं दर्शयति ॥ कर्माणीति । कातर्यप्रदर्शनादीनि विष्णुर्व्यासादिरूपो दुर्बलः कीनाशः कर्षकः । कुत्सित इति यावत् । स इव । कातर्यादिप्रदर्शने निमित्तान्तरमपि प्रमाणेनैवाह ॥ देवत्व इति । देवानां देवत्वे मूलरूपेणावस्थाने देववद्देवानामिव चेष्टाकर्तव्या । मानुषत्वे मनुष्येष्ववतारेषु

मानुषी मनुष्यसम्बन्धिनी चेष्टा कर्तव्येति विष्णुधर्मे यत उक्तमतो देवशिक्षणायापि कातर्यपूर्वकाह्वानादिव्यापारो मनुष्यावतारेण व्यासेन दर्शित इति वाक्यशेषः ॥ ततश्चायं श्लोकार्थः ॥ यं प्रव्रजन्तं संन्यासाश्रममाश्रयन्तम् । अत्र हेतुसूचकं विशेषणमनुपेतमिति । अभिमानाभावात् । देहाभिरनुपेतमत एवापेतमपगतं कृत्यं गृहाश्रमोचितं यस्मात्स तथाभूतम् । द्विर्भूता आपो यस्मिन्स द्वीपः स एवायनमाश्रयो यस्य स द्वीपायनः । द्वीपायन एव द्वैपायनः । विरहकातरो विरहे शुकवियोगे सति कातरोऽधीर इव दृश्यमानः पुत्र इति आजुहावाहूतवान् । दूराह्वाने प्लुते विद्यमानेऽपि सन्धिश्चान्दसः । तदा तन्मयतया तत्प्रचुरतया । तेन शुकेन । अधिष्ठिततयेति यावत् । तरवोऽपि वृक्षशरीरा अपि । किमु मनुष्यशरीरिण इति कैमुत्यसूचनायापिशब्दः । नेदुः प्रत्युत्तरमुक्तवन्तः । न तव मद्वियोगोऽस्ति मम सर्वप्राणिदेहेषु सत्वात् । अतस्त्वया न कातरेण भवितव्यमिति पितृसांत्वनाय स्वस्य सर्वत्रावस्थितिं ज्ञापयन् शुकः स्वयमेव सर्वप्राणिषु स्थित्वोत्तरं दत्तवानिति भावः । तं मुनिमानतोऽस्मीति । अत्र सर्वप्राणिनां तन्मयत्वमुपपादयितुमुक्तम् ॥ सर्वभूतहृदयमिति । तदिदं शुकस्य सर्वभूतहृदयत्वं कथमित्यतस्तदुपपादयति ॥ सर्वभूतहृदयमिति । अहङ्कारात्मकत्वात् । मनःप्रभेदरूपाहङ्काराभिमानित्वादित्यर्थः । तथा च हृन्मनोविशेषरूपमहङ्कारं प्रेरकतयाऽयतीति हृदयमिति व्याख्यानं सूचयति । नन्वहङ्कारात्मकत्वं रुद्रे प्रसिद्धं न शुकस्येत्यतः शुकोऽपि रुद्रात्मक एवेति प्रमाणमाह ॥ अहङ्कारात्मक इति । अनेनाहङ्काराभिमानित्वेन सर्वप्राणिशरीरस्थत्वरूपमाहात्म्यं शुकस्य नम्यत्वप्रयोजकमुक्तं भवतीति ज्ञातव्यम् ॥ २ ॥

यः स्वानुभावमखिलश्रुतिसारमेक-
मध्यात्मदीपमतितितीर्षतां तमोऽन्धम् ।
संसारिणां करुणयाऽऽह पुराणगुह्यं
तं व्याससूनुमुपयामि गुरुं मुनीनाम् ॥ ३ ॥

तात्पर्यम्— स्वानुभावं ब्रह्म ॥ ३ ॥

प्रकाशिका— इदं च सर्वतत्त्वाभिमानिसाधारणमतोऽसाधारणमपि तद्दर्शयन् भक्त्युद्रेकान्मङ्गलान्तरमाचरतीत्याह ॥ यः स्वानुभकावमिति । अत्र स्वस्यानुभावः सामर्थ्यमिति व्याख्याय शुकसामर्थ्यस्यैव ग्रहणे तत्राखिलं श्रुतिसारत्वादिविशेषणानामनुपपत्तिरतोऽत्र विवक्षितमर्थं दर्शयति ॥ स्वानुभावं ब्रह्मेति । ततश्च स्वं स्वीयोऽनन्याधीनानुभावो यस्येति व्याख्यानं सूचयति ॥ ततश्चायं श्लोकार्थः ॥ अन्धयतीत्यन्धं तमोऽज्ञानाख्यमतितितीर्षतामतिशयेन तर्तुमिच्छतां संसारिणामस्मदाद्यधिकारिणां स्वानुभावमनन्याधीनसामर्थ्यमखिलश्रुतीनां सारं प्रतिपाद्योत्तममेकं सर्वोत्तममात्मानं

जीवमधिकृत्य वर्तमानं शरीरं तत्र द्वीपं द्वीपवद्वर्तमानं पुराणगुह्यं भागवतादिपुराणरहस्यभूतं परं ब्रह्म करुणयाऽऽह्योपदिष्टवान् । अत एव मुनीनां गुरुं तमुपयामि शरणं व्रजामीति । गुरोर्नाम न गृह्णीयाच्छिष्य इति वचनात् । पूर्वश्लोके मुनिमित्यत्र व्याससूनुमिति निर्देश इति ध्येयम् । अत्र कृपालुत्वं सर्वमुनीनां श्रीमद्भागवतादिपुराणरहस्यार्थ भूतपरब्रह्मोपदेष्टृत्वेन गुरुत्वं चासाधारणं नम्यत्वप्रयोजकं दर्शितामिति ज्ञातव्यम् ॥ ३ ॥

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो ग्रन्थमुदीरये ॥ ४ ॥

प्रकाशिका— एवं गुरून्प्रणम्यावश्यं नम्यान्देवतादीनपि नत्वा ग्रन्थारम्भं प्रतिजानीते ॥ नारायणमिति । नारायणं देवतारूपं नारायणं व्यासं नारायणात्मकं व्यासं ग्रन्थकर्तारं देवीं भाग्यात्मिकां रमाम् । नरोत्तमं साधकेशं वायुं सरस्वतीं विद्याभिमानिनीम् । नरमुपसाधकं शेषं नमस्कृत्यैवेति सम्बन्धः । तेनैतेषां ग्रन्थारम्भसमये नमनमावश्यकमिति सूचयति । ततस्तेषां प्रसादाद्ग्रन्थं भागवताख्यम् उदीरये भवत्प्रश्नपरिहारत्वेन व्याख्यास्य इत्यर्थः ॥ ४ ॥

मुनयः साधु पृष्टोऽहं भवद्भिर्लोकमङ्गलम् ।
यत्कृतः कृष्णसम्प्रश्नो येनात्माऽऽशु प्रसीदति ॥ ५ ॥

प्रकाशिका— तेषां वचः प्रतिपूज्येति यदुक्तं तत्प्रतिपूजनं करोति ॥ मुनय इति । लोकानां सज्जनानां मङ्गलं मोक्षमुद्दिश्य यद्यस्मात्कृष्णस्य मूलरूपस्य देवकीसुतस्य च सम्प्रश्नश्चरित्रप्रश्नः कृतस्तस्मात्साधु यथा भवति तथा पृष्ट इत्यन्वयः । ननु कृष्णसम्प्रश्नकरणेन कथं मोक्ष इत्यत उक्तम् ॥ येनात्मेति । आत्मा परमात्मा मनो वा । अतः साधोऽत्र यत्सारमिति प्रश्नस्यापि कृष्ण एव पर्यवसानमभिप्रेत्यैवमुक्तम् ॥ ५ ॥

स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ।
अहैतुक्यव्यवहिता ययात्माऽऽशु प्रसीदति ॥ ६ ॥

प्रकाशिका— तत्र यत्प्रथमं पृष्टमेकान्तिकं श्रेयो ब्रूहीति । तत्रोत्तरम् ॥ स वै पुंसामिति । परः परमो यतो धर्मात् । भक्तिर्भवतीति शेषः । अधःकृतमक्षजं प्रत्यक्षं येन स तथोक्तः । प्रत्यक्षविषयेति यावत् । अनेन तत्र भक्तिः साधनान्तरसाध्या न भवतीति दर्शयति । कथं भूता । अहैतुकी भगवत्प्रसादमन्तरेणान्यफलानुसन्धानरूपहेतुरहिता । अव्यवहिता विषयासक्त्यादिव्यवधानरहिता ॥ ६ ॥

वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानञ्च यदहैतुकम् ॥ ७ ॥

प्रकाशिका— ननु तमेनमात्मानं वेदानुवचनेन ब्रह्मणा विविदिषन्ति । यज्ञेन दानेन तपसा नाशकेनेत्यादि श्रुतिभ्यो धर्मस्य ज्ञानहेतुत्वं प्रसिद्धं तत्कुतो भक्तिहेतुत्व मुच्यत इत्यत आह ॥ वासुदेव इति । भक्तियोगो भक्तिलक्षणोपायः । तथा चोदाहृतश्रुतीषु भक्तिवैराग्यद्वारैव यज्ञादिधर्मस्य ज्ञानहेतुत्वमभिप्रेतं न साक्षादतो न विरोध इति भावः । अहैतुकं शुष्कतर्कादिरूपहेत्वजन्यम् । औपनिषदमिति यावत् ॥ ७ ॥

धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथाश्रयाम् ।
नोत्पादयेद्यदि रतिं श्रम एव हि केवलम् ॥ ८ ॥

प्रकाशिका— ननु धर्मस्य सुष्ठ्वनुष्ठानेनैव परत्वं भविष्यतीति शङ्कायां तस्यापि भक्तिजनकत्वाभावे न परत्वमित्याह ॥ धर्म इति ॥ विष्वक् सर्वतो विद्यमाना ब्रह्मादि रूपा सेना यस्य स विष्वक्क्सेनो हरिः । रतिं भक्तिं । केवलं श्रम एव । क्रियाकाले दुःखहेतुत्वात् । उत्तरकालेऽपि पतनभयग्रस्ताल्पफलकत्वादिति भावः । तथा च क्रिया करणकाले सुखमेवकारव्यवच्छेद्यम् । उत्तरकालीनमनश्वराल्पसुखं केवलशब्दव्यवच्छेद्यमित्यतो न पौनरुक्त्यमिति द्रष्टव्यम् ॥ ८ ॥

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायेह कल्पते ।
नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ॥ ९ ॥

कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता ।
जीवस्यातत्वजिज्ञासोर्नार्थो यश्चेह कर्मभिः ॥ १० ॥

प्रकाशिका— एवं हरिभक्तिद्वारा विषयवैराग्यभगवत्ज्ञानपर्यन्तो यो धर्मः स एव पर इति स्वयं तमुक्त्वा तद्दार्ढ्यायेदानीं धर्मस्यार्थः फलमर्थस्य कामः कामस्येन्द्रियप्रीतिस्तत्प्रीतेश्च पुनरपि धर्मादिपरम्परेति ये ये मन्यन्ते तान्निराकरोति ॥ धर्मस्येत्यादि सार्धश्लोकेन । आपवर्ग्यस्यापवर्गो मोक्षस्तत्साधनस्य महाफलसाधनत्वादि हेतुसूचनायेदं विशेषणम् । हि शब्देन यन्महाफलकं न तस्याल्पं फलमिति । यथा पद्मरागस्य तण्डुलमुष्टिरिति व्याप्तिं प्रमाणप्रसिद्धिं च दर्शयति । इहाधिकारिवर्गेऽर्थः काञ्चनादिः । अर्थाय फलाय । फलत्वायेति यावत् । नोपकल्पते योग्यो न भवति । धर्म एकान्तो नियमेन फलं यस्य स धर्मैकान्तस्तस्य । उक्तरीत्या भक्त्यादिद्वारा मोक्षपर्यवसायिधर्मरूपमहाफलकस्येति यावत् । इदमपि विशेषणमुक्तरीत्या हेतुसूचनाय । कामो विषयभोगो लाभाय

फलत्वाय। स्मृतः । विद्वद्भिरिति शेषः । अनेनागमविरोधोऽप्युक्त इति ज्ञातव्यम् । हि शब्दस्य पूर्ववदेवार्थः। लाभः फलम्। तर्हि विषयभोगरूपकामस्य कथं महाफलहेतुत्वं येनेन्द्रियप्रीतिरल्पफलं न स्यादित्यत आह ॥ जीवेत यावतेति । यावता हर्यर्पितविषयभोगरूपकामेन जीवेत । विष्णु-वैष्णवसेवार्थमिति शेषः । तावानेव हर्यर्पितविषयभोगरूपः कामः सम्पाद्यत इति शेषः । अनेनोक्तरूपकामस्य महाफलसाधनं हर्यादिसेवोपयुक्तं जीवनमेव महाफलम् । ततोऽधिकमिन्द्रियप्रीतिरूपं तु फलं तुच्छमित्युक्तं भवति । धर्मस्य भक्तिवैराग्यद्वारा ज्ञानजनकत्वमित्युक्तम् । तत्रापरमपि द्वारं व्यतिरेकेणाह ॥ जीवस्येति । कर्मभिर्यज्ञादिरूपैर्धर्मैर्योऽर्थो भक्त्यादिद्वारा ज्ञानफललक्षण इह प्रकारेण पूर्वमुक्तः सोऽतत्त्वजिज्ञासोस्तत्त्वजिज्ञासाशून्यस्य भवति । ततश्च यज्ञादिधर्मैर्भगवद्भक्तिस्तया वैराग्यं तेन श्रवणादिरूपा तत्त्वजिज्ञासा तया ज्ञानमित्युक्तं भवति ॥ ९, १० ॥

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ ११ ॥

सत्तामात्रं तु यत्किञ्चित्सदसच्चाविशेषणम् ।
उभाभ्यां भाष्यते साक्षाद्भगवान् केवलः स्मृतः ॥ १२ ॥

तात्पर्यम्— अद्वयम् असमाधिकम् । तथा च भाल्लवेयश्रुतिः 'स पुरुषः सोऽद्वय इति न ह्येनमभि कश्चन न ह्येनमति कश्चनेती'ति । 'सोऽद्वयः पुरुषस्तस्मान्न समो नाधिको ह्यत'इति महासंहितायाम् । तत्त्वशब्दार्थस्तत्रैवोक्तः । 'अतीतानागते काले यत्तादृशमुदीर्यते । कुतश्चिदन्यथा नेयात्तत्तत्त्वं तत्त्वतो विदुरि'ति ॥ ११ ॥

सत्तामात्रमानन्दमात्रम् । तथा च पैङ्गिश्रुतिः 'अथ कस्मादुच्यते सत्तेति नन्दति नन्दयति चेती'ति । न कार्यकारणविषयविशेषितवैषयिकज्ञानम् । केवलमेव तज्ज्ञानम् स्रष्टृत्वादिभिः कार्यकारणविशेषितं च । तन्त्रभागवते च । 'विपयापेक्षि न ज्ञानं विषयैश्च विशेषितम् । यत्तदानन्दमात्रं च तद् ब्रह्मेत्यवधार्यतामि'ति । यत्किञ्चिदलोकसिद्धम् ॥ १२ ॥

प्रकाशिका— ननु किं तत्त्वं यस्य विज्ञासाऽपि धर्मस्य फलमित्यत आह ॥ वदन्तीत्यादि केवलः स्मृतः इत्यन्तम् । अत्राद्वय शब्दस्य स्वातिरिक्तद्वितीयराहित्यमर्थ इति प्रतीतिवारणाय विवक्षितमर्थं दर्शयति ॥ अद्वयमिति । तथा च द्वय शब्दस्य समाधिकरूपद्वितीयमात्रपरत्वेन सङ्कोच इति भावः । कुतः सङ्कोचेनार्थकथनमित्यत आह ॥ तथा चेति । भाल्लवेयश्रुतिस्तथा च तथैवाहेति शेषः । एनं पुरुषमभि प्रति । अनेन समराहित्यमुक्तमिति ज्ञातव्यम् । अति अतिक्रम्य ।

अनेनाधिकराहित्यं लब्धम् । अत्र स्पष्टां श्रुतिं दर्शयति ॥ सोऽद्वय इति । सोऽद्वयः स पुरुष इति श्रुत्यन्तरस्थपदद्वयमनूद्याद्वयपदं तावद्व्याख्याति ॥ तस्मादिति । हि यस्मात्तस्माद्विष्णोर्न समो नाधिकोऽतः सोऽद्वय इत्यन्वयः । पुरुषशब्दव्याख्यानमेतत् श्रुतिस्थं नोदाहृतं प्रकृतानुपयोगात् । नन्वत्र ब्रह्मणि तत्त्वपदं प्रयुज्यते । तस्य चानारोपितत्वमर्थस्तेनान्यदारोपितमिति लभ्यते । अतः कथमद्वयपदस्य द्वितीयाभावपरत्वाभाव इत्यत । आह । तत्त्व शब्दार्थ इति । तत्रैव महासंहिताया-मेव । तादृशं वर्तमानकाले यादृशं तादृशमित्यर्थः । कालत्रयेऽप्येकप्रकारमिति यावत् । कुतश्चि-त्कारणात् । अन्यथा पराधीनविशेषं नेयान्न गच्छेत् । सत्तामात्रमित्येतत्स्वरूपसत्तैव । तदभिन्नं नास्ति । न ततोऽतिरिक्ता धर्मा इत्यन्यथाप्रतीतिवारणाय व्याख्याति ॥ सत्तामात्रमिति । अत्र आ सम्यक् नन्दो यस्य यस्मादितिवा विग्रहस्य विवक्षितत्वान्न वक्ष्यमाणश्रुतिविसंवादः । मात्र शब्दो मीयत इति व्युत्पत्त्या देहपरः । तथा चोक्तानन्दशब्दार्थ आत्मा देहो यस्य तदानन्दमात्रमिति व्याख्येयम् । सत्ता शब्दस्योक्तानन्द शब्दार्थत्वे प्रमाणमाह ॥ तथा चेति । यद्वा यत्ज्ञानमद्वयमिति भगवत्स्वरूपस्य ज्ञानाभेदयुक्तः । स न युक्तः । ज्ञानस्य विषयसंनिकृष्टकरणजन्यस्य विषयसा-पेक्षत्वेन तदभिन्नस्य भगवतोऽपि तदापत्त्या केवलो निर्गुण इत्यादौ केवलत्वोक्त्यनुपपत्तिप्रसङ्गात् । अतः कथं तयोरैक्यमित्याशङ्कायां भगवत्ज्ञानमपि नोक्तरीत्या सापेक्षकं किन्तु केवलं जडामिश्रमेवेति वक्तुं मूले सदसच्चाविशेषणमित्युक्तम् । अत्र सदसतोर्ज्ञानविशेषणत्वोक्त्या ज्ञानस्य विषयानपेक्षत्वं कथमुक्तमित्यतस्तात्पर्यं दर्शयति ॥ न कार्यकारणेति । अनेन सदसच्छब्दावुक्तार्थौ ॥ विशेषतेति । भेदितेत्यर्थः । इदं वैषयिकशब्दार्थान्तर्गतविषयविशेषणम् । वैषयिकं विषयसंनिकृष्टकरणजन्य-भगवत्ज्ञानं कार्यकारणात्मना प्रभिन्नविषयसन्निकृष्टकरणजन्यं नेत्यर्थः । तथा च मूलगतौ सदसच्छब्दौ कार्यकारणात्मकाशेषविशेषविषयोपलक्षकावित्याशयः । एवं च विषयापेक्षितज्ञानमिति वक्ष्यमाणप्रमाणविसंवादो न भवतीति ज्ञातव्यम् । केवलमेवेत्यतः पूर्वं किं त्विति शेषः । तद्धुभाभ्यां भाषत इति भगवत्ज्ञानस्य कार्यकारणरूपविषयविशेषितत्वोक्तिः कथमित्यतस्तात्पर्यमाह ॥ स्रष्टृत्वा-दिभिरिति । कार्यकारणैरव्यक्तमहदादिरूपैर्विषयैस्तटस्थैरेव विशेषितं व्यावर्तितं चेत्यर्थः । कुत एतदित्यत उक्तम् । सृष्टृत्वादिभिरिति । हेतुभिरिति शेषः । विशेषितं चेत्यतःपरमवगम्यत इति शेषः। यदि भगवत्ज्ञानं कार्यकारणरूपविषयैरव्यक्तमहदादिभिस्तटस्थैरेव व्यावर्तितं न स्यात् तर्हि भगवतः स्रष्टृत्वं पातृत्वं च न स्यात् । कार्यकारणादिरूपविषयविशेषितज्ञानवत् एव स्रष्टृत्वादिरूपत्वात् । वर्तते च तत्प्रमाणसिद्धम् । अतो भगवत्ज्ञानं कार्यकारणरूपविषयव्यावर्तितमित्यवगम्यत इत्यर्थः । अत्र प्रमाणमाह ॥ तन्त्रभागवत इति । विषयापेक्षीविषयसन्निकृष्टकरणजन्यम् । विषयैस्तट-स्थैर्विशेषितं व्यावर्तितम् । यत्ज्ञानमिति सम्बन्धः । यदुक्तरूपं ज्ञानं तद् ब्रह्म यच्चोक्तरीत्याऽनन्दमात्रं तद् ब्रह्मेति वाक्यद्वयमेतत् । अत्राद्यपादेन सदसच्चाविशेषणमित्यस्य द्वितीयपादेनोभाभ्यां भाष्यत

इत्यस्य तृतीयपादेन सत्तामात्रमित्यस्य चतुर्थपादेन ब्रह्मेतीत्यस्य च तात्पर्यमुक्तमित्यवगन्तव्यम् । यत्किश्चिदित्यस्य ब्रह्मलक्षणत्वसिद्ध्येऽर्थमाह ॥ यत्किश्चिदिति । अलोकसिद्धं लोकप्रसिद्धं न भवतीत्यर्थः । यत्किश्चिच्छब्दस्याप्रसिद्धवस्तुष्वेव प्रयोगादिति भावः ॥ ततश्चायं वदन्तीत्यादि-श्लोकद्वयार्थः । तत्त्वविदः कपिलाद्याः । अद्वयमसमाधिकं यत्ज्ञानं ज्ञानरूपम् । ब्रह्मादिज्ञान-व्यावृत्त्यर्थमद्वयमिति ज्ञानविशेषणम् । यच्च सत्तामात्रमुक्तरीत्याऽनन्दमात्रं यच्च यत्किश्चिल्लोकसिद्धं न भवतीति जिज्ञास्यत्वोपपादकमेतत् । तत्तदेव तत्त्वम् । सर्वदैकप्रकारतयाऽवस्थित तत्त्वयोगेनैव तत्त्व शब्दवाच्यं वदन्ति । न घटादिकमिवारोपितत्वेनेत्यर्थः । ननु श्रुतिषु क्वचिद् ब्रह्मणः क्वचित्परमात्मनः क्वचिद् भागवतो जिज्ञासा कर्तव्यतयोच्यते । अतो विरोध इत्यत आह । ब्रह्मेतीति । उक्तरूपतत्त्वमेव तत्र ब्रह्मादिशब्दैः शब्द्यते प्रतिपाद्यते । अतो न विरोध इति भावः । ननु ज्ञानस्य विषयसापेक्षस्य न भगवद्रूपत्वं युक्तम् । तथात्वे भगवति स्मृत्यादिसिद्धकेवलत्वस्यौपचारित्वप्रसङ्गादित्याशङ्कायामाह ॥ सदसच्चेति । यदीति वर्तते । तथा च सन्महदादिकार्यमसदव्यक्तं च । एतदात्मकम् । विषयजातमिति यावत् । यस्मिन्ज्ञानेऽविशेषणं स्वसन्निकृष्टकरणजन्यत्वादि रूपविशेषापादकं न भवति । किन्तु केवलमेव तत्ज्ञानमतस्तदभिन्नो भगवान्साक्षान्मुख्यत एव केवलः स्मृत्यादावुक्तः । नोपचारेणेत्यर्थः। नन्वेवं भगवत्ज्ञानस्य कार्यकारणरूपविषयासंस्पर्शे भगवतः स्रष्टृत्वादिकं न स्यात् । निर्विषयस्य ज्ञानस्य सृष्ट्यादावनुपयोगादित्यत उक्तम् । उभाभ्यां कार्यकारणात्मकविषयाभ्यां तटस्थाभ्यां भाष्यते व्यावृत्ततया व्यवह्रीयत इति । तथा च विषय संन्निकृष्टकरणजन्यत्वरूपस्य सापेक्षितस्य भगवत्ज्ञानेऽभावेन केवलत्वेऽपि तस्य निर्विषयत्वं विषयस्य तटस्थतया तत्र व्यावर्तकत्वेन तद्व्यावर्ति-तत्वरूपस्य तद्विषयत्वस्य सत्वात् । भगवत्स्वरूपस्यापि सर्वाबभासकस्यैतादृशत्वान्नोक्ता-भेदानुपपत्तिरिति ॥ ११, १२ ॥

तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया ।
पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतिगृहीतया ॥ १३ ॥

तात्पर्यम्— यस्मात्परमात्मैव तत्त्वं तस्मात्तमेव पश्यन्ति मुनयः ॥ १३ ॥

प्रकाशिका— श्रवणादिरूपजिज्ञासयाऽपि साध्यं दर्शयति ॥ तच्छ्रद्दधाना इति । अत्र तत्त्वजिज्ञासायाः पूर्वमुक्तत्वात्तया तत्त्वं पश्यन्तीत्येव वक्तव्यं नात्मानं पश्यन्तीत्येवं शङ्कायां मूले तत्तस्मादिति हेतुरुक्तः । तत्र को हेतुः पूर्वोक्तो योऽनेन परामृश्यत इत्यतस्तद्दर्शयन् उक्त शङ्का-मपाकरोति ॥ यस्मादिति । तमेव परमात्मानमेव । न जीवमित्यर्थः ॥ ततश्चायं श्लोकार्थः । यस्मादेवं परमात्मैव तत्त्वं तत्तस्मान्मुनयो ज्ञानिनः श्रद्दधानाः शास्त्रोक्तवस्तुन्यास्तिक्यबुद्धिं दधाना ज्ञानं

श्रवणादिरूपं जिज्ञासाजन्यं परोक्षं तेन वैराग्येण युक्त्या श्रुतिगृहीतया हरिमाहात्म्यश्रवणेन दृढीकृतया भक्त्या । चोऽवधारणे । आत्मानं च परमात्मानमेवात्मनि हृदि पश्यन्तीति ॥ १३ ॥

अतः पुम्भिर्द्विजश्रेष्ठः वर्णाश्रमविभागशः ।
स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम् ॥ १४ ॥

प्रकाशिका— एवं परम्परया जातस्यात्मसाक्षात्कारस्यापि फलं दर्शयति ॥ अत इति । हे द्विजश्रेष्ठाः धर्मस्याऽतो भक्त्यादिदर्शनान्ताद्व्यापाराद्धरितोषणं हरिप्रीतिः । हरिप्रसाद इति यावत् । संसिद्धिः फलम् ॥ १४ ॥

तस्मादेकेन मनसा भगवान्सात्वतां पतिः ।
श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ॥ १५ ॥

प्रकाशिका— एवं श्रवणादिरूप जिज्ञासाया हरिप्रसादफलपर्यन्तं फलमभिधाय तेनैव हेतुना श्रवणादेर्नित्यदा कर्तव्यत्वं विधत्ते ॥ तस्मादिति । तस्मादेवं हरिप्रसादपर्यन्तं फलसद्भावात् । एकेनैकाग्रेण पूज्य इति अत्र पूजया यज्ञादिकर्ममात्रमुपलक्षणीयम् ॥ १५ ॥

यदनुध्यायिनो युक्ताः कर्मग्रन्थिनिबन्धनम् ।
छिन्दन्ति कोविदास्तस्य को न कुर्यात्कथारतिम् ॥ १६ ॥

प्रकाशिका— परमात्मदर्शनजन्यप्रसादेनापि किं फलमित्यपेक्षायां तद्दर्शयन्नित्यदा श्रोतव्य इत्युक्तमुपपादयति ॥ यदनुध्यायिन इति । यत्परमात्मरूपं तत्त्वमनु निरन्तरं ध्यातुं शीलमेषामस्तीत्यनुध्यायिनो युक्ता योगफलयुक्ताः । दर्शनजन्यहरिप्रसादवन्त इति यावत् । कर्माण्येव ग्रन्थयः पाशास्तैर्नितरां बन्धनं छिन्दन्ति । कर्मक्षयरूपां मुक्तिं प्राप्नुवन्तीति यावत् । कोविदाः कृतज्ञाः तस्येवं परमोपकारिणः कथारतिं श्रवणादिरतिम् ॥ १६ ॥

शुश्रूषोः श्रद्दधानस्य वासुदेवकथारतिः ।
स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥ १७ ॥

प्रकाशिका— हरिकथाश्रवणादिरतिरेव केन स्यादित्यत आह ॥ शुश्रूषोरिति । शुश्रूषोर्हरिस्वरूपश्रवणेच्छोः श्रद्दधानस्यास्तिक्यबुद्धिमतः । हे विप्राः पुण्यतीर्थानां निषेवणात्सेवनान्महतां सेवा स्यात्तयाऽऽस्तिक्यबुद्धिश्रवणेच्छतो वासुदेव कथारतिः स्यादित्यर्थः ॥ १७ ॥

शृण्वतां स्वकथां कृष्णाः पुण्यश्रवणकीर्तनः ।
हृद्यन्तस्थो ह्यभद्राणि विधुनोति सुहृत् सताम् ॥ १८ ॥

प्रकाशिका— रत्यनन्तरं शृण्वतां फलमाह ॥ शृण्वतामिति । पुण्यकरे श्रवणे कीर्तने यस्य स यथा । अभद्राणि पापानि । अतः सतां सुहृदनिमित्तबन्धुः ॥ १८ ॥

नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया ।
भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी ॥ १९ ॥

प्रकाशिका— अभद्रनाशानन्तरं भावि फलमाह ॥ नष्टेति । सर्वाभद्रनाशस्य ज्ञानोत्तरकालत्वात्प्रायग्रहणम् । भागवतानां भगवद्भक्तानां भगवत्सम्बन्धिधर्माणां वा । नैष्ठिकी निश्चला । अनेन तीर्थयात्रादिरूपधर्मस्य भक्तिजनकतया यत्परमत्वमुक्तं तन्महत्सेवादिरूपद्वारकथनेन प्रपञ्चितमिति ज्ञातव्यम् ॥ १९ ॥

तदा रजस्तमोभावाः कामलोभादयश्च ये ।
चेत एतैरनाविद्धं स्थितं सत्वे प्रसीदति ॥ २० ॥

एवं प्रसन्नमनसो भगवद्भक्तियोगतः ।
भगवत्तत्त्वविज्ञानं मुक्तसङ्गस्य जायते ॥ २१ ॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ॥ २२ ॥

तात्पर्यम्— आत्मनीश्वर इति न जीवैक्यमुच्यते । परेषामपि ब्रह्मादीनां यतोऽवरत्वं स परावरः । 'भेददृष्ट्याभिमानेने'ति हि कापिलेये । 'ब्रह्म प्रधानमुपयान्त्यगताभिमाना' इति च । 'विद्याऽऽत्मनि भिदाबोधः' । 'यत्र हि द्वैतमिव भवति' । 'अन्यमीशमस्य महिमानमिति' । 'अनश्नन्नन्यो अभिचाकशीति' । 'छायातपौ ब्रह्मविदो वदन्ति' । 'एको बहूनां विदधाति कामान्' । 'सत्यः सो अस्य सहिमा' । 'सत्यमेनमनु विश्वे मदन्ति' । 'यत्र पूर्वे साध्याः सन्ति देवाः' । 'शृण्वे वीर उग्रमुग्रं दमायन्नि'त्यादि च । 'मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेत्' । 'बहवः पुरुषा ब्रह्मनुताहो एक एव तु । नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वहे'ति मोक्षधर्मे । 'भेददृष्ट्याऽभिमानेन पश्यन्तो यान्ति तत्पदमि'त्यादि वायुप्रोक्ते । 'अनुपपत्तेस्तु न शारीरः' । 'भेदव्यपदेशाच्च' । 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयते' । 'पृथगुपदेशादि'त्यादि च । सत्यत्वं

च भेदस्योक्तं भाल्लवेयश्रुतौ। 'स्थाणुर्होच्चक्राम स प्रजापतिमुवाच कोऽसि केस्थ कः स इति होवाच । योऽस्मि मेऽस्य यः स इति । अथ हैनमुपाक्रोशत् । सत्यं भिदा सत्यं भिदा सत्यं भिदेति । मैवारुवण्यो मैवारुवण्यो मैवारुवण्य इती'ति । 'सत्यमेनम्' । 'सत्यः सो अस्य महिमे'ति चोक्तम् । महासंहितायां च । 'त्रिविधं जीवसङ्घं च परमात्मानमव्ययम् । तेषां भेदं च ये सत्यं विदुर्मोहविवर्जिताः । ते यान्ति परमं स्थानं विष्णोरेवाचलं ध्रुवम् । जीवेश्वरभिदां भ्रान्तिं केचिदाहुरपण्डिताः । अनारतं तमो यान्ति परमात्मविनिन्दनात् । पराधीनश्च बद्धश्च स्वल्पज्ञानसुखेहितः । अल्पशक्तिः सदोषश्च जीवात्माऽनीदृशः परः । वदता तु तयोरैक्यं किं तेनादुष्कृतं कृतम् । अन्तर्याम्यैक्यवाचीनि वचनानीह यानि तु । तानि दृष्ट्वा भ्रमन्तीह दुरात्मानोऽल्पचेतसः । अस्यस्मित्वमहंस्वात्मेत्यभिधागोचरो यतः । सर्वान्तरत्वात्पुरुषस्त्वन्तर्यामी नियामयन् । अतो भ्रमन्ति वचनैरासुरा मोहतत्परैः । तन्मोहने परा प्रीतिर्देवानां परमस्य च । अतो महान्धकारेषु पतन्त्यज्ञानमोहिता' इत्यादि ॥ २२ ॥

प्रकाशिका— कर्मक्षयपर्यन्तमुक्तां फलपरम्परामप्यनुक्तकथनेन प्रपञ्चयति । तदा रज इत्यादि श्लोकत्रयेण । रजस्तमोभ्यां भाव उत्पत्तिर्येषां ते तथोक्ताः । चकारः प्रमादादिसङ्ग्रहार्थः । अनाविद्धमतिरस्कृतं सत्त्वे बलज्ञानसमाहाररूपे हरौ स्थितं तद्विषयं सत्प्रसीदति । अनवरतं तत्स्मरणक्षमं भवति । अनेन भक्त्या वैराग्यं तेन श्रवणादिरूपा जिज्ञासेति यदुक्तं तत्प्रपंचितमिति ज्ञातव्यम् । एवं भगवद्भक्तियोगतो मुक्तसङ्गस्य त्यक्तविषयस्नेहस्य । विरक्तस्येति यावत् । प्रसन्नमनसो नित्यं भगवद्विषयकस्मरणादिरूपजिज्ञासावतः । भगवद्रूपतत्त्वस्य विज्ञानं स्वयोग्यमपरोक्षज्ञानं जायत इत्यन्वयः । अत्र पूर्वोक्तसाधनानामेकत्र कथनेन दर्शनस्य विज्ञानत्वोक्त्या च प्रपञ्चितमिति ज्ञातव्यम् । विज्ञानफलमाह ॥ भिद्यत इति । हृदयस्य जडमनसो ग्रन्थिर्ग्रथनं यस्मिन्स लिङ्गदेहो भिद्यते । दग्धेन्धनायितो भवति । सर्वसंशयाः परापरतत्त्वविषयाः कर्माण्यप्रारब्धान्यनभीष्टान्यत्मन्यन्तर्यामिणि स्वबिम्बभूतेश्वरे दृष्ट एव दर्शनानन्तरमेव न विलम्बेनेत्यर्थः । अत्र बहूनां फलानां कथनात्प्रपञ्चनं स्पष्टम् । अत्र केचिदात्मनि स्वस्वरूपभूते ईश्वरे इति ईश्वरस्य जीवैक्यदर्शनविषयतयोक्तमिति व्याचक्षते तन्निराकरोति ॥ आत्मनीति । आत्मनीश्वर इति समानाधिकरणपदाभ्यामीश्वरस्य जीवैक्यमुच्यत इति नेत्यर्थः । कुतो नेत्यतस्तस्मिन्दृष्टे परावर इति समाख्याश्रुतिविरोधादिति हेतुं मनसि निधाय तत्रापि परावरस्वरूपे इत्येवार्थः किं न स्यादित्याशङ्कां परिहर्तुं तत्रत्यं परावरपदं व्याख्याति ॥ परेषामिति । यतो यस्माद्धरेः । अनेन परेऽवरे यस्मादसौ परावरो इति विग्रहो दर्शितः । वस्तुनो द्वैरूप्यासम्भवेन न परावरस्वरूप इति व्याख्यानं युक्तमिति भावः । उत्तरवाक्यविरोधाच्च नैवं व्याख्यानमत्र युक्तमित्याशयेनाह ॥ भेददृष्टचेति ॥

जीवेश्वरभेददर्शनेनाभिमानेनेश्वरे बहुमानेन । ब्रह्मसङ्गत्येति वक्ष्यमाणेनान्वयः । अत्र मोक्षजनकापरोक्षज्ञानविषयत्वेन भेदस्य स्पष्टमुक्तत्वान्नैक्यं तथात्वेनात्र वाच्यमित्यर्थः । कापिलेये कपिलदेवहूतिसंवादे । इदं गौणमुक्तिसाधनमुक्तम् । परममुक्तिसाधनमैक्यज्ञानमत्रोच्यते । तेन न विरोध इत्याशङ्कायामन्यदुत्तरवाक्यमुदाहरति । ब्रह्मेति । अगताभिमाना अगतजीवत्वज्ञानाः । प्रधानं ब्रह्मोपयान्तीत्युक्त्याऽहं जीव एवास्मीति ज्ञानस्यैव परममुक्तिसाधनत्वे मोक्तत्वात्तद्विरोध इति भावः। नन्वत्र गताभिमाना इत्येव पाठः । अतो न विरोध इत्यतो वाक्यान्तरविरोधं दर्शयति । विद्येति । का विद्येति प्रश्ने तदुत्तरत्वेनात्मनि जीवेऽपरमात्मनि च भिदाया:भेदस्य बोधो विद्येति भेदज्ञानस्यैव विद्यात्वेनोक्तत्वात् । तद्विरोधोऽपरिहार्य इति भावः । ननु चेतनभेदस्याप्रामाणिकत्वाद्भिदाया अबोधो भेदविषयकबोध,विरुद्धः । ऐक्य बोध इति यावत् । सैव विद्येति व्याख्येयमिति चेन्नैवम् । भेदस्य श्रुतिस्मृतिसूत्रसिद्धत्वेनैवं व्याख्यानस्य प्रमाणविरुद्धत्वादित्याशयेन भेदे श्रुत्यादिकं दर्शयति । यत्र हि द्वैतमिवेति । यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यादिना यत्र यस्मामवस्थायां द्वैतमिव भवति । इतरस्वातन्त्र्याभावादिवेत्युक्तम् । पराधीनोऽपि भेदोऽस्ति तत्तदा तदितर इतरं पश्यतीत्यादिना दर्शनादिभोगो युज्यत इति व्याप्तिमभिधाय यत्रत्वस्य सर्वमात्मैवाभूत् तत्केनकं पश्येदिति मोक्षे ऐक्याङ्गीकारे दर्शनानादिभोगाभावापादनं क्रियते । तस्य विपर्ययपर्यवसाने भेदसिद्धिः स्पष्टैवेति भावः । जुष्टं यदा पश्यत्यन्यमीशमित्यस्यैव प्रकृतसङ्गतत्वेनोदाहर्तव्यत्वेऽप्यस्य महिमानमित्यस्योदाहरणं भेदज्ञानं मोक्षसाधनमित्येतदपि श्रुतिसिद्धमिति दर्शयितुमिति ज्ञातव्यम् । ब्रह्मविदो ऋतं पिबन्तौ यौ भगवद्रूपविशेषौ तौ छायातपौ विद्वदविदुषोः सुखदुःखप्रदौ वदन्तीतीश्वरस्य जीवसुखदुःखप्रदत्वोक्त्या भेदउक्तः । एको बहूनामित्यत्रापि ईश्वरस्य जीवकामितकरत्वेन भेदः । अस्य परमात्मनः स पूर्वोक्तमहिमा सत्यः । अहं तं सत्यमहिमानं विप्रप्रधानकेषु यज्ञेषु शवः सुखमुद्दिश्य गृणे स्तौमीति सत्यभूतविरुद्धधर्माधिकरणत्ववचनेन स्तुत्यस्तोतृभावोक्त्या च भेदउक्तः । सत्यं निर्दुःखपूर्णसुखानुभवरूपम् । एनं परमात्मानमन्वनुसृत्योपजीव्य विश्वे सर्वे प्राणिनः । मदन्ति सुखं प्राप्नुवन्तीत्युपजीव्योपजीवकभावोक्त्या भेदलाभः । यत्र नाक पदवाच्ये निर्दुःखसुखरूपे विष्णौ पूर्वे पूर्वकल्पेमुक्ता देवाः सन्ति तन्नामका अस्मिन्कल्पे मुक्ता देवाः सचन्त आप्नुवन्निति देवानां विष्णौ सायुज्यरूपमोक्षोक्त्या भेदसिद्धिः । अध्यवसायान्तगामी परमेश्वरः सर्वानुग्रान्दैत्यान्दमयंस्तद्विरुद्धान्देवान् संसारमतिक्रम्य स्वपदं नयन्वेदादिषु श्रूयत इतीश्वरस्य देवदैत्यगतिप्रदत्वेन भेदलाभः । इत्यादिवाक्यानि यतो भेदं वदन्ति अतो न वाच्यमिति सम्बन्धः । एवमग्रे । ननु यत्र हि द्वैतमिव भवतीत्यत्र मोक्षे भेदाभावे दर्शनादिभोगो न स्यादित्यापादने तात्पर्यमुक्तम् । तत्रेष्टापत्तिमाशङ्क्य प्रमाणविरोधमाह । मग्नस्येति । परेऽज्ञाने मग्नस्य दर्शनादिभोगाभाववत इत्यर्थः । दुःखतरं न भवेत्किं भवेदेव । तथा च मोक्षे दुःखाङ्गीकारोऽनुचित

इतीष्टापत्तिः नाशङ्कनीयेति भावः । पुरुषाश्चेतनाः किं बहव उतैक एवेति जनमेजयप्रश्ने एतत् एतस्मिन् जगति एकं पुरुषं न च्छन्तीति वैशम्पायनेन चेतनैक्यस्य निराकृतत्वात् । बहूनां पुरुषाणां च यथैका योनिरुच्यते । तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकमिति परमपुरुषस्य सर्वजीव-कारणतया पृथगभिधानाच्च भेदसिद्धिः । मोक्षधर्मे यतो भेद उक्तोऽतो न वाच्यमित्यर्थः । एवं वायुप्रोक्त इत्यादिकमपि योज्यम् । सूत्रेषु तत्तद्वाक्यविषयेषु जीव एव प्रतिपाद्यत इति पूर्वपक्षे जीवोऽत्र प्रतिपाद्यो न किं त्वीश्वर इति समर्थनेन भेदव्यपदेशादित्यत्राभेदनिरासेन पृथगुपदेशादित्यत्र स्वात-न्त्र्येणैव भेदस्योक्तत्वेन भेदसिद्धिः । आदिशब्दात् ''स्थित्यदनाभ्यां चे''त्यादीनां ग्रहणम् । ननूदाहृतानि वचनानि मिथ्याभूतभेदपराण्यतो न विरोध इत्यत आह ॥ सत्यत्वं चेति । स्थाणू रुद्र उच्चक्रामोत्कृष्टतया पादविक्षेपं कृतवान् शीघ्रमाजगामेत्यर्थः । आगत्य ब्रह्माणं प्रत्याक्षेपं कृतवान् । किमिति । क इत्यादि किं शब्दत्रयमाक्षेपे । त्वं कोऽसि न कोऽपि । अस्मत्तो हरेश्च भिन्नो नास्ति । एवं वयं के स्मः न केऽपि त्वत्तो हरेश्च भिन्ना नस्मः । तथा स हरिरपि को न कोऽपि त्वत्तोऽस्मत्तश्च भिन्नो न भवति । यस्तु भेदो प्रतीयेत स सर्वोऽपि मिथ्यैव । अद्वैतवादिभिस्तथा प्रतिपादनादिति । एवमाक्षेपे स ब्रह्मोवाच । किमिति । यदित्यादौ यच्छब्दत्रयश्रवणात्त च्छब्दत्रयम-ध्याहार्यम् । तथा चाहं यो यद्भेदवत्तया प्रतीतोऽस्मि स तद्भेदवानेवास्मि । एवं नाना भिन्ना बाधकाभावात्प्रतीतस्य भेदस्य यूयं ये यद्भेदवत्तया प्रतीतास्त एव तद्भेदवन्त एव स्थ । स हरिरपि यो यद्भेदवत्तया प्रतीतः स एव तद्भेदवानेव । प्रतीत्यनुसारेण सर्वे भिन्ना एव नाभिन्नाः । बाधकाभावात्प्रतीतस्य भेदस्य न मिथ्यात्वं कल्प्यमिति भावः । अथानन्तरमेनमिदानीं बाधका-भावेऽप्युत्तरत्र बोधो भविष्यति । अद्वैतवादिभिस्तथा प्रतिपादनादिति शङ्कमानं रुद्रमुप तत्समीपे आक्रोशं कृतवान् । कोपाटोपेन शपथपूर्वकमुत्तरं दत्तवान् । किमिति । भिदा प्रतीयमानो भेदः सत्यं सत्यमिति त्रिवारमुक्त्या शपथपूर्वोक्तिरियमिति ज्ञायते । उत्तरत्रापि बाधो न भविष्यतीति भावः । तर्हि कथमद्वैतवादिनां वचनमित्यतस्तत्रापि शपथपूर्वकमुत्तरमाह ॥ मैवारुवण्य इति । अत्रारुभि-र्दोषभिर्वननीयो न तदुक्तप्रकारेण हरिर्ज्ञेयो न । अद्वैतवादिनां मिथ्याज्ञानादिदोषत्वेन तद्वचनं न तत्त्वव्यवस्थापकमिति भावः । पूर्वं भेदसद्भावप्रतिपादनायोदाहृते श्रुतीतत्सत्यत्वमपि प्रतिपादयत इत्याशयेन पुनरुदाहरति । सत्यमेनमिति । एनमनु विश्वे मदन्तीति यत्तत्सत्यमित्यर्थः । तथा चात्रोपजीव्योपजीवकभावस्य भेदव्याप्तवस्य सत्यत्वे सत्यः सोऽस्येत्यत्र च भेदव्याप्तविरुद्धधर्मस्य सत्यत्वे भेदस्यापि सत्यत्वं सेत्स्यतीति भावः । एवं भेदस्य सत्यत्वे श्रुतीरुदाहृत्य स्मृतिमप्युदाहरति ॥ महासंहितायां चेति । मोहविवर्जिता अयं भेदो मिथ्येति मोहवर्जिताः । अनेन भेदज्ञानस्य मोक्षसाधनत्वं यत्पूर्वमुक्तं तदपि प्रमापितमिति ज्ञातव्यम् । भ्रान्तिं भ्रान्तिकल्पितम् । अनारतम-विरतम् । अनवसानमिति यावत् । ननु जीवेश्वरभेदस्य भ्रान्तिकल्पितत्वं वदतां कथं

परमात्मविनिन्दकत्वमित्यतस्तद्दर्शयंस्तमःसाधनं सर्वमपि पापं तेषामस्तीत्याह ॥ पराधीनश्चेति । तु विशेषाकारेण तयोः सदोषनिर्दोषयोरैक्यं वदता तेन मायावादिना किं दुष्कृतं पापं न कृतं सर्वमपि पापं कृतमेवेति भावः । यद्वा । तेन मायावादिना कृतं कर्मादुष्कृतं दुष्कृतभिन्नं किमस्ति सर्वमपि दुष्कृतमेवेत्यर्थः । अनेन निर्दोषस्य दोषेणैक्यं वदतां तन्निन्दकत्वं स्पष्टमेवेति दर्शितम् । ननु कुत एवं वदन्तीत्यतोऽत्र कारणमाह ॥ अन्तर्याम्यैक्येति ॥ यानीहेश्वरैक्ये तु महातात्पर्येणान्तर्याम्यैक्यवाचीनि वचनानि ''तत्त्वमस्यहंब्रह्मास्मी''त्यादीनि तानि तानि दृष्ट्वा श्रुत्वेहेश्वरे जीवैक्यं वदन्ति । यतो दुरात्मानोऽनादिवासनादूषितान्तःकरणा अत एवाल्पचेतसोऽधिष्ठानमात्रज्ञानिनः । नन्वेवं तत्त्वमसीत्यादिवाक्यानामीश्वरस्यान्तर्यामिभगवद्रूपैक्यपरत्वेत्वमस्यस्मि स्वः आत्मा पुरुषोंऽतर्यामीत्यादि जीवे प्रयुज्यमानानां शब्दानां तदन्तस्थे ब्रह्मणि लक्षणाप्रसङ्ग इत्यतो महायोगवृत्त्यैव तेषां तत्परत्वमिति दर्शयन् ऐक्यवचने साक्षात्कारणभूतां भ्रान्तिं च दर्शयति ॥ अस्यस्मीति । असनादसिनित्यास्ति तामानादस्मि परोक्षत्वात्त्वम् अहेयत्वादहं स्वातन्त्र्यात्स्वः । आततगुणत्वादात्मेति अभिधागोचरो मुख्यवृत्तिविषयः । सर्वान्तरत्वादित्यनेन पूर्षु देहेषु शेत इति निर्वचनं सूचयति । अस्यस्मीत्यादौ निमित्तानि प्रमाणान्तरेण प्रसिद्धानीति नोक्तानि । अतो वस्तुतः शक्त्या भगवत एवोक्ताशब्दविषयत्वात् । वचनैस्त्वमस्यहमस्मीत्यादिरूपैर्भ्रमन्ति जीवैक्यमुच्यत इति भ्रान्ता भवन्ति । तत्परशब्दो भावप्रधानः । तथा चासुरमोहे मोहने तत्परत्वं तात्पर्यं येषां ते तथा तैरित्यर्थः। ननु मोहने तात्पर्यं च चेतनधर्मः स कथमचेतनेषु वेदादिवचनेष्वित्यत आह ॥ तन्मोहन इति । देवानां देवादिवचनाभिमानिनां परमस्य मुखतो वेदद्रष्टुः परमेश्वरस्य परमस्य भारतादिकर्तुरिति वा तस्मादात्मनीश्वर इत्यस्योक्त एवार्थ इति स्थितम् ॥ २०, २१, २२ ॥

अतो वै कवयो नित्यं भक्तिं परमया मुदा ।
वासुदेवे भगवति कुर्वन्त्यात्मप्रसादिनीम् ॥ २३ ॥

प्रकाशिका— अत्र सदाचारं प्रमाणयन् उपसंहरति ॥ अत इति । अतो भक्तिजनकस्यैव धर्मस्य परत्वात् । भक्तेर्मोक्षपर्यन्तफलजनकत्वाच्च । आत्मप्रसादिनीं मनोनैर्मल्यापादिनीं विष्णुप्रसादजननीं वा ॥ २३ ॥

सत्वं रजस्तम इति प्रकृतेर्गुणास्तै-
र्युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति सञ्ज्ञाः
श्रेयांसि तत्र खलु सत्वतनौ नृणां स्युः ॥ २४ ॥

तात्पर्यम्— विष्णोरेव त्रिसञ्ज्ञाः । वामने च । 'ब्रह्मविष्ण्वीशरूपाणि त्रीणि विष्णोर्महात्मनः । ब्रह्माणि ब्रह्मरूपोऽसौ शिवरूपी शिवे स्थितः । पृथगेव स्थितो देवो विष्णुरूपी जनार्दन' इति । त्रयोऽपि गुणा विष्ण्वाश्रयाः । तथापि सत्वतनौ जीवेश्रेयांसि स्युः ॥ २४ ॥

प्रकाशिका— ननु यदि विष्णुप्रसाद एव मोक्षजनकस्तर्हि सात्त्विकानामिव राजसानां तामसानां च कुतो न मोक्षः । त्रयाणामपि प्रकृतिगुणानां विष्ण्वाश्रितत्वाविशेषादित्याशङ्क्य सत्त्वगुणस्य रजस्तमोभ्यामुत्तमत्वात्सात्त्विकानामेव मोक्षो नेतरेषामित्याह ॥ सत्त्वं रज इति । नन्वत्र परः पुरुषः परमात्मा हरिविरिञ्चिहरेति संज्ञा धत्त इति कथं विरिञ्चहरसंज्ञयोर्ब्रह्म रुद्रगतत्वादित्याशङ्कायां ब्रह्मरुद्रयोस्ते संज्ञे तन्नामकविष्णुरूपाधिष्ठितत्वेनैव निमित्तेन न साक्षात् साक्षाद्विष्णोरेव ताः संज्ञा अतः मूलोक्तं युक्तमित्याशयेनाह ॥ विष्णोरेव त्रिसंज्ञा इति ॥ अत्र प्रमाणमाह ॥ वामनपुराणे चेति । मूलेऽसङ्गतिशङ्कापरिहारायापेक्षितमध्याहृत्य सत्त्वतनौ विष्णाविति प्रतीतिं वारयन्योजनां संक्षेपतो दर्शयति ॥ त्रयोऽपीति । यद्यपीति शेषः । तैर्युक्त इत्यस्य तात्पर्यम् विष्ण्वाश्रया इति । ततश्चायं योजना । पुरुषः पूर्णषड्गुणो हरिः प्रकृतेः परोऽप्यप्राकृतविग्रहोऽपि सत्त्वं रजस्तम इति प्रकृतेर्ये गुणास्तैर्युक्तस्तेषामाश्रयः सन् इह जगत्येक एक एव हरिर्विरिञ्चिहरेति संज्ञा नामानि धत्ते । तत्संज्ञकान् अवतारान्कृतवानिति यावत् । नाममात्रभेदोऽत्र नार्थत इति दर्शयितुमेकः संज्ञा धत्त इत्युक्तम् । हरा इतीति वक्तव्ये हरेति संधिश्छान्दसः । किमर्थं धत्त इत्यत उक्तम् अस्य जगतः स्थित्यादये । स्थित्युत्पत्तिसंहारान्कर्तुमिति । सत्त्वप्रवर्तकतया सत्त्वाश्रयो विष्णुर्जगतः स्थितिम् । रजःप्रवर्तकतया रजोगुणाश्रयो ब्रह्मनामा हरिः सृष्टिम् । तमः प्रवर्तकतया तमोगुणाश्रयो हरनामा हरिः संहृतिं करिष्यत्यत एवमुक्तम् । यद्यप्येवं त्रयो गुणा विष्ण्वाश्रयास्तथाऽपि तत्र तत्र गुणात्मके जगति विद्यमानानां नृणां मनुष्यदेहिनां मध्ये यः सत्त्वतनुः सत्त्वगुणप्रचुरदेहवान् जीवस्तस्मिन्नेव श्रेयांसि श्रेयःसाधनानि भक्त्यादीनिस्युः । न राजसतामसदेहवज्जीवेषु । खल्वित्यनेन सत्त्वगुणस्योत्तमत्वादिति हेतुं सूचयति ॥ २४ ॥

पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः ।
तमसस्तु रजस्तस्मात्सत्वं यद् ब्रह्मदर्शनम् ॥ २५ ॥

तात्पर्यम्— मेघरूपत्वाद्धूम उत्तमः ॥ २५ ॥

प्रकाशिका— सत्त्वगुणस्योत्तमत्वं कुत इत्यतो दृष्टान्तमुखेनोपपादयति ॥ पार्थिवादिति । अत्राग्नेर्धूमादुत्तमत्वे त्रयीमय इति हेतुरुक्तः । धूमस्य दारु पदोदितकाष्ठोत्तमत्वे न कोऽपि

हेतुरुक्तोऽतस्तं दर्शयति ॥ मेघरूपत्वादिति । धूमस्यान्तरिक्षसम्बन्धिमेघोपादानत्वात् पृथिवीसम्बन्धिकाष्ठापेक्षयोत्तमत्वादित्यर्थः ॥ तत्तश्चायं श्लोकार्थः । यथा तथा उत्तम इति पदत्रयमध्याहार्यम् । यथा पार्थिवात्पृथिवीलोकसम्बन्धिनो दारुणः काष्ठाद्धूम उत्तमः । अन्तरिक्षसम्बन्धिमेघात्मना परिणतत्वात् । तस्माद्धूमादग्निरुत्तमः । यतस्त्रयीमयो वेदवेदप्रतिपाद्येन्द्रादि देवप्रदर्शनशक्तिमान्सम्यक् संस्कृतेऽग्नौ तत्तन्मन्त्रैरिष्टा देवाः प्रत्यक्षा भवन्तीति हि प्रसिद्धम् । तथाऽधोगतिसाधनात्तमसो रज उत्तमं स्वर्गादिसाधनकुर्मजनकत्वादिति हेतुं तु शब्देन फलविशेषद्योतकेन सूचयति । तस्माद्रजोगुणात्सत्त्वमुत्तमम् । यद्यस्माद् ब्रह्म वेदार्थभूतं परं ब्रह्म दर्शयतीति ब्रह्मदर्शनम् । तथा च दारु धूमापेक्षयाऽग्नेर्वेदार्थप्रदर्शने शक्तिमत्वाद्यथोत्तमस्त्वं तथा सत्त्वगुणस्यापि वेदार्थप्रदर्शनशक्तिमत्वादितर गुणद्वयापेक्षयोत्तमत्वमिति भावः । अत्र धूमदृष्टान्तेन रजोगुणस्योत्तमत्वकथनं यादृशं सत्त्वगुणस्योत्तमत्वं तादृशं नेतरत्रेति प्रदर्शनाय । प्रयोगस्तु सत्त्वं तमोरजोभ्यामुत्तमं तत्कार्यापेक्षयोत्तमकार्यजनन शक्तिमत्वात् । यो यत्कार्यापेक्षयोत्तमकार्यजननशक्तिमान्स तस्मादुत्तमः । यथा दारु धूमापेक्षयोत्तमकार्यजननशक्तिमानग्निर्दार्वाद्यपेक्षयोत्तम इति द्रष्टव्यम् ॥ २५ ॥

भेजिरे मुनयोऽथाग्रे भगवन्तमधोक्षजम् ।
सत्वं विशुद्धं क्षेमाय कल्पते नेतराविह ॥ २६ ॥

प्रकाशिका— सत्त्वगुणस्यैव श्रेयःसाधनत्वे शिष्टाचारं प्रमाणयति ॥ भेजिर इति । मुनयः सात्त्विकप्रकृतयः । अग्रे पूर्वं भेजिरे यतोऽथो तस्मादिह संसारिषु विशुद्धं रजस्तमोभ्यामनभिभूतं सत्त्वं क्षेमाय मोक्षाय कल्पते समर्थं भवति । इतरौ तमोरजोगुणौ क्षेमाय न समर्थावित्यर्थः ॥ २६ ॥

मुमुक्षवो घोररूपान् हित्वा भूतपतीनथ ।
नारायणकलाः शान्ता भजन्ति ह्यनसूयवः ॥ २७ ॥

तात्पर्यम्— सात्विकानां वासुदेवे भक्तिरुत्पद्यते ॥ २७ ॥

प्रकाशिका— अत्र सत्त्वं क्षेमाय भवतीत्येतदुपपादयति ॥ सात्त्विकानामिति । यत इति शेषः । भक्त्या चोक्तरीत्या मोक्ष इति भावः । मोक्षार्थं भगवत एव भजनीयत्वेऽपि शिष्टाचारं प्रमाणयति ॥ मुमुक्षव इति । घोररूपान् राजसांस्तामसांश्च राजसतामसफलप्रदान् भूतपतीन्भूतत्यादीन् रुद्रादीन् शान्ताः परिपूर्णसुखात्मिका वासुदेवकला भगवन्मूर्तीः । अनसूयवोऽसूयादिदोषरहिताः । हि यस्माद्भजंत्यथ तस्माद्वासुदेव एव । भजनीय इति शेषः ॥ २७ ॥

रजस्तमः प्रकृतयः समशीलान् भजन्ति वै ।
पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः ॥ २८ ॥

तात्पर्यम्— **भूतेशप्रजेशादीन् ॥ २८ ॥**

प्रकाशिका— ननु श्रेयस्कामाः केचिदन्यानपि भजन्तो दृश्यन्ते । सत्यम् । न ते मुमुक्षव इत्याह ॥ रजस्तमः प्रकृतय इति रजस्तमसी प्रकृतिः स्वभावो येषां ते तथा । अत एव स्वैः समं शीलं येषां ते तथा । तच्छ्रिया सहैश्वर्यं च प्रजाश्चेप्सन्तीति श्रियैश्वर्यप्रजेप्सवः । इयङादशे । श्रियं चैश्वर्यं प्रजाश्चेति वा । पितृभूतप्रजेशादीनित्यत्र द्वन्द्वान्ते श्रूयमाणेश शब्दस्य प्रत्येकं सम्बन्धेऽपि पितॄणां भजनीयत्वं न स्यादतोऽत्र विविक्षितविग्रहं दर्शयति ॥ भूतेशप्रजेशादीनिति । तथा च भूतानि च प्रजाश्च तासामीशाः । अत्रान्ते श्रूयमाण ईश शब्दः प्रत्येकमभिसंवध्यते । ततः पितरश्च भूतप्रजेशाश्चेति विग्रहः कार्य इति भावः ॥ २८ ॥

वासुदेवपरा वेदा वासुदेवपरा मखाः ।
वासुदेवपरा योगा वासुदेपराः क्रियाः ॥ २९ ॥

वासुदेवपरं ज्ञानं वासुदेवपरं तपः ।
वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥ ३० ॥

प्रकाशिका— मोक्षार्थिभिर्भगवानेव भजनीयः । मोक्षफलकवेदादिशास्त्रमहातात्पर्यविषयित्वादित्याशयेन वेदादिशास्त्रमहातात्पर्यविषयत्वं वासुदेवस्य दर्शयति ॥ वासुदेवपर इति द्वाभ्यां श्लोकाभ्याम् । पर उद्देश्यः । महातात्पर्यगोचरो चेषां ते तथा । ननु वेदेषु क्वचिदग्निष्टोमाद्या मखाः प्रतिपाद्यन्ते क्वचित्प्राणायामादयो योगाः क्वचित्सन्ध्योपासनादिक्रियाः । क्वचिद्देवतातारतम्यादि ज्ञेयम् । क्वचित्कायक्लेशात्मकं तपः क्वचित्पूर्तादिलोकरूपो धर्मः । क्वचित्सत्यादिरूपं गम्यम् । अतः कथं सर्वेषां वेदानां वासुदेवपरत्वमित्यत आह ॥ वासुदेवपरा मखा इत्यादि । यद्वेदेषु मखादिकमुच्यते तत्सर्वं वासुदेवोद्देश्यकमेवातस्तेषामवान्तरतात्पर्यविषयत्वेऽपि महातात्पर्यगोचरत्वं वासुदेवस्यैवेति भावः । वासुदेवपरं ज्ञानमित्यत्र ज्ञान शब्दो ज्ञेयपरः ॥ २९, ३० ॥

स एवेदं ससर्जाग्रे भगवानात्ममायया ।
सदसद्रूपया वासौ गुणमय्याऽगुणो विभुः ॥ ३१ ॥

तया विलसितेष्वेषु गुणेषु गुणवानिव ।
अन्तःप्रविष्ट आभाति विज्ञानेन विजृम्भितः ॥ ३२ ॥

यथा व्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु ।
नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ॥ ३३ ॥

असौ गुणमयैर्भावैर्भूतसूक्ष्मेन्द्रियादिभिः ।
स्वनिर्मितेषु निर्विष्टो भुङ्क्ते भूतेषु तद्गुणान् ॥ ३४ ॥

तात्पर्यम्— आत्ममायया स्वेच्छया । सदसद्रूपया प्रकृत्या च ॥ ३१ ॥

तया सदसद्रूपया । विज्ञानेन विजृम्भितः । विज्ञानेनैव सम्पूर्णः ॥ ३२ ॥

तद्गुणानेव भुङ्क्ते न दोषान् । 'सर्वत्र सारभुग्देवो नासारं स कदाचने'ति वामनपुराणे । अनश्नन्नित्यशुभापेक्षया परवशत्वापेक्षया क्लृप्त्यपेक्षया च । 'अक्लृप्त्या च स्वतन्त्रत्वादशुभस्य च वर्जनात् । अभोक्ता शुभभोक्तृत्वाद्भोक्तेत्येव च तं विदुः । अन्यूनानधिकत्वाच्च पूर्णस्वानन्द भोजनात् । विरागाच्च परस्यास्य भोक्तृत्वप्रतिषेधनमि'ति स्कान्दे ॥ ३४ ॥ इति प्रथम-स्कन्धतात्पर्ये द्वितीयोऽध्यायः ॥

प्रकाशिका— ननु सृष्ट्यादिव्यापारशीले एव वस्तुनि वेदसमन्वयो मीमांसायां प्रसिद्धः । अतः कथं वासुदेवपरत्वं वेदानामित्याशङ्कां परिहरन् ''तस्य कर्माण्युदाराणि ब्रूहीति'' प्रश्नस्योत्तरमाह ॥ स एवेदमिति चतुर्भिः श्लोकैः । तत्रादौ जगत्सृष्टिरूपं कर्म वक्तुं स एवेति श्लोकः । अत्र सदसद्रूप-याऽऽत्ममाययेति सामानाधिकरण्येन व्याख्याने च शब्दवैयर्थ्यमतो व्याचष्टे ॥ आत्ममाययेति ॥ स्वेच्छयेति । स्वरूपभूतेच्छयेत्यर्थः । निमित्तकारणरूपया । तथा चात्मरूपया माययेति व्याख्ये-यमिति भावः । सदसद्रूपया कार्यकारणरूपया प्रकृत्येति अनुकृष्टस्य माया शब्दस्यार्थः । उपादा-नभूतया । तया विलसितेष्वित्यत्र पूर्वं द्विविधमायायाः प्रकृतत्वात्तयेत्यनेन कस्याः परामर्श इति न प्रतीयतेऽत आह ॥ तया सदसद्रूपयेति । तथा च विलसितेष्वित्यस्य परिणतेष्विति व्याख्यानं सूचयति । विज्ञानेन विजृम्भित इत्येतदप्रतीतेर्व्याख्याति ॥ विज्ञानसम्पूर्ण इति । विजृम्भित-शब्दस्यात्यूर्जितवाचित्वादिति भावः । भुङ्क्ते भूतेषु तद्गुणानित्यत्र गुणशब्दस्य विषय-परत्वादशुभविषयभोगस्यापि प्राप्तौ विवक्षितं तात्पर्यं दर्शयति ॥ गुणानेवेति । शुभानेवेत्यर्थः । न दोषान्दुष्टान् । अशुभानिति यावत् । अनेन मूले गुणशब्दः शुभवाची स च सावधारणो विवक्षित इत्युक्तं भवति । अत्र प्रमाणमाह ॥ सर्वत्रेति । सर्वत्र सर्वप्राणिदेहेषु सारभुक् श्रेष्ठविषयभुक् । शुभ-भुगिति यावत् । नासारं भुङ्क्त इति शेषः । उत्तरार्धस्थेन वा तादृशेन पदेन वाऽन्वयः । नन्वेव-मनश्नन्नन्य इत्यादि श्रुतिविरोध इत्यतः श्रुत्यभिप्रायमाह ॥ अनश्नन्निति । प्रवृत्तमिति शेषः । यदत्र

निषिद्ध्यतेऽशनं तदशुभस्यैव विषयस्य शुभस्यापि परवशस्य यत्नसाध्यस्य वा । न तु सर्वथेति भावः। परवशत्वापेक्षयेत्यादौ शुभस्यापि । विषयस्येति शेषः । कृतिर्यत्नः । अपरवशत्वापेक्षया । अकृत्स्य-पेक्षयेति पाठेऽशुभापेक्षयेत्यत्र लक्षणयाऽशुभनिषेधापेक्षयेत्यर्थः । अत्र प्रमाणमाह ॥ अकृत्स्या चेति । यत्नाभावेनेत्यर्थः । तथा चानश्नन्नित्यत्र शुभेषु विषयेषु यत्न एव निषिद्ध्यत इति भावः । स्वतन्त्र-त्वात्परवशत्वाभावादित्यनेन परवशत्वमेव तत्र निषिद्ध्यत इति ज्ञातव्यम् । अभोक्ताऽभोक्तेत्युच्यते । सर्वथा भोगाभावपरतया व्याख्याने प्रमाणविरोध इत्याह ॥ शुभभोक्तृत्वादिति । भोक्ता चेत्येव तं विदुः । न तु सर्वथाऽभोक्ता इति । ज्ञानिप्रत्यक्षमेव प्रमाणमत्र दर्शितमिति ज्ञातव्यम् । उदाहृत-श्रुतेरर्थान्तरमाह ॥ अन्यूनेति । न्यूनत्वाधिकत्वयोरभावादित्यर्थः । विषयभोगेनोच्चवत्त्वं तदभावेन नीचवत्त्वं च निषिद्ध्यते श्रुतौ न विषयभोग एवेति भावः । स्वानन्दः स्वरूपभूतानन्दो विषय-भोगानभिव्यक्तस्तस्य भोजनादित्यर्थः । अनेन श्रुतौ विषयभोगजन्यमेव सुखं निषिद्ध्यत इति सूचयति । विरागाच्चेत्यनेन विषयभोगकामनैव निषिद्ध्यत इति दर्शयति । ततश्चायं श्लोकचतुष्ट-यस्यार्थः ॥ यः सर्ववेदादिशास्त्रमहातात्पर्यविषयतया पूर्वमुक्तः स एव भगवान्वासुदेवोऽगुणः सत्त्वादिगुणसम्बन्धशून्यः । विभुः सर्वकारणेषु प्रवर्तकतया व्याप्तः सन् अग्रे आदिकाले आत्ममायया स्वस्वरूपेच्छया निमित्तभूतया सदसद्रूपया कार्यकारणरूपया गुणमय्या सत्त्वादिगुणा-त्मिकया च माययोपादानरूपया जडप्रकृत्या चेदं महदादिकार्यजातं ससर्ज ॥ ३१ ॥

प्रकाशिका— नन्वेवमगुणस्य भगवतः कथं केचिद्गुणबद्धजीवाभेदं वदन्तीति शङ्कायां तेषां तथा वचननिमित्तभ्रान्तौ कारणं दर्शयन् सृष्ट्यनन्तरं तस्य नियमनाय सर्वजगदन्तःप्रवेशरूपं कर्माह ॥ तयेति । तया सदसद्रूपया जडप्रकृत्या विलसितेषु प्रकाशितेषु । भूतभौतिकदेहेन्द्रियाद्यात्मना परिणतेष्विति यावत् । एषु प्रत्यक्षादिसिद्धेषु गुणेषु कार्येषु प्रेरणायान्तःप्रविष्टो यतोऽतो गुणवानिव गुणबद्धजीव इव । जीवात्मनेति यावत् । आभाति । अज्ञानामिति शेषः । वस्तुतस्तु न जीववत् । यतो विज्ञानेन विशेषविषयकज्ञानेन विजृम्भितः पूर्णः । जीवस्तु नैतादृश इत्यनुभवसिद्धमिति भावः ॥ ३२ ॥

प्रकाशिका— नन्वेवं सकलकार्येषु प्रेरणाय समग्ररूपेणावस्थाने स्थानभेदात्तस्मिन् भेदप्रसक्ति-रित्याशङ्कापरिहारायैकस्यैवानेकेषु बहुरूपत्वेनैवावस्थानं न भेदनेत्याशयेन तस्य बहुधा भवनरूपं कर्म सोदाहरणमाह ॥ यथेति । एको वह्निः स्वयोनिषु स्वव्यक्तिस्थानेषु दारुषु व्यवहितोऽदृश्यतया स्थितो नानेव भाति । बहुरूपः सन्निति शेषः । न वस्तुतो नाना । अभिमानिदेवतापेक्षयैतत् । तथैकः पुमान्परमपुरुषः । च शब्दोऽप्यर्थः । विश्वात्मा समग्रस्वरूप एव भूतेषु प्राणिषु प्रविष्टोऽपि नानेव भाति । बहुरूपो भूत्वेति शेषः । वस्तुतो न नानेत्यर्थः ॥ ३३ ॥

प्रकाशिका— एवं बहुरूपस्य तस्य शुभविषयभोगरूपं कर्माह ॥ असाविति । असौ परमपुरुषो गुणमयैः सत्त्वादिगुणविकारैर्भूतानि पञ्चसूक्ष्माणि पञ्चतन्मात्रारूपाणीन्द्रियाणि दश आत्मामनस्तै-र्भावैस्तत्त्वैरुपादानरूपैः स्वनिर्मितेषु स्वेनैव निर्मितेषु । अन्यूनेन भोगे परवशत्वाभावं दर्शयति । भूतेषु प्राणिदेहेषु निविष्ट ऐश्वर्यादसङ्गतया प्रविष्टस्तद्गुणांस्तत्तदिन्द्रियविषयान् शुभानेव भुङ्क्ते इति ॥ ३४ ॥

भावयन्नेष सत्त्वेन लोकान् वै लोकभावनः ।
लीलवतारानुगतस्तिर्यङ्नरसुरादिषु ॥ ३५ ॥

॥ इति श्रीमद्भागवते प्रथमस्कन्धे द्वितीयोऽध्यायः ॥

प्रकाशिका— तस्य लीलावताररूपकर्मवदन् आख्याहीति प्रश्नस्योत्तरमुत्तराध्याये वक्तुं भूमिकामारचयति ॥ भावयन्निति । लोकभावनो जगत्कर्ता । एषः परमपुरुषः सत्त्वेन सत्त्वगुणेन लोकान्सज्जनान् भावयन्पालयंस्तिर्यङ्नर- सुरादिषु तिर्यक्षु वराहादिषुः नरेषु मनुष्येषु सुरेषु । आदि शब्दादृष्यादिषु । लीलयैव न कर्मणा येऽवताराः प्रादुर्भावास्तैस्तान्ननुगतोऽनुगच्छन्ति । यज्जातिमध्ये स्वयमवतरति तज्जात्यनुसारिर्णी चेष्टां करोतीति भावः ॥ ३५ ॥ इति श्रीभागवतटिप्पण्यां द्वितीयोऽध्यायः ॥ १-२ ॥

अथ तृतीयोऽध्यायः

सूत उवाच —

जगृहे पौरुषं रूपं भगवान् महदादिभिः ।
सम्भूतं षोडशकलमादौ कोकसिसृक्षया ॥ १ ॥

तात्पर्यम्— व्यक्त्यपेक्षया जगृह इति । तथा हि तन्त्रभागवते । 'अहेयमनुपादेयं यद्रूपं नित्यमव्ययम् । स एवापेक्ष्य रूपाणां व्यक्तिमेव जनार्दनः । अगृह्णाद्व्यसृजच्चेति कृष्णरामादिकां तनुम् । पठ्यते भगवानीशो मूढबुद्धिव्यपेक्षया । तमसा ह्युपगूढस्य यत्तमःपानमीशितुः । एतत्पु-रुषरूपस्य ग्रहणं समुदीर्यते । कृष्णरामादिरूपाणां लोकव्यक्तिमपेक्षये'ति । महदादिभिः सम्भूतम् अन्तर्गतमहदादि । न महदादिशरीरम् । 'यस्मिन्नेताः षोडशकलाः प्रभवन्ती'ति श्रुतिः। 'यत्किञ्चिदिह लोके वै देहबद्धं विशां पते । सर्वं पञ्चभिराविष्टं भूतैरीश्वरबुद्धिजैः । ईश्वरो हि महद्भूतं प्रभुर्नारायणो विराट् । भूतान्तरात्मा विज्ञेयः सगुणो निर्गुणोऽपि च । भूतप्रलयमव्यक्तं

शुश्रूषुर्नृपसत्तमे'ति मोक्षधर्मे। 'नासीदहो न रात्रिरासीन्नासदासीत्तन्महद्वपुस्तदाऽभवद्विश्वरूपं सा विश्वरूपस्य रजनी'ति भाल्लवेयश्रुतिः। 'न तस्य प्राकृता मूर्तिर्मांसमेदोऽस्थि सम्भवा। न योगित्वादीश्वरत्वात्सत्यरूपोऽच्युतो विभुरि'ति वाराहे। 'सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः। हानोपादानरहिता नैव प्रकृतिजाः क्वचित्। परमानन्दसन्दोहा ज्ञानमात्राश्च सर्वशः। सर्वे सर्वगुणैः पूर्णाः सर्वे भेदविवर्जिताः। अन्यूनानधिकाश्चैव गुणैः सर्वैश्च सर्वतः। देहिदेहभिदा चैव नेश्वरे विद्यते क्वचित्। तत्स्वीकारादिशब्दस्तु हस्तस्वीकारवत्स्मृतः। वैलक्षण्यान्न वा तत्र ज्ञानमात्रार्थमीरितम्। केवलैश्वर्यसंयोगादीश्वरः प्रकृतेः परः। जातो गतस्त्विदं रूपं तदित्यादि व्यवक्ष्यत' इति महावाराहे। 'एकमेवाद्वितीयं' 'नेह नानाऽस्ति किञ्चन'। 'एवं धर्मान्पृथक्पश्यन्नि'त्यादि च। तस्यैवास्थूलत्वाद्यैश्वर्ययोगात्। तथा च कौर्मे। 'अस्थूलश्चानणुश्चैव स्थूलोऽणुश्चैव सर्वतः। अवर्णः सर्वतः प्रोक्तः श्यामो रक्तान्तलोचनः। ऐश्वर्ययोगाद्भगवान्विरुद्धार्थोऽभिधीयते। तथापि दोषाः परमे नैवाहार्याः कथञ्चन। गुणा विरुद्धा अपि तु समाहार्याश्च सर्वत' इति॥ विष्णुधर्मोत्तरे च 'गुणाः सर्वेऽपि युज्यन्ते ह्यैश्वर्यात्पुरुषोत्तमे। दोषाः कथञ्चिन्नैवात्र युज्यन्ते परमो हि सः। गुणदोषौ माययैव केचिदाहुरपण्डिताः। न तत्र माया मायावी, तदीयौ तौ कुतो ह्यतः। तस्मान्न मायया सर्वं सर्वमैश्वर्यसम्भवम्। अमायो हीश्वरो यस्मात्तस्मात्तं परमं विदुरि'ति॥ १॥

प्रकाशिका— ॥ हरिः ॐ ॥ अथाख्याहि हरेरिति यत्पृष्टं तदुत्तरत्वेनावतारानानुक्रमिष्यन् भावयन्नेष सत्त्वेनेत्युक्तमेव प्रपञ्चयन्नादौ तावद् ब्रह्माण्डान्तर्विराण्णामक पुरुषावतारं दर्शयति॥ जगृह इति। अत्र पूर्वमविद्यमानं रूपं जगृह इति प्रतीतिनिरासाय तद्यथावद्व्याचष्टे॥ व्यक्त्यपेक्षयेति। उक्तमिति शेषः। नन्वत्र ग्रहणं जन्मरूपमेव किं न स्यादिति शङ्कायामत्र बाधकं व्यक्तिरेव तस्य जन्मेत्यत्र साधकं च प्रमाणमुदाहरति॥ तथाहीति। यथा अस्माभिरुक्तं तथा हि यस्मात्तत्र भागवत उक्तं तस्मादुक्तं युक्तमित्यर्थः। यस्य भगवतो रूपं शरीरमहेयं त्यक्तुमयोग्यमनुपादेयमुपादातुं नूतनतया गृहीतुमयोग्यम्। उभयत्र हेतुकथनाय नित्यमित्युक्तम्। नित्यत्वमेव कैमुत्येनोपपादयितुमव्ययमिति। यस्यैकदेशेनापि व्ययो नास्ति तत्कथमनित्यं स्यादिति भावः। तर्ह्यगृण्हाद्व्यसृजच्चेत्यादि वचनानां कोऽर्थ इत्यपेक्षायामाह॥ भगवानिति। भगवानीशो जनार्दनः स एव एवं विधदेहे वसन् रूपाणां व्यक्तिमेवापेक्ष्य रामकृष्णादिकां तनुमगृह्णादिति पठ्यते। मूढबुद्धिव्यपेक्षया व्यसृजच्चेति पठ्यते इति। ननु परमात्मरूपाणां स्वं प्रति नित्यव्यक्तत्वात्कथं व्यक्त्यपेक्षया ग्रहणं व्याख्यातम्। लोकानां व्यक्त्यपेक्षयैव तदुक्तमिति चेन्न। पुरुषरूपग्रहणकाले लोकानामभावेन तदसंभवादित्याशङ्कायां पुरुषरूपे व्यक्तिशब्दार्थं दर्शयति॥ तमसेति। तमसा ब्रह्माण्डान्तर्ग-

तेनोपगूडस्याच्छादितस्य । हि शब्दः प्रमाणप्रसिद्धिद्योतकः । पानं नाशनम् । तथा चावरण-निवृत्तिरेवात्र व्यक्तिशब्देन ग्राह्येति भावः ॥ कृष्णरामादीति । तदा लोकसद्भावादुक्ता-वरणाभावाच्चेति भावः । नन्वेवं भगवद्रूपाणामनादिनित्यत्वेन यदि व्यक्तिरेव ग्रहणशब्दार्थः । तर्हि सम्भूतं महदादिभिरिति कथं जननमुच्यत इत्यतस्तात्पर्यं दर्शयति ॥ महदादिभिरिति । तथा च सम्भूतशब्दो न जातशब्दपर्यायोऽतत्र विवक्षितः किन्तु युक्तार्थको योगश्चान्तरेव न बहिरिति भावः । ब्रह्माण्डान्तर्विराण्णामा पुरुषः । अत्र प्राणिनां देहादिसृष्ट्यर्थं बहिर्विद्यमानानां महदादीनां तत्त्वानामंशानुदरान्तः स्थापयित्वा व्यक्तोऽभूदिति मूलार्थ उक्तो भवतीति ज्ञातव्यम् । महदादिभिः सम्भूतमित्यस्य महदाद्यात्मकं शरीरमिति-व्याख्यानं दूषयति ॥ न महदादिशरीरमिति । नन्वेवं पुरुषरूपस्य षोडशकलामिति षोडशकलात्मकत्वं कथमुक्तमित्यतस्तदपि षोडशकलाः प्राणाद्या यस्मिन्नित्येव व्याख्येयमित्याशयेन परमात्मनः षोडशकलाश्रयत्वे श्रुतिमाह ॥ यस्मिन्निति । प्रभवन्ति प्रकर्षेण तिष्ठन्ति । हि प्रसिद्धा श्रुतिः । भगवतः षोडशकलाश्रयत्वम् । वक्तीति शेषः । न महदादिशरीरमित्युक्तम् । तत्कुत इत्यपेक्षायां भगवतः प्राकृतशरीरभावादिति हेतुं मनसि निधाय तत्साधनाय प्रमाणानुदाहरति ॥ यत्किञ्चिदित्यादिना । पञ्चभिर्भूतैराविष्टं बद्धम् । देहानां पञ्चभूतात्मकत्वादिति भावः । ईश्वर इत्यादेर्न तस्य भौतिकदेहबन्ध इत्यत्र तात्पर्यम् । सगुणोऽपि ज्ञानानन्दादिपूर्णगुणोऽपि निर्गुणः सत्त्वादिगुणशून्यः । च शब्दो विशेषेणसमुच्चयार्थः । भूतानां प्रलयो यस्मिंस्तदव्यक्तंतदभिमानिनी रमा तस्य शुश्रूषुः सेवाकरणशीला । अनेनाव्यक्ता-त्मकदेहबन्धोऽपि तस्य नास्तीति सूचितम् । मोक्षधर्मे भगवतो जडदेहाभावः । उक्त इति शेषः । एवमग्रे वाराह इत्यादिकमपि व्याख्येयम् । सत् कार्यं तन्महद्वपुस्तदाऽऽसीदिति प्रलयेऽपि भगवच्छरीरस्य स्थित्युक्त्या न तच्छरीरं प्रकृत्यादिजन्यमिति लभ्यत इति भावः । श्रुतिः प्राकृत-देहाभावम् गमयतीति शेषः । प्राकृता प्रकृतिजन्य । ङीभावश्छान्दसः । योगित्वाद्योगजधर्मवत्वान्न किं त्वीश्वरत्वात् । सत्यं परिपूर्णानन्दानुभावात्मकं रूपं शरीरं तेनाच्युतश्च्युतिरहितो यतो अतो विभुरित्यर्थः । शाश्वताः सर्वदैकप्रकाराः परमानन्द समूहात्मका ज्ञानमात्राः केवलज्ञानात्मकाः । सर्वतः सर्वत्र सर्वावयवेषु भेदवर्जिताः । अन्योन्यं भगवता च । एवकारस्य नैवेत्यन्वयः । सर्वैश्चेत्यत्र चशब्दोऽप्यर्थः । स चाभिव्याप्त्यर्थः । सर्वतः सर्वत्र । ननु देहदेहिनोरभेदे भगवान्देहं स्वीकृतवान् जगृहेऽगृण्हादित्यादिशब्दाः कथमित्यत आह ॥ तत्स्वीकारादिति । तु शब्दः स्वीकारादि शब्दस्य वेदादिगतत्वरूपं विशेषमाह । हस्तस्वीकारवद्धस्तस्वीकारशब्दवत् । देवदत्तदेहस्य हस्तरूपावयवत्वे-नाभेदेऽपि देवदत्तदेहः स्वहस्तं स्वीचक्रे जगृहे इत्यादि कर्तृकर्मभावेन शब्दः प्रयुज्यते । तद्वद्भगवत-स्तद्देहानां चाभेदेऽपि स्वीकारादिशब्द उपपद्यत इत्यर्थः । ननु दृष्टान्ते हस्तदेहयोर्भेदाभेदौ स्तः ।

अतस्तथाऽत्र स्वीकारादिशब्द उपपद्यते । न प्रकृते । अत्यन्ताभेदेन तद्वैलक्षण्यादिति शङ्कायां तत्र भगवति न वाऽयं दृष्टान्त इत्याह ।। वैलक्षण्यादिति । तर्हि किमर्थमुक्तमित्यत आह ।। ज्ञानमात्रार्थमिति । अभेदज्ञानमात्रार्थमित्यर्थः । स्थूलमतीनां ज्ञापनार्थमभेदमात्रे साम्यमुपादाय पूर्वमुक्तम् । न त्वत्यन्तसाम्यविवक्षयेत्यर्थः । तर्हि कथमत्यन्ताभेदे स्वीकारादिशब्दघटनेत्यत आह ।। केवलेति । अनन्यसाधारणेत्यर्थः । जात इति देहिनो देहस्य च भेदव्यवहारः । इदं रूपं गतः प्राप्तस्तद्रूपं गत इति देहिदेहयोर्देहानां च भेदव्यवहार उक्त इति ज्ञातव्यम् । भगवतो देहाभेदे श्रुतिद्वयमाह ।। एकमेवेति । अत्रैकमेवेति स्वगतभेदो निषिद्धयते । इह ब्रह्मणि नानात्वं नेति स्वगतभेदः प्रतिषिद्धयते । एवं देहग्रहणस्यापि क्रियारूपस्य भगवद्धर्मत्वेन भगवदभेदे एकस्यैव क्रियाकर्तृभावोऽपि केवलैश्वर्ययोगादेवोपपादनीय इत्याशयेन धर्माणां भगवदभेदे प्रमाणमाह ।। एवं धर्मानिति । इयं श्रुतिः । भगवद्धर्माणां भगवता भेददर्शिनो निन्दां करोति । तेन भगवद्धर्माणां भगवतश्चात्यन्तमभेद एवेति सिद्धयति । किञ्च प्राकृतदेहाभावेऽस्थूलमनण्वित्यादि वाक्यमपि मानम् । "अन्यभावव्यावृत्तेश्च" इत्यत्र प्राकृतस्थौल्यादिराहित्यस्यैतदर्थतयोक्तत्वात् । नन्वेवं भगवत्यप्राकृतं स्थौल्यमणुत्वं च युगपद्विरुद्धमापद्यत इत्याशङ्कायां तत्राप्यैश्वर्यमेवोपपादनीयमित्याह ।। तस्यैवेति । एकस्यैवेत्यर्थः ।। अस्थूलत्वादिति । अप्राकृतस्थूलत्वाणुत्वादिकमित्यर्थः । ऐश्वर्ययोगाद्घटत इति शेषः । कुत इत्यत एतत् श्रुत्यर्थप्रतिपादकं प्रमाणं पठति ।। तथा चेति । सर्वतः स्थूल एवास्थूलश्च प्रोक्तः । सर्वतोऽणुरेवानणुश्च प्रोक्त इति सम्बन्धः । अप्राकृतस्थौल्यादिमानपि प्राकृतस्थौल्याद्यभावेनास्थूलादि पदप्रतिपाद्यो भवतीत्यर्थः ।। अस्थूलमित्यादिश्रुतिगतावर्णपदस्य विवक्षितमर्थं दर्शयति ।। अवर्ण इति । श्यामोरक्तान्तलोचनः । अप्राकृतश्यामादिरूपवानपि भगवानैश्वर्ययोगादेवावर्णोऽरूपः प्रोक्तः । प्राकृतरूपाभावादिति भावः । नन्वेवं विरुद्धं युगपदणुत्वं महत्वं च कथं भगवतीत्यत आह ।। ऐश्वर्ययोगादिति । अघटितघटकैश्वर्ययोगादिति भावः । विरुद्धार्थो विरुद्धधर्मवान् अभिधीयते । अस्थूलादिपदैरिति शेषः । नन्वेवं गुणविरुद्धदोषवत्त्वमपि भगवत्यैश्वर्ययोगादेव स्यादित्यत आह ।। तथाऽपीति । यद्यप्येवं परमैश्वर्ययोगाद्भगवति विरुद्धधर्मघटं नास्ति तथाऽपि कथञ्चन केनापि प्रकारेण प्राकृता वाऽप्राकृता वा दोषा नैवाहार्या नोपसंहार्या न ध्येया इत्यर्थः । कुत इत्यत उक्तम् ।। परम इति । परमेश्वर इत्यर्थः । दोषकल्पनायामैश्वर्यमपगच्छति । अत ऐश्वर्यमपि स्वविरोधिविरुद्धधर्मस्य न घटकमिति भावः तुशब्दः ऐश्वर्यविरोधित्वादिति हेतुसूचकः । च शब्दः एवार्थे । सर्वतः सर्वे अत्रैव स्पष्टं प्रमाणान्तरमाह । विष्णुधर्मोत्तरे चेति । सर्वेऽपि विरुद्धा अविरुद्धाश्च । हि शब्द ऐश्वर्यादि अविरुद्धत्वादिहेतुसूचकः । हि यस्मात्परमः परमेश्वर सः दोषकल्पनायां तस्य परमेश्वरत्वमेवानुपपन्नमिति भावः । ननु विरुद्धगुणदोषाङ्गीकारेऽपि

नैश्वर्यहानिः । तयोर्मायिकत्वात् । ततश्च सर्वमपि विरुद्धं भगवति मायैवोपपादनीयं नैश्वर्ययोगादिति केचिदाहुस्तन्मतं दूषयति ॥ गुणदोषाविति । उपलक्षणमेतत् । सर्वमपि विरुद्धम् । मायया सर्वमपि विरुद्धं घटत इति वदतां कोऽभिप्रायः । किमीश्वराश्रितया माययेश्वरे विरुद्धधर्माः कल्पिताः प्रतिभासन्ते । उतान्येन मायाविना कल्पिता इति । नोभावपि कल्पौ युक्तावित्याह ॥ न तत्रेति । कुत इत्यत आह ॥ तदीयाविति । हि यस्मात्तदीयौ तदधीनौ तौ मायामायिनौ सर्वस्य तदधीनत्वादिति भावः । अतस्तौ तत्र कुतः स्वकार्यं करिष्यत इत्यर्थः । न हि स्वाधीनं स्वात्मनो भ्रामकमिति युक्तमिति भावः । निगमयति ॥ तस्मादिति । किञ्च भ्रान्तिरप्यैश्वर्यविरोधिनी न तत्र युक्तेत्याह ॥ अमायो हीति । अमायो मायाकृतभ्रान्तिरहितः । हीति तत्र प्रमाणप्रसिद्धिं दर्शयति । तस्मात्तस्मादेव परमं परमेश्वरम् । अन्यथा तत्र स्यादिति भावः ॥ १ ॥

यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः ।
नाभिह्रदाम्बुजादासीद् ब्रह्मा विश्वसृजां पतिः ॥ २ ॥

प्रकाशिका— तस्य महिमानमाह ॥ यस्येति । यस्य पुरुषरूपस्याम्भसि प्रलयार्णवे शयानस्य विश्रान्तस्य योगः समाधिस्तद्रूपां निद्रां विस्तारयतो नाभिरेव ह्रदस्तस्मिन्यदम्बुजं तस्मादासीत् पाद्मकल्प इति शेषः । विश्वसृजां दक्षादीनां पतिः ॥ २ ॥

यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः ।
तद्वै भगवतो रूपं विशुद्धं सत्वमूर्जितम् ॥ ३ ॥

तात्पर्यम्— यस्यावयवसंस्थानैः । 'नाभ्या आसीदन्तरिक्षमि'त्यादि । सत्वं साधुगुणम् । ज्ञानबलरूपं वा । 'बलज्ञानसमाहारः सत्वमित्यभिधीयत' इति मात्स्ये ॥ ३ ॥

प्रकाशिका— महिमान्तरमाह ॥ यस्येति । पूर्वस्यास्य च । यच्छब्दस्योत्तरेण तच्छब्देनान्वयः । लोकविस्तरश्चतुर्दशभुवनविस्तारो यस्य पुरुषनाम्नोऽवयवसंस्थानैश्चरणाद्यवयव रूपसमीचीनस्थानैः कल्पितस्तदुत्पन्नत्वेन तदाधारत्वेन विद्वद्भिर्निरूपितस्तत्पूर्वोक्तभगवतो रूपं विशुद्धं निर्दिष्टमूर्जितं सर्वोत्कृष्टमित्यर्थः । लोककल्पकावयवेनतत्र दोषादिशङ्कादिदोषा न कार्येति भावः । अत्र केनावयवेन को लोकः कल्पितः किञ्च तत्र प्रमाणमित्यत आह ॥ यस्येति । लोकविस्तार इत्यादि यथा स्यात्तथा वेदेन निरूपित इत्यर्थः । सत्त्वं सत्त्वगुणात्मकमित्यन्यथाप्रतीतिवारणाय व्याख्याति ॥ सत्त्वमिति । साधुगुणत्वं साधुगुणमित्यर्थः । सद्भाव साधुभावे चेति वचनात्सच्छब्दः साधुगुणवाची स्वार्थ एव च त्व प्रत्यय इति भावः । अत एवापरितोषादाह ॥ ज्ञानबलेति । अत्र प्रमाणमाह ॥ बलज्ञानेति । समाहारः संमेलनम् ॥ ३ ॥

पश्यन्त्यदो रूपमदभ्रचक्षुषः सहस्रपादोरुभुजाननाद्भुतम् ।
सहस्रमूर्धश्रवणाक्षिनासिकं सहस्रमौल्यम्बरकुण्डलोल्लसत् ॥ ४ ॥

प्रकाशिका— योगिप्रत्यक्षगम्यत्वादिरूपं तस्य महिमान्तरमाह ॥ पश्यन्तीति । अदभ्रमनल्पं चक्षुर्ज्ञानदृष्टिर्येषां ते ब्रह्मादीनां ते तथा । सहस्रशब्दोऽनन्तवाची प्रत्येकमभिसम्बद्ध्यते । सहस्रपादाश्चोरवश्च भुजाश्च नानानि च तैरद्भुतम् । सहस्रमूर्धादयो यस्मिंस्तत् । सहस्रं यानि मौल्यादीनि तैरुल्लसच्छोभमानम् ॥ ४ ॥

एतन्नानावताराणां निधानं बीजमव्ययम् ।
यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः ॥ ५ ॥

तात्पर्यम्— निधानम् । अत्रैकीभवन्त्यन्तत इति । अंशांशेन सामर्थ्यैकदेशेन । ब्राह्मे च 'यच्छक्त्यैकांशसम्भूतं जगदेतच्चराचरमि'ति ॥ ५ ॥

प्रकाशिका— महिमान्तरमाह ॥ एतदिति । एतदण्डान्तर्गतं पुरुषरूपं निधीयतेऽस्मिन्निति निधानं कार्यावसाने प्रवेशस्थानमित्यर्थः । अत्राश्रयाश्रितभावोक्त्या भेदः प्रतीयते । अतोऽत्र तात्पर्यं दर्शयति ॥ निधानमिति । निधीयन्ते एकीक्रियन्ते । ततः कार्यावसान इत्येव निधान शब्देन विवक्षितम् । न त्वाश्रयाश्रितभाव इति भावः । बीजमुद्गमनस्थानम् । एतच्च श्वेतद्वीपादिस्थानां नारायणवासुदेववैकुण्ठादीनां साक्षाद्रामकृष्णादीनां तु श्वेतद्वीपस्थैतत्स्वरूपांशद्वारेति ज्ञातव्यम् । नैतत् प्रसिद्धबीजतुल्यमित्याह ॥ न व्येतीत्यव्ययमिति । यस्यांशाशेनेत्यत्र यस्यांशो ब्रह्म यस्यांशो मरीच्यादिस्तेनेत्यन्यथा प्रतीतिवारणाय विवक्षितमर्थं दर्शयति ॥ अंशाशेनेति । तथा चाद्यांश शब्दः सामर्थ्यपरो द्वितीय एकदेशपर्याय इत्युक्तं भवति । एवमेवात्रार्थः कुत इत्यतः प्रमाणान्तरसमाख्यां दर्शयति ॥ ब्राह्मे चेति । शक्तिः सामर्थ्यमेकांश एकदेशो देवतिर्यङ्नरादय इत्यस्यार्थः ॥ जगदेतच्चराचरमिति ॥ ५ ॥

स एव प्रथमं देवः कौमारं सर्गमास्थितः ।
चचार दुश्चरं ब्रह्म ब्रह्मचर्यमखण्डितम् ॥ ६ ॥

तात्पर्यम्— 'कुमारो नाम भगवान्स्वयं स्वस्मादजायत । दिदेश ब्रह्मणे ब्रह्म ब्रह्मचर्ये स्थितो विभुः । यस्मात्सनत्कुमारश्च ब्रह्मचर्यमपालयत् । यः स्थाणोः स्थाणुतां प्रादाद्भगवानव्ययो हरिरि'ति ब्राह्मे ॥ ६ ॥

प्रकाशिका— एतन्नानावताराणां बीजमित्युक्तमेव प्रपञ्चयन्नाह ॥ स एवेति । योंऽडान्तर्गतः पुरुषनामा हरिः स एव देवः प्रथमं कौमारं कुमारे विद्यमानं सर्गमवतारमास्थितः प्राप्तवान् ब्रह्मा पूर्ण एवान्यैर्दुश्चरं ब्रह्मचर्यमखण्डितमप्रतिहतं यथा भवति तथा चचार । अत्र किं नाम किमर्थमवतार इति न प्रतीयते सनत्कुमार एवेति च प्रतीयतेऽतोऽत्र विवक्षितमवतारं तच्चरित्रं च प्रमाणेनैव दर्शयति ॥ कुमार इति । यस्माच्छिक्षित इति शेषः । स्थाणोः रुद्रस्य । अनेन मूले ब्रह्मचर्यं चचारेत्येतदुपलक्षणमिति सूचयति ॥ ६ ॥

द्वितीयं तु भवायास्य रसातलगतां महीम् ।
उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ॥ ७ ॥

प्रकाशिका— अस्य विश्वस्य भवाय स्थित्यर्थं महीमुद्धरिष्यन्निति तत्कर्मोक्तिः । एवं सर्वत्राव-तारस्तत्कर्म चोक्तमिति द्रष्टव्यम् । यज्ञेशो यज्ञप्रवर्तकपुरुषनामा हरिर्वराहदेहेन यज्ञसामग्र्याज्ञा-तत्वादेवमुक्तम् । सौकरं वराहस्य विद्यमानं तत्सदृशम् ॥ ७ ॥

तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः ।
तत्र सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ॥ ८ ॥

तात्पर्यम्— अवतारस्तृतीयोऽस्य देवर्षिः प्रथितो दिवि । महिदासस्त्वैतरेयो यस्तन्त्रं नार-देऽवददि'ति च ॥ ८ ॥

प्रकाशिका— ऋषिसर्गमृषिष्ववतारमुपेत्य देवर्षित्वमुपेत्य सात्त्वततन्त्रं पञ्चरात्र्याख्यं शास्त्रं नारदायाचष्टे व्याचख्यौ । यतः सात्त्वतशास्त्रात्तदुक्तप्रकारेणानुष्ठानात्कर्मणां नैष्कर्म्यं मोक्षसाधनत्वं भवति । अत्रायमवतारः क इति न प्रतीयते नारद इति च प्रतीयतेऽतोऽत्राभिमतावतारं प्रमाणेन दर्शयति ॥ अवतार इति देवर्षिरिति प्रथितः । तन्त्रं पञ्चरात्रम् ॥ ८ ॥

तुर्यं धर्मकलासर्गे नरनारायणावृषी ।
भूत्वाऽऽत्मोपशमोपेतमकरोद्दुश्चरं तपः ॥ ९ ॥

तात्पर्यम्— धर्मकलासर्गः धर्मे स्वांशावतारः । लोकदृष्टयाऽत्मशमोपेतम् ॥ ९ ॥

प्रकाशिका— धर्मकलासर्ग इत्यत्र धर्मस्य कलाऽर्धांशरूपा भार्या तस्याः सर्ग इति व्याख्याने कला शब्दो न स्वरस इत्यभिप्रेत्य स्वयं व्याख्याति ॥ धर्मेति । तथा च सप्तमीपुरुष एवात्र विवक्षित

इति भावः । स्वांशावतारः स्वस्वरूपभूतांशावतारः । नरस्य शेषत्वेऽपि तत्र स्वरूपांशस्यावेशावतारोऽस्त्येवेति ज्ञातव्यम् । आत्मोपशमोपेतमित्येतदात्मनोंऽतःकरण स्योपशमोऽधिकभगवन्निष्ठा तेनोपेतमिति व्याख्येयम् । इदं च भगवति बाधितमतआह ॥ लोकदृष्टचेति ॥ ततश्चायं श्लोकार्थः ॥ तुर्ये च चतुर्थे धर्मे यमधर्मे कलया स्वांशेन सर्गेऽवतारे नरनारायणनामानौ ऋषी भूत्वा । लोकदृष्टयाऽऽत्मनोंऽतःकरण स्योपशमोऽधिकभगवन्निष्ठता तेन युक्तमन्यैर्दुश्चरं तप आलोचनात्मकमकरोदिति । अत्र तुर्यमिति पाठे तुर्यं वित्तेति व्याख्येयम् ॥ ९ ॥

पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् ।
प्रोवाचाऽऽसुरये साङ्ख्यं तत्वविनिर्णयम् ॥ १० ॥

तात्पर्यम्— तन्त्रं साङ्ख्यं वेदानुसारि । पाद्मे च 'कपिलो वासुदेवाख्यस्तन्त्रं साङ्ख्यं जगाद ह । ब्रह्मादिभ्यश्च देवेभ्यो भृग्वादिभ्यस्तथैव च । तथैवासुरये सर्ववेदार्थैरुपबृंहितम् ॥ सर्ववेदविरुद्धं च कपिलोऽन्यो जगाद ह । साङ्ख्यमासुरयेऽन्यस्मै कुतर्कपरिबृंहितमि'ति ॥ १० ॥

प्रकाशिका— प्रोवाचासुरये साङ्ख्यमित्यत्र वेद विरुद्धं साङ्ख्यशास्त्रमिति प्रतीयते । अत आह ॥ तन्त्रमिति । तथाचत्तन्त्रमित्येतदनुवर्तनीयमिति भावः । न तु तथाऽपि कथमुक्तशङ्कापरिहार इत्यतस्तंत्र शब्दार्थं दर्शयति ॥ वेदानुसारीति । तथा च वेदार्थनिर्णायकशास्त्र एव तन्त्र शब्दो रूढ इति भावः । ननु कुत एवं व्याख्येयम् । अयमेव कपिलःदुःशास्त्रप्रणेताऽस्त्वासु- रिरपि दुष्ट एव तच्छिष्योऽस्त्वित्याशङ्कां प्रमाणेनैवापाकरोति ॥ पाद्मे चेति । भृग्वादिभ्यश्चेत्यन्वयः । तथैव यथा ब्रह्मादिस्तथैव । न प्रकारान्तरेणेत्यर्थः । एवमग्रेऽपि ॥ आसुरये इति उत्तरार्धस्य चशब्दान्वयः । अन्यः कपिलो भगवदवतारादन्यः । हेति प्रमाणप्रसिद्धिं सूचयति ॥ ततश्चायं मूलार्थः ॥ पञ्चमः । अवतार इति शेषः । अन्यकपिलव्यावृत्त्यर्थं सिद्धेश इत्युक्तम् । कालविप्लुतं कालबलेन तिरोहितम् । तत्त्वानां ग्रामः समूहस्तस्य विशेषेण निर्णयो यस्मिंस्तत्तथोक्तम् । आसुरये तन्नामकसच्छिष्याय ॥ १० ॥

षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया ।
आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥ ११ ॥

तात्पर्यम्— आन्वीक्षिकीं तत्त्वविद्याम् । 'आन्वीक्षिकी कुतर्काख्या तथैवान्वीक्षिकी परे'ति मात्स्ये ॥ ११ ॥

प्रकाशिका— दत्तात्रेयावतारमाह ॥ षष्ठेति । स पुरुषोऽत्रेः सकाशाद्वृतोऽत्रिणैव प्रार्थितः सन् अनसूययाऽनसूयायां तत्पत्न्यामपत्यत्वं पुत्रभावं प्राप्तः । अयं षष्ठमवतारः । षष्ठमिति पाठे एनं

षष्ठमवतारं वित्तेत्यर्थः । अलर्काय तन्नामकाय सच्छिष्याय प्रह्लादादिभ्यश्चान्वीक्षिकीमूचिवान्व्याचख्यौ । आदिपदेन यदुहैहयाद्या ग्राह्याः । अनसूयया मत्समं मत्सदृशापत्यवरणमिषेण मामेवापत्यं वृतवानित्यसूयाराहित्येनात्रेरपत्यत्वं प्राप्त इत्याहुः । नन्वान्वीक्षिकी तर्कविद्येति गौतमप्रणीततर्कशास्त्रे आन्वीक्षिकी शब्दः प्रसिद्धस्तत्कथमयमूचिवानित्यत आह ॥ आन्वी-क्षिकीमिति । तंत्त्वविद्यां परापरतत्त्वविद्याम् । कुत एवमान्वीक्षिकी द्वैविध्यंमतोऽत्र प्रमाणमाह ॥ आन्वीक्षिकीति । कुत्सितास्तर्का यस्यां सा कुतर्का । तथाऽऽख्या यस्यां सा विद्या कुतर्काख्या । एका पराऽन्योत्तमा वा । तथैव प्रसिद्धतर्कशास्त्रवत्तर्कोपेतैव ॥ ११ ॥

ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत ।
स यामाद्यैः सुरगणैरपात्स्वायम्भुवान्तरम् ॥ १२ ॥

प्रकाशिका— अकूत्यां रुचेस्तन्नामकादृषेर्यज्ञनामाऽभ्यजायत । सप्तमोऽवतारः । स च यज्ञो यामास्तन्नामानो देवा आद्या येषां तैः सुरगणैः सह स्वायम्भुवमन्वन्तरमपादरक्षत् । तदा स्वयमिन्द्रोऽभूदित्यर्थः ॥ १२ ॥

अष्टमो मेरुदेव्यां तु नाभेर्जात उरुक्रमः ।
दर्शयन्वर्त्म धीराणां सर्वाश्रमनमस्कृतम् ॥ १३ ॥

प्रकाशिका— ऋषभावतारमाह ॥ अष्टम इति । उरुक्रमः पुरुषनामा हरिः । नाभेराग्नीध्रपुत्रान्मेरुदेव्यां तत्पन्त्यां जातः । इदं जननं न शुक्लशोणितसम्बन्धेनेति दर्शयितुं तु शब्दः । किं कुर्वन् । सर्वाश्रमनमस्कृतं वर्त्म चतुर्थाश्रमसम्बन्धिनं मार्गं धीराणां हरिविषयकधियां रममाणानां दर्शयन् । अयमष्टमोऽवतारः ॥ १३ ॥

ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः ।
दुग्धवानोषधीर्विप्रास्तेनायं च उशत्तमः ॥ १४ ॥

तात्पर्यम्— पृथुशरीराविष्टं रूपम् । 'आविवेश पृथुं देवः शङ्खी चक्री चतुर्भुज' इति पाद्मे । उश इच्छायाम् । सत्यकामः ॥ १४ ॥

प्रकाशिका— पृथुराजाविष्टं पृथुनामकावतारं दर्शयति ॥ ऋषिभिरिति । अत्र पार्थिवं पृथोर्विद्यमानं वपुर्भेज इति वचनेन पृथुशरीरमेव भगवतो नवमं शरीरमिति प्रतीयतेऽतोऽत्र विवक्षितमर्थमाह ॥ पृथुशरीरेति । ततश्च पार्थिवमित्यस्य पृथु शरीरसम्बन्धि तदाविष्टमिति व्याख्यानं

सूचयति । अत्र प्रमाणमाह ॥ आविवेशेति । पृथुं पृथुशरीरम् । मूले औषधीरित्युपलक्षणम् । सर्वाणि सारभूतवस्तूनीत्यपि द्रष्टव्यम् । हे विप्राः । तेन दोहनेन चायं राजाऽपि न केवलं तदाविष्टो हरिरित्यर्थः । उशत्तमोऽत्र वश कान्ताविति धातोः कमनीयतम इति व्याख्यानमयुक्तम् । दोहनस्यात्र हेतुत्वकथनासम्भवादित्याशयेनान्यथा व्याचष्टे । उश इच्छायामिति धातोः । सत्यकामः । उशत्तम शब्दार्थ इति शेषः । अतिशयेनोशन् उत्तमः । अतिशयश्चेच्छयाऽमोघत्वं तेन सत्यकाम इति लभ्यत इति भावः ॥ १४ ॥

रूपं स जगृहे मात्स्यं चाक्षुषान्तरसंप्लवे ।
नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम् ॥ १५ ॥

प्रकाशिका— स परमात्मा मात्स्यं मत्स्यस्यविद्यमानं रूपम् । चाक्षुषमन्वन्तरप्रलये महीमय्यां नावि भूम्यात्मिकायां वैवस्वतमनुसंज्ञकं सत्यव्रतमारोप्यापाद्रक्षितवान् । अयं दशमोऽवतार इति शेषः ॥ १५ ॥

सुरासुराणामुदधिं मथ्नतां मन्दराचलम् ।
दध्रे कमठरूपेण पृष्ठ एकादशं विदुः ॥ १६ ॥

प्रकाशिका— मथ्नतां सतां मन्दराचल मन्दरपर्वतं यः कमठरूपेण कूर्मरूपेण दध्रे तमवतारमेकादशं विदुः ॥ १६ ॥

धान्वन्तरं द्वादशमं त्रयोदशममेव च ।
अपाययत्सुधामन्यान् मोहिन्या मोहयन् स्त्रिया ॥ १७ ॥

प्रकाशिका— धान्वन्तरं धन्वन्तरि शब्दवाच्यमवतारं द्वादशमन्द्वादशत्वसङ्ख्यापूरकम् । एवमुत्तरत्र । यया मोहिन्या मोहकशक्तिमत्या स्त्रिया स्त्रीमूर्त्या । अन्यानसुरान्मोहयन्सुरान् अमोहयन्सुधामपाययत् । तमेवावतारं त्रयोदशं विदुरित्यन्वयः ॥ १७ ॥

चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्जितम् ।
ददार करजैरूरावेरकान् कटकृद्यथा ॥ १८ ॥

प्रकाशिका— नारसिंहं नरसिंहसम्बन्धिविग्रहं बिभ्रद्भगवान् करजैर्नखैर्जितमुत्कृष्टं दैत्यं हिरण्यकशिपुनामकमुरावंके निपात्य तथा ददार । यथा कटककृत्तृणास्तरणकर्ता । एरकान्दीर्घकारान् ग्रन्थिकां स्तृणविशेषान्दारयति ॥ तमवतारं चतुर्दशं विदुः ॥ १८ ॥

पञ्चदशं वामनकं कृत्वाऽगादध्वरं बलेः ।
पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपम् ॥ १९ ॥

प्रकाशिका— पञ्चदशं वामनकं वामननामकम् । अवतारं कृत्वा त्रिविष्टपं त्रिलोकीं प्रत्यादित्सुर्बलेराच्छिद्य गृहीतुमिच्छुस्तदर्थं पदत्रयं याचमानः ॥ १९ ॥

अवतारे षोडशमे यच्छन्ब्रह्मद्रुहो नृपान् ।
त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम् ॥ २० ॥

प्रकाशिका— परशुरामावतारमाह ॥ अवतार इतित्रिः ब्रह्मद्रुहो ब्राह्मणद्रोहिणस्त्रिसप्तकृत्वस्त्रिगुणं यथा भवति तथा सप्तत्कृत्वः सप्तवारान् एकविंशतिवारानित्यर्थः । कुपितः प्रतीपबुद्धिमान्न तु प्रसिद्धकोपयुक्तः । तस्य तामसस्य भगवत्यभावात् । निःक्षत्रां क्षत्रियजातिरहिताम् ॥ २० ॥

ततः सप्तदशे जातः सत्यवत्यां पराशरात् ।
चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥ २१ ॥

तात्पर्यम्— रामात्पूर्वमप्यस्ति व्यासावतारः । 'तृतीयं युगमारभ्य व्यासो बहुषु जज्ञिवानि'ति कौर्मे ॥ २१ ॥

प्रकाशिका— वेदव्यासावतारमाह ॥ तत इति । सप्तदशावतारे कर्तव्ये सति स हरिः सत्यवत्यां जातः सन् अल्पमेधसोऽल्पप्रज्ञान्पुंसः पुरुषान्दृष्ट्वा तदनुग्रहाय वेदाख्यतरोः शाखाश्चक्र इत्यर्थः । ननु रामावतारात्पूर्वं कथं व्यासावतारोक्तिः । तस्य रामावतारानन्तर्यस्य ग्रन्थान्तरसिद्धत्वादित्यत आह ॥ रामादिति । रामावतारादित्यर्थः । अत्र प्रमाणमाह ॥ तृतीयमिति । वैवस्वतमनुसम्बन्धिषु सार्धाष्टादशलक्षाधिकैकसप्ततिमहायुगेषु तृतीयमहायुगमारभ्य व्यासस्तृतीये सप्तमे चैव षोडशे पञ्चविंशके । अष्टाविंशके युगे कृष्णः सत्यवत्यामजायेतेति प्रमाणोक्तेषु बहुषु महायुगेषु जग्मिवान् अवतारं प्राप्तवानित्यर्थः । जज्ञिवानिति पाठे जज्ञेऽवतारं कृतवानित्यर्थः । तथा च रामावतारस्यैव वैवस्वतमनोरष्टाविंशमहायुगान्तर्गतत्रेतायुगे जातत्वात्ततः पूर्वतनमहायुगेषु जातानां व्यासावताराणां सप्तदशकत्वोक्तिर्युक्तेति भावः ॥ २१ ॥

नरदेवत्वमापन्नः सुरकार्यचिकीर्षया ।
समुद्रनिग्रहादीनि चक्रे वीर्याण्यतःपरम् ॥ २२ ॥

प्रकाशिका— रामावतारमाह ॥ नरदेवत्वमिति । राजत्वमित्यर्थः । समुद्रे निग्रहः सेतुबन्धस्तदादीनि वीर्याणि वीर्यकर्माणि । अतः सप्तदशात्परं पश्चादष्टादशावतारेत्यर्थः ॥ २२ ॥

एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ।
रामकृष्णाविति भुवो भगवानहरद्भरम् ॥ २३ ॥

तात्पर्यम्— आवेशो बलभद्रे । 'शङ्खचक्रभृदीशेशः श्वेतवर्णो महाभुजः । आविष्टः श्वेतकेशात्मा शेषांशं रोहिणीसुतमि'ति महावाराहे ॥ २३ ॥

प्रकाशिका— एकोनविंशे विंशतितमे । तकारलोपश्छान्दसः । अवतारे कर्तव्ये रामकृष्णाविति । रामकृष्णनामनी जन्मनी प्राप्य भुवो भारमहरदित्यन्वयः । अत्र बलरामस्यापि साक्षादवतारत्वं प्रतीयतेऽतस्तात्पर्यमाह ॥ आवेश इति । अत्र प्रमाणमाह ॥ शङ्खचक्रेति । रोहिणीसुतं बलभद्रम् ॥ २३ ॥

ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम् ।
बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यति ॥ १४ ॥

तात्पर्यम्— मोहनार्थं दानवानां बालरूपं पथि स्थितम् । पुत्रं तं कल्पयामास मूढबुद्धिर्जिनः स्वयम् । ततः सम्मोहयामास जिनाद्यानसुरांशकान् । भगवान्वाग्भिरुग्राभिरहिंसावाचिभिर्हरि-रि'ति ब्रह्माण्डे ॥ २४ ॥

प्रकाशिका— निजसुत इत्यत्र विवक्षितमर्थं प्रमाणेनैव दर्शयति । मोहनार्थमिति । अहिंसा वाचिभिः हिंसाभावस्य धर्मप्रतिपादकादिभिः । कीटकेषु मध्ये गम्याप्रदेशे ॥ २४ ॥

अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु ।
जनिता विष्णुयशसो नाम्ना कल्की जगत्पतिः ॥ २५ ॥

प्रकाशिका— अथ बुद्धावतारानन्तरमसौ पुरुषनामा हरिर्युगसन्ध्यायां कलिकृतयुगसन्धिकाले राजसु दस्युप्रायेषु बहुलं चोरेषु सत्सु विष्णुयशसस्तन्नामब्राह्मणान्नाम्ना कल्कीजनिता जनिष्येत ॥ २५ ॥

अवतारा ह्यसङ्ख्येया हरेः सत्वनिधेर्द्विजाः ।
यथा विदासिनः कुल्याः सरसः स्युः सहस्रशः ॥ २६ ॥

तात्पर्यम्— विदासिनः उन्नतात् भिन्नाद्वा । 'त्रिविधाः पुरुषा लोके नीचमध्यविदासिन' इति ब्राह्मे । 'चतुर्धा वर्णरूपेण जगदेतद्विदासितामि'ति च ॥ २६ ॥

प्रकाशिका— हरेरवताराणामनन्तत्वान्न साकल्येन तेषां निरूपणं शक्यमित्यभिप्रेत्याह ॥ अवतारा इति । सत्त्वनिधेः साधुगुणपूर्णस्य । हे द्विजाः । तत्र दृष्टान्तमाह ॥ यथेति । अत्र विदासिन इत्यस्य प्रकृतसङ्गतमर्थं द्वेधा दर्शयति ॥ विदासिन इति । उन्नतादुन्नतप्रदेशस्थाद्भिन्नाद्वेति वाऽर्थ इत्यर्थः । अर्थद्वये क्रमेण तच्छब्दप्रयोगं दर्शयति ॥ त्रिविधा इति । अत्र नीचमध्योन्नता इति वक्तव्ये विदासिन इत्युक्तत्वाद्विदासि शब्द उन्नतत्वार्थ कः इति सिद्धयति । तथाच जगदेतद् ब्राह्मणादीनां वर्णानां रूपेण ब्राह्मणत्वादिधर्मेण चतुर्धा विभेदितमिति वक्तव्ये विदासितमित्युक्त्या विदासि शब्दो विभेदपर्याय इति ज्ञायत इति भावः । ततश्च यथा विदासो भेदो विदारणमस्यास्तीति विदासि तस्मात्सरसस्तटाकात्कुल्याः क्षुद्रप्रवाहाः सहस्रशः स्युः । तथैवासङ्ख्येया इति मन्दमतीनां बुद्ध्यारोहार्थमुक्तम् । न वस्तुतः । कुल्यानामसङ्ख्येयत्वाभावादिति मूलयोजना द्रष्टव्या ॥ १६ ॥

ऋषयो मनवो देवा मनुपुत्रा महौजसः ।
कलाः सर्वे हरेरेव सप्रजापतयः स्मृताः ॥ २७ ॥

प्रकाशिका— इदानीं प्रतिबिम्बांशानाह ॥ ऋषय इत्यादिना । मनुपुत्राः प्रियव्रतादयः । प्रजापतिभिर्दक्षादिभिः सहिताः स प्रजापतयः । हरेः कला भिन्नांशाः प्रतिबिम्बरूपांशा इति यावत् । स्मृताः स्मृतिपूक्ताः ॥ १७ ॥

एते स्वांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥ २८ ॥

तात्पर्यम्— एते प्रोक्ता अवताराः । मूलरूपी कृष्णः स्वयमेव । 'जीवास्तत्प्रतिबिम्बांशा वराहाद्याः स्वयं हरिः । दृश्यते बहुधा विष्णुरैश्वर्यादिक एव त्वि'ति ब्रह्मवैवर्ते ॥ २८ ॥

प्रकाशिका— तर्हि पूर्वोक्ताः कुमारादयः कल्क्यन्ता अपि किमेवं भिन्नांशा नेत्याह ॥ एत इति । अत्रैत इत्यनेन प्रकृतानाम् ऋष्यादीनां परामर्श इत्प्रितीतिं वारयन् कृष्णो देवकीपुत्रः स्वयं साक्षादेव भगवान् आविर्भूतसर्वतच्छक्तिमत्वादितरे तु न तथेति च प्रतीतिं वारयन्योजनामाह ॥ एत इति । प्रोक्तावताराः कुमाराद्याः कल्क्यन्ताः ॥ कृष्ण इत्यनूद्यमूलरूपीति व्याख्यानम् । एवेति तु शब्दार्थः । अनेनोक्तावताराणां प्रतिबिम्बांशवद्भेदो न । किन्तु एते पूर्वोक्ताः स्वांशकलाः स्वरूपांशरूपाः कला विभागा अवताराः कुमाराद्याः कल्क्यन्ताः कृष्णो मूलरूपी भगवान् स्वयमेव

तदभिन्न एवेति मूलव्याख्यानं सूचयति । अत्र प्रमाणसंवादमाह ॥ जीवा इति । ऋषय इत्यादेस्तात्पर्यमिदम् । एते स्वांशकला इत्यादेस्तात्पर्यम् ॥ वराहाद्याः स्वयं हरिरिति । तु शब्दोऽवधारणे । हरिः स्वयमेवेति सम्बन्धः । नन्वेकस्य हरेः कथं बहुभिरवतारैरभेद इत्याशङ्कायामाह ॥ बहुधेति । एक एव विष्णुरैश्वर्यादघटितघटकैश्वर्यबलाद्बहुधा बहुत्वेन योगिभिर्दृश्यते । तथा च प्रमाणप्रसिद्धे ऐश्वर्यरूपोपपादकवति काकथंतेति भावः । स्वरूपांशानां प्रयोजनमाह ॥ इन्द्रारीति ॥ इन्द्रारिभिर्दैत्यैर्व्याकुलमुपद्रुतं लोकं जनं स्थानं वा युगे युगेऽवतीर्य मृडयन्ति सुखिनं कुर्वन्ति ॥२८॥

जन्म गुह्यं भगवतो य एवं प्रयतो नरः ।
सायम्प्रातर्गृणन् भक्त्या दुःखग्रामाद्विमुच्यते ॥ २९ ॥

प्रकाशिका— एतत्कीर्तनफलमाह ॥ जन्मेति । जन्मनामवताराणां गुह्यं रहस्यं प्रयतः प्रकर्षेण यत्नवान् । निर्जितेन्द्रियग्राम इति यावत् । गृणन्पठन्दुःखानां ग्रामः समूहो यस्मिंस्तस्मात्संसारात् ॥ २९ ॥

एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः ।
मायागुणैर्विरचितं महदादिभिरात्मनि ॥ ३० ॥

तात्पर्यम्— एतज्जडरूपम् । नारायणवराहाद्याः परमं रूपमीशितुः । जैवं तु प्रतिबिम्बाख्यं जडमारोपितं हरेः । एवं हि त्रिविधं तस्य रूपं विष्णोर्महात्मन' इति पाद्मे ॥ ३० ॥

प्रकाशिका— एवं हरेः स्वरूपभूतं कौमारादिरूपम् । ऋष्यादिजीवाख्यं प्रतिबिम्बरूपं चोक्त्वेदानीं जडाख्यमारोपितरूपमाह ॥ एतज्जडरूपमिति । एतदिति मूलम् । अत्रैतच्छब्देन संनिहित प्रकृतस्वरूपांशपरामर्शप्रतीतिवारणाय परामर्शं दर्शयन्व्याख्याति ॥ एतज्जडरूपमिति । आरोपितमिति पूरणीयम् । तथा चैतच्छब्दो न प्रकृतपरामर्शकः । किन्तु प्रत्यक्षादिना बुद्धिसंनिहितस्य जडस्येति भावः । एवं चैतज्जडमारोपितरूपमिति मूलयोजना कृतेति ज्ञातव्यम् । एवं भगवद्रूपत्रैविध्ये प्रमाणसंवादं दर्शयति ॥ नारायणेति । नारायणो धर्मसूनुः परममप्राकृतम् । स्वरूपभूतमिति यावत् । आरोपितमारोपिताख्यं रूपमित्यर्थः ॥ ३० ॥

यथा नभसि मेघौघा रेणुर्वा पार्थिवोऽनिले ।
एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ॥ ३१ ॥

तात्पर्यम्— दृश्यत्वं जडरूपत्वम् । 'अविज्ञाय परं देहमानन्दात्मानमव्ययम् । आरोपयन्ति जनिमत्पञ्चभूतात्मकं जडमि'ति स्कान्दे ॥ ३१ ॥

प्रकाशिका— द्रष्टरि दृश्यत्वमित्यस्य प्रकृतसङ्गतमर्थमाह ॥ दृश्यत्वमिति ॥ दृश्यं जडं तदात्मत्वं तद्धर्मवत्त्वं चेत्यर्थः । अत्र प्रमाणसंवादमाह ॥ अविज्ञायेति । अनेनाबुद्धिभिरित्येतदुक्ततात्पर्यम् । परमप्राकृतम् । अनेनारूपस्य चिदात्मन इत्येतदुक्ततात्पर्यम् । जनिमदित्यनेन विरचितमित्येतदुक्तार्थम् । मायागुणैर्महदादिभिरित्यस्य तात्पर्यम् ॥ पञ्चभूतात्मकं जडमिति । आरोपितमित्यस्य तात्पर्यम् ॥ आरोपयन्तीति । हरिदेहात्मतयेति शेषः । जनिमदित्यनेन धर्मारोपमपि सूचयति ॥ ततश्चायं श्लोकद्वयार्थः ॥ अरूपस्य स्वतो जडरूपरहितस्य चिदात्मनो ज्ञानात्मकदेहस्य भगवत एतज्जडमारोपितं रूपम् । एतदुपपादनायैवारूपस्येत्याद्युक्तम् । कथंभूतमेतत् । मायागुणैः प्रकृतिकार्यैर्महदादिभिः पञ्चभूतान्तैर्विरचितमुत्पादितम् । इदं विशेषणं जडस्य हरिस्वरूपदेहाद्भेदोपपादनाय । पुनः कथं भूतम् । आत्मनि (परमात्मनि) परमात्मस्वरूपदेहे आश्रितामिति शेषः । आरोपोपपादनायेदं विशेषणम् । नन्वेवं जडस्यारोपितरूपत्वेमिथ्यात्व प्रसङ्ग इत्यतोऽत्र विवक्षिदृष्टान्तमुखेनोपपादयति ॥ यथेति । नभस्याकाशे आश्रिता मेघौघा मेघसमूहाः सत्या अप्यारोपिता इत्युच्यन्ते । मेघचलनं दृष्ट्वा नभश्चलतीत्यबुद्धिभिरारोपितत्वात् । यथा वाऽनिले वायौ पार्थिवो रेण्वादिः सत्योऽपि वायावारोपित इत्युच्यते । मेघचलनं दृष्ट्वा रेण्वादिनिष्ठस्य रूपस्य दर्शनेन वायू रूपवानित्यबुद्धिरारोपितत्वात् । एवं द्रष्टरिचेतनात्मके हरिदेहेऽबुद्धिभिर्भगवद्देहस्य ज्ञानानन्दात्मकत्वज्ञानशून्यैर्दृश्यत्वं जडरूपत्वं जडधर्मभूतं जन्मादिमत्वं चारोपितम् । यथाऽऽकाशाद्याश्रितमेघादिकं सत्यमप्याकाशादौ चलनाद्यारोपप्रधानत्वेनाबुद्धिभिरा रोपितमित्युच्यते । तथा हरिस्वरूपदेहाश्रितमिदं जडं सत्यमपि भगवत्स्वरूपदेहे जन्माद्यारोपप्रधानत्वादबुद्धिभिरारोपितमित्युच्यते । न वस्तुत आरोपितम् । अनेनैव विवक्षया जडमारोपितं रूपमित्युक्तमिति भावः ॥ ३१ ॥

अतः परं यदव्यक्तमव्यूढगुणबृंहितम् ।
अदृष्टाश्रुतवस्तुत्वात्स जीवो यः पुनर्भवः ॥ ३२ ॥

तात्पर्यम्— अतः परं जडेश्वरयोः परम् । अव्यूढगुणबृंहितम् अनादिकाले कदाचिदप्यनपगतसत्वादिगुणबृंहितम् । अदृष्टाश्रुतवस्तुत्वात्पुनर्भवः ॥ ३२ ॥

प्रकाशिका— एवं कुमारादिदेहानां भगवत्स्यरूपत्वं जडस्यारोपितरूपत्वं चोपपाद्येदानीं तद्विलक्षणं जीवरूपं दर्शयति.॥ अतः परमिति । अत्रातः शब्देनाव्यवहितमारोपितरूपमेव परामृश्यत इति प्रतीतिवारणाय तत्परामर्शं दर्शयति ॥ अतः परमिति । अधिष्ठानत्वेनेश्वररूपस्यापि प्रकृतत्वादिति भावः । अव्यूढगुणबृंहितमित्येतदप्रतीत्याव्याचष्टे ॥ अव्यूढेति । ऊढ शब्दस्य स्वीकृतवाचित्वेनाव्यूढ शब्दोऽस्वीकृतवाची । ततश्चाव्यूढशब्दात्स्वीकृत एवेत्यर्थो लभ्यते । द्वौ नञौ

प्रकृतमर्थं सातिशयं गमयत इति वचनात् । तस्येदं तात्पर्यम् । कदाऽप्यनपगतेति । गुणेत्यस्यार्थः सत्त्वादीति । बृंहितं पूर्णम् । अदृष्टा श्रुतवस्तुत्वादित्यस्य विवक्षितमन्वयं दर्शयति ॥ अदृष्टेति ॥ ततश्चायं श्लोकार्थः ॥ अत आभ्यां जडेश्वररूपाभ्यां परमन्यद्यदव्यक्तमकार्यमनाविर्भूतं निजरूपं वा । अत्र हेतुरव्यूढगुणबृंहितमनादिकाले कदाऽप्यनपगतसत्त्वादिगुणाच्छादितं यच्चैतन्यम् । अत एवादृष्टा-श्रुतवस्तुत्वात् । वस्तु शब्दः परमात्मपरः । श्रुतपदं मताद्युपलक्षकम् । तथा चाश्रुतामतानुपासीतादृष्टा परमात्मस्वरूपत्वात् । पुनः पुनर्भव उत्पत्तिर्यस्य स तथोक्तः । पुनः पुनर्जायमान इति यावत् । स जीव इति ॥ ३२ ॥

यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा ।
अविद्ययाऽऽत्मनि कृते इति तद् ब्रह्मदर्शनम् ॥ ३३ ॥

तात्पर्यम्— अविद्यया जीवकृते परमेश्वरे प्रतिषिद्धे इति ब्रह्मदर्शनम् ॥ ३३ ॥

प्रकाशिका— ननु जीवव्यतिरिक्तस्य ब्रह्मणोऽभावाज्जीवस्य चाहमिति दृष्टत्वान्नादृष्टवस्तुत्वं तस्येत्यत आह ॥ यत्रेमे इति । अत्र स्वसंविदा स्वसमीचीनज्ञानेन प्रतिषिद्धे प्रतिषेधार्हे भगवतो यद्यस्मादविद्ययाऽऽत्मनि कृते कल्पित इत्यन्यथाप्रतीतिवारणाय सापेक्षिताध्याहारेण व्याख्याति ॥ अविद्ययेति । परमेश्वराज्ञानेन । आत्मनीत्यस्यार्थः ॥ जीव इति जीवे कृते ईश्वरेणैव जीवाश्रिते कृत इत्यर्थः । यत्रेत्यस्यार्थः ॥ परमेश्वर इति । प्रतिषिद्धे नित्यनिरस्ते इत्यर्थः ॥ ततश्चायं श्लोकार्थः ॥ यत्र यस्मिन्परमेश्वरे इमे पुनर्भव इत्यव्यूढं गुणबृंहितमिति पदद्वयसूचिते सदसद्रूपे स्थूलसूक्ष्मशरीरे स्वसंविदा नित्यस्वविषयकसाक्षात्कारेण प्रतिषिद्धे नित्यनिरस्ते ईश्वरसाक्षात्कारस्य तदुभयविरोधित्वेन सर्वदा तद्वति तदुभयसम्बन्धो न सम्भावित इति भावः । अविद्यया तत्साक्षात्कार-प्रतिबन्धकयाऽऽत्मनि जीवे कृते जीवसम्बन्धिनी येन कृते तदेव ब्रह्म न जीव इति यन्नित्यमुक्तत्वेन जीवसम्बन्धकत्वेन च दर्शनं तदेव ब्रह्मदर्शनं नाहमित्यत उक्तं युक्तमिति ॥ ३३ ॥

यद्येषोपरता देवी माया वैशारदी मतिः ।
सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते ॥ ३४ ॥

तात्पर्यम्— विशारदः परमेश्वरः । तन्मतिर्माया । यदा नैनं शोचयामीत्युपरता तदा सम्पन्न एव ॥ ३४ ॥

प्रकाशिका— अदृष्टाश्रुतवस्तुत्वादित्यत्र ब्रह्मदर्शनं संसारनिवर्तकमित्यर्थादुक्तम् । तदयुक्तम् । ब्रह्मज्ञानवतामपि शुकादीनां मुक्त्यभावादित्यत आह ॥ यद्येषेति । अत्र वैशारदी मतिरित्यस्य

कुशलसम्बन्धिनी मतिरित्यन्यथा प्रतीतिनिरासायाह ॥ विशारद इति । तन्मतिर्माया तद्विषयकमतिरूपा मायेत्यर्थः । दैवीयुक्तमायायाश्चेतनत्वादुपरमो नाशो न युक्त इत्यतोऽत्राभिप्रेतमुपरमं दर्शयन् अपेक्षितमध्याहृत्यान्वयं दर्शयति ॥ यदा नैनमिति । एनं जीवं न शोचयामीति बुद्ध्योपरता जीवे संसार । पानरूपव्यापारान्निवृत्ता तदैनं जीवं ब्रह्मसम्पन्नमेवेति विदुरित्यन्वय इति भावः ॥ ततश्चायं श्लोकार्थः । एषा सत्त्वाद्यभिमानिनी देवी द्योतमाना माया बन्धकप्रकृतिरूपा दुर्गा यदि यदोपरतैनं जीवं न शोचयामीति बुद्ध्या जीवस्य संसारापादनरूपव्यापारान्निवृत्ता । निवृत्त्येत्यनुक्त्वोपरतेत्युक्त्या प्रारब्धकर्मवशादुप जीवसमीपे किञ्चिद्रताऽपि भवतीत्यपि सूचयति । कुतः । यतो वैशारदी परमेश्वरविषयिणी मतिर्मतिरूपा जाता । भगवद्विषयकदृष्टिं दत्वा । तदभिमानिनी जातेति यावत् । तदैनं जीवं ब्रह्मसम्पन्नः प्राप्त एवेति विदुः । कर्मक्षयरूपमुक्तेर्जातत्वात्परममुक्तेश्च सामीप्यात् । तथा च नोक्तव्यभिचार इति भावः । प्रारब्धकर्मावसाने तु स्वे स्वरूपभूते महिम्नाविर्भूतज्ञानानन्दादिरूपे महत्वे स्थितः सन्महीयते स्वावरमुक्तैः पूज्यत इति ॥ ३४ ॥

एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च ।
वर्णयन्ति स्म कवयो वेदगुह्यानि हृत्पतेः ॥ ३५ ॥

तात्पर्यम्—— 'अप्रयत्नात्स्वतन्त्रत्वात्फलानां च विवर्जनात् । क्रियायाश्च स्वरूपत्वादकर्तेति च तं विदुः । कर्तृत्वं भ्रान्तिजं प्राहुरतस्तत्त्वविदो जनाः । ऐश्वर्यजं तु कर्तृत्वं सम्यक्तत्त्ववेदिन' सति पाद्मे ॥ ३५ ॥

प्रकाशिका—— एवमीश्वरस्य रूपत्रयमभिधायेदानीमजनस्य परमात्मनोऽवताररूपेण जन्मान्यकर्तुः क्रियारहितस्य तत्तदवतारकृतकर्माणि च न वास्तवानि किन्तु भ्रान्तिकल्पितान्येवेति केचिदाहुस्ते न भगवत्तत्वविद इत्याशयेनाह ॥ एवमिति । एवमुक्तरीत्याऽघटितघटकैश्वर्यादिवाजनस्य जन्मान्यकर्तुः कर्माणि च । च शब्द एवार्थे । कवय एव सम्यग्भगवत्तत्त्ववेदिन एव वर्णयन्ति । नेतरे । तद्भ्रान्तिकल्पितान्येव वदन्ति । अतस्ते न कवय इति भावः । ननु तेऽपि कवय इव कुतो नवर्णयन्तीत्यत उक्तम् । वेदगुह्यानीति । वेदेषु गोप्यतया प्रतिपादितानि न स्फुटतयाऽतो वेदसंप्रदायाज्ञानात् तथा वर्णयन्तीति भावः । ननु कवीनामिव वेदसम्प्रदायज्ञानमपि तेषां कुतो नेत्यत उक्तम् ॥ हृत्पतेरिति । तत्तद्योग्यतानुसारेण भगवानेव तेषां तेषां मनस्तथा तथा प्रेरयतीति भावः । अत्र सर्वत्र प्रमाणप्रसिद्धिद्योतको हि शब्दः ॥ ३५ ॥

स वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेऽस्मिन् ।
भूतेषु चान्तर्हित आत्मतन्त्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः ॥ ३६ ॥

प्रकाशिका— नन्वेवं कर्तृत्वस्य स्वाभाविकत्वेऽकर्तृत्वप्रतिपादकश्रुतिविरोध इत्याशङ्कापरिहारायाकर्तृत्वश्रुतेरर्थान्तरं दर्शयति ॥ स वा इति । स परमपुरुषः । यद्यपीदं विश्वं सृजतीत्यादि तथाऽपि अस्मिन्स्वक्रिया जनिते फले न सज्जते असक्तो न भवति । अतोऽकर्तेत्युच्यत इति शेषः । तथा च फलासक्त्यभावनिबन्धनमकर्तृत्ववचनमिति भावः ॥ कुत एवमित्यत उक्तम् । अमोघलील इति । अतः सत्यक्रिय इत्यर्थः । सार्धश्लोकार्थं प्रमाणेन दृढयति ॥ अप्रयत्नादिति । अनायासादित्यर्थः । स्वतन्त्रत्वादयत्न इति शेषः । तथा चान्याधीनप्रयत्नाभावादित्यर्थः ॥ फलानां चेति । च शब्दो निमित्तान्तरसमुच्चयार्थः । फलोद्देशेन करणाभावादित्यर्थः । क्रियायाः परिस्पन्दरूपायाः स्वतन्त्रत्वात् अन्याधीनत्वाभावास्वरूपादिति पाठः सुगमः । मूलेऽनुक्तसमुच्चायक च शब्दार्थकेन वै शब्देनाप्रयत्नादित्यादिकमपि निमित्तमुक्तमित्यवगन्तव्यम् । च शब्दोऽवधारणे । अप्रयत्नादित्यादौ सर्वत्र सम्बध्यते । एतैरेव निमित्तैस्तं भगवन्तमकर्तेति विदुर्न सर्वथा कर्तृत्वाभावेनेत्यर्थः । ननु सर्वथा कर्तृत्वाभाव एवाकर्तेत्यस्यार्थः प्रतीयमानं तु कर्तृत्वं भ्रान्तिकल्पितमित्येव किं न स्यादित्यत आह ॥ कर्तृत्वमिति । भ्रान्तिजं भ्रान्तिकल्पितम् । ननु निर्विकारस्य कथं क्रियावेशरूपं कर्तृत्वं स्वाभाविकमित्यत आह ॥ ऐश्वर्यजमिति । ऐश्वर्येण घटनीयमित्यर्थः । नन्वेवं कर्तृत्वस्य स्वाभाविकत्वे भोक्तृत्वमपि तस्य स्यादित्यतोऽत्रेष्टापत्ति माह ॥ भूतेष्विति । प्राणिदेहेष्वित्यर्थः । च शब्दः कर्तृत्वसमुच्चयार्थः । आत्मतन्त्रः स्वतन्त्रः । अनेनानश्नन्न्य इति श्रुतेरन्याधीनाशनाभावार्थकत्वं सूचयति । षाड्वर्गिकम् । श्रोत्रादिषाडीन्द्रियवर्गविषयम् । जिघ्रति भुङ्क्ते । शुभविषयभोग एवास्य नाशुभविषयभोग इति सूचयितुं षड्गुणेश इत्युक्तम् । षडिन्द्रियग्राह्यगुणसत्तादिप्रद इत्यर्थः । अनेनानशनश्रुतिरशुभभोगाभाव पराऽपीति सूचयति ॥ ३६ ॥

न चास्य कश्चिन्निपुणं विधातुरवैति जन्तुः कुमनीष ऊतिम् ।
नामानि रूपाणि मनोवचोभिः सन्तन्वतो नटचर्यामिवाज्ञः ॥ ३७ ॥

प्रकाशिका— नामरूपात्मकं विश्वं सृजतीति पूर्वमुक्तम् । तत्र भगवांश्चतुर्मुखादिरूपाणि विरिञ्चादिनामानि च रुद्रादिगतानि कस्मान्न करोति । ईश्वरत्वेन तस्य सामर्थ्यसद्भावात्पूर्णानन्दस्य तस्य किं विषयभोगेन कृत्यमित्यत आह ॥ न चास्येति । निपुणं यथा स्यात्तथा विधातुर्जगत्कर्तुर्मनसा रूपाणि मनोवचोभिर्नामानि सन्तन्वतस्ततद्व्यक्तिविशेषनिष्ठतया विस्तारयतः । च शब्दाद्विषयभोक्तुश्चास्य परमपुरुषस्योतिमभिप्रायं गतिं वा कुतश्चित्कोऽपि जन्तुर्जीवो नावैति । कुतः । यतः कुमनीषः कुत्सितबुद्धिः । असर्वज्ञ इति यावत् । क इव । नटस्याङ्गुल्याद्यभिनयविशेषरूपां चर्यां चेष्टामज्ञ इव भारतशास्त्रार्थज्ञानशून्यः पुरुषो यथा नावैति तथैवेत्यर्थः ॥३७॥

स वेद धातुः पदवीं परस्य दुरन्तवीर्यस्य रथाङ्गपाणेः ।
योऽमायया सन्ततयाऽनुवृत्त्या भजेत तत्पादसरोजगन्धम् ॥ ३८ ॥

प्रकाशिका— ननु भक्तस्य तद्भूतिज्ञानं स्यादित्यतः सोऽपि भजनादिना कथञ्चित्तदीयां स्थितिं मार्गं जानाति न सम्यक् तत्स्थितिमित्याह ॥ स वेदेति । धातुर्जगत्पोषणादिकर्तुः इन्द्रादिव्यावृत्त्यर्थं परस्येति । पदवीं मार्गम् अमायया कुटिलभावशून्यया सन्ततया निरन्तरक्रियमाणायाऽनुवृत्त्या भक्त्या तत्पादसरोजगन्धम् । हृदि व्यक्तं रूपम् । हृदि व्यक्तं तु यद्रूपं हरेर्गन्धः स उच्यत इति वक्ष्यमाणत्वात् । भजेत तत्रैव मग्नमना भवेत स पदवीं वेदेत्यन्वयः ॥ ३८ ॥

अथेह धन्या भगवन्त इत्थं यद्वासुदेवेऽखिललोकनाथे ।
कुर्वन्ति सर्वात्मक आत्मभावं न यत्र भूयः परिवर्त उग्रः ॥ ३९ ॥

प्रकाशिका— भक्तिमार्गे प्रवृत्तानृषीन्सावधानं स्ववचनश्रवणायाभिनन्दयति ॥ अथेति । यतो भक्त एव भगवतत्त्वं वेदाथ तस्मात् भगवन्तः पूज्याः । यूयं धन्या निरपेक्षगुणपूर्णाः कृतार्था इति यावत् । कृतः । यद्यस्मादित्थमुक्तप्रकारेण सर्वात्मके सर्वान्तर्यामिण्यात्मभावं स्वामित्वेन भावनां मनोवृत्तिनिष्ठां वा यत्र यस्मिन्नात्मभावे सति परिवर्तो जन्ममरणाद्यावर्तः । संसार इति यावत् । उग्रः क्रूरः ॥ ३९ ॥

इदं भागवतं नाम पुराणं ब्रह्मसंमितम् ।
उत्तमश्लोकचरितं चकार भगवानृषिः ॥ ४० ॥

तात्पर्यम्— 'धर्मः कं शरणं गत इत्यस्य तमेव व्यासरूपिणमिति परिहार उच्यते इदं भागवतमित्यादिना ॥ ४० ॥ इति प्रथमस्कन्धतात्पर्ये तृतीयोऽध्यायः ॥ ३ ॥

प्रकाशिका— इदं भागवतं नामेत्यादेः सङ्गत्यप्रतीतेस्तां दर्शयति ॥ धर्म इति । तमेव कृष्णमेव । परिहार उच्यत इत्यनन्तरं सूत किमपूर्वं पुराणं निर्मायास्माकं कथयसीति विप्राणां मानससंशयनिरासपूर्वकमिति शेषः । इत्यादिनेत्यादि शब्देन पुराणार्कोऽमुनोदित इत्यन्तस्य ग्रहणम् । तथा चेदं भागवतमित्यादिना पूर्वोक्त शङ्कामादौ निराकृत्यान्त्यश्लोके एव परिहार उच्यत इत्यर्थः । ब्रह्मसंमितं वेदतुल्यम् । उत्तमश्लोकस्य हरेश्चरितानि यस्मिंस्तत्तथोक्तम् । ऋषिर्व्यासः ॥ ४० ॥

निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् ।
तदिदं ग्राहयामास सूतमात्मवतां वरम् ॥ ४१ ॥

प्रकाशिका— धन्यं ज्ञानादिपुष्टिकरं स्वस्त्ययनं सर्वमङ्गलाश्रयम् । तत्प्रदमिति यावत् । महच्छब्दतोऽर्थतश्च । सुतं शुकम् । आत्मवतां जितमनसाम् ॥ ४१ ॥

सर्ववेदेतिहासानां सारं सारं समुद्धृतम् ।
स तु संश्रावयामास महाराजं परीक्षितम् ॥ ४२ ॥

प्रकाशिका— सारं सारमत्यन्तसारम् । अत्युत्तमप्रमेयमिति यावत् । समुद्धृतं सम्यगुद्धृत्य ग्रथितम् । यस्मिन्निति शेषः ॥ ४२ ॥

प्रायोपविष्टं गङ्गायां परीतं परमर्षिभिः ।
तस्य कीर्तयतो विप्रा राजर्षेर्भूरितेजसः ॥ ४३ ॥

प्रकाशिका— प्रायोपविष्टं प्रायेण मृत्युपर्यन्तानशनकेनोपविष्टम् । अनेन परमवैराग्यं सूचितम् । परमर्षिभिः परीतमित्यनेन तत्र विप्रलम्भादिशङ्का नेति सूचयति ॥ ४३ ॥

अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात् ।
सोऽहं वः श्रावयिष्यामि यथाऽधीतं यथामति ॥ ४४ ॥

प्रकाशिका— सोऽहं एवं पुरातनपुराणश्रवणवान्यथाऽधीतमित्यनेन विप्रलम्भनशङ्कामपाकरोति । यथामतीत्यनेन मम साकल्येन तत्प्रवचने न सामर्थ्यमित्याह ॥ ४४ ॥

कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ।
कलौ नष्टदृशां पुंसां पुराणार्कोऽमुनोदितः ॥ ८५ ॥

इति श्रीमद्भागवते तृतीयोऽध्यायः ॥

प्रकाशिका— एवं विप्राणां मानससंशयं परिहृत्येदानीं धर्मः कं शरणं गत इत्यस्योत्तरमाह ॥ कृष्ण इति । अमुना व्यासेनोदित उदयं प्रापितः । कलौ धर्मज्ञानप्रदर्शनायेति शेषः । तथा च कलौ धर्मज्ञानप्रदर्शकपुराणकर्तारं कृष्णापररूपं व्यासमेव धर्मः शरणं स्वरक्षकं गत इति परिहारोऽत्रोक्तो भवतीति भावः ॥ ४५ ॥ इति श्रीभागवतटिप्पण्यां तृतीयोऽध्यायः ॥ १-३ ॥

अथ चतुर्थोऽध्यायः

इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणाम् ।
वृद्धः कुलपतिः सूतं बह्वृचः शौनकोऽब्रवीत् ॥ १ ॥

शौनक उवाच–

सूत सूत महाभाग वद नो वदतां वर ।
कथां भागवतीं पुण्यां यामाह भगवान् शुकः ॥ २ ॥

कस्मिन् युगे प्रवृत्तेयं स्थाने वा केन हेतुना ।
कुतः सञ्चोदितः कृष्णः कृतवान् संहितां मुनिः ॥ ३ ॥

प्रकाशिका— मुनीनां मध्ये वृद्धो ज्ञानवयोवृद्धः । कुलपतिः । ऋषिकुलाचाररक्षको बह्वृचः ऋग्वेदी'। इदं सर्वं शौनकस्य प्रश्नकरणे प्राधान्योपपादकम् । वा शब्दः कस्मिन्नित्यनुकर्षार्थः । कुतः केन पुरुषेण कृष्णो व्यासः ॥ १,२,३ ॥

तस्य पुत्रो महयोगी समदृक् निर्विकल्पकः ।
एकान्तगतिरुन्निद्रो गूढो मूढ इवेयते ॥ ४ ॥

तात्पर्यम्— निर्विकल्पकः । मदीयं तदीयमिति भेदमपहाय सर्वमीश्वराधीनमिति विज्ञाय स्थितः । 'साम्यमीश्वररूपेषु सर्वत्र तदधीनताम् । पश्यति ज्ञानसम्पत्त्या विनिद्रो यः स योगविदि'ति ब्राह्मे ॥ ४ ॥

प्रकाशिका— स तु संश्रावयामासेति यदुक्तं तदयुक्तमिवाभाति । जनानां तद्दर्शनस्यैवासुलभत्वादित्याशयेनाह ॥ तस्य पुत्र इत्यादिना । निर्विकल्पक इत्येतस्य निरस्तभेद इत्यन्यथाप्रतीतिनिवारणायार्थमाह ॥ निर्विकल्पक इति । भेदमपहाय भेदबुद्धिमपहाय भगवदितरस्य स्वातन्त्र्यबुद्धिं त्यक्त्वेत्यर्थः । अनेन निर्गतो विकल्पः उक्तरूपा भेदबुद्धिर्यस्मात्स निर्विकल्पक इति विग्रहं सूचयति । तर्हि किं सर्वमेकमेवेति ज्ञानवानिति शङ्कायां निर्विकल्पक शब्दार्थबललब्धमर्थं दर्शयति ॥ सर्वमीश्वराधीनमिति । स्थितो दृढनिश्चयवान् । मूले योगीत्यनूद्य समदृक्त्वादिकं विधीयत इति भाति तदयुक्तम् । योगस्य समदृक्त्वाद्यपेक्षया पूर्वकालीनत्वासम्भवात् । अतः समदृक्त्वाद्यनुवादेन योगित्वमेव विधीयतेत्याशयेन समाख्याप्रमाणं पठति ॥ साम्यमीश्वररूपेष्विति । अनेन

समदृगित्येतस्य तात्पर्यमुक्तम् । तेन समं सर्वरूपेष्वेकप्रकारं ब्रह्म पश्यतीति समदृगित्यस्य व्याख्यानं सूचयति । निर्विकल्पक शब्दार्थाल्लब्धमर्थं दर्शयति ।। सर्वत्रेति । सर्वस्य जगत इत्यर्थः । एकान्तगतिरित्यस्य तात्पर्यम् ।। ज्ञानसम्पत्त्येति । अनेनान्ते तारतम्यान्त एको मुख्य इत्येकान्तो भगवांस्तस्य गतिर्ज्ञानं यस्य स तथोक्त इति व्याख्यानं सूचयति । उन्निद्र इत्यस्यार्थः ।। विनिद्र इति । तथा चोद्गता निद्राऽज्ञानं यस्मादिति व्याख्येयमिति भावः । अत्रैकान्तगतिरित्यस्य हेतुत्वमित्याशयेन ज्ञानसम्पत्त्येति तृतीयानिर्देशः । योगीत्यस्य तात्पर्यम् ।। योगविदिति । विद्द लाभे योगवानित्यर्थः । यः स इत्युक्त्या मूले यत्तच्छब्दयोरध्याहारं सूचयति ।। ततश्चायं श्लोकार्थः ।। यस्तस्य व्यासस्य पुत्रः समदृक्त्वादिगुणकः । गूढोऽप्रकटः । मूढ इव भ्रान्त इवेयते ज्ञायते । लोकैरिति शेषः । अत एव स महायोगीतरपूज्यभक्त्यादियोगसम्पूर्णः ।। ४ ।।

कथमालक्षितः पौरैः संप्राप्तः कुरुजाङ्गलम् ।
उन्मत्तमूकजडवद्विचरन् गजसाह्वये ।। ५ ।।

प्रकाशिका— स कथं पौरैरलक्षितः शुकत्वेन ज्ञातः पौराणामपि तद्दर्शनं न सुलभं किंम्वतस्थस्य राज्ञ इति भावः । ननु शुकस्य तस्मिन्देशे पुरे वाऽभावादेव पौराणमदर्शनमित्यत उक्तम् । कुरुजाङ्गलं सम्प्राप्तः प्रथमं पश्चाद्गजसाह्वये विचरन्निति । कुरवो जाङ्गलाश्च देशविशेषाः । गजेन समान आह्वयो नाम यस्य तस्मिन्हस्तिनामके पुर इत्यर्थः । हस्तिनाम्ना राज्ञा इदं पुरं निर्माय स्वनाम तस्य दत्तमतस्तद्धस्तिनपुरनामकं जातमित्याहुः । मूढ इवोत्युक्तं विशदयति ।। उन्मत्तमिति ।। ५ ।।

कथं वा पाण्डवेयस्य राजर्षेर्मुनिना सह ।
संवादः समभूत्तत यत्रैषा सात्वती श्रुतिः ।। ६ ।।

प्रकाशिका— एवं तद्दर्शनमेव दुर्लभं तेन सह संवादस्तु सुतरां दुर्लभ इत्याह ।। कथं वेति । वा शब्दः कैमुत्यसूचकः । यत्र यस्मिन्संवादे सात्त्वतो हरिस्तत्सम्बन्धिनी श्रुतिः संहिता । प्रवृत्तेति शेषः ।। ६ ।।

स गोदोहनमात्रं हि गृहेषु गृहमेधिनाम् ।
अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमम् ।। ७ ।।

प्रकाशिका— पुराणकथनमेकत्र बहुकालावस्थानसाध्यं तस्य त्वेकत्रावस्थानं दुर्लभमित्याह ।। स इति । गोदोहनमात्रं गोदोहनपरिमितं कालमवेक्षते । भिक्षानयनमिति शेषः । गृहमोधिनां गृहस्थाश्र-

मोचितयज्ञवताम् । अवेक्षणमपि न स्वार्थं किन्तु तेषामाश्रमं गृहं तीर्थीकुर्वन्स्वावस्थानेन पवित्रीकुर्वन् । तस्मादेवं भूतः पुराणं श्रावयामासेत्यसम्भावितमिति भावः ॥ ७ ॥

अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमम् ।
तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ॥ ८ ॥

प्रकाशिका— एवं वक्तुः शुकस्य पुराणकथनमसम्भावितमित्युपपाद्येदानीं श्रोतुः परीक्षितः प्रायोपविष्टं गङ्गायामिति यत्प्रायोपवेशनमुक्तं तत्किं निमित्तमिति प्रष्टुं तावदादौ परीक्षित्कथा-श्रवणस्यावश्यकत्वमुपपादंस्तत्कथाकथनं प्रार्थयते ॥ अभिमन्युसुतमिति । यस्मादभिमन्युसुतं परीक्षितं ज्ञानिनो भागवतोत्तमं प्राहुस्तस्मात्तस्य जन्मादि गृणीहि कथय । आश्चर्यं जननकाले ब्रह्मास्त्रेण हतोऽपीश्वरेण जीवितोऽत आश्चर्यकरमित्यर्थः । कर्माणि कलिबन्धनादीनि ॥ ८ ॥

स सम्राट् कस्य वा हेतोः पाण्डूनां मानवर्धनः ।
प्रायोपविष्टो गङ्गायामनादृत्याधिराट्श्रियम् ॥ ९ ॥

प्रकाशिका— सम्राट् चक्रवर्ती । वेति वितर्के । मानं मर्यादां वर्धयतीति मानवर्धनः । अधिराज्ञां चक्रवर्तिनां श्रियं सम्पदमधिराट् श्रियं दर्शयन् ॥ ९ ॥

नमन्ति यत्पादनिकेतमात्मनः शिवाय चानीय धनानि शत्रवः ।
कथं स धीरः श्रियमङ्ग दुस्त्यजामियेष चोत्स्रष्टुमहो सहासुभिः ॥ १० ॥

प्रकाशिका— एतदेव पृच्छति । नमन्तीति । पादनिकेतं पादपीठम् । आत्मनः शिवाय स्वकल्याणाय । शत्रवः शत्रुभूतराजानः । हे अङ्ग । श्रियमसुभिः प्राणैः सहोत्सृष्टुं हातुमियेषैच्छत् । अहो आश्चर्यमेतत् । एतादृशश्रीपरित्यागे महता कारणेन भाव्यं तत्किमित्याशयः ॥ १० ॥

शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः ।
जीवन्ति नात्मार्थमसौ परां श्रियं मुमोच निर्विद्य कुतः कलेवरम् ॥ ११ ॥

प्रकाशिका— हरौ स्नेहातिशयेन तुच्छीकृतविषयाणां किमुक्तसम्पत्त्या प्रयोजनमित्यत आह ॥ शिवायेति । शिवाय सुखाय । भवाय समृद्ध्यै । भूतये ऐश्वर्याय । उत्तमश्लोको हरिः स एव परायण उत्तमाश्रयो येषां ते तथोक्ता हरिभक्ताः । विरक्ता इति यावत् । परां श्रियं परोपकारार्थं श्रियं कलेवरं च निर्विद्यापि कुतो मुमोच । परोपकाराय विरक्तेनापि तेन स्वराज्ये तथैव स्थातव्यमिति भावः ॥११॥

तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किञ्चन ।
मन्ये त्वां विषये वाचां स्नातमन्यत्र छान्दसात् ॥ १२ ॥

प्रकाशिका— वक्तुं तव सामर्थ्यमस्तीत्याह ॥ मन्य इति । छान्दसाद्वेदविषयात् । अन्यत्र वाचां पुराणानां विषये स्नातं पारङ्गतम् । सूतस्यात्रैवर्णिकत्वात् छान्दसादन्यत्रेत्युक्तम् ॥ १२ ॥

सूत उवाच–
द्वापरे समनुप्राप्ते तृतीये युगपर्यये ।
जातः पराशराद्योगी वासव्यां कलया हरेः ॥ १३ ॥

तात्पर्यम्— तृतीयेद्वापरे पर्यवसाने प्राप्ते सति ॥ १३ ॥

प्रकाशिका— कस्मिन्युग इत्यादिप्रश्नानां व्यासजन्मकथनपूर्वकमुत्तरमाह ॥ द्वापर इति । अत्र तृतीये इत्यस्य युगपर्यय इत्यनेनान्वयभ्रान्तिं वारयन्युगपर्यय इत्यत्र विवक्षितं छेदं दर्शयति ॥ तृतीय इति । तथा च तृतीये कृतयुगापेक्षया तृतीये द्वापर इत्येवान्वय इति भावः । युगे इति छेदप्रदर्शनेन युगशब्दे विद्यमानायाः सप्तम्याः सुपां सुलुगितीत्यादिना लोप इति सूचयति । पर्यय शब्दार्थं वदंस्तस्यान्वयं सूचयति ॥ पर्यवसानं प्राप्ते सतीति । अनेन पर्यये पर्यवसाने समनुप्राप्ते सतीत्यन्वयः सूचित इति ज्ञातव्यम् ॥ तथा चायमर्थः । तृतीये द्वापरे युगे तृतीयस्य द्वापरस्य युगस्य पर्यवसाने द्वापरान्ते प्राप्ते सति वासव्यां वसुवीर्यजातायां सत्यवत्यां हरेः कलया स्वरूपांशेन योगी व्यासो जातः प्रादुर्भूत इति ॥ १३ ॥

स कदाचित्सरस्वत्या उपस्पृश्य जलं शुचिः ।
विविक्त एक आसीन उदिते रविमण्डले ॥ १४ ॥

तात्पर्यम्— नित्यज्ञानस्य चिद्दृष्टिर्लोकदृष्टिव्यपेक्षया । सर्वज्ञोऽप्यज्ञवद्देवः सर्वशक्तिरशक्तवत् । प्रत्यापयति लोकानामज्ञानं मोहनाय चे'ति कौर्मे ॥ १४, १७ ॥

प्रकाशिका— सरस्वत्या नद्या जलमुपस्पृश्य तत्र स्नानादिकं कृत्वेत्यर्थः । विविक्ते देशे आसीनो बभूव । रविमण्डले उदिते सतीति कालविशेषोक्तिः ॥ १४ ॥

परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा ।
युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे ॥ १५ ॥

प्रकाशिका— परावरज्ञः परावरतत्त्वज्ञोऽव्यक्तरहंसाऽनभिव्यक्तवेगेन । भुवि युगे युगे प्राप्तं युगधर्मव्यतिकरं सङ्करम् ॥ १५ ॥

भौतिकानां च भावानां शक्तिह्रासं च तत्कृतम् ।
अश्रद्दधानान्निःसत्वान् दुर्मेधान् ह्रसितायुषः ॥ १६ ॥

दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा ।
सर्ववर्णाश्रमाणां यद्दध्यौ चिरममोघदृक् ॥ १७ ॥

प्रकाशिका— भौतिकानां भूतकार्याणां भावानां शरीरादिपदार्थानां तत्कृतम् । युगधर्म-व्यतिकरकालाभ्यां कृतम् । अत एव जनांश्च श्रद्दधानान् आस्तिक्यबुद्धिशून्यान्नः सत्त्वान्साधुभाव-शून्यान्दुर्मेधान्धारणाशक्तिशून्यान्दुष्टप्रज्ञानिति वा । दुर्भगान्दुष्टभाग्यान् । अभाग्यानिति वा । मुनिर्व्यासो दिव्येन चक्षुषा ज्ञानदृष्ट्या सर्ववर्णाश्रमवतां यत् । हितमिति शेषः । तच्चिरं दध्यौ चिन्तितवान् । अमोघदृगबाध्यज्ञानः । अत्र नित्यज्ञाने व्यासे कादाचित्कज्ञानदृष्ट्या चिन्तनं बाधितमतोऽत्र तात्पर्यं प्रमाणेनैव दर्शयति ॥ नित्यज्ञानस्येति । व्यासादिरूपस्य हरेरिति शेषः । (निरदृष्टिः) । कादाचित्कज्ञानदृष्ट्युक्तिर्लोकदृष्टिव्यपेक्षया लोकदर्शनमाश्रित्येत्यर्थः । ननु कुत एवमविद्यामानं दर्शयति भगवानित्यत आह ॥ सर्वज्ञोऽपीति । अप्यर्थस्य च शब्दस्य सर्वशक्तिरपीति सम्बन्धः । अज्ञानां लोकानामिति सम्बन्धः । सतामधिकपुण्यह्रासयेत्यनुक्तसमुच्चयार्थो वा च शब्दौ ॥ १७ ॥

चातुर्होत्रं कर्मशुद्धिं प्रजानां वीक्ष्य वैदिकम् ।
व्यदधाद्यज्ञसन्तत्यै वेदमेकं चतुर्विधम् ॥ १८ ॥

प्रकाशिका— यद्धितमपश्यदित्युक्तं तद्दर्शयति ॥ चतुर्होत्रमिति ॥ अत्र होत्र पदमृत्विगुपल-क्षकम् । चत्वारो होत्रध्वर्यूद्गात्रब्रह्मसंज्ञा ऋत्विजः । चतुर्होतारस्तैरनुष्ठेयं कर्म चातुर्होत्रम् । शुद्धं समग्राङ्गोपेतम् । वैदिकं मूलवेदोक्तम् । अग्निष्टोमादिकं कर्म प्रजानां कर्तुमशक्यं वीक्ष्य यज्ञसन्तत्यै यज्ञपरम्पराप्रवर्तनायैकमेकत्वेन विज्ञातं वेदं प्रागेव चतुर्धा विभक्तं वेद राशिं तदुक्तं कर्म च चतुर्विधं व्यधदात् । सर्वकर्मकृतौ यस्मादशक्ताः सर्वजन्तवः । ''शाखाभेदं कर्मभेदं व्यासस्तस्मादचीक्लृपदिति वचनात्'' ॥ १८ ॥

ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः ।
इतिहासपुराणं च पञ्चमो वेद उच्यते ॥ १९ ॥

प्रकाशिका— वेदचातुर्विध्ये प्रदर्शिते तदुक्तं कर्म चातुर्विध्यं स्वयमेव सिद्ध्यतीत्याशयेन वेदचातुर्विध्यमेव दर्शयति ॥ ऋग्यजुरिति । प्रागेव विभक्तेभ्यो ऋगादिमूलवेदेभ्यो ऋगादि-संज्ञकाश्चत्वार उपवेदा उद्धृताः पृथक् प्रदर्शिता न तु कृताः । तदर्थनिर्णयायेतिहासपुराणं चोद्धृतं कृतम् । नन्वितिहासपुराणस्य पौरुषेयस्य कथं प्रामाण्यनिश्चय इत्यत उक्तम् । पञ्चमो वेद उच्यत इति । इतिहासपुराणः पञ्चमो वेदानां वेद इति श्रुताविति शेषः । तथा चेतिहासपुराणस्य वेदसमान-तयोक्तत्वान्न तत्राप्रामाण्यशङ्कां युक्तेति भावः ॥ १९ ॥

तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः ।
वैशंपायन एवैको निष्णातो यजुषां ततः ॥ २० ॥

प्रकाशिका— ऋग्वेदादीनां प्रवर्तकान्व्यासशिष्यान्दर्शयति ॥ तत्रेति । तत्र तेषां मध्ये ऋग्वेदधरो ऋग्वेदप्रवर्तकः साम गमयति प्रवर्तयतीति सामगः । एको मुख्यो निष्णातः पारङ्गतः । ततस्तदनन्तरं सूर्यादयोऽन्योऽपि । निष्णाता इति शेषः ॥ २० ॥

अथर्वाङ्गीरसामासीत्सुमन्तुर्वारुणो मुनिः ।
इतिहासपुराणानां पिता मे रोमहर्षणः ॥ २१ ॥

प्रकाशिका— आसीत् । प्रवर्तक इति शेषः । वारुणो वरुणपुत्रः सुमन्तुर्नामतः ॥ २१ ॥

त एव ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा ।
शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन् ॥ २२ ॥

प्रकाशिका— व्यस्यन् व्यभजन् । तच्छिष्येत्यनन्तरं विभक्ता इति शेषः । शाखिनस्तन्नाम-पूर्वकशाखावन्तः ॥ २२ ॥

त एव वेदा दुर्मेधैर्धार्यन्ते पुरुषैर्यथा ।
एवं चकार भगवान् व्यासः कृपणवत्सलः ॥ २३ ॥

प्रकाशिका— एवं शिष्यप्रशिष्यादिद्वारा व्यास एव वेदविभागं कृतवान् न तेषां तत्र स्वातन्त्र्य-मिति दर्शयन्वेदविभागप्रयोजनमाह ॥ त एवेति । दुर्मेधैरल्पज्ञैः । अनेन वेदान्व्यस्यतीति व्यास इति तन्नामनिर्वचनं सूचितमिति ज्ञातव्यम् । एवं चकार ॥ २३ ॥

**स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।
कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह ।
इति भारतमाख्यानं कृपया मुनिना कृतम् ॥ २४ ॥**

तात्पर्यम्— भारतं ब्राह्मणादीनां वेदार्थपरिवित्तये । त एव वेदास्त्वन्येषां नर्ते तत्कस्यचित्सुखमि'ति स्कान्दे ॥ २४ ॥

प्रकाशिका— स्वानुगृहीतशिष्यं प्रति शिष्यादि द्वारैवं वेदाधिकारिणां त्रैवर्णिकानां श्रेयःसाधनशुद्धकर्मानुष्ठानसिद्ध्यर्थं वेदविभागं कृत्वा तदनधिकारिणं स्त्रीशूद्रद्विजबन्धूनां श्रेयःसाधनावबोधकं विचिन्त्य कृतमित्याह ॥ स्त्रीशूद्रेति । द्विजान् बन्धून्वदन्ति न स्वयं द्विजा इति द्विजबन्धवः । त्रयी वेदो न श्रुतिगोचरा । अतःकर्माणि वेदोक्तयज्ञादिरूपे श्रेयसि श्रेयःसाधने मूढानां तद्विषयकज्ञानरहितानां श्रेयः श्रेयःसाधनावबोधकः । एवं वक्ष्यमाणप्रकारेण इह स्त्रीशूद्रादिषु भवेदिति विचिन्त्य भारतं भारतादिकं कृतम् । अत्र वेदानधिकारिस्त्रीशूद्राद्यर्थं भारतं कृतमित्युक्त्या ब्राह्मणादीनामत्र नाधिकार इति भाति । अतोऽत्र विवक्षितं तात्पर्यं प्रमाणेनैव दर्शयति ॥ भारतमिति । भारतपदं पुराणादेरुपलक्षकम् । वेदार्थज्ञानाय आवश्यकमिति शेषः । अन्येषां स्त्रीशूद्रादीनामत एव भारतादय एव वेदा वेद स्थानीयाः । श्रेयः साधनावबोधका इति यावत् । तद्भारतादिकमृते कस्यचिन्मोक्षाधिकारिणः सुखं मोक्षो न भवेत् । मूलेऽपि स्त्रीशूद्राद्यर्थमेवेत्यवधारणाभावादेतदेवाभिप्रेतमिति भावः ॥ २४ ॥

**एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः ।
सर्वात्मकेनापि यदा नातुष्यत् हृदयं ततः ॥ २५ ॥**

तात्पर्यम्— अतोषोऽनलम्बुद्धिः । 'श्रुत्वा कथां न तुष्यामि हरेरद्भुतकर्मण' इति मात्स्ये ॥ २५ ॥

प्रकाशिका— एवमवतारं तत्प्रयोजनं च संक्षेपतो निरूप्येदानीं भागवतकरणप्रयोजकं तस्य विचारप्रकारं सनिमित्तं दर्शयति ॥ एवमिति । भूतानां प्राणिनां श्रेयः साधनप्रदर्शने । हे द्विजाः । सर्वात्मकेनापि सर्वाधिकारिसाधारणेनापि । भारतेनापीति शेषः । यदा यस्माद्धृदयं मनो नातुष्यत्ततस्तस्मात् ॥ २५ ॥

**नातिप्रसन्नहृदयः सरस्वत्यास्तटे शुचौ ।
वितर्कयन्विविक्तस्थ इदं चोवाच धर्मवित् ॥ २६ ॥**

तात्पर्यम्— अप्रसादश्च स एव। 'कः प्रसन्नो भवेद्दिव्यां कथां शृण्वन्हरेः परामि'ति च ॥२६॥

प्रकाशिका— तत्त्व इत्युक्तमेव हेतुं विशदयति ॥ नातिप्रसन्नहृदय इति । शुचौ देशे वितर्कयन्विचारं कुर्वन् विविक्तस्थ एकान्ते स्थितः । इदं वक्ष्यमाणं प्रोवाच । स्वात्मानं शिष्यान्वा प्रतीति शेषः । धर्मविदतीन्द्रियार्थदर्शी । अत्र नातुष्यमित्यस्य सन्तोषंनापेत्यन्यथा प्रतीति-वारणायार्थमाह ॥ अतोष इति लोकोपकारकग्रन्थकरणविषयेऽलम्बुद्ध्यभाव एवातोषो न सन्तोषा-भावः । तस्य पूर्णानन्दत्वादिति भावः । तुष धातोरलम्बुद्ध्यर्थत्वे प्रयोगं दर्शयति ॥ श्रुत्वेति । अत्र तुष्यामीत्यस्यालम्बुद्ध्यर्थत्वाभावे वाक्यार्थो बाधितो भवतीति भावः । नन्वेवं नातिप्रसन्नहृदय इत्यग्रिमानुवादानुपपत्तिरित्यत आह ॥ अप्रसादश्चेति । स एवालम्बुध्यभाव एव कुत इत्यतः प्रसन्न शब्दस्यालम्बुद्ध्यर्थत्वे प्रयोगं दर्शयति ॥ क इति । अत्रापि प्रसन्न इत्यस्यालम्बुद्ध्यर्थत्वाभावे वाक्यार्थो बाधित इति भावः । तथा च नातिप्रसन्नहृदय इत्यस्यात्यन्तमलम्बुद्धिशून्य इत्यर्थः । अल्पग्रन्थकरणबुद्धिरवशिष्टाऽस्तीति भावः ॥ १६ ॥

धृतव्रतेन हि मया छन्दांसि गुरवोऽग्नयः ।
मानिता निर्व्यलीकेन गृहीतं चानुशासनम् ॥ २७ ॥

भारतव्यपदेशेन ह्याम्नायार्थः प्रदर्शितः ।
दृश्यते यत्र धर्मो हि स्त्रीशूद्रादिभिरप्युत ॥ २८ ॥

तात्पर्यम्— आचारापेक्षया धृतव्रतत्वादि परिपूर्णस्य ॥ २७, २८ ॥

प्रकाशिका— किमुवाचेत्यत आह ॥ धृतव्रतेनेति । छन्दांस्युद्दिश्य वेदाध्ययनमुद्दिश्य धृतं व्रतं वेदाध्ययनोपयुक्तं येन स तथा । तेन मया मानिताः पूजिता निर्व्यलीकेन कापट्यशून्येन । चेतसेति । शेषः । कपटवर्जितेन मयेति वा । गुरूणामनुशासनमाज्ञा गृहीतं कृतम् । अत्र व्यासेन स्वकीयाचारः कथ्यते । स कथं परिपूर्णस्य युज्यत इत्यतोऽत्र तात्पर्यमाह ॥ आचारापेक्षयेति । लोकानामिति शेषः। आचारपदेन तच्छिक्षा लक्ष्यते । तथा च लोकानामाचारशिक्षापेक्षया धृतव्रतत्वादिकथनम् । युज्यत इति शेषः । यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जना इति वचनादिति भावः । आत्मना विभुरित्येत-ल्लब्धार्थप्रदर्शनम् ॥ परिपूर्णस्येति । अनेनान्यथात्मना विभुरित्यत्र परिपूर्णतोक्तिरयुक्ता स्यादिति बाधकं सूचितमिति ज्ञातव्यम् ॥ २७ ॥

यदर्थमवतीर्णोऽस्मिं तदपि कृतमित्याह ॥ भारत आपदेशेन इति । व्याजेनाम्नाया अपि उद्धृता इति ग्राह्यम् । धर्मादिनिवृत्तधर्मपरापरतत्त्वादिकमित्यर्थः ॥ २८ ॥

अथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः ।
असंपन्न इवाभाति ब्रह्मवर्चस्विसत्तमः ॥ २९ ॥

तात्पर्यम्— दैह्यः देहरूपः । आत्मना विभुः स्वत एव व्याप्तः । 'तस्य सर्वावतारेषु न विशेषोऽस्ति कश्चन । देहदेहिविभेदश्च न परे विद्यते क्वचित् । सर्वेऽवतारा व्याप्ताश्च सर्वे सूक्ष्माश्च तत्त्वतः । ऐश्वर्ययोगाद्भगवान् क्रीडत्येवं जनार्दन' इति महासंहितायाम् । अवताख्रयोजनासम्पत्त्याऽसम्पन्न इव । ब्रह्मवर्चसयुक्तानामुत्तमः ॥ २९ ॥

प्रकाशिका— दैह्यो देहे भावः । आत्मा जीवः । आत्मना ब्रह्मणाऽसम्पन्न इव तादात्म्यमप्राप्त इवेति व्याख्यानमसदिति भावेन दैह्य इत्यादिकं समग्व्याख्याति ॥ दैह्य इत्यादिना । स्वार्थे यत् प्रत्यय इति भावः । आत्मना विभुरित्यन्वयप्रदर्शनेन परोक्तान्वयो न ग्राह्य इति सूचयति । एवमन्वयं प्रदर्श्य पदद्वयार्थं दर्शयति ॥ स्वत एवेति आत्मनेत्यस्यार्थः ॥ स्वत एवेति । च शब्दार्थः एवेति विभुरित्यस्यार्थः व्याप्त इति परिपूर्ण इत्यर्थः । ननु मूलरूपस्य भगवतः पूर्णत्वेऽपि तदवतारभूतस्य व्यासस्यापूर्णत्वेनैवेयमुक्तिः किं न स्यात् । कथं देहरूप इति व्याख्यानम् । आत्मनो देहातिरिक्तताया अस्मदादिषु प्रसिद्धत्वात् विभुपदेनोक्तस्य व्याप्तत्वस्य देहे असम्भवाच्चेत्याशङ्कापरिहाराय हि शब्दसूचितं प्रमाणमेवोदाहरति ॥ तस्येति । भगवत इत्यर्थः । अनेनाद्यशङ्कानिरासः । च शब्द एवार्थे । परे परमात्मन्येव । न विद्यत इत्यनेन द्वितीयशङ्कानिरासः । क्वचित्कुत्रचिदप्यवतारे व्याप्ताः पूर्णाः । अनेन तृतीयशङ्कानिरासः । नन्वेवं व्यासादिदेहानां देशतः परिच्छिन्नत्वबुद्धिरप्रमा स्यादित्यत उक्तम् ॥ तत्त्वतः सर्व सूक्ष्माः परिच्छिन्नाश्चेति । ननु कथमेकत्र विरुद्धं परिमाणद्वयमित्यत उक्तम् । ऐश्वर्ययोगादिति । अघटितघटकैश्वर्यरूपाद्धटकादित्यर्थः। ऐश्वर्योपपादनाय भगवानित्युक्तम् । नन्वेवं परिपूर्णस्य किमर्थमवतारग्रहणमित्यतः क्रीडयैवेत्याह ॥ क्रीडत्येवमिति । न किञ्चित्स्वप्रयोजनमित्यर्थः । नन्वात्मनेत्यस्य विभुरित्यनेनान्वयेऽसम्पन्न इत्यत्रापेक्षिततृतीया केत्यतस्तां सूचयन्मूले इव शब्दलब्धमर्थं दर्शयति ॥ अवतारेति । सम्पन्न एव वस्तुतो युक्त एव । अनेन मूलेऽवताख्रयोजनसम्पत्त्येत्यध्याहार्यमिति सूचयति । अवताख्रयोजनं सम्पत्त्याऽसम्पन्न इवेति पाठः सुगमः । ब्रह्मवर्चस्विसत्तम इत्यत्र कर्मधारयादिप्रतीतिं वारयन्सत्तम शब्दार्थं दर्शयति ॥ ब्रह्मवर्चसयुक्तानामिति । प्रत्ययार्थानुवादः । सत्तमशब्द उत्तमशब्दपर्यायः । निर्धारणषष्ठ्यैवातिशयलाभ इति भावः ॥ ततश्चाथाऽपीत्यादेरयमर्थः ॥ अथाऽप्येवं लोकाचारशिक्षणलोकोपकारग्रन्थकरणादिरूपावताख्रयोजनसम्पत्त्या युक्तोऽपि मे आत्मतयाऽसम्पन्न इवाभातीत्यन्वयः । बतेति लोकदृष्ट्या खेदोक्तिः । ननु त्वत्स्वरूपस्योक्तरीत्या पूर्णत्वेऽपि त्वदतिरिक्ते देह एवै बुद्धिरित्यत उक्तम् ॥ दैह्य

इति । देहाभिन्न इत्यर्थः । ननु देहात्माभेदो लोकविरुद्ध इत्यत उक्तम् ।। म इति । भगवदवतारभूतस्य म इत्यर्थः । अनेन देहात्मभेदो लोक एव न पर इति सूचयति । अत्र प्रमाणप्रसिद्धीद्योतको हि शब्दः । नन्ववतारप्रयोजनसम्पत्त्या पूर्णत्वेऽपि त्वत्स्वरूपं स्वत एवापूर्णमत एवं भातीत्यत उक्तम् ।। आत्मना च विभुरिति । स्वत एव परिपूर्ण इत्यर्थः । अत्र प्रमाणप्रसिद्धिं वै शब्देनाह । नन्वथाऽपि त्वदात्मा वृत्ताध्ययनादिजनितं यत्तेजो ब्रह्मवर्चससंज्ञं तद्युक्तो न भवत्यत एवं भातीत्यत उक्तम् ।। ब्रह्मवर्चस्विनां मध्ये सत्तम उत्तम इति ।। २९ ।।

किं वा भागवता धर्मा न प्रायेण निरूपिताः ।
प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ।। ३० ।।

तात्पर्यम्— पुनरपेक्षितत्वान्न प्रायेण निरूपिताः । 'यथा तु भारते देवो न तथाऽन्येषु केषुचित् । उच्यते न तथापीशं जानन्त्यज्ञा जनार्दनमि'ति स्कान्दे ।। ३० ।।

प्रकाशिका— असम्पत्तौ हेतुं स्वयमेव सम्भावयति ।। किं त्वेति । अत्र प्रायेणेत्युक्त्या करिष्यमाणभागवतापेक्षया प्राक्तने भारते धर्माः साकल्येन न निरूपिता इति भाति । न तद्युक्तम् । वक्ष्यमाणप्रमाणविरोधात् । अतोऽत्र विवक्षितमर्थं दर्शयति ।। पुनरपेक्षितत्वादिति । मन्दाधिकारिणां ग्रन्थान्तरकरणनेति शेषः । तथा च यद्यपि भारते हरिधर्माश्च सर्वान्प्रतिनिरूपितास्तथाऽपि भारतस्य दुर्गमार्थतया मन्दाधिकारिणां भारतप्रतिपादितमेव प्रमेयं पुनर्ग्रन्थान्तरेण बोधितं चेदस्माकं सम्यग्बोधो भविष्यतीति ग्रन्थान्तरकरणस्यापेक्षितत्वात्प्रायेणेत्युक्तमित्यर्थः । प्रतीतार्थ एव किं न स्यादित्यतोऽत्र प्रमाणविरोधं दर्शयति ।। यथा त्विति । तु शब्दोऽनुक्तसमुच्चायक च शब्दार्थः । तथा च देवो धर्माश्चेत्यर्थः । अनेन मूले देवोऽप्युपलक्षणीय इति सूचयति । अन्येषु ग्रन्थेषु । अज्ञा मन्दाधिकारिणः । न जानन्ति । भारतादिति शेषः । तस्य दुर्गमार्थत्वादिति भावः । तथा च भागवत धर्मा भगवांश्च प्रायेण सर्वाधिकारिबोधानुसारेण मया न निरूपिताः । अतोऽसम्पन्न इवाभातित्यन्वयः । हि यस्मात्त एव धर्मा अच्युतस्य प्रियाः अतः परमहंसानां प्रिया इति श्लोकार्थः ।। ३० ।।

तस्यैवं खिन्नमात्मानं मन्यमानस्य खिद्यतः ।
कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतम् ।। ३१ ।।

तात्पर्यम्— खेदोऽनलम्बुद्धिः । 'अतुष्टिरप्रसादश्च खेदोऽतृप्तिस्तथैव च । अनलत्वं वदन्त्येते सर्वे पर्याय वाचका' इति ब्राह्मे । मन्यमानस्य स्वेच्छया ।। ३१ ।। इति प्रथमतात्पर्ये चतुर्थोऽध्यायः ।

प्रकाशिका— खिन्नं खेदवन्तं खिद्यतः खेदं प्राप्नुवत इति खेद उच्यत इत्यतोऽत्र विवक्षितं खेद शब्दार्थं दर्शयति ॥ खेदोऽनलम्बुद्धिरिति । अत्र पूर्वोत्तरत्र चाभिधानं दर्शयति ॥ अतुष्टिरिति । पर्यायवाचका एवेत्यन्वयः । नन्वेवमात्मानं खिन्नं मन्यमानस्येत्यनुवादो न सम्भवति । अशेष-निश्चयवति व्यासे किं वेत्यादिनोक्तसम्भावनाया असम्पूर्ण इवाभातीत्युक्तेश्च बाधितत्वात् । अतोऽत्र विवक्षितं तात्पर्यं दर्शयति ॥ मन्यमानस्येति । तथा च लोकानुकरणाय स्वेच्छयैव पूर्वं व्यासेन तथोक्तम् । अतोऽत्र स्वेच्छया एवं मन्यमानस्येति मूलं योजनीयमिति भावः । प्रागुदाहृतं स्वरस्वतीतीरस्थम् ॥ ३१ ॥

तमभिज्ञाय सहसा प्रत्युत्थायागतं मुनिम् ।
पूजयामास विधिवन्नारदं सुरपूजितम् ॥ ३२ ॥

इति प्रथमस्कन्धे चतुर्थोऽध्यायः

प्रकाशिका— अभिज्ञाय संज्ञापूर्वकं विज्ञाय सहसा कालक्षेपमन्तरेण ॥ ३२ ॥ इति श्री भागवतटिप्पण्यां चतुर्थोऽध्यायः ॥ १-४ ॥

अथ पञ्चमोऽध्यायः

सूत उवाच–

अथ तं सुखमासीन उपासीनं बृहच्छ्रवाः ।
देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव ॥ १ ॥

प्रकाशिका— उप समीपे आसीनम् । बृहच्छ्रवा महायशा विप्रर्षिं व्यासम् । स्मयन् ईषद्धसन् । इवेत्यनेन मुख्यप्रसादो द्योत्यते ॥ १ ॥

नारद उवाच–

पाराशर्य महाभाग भवतः कच्चिदात्मना ।
परितुष्यति शारीर आत्मा मानस एव वा ॥ २ ॥

तात्पर्यम्— शारीरमानसयोरभेदादुभयथापि युज्यते । स्वतन्त्रत्वादात्मनैव ह्यलम्बुद्धिः ॥२॥

प्रकाशिका— भगवदभिप्रायज्ञो नारदस्तमनुकुर्वंल्लौकिकीं रीतिमाश्रित्य तस्य कुशलं तावदादौ पृच्छति ॥ पाराशर्येति । पाराशर्य पराशरपुत्र । महान् भगो भाग्यं यस्य । हे महाभाग । शारीरो मानसो वा । आत्माऽऽत्मनैव स्वत एव परितुष्यति कच्चित् अलम्बुद्धिं प्राप्नोति किमित्यर्थः । ननु भगवतः शरीरं नो वा तुष्यति किमित्येव लोकानुसारेण पृष्टव्यम् । शरीरं मानसो वा आत्मेत्यात्मविशेष्यककृतःप्रश्नः कथं युज्यते । लोके एवं प्रश्नकरणस्यादर्शनादित्यतोऽत्राभिप्रायमाह ॥ शारीरमानसयोरिति । शरीरमनसोरित्यर्थः । मूलानुसारेण स्वार्थे कःप्रत्ययपयोगः । अभेदा-दात्माभेदात् । तथा चेतरत्र शरीरमनसोरात्मभिन्नत्वेनात्म विशेष्यकप्रश्नासम्भवेऽपि भगवति तयोरात्माभिन्नत्वादात्मविशेष्यको वा शरीरादिविशेष्यको वा प्रश्नो युक्त एवेति भावः । अनेन शारीरः । शरीररूपो मानसो मनोरूप इति मूलं व्याख्येयमिति सूचयति । आत्मनैव परितुष्यतीत्ये-तदुपपादयन्व्याख्याति ॥ स्वतन्त्रत्वादिति । अलम्बुद्धिरित्यनेन परितुष्यतीत्येतदुक्तार्थम् । स्वतन्त्र-त्वात् । अन्यस्यनियामकस्याभावात्स्वत एवालम्बुद्धिर्जाताऽस्ति किमिति प्रश्नाशय इत्यर्थः ॥ २ ॥

जिज्ञासितं सुसंपन्नमपि ते महदद्भुतम् ।
कृतवान्भारतं यस्त्वं सर्वार्थपरिबृंहितम् ॥ ३ ॥

प्रकाशिका— कुशलप्रश्ने निमित्तमथाऽपि शोचसीत्यादिना वक्तुमवतारप्रयोजनं तव सर्वं सम्पन्नमिति तावदाह ॥ जिज्ञासितमिति । जिज्ञासितं विचारितं यद्धर्मादि तत्सर्वं सुसम्पन्नं सम्यग्ज्ञातम् । अपि शब्दादनुष्ठितं चेत्यर्थः । अथाऽपीति पाठे सम्बोधनम् । सुसम्पन्नत्वे हेतुः महदद्भुतमित्यादि । शब्दतोऽर्थतश्च महदद्भुतं भाषात्रयोपेतत्वादिना गहनं सर्वैर्धर्मादिभिरर्थैः पुरुषार्थैः परिबृंहितं पूर्णम् । तत्प्रदमिति यावत् । एतादृशं भारतं यस्मात्कृतं तस्मादिति पूर्वेणान्वयः ॥ ३ ॥

जिज्ञासितमधीतञ्च ब्रह्म यत्तत्सनातनम् ।
तथापि शोचस्यात्मानमकृतार्थ इव प्रभो ॥ ४ ॥

तात्पर्यम्— शोचसि प्रकाशयसि । 'अजस्रेण शोचिषा शोशुचान' इति हि श्रुतिः ॥ ४ ॥

प्रकाशिका— जिज्ञासितं विचारितं ब्रह्म वेदराशिस्तदर्थभूतं परब्रह्म च । वेदे क्रमादि-व्यत्यासाभावेन सनातनत्वम् । तथाऽप्येवं कृतावतारप्रयोजनोऽप्यात्मानमुक्तरीत्या शारीरं मानसं चात्मानं शोचसि । अत्र शोकं करोतीत्यन्यथा प्रतीतिवारणायाह ॥ शोचसीति । प्रकाशयसीत्यनेन शोचयसीत्येतदन्तर्णीत व्यर्थमिति दर्शयति । शुच् धातोः प्रकाशार्थत्वे वैदिकप्रयोगं प्रमाणयति ॥ अजस्रेणेति । "त्वं भासा रोदसी आत तथाजस्रेण शोशुचान" इति श्रुतेः । नित्येन प्रकाशेन पुनः

पुनर्भृशं प्रकाशमान इत्यर्थः । यतस्त्वमात्मानमकृतार्थ इव प्रकाशयस्यतो मया कुशलः प्रश्नः कृत इति भावः ॥ ४ ॥

व्यास उवाच–

अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे ।
तन्मूलमव्यक्तमगाधबोधं पृच्छामहे त्वाऽऽत्मभवात्मभूतम् ॥ ५ ॥

तात्पर्यम्— 'ज्ञानशक्तिस्वरूपोऽपि ह्यज्ञाशक्तं वदेद्धरिः । अज्ञानां मोहनायेशस्तेन मुह्यन्ति मोहिता' इति पाद्मे ॥ ५ ॥

प्रकाशिका— आत्मा शारीरो मानसश्च । तन्मूलम् । तस्यापरितोषस्य कारणमव्यक्तमस्फुटम् । त्वा त्वां पृच्छामहे । आत्मनो विष्णोर्भवतीत्यात्मभवो ब्रह्मा तस्यात्मनो देहाद्भूतमुद्भूतम् । अत एवागाधबोधम् । अस्मदलम्बुद्धिकारणज्ञाने तव सामर्थ्यमस्तीति प्रदर्शनायेदं विशेषणम् । अत्र तन्मूलं त्वां पृच्छामीत्युक्त्या व्यासस्याज्ञानाशक्ती प्रतीयेतेऽतस्तदुक्तेरभिप्रायं प्रमाणेनैव दर्शयति ॥ ज्ञानशक्तीति । अत्र प्रमाणप्रसिद्धिं दर्शयितुं हि शब्दः । अज्ञाशक्तिमज्ञमशक्तं चेत्यर्थः । हरिर्व्यासादिरूपः । तेन तथा वचनेन मोहिता वञ्चिता मुह्यन्ति मिथ्याज्ञानिनो भवन्तीत्यर्थः ॥ ५ ॥

स वै भवान् वेदसमस्तगुह्यं उपासितो यः पुरुषः पुराणः ।
परावरेषो मनसैव विश्वं सृजत्यवत्यत्ति गुणैरसङ्गः ॥ ६ ॥

प्रकाशिका— अगाधबोधतां प्रपञ्चयन्नाह ॥ स वा इति । समस्तगुह्यज्ञाने हेतुमाह ॥ उपासीन इत्यादिना । यः परावरेशो मुक्तामुक्तप्रपञ्चयोरीशः । मनसैव सङ्कल्पमात्रेणैव । गुणैरसङ्गः सत्त्वादि-गुणकृतसुखदुःखादिसङ्गरहितः । पुराणः पुरातनः पुरुषः स यस्मात्त्वयोपासितोऽपरोक्षीकृतोऽतो भवान्समस्तं गुह्यं वेदेत्यन्वयः ॥ ६ ॥

त्वं पर्यटन्नर्क इव त्रिलोकीमन्तश्चरो वायुरिवात्मसाक्षी ।
परावरे ब्रह्मणि धर्मतो व्रतैस्स्नातस्य मे न्यूनमलं विचक्ष्व ॥ ७ ॥

प्रकाशिका— इतोऽप्यस्मदनलम्बुद्धिकारणज्ञानं तव सम्भावितमित्याह ॥ त्वं पर्यटन्निति । अर्क इव त्रिलोकीं पर्यटन् अन्तश्चरो वायुः प्राण इव सर्वात्मसाक्षी सर्वप्राणिमनोवृत्तिज्ञस्त्वं परे ब्रह्मणि तथाऽवरे वेदाख्ये ब्रह्मणि धर्मतो वेदोक्तधर्मानुष्ठानेन व्रतैः स्वाध्यायनियमैश्च स्नातस्य पारङ्गतस्य मे न्यूनं नितरामूनम् । उर्वरितमवतारप्रयोजनमलं यथा भवति तथा विचक्ष्व विचार्य ब्रूहि ॥ ७ ॥

नारद उवाच–

भवतानुदितप्रायं यशो भगवतोऽमलम् ।
येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलम् ॥ ८ ॥

प्रकाशिका— एवं लोकान्मोहयता व्यासेन पृष्टो नारदस्तदभिप्रायज्ञस्तमनुकुर्वन्नुत्तरमाह ॥ भवतेति । हे व्यास । भवता भारतादौ यद्यपि भगवतोऽमलं यश उदितं तथाऽपि तदनुदितप्रायम् । मन्दाधिकारिणः प्रतीति शेषः । भारतोक्तं भगवद्यशो मन्दाधिकारिभिः सम्यग्ज्ञातुं न शक्यं भाषात्रयोपेतत्वादिति भावः । अतो येन मन्दाधिकारिणामपि भगवद्यशोबोधकेन पुराणेनेदानीमप्यकृतेनासौ भवतः शारीरो मानसो वाऽऽत्मा न तुष्येत तद्दर्शनं मन्दाधिकारिणामपि भगवद्यशः प्रतिपादकं पुराणं खिलमुर्वरितं मन्य इत्यर्थः ॥ ८ ॥

यथा धर्मादयो ह्यर्था मुनिवर्यानुवर्णिताः ।
न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ॥ ९ ॥

तात्पर्यम्— धर्मादीनामल्पकथनेन पूर्तिः । न वासुदेवमहिम्नोऽति कथितस्यापि ॥ ९ ॥

प्रकाशिका— ननु मन्दाधिकारिभिरपि धर्मादिकमेव भगवद्यशोऽपि भारतात्कुतो न सम्यग्ज्ञातुं शक्यमित्यत आह ॥ यथेति । अत्र भारते धर्मादिकमेव प्राचुर्येण वर्णितं न वासुदेवमहिमेत्यन्यथाप्रतीतिवारणाय तात्पर्यमाह ॥ धर्मादीनामिति । अल्पकथनेन भारतरूपैकग्रन्थकथनेन पूर्तिः अल्पंबुद्धिः । तत्कर्तुर्व्यासस्य । जातेति शेषः । भारतेनैव सर्वैरप्यधिकारिभिर्धर्मादिर्ज्ञातुं शक्यत्वेन धर्मादिबोधनार्थं मया ग्रन्थान्तरं कार्यमिति बुद्धिर्जातेति भावः । अनेन पूर्वार्धतात्पर्यमुक्तमित्यवगन्तव्यम् । द्वितीयार्धतात्पर्यमाह ॥ नेति । वासुदेवमहिम्नोऽल्पकथनेन भारतरूपैकग्रन्थे कथनेन पूर्तिर्व्यासस्यालम्बुद्धिर्नेत्यर्थः । ननु तत्र धर्माद्यपेक्षयाऽल्प एव वासुदेवमहिमा कथितः न बहुतरोऽतोऽनलम्बुद्धिरित्यत उक्तम् । अतिकथितस्यापीति । सर्वापेक्षयाऽतिशयेन कथितस्यापीत्यर्थः। भारते धर्माद्यपेक्षया भगवन्महिमा यद्यप्यतिशयेनैव कथितस्तथाऽपि व्यासस्यानलम्बुद्धिर्जाता । मन्दाधिकारिभिर्दुर्गमार्थत्वेन भारतेन भगवन्महिम्नो ज्ञातुमशक्यत्वादिति भावः । ततश्चायं श्लोकार्थः। हे मुनिवर्य सर्वज्ञश्रेष्ठ । त्वया धर्मादयोऽर्थाः पुरुषार्थाः । प्रसिद्धस्वस्यसाधनोपेता इत्यर्थे हि शब्दः । अनुवर्णिताः यथा सर्वाधिकारिबोधानुकूल्येन भारते वर्णिता इत्यर्थः तथा सर्वाधिकारिबोधानुकूल्येनानुवर्णितः कीर्तितो हि यस्मात्तस्मात्तद्दर्शनं खिलं मन्य इत्यन्वयः । भारतस्य दुर्गमार्थत्वात् । तत्रातिशयेन वर्णितोऽपि वासुदेवमहिमा मन्दाधिकारिभिर्भारतेन न ज्ञातुं शक्यः । अतस्तेषां श्रेयसे वासुदेवमाहात्म्यज्ञानाय ग्रन्थान्तरकरणमावश्यकमिति भावः ॥ ९ ॥

न तद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं न गृणीत कर्हिचित् ।
तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा न्यपतन्मिमंक्षया ॥ १० ॥

तात्पर्यम्— वायसं तीर्थं वयोमात्रानुजीवि शास्त्रम् ॥ १० ॥

प्रकाशिका— ननु मन्दाधिकारिणां श्रेयसे न मम ग्रन्थान्तरकरणमावश्यकं तेषां हर्यन्यविषयकसाहित्यादि शास्त्रेणापि श्रेयः सम्भवदित्यतो न तच्छास्त्रं मोक्षजनकतया ज्ञानिनां संमतमित्याह ॥ न तद्वच इति । यद्वचः शास्त्रं जगत्पावयतीति जगत्पवित्रं जगत्पावनकरं हरेर्यशः कथाऽपि न गृणीत न प्रतिपादयेत् । तच्चित्राण्यलङ्काराद्युपेतानि पदानि यस्मिंस्तत्तथोक्तं चित्रपदमपीत्यर्थः । तद्वचो न मोक्षानुकूलं शास्त्रम् । किं तर्हीत्यत उक्तम् । तद्वायसमिति । लुप्तोपमेयम् । ततश्चास्य दार्ष्टान्तिके काकसम्बन्धीत्यर्थस्यासम्भवात् । अर्थान्तरं दर्शयति । वयोमात्रेति । अत्र वय शब्देन जीवनमुपलक्ष्यते । पात्रपदेन परलोकं वारयति । जीवनमात्रोपायभूतमित्यर्थः ॥ ततश्चायमर्थः । यथाऽत्र तीर्थे मानसा मानससरोवरविहारिणो हंसा धवलपक्षाः पक्षिणो मिमङ्क्षया तापोपशमनाय स्नातुमिच्छया न न्यपतन्न प्रविष्टाः । तत्तीर्थं वायसं काकसम्बन्धि काकोपजीव्यमुशन्ति जानन्ति । लोका इति शेषः । तथा यत्र शास्त्रे मानसा ब्रह्मणो मनसा जाता हंसा यतयो मिमङ्क्षया परब्रह्मविचारेच्छया न न्यपतन्न प्रविष्टाः । तत्तीर्थं शास्त्रं वायसं जीवनमात्रोपयुक्तमुशन्ति ज्ञानिनो न मोक्षोपयोग्यतो न तेन शास्त्रेण मन्दाधिकारिणां मोक्ष इति भावः ॥ १० ॥

स वाग्विसर्गो जनताघविप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि ।
नामान्यनन्तस्य यशोंकितानि शृण्वन्ति यत् गायन्ति गृणन्ति साधवः ॥११॥

प्रकाशिका— तस्मान्मन्दाधिकारिणां मोक्षाय भगवद्यशः प्रतिपादकग्रन्थान्तरमवश्यं कार्यम् । तस्य मोक्षहेतुत्वं तु साधुजनकृतश्रवणादिविषयत्वेनैव सिद्धं भविष्यतीत्याशयेनाह ॥ स वाग्विसर्ग इति । वाचां विसर्गो विशिष्टवचनानि यस्मिन् ग्रन्थे स तथोक्तः । जनतायाः सज्जनसमूहस्याघं पापं विप्लावयति नाशयतीति जनताविप्लव इत्यन्वयः । मोक्षहेतुरिति यावत् । यस्मान् ग्रन्थेऽवद्धवत्यपि चित्रपदत्वाद्यभाववत्यपीत्यर्थः । अनन्तस्य हरेर्यशोंऽकितानि यशः प्रतिपादकानि नामानि पदानि सन्ति स वाग्विसर्गो जनताधविप्लव इत्यन्वयः । कुत इत्यत उक्तम् ॥ यदिति । यस्मात्साधवो हरिभक्ताः शुकादयस्तं ग्रन्थं सति वक्तरि शृण्वन्ति । श्रोतरि सति गृणन्ति । अन्यदा तु स्वयमेव गायन्तीत्यर्थः । तस्मात्स ग्रन्थो जाताघविप्लव इति निश्चीयत इत्यर्थः । अत्र भगवन्माहात्म्यवर्णनस्य भक्तिद्वारैव मोक्षहेतुत्वमभिप्रेतम् । यदाहुः । भक्त्यर्थं भगवन्महिमोक्तिरिति ॥ ११ ॥

नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ।
कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ॥ १२ ॥

तात्पर्यम्— परोक्षज्ञानं न शोभते । अपरोक्षज्ञानं न भक्त्या विनोत्पद्यते । 'यस्य देवे परा भक्तिः' । 'यमेवैष वृणुते तेन लभ्यः' । 'यद्वासुदेवशरणा विदुरञ्जसैवे'त्यादेः ॥ १२ ॥

प्रकाशिका— ननु न भक्तिरावश्यकी येन तदर्थं भगवन्माहात्म्यवर्णनमावश्यकं स्यात्तदभावेऽपि मोक्षहेतुतया श्रुत्यादिसिद्धाभ्यां भगवत्स्वरूपज्ञान निवृत्तकर्मभ्यामेव सर्वेषां मोक्षसम्भवादित्याशङ्कायां भक्त्यभावे न ताभ्यामपि मोक्ष इत्याह ॥ नैष्कर्म्यमिति । अत्र ज्ञानमित्यपरोक्षज्ञानं न विवक्षितमित्याह ॥ परोक्षज्ञानमिति । न शोभते न भक्तिं साधयति । अपरोक्षज्ञानग्रहणे बाधकमाह ॥ अपरोक्षज्ञानमिति । अच्युतभाववर्जितमिति ज्ञानस्य भक्त्यभावेव्युत्पत्तिरुच्येत । तच्च नापरोक्षज्ञानविवक्षायामुपपद्यते । तस्य हि भक्तिं विनोत्पत्तेरसम्भावितत्वादित्यर्थः । अपरोक्षज्ञानं तु शास्त्रादिना भक्तिहीनानामपि सम्भावितमिति भावः । भक्तेः परोक्षज्ञानसाधनत्वे प्रमाणान्याह ॥ यस्य देव इत्यादिना । एषः परमात्मा यं भक्तत्वेन वृणुते तस्य स्वां तनुं विवृणुते । अपरोक्षतया दर्शयतीत्यर्थः । वासुदेवशरणा वासुदेवभक्ता विदुरपरोक्षतया ज्ञातवन्तः ॥ ततश्चायं श्लोकार्थः ॥ अलं निरञ्जनं सम्पादन काले दोषानाषादकं ज्ञानं हरिविषयकं परोक्षज्ञानं नैष्कर्म्यमपि निष्कर्म्यमपि निष्कर्मणो मोक्षस्य जनने योग्यमपि अच्युते भावो भक्तिस्तेन वर्जितं चेन्न शोभते न मोक्षजनकं भवति । तदा शश्वदभद्रं साधनकाले दोषाविनाभूतम् । "सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृता" इति वचनात् । कर्म । च शब्द एवार्थः । ईश्वरे नैवार्पितं भक्तिपूर्वकं भगवदर्पणं विनैव कृतं न शोभते इति कुतः पुनः किमु वक्तव्यम् । ज्ञानं कर्मापेक्षयोत्तमत्वेन प्रसिद्धम् । तदपि यदा भक्त्यभावे न मोक्षजनकं तदा तदवरं कर्म भक्त्यभावे मोक्षजनकं न भवतीति किं वाच्यमिति भावः । ननु कामनया कृतत्वादेव न तन्मोक्षसाधनमित्यत उक्तम् । यदपीति । यद्यप्यकारणं फलानुसन्धानादिरूपकारणरहितं तथाऽपीत्यर्थ इति ॥ १२ ॥

अतो महाभाग भवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः ।
उरुक्रमस्याखिलबन्धमुक्तये समाधिनाऽनुस्मर यद्विचेष्टितम् ॥ १३ ॥

तात्पर्यम्— शुचिश्रवाः विष्णुः । समाधिना समाधिभाषया । स्मरणं ग्रन्थकृतिः । स्मरन्ति चेत्यादेः ॥ १३ ॥

प्रकाशिका— एवं हरिभक्तेरावश्यकत्वात्तज्जननाय हरिमाहात्म्यप्रतिपादकमेव ग्रन्थं कुर्विति प्रार्थयते ॥ अत इति । अत्रामोघदृगित्यादिविशेषणचतुष्टयं ग्रन्थकर्तुर्व्यासस्याप्तत्वोपपादकम् । तत्र

शुचिश्रवा इत्यस्य शुचि शुद्धं श्रवो यश इति व्याख्यानेनास्य विशेषणस्याप्तत्वोपपादकता भवत्यतोऽत्र विवक्षितं तदर्थं दर्शयति ॥ शुचिश्रवा इति । रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवा इति तन्नामसु पाठादिति भावः । तथा च भवान्यतो विष्णुरतस्त्वयि करणापाटवादिकं सम्भावयितुमपिनाप्त-त्वोपपादकता प्राप्तेति भावः । समाधिनेत्यस्य चित्तैकाग्र्येणेत्यन्यथा प्रतीतिवारणायार्थमाह ॥ समाधिनेति ॥ समाधिभाषया विष्णुमाहात्म्यप्रतिपादकेन वाक्येन । उक्तो यो महिमा विष्णोः स तूक्तो हि समाधिनेति वचनात् । तथा च भारतवद्दर्शनगुह्यभाषेऽप्यत्र न निवेशनीये इति भावः । अनुस्मरेत्यत्र स्मृतिविषयं कुर्वित्यन्यथाप्रतीतिवारणाय प्रकृत्यर्थं दर्शयति ॥ स्मरणमिति । स्मरते ग्रन्थे प्रयोगं दर्शयति ॥ स्मरन्ति चेति । ग्रन्थं कुर्वन्तीत्यर्थः । आदि पदेन न चस्मार्त-मतद्धर्माभिलापादित्यादेर्ग्रहणम् ॥ ततश्चायं श्लोकार्थः ॥ यत एवं हरिभक्तिरावश्यक्यतस्तज्जननाय हे महाभाग अपरिमितैश्वर्यादिसम्पन्न । अनेन धनाद्याशयेन न त्वमसत्यवचन इति सूचयति । अमोघ-दृगबाधितज्ञानः अनेन विवक्षितार्थतत्त्वज्ञानमुक्तम् । शुचिश्रवा इत्यनेन विष्णुत्वोक्त्या प्रमादाप-टुकरणत्वादिदोषराहित्यम् । सत्ये यथा दृष्टार्थवचने रत इत्यनेनाविप्रलम्भकत्वम् । धृतं मुक्तिसाधनोपदेशकरणरूपं व्रतं येन सा तथेत्यनेन विवक्षा दर्शितेति ज्ञातव्यम् । उरुक्रमस्या-परिमितपराक्रमस्य विष्णोर्यद्विचेष्टितं विविधं चेष्टितं लीलामुद्दिश्याखिलानां सज्जनानां बन्धमोक्षाय समाधिना समाधिभाषयैव न पुनर्गुह्यदर्शनभाषाभ्यां अनुस्मर मन्दाधिकारियोग्यतामनुस्मृत्य ग्रन्थं कुर्विति ॥ १३ ॥

अतोऽन्यथा किञ्चन यद्विवक्षितं पृथग्दृशस्तत्कृतरूपनामभिः ।
न कर्हिचित्क्वापि च दुःस्थितामतिर्लभेत वाताहतनौरिवास्पदम् ॥ १४ ॥

प्रकाशिका— ननु मन्दाधिकारिमोक्षार्थं भगवद्विचेष्टितं न मया वर्णनीयम् । तेषां मोक्षाय कपिलकणादाद्युक्तपदार्थस्वरूपज्ञानेनैव सम्भवादित्यत आह ॥ अतोऽन्यथेति । अतो भगवद्विचेष्टितादन्यथा प्रकारान्तरं यत्किञ्चिन प्रधानादिकं विवक्षितं तत्तद्वादिनाम् । मोक्षसाधनत्वेनेति शेषः । तत्कृतरूपनामभिस्तेषु प्रधानादिषु कृतानि कथितानि यानि रूपाणि त्रिगुणत्वगुणाश्रयत्वादिलक्षणानि प्रधानं द्रव्यगुणकर्मसामान्यविशेष- समवायादीनीति नामानि तैः पृथग्दृशो मोक्षसाधनेषु पृथग्ज्ञानिनोऽधिकारिणो मतिर्बुद्धिर्दुस्थिता चञ्चला सती कर्हिचित्कदाऽपि क्वापि विषये आस्पदं दार्ढ्येनावस्थानं न लभेत । केव । यथा समुद्रे वाता हता नौरास्पदं न लभते तथैव । सत्यं वाद्यन्तरोक्तानि मोक्षसाधनानीति । तथाऽपि परस्परविरुद्धनामरूपवत्तया कथितानां तेषां दर्शनेनाधिकारिणः संशय एव स्यान्न निश्चय इति भावः । यद्यपीदं न तद्वचश्चित्रपदमित्यादिनैव

दूषितं तथाऽप्यैहिकश्रेयः साधन प्रतिपादकं साहित्यादिशास्त्रमेव तत्र दूषितं नामुष्मिकश्रेयः साधन-प्रतिपादकमिति मन्वानस्य शङ्काऽत्र निराकृतेति ज्ञातव्यम् । अत एव तत्र चित्रपदमिति वायसमिति चोक्तम् । न च न्यायसाम्यादिदमपि तत्रैव दूषितप्रायम् । कपिलकणादीनामृषित्वेन नारद तुल्यानां वचनेष्वनाश्वासकारणाभावादित्यभिप्रायात् । अत एव संशयः स्यान्न निश्चय इत्येवोत्तरमुक्तम् ॥१४॥

जुगुप्सितं धर्मकृतेऽनुशासनं स्वभावरक्तस्य महान् व्यतिक्रमः ।
यद्वाक्यतो धर्म इतीतरस्थितो न मन्यते तस्य निवारणं जनः ॥ १५ ॥

तात्पर्यम्— **प्रवृत्तिधर्मकृते ॥ १५ ॥**

प्रकाशिका— ननु विषयासक्तान्मन्दान्प्राति काम्यधर्मा एव प्रतिपादनीयास्तेषां तत्राकाङ्क्षा-सद्भावान्न मोक्षसाधनम् । विरक्तानां प्रति वाणिज्योपदेशवदनाकाङ्क्षितत्वादित्यत आह ॥ जुगुप्सित-मिति । अत्र धर्म शब्देन निवृत्तिधर्मस्यापि ग्रहणे तदनुशासनस्य जुगुप्सितत्वोक्तेरसम्भवादित्यत आह ॥ प्रवृत्तिधर्मकृत इति । तथा च स्वभाव एवान्योपदेशमनपेक्ष्यैव काम्यविषयेषु रक्तस्यासक्त-स्याधिका कारिणः प्रवृत्तिधर्मकृते प्रवृत्तिधर्मज्ञापनायानुशासनं शास्त्रकरणं भवादृशस्य कृपालोर्जु-गुप्सितं निन्दितम् । प्रत्युत तन्निवारणमेव त्वया कर्तव्यमिति भावः । कुत इत्यत आह ॥ यद्वाक्यत इति । यस्य भवादृशस्य श्रेष्ठस्य वाक्यतो वचनात्प्रतीत एव धर्मो मुख्यपुरुषार्थहेतुरिति य इतरो जनोऽधिकारस्थितो विश्वस्तस्य जनस्य कुमार्गे प्रवर्तमानस्य निवारणं स न मन्यते चेत्तस्य श्रेष्ठस्य महान्व्यतिक्रमोऽन्यायो यतोऽतो जुगुप्सितमिति सम्बन्धः । कुमार्गे सक्ताः स्वस्मिन्विश्व-स्ताश्चेत्तस्मात्ते वारणीया एव न पुनः प्रवर्तनीया इति कृपालोर्धर्म एवेति भावः ॥ १५ ॥

विचक्षणोऽस्यार्हति वेदितुं विभोरनन्तपारस्य निवृत्तितः सुखम् ।
प्रवर्तमानस्य गुणैरनात्मनस्ततो भवान्दर्शय चेष्टितं विभोः ॥ १६ ॥

तात्पर्यम्— **अनन्तपारस्य विभोः सकाशाद्यत्सुखम् ॥ १६ ॥**

प्रकाशिका— ननु कपिलकणादादिवचनेष्विव न मद्वचनेऽपि मन्दाधिकारिणां विश्वासोऽतो न मया हरिचेष्टितप्रतिपादकग्रन्थनिर्माणं तदर्थं कार्यमित्यत आह ॥ विचक्षण इति । अत्रानन्तपारस्य हरेः सुखं वेदितुं स्वपुरुषार्थतया ज्ञातुमर्हतीत्यन्यथाप्रतीतिवारणाय योजनां दर्शयति ॥ अनन्तपारस्य विभोः सकाशादिति । तथा च सकाशादित्यध्याहरेण योज्यमिति भावः । अत्र विभोरित्यस्य पश्चात्कीर्तनं विशेष्यत्वज्ञापनाय । विश्वभृग्विश्वसृग्विभुरिति भगवन्नामसु पाठात् ॥ ततश्चायं श्लोकार्थः ॥ मन्दाधिकारिष्वपि यो विचक्षणो निपुणः समयपादोक्तन्यायैः कपिलादीनां

निश्चितानाप्तत्वोऽमोघधृकू । शुचिश्रवा इत्युक्तरीत्या भगवतो निश्चिताप्तत्वधेति यावत् । अनात्मनोऽविजितमनसो गुणैर्विषयैर्निमित्तैः प्रवर्तमानस्याधिकारिणो निवृत्तितो विषयवैराग्यात् । भगवन्माहात्म्यश्रवणादेरुपलक्षणमेतत् । विभोर्गुणतो व्याप्तस्यानन्तपारस्य नान्तः कालतः पारं च देशतो यस्य तस्य हरेः सकाशात् । तत्प्रसादादिति यावत् । यत्सुखं मोक्षाख्यं भविष्यति तद्वेदितुं पुरुषार्थतया निश्चेतुमर्हति । त्वद्ग्रन्थादिति शेषः । ततो भगवान्पूज्यः । त्वमिति शेषः । विभोर्देशतः कालतो गुणतश्च व्याप्तस्य हरेश्चेष्टितं लीलां दर्शयत तत्प्रतिपादकं ग्रन्थं कुर्विति ॥ १६ ॥

त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि ।
यत्र क्व वा भद्रमभूदमुष्य को वार्थ आप्तो भजतां स्वधर्मम् ॥ १७ ॥

प्रकाशिका— ननु हरिभक्तिजननाय हरिमाहात्म्यप्रतिपादके ग्रन्थे मया कृते सति तदभ्यासिनां हरावेव स्निग्धानां नित्यनैमित्तिकादिधर्मसङ्कोचः प्राप्नोति । तेन चानर्थप्राप्तिरित्यतो हरिभजतां स्वधर्मसङ्कोचः प्राप्तोऽप्यकिञ्चित्कर इति भावेन भक्तेः फलाव्यभिचारं दर्शयति ॥ त्यक्त्वेति । सङ्कुच्येत्यर्थः । अपक्वो भक्तिपरिपाकशून्यस्ततो भजनाद्यदि पतेत् । अन्तरायविहतः सन् स्खलेन्म्रियेत वा तर्हि यत्र क्व वा जन्मन्यमुष्यभक्तिरासक्तस्य भद्रमभूद्भद्रमेव भविष्यति । एष्यत्तुन्निश्चितं यत्तु तदतीतत्वेन भण्यत इति वचनात् । न तु स्वधर्मसङ्कोचनिमित्तोऽनर्थः । क्षिप्रं भवति धर्मात्मा तत्र बुद्धिसंयोगं लभ्यते । पौर्वदेहिकमित्यादिप्रमाणात् । नन्वेवं भक्तिं विना स्वधर्ममेव कुर्वतामन्तरायप्राप्तावपि जन्मान्तरे फलसम्भवात्साम्यमेवेत्यत उक्तम् ॥ को वेति । अभजतां भक्तिमकुर्वताम् । स्वधर्मं भजतामित्यपि छेदः । तथा च हरिभक्तिं सङ्कुच्य स्वधर्ममेव सम्यग्भजतां कुर्वताम् । कर्तरि षष्ठी । अन्तरायप्राप्तौ को वाऽर्थ आप्तः प्राप्तो न कोऽपि । अतो न साम्यमिति भावः ॥ १७ ॥

तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः ।
तल्लभ्यते(ऽ)दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा ॥ १८ ॥

प्रकाशिका— नन्वेवं हरिमेव भजतां लौकिकयत्नेष्वपि सङ्कोचः प्राप्तः । ततश्च विषयनिमित्तसुखप्राप्तौ शरीरावस्थानमेव न स्यादित्यत आह ॥ तस्यैवेति । उपरि स्वर्गादौ । अधो नरकादौ भ्रमतां किमिति कर्तरि षष्ठी । यन्मोक्षसुखमुपर्यधो भ्रमद्भिर्न लभ्यते तस्यैव हेतोस्तदर्थमेव प्रयतेत प्रकर्षेण यत्नं कुर्यात् । तु शब्दस्तुच्छनश्वरत्वादिविशेषद्योतकः । तत्सुखं विषयसुखमन्यतो यत्नाभावेऽपि प्राचीनकर्मणा गभीररंहसाऽज्ञातवेगेन कालनामकहरिणा दुःखवत्सर्वत्र नरकादावपि लभ्यते । अतो न तदर्थमत्यन्तं यत्नः कार्य इत्यर्थः । यथाऽऽहुः अप्रार्थितानि दुःखानि यथैवायान्ति देहिनाम् । सुखान्यपि तथा मन्ये दैव्यमत्रातिरिच्यते इत्यादि ॥ १८ ॥

न वै जनो जातु कथञ्चन व्रजेन्मुकुन्दसेव्यन्यवदङ्गसंसृतिम् ।
स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रही जनः ॥ १९ ॥

प्रकाशिका— यत्र क्व वा भद्रमभूदमुष्येत्युक्तार्थपरिपाकेनापरोक्षज्ञानत्वमेवोपपादयति ॥ न वा इति । हे अङ्ग । परमप्रेमास्पदमुकुन्दसेवी हरिभक्त्यादिरूपयोगानुष्ठाता जनः । अन्यवन्मुकुन्दा-सेविजनवदिति व्यतिरेकदृष्टान्तः । जातु कदाचिदपि कथञ्चन केनापि निमित्तेन संसृतिं देहपरम्परां नाव्रजेन्न प्राप्नुयात् । योगसाधनोपयुक्तदेहपरम्परामेव प्राप्नोतीत्याशयः । वै शब्देन "न हि कल्याण-कृत्कश्चिद्दुर्गतिं तात गच्छति । शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायत" इत्यादिप्रमाणप्रसिद्धिं दर्शयति । तत्र किं विषयाभिलाषेण हरिध्यानादिरूपं योगं विजहाति नेत्याह ॥ स्मरन्निति । पूर्वा-भ्यासपाटवेन मुकुन्दांघ्रयोरूपगूहनं मनसाऽऽलिङ्गनम् ध्यानमिति यावत् । स्मरन्पुरुषार्थहेतुतया कर्तव्यमिति जानन्पुनस्तुच्छविषयेषु प्राप्तेष्वपि न तद्विहातुमिच्छेत् । तदेव कर्तुं पुनर्यतत इति भावः । यतोऽयं जनो रसग्रही सारग्रही । तदुक्तम् । "यतते च ततो भूयः संसिद्धौ कुरुनन्दन । पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि स इति । ननूपमर्दं चेदित्यत्र ज्ञानिनामनिष्ठप्रारब्धस्योपमर्दो भवतीत्यत्र संमतित्वेनायं श्लोकष्टीकाकारैरुदाहृतस्तत्कथमपक्वविषयतया व्याख्यानमिति चेत् । यदेवमपक्वानां भद्रं भवति तदा भक्त्यादि परिपाकवतां ज्ञानिनां भद्रं भविष्यतीति किं वाच्यमिति कैमुत्यस्यात्राभि-प्रेतत्वेनाविरोधात् ॥ १९ ॥

इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसंभवः ।
तद्धि स्वयं वेद भवांस्तथापि प्रादेशमात्रं भवतः प्रदर्शितम् ॥ २० ॥

तात्पर्यम्— इतरोऽपि भगवान्विश्वमिव । स्वातन्त्र्यात् ॥ २० ॥

प्रकाशिका— करिष्यमाणे ग्रन्थे इदं प्रमेयमेवमवश्यं प्रतिपादनीयमित्याशयेनाह ॥ इदं हीति । अत्रेदं विश्वं भगवानितर इव यः स जीवोऽपि भगवानिति व्याख्यानमसदिति भावेन सम्यग्व्याख्याति ॥ इतरोऽपीति । वस्तुतो जगतो भिन्नोऽपीत्यर्थः । विश्वमिव विश्वाभेदेनेवोच्यते । सर्वं खल्विदमित्यादौ न तु वास्तवाभेदेन तत्र किं निमित्तमित्यत आह ॥ स्वातन्त्र्यादिति । विश्वसत्तादि-प्रदत्वादित्यर्थः । वास्तवाभेदनिमित्तकमेव तद्वचनं किं न स्यादित्यत उक्तम् ॥ इतरोऽपीति । अनेनापिशब्दो मूलेऽध्याहार्य इति सूचयति । इतरत्वमेव कुत इत्यत उक्तम् मूले यत इति । जगतः स्थानं स्थितिर्निरोधो नाशः सम्भव उत्पत्तिः । एते यस्माद्भवन्ति स भगवांस्तथोक्तः । तत इतरोऽपीति सम्बन्धः । तत्सर्वंखल्विदं ब्रह्मेत्यादेरुक्ततात्पर्यं भगवान्यद्यपि स्वयं स्वयमेव वेद । न

तत्र तव परोपदेशापेक्षेति भावः । तथाऽपि भगवतः प्रति प्रादेशमात्रमल्पमात्रं लोकशिक्षणायैव मया प्रदर्शितम् । भगवान्स्वत एव सर्वज्ञो मया तु लोकसङ्ग्रहाय दिङ्मात्रं प्रदर्शितम् । अतो जीवजडात्मकप्रपञ्चादत्यन्तविलक्षणस्य हरेर्जीवजडाभेदवचनं जीवजडसत्तादिप्रदत्वाभिधायकमेव न वास्तवाभेदप्रतिपादकमिति वर्णयेत्याशयः ॥ २० ॥

त्वमात्मनाऽऽत्मानमवैह्यमोघदृक् परस्य पुंसः परमात्मनः कलाम् ।
अजं प्रजातं जगतः शिवाय तन्महानुभावाभ्युदयोऽपि गण्यताम् ॥ २१ ॥

प्रकाशिका— भगवदवतारत्वात्तव न भगवद्विषयज्ञानेऽस्मदाद्युपदेशापेक्षेति सूचयन् भगवन्माहात्म्यमपि वर्णयेति विज्ञापयति ॥ त्वमिति । हे अमोघदृक् अबाधितज्ञान । त्वमजमात्मनं परमात्मनः क्षराक्षरोत्तमदेहस्यात एव परस्य लोकविलक्षणस्य पुंसः कलामंशभूतं जगतः सज्जनस्य शिवाय मोक्षादि पुरुषार्थसाधनप्रदर्शनाय प्रजातं शुक्लशोणितसम्बन्धराहित्यलक्षणेन प्रकर्षेणावतीर्णमात्मना स्वयमेवावैहि । लोट् लङर्थे । जानासि । अतस्तवात्रास्मदाद्युपदेशः नापेक्षित इति शेषः । तत्तस्माल्लोकहितार्थमवतीर्णत्वात् । महानुभावस्यापरिमितसामर्थ्यवतो हरेरभ्युदयः पराक्रमोऽपि न केवलं पूर्वोक्तं गण्यतां कथ्यताम् । अधिगण्यतामिति पाठे अधि आधिक्येन प्राधान्येनेत्यर्थः ॥२१॥

इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धदत्तयोः ।
अविप्लुतोऽर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनम् ॥ २२ ॥

प्रकाशिका— भगवन्माहात्म्यवर्णनात्कथं जगतः शिवं स्यादित्यत आह ॥ इदं हीति । श्रुतस्येत्यादौ भावे निष्ठा इदमेव हि तपः कायक्लेशलक्षणम् । श्रुतं श्रवणं स्विष्टमुत्तमकल्पतया यजनम् । सूक्तमध्ययनम् । बुद्धं बोधो दत्तं दानम् । तथा च त्वया हरिगुणानुवर्णनेकृते सद्भ्यस्तच्छ्राविणां तप आदिकमपरोक्षज्ञानद्वारा नित्यफलजनकं भविष्यतीति भावः ॥ २२ ॥

अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनाम् ।
निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षताम् ॥ २३ ॥

प्रकाशिका— सद्भ्यो हरिमात्म्यश्राविणां फलं भवतीत्यत्राहमेव दृष्टान्त इत्याशयेन स्ववृत्तान्तं कथयति ॥ अहं पुरेति । पुरा पूर्वब्रह्मकल्पेऽतीतभवे पूर्वजन्मनि वेदवादिनां दास्याः सकाशादभवं जातोऽस्मि । तु शब्द इतरदासीवैलक्षण्यद्योतकः । निरूपितो निरुक्तो योगिनां संन्यासिनां शुश्रूषणे । प्रावृषि । उपलक्षणमेतत् । शरदि च । चातुर्मास्य इति यावत । निर्विविक्षितां निर्वेशमेकत्र वासं कर्तुमिच्छताम् ॥ २३ ॥

ते मय्यपेताखिलचापलेऽर्भके दान्ते यतक्रीडनकेऽनुवर्तिनि ।
चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि ॥ २४ ॥

अपेतान्यखिलानि-चापलानि-चञ्चलस्वभावानि यस्मिंतस्तस्मिन् । दान्ते जिह्वेन्द्रियनिग्रहवति । अत एव यतःक्तक्रीडनके इत्यक्तक्रीडासाधने । अनुवर्तिन्यनुकूले । अल्पभाषिणी मितवचने । अल्प-धारिणीति पाठे बालशरीरधारिणीत्यर्थः । कथं भूता योगिनः । तुल्यं मित्रारिपक्षयोः समं दर्शनं येषां ते यथा ॥ २४ ॥

उच्छिष्टलेपाननुमोदितौ द्विजैः सकृच्च भुञ्जे तदपास्तकिल्बिषः ।
एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवाभिरुचिः प्रजायते ॥ २५ ॥

प्रकाशिका— तदा स्वशरीरयात्राप्रकारमाह ॥ उच्छिष्टेति । उच्छिष्टलेपान् लिप्यन्त इति लेपा उच्छिष्टपात्रलग्नानीत्यर्थः । अन्नादीनीति शेषः । तैर्द्विजैः संन्यासिभिरनुमोदितोऽनुज्ञातः सन् । अनुज्ञाभावे शूद्रस्य द्विजोच्छिष्टभोजनमसम्भावितमित्याशयः । च शब्द एवार्थे । यतयः सकृदेव भुञ्जते तथाऽहमपि सकृदेव भुञ्जे । तेन सकृदेवोच्छिष्टभोजनेनापास्तं निरस्तं किल्विषं पापं यस्य स तथा जातोऽस्मीति शेषः । फलान्तरं चाह ॥ एवमिति । तत्तद्धर्म एव तेषां संन्यासिनां धर्म एव वैराग्यभगवत्कथाश्रवणाद्यभ्यासरूपधर्म एवाभिरुचिरुत्कण्ठा प्रजायते प्रकर्षेण जाता । इदानीमपि महात्मनामुच्छिष्टभोजनादिनैतत्फलं भवतीति प्रदर्शनाय लट् प्रयोगः ॥ २५ ॥

तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाश्रुणवं मनोहराः ।
ताः श्रद्धया मेऽनुसवं विश्रुण्वतः प्रियश्रवस्यङ्ग तदाऽभवन्मतिः ॥ २६ ॥

प्रकाशिका— अभिरुच्याऽपि किं जातमित्यत आह ॥ तत्रेति । तत्र तेषां सकाशे प्रगायतां कीर्तयताम् परमहंसानामनुग्रहेणाऽऽज्ञालक्षणेनाश्रृणवं श्रुतवानस्मि । अनुसवं त्रिसन्ध्यम् । प्रियं श्रवो यशो यस्य तस्मिन्हरौ तदा तस्मिन्काले मतिर्ज्ञानं हरिमाहात्म्यज्ञानमभवदित्यर्थः ॥ २६ ॥

तस्मिंस्तदा लब्धरुचेर्महामते ! प्रियश्रवस्यस्खलिता मतिर्मम ।
ययाहमेतत्सदसत्स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे ॥ २७ ॥

तात्पर्यम्— मयि स्थिते ब्रह्मणि स्थीयतामत्रेतीश्वरेच्छया परिकल्पितम् ॥ २७ ॥

प्रकाशिका— तां मतिमेव विशिनष्टि ॥ तस्मिंस्तदेति । अस्खलिताऽप्रतिहता । अभवदित्यनु-षज्जते । द्वितीयार्धे मयि ब्रह्मणि मदात्मके ब्रह्मणि । स्वमायया स्वाविद्यया । कल्पितमारोपितमेतत् जगत्पश्य इत्यन्यथाप्रतीतिवारणाय स्थित इत्यध्याहृत्य योजनां दर्शयति ॥ मयि स्थित इति ।

स्वमाययेत्यस्य तात्पर्यम् ॥ ईश्वरेच्छयेति । अत्र ब्रह्मणि । तदाश्रितत्वेनेति यावत् । स्थीयतां स्थितिः क्रियताम् । इति शब्दः प्रकारवचनः । तथा चैवं प्रकारया स्वेच्छयेत्यर्थः । कल्पितं समर्पितम् । स्थापितमिति यावत् । अन्यथाप्रतीतिस्तु उक्तवक्ष्यमाणप्रमाणविरुद्धत्वादुपेक्षणीया ॥ ततश्चायमर्थः । ययाऽस्खलितया मत्याऽहं सदसत्कार्यकारणात्मकमेतज्जगन्मयि स्थिते सन्नियामके मयि ब्रह्मणि स्वमायया स्वेच्छयेदमत्र तिष्ठत्विति स्वेच्छया कल्पितं स्थापितं पश्ये विषयीकरोमि । तेषां सेवादिना मन्नियामके ब्रह्मणीदमत्र सुखेन तिष्ठत्विति स्वेच्छयैवाखिलं जगत्स्थापितमित्यर्थविषयाऽचला मतिर्मम जातेत्याशयः ॥ २७ ॥

इत्थं शरत्प्रावृषिकावृतू हरेर्विश्रुण्वतो मेऽनुसवं यशोऽमलम् ।
सङ्कीर्त्यमानं मुनिभिर्महात्मभिर्भक्तिः प्रवृत्ताऽऽत्मरजस्तमोपहा ॥ २८ ॥

प्रकाशिका— एवं माहात्म्यज्ञानेन सुदृढस्नेहोऽपि मम तत्र जात इत्याह ॥ इत्थमिति । शरत्प्रावृषिकावृतू इति कालाध्वनोरत्यन्तसंयोग इति द्वितीया । भक्तिः सुदृढस्नेहः प्रवृत्ता प्रकर्षेण जाता । कथं भूता भक्तिः । आत्मनो मनसो रजो रागादिकं तमो निद्रादिकमपहन्तीत्यात्मरजस्तमोपहा ॥ २८ ॥

तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः ।
श्रद्दधानस्य बालस्य दान्तस्यानुचरस्य च ॥ २९ ॥

ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितम् ।
अन्ववोचन् गमिष्यन्तः कृपया दीनवत्सलाः ॥ ३० ॥

प्रकाशिका— गुरुप्रसादाभावे कथं श्रवणमात्रेणाभिमतज्ञानोदय इत्यत आह ॥ तस्यैवमिति । हतैनसो गतपापस्य ज्ञायतेऽनेनेति ज्ञानं शास्त्रं भवतोदितं भगवत्सम्प्रदायागतं गमिष्यन्तः । चातुर्मास्यसमाप्त्यनन्तरमिति शेषः । अन्ववोचन् समग्रानुग्रहपूर्वकमुपदिष्टवन्तः ॥ २९, ३० ॥

येनैवाहं भगवतो वासुदेवस्य वेधसः ।
मायानुभावमविदं येन गच्छन्ति तत्पदम् ॥ ३१ ॥

प्रकाशिका— तदुपदिष्टेन शास्त्रेण किं त्वया लब्धमित्यत आह ॥ येनैवेति । वेधसः सर्वजगत्कर्तुर्मायानुभावमिच्छासामर्थ्यम् । अविदं ज्ञातवानस्मि । येन ज्ञानेन तत्पदं हरिस्थानं गच्छन्ति । ज्ञानिन इति शेषः ॥ ३१ ॥

एतत्संसूचितं ब्रह्मन् तापत्रयचिकित्सितम् ।
यदीश्वरे भगवति कर्म ब्रह्मणि भावितम् ॥ ३२ ॥

प्रकाशिका— तर्हि कर्मकरणं व्यर्थमित्याशङ्कायां ज्ञानसाधनतया तदप्यावश्यकमित्याशयेन कर्मरहस्यमपि तैरुपदिष्टमित्याह ॥ एतदिति । यदीश्वरे भगवति ब्रह्मणि भावितं समर्पितं कर्म तत् । तापत्रयस्याध्यात्मिकादेश्चिकितं भेषजम् । संसारनिवर्तकमिति यावत् । इति शब्दोऽध्याहार्यः । इति तैः संसूचितमुपदिष्टमित्यर्थः ॥ ३२ ॥

आमयोऽयं च भूतानां जायते येन सुव्रत ।
तदेव ह्यामयद्रव्यं तत्पुनाति चिकित्सितम् ॥ ३३ ॥

प्रकाशिका— ननु संसारापादकस्य कर्मणः कथं निवर्तकत्वमित्याशङ्कायां सामग्रीभेदादुभयमपि तत्र घटत इति दृष्टान्तमुपपादयति ॥ आमय इति । च शब्दो यथेत्यर्थे । हे सुव्रत जगद्धितोपदेशादि-रूपशोभनव्रतोपेत । भूतानां प्राणिनां येन घृतादिना द्रव्येणायं प्रसिद्ध आमयो रोगो जायते । तदेवा-मयकरं द्रव्यं तत्तं रोगं चिकित्सितम् । द्रव्यान्तरसंयोगादिचौषधीकृतं सत्पुनाति परिहरति ॥३३॥

एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः ।
त एवात्मविनाशाय कल्पन्ते कल्पिताः परे ॥ ३४ ॥

प्रकाशिका— हीत्यस्यार्थस्यानुभवसिद्धतामाह ॥ एवमिति । एवं नृणामधिकारिणां क्रियायोग नित्यनैमित्तिकादिकर्मलक्षणोपायाः । कामादियुक्ताः संसृतिहेतव आत्मविनाशायात्मनो लिङ्गदेहस्य विनाशाय कल्पन्ते समर्था भवन्ति । कथं भूताः । परे ब्रह्मणि कल्पिताः । समर्पिता इति यावत् ॥ ३४ ॥

यदत्र क्रियते कर्म भगवत्परितोषणम् ।
ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम् ॥ ३५ ॥

प्रकाशिका— ब्रह्मण्यर्पिताः क्रियायोगाः किं साक्षादेवात्मविनाशका नेत्याह ॥ यदत्रेति । अत्र कर्मभूमौ भगवतः परितोषणं तुष्टिर्यस्मात्तत्तथा । भगवदर्पणेन तत्प्रीतिजनकमिति यावत् । यत्कर्म क्रियतेऽधिकारिणा भक्तियोगसमन्वितं यज्ज्ञानं परोक्षं तत्तदधीनम् । अन्तःकरणशुद्धिद्वारा तज्जन्यं हि यस्मात्तस्मादात्मविनाशाय कल्प्यन्तत्यन्वयः ॥ ३५ ॥

कुर्वाणा यत्र कर्माणि भगवच्छिक्षयाऽसकृत् ।
गृणन्ति गुणनामानि कृष्णस्यानुस्मरन्ति च ॥ ३६ ॥

प्रकाशिका— उक्तरीत्या मोक्षजनकेषु कर्मसु भगवत्प्रीतिरेवोद्देशेत्यत्र ज्ञापकं शिष्टाचारं दर्शयति ॥ कुर्वाणा इति । यत्र यदा कर्माणि कुर्वाणा भवन्ति । तदेति शेषः । भगवच्छिक्षया । स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातु चिदिति । भगवच्छिक्षयाऽसकृदादिमध्यावसानेष्वव्यवधानेन वा गुणप्रतिपादकनामानि गृणंत्युच्चारयन्ति । यजमानादयः । अनुस्मरन्ति च । नामार्थभूतगुणानिति शेषः । यदि कर्मकरणकाले भगवत्प्रीतिस्तेषामुद्देश्या न स्यात्तर्हि तदा तन्नामोच्चारणादिकं तेषां न स्यात् । वर्ततेचैतत्सर्वमतो भगवत्प्रीतिस्तेषामुद्देश्येति ज्ञायत इति भावः ॥ ३६ ॥

ॐ नमो भगवते तुभ्यं वासुदेवाय धीमहि ।
प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ॥ ३७ ॥

प्रकाशिका— कानि गुणनामानि गृणन्तीत्यपेक्षायां तानि दर्शयन्हरिप्रीत्युद्देशकर्मणा । न भक्तिसहितपरोक्षज्ञानमेव भवति किं त्वपरोक्षमपि भवतीत्याह ॥ ॐ नम इति । धीमहीत्येकदेशग्रहणेन नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयादिति समग्रा विष्णुः गायत्री सङ्गृहीतेति ध्येयम् ॥ ३७ ॥

इति मूर्त्यभिधानेन मन्त्रमूर्तिममूर्तिकम् ।
यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान् ॥ ३८ ॥

प्रकाशिका— इति शब्दः प्रभृत्यर्थः । मूर्त्यभिधानेन वासुदेवादिमूर्तिप्रतिपादकमभिधानं नाम यस्मिन्मन्त्रजाते तेन मन्त्रमूर्तिं वासुदेवद्वादशाक्षरादिमन्त्रप्रतिपाद्यमूर्तिदेहो यस्य तं वासुदेवादिनामानममूर्तिकं जडदेहशून्यं यज्ञपुरुषमृत्विगादिनियामकतया यज्ञनामकं पुरुषं पूर्णषड्गुणं यः पुमान्यजमानो यजते स सम्यग्दर्शनः स्वयोग्यापरोक्षज्ञानी भवति ॥ ३८ ॥

इमं स्वधर्मनियममवेत्य मदनुष्ठितम् ।
अदान्मे ज्ञानमैश्वर्यं स्वस्मिन् भावं च केशवः ॥ ३९ ॥

प्रकाशिका— एवं निवृत्तकर्मणा ज्ञानभक्त्यादिकं भवतीत्यत्राप्यहमेव दृष्टान्त इत्याह ॥ इदमिति ऐश्वर्यमीश्वरविषयं ज्ञानं परोक्षमपरोक्षं च भावं भक्तिम् ॥ ३९ ॥

त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितम् ।
प्रख्याहि दुःखैर्मुहुरर्दितात्मनां सङ्क्लेषनिर्वाणमुशन्ति नान्यथा ॥ ४० ॥

इति पञ्चमोऽध्यायः ॥

तात्पर्यम्— त्वमीश्वरोऽपि ॥ ४० ॥ इति प्रथमतात्पर्ये पञ्चमोऽध्यायः ॥ ५ ॥

प्रकाशिका— भगवद्यशोवर्णनेन भवतामिवेश्वरस्य मम न प्राप्तव्यं प्रयोजनमस्त्यतस्तं न करोमी-त्यत आह ॥ तमपीति । अत्र त्वमपीत्यस्य विवक्षितमर्थं दर्शयति ॥ त्वमीश्वरोऽपीति । सर्वनाम्नां बुद्धिस्थवाचकत्वात् । व्यासस्येश्वरत्वं च नारदबुद्धिस्थम् । अत ईश्वरोऽपीति वक्तव्यत्वम-पीत्युक्तमित्यर्थः ॥ ततश्चायं मूलार्थः ॥ हे अदभ्रश्रुत अदभ्राणामनल्पानां श्रुतं श्रवणं यस्मात् । उत्तमाधिकारिषु कृतोपकारीति यावत् । त्वमपीश्वरोऽपि । अवाप्तव्यशून्योऽपीति यावत् । विभो देशतः कालतो गुणतश्च व्याप्तस्य हरेर्विश्रुतं वेदादिप्रसिद्धम् । यश इति शेषः । कथं भूतं यशः । दुःखैर्मुहुरर्दितमनसां विदां मन्दाधिकारिणां बुभुत्सितं बोधमिष्टं येन ग्रन्थेन समाप्यते सम्यग्ज्ञायते । तैरिति शेषः । तं ग्रन्थं प्रख्याहि लोकानां दुःखशांत्यर्थं कृपयैव कृत्वा व्याचक्षेत्यर्थः । अकरणे बाधकमाह ॥ संक्लेशेति । अन्यथा तादृशग्रन्थकरणाभावे । मन्दाधिकारिजन इति शेषः । तव प्रयोजनाभावेऽपि मन्दाधिकारिकृपयैवान्यं हरिमाहात्म्यप्रतिपादकं ग्रन्थं कुर्वित्याशयः ॥ ४० ॥ इति श्रीभागवतटिप्पण्यां पञ्चमोऽध्यायः ॥ १-५ ॥

अथ षष्ठोऽध्यायः

सूत उवाच–
एवं निशम्य भगवान् देवर्षेर्जन्म कर्म च ।
भूयः पप्रच्छ तं ब्रह्मन् व्यासः सत्यवतीसुतः ॥ १ ॥

व्यास उवाच–
भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिस्तव ।
वर्तमानो वयस्याद्ये ततः किमकरोद्भवान् ॥ २ ॥

स्वायम्भुव कया वृत्या वर्तितं ते परं वयः ।
कथं वेदमुदस्राक्षीः काले प्राप्ते कलेवरम् ॥ ३ ॥

प्रकाशिका— हरिमाहात्म्यश्रवणेन निवृत्तकर्मानुष्ठानेन चान्तःकरणशुद्धिद्वारा हरिभक्तिसहितं ज्ञानं परोक्षमपरोक्षं च जायत इत्यत्राहमेव दृष्टान्त इति दर्शनाय नारदेन स्ववृत्तान्तकथनमुपक्रान्तं तत्पूर्वाध्याये सम्यङ्नप्रदर्शितमतस्तदीयमपरोक्षज्ञानोत्पत्तिप्रकारं लोकानामनुष्ठानाय तन्मुखेनैव ज्ञापयितुं सर्वज्ञोऽपि कृष्णस्तद्वयःशेषवृत्तिं पृच्छति ॥ भिक्षुभिरिति । भिक्षुभिः संन्यासिभिर्विप्रवसिते देशान्तरं गते सति आद्ये वयसि बाल्यावस्थायाम् । एतदेव विविच्य पृच्छति ॥ स्वायम्भुवेति । स्वायम्भुवो ब्रह्मणः पुत्रः परं वय उपदेशोत्तरमायुः । तेत्वया वर्तितं नीतम् । इदं दासीपुत्रभूतम् । उदस्राक्षीरुत्सृष्टवानसि ॥ १, ३ ॥

प्राक्कल्पविषयामेतां स्मृतिं ते सुरसत्तम ।
नह्येव व्यवधात्काल एष सर्वनिराकृतिः ॥ ४ ॥

प्रकाशिका— पूर्वजन्मानुभूतमिदानीमुच्यते तत्कथं तव घटत इत्याशयेन पृच्छति ॥ प्राक् कल्पेति । नैव व्यधात्कथं न तिरोहितामकरोत् । हिं यस्मादेषः कालः कल्पान्तररूपः सर्वेषां पूर्वजन्मसंज्ञादीनां निराकृतिर्नाशो यस्मात्स तथा ॥ ४ ॥

नारद उवाच–
भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम ।
वर्तमानो वयस्याद्ये तत एतदकारषम् ॥ ५ ॥

प्रकाशिका— कार्षमिति पाठे न वैकेनाक्षरेणेति वचनादक्षरस्य शून्यत्वेऽपि न दोषः ॥ ५ ॥

एकात्मजा मे जननी योषिन्मूढा च किङ्करी ।
मय्यात्मजेऽनन्यगतौ चक्रे स्नेहानुबन्धनम् ॥ ६ ॥

प्रकाशिका— स्वस्य संन्यासिभिः सह गमनाभावे कारणमाह ॥ एकात्मजेति । अहमेक एवात्मजो यस्याः सा तथा । योषितां मध्ये मूढा विवेकज्ञानशून्या किङ्करी दासी च । एतानि विशेषणानि सा परित्यागयोग्या न भवतीति सूचनाय अत्रैव हेत्वन्तरमाह ॥ मय्यात्मज इति । न विद्यतेऽन्यागतिराश्रयो यस्य स तथा तस्मिन् ॥ ६ ॥

साऽस्वतन्त्रा न कल्पासीद्योगक्षेमं ममेच्छती ।
ईशस्य हि वशे लोको योषा दारुमयी यथा ॥ ७ ॥

प्रकाशिका— केवलं स्नेहमेव करोति । न त्वशनवसनादिदानसमर्था इत्याह ।। साऽस्वतन्त्रेति । अस्वतन्त्रा पराधीना । न कल्पा न समर्था । योगक्षेमकरण इति शेषः । योगेन सहितं क्षेमम् । योगोऽप्राप्तस्यप्राप्तिः । क्षेमं प्राप्तपरिरक्षणम् । ननु कुतस्त्वज्जनन्याः पराधीनत्वमित्यत आह ।। ईशस्येति । ईशस्य कर्मानुसारेण प्रेरकस्य वशेतिष्ठतीत्यर्थः । हि यस्मात्तस्मादस्वतन्त्राऽऽसीदित्यन्वयः ।। ७ ।।

अहं च तद्ब्रह्मकुल ऊषिवांस्तदपेक्षया ।
दिग्देशकालाव्युत्पन्नो बालकः पञ्चहायनः ।। ८ ।।

प्रकाशिका— अहं चाहमपि ब्रह्मकुले ब्राह्मणगृहे ऊषिवान्वासंकृतवान् । तदपेक्षया मात्रापेक्षया । तत्रैव स्वस्य वासे हेत्वन्तरमाह ।। दिग्गिति । दिगाद्यनभिज्ञे कारणामाह ।। बालक इति । न जातमात्रमित्याह ।। पञ्चेति । पञ्चवर्षः ।। ८ ।।

एकदा निर्गतां गेहाद्दुहन्तीं निशि गां पथि ।
सर्पोऽदशत्पदा स्पृष्टः कृपणां कालचोदितः ।। ९ ।।

प्रकाशिका— इदानीं स्वनिर्गमनकारणं वक्तुमाह ।। एकदेति । गां दुहतीं हि हेतौ । शत्र प्रत्ययः। दोग्धुं निर्गतामित्यर्थः । पदा पादेन । आस्पृष्ट ईषदाक्रान्तः । अदशदखादत् । कालनामकेन संहारकर्त्रा हरिणा प्रेरितः ।। ९ ।।

तदा तदहमीशस्य भक्तानां समभीप्सितम् ।
अनुग्रहं मन्यमानः प्रातिष्ठं दिशमुत्तराम् ।। १० ।।

प्रकाशिका— तन्मातुर्मरणम् । प्रातिष्ठं प्रस्थितोऽस्मि ।। १० ।।

स्फीतान् जनपदास्तत्र पुरग्राम व्रजाकरान् ।
खेटान् पट्टनवाटीश्च वनान्युपवनानि च ।। ११ ।।

तात्पर्यम्— मृगयाजीविनां खेटो वाटी पुष्पोपजीविनाम् । ग्रामो बहुजनाकीर्णो राजराजाश्रयं पुरम् । जलस्थलमतिस्फीतं पत्तनं कीर्त्यते बुधैरि'ति स्कान्दे ।। ११ ।।

प्रकाशिका— स्फीतान्समृद्धान् जनपदादीन् । अतियातोऽतीत्य आतः सन् महद्विपिनमद्राक्षमिति वक्ष्यमाणेनान्वयः । जनपदादिषु नानागुणदोषयुक्तेषु दृष्टेष्वपि न मम चित्तविकारः कोऽपि

जात इति प्रदर्शनायेदमुक्तमिति ज्ञातव्यम् । जनपदान्देशान् । अत्र पुरग्रामखेटपट्टणणवाटीशब्दानामर्थान्प्रमाणेनैव दर्शयति ॥ मृगयेति । मृगयया मृगादिहिंसारूपया जीवंत्यस्मिन्निति मृगया जीविनः । व्याधाद्यधिष्ठितदेशः खेट शब्दवाच्य इत्यर्थः । एवं पुष्पैरुपजीवन्ति । यस्मिन्निति यत्र सा पुष्पोपजीवनाभूमिर्वाटी शब्दवाच्येत्यर्थः । उभयत्रापि जीवनमिति पाठे स्थानमिति शेषः । जले स्थले वाऽऽयतिर्विस्तारो यस्य तज्जलस्थलायति । स्फीतं समृद्धम् । जलदुर्गं स्थलदुर्गं वा पट्टनमित्यर्थः । व्रजोगोगोपानामावासदेशः । आकरो रत्नाद्युत्पत्तिस्थानम् । स्वतो विवृद्धवृक्षसमुदायो वनम् । आरोपितवृक्षसमुदायमुपवनम् ॥ ११ ॥

विचित्रधातुचित्राद्रीनिभभग्नभुजद्रुमान् ।
जलाशयांश्छिवजलान्नलिनीः सुरसेविताः ॥ १२ ॥

चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः ।
चलवेणुशरस्तम्भकुशकीचकगह्वरम् ॥ १३ ॥

एक एवातियातोऽहमद्राक्षं विपिनं महत् ।
घोरं प्रतिभयाकारं व्यालोलूक शिवाजिरम् ॥ १४ ॥

परिश्रान्तेन्द्रियात्माहं तृट्परीतो बुभुक्षितः ।
स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः ॥ १५ ॥

तस्मिन्निर्मनुजेऽरण्ये पिप्पलोपस्थ आश्रितः ।
आत्मनात्मानमात्मस्थं यथाश्रुतमचिन्तयम् ॥ १६ ॥

प्रकाशिका— चित्रैर्धातुभिःर्णरजताद्यैर्गैरिकाद्यैर्वा विचित्रितानद्रींश्च । कथं भूतानद्रीन् । इभैर्गजैर्भग्ना भुजाः शाखा येषां ते द्रुमा येषु तान् । शिवानि भद्राणि जलानि येषु तान् जलाशयान्ह्रदान् । नलिनी; पुष्करिणीश्चित्राः । स्वना ध्वनयो येषां तैः पत्ररथैः पक्षिभिर्निमित्तैर्विभ्रमद्भिरिततस्ततश्चलद्भिर्भ्रमरैः श्रीः शोभा यासां ता नलिनीः च शराणां स्तंभाः लाश्च वेणवश्च शरस्तम्बाश्च शरस्तं भाः कुशाश्च कीचकाश्च ते तथोक्ताः । तैर्गह्वरं दुर्गमम् । वनविशेषणमेतत् । वायुनोद्धूतस्वना वेणवः कीचका इत्युच्यन्ते । घोरं दुःसहं प्रतिभयाकरं सम्भयजनकरूपं व्यालादीनामजरं क्रीडास्थानम् । परिश्रान्तानीन्द्रियाण्यात्मा देहश्च यस्य । तृषापरीतो व्याप्तः पानीयं पानेच्छुर्बुभुक्षितोऽन्नकाम उपस्पृष्ट आचान्तः पिप्पलोपस्थेऽश्वत्थमूले आश्रित उपविष्ट आत्मना मनसाऽऽत्मस्थं स्वान्तर्यामिणमात्मानं परमात्मानम् । यथा संन्यासिभ्यां श्रुतं तथाऽचिन्तयं ध्यातवानस्म ॥१२-१६॥

स्वप्नो मायाग्रहः शय्या जाग्रदाभास आत्मनः ।
नामरूपक्रियावृत्तिः संविच्छास्त्रं परं पदम् ॥ १७ ॥

नेन्द्रियार्थं न च स्वप्नं न सुप्तं न मनोरथम् ।
न निरोधं चानुगच्छेच्चित्रं तद्भगवत्पदम् ॥ १८ ॥

स एको भगवानग्रे क्रीडिष्यन्निदमात्मनः ।
सृष्ट्वा विहृत्य तज्जग्ध्वा उदास्ते केवलः पुनः ॥ १९ ॥

प्रकाशिका— संन्यासिभ्यः किं श्रुतं यत्त्वया ध्यातमित्यतस्तद्दर्शयति ॥ स्वप्न इत्यादि श्लोकत्रयेण । माया जीवमनः स्थितदृष्टश्रुतवस्तुवासनोपादानकपदार्थदर्शनरूपः स्वप्नोऽग्रहः । स्वाप्नजागारितविषयग्रहाभावरूपशय्या सुप्तिः । नामरूपक्रियासु वृत्तिर्विषयीकरणं यस्य स तथोक्तः । आभासः प्रत्ययो जाग्रद्बाह्यनामरूपक्रियाविषयकः प्रत्ययो जाग्रदवस्थेत्यर्थः । एतदवस्थात्रयमात्मनो जीवजातस्य यस्माद्भवति यत्संवित् स्वपरगताखिलविशेषविषयज्ञानरूपं शास्त्रं सर्वन्तर्यामिपरं पदमनुत्तमं ज्ञेयं प्राणं च इन्द्रियार्थम् इन्द्रियजन्यज्ञानविषयीभूतमर्थम् । जाग्रदवस्थामिति यावत् । यन्नानुगच्छेदिति प्रत्येकं सम्बन्धः । स्वप्नं च स्वप्नावस्थां च सुप्तं सुषुप्त्यावस्थां मनोरथं चिन्ताम् । चिन्ता मनोरथ इत्यभिधानात् । निरोधं मरणम् । च शब्दादुत्पत्त्यादिकं च । यन्नानुगच्छेज्जीवेन सह स्वयं न प्राप्नुयात्तच्चित्रं लोकविलक्षणम् । भगवत्पदं भगवत्स्वरूपम् । अग्रे सृष्ट्यभावकाले । स्थित इति शेषः । क्रीडिष्यन्क्रीडितुमिच्छन् । अवताररूपैः जगन्नियामकरूपैश्चेति शेषः । आत्मनो जीवजातस्य सम्बन्धि । तदुपकारकमिति यावत् । इदं जगत्सृष्ट्वा विहृत्य तत्पालनाय प्रादुर्भावादि कृत्वा तत्पुनर्जग्ध्वा संहृत्य प्रलये केवलः पुरुषान्तररहितः । उत्कृष्टतयाऽऽस्ते । नैकाकित्वेन तस्य भयादिप्राप्तिरिति भावः । अथवोदास्ते जीवंप्रत्युदासीनो वर्तत इत्यर्थः ॥ १७, १८, १९ ॥

ध्यायतश्चरणाम्भोजं भावनिर्वृतचेतसः ।
उत्कण्ठाश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः ॥ २० ॥

प्रकाशिका— एवं तदुपदिष्टं स्वध्यातमर्थं दर्शयित्वेदानीं तध्यानफलं दर्शयति ॥ ध्यायत इति भावेन भक्त्या निर्वृतमानन्दपूर्णं चेतो यस्य स तथा तस्य । उत्कण्ठया जातानामश्रूणां बाष्पाणां कलाभिर्बिन्दुभिर्युक्तेऽक्षिणी यस्य स तथा तस्य । शनैरभ्यासपाटवानन्तरं हृद्यासीत्प्रत्यक्षोऽभूत् ॥ २० ॥

प्रेमातिभारनिर्भिण्णपुलकाङ्गोऽतिनिर्वृतः ।
आनन्दसंप्लवे लीनो नापश्यमुभयं मुने ॥ २१ ॥

तात्पर्यम्— उभयं द्वितीयं नापश्यं तमेवापश्यम् ॥२१॥ इति प्रथमतात्पर्ये षष्ठोऽध्यायः ॥६॥

प्रकाशिका— प्रेम्णाऽतिभारेण निर्भिन्नानि निर्गतानि पुलकानि रोमाञ्चानि येषां तान्यङ्गानि यस्य । आनन्दानां सम्प्लवे महासमुद्रे । परमानन्दसमूह इति यावत् । लीनो मग्नः सन् उभयं नापश्यम् । अत्रोभयं द्वयं परमपरं च नापश्यमिति व्याख्याने परदर्शनाभावोऽपि प्राप्तोऽत शब्दविवक्षितमर्थं उभय शब्दविवक्षितमर्थं दर्शयंस्तात्पर्यमाह ॥ उभयमिति । तथा चात्रोभय शब्देन द्वयपर इति भावः ॥ २१ ॥

रूपं भगवतो यत्तन्मनःकान्तं सुखावहम् ।
अपश्यन्सहसोत्तस्थौ कैवल्याद्दुर्मना इव ॥ २२ ॥

प्रकाशिका— मनःकान्तं मनसोऽभीष्टम् । मनोहरमिति यावत् । यदद्राक्षं तद्रूपं सहसा बाह्यान्तःकरणाभावेऽपि दुर्मना इव दुष्टान्तःकरणपुरुष इव अपश्यन् अचक्षाणः कैवल्यात्परमानन्दानुभवादुत्तस्थावुत्थितोऽस्ति । उज्झितोऽस्मीति यावत् ॥ २२ ॥

दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि ।
वीक्षमाणोऽपि नापश्यमवितृप्त इवातुरः ॥ २३ ॥

प्रकाशिका— तद्धरे रूपं वीक्ष्यमाणोऽपि ध्यायमानोऽप्यवितृप्तोऽहमातुर इव । अभवमिति शेषः ॥ २३ ॥

एवं यतन्तं विजने मामाहागोचरो गिराम् ।
गम्भीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव ॥ २४ ॥

प्रकाशिका— गिरामगोचरोऽस्मत्कर्तृकसंवादनाविषयः । अदृश्य इति यावत् । गम्भीरया बह्वर्थया श्लक्ष्णया मधुरया वाचा ॥ २४ ॥

हन्तास्मिञ्जन्मनि भवान्न मां द्रष्टुमिहार्हति ।
अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनाम् ॥ २५ ॥

प्रकाशिका— हन्तेति सानुकम्पसम्बोधने । इह भूलोकेऽस्मिन् जन्मनि शूद्रदेहे मां द्रष्टुं नार्हसि । कुतः । यतो न विपक्वा दग्धाः कषायाः कामादिदोषा येषां ते तेषां कुयोगिनामसम्पूर्णयोगानाम् ॥ २५ ॥

सकृद्यद्दर्शितं रूपमेतत्कामाय तेऽनघ ।
मत्कामः शनकैः साधु सर्वान्मुञ्चति हृच्छयान् ॥ २६ ॥

प्रकाशिका— तर्हि किमिति दर्शितमित्यत आह ॥ सकृदिति । सकृद्दर्शितं मयेति यदेतत्कामायानुरागाय । त्वत्कामेन किमित्यत आह ॥ मत्काम इति । मत्कामः पुमान् हृच्छयान्कामादीन् मत्कामनया कामादिसर्वमनोदोषराहित्यं भवतीति भावः ॥ २६ ॥

सत्सेवया दीर्घया वै जाता मयि दृढा मतिः ।
हित्वावद्यमिमं लोकं गन्ता मज्जनतामसि ॥ २७ ॥

प्रकाशिका— संन्यासिसेवाफलमाह ॥ सत्सेवयेति । दीर्घया बहुकालीनया सतां संन्यासिनां सेवया वै यस्मान्मयि दृढा मतिर्जाता तस्मान्मज्जनतां मद्भक्ततां गतोऽसि । किमस्मिन्नेव जन्मनि नेत्याह । अवद्यं शूद्रजातितया निन्द्यमिमं लोकं देहं हित्वेति ॥ २७ ॥

मतिर्मयि निबद्धेऽयं न विपद्येत कर्हिचित् ।
प्रजासर्गनिरोधेऽपि स्मृतिश्च मदनुग्रहात् ॥ २८ ॥

प्रकाशिका— प्रजानां सर्गे निरोधे संहारेऽपि महाप्रलयानन्तरं पुनः सृष्टौ । जातायामपीति यावत् । न विद्यते नाशं न प्राप्नुयात् । स्मृतिश्च । पूर्वजन्मानुभूतस्मृतिश्च । मद्भक्तसेवाजातान्मदनुग्रहात् ॥ २८ ॥

एतावदुक्त्वाविरराम तन्महद्भूतं नभोलिङ्गमलिङ्गमीश्वरम् ।
अहञ्च तस्मै महतां महीयसे शीर्ष्णावनामं विदधेऽनुकम्पितः ॥ २९ ॥

प्रकाशिका— तत्प्रसिद्धं महद्भूतं महद्भूत शब्दवाच्यं परं ब्रह्म नभसि विद्यमानं लिङ्गशरीरं यस्य तन्नभोलिङ्गमलिङ्गं जडशरीररहितमीश्वरमीशनशीलं शीर्ष्णा शिरसाऽवनामं नमस्कारं विदधे कृतवानस्मि । अनुकम्पितः कृपापात्रीकृतः ॥ २९ ॥

नामान्यनन्तस्य गतत्रपः पठन्गुह्यानि भद्राणि कृतानि च स्मरन् ।
गां पर्यटंस्तुष्टमना गतस्पृहः कालं प्रतीक्षन्नपटो विमत्सरः ॥ ३० ॥

प्रकाशिका— गतत्रपस्त्यक्तलज्जस्तुष्टमना यदृच्छालाभेनालम्बुद्धिमान् । अत एव गतस्पृहोऽधिकाकाङ्क्षारहितः कालं मरणकालम् अपटः । पट गताविति धातोः । पटो गतिर्न विद्यते ईश्वरादन्यः पटो यस्य स तथा । अनन्यगतिरित्यर्थः । कन्थादिप्रावरणरहित इति वा ॥ ३० ॥

एवं कृष्णमतेर्ब्रह्मन्नसक्तस्यामलात्मनः ।
कालः प्रादुरभूत्काले तटित्सौदामिनी यथा ॥ ३१ ॥

प्रकाशिका— कृष्णे परमानन्दबलात्मके हरौ मतिर्यस्य स तथा यस्य कालो मृत्युः काले स्वावसरे प्रादुर्भूदाविर्बभूव । अकस्मात्प्रादुर्भावे दृष्टान्तमाह ॥ विद्युदिति । सौदामिनीति विशेषणं स्फुटत्वप्रदर्शनार्थम् । सुदाममाला तत्र भवा सौदामिनीमालाकारेत्यर्थः ॥ ३१ ॥

एवं मयि प्रयुञ्जाने शुद्धां भागवतीं तनुम् ।
प्रारब्धकर्मनिर्वाणो न्यपतत्पाञ्चभौतिकः ॥ ३२ ॥

प्रकाशिका— शुद्धां निर्दोषां भगवतीं तनुं हरिमूर्तिं मयि एवं प्रयुञ्जाने ध्यायति सति प्रारब्धकर्मणो निर्वाणं नाशो यस्मात्स तथा देहरूपफलभोगेन हि कर्मनाशः प्रसिद्धः ॥ ३२ ॥

कल्पान्त इदमादाय शयानेऽम्भस्युदन्वतः ।
शिशयिष्णोरनुप्राणं विवेशान्तरहं विभोः ॥ ३३ ॥

प्रकाशिका— कल्पान्ते पूर्वब्रह्मकल्पावसाने इदं स्वसृष्टविश्वमादाय स्वोदरे निवेश्योदन्वतः प्रलयार्णवस्याम्भसि जले शिशयिष्णोः शयितुमिच्छोर्विभोर्नारायणस्यान्तरहमनुप्राणं मुख्यप्राणप्रवेशद्वारा प्रविवेश प्रविष्टवानस्मि ॥ ३३ ॥

सहस्रयुगपर्यन्त उत्थायेदं सिसृक्षतः ।
मरीचिमिश्रा ऋषयः प्राणेभ्योऽहञ्च जज्ञिरे ॥ ३४ ॥

प्रकाशिका— सहस्रयुगपर्यन्ते । अत्र सहस्रयुग शब्देन ब्राह्मं वर्षशतं ग्राह्यम् । तावत्पर्यन्तः समाप्तिः । तस्मिन्सति । उत्थायेदं जगत्सिसृक्षतः स्रष्टुमिच्छतो विष्णोः सकाशादुत्थायोत्पत्तिं प्राप्येदं जगत्सिसृक्षतो ब्रह्मणः प्राणेभ्य इन्द्रियेभ्यो मरीचिमिश्रा मरीचिप्रमुखा ऋषयो जज्ञिरे । अहं च तदङ्गाज्जज्ञे । अत्र सहस्रयुग शब्दस्वारस्येन पूर्वं ब्रह्मादिनस्यैव ग्रहणे पूर्वदिने नारदाभावः प्राप्नोति । न च प्रतिदिनं नारदभेदे प्रमाणमस्ति । अत एवं व्याख्यातमित्यवगन्तव्यम् ॥ ३४ ॥

अन्तर्बहिश्च लोकांस्त्रीन्पर्येम्यस्कन्दितव्रतः ।
अनुग्रहान्महाविष्णोरविघातगतिः क्वचित् ॥ ३५ ॥

प्रकाशिका— ये कर्मिणस्ते त्रिलोक्याबहिर्न यान्ति । अहं तु महाविष्णोरनुग्रहादखणडित-ब्रह्मचर्यादिव्रतःसन् त्रीँल्लोकानंतर्बहिश्चोपर्येमि क्वचिदप्यविधाताऽप्रतिहता गतिर्यस्य स तथा ॥३५॥

देवदत्तामिमां वीणां स्वरब्रह्मविभूषिताम् ।
मूर्च्छयित्वा हरिकथां गायमानश्चराम्यहम् ॥ ३६ ॥

प्रकाशिका— एतदेव विशदयति । स्देवेति । स्वरब्रह्मविभूषितां सप्तस्वरलक्षणवेदेनालङ्कृतां नाम्ना देवदत्तां वीणां मूर्च्छयित्वा । स्वराणामारोहणक्रमोमूर्च्छ तां कारयित्वा ॥ ३६ ॥

प्रगायतश्च वीर्याणि तीर्थपादः प्रियश्रवाः ।
आहूत इव मे शीघ्रं दर्शनं याति चेतसि ॥ ३७ ॥

प्रकाशिका— एवं गायने स्वप्रयोजनमाह ॥ प्रगायत इति । तीर्थं गङ्गाख्यं पादे यस्य स तथा । प्रियं प्रियकरं श्रवः श्रवणं यशो वा यस्य स तथा । स्ववीर्याणि प्रकर्षेण गायतो मे मम चेतसि दर्शनं यातीत्यन्वयः ॥ ३७ ॥

एतदातुरचित्तानां मात्रास्पर्शेच्छया मुहुः ।
भवसिन्धुप्लवो दृष्टो हरिचर्यानुवर्णनम् ॥ ३८ ॥

प्रकाशिका— परप्रयोजनं च वदन्नुपसंहरति ॥ एतदिति । मात्रा विषयास्त एषां स्पर्शा भोगास्तेषामिच्छयाऽऽतुराणि चित्तानि येषां तेषां हरिचर्यानुवर्णनं यत्तदेव भवसिंधौ प्लवस्तरणाय नौरिव । न केवलं श्रुतिप्रामाण्येन किं त्वस्मदादिभिर्दृष्ट एवेत्यर्थः । तस्मात्त्वमपि तल्लोकहिताय कुर्वित्याशयः ॥ ३८ ॥

यमादिभिर्योगपथैः कामलोभहतो मुहुः ।
मुकुन्दसेवया यद्वत्तथात्माद्धा न शाम्यति ॥ ३९ ॥

प्रकाशिका— यमादिभिरन्यथासिद्धिं परिहरति ॥ यमादिभिरिति । मुकुन्दसेवया तच्चरितश्रव-णादिरूपयाऽऽत्मा जीवः शाम्यति भगवन्निष्ठबुद्धिमान्भवति । मुकुन्दचरितश्रवणेन हरेः स्वातन्त्र्ये ज्ञाते कामादिपीडा न भवतीति भावः ॥ ३९ ॥

सर्वं तदिदमाख्यातं यत्पृष्टोऽहं त्वयानघ ।
जन्मकर्मरहस्यं मे भवतश्चात्मतोषणम् ॥ ४० ॥

प्रकाशिका— मे जन्मकर्मरहस्यं चेत्यन्वयः । कीदृशं भवतः । आत्मनो मनसस्तोषणमलम्बुद्धिजनकम् । यदुद्दिश्याहं त्वया पृष्टस्तत्सर्वमाख्यातमित्यन्वयः ॥ ४० ॥

सूत उवाच–

एवं सम्भाष्य भगवान्नारदो वासवीसुतम् ।
आमन्त्र्य वीणां रणयन्ययौ यादृच्छिको यतिः ॥ ४१ ॥

प्रकाशिका— वासव्याः सत्यवत्याः सुतं व्यासमामन्त्र्यापृच्छ्य रणयन्ध्वनयन्यादृच्छिको हरीच्छामात्राधीनो यतिः संन्यासी ॥ ४१ ॥

अहो देवर्षिर्धन्योऽयं यः कीर्तिं शार्ङ्गधन्वनः ।
गायन् माध्व्या गिरा तन्त्र्या रमयत्यातुरं जगत् ॥ ४२ ॥

इति श्रीमद्भागवते प्रथमकन्धे षष्ठोऽध्यायः ॥

प्रकाशिका— नारदं स्तौति सूतः ॥ अहो इति । माध्व्या मधुरया गिरा तन्त्र्या वीणाया च । आतुरं संसारे क्लिष्टम् ॥ ४२ ॥ इति श्रीभागवतटिप्पण्यां षष्ठोऽध्यायः ॥ १-६ ॥

अथ सप्तमोऽध्यायः

शौनक उवाच–

निर्गते नारदे सूत भगवान्बादरायणः ।
श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः ॥ १ ॥

प्रकाशिका— तदभिप्रेतं तस्य नारदस्याभिप्रेतं श्रुतवान्सन् ॥ १ ॥

सूत उवाच–

ब्रह्मनद्याः सरस्वत्याः आश्रमः पश्चिमे तटे ।
शम्याप्रास इति प्रोक्तः ऋषीणां सत्रवर्धनः ॥ २ ॥

तात्पर्यम्— **शम्यां प्रास्य तत्र शालां कृत्वा यत्र यज्ञः क्रियते स शम्याप्रासः ॥ २ ॥**

प्रकाशिका— व्यासाश्रमं विविच्य दर्शयति ॥ ब्रह्मनद्या इति । ब्राह्मणैराश्रिता ब्रह्मदैवत्या वा नदी ब्रह्मनदी तस्याः । अत्र शम्याप्रास शब्देन विवक्षितमर्थं दर्शयति ॥ शम्यामिति सरस्वत्याः पश्चिमे तीरे प्रत्यहं दीक्षापूर्वकं कर्तव्यान्येकान्हानि सत्राणि सन्ति तत्रेतिकर्तव्यमाश्वलायनादिभिर्निरूपितम् । सरस्वत्याः पश्चिमे तीरे विद्यमाने देशविशेषे यागं कुर्युरिति । स देशविशेषः कीदृश इत्याकाङ्क्षायां यत्र स्थण्डिले आवहनीयगार्हपत्याग्नी स्थापितौ भवतः । तस्मात्स्थण्डिलाद्बहिराग्नेयकोणगषट्त्रिंशदङ्गुलपरिमिता या भूमिस्तत्प्रान्तदेशरूप इत्युक्तम् । तत्र ब्रह्माख्यो ऋत्विक् तदभिमुखमाहवनीयगार्हपत्यस्थण्डिलसमीपे स्थित्वा तं देशविशेषमुद्दिश्य षट्त्रिंशदङ्गुलपरिमितं शम्यानामकं सत्रं पात्रविशेषं यथा तस्मिन्स्थण्डिले एव पतेन्नार्वाक्तनमतिक्रम्य तथा हस्तलाघवेन प्रासेत्प्रक्षिपेत् । तच्छम्यानामकं प्रक्षिप्तपात्रं यस्मिन् षट्त्रिंशदङ्गुलपरिमितभूप्रान्तदेशेति यावत् । तत्र गार्हस्पत्यस्याग्नेर्मण्टपमादौ कृत्वा ततः पूर्वस्थानाद्गार्हस्पत्याग्निं नीत्वा तस्मिन्मण्टपे कुण्डमध्ये तं प्रतिष्ठाप्य यागः कर्तव्य इत्युक्तं भवति । अतः स यागप्रदेशः शम्यानामकसत्रपात्रप्रासादाधिकरणत्वात् शम्याप्रासशब्देनोच्यत इत्यप्युक्तम् । तदिदं मनसि निधायोक्तं शम्याप्रासेत्यादि । शम्या तन्नामकं षट्त्रिंशदङ्गुलपरिमितं सत्रपात्रं प्रास्य असुक्षेपेण क्षिप्त्वा पूर्वोक्ते शम्यानामके सत्रप्राप्तप्रादेशे शालायां मण्टपं कृत्वा तन्मध्ये गार्हपत्याग्निं प्रतिष्ठाप्येत्याद्यपि ग्राह्यम् । स देश विशेषः शम्याप्रास शम्याप्रास शब्दवाच्य इत्यर्थः । सत्रं कर्मविशेषं वर्धयतीति अधिकफलं करोतीति सत्रवर्धनः । सत्रस्त्रायत इति सत्रं ब्रह्मविचारस्तद्वध यतीति वा ॥ २ ॥

तस्मिन् ऋष्याश्रमे व्यासो बद्रीषण्डमण्डिते ।
आसीनोऽप उपस्पृश्य प्रणिदध्यौ मनश्चिरम् ॥ ३ ॥

प्रकाशिका— बदरीणां षण्डेन समूहेन मण्डितेऽलङ्कृते मनः प्रणिदध्यौ स्थिरीचकार । ध्यानं कृतवानिति यावत् । नित्यं व्यक्तसर्वज्ञानस्य व्यासस्येदं मनःप्रणिधानकथनमसुरजनमोहनायेति ज्ञातव्यम् ॥ ३ ॥

भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले ।
अपश्यत् पुरुषं पूर्णं मायाञ्च तदपाश्रयाम् ॥ ४ ॥

तात्पर्यम्— **भक्तियोगेन सम्यक्प्रणिहिते लोकानां मनसि ॥ ४ ॥**

प्रकाशिका— भक्तियोगेनेत्यत्र व्यासो ध्यानेन स्वमनसि पूर्णं पुरुषमपश्यदित्यन्यथाप्रतीति वारणाय लोकानामित्यध्याहृत्य योजनां दर्शयति । भक्तियोगेनेति । अन्यथा भक्तियोगेनेत्यादिकं

बाधितार्थकं भविष्यतीति भावः ॥ तथा चायं श्लोकार्थः ॥ भक्तियोगेनामले रागादिदोषरहिते सम्यक् प्रणिहितेऽतिशयेन भगवति स्थिरीकृते लोकानां मनसि प्रत्यक्षीभवन्तं तं पूर्णं देशतः कालतो गुणतश्चापरिच्छिन्नं पुरुषमीश्वरमपश्यत् । मायां च जीवबन्धिकां प्रकृतिं च तदपाश्रयां तस्य हरेरधीनां तस्माज्जीवापगत्य अन्याश्रित्य स्थितामिति वा अपश्यत् । लोकानां मनसि भक्तियोगेन रागादिदोषरहिते च सति लोके भगवान्द्रष्टुं शक्य इति । ततो भगवदधीना जीवबन्धिका माया तस्मादपगता भविष्यतीति चापश्यदिति भावः ॥ ४ ॥

यया संमोहितो जीवः आत्मानं त्रिगुणात्मकम् ।
परोऽपि मनुतेऽनर्थं तत्कृतश्चाभिपद्यते ॥ ५ ॥

प्रकाशिका— मायाकृतं बन्धं दर्शयति ॥ ययेति । आत्मानं स्वात्मानं परोऽपि त्रिगुणात्मकदेहादन्योऽपि त्रिगुणात्मकं त्रिगुणात्मकदेहाभिन्नं मनुते । देहाद्यत्यन्तविविक्तमात्मानं न जानातीति यावत् । तत्कृतमविवेककृतमनर्थं जननमरणरूपादिसंसारम् । एवं विधमायाबन्धनिवर्तकं हर्यपरोक्षज्ञानद्वारा भक्तियोगमेवापश्यदिति भक्तियोगेनेत्यादेः फलितार्थः ॥ ५ ॥

अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे ।
लोकस्याजानतो विद्वाँश्चक्रे सात्वतसंहिताम् ॥ ६ ॥

प्रकाशिका— ततः किमकरोदित्यत आह ॥ अनर्थोपशममिति । अपरोक्षज्ञानानन्तरमपि जायमानपरमप्रसादसाधनीभूतातिदृढभक्तियोगमपेक्ष्य साक्षादनर्थोपशममित्युक्तम् । लोकस्यार्थं इति शेषः । सात्त्वतसंहितां भगवन्माहात्म्यप्रतिपदिकां भागवतसंहिताम् ॥ ६ ॥

यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे ।
भक्तिरुत्पद्यते पुंसां शोकमोहभवापहा ॥ ७ ॥

प्रकाशिका— संहिताया अनर्थोपशमकत्वं दर्शयति ॥ यस्यामिति । वै शब्दः कैमुत्यर्थः । यस्यां श्रूयमाणायां भक्तिरुत्पद्यते । किं पुनः श्रुतायां व्याख्यातायां चेति ॥ ७ ॥

स संहितां भागवतीं कृत्वानुक्रम्य चात्मजम् ।
शुकमध्यापयामास निवृत्तिनिरतं मुनिम् ॥ ८ ॥

शौनक उवाच –

स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः ।
कस्य वा बृहतीमेतामात्मारामः समभ्यसत् ॥ ९ ॥

प्रकाशिका— अनुक्रम्य सुमुहूर्ताद्यनुसारेणारभ्य निवृत्तिनिरतं मनसो विषयेभ्यो निवृत्तौ नितरां रतं नितरां वृत्तिः व्याप्ततया स्थितिर्यस्य भगवतस्तत्र निरतमिति वा । सर्वत्र चतुर्ष्वपि पुरुषार्थेषु कस्य वा हेतोर्बृहतीं वितताामात्मनि परमात्मनि आ सम्यक् रमत इत्यात्मारामः ॥ ९ ॥

आत्मारामाश्च मुनयो निर्ग्रान्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिं इत्थंभूतगुणो हरिः ॥ १० ॥

प्रकाशिका— च शब्दोऽप्यर्थे । निर्ग्रान्था निर्गतोपादेयाः । प्रयोजनशून्या अपीति यावत् । अहैतुकीं निर्निमित्ताम् । भक्तिं श्रवणादिरूपाम् । अत्र हेतुमाह ॥ इत्थम्भूतगुण इति । निरपेक्ष्य भक्तमनोवशकरणक्षमगुणक इत्यर्थः ॥ १० ॥

हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः ।
अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियम् ॥ ११ ॥

प्रकाशिका— एतदेव विशदयति । हरेरिति । गुणैर्ज्ञानानन्दसौन्दर्यादिभिराक्षिप्ताऽऽकृष्टा मतिर्बुद्धिर्यस्य स तथोक्तः । अध्यगादधीतवान् । आ सम्यक् ख्यायते विष्णुमाहात्म्यं येन तदाख्यानम् । भागवतमितरपुराणापेक्षया महत् । एतेन तस्य पुत्रो महायोगीत्यादिना शुकस्य व्याख्याने प्रवृत्तिः कथमिति यत्पृष्टं तस्याप्युत्तरमुक्तप्रायमिति ज्ञातव्यम् ॥ ११ ॥

परीक्षितोऽथ राजर्षेः जन्मकर्मविलापनम् ।
संस्थाश्च पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयाम् ॥ १२ ॥

प्रकाशिका— इदानीं तस्य जन्म महदाश्चर्यमित्यादिना प्रष्टस्योत्तरं वक्तुमाह ॥ परीक्षित इति । विलापनं मरणं मुक्तिं वा । तदर्थं पाण्डुपुत्राणां संस्थानं च युद्धोपरतानां महाभिषेकादिमहाप्रस्थानं स्थितिं च वक्ष्ये । कीदृशीम् । कृष्णकथाया उदयो उत्कर्षः यस्यां सा तथोक्ता ताम् ॥ १२ ॥

यदा मृधे कौरवपाण्डवानां वीरेष्वथो वीरगतिं गतेषु ।
वृकोदराविद्धगदाभिमर्शभग्नोरुदण्डे धृतराष्ट्रपुत्रे ॥ १३ ॥

प्रकाशिका— तत्र परीक्षितो जन्म निरूपयिष्यन् आदौ तावद्गर्भस्थ एवाश्वत्थामनाम्नो ब्रह्मास्त्रात्कृष्णेन रक्षित इति वक्तुं कथां प्रस्तौति ॥ यदेत्यादिना ॥ मृधे युद्धे वीरेषु भीष्मादिषु वीरगतिं स्वर्गङ्गतेष्वथोऽनन्तरं धृतराष्ट्रपुत्रे दुर्योधने वृकोदरेणविद्धायाः क्षिप्ताया गदाया अभिमर्शेन सम्यक् सम्बन्धेन भग्नावूरु दण्डौ यस्य स तथोक्तस्तस्मिन्सति ॥ १३ ॥

भर्तुः प्रियं द्रौणिरिति स्म पश्यन्कृष्णासुतानां स्वपतां शिरांसि ।
अपाहरद्विप्रियमेतदस्य जुगुप्सितं कर्म विगर्हयन्ती ॥ १४ ॥

तात्पर्यम्— स्वात्मन एव विप्रियं न भर्तुः । प्रयोजनाभावाद्विप्रियमिव च तस्य प्रियमिति हि प्रस्वापोत्तम् ॥ १४ ॥

माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्यमाना ।
तदारुदद्वाष्पकलाकुलाक्षी तां सान्त्वयन्नाह किरीटमाली ॥ १५ ॥

तन्मा शुचस्ते प्रमृजामि भद्रे यद्ब्रह्मबन्धोः शिर आततायिनः ।
गाण्डीवमुक्तैर्विशिखैरुपाहरे त्वाक्रम्य यत्स्नास्यसि नेत्रजैर्जलैः ॥ १६ ॥

प्रकाशिका— अस्य भर्तुरेतच्छिशुनिधनं वस्तुतो विप्रियमेवेति प्रतीतिनिरासायास्येत्यनेन परामृश्यं दर्शयन् विप्रियमेतदस्येत्यस्यार्थमाह ॥ स्वात्मन एवेति । द्रौणेरेवेत्यर्थः । नन्वेवं भर्तुश्च विप्रियमिति वक्ष्यमाणविरोध इत्यतस्तस्यार्थमाह ॥ प्रयोजनाभावादिति । पृथिव्या अपाण्डवत्व-करणरूपप्रयोजनस्यानेन सम्यगजातत्वाद्भर्तुर्दुर्योधनस्य विप्रियमिव वक्ष्यमाणवाक्ये प्रयोजनाभावेन मुख्यार्थसादृश्येन विप्रियशब्दो गौणो न मुख्यार्थ इत्यर्थः । ननु भर्तुरेवा प्रियं किं न स्यादित्यतोऽत्र बाधकमाह ॥ अस्येति । अस्य दुर्योधनस्येदं शिशुनिधनं प्रियमिति प्रस्वापे सौषुप्तिके पर्वण्युक्तं हि यस्मात्तस्मात्स्वात्मन एव विप्रियमित्यर्थः । भर्तुर्दुर्योधनस्य । स्मेति वितर्के । इत्येवं प्रियं स्यादिति पश्यंश्चिंतयन् शिशूनां सुतानां निधनं निशम्य श्रुत्वाऽस्याश्वत्थाम्नो विप्रियं जुगुप्सितं श्रुत्वा निषिद्धमेतत् । शिशूनां निधनरूपं कर्म विगर्हयन्ती निन्दयन्ती । घोरं यथा स्यात्तथा परितप्यमानामाता द्रौपदी बाष्पस्य कलाभिर्बिन्दुभिराकुलेऽक्षिणी यस्याः सा । पूर्वोक्तयदा शब्दस्यात्र सम्बन्धः । यदाऽरुदत्तदा तां द्रौपदीं किरीटमालेऽस्यास्तीति किरीटमाली अर्जुनः । ननु भारते भीमेनैव द्रौपदीसांत्वनं द्रौण्यनुयानं तद्बन्धनं च कृतमिति स्पष्टमुक्तमतः कथमेतत्सर्व-मर्जुनस्यात्रोच्यमानमुपपद्यत इत्यत आह ॥ स्वप्नोऽयमिति । अयमत्रोच्यमानोऽर्थः स्वप्नो द्रौणिना स्वप्नावस्थायामनुभूतः । न तु बाह्यः । अतो न विरोध इति भावः । तथा च भीमेनैव द्रौण्यनुयानं

बन्धनं शिरोरत्नापहरणं च कृतम् । तदनन्तरं द्रौपद्या मोचितो द्रौणिः स्वप्नदृष्टं स्मरन् जगामेति भारतीकथाऽत्रापि ग्राह्या । तदनन्तरं कीदृशस्वप्नो द्रौणिना दृष्ट इत्याशङ्कायां सांत्वयन्नित्यादिना द्रौणिदृष्टं स्वप्नमध्यायसमाप्तिपर्यन्तमनुवदति सूत इति भावः । नन्वर्जुनकर्तृकं द्रौण्यानुयानादिकं स्वाप्नमेवेत्यत्र प्रमाणं दर्शयति ।। पार्थानुयानमिति । बन्धनं चेत्यत्र पार्थेनेति शेषः । तेनैवकारस्य सम्बन्धः । मोक्षणं च ददर्शेत्यन्वयः । ततश्चायं सांत्वयन्नित्यादिमूलस्यार्थः ।। तां द्रौपदीं सांत्वयन् दुःखं शमयन् । हे भद्रे । त्वं मा शुचः शोकं मा कुरु । ते शुचः शोकाश्रूणि तत्तदा प्रमृजामि पाणिना परिमार्जयामि यद्यदा ब्रह्मबन्धोर्ब्राह्मणाधमस्याततायिनोऽकर्तव्यकारिणो गाण्डीवाद्धनुषो मुक्तैर्विशिखैर्विविधशिखैर्बाणैरुपाहरे छित्वा त्वत्समीपमानयामि । यच्छिर आक्रम्य क्रोधेन पदा स्पृष्ट्वा दुःखोद्रेकेण नयनजातैर्जलैः स्नास्यसि स्नानं करिष्यसि । छिन्नशिरः स्पर्शे शुद्ध्यर्थं पुत्रवध-कारिशिरोदर्शनसमुद्भूतदुःखोद्रेकनिर्गतनेत्रजलैरेव स्नानं त्वं करिष्यसीति भावः ।। १४-१६ ।।

इति प्रियां वल्गुविचित्रजल्पैः स सान्त्वयित्वाच्युतमित्रसूतः ।
अभ्यद्रवद्दंशित उग्रधन्वा कपिध्वजो गुरुपुत्रं रथेन ।। १७ ।।

प्रकाशिका— वल्गवो रम्या विचित्रा विविधाश्चर्यभूता जल्पा वाग्विशेषास्तैः सोऽर्जुनोऽच्युतः कृष्ण एव मित्रं सूतश्च यस्य स तथाऽभ्यद्रवत् । दंशितो बद्धकवचः । उग्रं धनुर्यस्य कपिर्हनुमान्ध्वजे यस्य स तथोक्तः ।। १७ ।।

तमापतन्तं स विलोक्य दूरात्कुमारहोद्विग्नमना रथेन ।
पराद्रवत्प्राणपरीप्सुरुर्व्यां यावद्गमं रुद्रभयाद्यथार्किः ।। १८ ।।

प्रकाशिका— आपतन्तमाधावन्तं स द्रौणिः कुमारहा बालघाती । उद्विग्नमनाः कम्पितहृदयः प्राणपरीप्सुः प्राणांल्लब्धुमिच्छुर्यावद्गमं यावद्गन्तुं शक्यं तावदुर्व्यां पराद्रवदपलायत । क इव । को ब्रह्मा यथा रुद्रभयात्स्वकीयपञ्चमशिरश्छेदार्थमागतस्य रुद्रस्य भयात्पराद्रवत्तथैवेति । आर्किरिति पाठेऽर्कसूनुः शनैश्चरो रुद्रस्य तृतीयनेत्रतेजसो भयादार्किः पराद्रवदिति पुराणान्तरे प्रसिद्धम् । अर्क इति पाठे विद्युन्माली नाम राक्षसः । रुद्रेण दत्तसौवर्णं विमानमारुह्य सूर्यस्य पृष्ठतो गच्छन्विमानदीप्त्या रात्रिं विलोपितवांस्ततोऽर्केण तद्विमानं पातितम् । तत् श्रुत्वा रुद्रे कुपिते सति तद्भयादर्कः पराद्रवदिति वामनपुराणे प्रसिद्धम् ।। १८ ।।

यदाऽशरणमात्मानमैक्षत श्रान्तवाहनम् ।
अस्त्रं ब्रह्मशिरो मेन आत्मत्राणं द्विजात्मजः ।। १९ ।।

प्रकाशिका— अशरणं रक्षकरहितम् । ननु पलायनमेव रक्षकमित्यत उक्तम् ॥ श्रान्तवाहनमिति । ब्रह्मशिरो ब्रह्मास्त्रम् । आत्मत्राणमात्मत्राणकरम् । द्विजात्मज इति ब्रह्मास्त्रसिद्धिसूचकम् ॥ १९ ॥

अथोपस्पृश्य सलिलं सन्दधेऽस्त्रं समाहितः ।
अजानन्नपि संहारं प्राणकृच्छ्र उपस्थिते ॥ २० ॥

प्रकाशिका— उपस्पृश्याचम्य तद् ब्रह्मास्त्रं समाहितः कृतध्यानः संहारमुपसंहारं उपसंहारमजानतोऽपि सन्धाने हेतुः ॥ प्राणकृच्छ इति ॥ २० ॥

ततः प्रादुष्कृतं तेजः प्रचण्डं सर्वतो दिशम् ।
प्रापतत्तदभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥ २१ ॥

प्रकाशिका— ततोऽस्त्रात्प्रापतद्व्याप्नुवद्विष्णुं कृष्णं जिष्णुरर्जुनः । हेत्यनेनाश्चर्यं कृत्वेति दर्शयति ॥ २१ ॥

अर्जुन उवाच –

कृष्ण कृष्ण महाभाग भक्तानामभयङ्कर ।
त्वमेको दह्यमानानाम् अपवर्गप्रदाता मोक्षप्रदाता ॥ २२ ॥

प्रकाशिका— संसृतेर्दह्यमानानां संसृतेरमोक्षप्रदातायर्गोऽपवर्गजयितापव ॥ २२ ॥

त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः ।
मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥ २३ ॥

प्रकाशिका— मोक्षप्रदः । त्वं तु नित्यमुक्त इत्याह ॥ त्वमिति । चिच्छक्त्या स्वरूपज्ञानशक्त्या मायाबन्धकप्रकृत्यादिरूपां व्युदस्य दूरीकृत्य कैवल्ये स्वार्थे ष्यञ् प्रत्ययः । केवले प्रकृतिप्राकृतरहित आत्मनि स्वरूपेस्थितः । अनन्याश्रितो नित्यमुक्तश्चेत्यर्थः ॥ २३ ॥

स एवं जीवलोकस्य मायामोहितचेतसः ।
विधित्सुः स्वेन वीर्येण श्रेयो धर्मादिलक्षणम् ॥ २४ ॥

प्रकाशिका— त्रिवर्गदाताऽपि त्वमेवेत्याह ॥ स एवेति । विधत्से करोषि । अवतारान्कृत्वेति शेषः । वीर्यैण पराक्रमेण । विधित्सुरिति पाठेऽवतरतीति शेषः ॥ २४ ॥

तथाऽयञ्चावतारस्ते भुवो भारजिहीर्षया ।
स्वानाञ्चानन्यभावानामनुध्यानाय चासकृत् ॥ २५ ॥

प्रकाशिका— भारजिहीर्षया कृत इति शेषः । स्वानां ज्ञातीनाम् । अनन्यभावानामेकान्तिनां चानुध्यानायानुध्यानादिना । मोक्षाय भवतीति शेषः । तथा च मोक्षादिप्रदस्य तवैतद्दुःखपरिहारे सामर्थ्यमस्तीति किं वाच्यमिति भावः ॥ २५ ॥

किमिदं स्वित्कुतो वेति देव देव न वेद्म्यहम् ।
सर्वतोमुखमायाति तेजः परमदारुणम् ॥ २६ ॥

प्रकाशिका— सर्वतो मुखं यत्तेज आयाति तदिदं किं किमात्मकम् । कुतो वाऽऽयातीति स्विद्वितर्के ॥२६॥

श्रीभगवानुवाच—

वेत्थेदं द्रोणपुत्रस्य ब्राह्ममस्त्रं प्रदर्शितम् ।
नैवासौ वेद संहारं प्राणबाध उपस्थिते ॥ २७ ॥

प्रकाशिका— प्राणबाध उपस्थिते सति प्रदर्शितं प्रकटीकृतम् । न तु तत्प्रयोगकुशल इत्याह ॥ नैवेति । त्वं तु संहारमुपसंहारवेत्थेत्यपि योज्यम् ॥ २७ ॥

न ह्यस्यान्यतमं किञ्चिदस्त्रं प्रत्यवकर्षणम् ।
जह्यस्त्रतेज उन्नद्धमस्त्रजो ह्यस्त्रतेजसा ॥ २८ ॥

प्रकाशिका— अस्त्राणां मध्येऽन्यतमम् । प्रत्यवकर्षणं प्रतीकारसमर्थम् । निवर्तकमिति यावत् । जहि प्रतिबद्धं कुरु । उन्नद्धमुत्कृष्टं हि यस्मादस्त्रज्ञोऽसि । विसर्गमुपसंहारपूर्वकमिति शेषः । अस्त्रस्य ब्रह्मास्त्रस्य तेजसा । एतदस्त्रप्रतिबन्धार्थं त्वमपि ब्रह्मास्त्रं प्रयोजयेति भावः ॥ २८ ॥

सूत उवाच—

श्रुत्वा भगवता प्रोक्तं फल्गुनः परवीरहा ।
स्पृष्ट्वाऽपस्तं परिक्रम्य ब्राह्मं ब्राह्माय सन्दधे ॥ २९ ॥

प्रकाशिका— परेषां शत्रूणां सम्बन्धि ये वीरास्तान्हन्तीति तथा । आपः स्पृष्ट्वाऽऽचम्यतं कृष्णं परिक्रम्य प्रदक्षिणीकृत्य ब्राह्माय ब्रह्मास्त्रशांत्यै ॥ २९ ॥

संहत्यान्योन्यमुभयोस्तेजसी शरसंवृते ।
आवृत्य रोदसी खञ्च ववृधातेऽर्कवह्निवत् ॥ ३० ॥

दृष्ट्वाऽस्त्रतेजस्तु तयोस्त्रींल्लोकान्प्रदहन्महत् ।
दह्यमानाः प्रजास्सर्वाः सांवर्तकममंसत ॥ ३१ ॥

प्रकाशिका— उभयोरस्त्रतेजसी शरसंवृते शररूढेऽन्योन्यं परस्परं संहत्यमिलित्वा ववृधाते प्रवर्धताम् । किं कृत्वा । रोदसी द्यावापृथिव्यौ खमन्तरिक्षं चावृत्य । यथा प्रलये सङ्कर्षणमुखाग्निरुपरिस्थितोऽर्कश्च संहत्य वर्धेते तद्वत् । तयोर्द्रौणिफल्गुनयोस्तेन दह्यमानाः सांवर्तकं प्रलयाग्निममंसत मेनिरे ॥ ३०, ३१ ॥

प्रजोपप्लवमालक्ष्य लोकव्यतिकरं च तम् ।
मतञ्च वासुदेवस्य संजहारार्जुनो द्वयम् ॥ ३२ ॥

प्रकाशिका— व्यतिकरं व्यत्ययम् । नाशमिति यावत् । वासुदेवस्य कृष्णस्य मतमुभयास्त्रोपसंहाररूपमालक्ष्य ज्ञात्वा द्वयं ब्रह्मास्त्रद्वयं सञ्जहारोपसंहृतवान् ॥ ३२ ॥

तत आसाद्य तरसा दारुणं गौतमीसुतम् ।
बबन्धामर्षताम्राक्षः पशुं रशनया यथा ॥ ३३ ॥

प्रकाशिका— गौतमवंशजातौ गौतमी कृपी । तस्याः सुतममर्षेण कोपेन ताम्रे रक्तेऽक्षिणी यस्य स तथा । निष्कृतत्वे दृष्टान्तः पशुं रशनया यथेति ॥ ३३ ॥

शिबिराय निनीषन्तं रज्वा बध्वा रिपुं बलात् ।
प्राहार्जुनं प्रकुपितो भगवानम्बुजेक्षणः ॥ ३४ ॥

प्रकाशिका— रशनया रज्वा बद्ध्वा शिबिराय सेनानिवेशस्थानाय निनियन्तं नेतुमिच्छन्तम् ॥ ३४ ॥

मैनं पार्थार्हसि त्रातुं ब्रह्मबन्धुमिमं जहि ।
योऽसावनागसः सुप्तानवधीन्निशि बालकान् ॥ ३५ ॥

प्रकाशिका— अनागसो निरापराधान् ॥ ३५ ॥

मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडम् ।
प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्मवित् ॥ ३६ ॥

प्रकाशिका— मत्तं मद्यादिना प्रमत्तं विस्मृतिमन्तम् । उन्मत्तं ग्रहसंनिपातादिना जडं विवेकज्ञानशून्यम् । प्रपन्नं शरणागतम् ॥ ३६ ॥

स्वप्राणान्यः परप्राणैः प्रपुष्णात्यघृणः खलः ।
तद्वधस्तस्य हि श्रेयः यद्दोषाद्यात्यधः पुमान् ॥ ३७ ॥

प्रतिश्रुतश्च भवता पाञ्चाल्यै शृण्वतो मम ।
आहरिष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा ॥ ३८ ॥

प्रकाशिका— उत्तरत्र तदसौ वध्यतां पाप इति द्रौणेर्वधो विधीयते । तत्र ब्राह्मणवधः कथं मया कार्य इत्यर्जुनमानसशङ्कापरिहाराय तद्वधस्तत्कृतपापस्य दण्डरूपो भविष्यति । अतस्तद्धितायैव त्वया कार्य इत्याशयेनाह ॥ स्वप्राणानिति । अघृणः कृपारहितः खल इन्द्रियारामः । तद्वधो दण्डरूपो राज्ञा क्रियमाणस्तस्य परहिंसया स्वप्राणपोषकस्य श्रेयः पुरुषार्थो यद्यस्माद्दोषाद्दण्डः प्रायश्चित्तरहिताद्दोषात्पुमान् दोष्यधो नरकाद्यनर्थं याति । हि शब्देन राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः । विधूतकल्मषा यान्ति स्वर्गं सुकृतिनो यथेति स्मृतिप्रसिद्धिं दर्शयति । हि यस्मादेवं तत्तस्मादसौ वध्यतामिति वा हि शब्दान्वयः । हे मानिनि मानार्हे ॥ ३७, ३८ ॥

तदसौ वध्यतां पाप आतताय्यात्मबन्धुहा ।
भर्तुश्च विप्रियं वीर कृतवान्कुलपांसनः ॥ ३९ ॥

प्रकाशिका— आत्मबन्धुः सुतस्तोकः पुत्रोऽङ्गज उदाहृत इत्यभिदादात्मबन्धून्सुतान्हन्तीति तथा । भर्तुश्च दुर्योधनस्यापि विप्रियं प्रयोजनाभावाद्विप्रियमिव स्थितं शिशुहननं कृतवान् । कुलपांसनः कुलदूषकः ॥ ३९ ॥

एवं परीक्षता धर्मं पार्थः कृष्णेन चोदितः ।
नैच्छद्धन्तुं गुरुसुतं यद्यप्यात्महनं महान् ॥ ४० ॥

प्रकाशिका— यद्यपि चोदितस्तथाऽपितं हन्तुं नैच्छदित्यन्वयः । कुतो नैच्छत् । आत्महनं बालहत्यादिदोषेण स्वात्मानं च हतवन्तम् । यतो महान्विवेकी । पार्थविशेषणमेतत् ॥ ४० ॥

अथोपेत्य स्वशिबिरं गोविन्दप्रियसारथिः ।
न्यवेदयत्तं प्रियायै शोचन्त्या आत्मजान् हतान् ॥ ४१ ॥

प्रकाशिका— गोविन्दः प्रियः सारथिश्च यस्य स तथा । द्रौणिना हतानात्मजानुद्दिश्य शोचन्त्यै प्रियायै द्रौपद्यै ॥ ४१ ॥

तथाहृतं पशुवत्पाशबद्धं अवाङ्मुखं कर्मजुगुप्सितेन ।
निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृपया ननाम ॥ ४२ ॥

प्रकाशिका— तथाऽऽहृतमित्येतदेव विशदयति । पशुवत्पाशबद्धमिति । जुगुप्सितं च तत्कर्म च कर्मजुगुप्सितम् । विशेषणस्य परनिपातः । तेनावाङ्मुखम् । अपकृतं चापकर्तारमपि कृपया निरीक्ष्य ननाम । यतो वामस्वभावा शोभनशीला ॥ ४२ ॥

उवाचासहन्त्यस्य बन्धनाऽनयनं सती ।
मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ॥ ४३ ॥

प्रकाशिका— बन्धनेनानयनम् ॥ ४३ ॥

सरहस्यो धनुर्वेदः सविसर्गोपसंयमः ।
अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात् ॥ ४४ ॥

प्रकाशिका— कथमयं गुरुरित्यतो गुरुपुत्रत्वादित्याह ॥ सरहस्य इति । गोप्यमन्त्रसहितो विसर्गोऽस्त्रप्रयोग उपसंयम उपसंहारस्ताभ्यां सहितोऽस्त्राणां ग्रामः समूहो यस्य द्रोणस्यानुग्रहात् ॥ ४४ ॥

स एष भगवान्द्रोणः प्रजारूपेण वर्तते ।
तस्यात्मनोऽर्धं पत्न्यास्ते नान्वगाद्वीरसूः कृपी ॥ ४५ ॥

प्रकाशिका— प्रजारूपेण पुत्ररूपेण वर्तते । आत्मा वै पुत्रनामाऽऽसीदिति श्रुतेः । अतो गुरुरिति पूर्वेणान्वयः । गुरुपत्नी भक्त्या चायं मुच्यतामित्याशयेनाह ॥ तस्येति । तस्य द्रोणस्यात्मनो देहस्यार्धाङ्गी कृपी सम्प्रत्यास्ते । अर्धत्वे हेतुः । यतः सा पत्नी । ''अर्धो वा एष आत्मनो यत्पत्नीति'' श्रुतेः । ननु भर्तृरि मृते सति सा कथं तिष्ठतीत्यत उक्तम् । नान्वगात्पतिमिति शेषः । यतो वीरसूः पुत्रवती ॥ ४५ ॥

तद्धर्मज्ञ महाभाग भवद्भिः कौरवं कुलम् ।
वृजिनं नार्हति प्राप्तुं पूज्यं वन्द्यमभीक्ष्णशः ॥ ४६ ॥

प्रकाशिका— किं चैतद्धननं तव कुलस्यापि पापसम्पादकमतोऽयं मुच्यतामित्याह ॥ तद्धर्मज्ञेति । स चासौ धर्मश्च तद्धर्मस्तं जानातीति तथा । गुर्वादिभक्तिजनितधर्मज्ञ । भगानां भाग्यानां समुदायो भागो महान् भागो यस्य स तथा तस्य सम्बुद्धिर्महाभाग । अभीक्ष्णशः सर्वदा सर्वैः पूज्यं वन्द्यं च कौरवं कुरोः सम्बधि कुलं भवद्भिः कर्तृभिः वृजिनं ब्रह्मद्रोहनिमित्तं दुःखं प्राप्तुं नार्हति योग्यं न भवति ॥ ४६ ॥

मा रोदीदस्य जननी गौतमी पतिदेवता ।
यथाऽहं मृतवत्साऽऽर्ता रोदिम्यश्रुमुखी मुहुः ॥ ४७ ॥

प्रकाशिका— अस्य वधे एतज्जनन्या दुःखं भविष्यतीत्यतोऽप्ययं मुच्युतामित्याह ॥ मा रोदीदिति । मृतवत्सा मृतपुत्रा ॥ ४७ ॥

यैः कोपितं ब्रह्मकुलं राजन्यैरकृतात्मभिः ।
तत्कुलं प्रदहत्याशु सानुबन्धं शुचार्पितम् ॥ ४८ ॥

प्रकाशिका— विपक्षे बाधकमप्याह ॥ यैरिति । ब्रह्मकुलं कर्तृ तेषां राजन्यानां कुलं कर्म कथं सानुबन्धं सपरिवारं यथा स्यात्तथा । कीदृशं ब्रह्मकुलम् । शुचा शोकेनार्पितं व्याप्तं सत् ॥ ४८ ॥

सूत उवाच –

धर्म्यं न्याय्यं सकरुणं निर्व्यलीकं समं महत् ।
राजा धर्मसुतो राज्ञ्याः प्रत्यनन्दद्वचो द्विजाः ॥ ४९ ॥

प्रकाशिका— धर्म्यं धर्मादनपेतम् । मुच्यतां मुच्यतामिति । न्याय्यं नायादनपेतम् । सरहस्य इत्यादि सकरुणम् । तस्यात्मनोऽर्धमिति निर्व्यलीकं तद्धर्मेति समं मा रोदीति दुःखे स्वसाम्योक्तेः। महत् यैः कोऽपि तमिति निष्ठुरोक्त्या हितोपदेशात् । एवं भूतं राज्ञ्या राजपत्न्या वचः प्रत्यनन्ददनुमोदितवान् । हे द्विजाः ॥ ४९ ॥

नकुलः सहदेवश्च युयुधानो धनञ्जयः ।
भगवान्देवकीपुत्रो ये चान्ये याश्च योषितः ॥ ५० ॥

प्रकाशिका— नकुलादयश्च प्रत्यनन्दन् । युयुधानः सात्यकिः ॥ ५० ॥

तत्राहामर्षितो भीमः तस्य श्रेयान्वधः स्मृतः ।
न भर्तुरात्मनश्चार्थे योऽहन्सुप्तान् शिशून् वृथा ॥ ५१ ॥

प्रकाशिका— तत्र तस्यामवस्थायां तस्य द्रौणेर्वधः श्रेयान् तस्य पापनाशकः स्मृत उक्तस्मृतिसिद्धः । न शिक्षकाणामस्माकं तेन पापमिति भावः । अन्यथाऽस्य नरकादिप्राप्तिप्रसङ्गादित्याशयेनाह ॥ न भर्तुरिति । अहन् जघान । वृथा शब्दोऽवध्यानामप्यर्थे नेत्यर्थकः ॥ ५१ ॥

निशम्य भीमगदितं द्रौपद्याश्च चतुर्भुजः ।
आलोक्य वदनं सख्युरिदमाह हसन्निव ॥ ५२ ॥

प्रकाशिका— सख्युरर्जुनस्य ॥ ५२ ॥

श्री भगवान् उवाच –

ब्रह्मबन्धुर्न हन्तव्य आततायी वधार्हणः ।
मयैवोभयमाम्नातं परिपाह्यनुशासनम् ॥ ५३ ॥

प्रकाशिका— वधार्हणो बधार्हो मयैव शास्त्रकृतोभयमहननं हननं चेत्युभयमाम्नातमभिहितम् । ब्राह्मणो न हन्तव्य आततायिनमायान्तमपि वेदान्तपारगं जिघांसन्तं झिघांसीयात्र तेन ब्रह्महा भवेदित्यादिवाक्यैरिति शेषः । यस्मादभिहितं तस्मात्तदुभवमप्यनुशासनं मदाज्ञारूपम् । श्रुतिस्मृती ममैवाज्ञेति वचनात् ॥ ५३ ॥

कुरु प्रतिश्रुतं सत्यं यत्तत् सान्त्वयता प्रियाम् ।
प्रियंश्च भीमसेनस्य पाञ्चाल्यै मह्यमेव च ॥ ५४ ॥

प्रकाशिका— प्रियां सांत्वयता त्वया । यत्प्रतिश्रुतम् हननं तच्च सत्यं कुरु । मह्यं मम । तत्र वधे भीमस्य प्रियं भवति । अवधे द्रौपद्या द्वये कृष्णस्येति ज्ञेयम् ॥ ५४ ॥

सूत उवाच –

अर्जुनः सहसाऽऽज्ञाय हरेर्हार्दमथासिना ।
मणिं जहार मूर्धन्यं द्विजस्य सहमूर्धजम् ॥ ५५ ॥

प्रकाशिका— हार्दमभिप्रायम् । आज्ञाय ज्ञात्वा । न ह्यशक्तमुभयमाविदध्यादतोऽयमस्याभिप्राय इति ज्ञात्वेत्यर्थः । असिना खड्गेन मूर्धन्यं मूर्ध्नि जातम् । सहमूर्धजं केशैः सहोत्पन्नम् । सहजामिति यावत् ।। ५५ ।।

विमुच्य रशनाबद्धं बालहत्या हतप्रभम् ।
तेजसा मणिना हीनं शिबिरान्निरवापयत् ।। ५६ ।।

प्रकाशिका— तेजसा सामर्थ्येन शरीरकान्त्या वा मणिना च हीनम् । निरवापयन्निःसारितवान् । अनेन कृष्णाभिप्रेतं सर्वं सम्पादितमिति भावः ।। ५६ ।।

बन्धनं द्रविणादानं स्थानान्निर्यापणं तथा ।
एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ।। ५७ ।।

।। इति श्रीमद्भागवते सप्तमोऽध्यायः ।।

तात्पर्यम्— स्वप्नोऽयम् । 'पार्थानुयातमात्मानं द्रौणिः स्वप्ने ददर्श ह । बन्धनं चात्मनस्तत्र द्रौपद्या चैव मोक्षणमि'ति स्कान्दे । तस्मान्नैषीकविरोधः ।। १५-५७ ।। इति प्रथमतात्पर्ये सप्तमोऽध्यायः ।। ७ ।।

प्रकाशिका— ननु भीमोक्तवधस्याकृतत्वात्कथं सर्वं सम्पादितमित्यत आह ।। बन्धनमिति । वधो वधप्रतिनिधिः । दैहिको देहे क्रियमाणोऽन्यो हस्तपादाद्यवयवच्छेदरूपः । न विहित इति शेषः ।। ५७ ।। इति श्रीभगवतटिप्पण्यां सप्तमोऽध्यायः ।। १-७ ।।

अथ अष्टमोऽध्यायः

सूत उवाच –

पुत्रशोकातुराः सर्वे पाण्डवाः सह कृष्णया ।
स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकम् ।। १ ।।

प्रकाशिका— निर्हरणं दाहार्थं नयनम् ।। १ ।।

अथो निशामयामास कृष्णायै भगवान्पुरा ।
पतितायाः पादमूले रुदन्त्या यत्प्रतिश्रुतम् ।। २ ।।

पश्य राज्ञ्यरिदारांस्ते रुदतो मुक्तमूर्धजान् ।
आलिङ्ग्य स्वपतीन्भीमगदाभग्नोरुवक्षसः ॥ ३ ॥

प्रकाशिका— पुरा वनवासदशायां भीमहतान्स्वपतीनालिङ्ग्य मुक्तकेशा रुदतीर्दुर्योधनादि-भार्यास्तव दर्शयिष्य इति स्वेन यत्प्रतिश्रुतं तत्कृष्णाया द्रौपद्या निशामयामास दर्शयामास ॥२,३॥

अथ ते सम्परेतानां स्वानामुदकमिच्छताम् ।
दातुं सकृष्णा गङ्गायां पुरस्कृत्य ययुस्त्रियः ॥ ४ ॥

प्रकाशिका— सम्परेतानां युद्धे मृतानाम् ॥ ४ ॥

ते निनीयोदकं सर्वे विलप्य च भृशं पुनः ।
आप्लुता हरिपादाब्जरजःपूतसरिज्जले ॥ ५ ॥

प्रकाशिका— निनीय दत्वा हरिपादाब्जरजोभिः पूता सरित् गङ्गा तस्य जले पुनर्ग्रहणादावपि स्नाता इति गम्यते ॥ ५ ॥

तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजम् ।
गान्धारीं पुत्रशोकार्तां पृथां कृष्णाञ्च माधवः ॥ ६ ॥

प्रकाशिका— कुरुपतिं युधिष्ठिरम् । सहानुजं भीमादिभिः सहितम् ॥ ६ ॥

सान्त्वयामास मुनिभिर्हतपुत्राञ्छुचार्पितान् ।
भूतेषु कालस्य गतिं दर्शयन्नप्रतिक्रियाम् ॥ ७ ॥

प्रकाशिका—मुनिभिः सह । कालस्य कालनामकस्य हरेर्गतिं पराक्रममप्रतिक्रियां प्रतीकार-शून्याम् ॥ ७ ॥

घातयित्वाऽसतो राज्ञ्याः कचस्पर्शहतायुषः ।
साधयित्वाऽजातशत्रोः स्वाराज्यं कितवैर्हृतम् ॥ ८ ॥

प्रकाशिका— घातयित्वा वधं कारयित्वा । पाण्डवैरिति शेषः । द्रौपदीकचस्पर्शेन हतं नष्ट-मायुर्येषां तान् । न जातः शत्रुर्यस्य स तथोक्तस्तस्य युधिष्ठिरस्य । कितवैः कपटिभिर्दुर्योधनादिभिः ॥ ८ ॥

याजयित्वाऽश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः ।
तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ॥ ९ ॥

आमन्त्र्य पाण्डुपुत्रांश्च शैनेयोद्धवसंयुतः ।
द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः ॥ १० ॥

प्रकाशिका— याजयित्वेत्यादि भाविकथासङ्क्षेपः । त्रिभिस्त्रिगुणफलैः । पञ्चभिरिति शेषः । पञ्चानां त्रिगुणफलकत्वोपपादनायैवोत्तमकल्पकैरित्युक्तम् । दक्षिणादिविषये विहितोत्तमकल्पयुतैरित्यर्थः । यथोक्तं श्रीमहाभारततात्पर्यनिर्णये भगवत्पादैः । "तद्यज्ञपञ्चकमजस्त्रिगुणां स एभ्यः सद्दक्षिणाम् क्रतुपतिर्निखिलामवाप्य । चक्रेऽश्वमेघत्रयमेकमेकं तेषां हरिर्बहुसुवर्णकनामधेयमिति" । शतमन्यवः क्रतवो तस्य स तथा । तस्येन्द्रस्य यशो यथा वामनावतारे ततान तथाऽतनोत् । तनु विस्तारे । व्याप्तंकृतवान् ॥ ९, १० ॥

गन्तुं कृतमतिर्ब्रह्मन्द्वारकां रथमास्थितः ।
उपलेभेऽभिधावन्तीमुत्तरां भयविह्वलाम् ॥ ११ ॥

प्रकाशिका— उत्तरामभिमन्युभार्यामभिमुखं धावतीमुपलेभे ददर्श ॥ ११ ॥

उत्तरा उवाच –

पाहि पाहि महायोगिन्देव देव जगत्पते ।
नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम् ॥ १२ ॥

प्रकाशिका— त्वदन्यमभयं भयरहितं न पश्ये पश्यामि । अतस्त्वदन्यो न प्रार्थनायोग्य इति भावः । यत्र लोके परस्परं मृत्युर्भवति तत्र ॥ १२ ॥

अभिद्रवति मामीश शरस्तप्तायसो विभो ।
कामं दहतु मां नाथ मा मे गर्भो निपात्यताम् ॥ १३ ॥

प्रकाशिका— प्रस्तुतं भयमावेदयति ॥ अभिद्रवतीति । अभिमुखमायातीत्यर्थः । तप्तमायसमयोमयं शल्यं यस्य स तथोक्तः । कामं यथेष्टं निपात्यतामिति । ब्रुवन्तीमिति शेषः । ददर्शेत्यन्वयः ॥ १३ ॥

सूत उवाच—

उपधार्य वचस्तस्याः भगवान्भक्तवत्सलः ।
आपाण्डवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत ॥ १४ ॥

तर्ह्येवाथ भृगुश्रेष्ठ पाण्डवाः पञ्चसायकान् ।
आत्मनोऽभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाददुः ॥ १५ ॥

प्रकाशिका— इदं भूमण्डलमपाण्डवं पाण्डुवंश रहितं कर्तुम् । मुक्तमिति शेषः । तर्ह्येव तदानीमेव । हे भृगुश्रेष्ठ शौनक । सायकान् बाणान् ॥ १५ ॥

व्यसनं वीक्ष्य तत्तेषां अनन्यविषयात्मनाम् ।
सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः ॥ १६ ॥

प्रकाशिका— अनन्यविषयात्मनां न विद्यतेऽन्यविषयमात्मामनो येषां ते तथा । तेषां स्वैकनिष्ठमनसामित्यर्थः ॥ १६ ॥

अन्तस्थः सर्वभूतानामात्मा योगेश्वरो हरिः ।
स्वमाययाऽवृणोद्गर्भं वैराट्याः कुरुतन्तवे ॥ १७ ॥

प्रकाशिका— स्वमायया स्वसामर्थ्येन । वैराट्या विराट्पुत्र्या उत्तराया गर्भमावृणोत् । यथा तदस्त्रं तं न दहेत्तथा स्वसामर्थ्येनावृतमकरोदित्यर्थः । कुरुतन्तवे कुरुसन्तानाय ॥ १७ ॥

यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघञ्चाप्रतिक्रियम् ।
वैष्णवं तेज आसाद्य समशाम्यद् भृगूद्वह ॥ १८ ॥

प्रकाशिका— वैष्णवं तेजः सुदर्शनम् । सामर्थ्यं वा । समशाम्यत्सम्यक् शान्तमासीत् । स्वसंनिधाने तिरोहितमस्त्रं स्वप्रयाणमवेक्ष्य पुनरुद्धतं सुद्रर्शनेन शान्तमकरोदित्याशयः । इदं सर्वं महाभारततात्पर्य- निर्णयानुक्तमत्राधिकमुक्तमिति ज्ञातव्यम् ॥ १८ ॥

मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्युते ।
य इदं मायया देव्या सृजत्यवति हन्त्यजः ॥ १९ ॥

प्रकाशिका— एतद् ब्रह्मास्त्रशमनं मामंस्थामावमन्यस्व । सर्वाश्चर्यमये सर्वाश्चर्यरूपे । अत्रोत्पत्त्यनन्तरमपि ब्रह्मास्त्रेण हतमश्वमेधार्थं पुनरागत्य ररक्षेत्यपि ग्राह्यम् । अन्यथोत्तरत्रानुसंवादासम्भवात् ॥ १९ ॥

ब्रह्मतेजो विनिर्मुक्तैरात्मजैस्सह कृष्णया ।
प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती ॥ २० ॥

प्रकाशिका— ब्रह्मतेजसा ब्रह्मास्त्रेण विनिर्मुक्तैरात्मजैर्युधिष्ठिरादिभिः । प्रयाणाभिमुखम् । सती साध्वी ॥ २० ॥

पृथा उवाच–

नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परम् ।
अलक्ष्यं सर्वभावानामन्तर्बहिरपि ध्रुवम् ॥ २१ ॥

प्रकाशिका— सा त्वा त्वाम् । ननु कनिष्ठं मां कथं नमस्करोषीत्यत उक्तम् । आद्यं पुरुषमिति । कुतः । प्रवृतेः परम् । तदपि कुतः । ईश्वरं प्रकृतेरपि नियन्तारम् । अत एव सर्वभूतानामन्तर्बहिश्च ध्रुवम् । सर्वदा स्थितमिति वक्तव्ये ध्रुवमिति वचनं भूतनाशेऽपि न तव नाश इति सूचयितुम् । तथाऽप्यलक्ष्यमपरोक्षेण ज्ञातुमशक्यम् ॥ २१ ॥

मायायवनिकाच्छन्नो मयाऽधोक्षज मर्त्यया ।
न लक्ष्यसे मूढदृशा नटो नाटयचरो यथा ॥ २२ ॥

प्रकाशिका— त्वामित्यपरोक्षतया निर्दिष्टस्य कथमलक्ष्यत्वमित्यतोऽलक्ष्यत्वं विशदयति ॥ मायेति । मायैव जवनिकाऽऽच्छादिका तया छन्न आच्छादितो जीवगतपरमाच्छादिक मायाविषय इत्यर्थः । अत एवाधोक्षजोऽधःकृतेन्द्रियजन्यज्ञानः । ब्रह्मादिभिर्दृश्यमानत्वात्कथमेतदित्यत उक्तम् ॥ मर्त्येयेति । मनुष्यैरपि साधनपरिपाके दृश्यत एवात उक्तम् ॥ मूढदृशेति । देहाद्यभिमानवत्त्वेनेत्यर्थः । अवताररूपस्य दृश्यत्वेऽपि न तस्य सर्वभूतान्तः स्थितत्वादिरूपं माहात्म्यं तदनुग्रहमन्तरेणापरोक्षीकर्तुं शक्यमिति भावः । नाट्यचरो नर्तनकारी नटो यथा भरत शास्त्राङ्गेन दृश्यमानोऽप्यङ्गुल्याद्यभिनयविशेषवत्वेन न लक्ष्यते तथेत्यर्थः ॥ २२ ॥

तथा परमहंसानां मुनीनाममलात्मनाम् ।
भक्तियोगविधानार्थं कथं पश्येमहि स्त्रियः ॥ २३ ॥

तात्पर्यम्— भक्तियोगविधानविषयम् ॥ २३ ॥

प्रकाशिका— भक्तिविधानेनाहं द्रष्टुं शक्य इत्यत आह ॥ तथेति । अत्र मुनीनां भक्तियोगविधानार्थं वयं कथं पश्येमहीति व्यधिकरणमुच्यते । अतोऽर्थ शब्दस्य विवक्षितमर्थं दर्शयति ॥ भक्तियोगेति । भक्तियोगस्य विधानं करणं तस्य विषयमित्यर्थः । तथा चात्रार्थ शब्दो विषयपर इति भावः ॥ ततश्चायं श्लोकार्थः ॥ तथा शब्दः समुच्चये । परमहंसानां सनकादीनां मुनीनां ध्यानशीलानाममलात्मनां देहाद्यभिमानशून्यमनसां भक्तिलक्षणोपायविषयं त्वां कथं पश्येमहि । सुदृढस्नेहपूर्वकमिति शेषः । यतःस्त्रियोऽतथाभूता इत्यर्थः । तथा च त्वं मादृशीनां भक्तियोगकरणविषयोऽपि न भवसीत्यर्थः ॥ २३ ॥

कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥ २४ ॥

नमः पङ्कजनाभाय नमः पङ्कजमालिने ।
नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये ॥ २५ ॥

यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता ।
विमोहिताहश्च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात् ॥ २६ ॥

प्रकाशिका— एवं ज्ञानभक्तिविधानयोरशक्यत्वमुक्त्वा नमस्कारविधानमेवास्मकं पुरुषार्थसाधनमित्याशयेन पुनःपुनर्नमति ॥ कृष्णायेति । गवां विन्दो लाभो यस्य स तथा । तस्मै । तत्कृतानुपकाराननुस्मरति । द्वाभ्याम् । रुद्धा कारागृह इति शेषः ॥ २४, २५, २६ ॥

विषान्महाग्नेः पुरुषाददंशनादसत्सभायाः वनवासकृच्छ्रतः ।
मृधे मृधेऽनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः ॥ २७ ॥

प्रकाशिका— विपद्गणं विविच्याह ॥ विषादिति । विषाद्भीमाय दत्तकालकूटविषात् । महाग्नेर्जतुगृहदाहकाग्नेः । पुरुषादा हिडिम्बबकादयस्तेषां दंशनाद्भक्षणात् । असतां दुर्योधनादीनां सभाया अभितो रक्षितास्म अभवाम ॥ २७ ॥

विपदः सन्तु नः शश्वत्तत्र तत्र जगत्पते ।
भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम् ॥ २८ ॥

तात्पर्यम्— अपुनर्भवं दर्शयति ॥ २८ ॥

प्रकाशिका— त्वद्दर्शनहेतुत्वाद्विपत्परम्परैव श्रेयसीत्याशयेनाह ।। बिपद इति । तत्र तत्र सांसारिकव्यापारेषु । यद्यासु विपत्सु । स्मरणे सतीति शेषः । आपत्प्राप्तौ भवतः स्मरणं भवति । तेन च दर्शनमित्यर्थः । अत्रापुनर्भवदर्शनमित्यपुनर्भवस्य दर्शनमिति व्याख्यानेऽसङ्गतिमालोच्यान्वयार्थमाह ।। अपुनर्भवमिति । मोक्षमित्यर्थः । दर्शयति सम्पादयति । इत्यपुनर्भवदर्शनमिति शेषः ।। २८ ।।

जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान् ।
नार्हं इत्यभिधातुं वै त्वामकिञ्चनगोचरम् ।। २९ ।।

प्रकाशिका— सम्पदस्तु त्वद्दर्शनविरोधिन्य इति कैमुत्येनाह ।। जन्मैश्वर्येति । सत्कुले जन्म । ऐश्वर्यं स्वामित्वम् । श्रुतं श्रवणजनितविद्या श्री धनसम्पत्तिः । ताभिर्वर्धमानमद इत्यभिधातुं कृष्णाय वासुदेवायेत्युक्तप्रकारेणाभिधातुं वै एव नार्हो न समर्थस्तदा स्मर्तुं द्रष्टुं वा नार्ह इति किं वाच्यमिति भावः । कुतो नार्ह इत्यत उक्तम् ।। अकिञ्चनगोचरमिति ।। अकिञ्चनानां जन्मादिजनितमदशून्यानामभिधानादिविषयम् ।। २९ ।।

नमोऽकिञ्चनवित्ताय निवृत्तगुणवृत्तये ।
आत्मारामाय शान्ताय कैवल्यपतये नमः ।। ३० ।।

प्रकाशिका— भक्त्युद्रेकात्पुनर्नमति ।। नम इति । अकिञ्चना भक्तास्त एव वित्तं यस्य स तथा तस्मै । निवृत्ताः सत्त्वादिगुणानां वृत्तयः कार्याणि यस्मात्स तथा तस्मै । अत एवात्मारामाय स्वरमणाय शान्ताय सुखपूर्णाय । कैवल्यपतये मोक्षस्वामिने ।। ३० ।।

मन्ये त्वां कालमीशानम् अनादिनिधनं परम् ।
समं चरन्तं सर्वत्र भूतानां यन्मिथः कलिः ।। ३१ ।।

तात्पर्यम्— तत्तद्योग्यतया समत्वम् ।। ३१ ।।

प्रकाशिका— न त्वं वसुदेवपुत्र इत्याशयेनाह ।। मन्य इति । कालं संहारकमीशानं जगत्प्रेरकम् । आदिनिधनशून्यम् । परं लोकविलक्षणम् । तदेव दर्शयति । सममिति । अत्र देवासुरमनुष्येष्वेकप्रकारेणैव चरन्तमित्यन्यथाप्रतीतिवारणाय विवक्षितं समत्वं दर्शयति । तत्तद्योग्यतयेति। तत्तद्योग्यता यादृशी तदनुरूपमेव फलं तदाति न योग्यतातिक्रमेणातो भगवान्सम इत्युच्यत इत्यर्थः। लोके तु नैवमित्याह ।। भूतानामिति ।लोके भूतानां प्राणिनां मिथोऽन्योन्यं यद्यस्मात्कलिः कलहः। योग्यतानुसारेण समत्वं नेत्यर्थः । अतस्तस्य परत्वमिति भावः ।। ३१ ।।

न वेद कश्चिद्भगवंश्चिकीर्षितं
तवेहमानस्य नृणां विडम्बनम् ।
न यस्य कश्चिद्दयितोऽस्ति कर्हिचित्
द्वेष्यश्च यस्मिन् विषमा मतिर्नृणाम् ॥ ३२ ॥

प्रकाशिका— नन्वेवं योग्यतानुसारेण मम सर्वत्र समत्वे लोकाः । किमिति पाण्डवेष्वेव स्निग्धो न दुर्योधनादिष्वतो विषम इति मयि विषमां मतिं कुर्वन्तीत्यपेक्षायां त्वच्चिकीर्षिताज्ञानादेव तथा तेषां मतिरित्याह ॥ न वेदेति । चिकीर्षितं कर्तुमिष्टम् । योग्यतानुसारेण समत्वं कुतो न वेदेत्यत उक्तम् । नृणां विडम्बनमनुकरणमीहमानस्य कुर्वत इति । मनुष्यवदेवाचरणं कुर्वत इत्यर्थः। कथं भूतस्य तव । यस्य योग्यतातिरेकेण कश्चिद्दयितः प्रियो नास्ति कर्हिचित्कदाऽपि द्वेष्यश्च नास्ति । अत एव यस्मिंश्च विषये नृणां विषमा मतिः । प्रसिद्धा तस्य तवोत्यन्वयः । लोकानुकरणेनास्मास्वयमप्येक इति बुद्ध्वा त्वच्चिकीर्षितमज्ञात्वा त्वयि वैषम्यबुद्धिं कुर्वन्तीति भावः ॥ ३२ ॥

जन्म कर्म च विश्वात्मन्नजस्याकर्तुरात्मनः ।
तिर्यङ्नृपशुयादस्सु तदत्यन्तविडम्बनम् ॥ ३३ ॥

प्रकाशिका— नृणां विडम्बनमीहमानस्येत्युक्तमेव विशदयति ॥ जन्मेति । हे विश्वात्मन्पूर्णस्वरूप । अजस्योत्पत्तिशून्यस्यात्मनः स्वामिनः प्रयोजनोद्देशेनाकर्तुस्तव तिर्यङ्नृपशुयादःसु यज्जन्म यच्च तज्जात्यनुसारेण कर्म तदत्यन्तविडम्बनमित्यन्वयः । तिर्यक्षु वराहादिरूपेण । नृषु रामादिरूपेण । ऋषिषु महिदासादिरूपेण । यादःसु जलचरेषु मत्स्यादिरूपेणेति द्रष्टव्यम् ॥३३॥

गोप्याददे त्वयि कृतागसि दाम तावद्
या ते दशाश्रुकलिलाञ्जनसम्भ्रमाक्षम् ।
वक्त्रं विनम्य भयभावनया स्थितस्य
सा मां विमोहयति भीः प्रति यं बिभेति ॥ ३४ ॥

प्रकाशिका— इदं चातिविडम्बनं मम मोहकमित्याशयेनाह ॥ गोपीति । गोपी यशोदा त्वयि कृतागसि दधिभाण्डस्फोटनं कृतवति सतीति यावत् । यदा त्वां बद्धुं दाम पशुबन्धकरज्जुमाददे तावत्तदा या ते दशाऽवस्था सा मां विमोहयति । कथं भूतस्य । अश्रुभिः कलिलं व्यामिश्रमञ्जनं ययोस्ते च ते सम्भ्रमे व्याकुलेऽक्षिणी यस्मिंस्तद्वक्त्रं विनम्याधःकृत्वा ताडयिष्यतीति भयस्य

भावनया ध्यानेनास्थितस्य । पुनः कथं भूतस्य । यं त्वां प्रति भीरपि भयाभिमानिदेवता स्वयं बिभेति ॥ ३४ ॥

केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये ।
यदोः प्रियस्यान्ववाये मलयस्येव चन्दनम् ॥ ३५ ॥

प्रकाशिका— मनुष्यानुकरणं कुर्वतस्तव चिकीर्षितस्य दुर्ज्ञेयत्वादेव ज्ञानिनस्त्वदवतारप्रयोजनं बहुधा वर्णयन्तीत्याह ॥ केचिदिति चतुर्भिः । पुण्यश्लोकस्य प्रियस्य यदोरन्ववाये वंशे । मलयस्य पर्वतस्य कीर्तये चन्दनमिव ॥ ३५ ॥

अपरे वसुदेवस्य देवक्यां याचितोऽभ्यगात् ।
अजस्त्वमस्य क्षेमाय वधाय च सुरद्विषाम् ॥ ३६ ॥

भारावतारणायान्ये भुवो नाव इवोदधौ ।
सीदन्त्या भूरिभारेण जातो ह्यात्मभुवार्थितः ॥ ३७ ॥

भवेऽस्मिन् क्लिश्यमानानामविद्याकामकर्मभिः ।
श्रवणस्मरणार्हाणि करिष्यन्निति केचन ॥ ३८ ॥

प्रकाशिका— याचितः । देवैरिति शेषः । अभ्यगात् । पुत्रत्वमिति शेषः । प्रथमपुरुषश्छान्दसः । अस्य सज्जनवर्गस्य । आहुरित्युत्तरश्लोकत्रयेऽप्यनुवर्तते । उदधौ हिरण्यादिभूरिभारेण सीदन्त्या आसन्नमज्जनाया नाव इव । असुरजनभारेण सीदन्त्याः खिन्नाया भुवो भारावतारणायान्ये प्राज्ञास्त्वं जात इत्याहुः । हि यस्मात्तदर्थमात्मभुवा ब्रह्मणाऽर्थितः । अर्हाणीत्यनन्तरं कर्माणीति शेषः । तत्क्लेशनिवृत्तये करिष्यन् जात इति केचिदाहुरित्यर्थः । भवे क्लिश्यमानानां त्वत्कर्मश्रवणस्मरणैः ॥ ३६-३८ ॥

शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः
स्मरन्ति नन्दन्ति तवेहितं जनाः ।
त एव पश्यन्त्यचिरेण तावकं
भवप्रवाहोपरमं पदाम्बुजम् ॥ ३९ ॥

प्रकाशिका— किं साक्षादेव क्लेशनिवृत्तिर्भवति नेत्याह ॥ शृण्वन्तीति । नन्दंत्यन्यैः कीर्त्यमानमभिनन्दन्ति । ईहितं चेष्टितम् । भवप्रवाहस्य सांसारिकक्लेशपरम्पराया उपरमो निवृत्तिर्यस्मात्तत्तावकं पदाम्बुजं पश्यन्ति । श्रवणादीनामपरोक्षज्ञानद्वारैव क्लेशनिवर्तकत्वादिति भावः ॥३९॥

अप्यद्य नस्त्वं स्वकृतेहितः प्रभो
जिहाससि स्वित्सुहृदोऽनुजीविनः ।
येषां न चान्यद्भवतः पदाम्बुजा-
त्परायणं राजसु योजितांहसाम् ॥ ४० ॥

प्रकाशिका— इदानीं तवास्मत्परित्यागोऽनुचित इत्याशयेनाह ॥ अपीति चतुर्भिः । सुहृदोऽनुजीविनः किङ्कराश्च । नोऽस्मान् । अद्यापि स्वित् किं स्वित् । त्वं जिहाससिद्वारकागमनव्याजेन त्यक्तुमिच्छसि । एषामस्माकमन्यत्परायणं नास्ति । कुतः । राजसु योजितं कृतमंहोऽपराधो यैस्तेषां सर्वेऽप्यस्माकं वैरिण इति भावः । तान्सुहृद इत्यन्वयः । कथं भूतस्त्वम् । स्वकृते हितः स्वानां कृतमीहितमपेक्षितं येन स तथा । स्वेनैव कृतमीहितं चेष्टितं यस्येति वा । स्वतन्त्रचेष्टित इत्यर्थः । स्वानामर्थे कृतं चेष्टितं यस्येति वा ॥ ४० ॥

ते वयं नामरूपाभ्यां यदुभिः सह पाण्डवाः ।
भवतो दर्शनं यर्हि हृषीकाणामिवेशितुः ॥ ४१ ॥

तात्पर्यम्— तर्हि भवतो दर्शनं तदा यदूनामस्माकं नामरूपे ॥ ४१ ॥ इति प्रथमतात्पर्ये अष्टमोऽध्यायः ॥ ८ ॥

प्रकाशिका— ननु तव सुहृदो यादवाः पुत्राः पाण्डवाश्च शूरा रक्षकाः सन्ति । अतः कथमन्यत्परायणं नास्तीति वचनमित्यत आह ॥ ते वयमिति । अत्राभिप्रेतं तात्पर्यं दर्शयति ॥ यर्हीति । तदेत्यध्याहृतम् । अस्माकं पाण्डवानाम् । नामरूपे ख्यातिसमृद्धी भवत इति भाव इति शेषः ॥ ततश्चायं श्लोकार्थः ॥ यर्हि यदा भवतो दर्शनं सन्निध्यं तदैव ते प्रसिद्धा यदुभिः सह विद्यमाना वयं पाण्डवाः । नाम्ना ख्यात्या रूपेण समृद्ध्या च युक्ताः । भवत्सान्निध्येनैवास्माकं यदूनां च नामरूपे नान्यथेति भावः । अत्र दृष्टान्तः । यथा हृषीकाणामिन्द्रियाणामीशितुः प्राणस्य सान्निध्ये शरीरस्य नामरूपे भवतस्तद्वत् ॥ ४१ ॥

नेयं शोभिष्यते तत्र यथेदानीं गदाधर ।
त्वत्पदैरङ्किता भाति स्वलक्षणविलक्षितैः ॥ ४२ ॥

प्रकाशिका— किं चेयं नगरी यथेदानीं स्वैरसाधारणैर्वज्राङ्कुशरेखादिरूपै- र्लक्षणैर्विलक्षितै- र्विशेषेण चिह्नितैस्त्वत्पदैरङ्किता सती भाति । तत्र तदा त्वयि निर्गते सति तथा न शोभिष्यते । ॥ ४२ ॥

इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः ।
वनाद्रिनद्युदन्वन्तो ह्येधन्ते तव वीक्षिताः ॥ ४३ ॥

प्रकाशिका— न केवलमस्मन्नगर्या एव त्वत्सन्निधानेन शोभा किन्तु जनपदानां चेत्याह ॥ इमे इति । सुष्टु ऋद्धाः समृद्धा वनाद्रिनदीषूदकवन्तः सन्तः । हि यस्मादेधन्ते तस्मादस्मत्त्यागोऽनुचित इत्यर्थः ॥ ४३ ॥

अथ विश्वेश विश्वात्मन् विश्वमूर्ते स्वकेषु मे ॥
स्नेहपाशमिमं छिन्दि ध्रुवं पाण्डुषु वृष्णिषु ॥ ४४ ॥

प्रकाशिका— गमने पाण्डवानामकुशलम् । अगमनेच यादवानामकुशलमित्युभयतो व्याकुल- चित्ता सती तेषु स्नेहपाशनिवृत्तिं प्रार्थयते ॥ अथेति विश्वात्मन् विश्वव्यापिन् । विश्वमूर्ते विश्वान्तर्गत अनन्तमूर्ते इति वा । स्वकेष्वित्युक्तं विवृणोति । पाण्डवेषु वृष्णिष्विति । अथ शब्दः कात्स्न्यर्थः । कृत्स्नं स्नेहपाशमिति । ननु हरिभक्तेषु पाण्डवादिषु स्नेहो गुण एवातः कथं तच्छेद- प्रार्थनमित्यत उक्तम् ॥ इममिति । पुत्रमित्रत्वादिनिमित्तमित्यर्थः ॥ ४४ ॥

त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत् ।
रतिमुद्वहतादद्धा गङ्गेवौघमुदन्वति ॥ ४५ ॥

प्रकाशिका— एवं विषयस्नेहच्छेदानन्तरं मम त्वय्येव स्नेहप्रवाहोऽस्त्विति प्रार्थयते ॥ त्वयीति । अन्यत्र स्नेहपाशनाशेनानन्यविषया सती मे मतिर्बुद्धिरूपं मनः । हे मधुनामक यादवविशेषाणां पते । त्वयि रतिः स्नेहम् । उद्वहतादुत्कृष्टतया प्राप्नुयात् । ओघं परम् । जलप्रवाहमिति यावत् । उदन्वति समुद्रे ॥ ४५ ॥

श्रीकृष्ण कृष्णसख वृष्णिवृषावनिध्रुग्राजन्यवंशदहनामरवन्यवीर्य ।
गोविन्द गोद्विजसुरार्तिहरावतार योगेश्वराखिलगुरो भगवन्नमस्ते ॥ ४६ ॥

प्रकाशिका— एवं प्रार्थयित्वा पुनः प्रणमति ॥ श्रीकृष्णेति । श्रिया सहितः कृष्णः श्रीकृष्णस्तस्य सम्बुद्धिः श्रीकृष्णेति । ते नमः । तदवतारकृत्याननुस्मरन्ती बहुधा सम्बोधयति ।

कृष्णसख अर्जुनस्य सखे । वृष्णीनां यादवविशेषाणामृषभ श्रेष्ठ । अवन्यै भूम्यै द्रुह्यन्ति ये राजान्यस्तेषां वंशस्य दहन । अमरस्तुतपराक्रम ॥ ४६ ॥

सूत उवाच–

पृथयेत्थं कलपदैः परिगीताखिलोदयः ।
मन्दं जहास वैकुण्ठो मोहयन्योगमायया ॥ ४७ ॥

तां बाढमित्युपामन्त्र्य प्रविश्य गजसाह्वयम् ।
स्त्रियश्च स्वपुरं यास्यन्प्रेम्णा राज्ञा निवारितः ॥ ४८ ॥

इति श्रीमद्भागवते अष्टमोऽध्यायः ॥

प्रकाशिका— कलानि मधुराणि पदानि येषु तैर्वाक्यैः परिगीतः स्तुतः । अखिल उदयो महिमा यस्य स तथा । मन्दमीषद्योगमायया योगसामर्थ्येन । त्वयि मेऽनन्यविषया मतिरिति यत्प्रार्थितं तद्बाढमित्युक्त्वा तां द्रौपाद्याः स्त्रियश्चोपामन्त्र्यानुज्ञाप्य रथस्थानात् गजसाह्वयं गजसमाननामधेयं पुरं प्रविश्य राज्ञा युधिष्ठिरेण त्वत्प्रयाणसमयेऽस्माकमस्त्रदर्शनाद्यनिष्टजातं तत्त्वया परिहृतं त्वयि गते पुनरुद्भूतं भविष्यतीति शङ्कया विवारित इति भावः ॥ ४७, ४८ ॥ इति श्रीभागवतटिप्पण्यामष्टमोऽध्यायः ॥ १-८ ॥

अथ नवमोऽध्यायः

सूत उवाच –

व्यासाद्यैरीश्वरेहाज्ञैः कृष्णेनाद्भुतकर्मणा ।
प्रबोधितोऽपीतिहासैः नाबुध्यत शुचार्पितः ॥ १ ॥

प्रकाशिका— अथ भीष्मस्मरणं वक्तुमुपोद्घातकथां प्रस्तौति ॥ व्यासाद्यैरिति । व्यासाद्यैः प्रबोधितोऽपि शुचार्पितो व्याप्तः सन्नाबुद्ध्यत । विष्णुद्विट्तदनुबन्धिनिग्रहः परो धर्म इति ज्ञानं न प्राप । कथं भूतैर्व्यासाद्यैः । ईश्वरस्य पाण्डवान्निमित्तीकृत्य या भूभारहरणादिरूपा चेष्टा तां पाण्डवानां धर्मादिवृद्ध्यर्थमेव जानद्भिः । भूभारहरणेन जन्यं फलंमुख्यमस्य मा भूदित्यभिसन्धिना बहिः प्रबोधयन्नप्यन्तः संशयमेव दृढीचकारेति सूचयितुमद्भुतकर्मणेत्युक्तम् । इतिहासैः पुरावृत्त-कथाविशेषैः ॥ १ ॥

आह राजा धर्मसुतः चिन्तयन्सुहृदां वधम् ।
प्राकृतेनात्मना विप्राः स्नेहमोहवशं गतः ॥ २ ॥

प्रकाशिका— इत्थं बोधितोऽपि धर्मेऽधर्मबुद्धिः किं चकारेत्यत आह ॥ आहेति । हे विप्राः । प्राकृतेन धर्माधर्मविवेकशून्येनात्मना चित्तेन । ननु धर्मावतारस्यास्य कथं धर्मेऽधर्मबुद्धिरित्यत उक्तम् ॥ स्नेहमोहवशं गत इति । स्नेहेन जातो मोहो ममैते इति मिथ्याज्ञानं तद्वशं प्राप्त इत्यर्थः । स्नेहेपि निमित्तप्रदर्शनाय सुहृदां वधं चिन्तयन्नित्युक्तम् ॥ २ ॥

अहो मे पश्यताज्ञानं हृदि रूढं दुरात्मनः ।
पारक्यस्यैव देहस्य बह्व्यो मेऽक्षौहिणीर्हताः ॥ ३ ॥

प्रकाशिका— पारक्यस्य परकीयस्य श्वसृगालाद्याहाररूपस्य देहस्यार्थे मे मया बव्ह्योऽक्षौहिणीरक्षौहिण्य उभयत्रापि सत्सु । अक्षौहिणीप्रमाणमन्यत्रोक्तम् । ''अक्षौहिणीप्रसङ्ख्यानं रथानां द्विजसत्तमाः । सङ्ख्यागणनतत्त्वज्ञैः सहस्राण्येकविंशतिः । शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः । गजानां च प्रसङ्ख्यानमेतदेव प्रकीर्तितम् । ज्ञेयं शतसहस्रं तु सहस्राणि नवैव तु । नराणामपि पञ्चाशच्छतानि त्रीणि चैव हि । पञ्चषष्ठिसहस्राणि तथाश्वानां शतानि च । दशोत्तराणि षट् प्राहुः सङ्ख्यातत्त्वविदो जनाः । एतामक्षौहिणां प्राहुर्यथावदिह सङ्ख्ययेति'' । अन्यत्रापि । अक्षौहिण्याः परिमाणं ''खगाष्टैकद्विकैर्गजैः । रथैरेतैर्हयैस्त्रिघ्नैः । पञ्चघ्नैश्च पदातिभि''रिति । अस्यार्थः । खमाकाशमिति शून्यस्य नाम । अगाः पर्वता इति सप्तसङ्ख्याकस्य वैपरीत्येन चाङ्काः स्थापनीयाः । त्रिघ्नैस्त्रिगुणितैः पञ्चघ्नैः पञ्चगुणितैः ॥ ३ ॥

न मे स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः ।
बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः ॥ ४ ॥

प्रकाशिका— मे निरयान्मोक्षो निर्गमनं वर्षाणामयुतायुतैरपि न न स्याद्धि प्रमाणप्रसिद्धमेतत् । कथं भूतस्य मे । बाला अभिमन्युप्रभृतयो द्विजा द्रोणादयः सुहृदो द्रुपदादयः । मित्राणि सखादयोऽश्वत्थामादयः पितरो भुरिश्रव प्रभृतयः पितृव्या भ्रातरो दुर्योधनादयो गुरवो भीष्मादयस्तान्द्रुह्यतीति ध्रुट् तस्य ॥ ४ ॥

नैनो राज्ञः प्रजाभर्तुः धर्मो युद्धे वधो द्विषाम् ।
इति मे न तु बोधाय कल्पते शाश्वतं वचः ॥ ५ ॥

तात्पर्यम्— **यः पदातिं हन्ति स भवति चातुर्मास्ययाजी यः सादिनं सोऽग्निष्टोमस्य यो हन्ति गजरथौ सोऽश्वमेधराजसूयाभ्यामि'त्यादि शाश्वतं वचः ॥ ५ ॥**

प्रकाशिका— ननु श्रुतिविहिते विष्णुविद्विषां वधे कथमधर्मबुद्धिरित्यतः श्रुतेरर्थान्तर-परत्वमित्याशयेनाह ॥ नैन इति । शुद्धे द्विषां वधो राज्ञ एनं पापं न । किन्तु धर्म इत्यतः शाश्वत-मपौरुषेयं वचस्तत्तु मे बोधाय दुर्योधनादिहननस्य धर्मत्वबोधनाय न तु नैव । कुत इत्यत उक्तम् ॥ प्रजाभर्तुरिति । अयं भावः । स्वप्रजानामन्यतो बाधे प्रसक्ते तद्वधस्तत्र कर्तव्यतयोक्तः । मद्भ्रात्रा दुर्योधनेन स्वप्रजायां पाल्यमानायां मया केवलं राज्यलोभेन तद्वधस्य कृतत्वात्पापमेवेदमिति । अत्र किं तच्छाश्वतं वच इत्यपेक्षायां तद्दर्शयति ॥ यः पदातिमिति । सादिनमश्वारोहम् । अग्निष्टोम-स्याष्टोमेन याजी पूजक इत्यनुवर्तते । एवमग्रेऽपि । शाश्वतं वचोऽपौरुषेयं वाक्यम् । अप्रामाण्य-शङ्का नार्हेति सूचनायेदम् । अत एवार्थान्तरं प्रजाभर्तुरित्यनेन सूचितम् ॥ ५ ॥

स्त्रीणां मद्धतबन्धूनां द्रोहो योसाविहान्वितः ।
कर्मभिर्हयमेधीयैर्नाहं कल्यो व्यपोहितुम् ॥ ६ ॥

प्रकाशिका— अस्तु वा युद्धे पुंसां द्वेषिवधो धर्मः । मया हता बन्धवो यासां तास्तासां स्त्रीणां योऽसौ द्रोहो वैधव्याद्यापादनजन्योऽधर्म इह युद्धोचितो मयि सम्बन्धस्तमहं हयमेधीयैरश्व-सम्बन्धिभिः कर्मभिर्व्यपोहितुमपाकर्तुं कल्पः समर्थो नास्मि ॥ ६ ॥

यथा पङ्केन पङ्काम्भः सुरया वा सुराकृतम् ।
भूतहत्यां तथैवैतां न यज्ञो मार्ष्टुमर्हति ॥ ७ ॥

प्रकाशिका— कुत इत्यतो दृष्टान्तमुखेनोपपादयति ॥ यथेति । यथा घनीभूतेन पङ्केन पङ्काम्भः पङ्कमिश्रिताम्भो न युज्यते न शुद्धं भवति । यथा वा सुरा बिन्दुना मिश्रीकृतं क्षीरादिकं बाह्या सुरया न युज्यते । अधिकाशुद्धिहेतुत्वात् । तथैव तां मया कृतां भूतहत्यां बालद्विजादि-रूपप्राणिहिंसाम् । तज्जन्यमधर्ममिति यावत् । मार्ष्टुमपाकर्तुम् । यज्ञस्यापि पशुहिंसादियुतत्वेन पापसाधनत्वादिति भावः । ननु यागीयपशुहिंसाया अधर्मसाधनत्वं कथं धर्मसुतो वदतीति चेत् । अयमिहाभिप्रायस्तस्य । सत्यं ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणाहुतमित्यादिनोक्तं हर्यनुसन्धान-पूर्वककृतं यज्ञादिकं पापसाधनं न भवति प्रत्युत तच्छोधकमेवेति । इदानीं मया सुहृत्स्नेहमोह-कलिलेन मनसा न हर्यनुसन्धानं कर्तुं शक्यम् । अतस्तद्विधुरो यज्ञो मया कृतश्चेत्पापहेतुरेव भविष्यतीति ॥ ७ ॥

सूत उवाच –

इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया ।
ततो विशसनं प्रायाद्यत्र देवव्रतोऽपतत् ॥ ८ ॥

प्रकाशिका— विवित्सया वेदितुमिच्छया । विशसनं युद्धस्थानं कुरुक्षेत्रम् । देवव्रतो भीष्मः ॥ ८ ॥

तदा तद्भ्रातरः सर्वे सदश्वैस्स्वर्णभूषितैः ।
अन्वगच्छन्रथैर्विप्रा व्यासधौम्यादयस्तथा ॥ ९ ॥

प्रकाशिका— सन्तः श्रेष्ठा अश्वा येषु तै रथैः । व्यासधौम्यादयो विप्राः ॥ ९ ॥

भगवानपि विप्रर्षे रथेन सधनञ्जयः ।
स तैर्व्यरोचत नृपः कुबेर इव गुह्यकैः ॥ १० ॥

प्रकाशिका— गुह्यकैर्यक्षैः ॥ १० ॥

दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरम् ।
प्रणेमुः पाण्डवाः भीष्मं सानुगाः सहचक्रिणः ॥ ११ ॥

प्रकाशिका— निपतितं भीष्ममित्यन्वयः । दिवः स्वर्गाच्च्युतं भूमौ निपतितम् । अमरं देवमिव । द्योतमानमिति शेषः ॥ ११ ॥

तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम ।
राजर्षयश्च तत्रासन्द्रष्टुं भरतपुङ्गवम् ॥ १२ ॥

प्रकाशिका— तत्र तदा तत्रासन् तत्क्षणमेव योगसामर्थ्येन तत्रागता आसन्नित्यर्थः । भरतपुङ्गवं भीष्मम् । द्रष्टुमितिशेषः ॥ १२ ॥

पर्वतो नारदो धौम्यः भगवान्बादरायणः ।
बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ॥ १३ ॥

प्रकाशिका— रेणुकासुतः परशुरामः ॥ १३ ॥

वसिष्ठ इन्द्रप्रमदस्त्रितो गृत्समदोऽसितः ।
कक्षीवान्गौतमोऽत्रिश्च कौशिकोऽथ सुदर्शनः ॥ १४ ॥

प्रकाशिका— कौशिको विश्वामित्रः ॥ १४ ॥

अन्ये च मुनयो ब्रह्मन्ब्रह्मरातादयोऽमलाः ।
शिष्यैरुपेता आजग्मुः कश्यपाङ्गिरसादयः ॥ १५ ॥

प्रकाशिका— ब्रह्मरातः शुकः । अङ्गिरसो बृहस्पतिः ॥ १५ ॥

तान्समेतान्महाभाग उपलभ्य वसूत्तमः ।
पूजयामास धर्मज्ञो देशकालविभागवित् ॥ १६ ॥

प्रकाशिका— वसूत्तमो भीष्मः । कथं भूतः । देशकालयोः शक्ताशक्तसम्बन्धित्वेन द्वैविध्यज्ञानी । शक्तेन हि महतां दूरतः प्रत्युद्गमः साष्टाङ्गप्रणामपूर्वकं पूजा कार्या । अशक्तेन तु स्वयं यस्मिन्देशे काले वा तिष्ठति तत्रैव स्थित्वा मानसं वाचकं वा प्रणामादिकं कार्यमिति जानन्स्वयमपि मनसा वचसा वा प्रणामादिकं कृतवानिति भावः ॥ १६ ॥

कृष्णश्च तत्प्रभावज्ञ आसीनं जगदीश्वरम् ।
हृदिस्थं पूजयामास माययोपात्तविग्रहम् ॥ १७ ॥

प्रकाशिका— हृदि स्थितं पुरत आसीनम् । माययेच्छयोपात्तः प्रकटीकृतो विग्रहो यस्य ॥ १७ ॥

पाण्डुपुत्रानुपासीनान्प्रश्रयप्रेमसन्नतान् ।
अभ्याचष्टानुरागास्रैरन्धीभूतेन चक्षुषा ॥ १८ ॥

प्रकाशिका— उपासीनान्समीपे उपविष्टान् । प्रश्रयो विनयः प्रेमः स्नेहस्ताभ्यां सम्यङ्नतान्नम्रान् अभ्याचष्ट ददर्श । अभ्यभाषेति वा ॥ १८ ॥

भीष्म उवाच—

अहो कष्टमहोऽन्याय्यं यद्यूयं धर्मनन्दन ।
जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः ॥ १९ ॥

प्रकाशिका— तदेवाभिभाषणं दर्शयति ।। अहो इति । हे धर्मनन्दन युधिष्ठिर । यूयं क्लिष्टं क्लेशयुक्तं जीवितुं नार्हथ यद्यस्माद्विप्रधर्माच्युताश्रयाः । एतदेकतराश्चापि जीवितुं क्लिष्टं नार्हति । यूयं तु त्रयाश्रया नार्हतीति किं वाच्यम् । अथाऽपि यत्क्लिष्टं भवतां जीवनं तत्कष्टमहोऽन्याय्यमहो आश्चर्यादप्याश्चर्यम् ।। १९ ।।

संस्थितेऽतिरथे पाण्डौ पृथा बालप्रजावधूः ।
युष्मत्कृते बहून्क्लेशान्प्राप्ता(ऽ)तोकवती यथा ।। २० ।।

प्रकाशिका— कथमस्माकं जीवनं कष्टमित्यतः सङ्क्षेपतो दर्शयति ।। संस्थित इति । संस्थिते मृते बालाः प्रजाः पुत्रा यस्याः सा वधूश्चेति दैन्यं दर्शितम् । अतोकवती पुत्ररहिता । यथा बहून्क्लेशान्प्राप्नोति तथेत्यर्थः ।। २० ।।

सर्वं कालकृतं मन्ये भवताश्च यदप्रियम् ।
सकालो यद्वशे लोको वायोरिव घनावलिः ।। २१ ।।

प्रकाशिका— दृष्टकारणाभावेऽप्यदृष्टं किञ्चित्कारणमस्तीति स्वयमेवाह ।। सर्वमिति । विप्रधर्माच्युताश्रयाणामपि भवतां सर्वमप्रियं दुःखं कालकृतं भवत्प्रारब्धकर्मनियामकहरिकृतम् । कः कालो वायोर्वशे यथा घनावलिर्मेघपङ्क्तिस्तथा । यद्वशे लोकस्तिष्ठति स हरिः कालो गुणपूर्णत्वात्काल शब्दवाच्य इत्यर्थः ।। २१ ।।

यत्र धर्मसुतो राज्ञा गदापाणिर्वृकोदरः ।
कृष्णोऽस्त्री गाण्डिवं चापं सुहृत्कृष्णस्ततो विपत् ।। २२ ।।

प्रकाशिका— अन्यथाऽनुपपत्तिसिद्धोऽयमर्थ इत्याह ।। यत्रेति । कृष्णोऽर्जुनोऽस्त्री अस्त्रज्ञस्ततस्तत्रापि विपद्भवतीति यत्तत्कर्मनियामकहरिकृतमेवेति । कल्पनीयमिति शेषः ।। २२ ।।

न ह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितम् ।
यद्विजिज्ञासया युक्ताः मुह्यन्ति कवयोऽपि हि ।। २३ ।।

प्रकाशिका— ननु स्वभक्तैः पापरूपाणि कर्माणि कारयित्वा तेभ्यस्तत्फलरूपविपदः कस्माद्ददातीत्यत आह ।। न ह्यस्येति । विधित्सितं कर्तुमिष्टं यस्य कालनामकस्य गुणपूर्णस्य विजिज्ञासया युक्ताः कवयोऽपि मुह्यन्ते तस्यास्येत्यन्वयः । हि शब्दः प्रमाणसिद्धोऽयमर्थ इति सूचयति ।। २३ ।।

तस्माज्जगदैवतन्त्रं व्यवस्य भरतर्षभ ।
तस्यानुविहितोऽनाथाः नाथ पाहि प्रजाः प्रभो ॥ २४ ॥

प्रकाशिका— निगमयति ॥ तस्मादिति । हरेः स्वतन्त्रकर्तृत्वादित्यर्थः । इदं जगदैवतन्त्रमीश्वराधीनम् । व्यवस्य निश्चित्य । अनुविहित आज्ञानुवर्ती सन् भगवदाज्ञारूप श्रुत्यादिविहितविष्णुद्विडनुबन्धिनिग्रहरूपे स्वकर्मणि । अधर्मबुद्धिमपहायेति यावत् । हे नाथ । कुलपरम्परागतस्वामिन् प्रभो समर्थ । अनाथास्त्वदन्यनाथरहिताः प्रजाः पाहि ॥ २४ ॥

एष वै भगवान्साक्षादाद्यो नारायणः पुमान् ।
मोहयन्मायया लोकं गूढश्चरति वृष्णिषु ॥ २५ ॥

अस्यानुभावं भगवान्वेद गुह्यतमं शिवः ।
देवर्षिः नारदः साक्षाद्भगवान्कपिलो नृप ॥ २६ ॥

प्रकाशिका— ननु कृष्ण एवायं धर्म इति मां बोधयति नेश्वरो येन तदनुविहितः प्रजाः पालयामीत्यतः स एव कृष्ण इत्याह ॥ एष इति । मायया बन्धकशक्त्यामोहयनहमपि मनुष्य इति भ्रमवन्तं कुर्वन् । तर्हि कएनं यथावद्वेदेत्यपेक्षायामाह ॥ अस्यानुभावमिति । गुह्यतममतिशयेन वेदतात्पर्यविषयीभूतं साक्षान्मुख्यत एव भगवान्ननारदादिवदुपचारेण ॥ २५, २६ ॥

यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमम् ।
अकरोः सचिवं दूतं सौहृदादथ सारथिम् ॥ २७ ॥

प्रकाशिका— तन्मायया तवापि मोह इत्याह ॥ यं मन्यस इति । यं कृष्णं मातुलेयं मातुलस्य वसुदेवस्यापत्यं प्रियं प्रीतिविषयं मित्रं सखायं सुहृत्तममनिमित्तोपकारकं सौहृदात्सौहार्दात् । सचिवं मन्त्रिणम् । दूतं सन्देशहरम् । सारथिं यन्तारं चाकरोः कृतवानसि । तस्यास्येति पूर्वेणान्वयः ॥ २७ ॥

सर्वात्मनः समदृशो ह्यद्वयस्यानहङ्कृतेः ।
तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् ॥ २८ ॥

प्रकाशिका— ननु कृष्ण ईश्वरश्चेत्कथं नीचे सारथ्यादौ कर्मणि प्रवृत्त इत्यत आह ॥ सर्वात्मन इति । समदृशो योग्यतामनुसृत्यैव जीवान्पश्यतः । तत्कृतं नीचोच्चकर्मकृतं ममेदं योग्यमिद-

मयोग्यमिति मतेर्वैषम्यं कचिदपि कदाऽपि नास्ति । सज्जना इति ज्ञात्वा तद्वात्सल्येन नीचमपि कर्म तद्धिताय कर्म करोतीति भावः । हेत्वन्तरमप्याह ॥ निरवद्यस्येति । रागादिदोषशून्यस्येत्यर्थः । तत्कुतः । अनहङ्कृतेरहङ्कारतत्त्वकार्याहङ्काररहितस्य । तदपि कुतः । अद्वयस्य समाधिकरहितस्य । तत्र हेतुः सर्वात्मन इति । सर्वस्वामिन इत्यर्थः ॥ २८ ॥

तथाप्येकान्तभक्तेषु पश्य भूपानुकम्पितम् ।
यन्मेऽसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः ॥ २९ ॥

प्रकाशिका— तस्य सज्जनेषु वात्सल्येऽहमपि दृष्टान्त इत्याशयेनाह ॥ तथाऽपीति । ममाहमित्यहङ्कारकार्याभिमानाभावेऽपीत्यर्थः । हे भूप । अनुकम्पितमनुकम्पं साक्षाद्दर्शनं साक्षात्काररूपं ज्ञानमागतस्तद्विषयो जातः ॥ २९ ॥

भक्त्यावेश्य मनो यस्मिन् वाचा यन्नाम कीर्तयन् ।
त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः ॥ ३० ॥

प्रकाशिका— प्राणत्यागकाले हरिदर्शनेन किं फलं येन तत्तदनुकम्पा स्यादिति शङ्कायां तत्फलं कैमुत्याभिप्रायेणाह ॥ भक्त्येति । यदा प्राणत्यागकाले यं स्मरन् गृणन्नपि मुच्यते तदा तं साक्षात्पश्यन्मुच्यत इति किं वाच्यमिति भावः ॥ ३० ॥

स देवदेवो भगवान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहम् ।
प्रसन्नहासारुणलोचनोल्लसन् मुखाम्बुजो ध्यानपथश्चतुर्भुजः ॥ ३१ ॥

प्रकाशिका— इदानीं स्वदेहत्यागपर्यन्तं श्रीकृष्णस्य कृपापूर्वकनिरीक्षणं स्वस्मिन्प्रार्थयते ॥ स देवेति । यावदिदं हिनोमि त्यजामीत्यनेन स्वेच्छामरणत्वं स्वस्य सूचयति । इदं भौतिकं प्रसन्नहासेनारुणलोचनाभ्यांचोल्लसन्मुखाम्बुजं यस्य स तथा । ध्यानस्य पन्था विषयो यो निरन्तरं ध्यानविषयः स एव पुरतः स्थितः प्रतीक्षतामिति भावः ॥ ३१ ॥

सूत उवाच –

युधिष्ठिरस्तदाकर्ण्य शयानं शरपञ्जरे ।
अपृच्छद्विविधान् धर्मान् ऋषीणामनुशृण्वताम् ॥ ३२ ॥

प्रकाशिका— तत्प्रजाः पाहीति भीष्मवाक्यमाकर्ण्य श्रुत्वा शरपञ्जरे शरसमूहरूपास्तरणे शयानमित्यनेन नेयं हरिधर्मान्वक्तुं तस्यावस्था तथाऽपि धर्मलोभादपृच्छदिति सूचयति ॥ ३२ ॥

पुरुषस्वभावविहितान्यथावर्णं यथाश्रमम् ।
वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् ॥ ३३ ॥

प्रकाशिका— यथावर्णं ब्राह्मणादिवर्णानतिक्रम्य वर्तमानान् । यथाश्रमं ब्रह्मचर्याद्याश्रमानतिक्रम्य वर्तमानान्पुरुषाणां स्वभावो योग्यता देवासुरनरत्वादिरूपमनुसृत्य विहितान्वैराग्यरागाभ्यामुपाधिभ्यां निमित्ताभ्याम् । क्रमेणाम्नातं श्रुत्यादिना प्रतिपादितमुभयं निवृत्तिप्रवृत्तिरूपं लक्षणं स्वरूपं येषां तान् ॥ ३३ ॥

दानधर्मान्राजधर्मान्मोक्षधर्मान्विभागशः ।
स्त्रीधर्मान्भगवद्धर्मान्समासव्यासयोगतः ॥ ३४ ॥

प्रकाशिका— पुनस्तेषु विशेषमाह ॥ दानधर्मानिति । मोक्षधर्मान् शमदमादीन् भगवद्धर्मान्हर्यदोषकरान्मासोपवासादिरूपान् भगवतो जगज्जन्मादिकर्तृत्वादिरूपानिति वा । समासव्यासौ सङ्क्षेपविस्तरावेव योगावुपायौ ताभ्यामिति ॥ ३४ ॥

धर्मार्थकाममोक्षांश्च सहोपायान्यथा मुने ।
नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् ॥ ३५ ॥

धर्मान्प्रवदतस्तस्य स कालः प्रत्युपस्थितः ।
यो योगिनः छन्दमृत्योर्वाञ्छितस्तूत्तरायणः ॥ ३६ ॥

प्रकाशिका— यथा यथावन्नानाख्यानेषु ये इतिहासास्तेषु यथा सन्ति तथेति वा । छन्देनेच्छया मृत्युर्यस्य । तु शब्दो दक्षिणायनापेक्षयोत्तरायणस्य विशेषद्योतकः ॥ ३५, ३६ ॥

तदोपसंहृत्य गिरं सहस्रणीर्विमुक्तसङ्गं मन आदिपूरुषे ।
कृष्णे लसत्पीतपटे चतुर्भुजे पुरः स्थितो(ऽ)मीलितदृग्व्यधारयत् ॥ ३७ ॥

प्रकाशिका— तदोत्तरायणप्राप्ते गिरमन्यविषयां वाचमुपसंहृत्य समाप्य सहस्राणीः । सहस्र शब्दो बहुपरः । बहुसङ्ख्याकान् भृत्यान् शिष्यान्वा नयन्तीति सहस्रणीर्विमुक्तसङ्गं त्यक्तविषयस्नेहम् । अमीलितदृक् फुल्लनेत्र एव सन् । ध्यानकाले नेत्रमीलनं भवति । तदकृत्वैव पुरः स्थितं कृष्णं पश्यंस्तस्मिन्मनो व्यधारयदित्यर्थः ॥ ३७ ॥

विशुद्धया धारणया धुताशुभस्तदीक्षयैवाशु गतायुधव्यथः ।
निवृत्तसर्वेन्द्रियवृत्तिविभ्रमः तुष्टाव जल्पं विसृजञ्जनार्दनम् ॥ ३८ ॥

प्रकाशिका— विशुद्धया विषयसङ्गशून्यया धारणयैकैकाङ्गमाहात्म्यस्मरणलक्षणया । सर्वेषामिन्द्रियाणां वृत्तिर्व्यापारो विभ्रमोऽहंममाभिमानो निवृत्तौ निरस्तौ सर्वेन्द्रियवृत्तिविभ्रमौ यस्य स तथा । जल्पं वाग्व्यापारं विसृजन्कुर्वन् । यद्यपि सर्वेन्द्रियनिवृत्तवृत्तिस्तथाऽपि हरिविषयवागिन्द्रियव्यापारं कुर्वंस्तुष्टावेति भावः । जनान् भूभारभूतान् अर्दयतीति जनार्दनस्तम् ॥ ३८ ॥

इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुङ्गवे विभूम्नि ।
स्वसुख उपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥ ३९ ॥

प्रकाशिका— आदौ तावद्बाल्यमारभ्यैतत्कालपर्यन्तं या स्वकीयमनोवृत्तिस्तां श्रीकृष्णायार्पयति ॥ इतीति । इति शब्दः पूर्वानुभूतप्रकारवचनः । एवं प्रकारा मतिर्मनोवृत्तिरुपकल्पिता समर्पिता । क विशेषणे भूम्नि परिपूर्णे । सात्त्वतानां यादवानां पुङ्गवे श्रेष्ठे श्रीकृष्णे वितृष्णा विगता तृष्णा । कथं भूते । क्वचित्कदाचित्सृष्टिकाले विहर्तुं नानारूपैः क्रीडां कर्तुं प्रकृतिं चेतनामचेतनां चोपेयुषि प्राप्तवति । ननु क्रीडायाः प्रयोजनत्वेऽपूर्णत्वप्रसङ्ग इत्यत उक्तम् ॥ स्वसुखेति । स्वस्वरूपभूतसुखे उपगते निकटवर्तिन्यपीत्यर्थः । पूर्णसुखे विद्यमानेऽपि स्वभावादेव विहारकरणममिति भावः । ननु प्रकृतिं प्राप्यैव कथं तस्य विहरणमित्यत उक्तम् ॥ यदिति । यद्यस्यां प्रकृतेः सकाशाज्जीवानां भवप्रवाहः संसारपरम्परा भवति । तां प्रकृतिमिति सम्बन्धः । प्रकृत्या जीवानां नानाविध शरीरप्राप्तौ तत्प्रेरणाय तद्धरणाय च नानाविधरूपग्रहणरूपं विहरणं भगवतो भवतीति भावः ॥ ३९ ॥

त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने ।
वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ॥ ४० ॥

प्रकाशिका— इदानीं श्रीकृष्णवपुर्वर्णयन्रतिं प्रार्थयते ॥ त्रिभुवनेति । त्रिभुवनेषु त्रिलोक्यां कमनं कमनीयम् । तमालपुष्पवन्नीलवर्णो यस्य तत् उद्यद्रवेः करः किरणस्तद्वद्गौरं रक्तं वरं श्रेष्ठमम्बरं वस्त्रं यस्य तत् । अलककुलैः कुन्तलसमूहैरावृतमाननाब्जं यस्मिंस्तद्वपुःशरीरं दधानेति । विजयोऽर्जुनः । सखा यस्य तस्मिन् । अनवद्या फलानुसन्धानादिदोषरहिता रतिर्भक्तिः ॥ ४० ॥

युधि तुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलङ्कृतास्ये ।
मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ॥ ४१ ॥

प्रकाशिका— इदानीं स्वकृतापराधसहिष्णुत्वरूपं गुणं स्मरंस्तस्मिन्मनोदार्ढ्यं प्रार्थयते ॥ युधीति । आत्मा मनः कृष्णेऽस्त्वित्यन्वयः । कथं भूते युधि । युद्धे तुरगाणां खुररजैस्तुरगरजस्तेन विधूम्रा विशेषेण धूम्रवर्णास्ते च ते विद्धचन्तः परस्परं घ्नन्तः । सन्घर्षयन्त इति यावत् । कचाः कुन्तलाश्च तैर्विलुलितानि विशेषेण संश्लिष्टानि श्रमवारीणि स्वेदबिन्दुरूपाणि तैरलङ्कृतमास्यं यस्य तस्मिन् । पुनः कथं भूते । निशितैस्तीक्ष्णैः शरैर्विभिद्यमाना त्वक् यस्य यस्मिन् । शरैरेव विलसत्कवचं यस्य तस्मिन् । अत्र चिदानन्ददेहस्य तु विभेद, उत्तरत्र क्षतजपरिप्लुतत्वं कथमित्यतो ऋजुमुक्तव्यतिरिक्तसर्वजीवमोहनायेश्वरस्तथा दृश्यते न वास्तवं तस्य त्वग्भेदादिकमित्याशयेनात्र प्रमाणमाह ॥ असङ्गत इति । सर्वत्र सत्वेऽपि तत्तद्वस्तुकृतलेपशून्यो मोहयन्नेवेति सम्बन्धः । नन्वेवं मोहनेन स्वस्य किं प्रयोजनमित्यत उक्तम् । क्रीडयेति । अत्र वा एव शब्दसम्बन्धः । सुरेष्विति । निर्धारणे सप्तमी । तेन सुरेषु कांश्चिदेव मोहयन्नित्यर्थः । मध्यया दृष्टेत्यनेन सुराणामीषन्मोहोऽसुराणामत्यन्तमिति सूचयति ॥ ४१ ॥

सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयोरथं निवेश्य ।
स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु ॥ ४२ ॥

प्रकाशिका— अनायासेनैव भूभारहरणसामर्थ्यरूपं गुणं स्मरन् रतिं प्रार्थयते । सपदीति । सेनयोरुभयोर्मध्ये रथं स्थापयमेऽच्युतेति सख्युरर्जुनस्य वचो निशम्य सपंति तत्क्षणमेव निजपरयोः पाण्डवकौरवबलयोः सैन्ययोर्मध्ये रथं निवेश्य स्थितवति । अक्ष्णा निरीक्षणेनैव परेषां परस्परापेक्षया परेषां पाण्डवानां कौरवाणां च सेनासम्बन्धि यदायुष्यं तद्धृतवती ॥ ४२ ॥

व्यवसितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबुद्धया ।
कुमतिमहरदात्मविद्यया यश्चरणरतिः परमस्य तस्य मेऽस्तु ॥ ४३ ॥

प्रकाशिका— इदानीमर्जुनं निमित्तीकृत्य गीतोपदेशव्याजेन सकलसज्जनकुमतिनाशकत्वरूपं गुणमनुसन्दधानो रतिं प्रार्थयते ॥ व्यवसितेति । व्यवसितयोर्मर्तुं निश्चितयोः पृतनयोर्मुखमिव मुखमग्रे स्थितं तमिमं भीष्मादिकं निरीक्ष्य विमुखस्य निवृत्तस्य कुमतिमहं हन्तेत्यादिरूपाम् । आत्मनः स्वस्य विद्यया गीतारूपया ॥ ४३ ॥

स्वनियममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः ।
धृतरथचरणोऽभ्ययाद् बालाग्रे हरिरिव हन्तुमिभं गतोत्तरीयः ॥ ४४ ॥

प्रकाशिका— इदानीं स्वप्रतिज्ञा(पा)फलकत्वरूपं भक्तवात्सल्यं स्मरति । स्वनियममिति । युद्धे आयुधं न गृहिष्यामीति स्वनियमं स्वप्रतिज्ञां विहाय । आयुधं ग्राहयिष्यामीति मत्प्रतिज्ञामृतमधि अधिऋतं सत्यमधिकृत्य वर्तमानां कर्तुम् । अव्ययस्य परनिपातश्छान्दसः । ऋतं यथा स्यात्तथाऽधिकर्तुम् । आधिक्येन कर्तुमिति वा । अवप्लुतः सहसैवावतीर्णः सन् योऽभ्ययादभिमुखमधावत् । इभं गजं हन्तुम् । हरिः सिंह इव । कथं भूतः । धृतरथचरणो धृतो रथचरणश्चक्रो येन स तथा । सम्भ्रमेण पथि गतं पतितमुत्तरीयवस्त्रं यस्य स बलस्य सैन्यस्याग्रे पुरतः स्थितं माम् । प्रतीति शेषः ॥ ४४ ॥

शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे ।
प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान् मुदे मुकुन्दः ॥ ४५ ॥

तात्पर्यम्— असङ्गश्चाव्यथोऽभेद्योऽनिग्राह्योऽशोष्य एव च । विद्धोऽसृगश्चितो बद्ध इति विष्णुः प्रदर्श्यते । असुरान्मोहयन्देवः क्रीडयैव सुरेष्वपि । मानुषान्मध्यया दृट्या न मुक्तेषु कथञ्चनेति स्कान्दे ॥ ४१, ४५ ॥ इति प्रथमतात्पर्ये नवमोऽध्यायः ॥ ९ ॥

प्रकाशिका— अपराधिनोऽपि भक्तस्य मुक्तिप्रदत्वरूपं तन्माहात्म्यं सूचयन्मोक्षसुखं प्रार्थयते ॥ शितविशिखेति । एवं यदाऽभ्ययात्तदाऽऽततायिनो मे शितैस्तीक्ष्णैर्विशिखैर्बाणैर्हतोऽतो विशीर्णदंशः खण्डितकवचः क्षतजेन रुधिरेण परिप्लुतः स्नात इव स्थितः प्रसभं बलान्न गन्तव्यमिति वारयन्तमप्यर्जुनम् । अतिक्रम्येति यावत् ॥ ४५ ॥

विजयरथकुटुम्ब आत्ततोत्रे धृतहयरश्मिजितश्रमेक्षणीये ।
भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः स्वरूपम् ॥ ४६ ॥

प्रकाशिका— अर्जुनोपकारित्वं प्राणत्यागकाले दर्शनमात्रेण मोक्षप्रदत्वं च स्मरत्रतिं प्रार्थयते ॥ विजयेति । विजयोऽर्जुनस्तस्य रथ एव कुटुम्बो रक्षणीयत्वसाम्यात् यस्य तस्मिन् । आत्तं गृहीतं तोत्रं प्रतोदो येन तस्मिन् । धृता हयरश्मयः प्रग्रहा येन स धृतहयरश्मिः स चासौ जितश्रमश्चासावीक्षणी यस्य तस्मिन् । इह युद्धे हता यं निरीक्ष्य स्वरूपमाविर्भूतं स्वस्वरूपं मूलरूपं वा गताः प्राप्ता भविष्यन्तीति दिव्यदृष्टचा पश्यन्नाह ॥ ४६ ॥

ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः ।
कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगुः किल यस्य गोपवध्वः ॥ ४७ ॥

प्रकाशिका— यदा मदान्धानां गोपस्त्रीणां कामेनापि स्वात्मानं ध्यायतां मुक्तिं ददाति तदा स्वस्ववर्णाश्रमविहितधर्मैः स्वात्मानं भजतां पुंसामयं मुक्तिं दास्यतीति किं वाच्यमित्याशयेनाह ॥ ललितेति । ललिता मनोहरा गतिश्च विलासो रासादिश्च वल्गुहासो मन्दहासश्च प्रणयेन स्नेहेन निरीक्षणं च तैरात्मीयैस्तदीयैर्वा कल्पिता उरुर्मानः पूजा यासां ताः । अत उत्कटेन मदेनान्धाः । कृतं कृष्णकृतं पूतनावधादिकम् । अनुकृतवत्यः कृष्णाय मानत्वेनानुकुर्वाणा गोपवध्वो यस्य कृष्णस्य प्रकृतिं निर्दुःखपरमानन्दस्वभावमगुः प्राप्ताः कृष्णवत्स्वयमपि निर्दुःखपरमानन्दस्वभावा जाता इत्यर्थः । यस्यानुग्रहादिति वा । किलेति प्रमाणप्रसिद्धिमाह । तस्मिन्मे रतिरस्त्विति पूर्वेणान्वयः ॥ ४७ ॥

मुनिगणनृपवर्यसंकुलेऽन्तः सदसि युधिष्ठिरराजसूय एषाम् ।
अर्हणमभिपेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा ॥ ४८ ॥

प्रकाशिका— तस्य जगत् पूज्यतामनुस्मरन्नाह ॥ मुनिगणेति । मुनिगणैर्नृपवरैश्च सङ्कुले व्याप्ते । अन्तः सदसि सभामध्ये एषां मुनिगणादीनां मध्ये योऽर्हणमग्रपूजाऽभिपेदे प्राप्तवान् । स एष आत्मा सर्वान्तर्यामी मत्कारुण्यान्मरणसमये मम दृशिगोचरो दृष्टिविषयः सन् आविः प्रकटो वर्तते । अहो मम भाग्यमिति भावः ॥ ४८ ॥

तमिममहमजं शरीरभाजां हृदि हृदि विष्ठितमात्मकल्पितानाम् ।
प्रतिदृशमिव नैकधार्कमेकं समधिगतोऽस्मि विधूतभेदमोहः ॥ ४९ ॥

प्रकाशिका— ननु तस्य सर्वान्तर्यामित्वे स्थानभेदः प्राप्त इत्याशङ्कायां सर्वप्राणिषु विद्यमानस्यापि तस्यैक्यमेव न भेदोऽस्मदादिप्रत्यक्षादनुमानाच्चेत्याशयेनाह ॥ तमिममिति । आत्मकल्पितानां स्वेनैव सृष्टानां शरीरभाजां प्राणिनां हृदि प्रतिहृदयं विष्टितं विविधरूपैः स्थितं तं परमात्मानमिममजं कृष्णं चैकमभिन्नं सम्यगधिगतोऽस्मि । सम्यक्त्वमेवाह ॥ विधूतभेदमोह इति । स्थानभेदवदिलिङ्गजनितभेदभ्रमरहित इत्यर्थः । अनेनात्यन्तमभेदं पश्यामीत्युक्तं भवति । यद्वा । ईश्वरस्य पूर्णताज्ञानं विष्णोरन्यस्य चेष्यते । ''भेदस्तस्यावतारेषु जीवस्येशत्वमेव च । तथा जीवत्वमीशस्य जडभेदस्तयोरपि । भेदमोह इति प्रोक्तः सत्यदा न हरौ क्वचित् । अन्येषां तत्प्रसादेन शनैर्याति सतामपी''ति प्रमाणोक्तभेदमोहविवर्जित इत्यर्थः । अत्र 'दृष्टान्तमाह ॥

प्रतिदृश्यमिवेति । चक्षुरभिमानित्वेन शरीरभाजां प्रतिदृशं प्रतिनेत्रं नैकधाऽनेकरूपैः स्थितमर्कं यथैकं समधिगच्छति तथैवेति । अहमधिगतोऽस्मीत्युपलक्षणयोक्तम् । सर्वेपि ज्ञानिन एवमेव पश्यन्तीति भावः । अनेन सर्वत्रावस्थित ईश्वरः स्वगतभेदशून्यश्चेतनत्वात्तत्त्वाभिमानिवदिति युक्तिं सूचयति ॥ ४९ ॥

क्षितिभरमवरोपितं कुरूणां श्वसन इवासृजदक्षवंशवह्निम् ।
तमिममजमनुव्रतार्तिहांघ्रिं हृदि परिरभ्य जहामि मर्त्यनीडम् ॥ ५० ॥

प्रकाशिका— ननु द्यूतमेव क्षितिभारहरणे निमित्तं प्रसिद्धमतः कृष्ण एव भूभारहन्तेति कथं प्रसिद्धिरित्याशङ्कायां द्यूतमपि तेनैव कारितमतः स एव हन्तेति स्मरन् स्तोत्रफलं सूचयन् स्वकर्तव्यं दर्शयति ॥ क्षितीति । क्षितिभरं भूभारमवरोपितुमुन्मूलयितुं कुरूणां दुर्योधनादीनां पाण्डवानां चाक्षवंशवह्निम् । अत्र बुद्ध्या विवेकेनार्थो वर्णनीयः । यथा श्वसनो वायुर्वंशेषु वेणुषु मिथः सङ्घर्षणाद्वह्निं सृजति तथा कृष्णोऽपि कुरूणां सङ्घर्षणात् । द्यूताख्यं वंशनामकं वह्निमसृजदिति । अनुयतानां भक्तानां संसाररूपामार्तिं हन्तीति अनुव्रतार्तिहा तादृशोऽङ्घ्रिर्यस्य तम् । अनेन स्तोत्रफलमपि सूचितमिति ज्ञातव्यम् । मर्त्यनीडं मरणशीलं शरीरम् ॥ ५० ॥

सूत उवाच –

कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः ।
आत्मन्यात्मानमाविश्य सोऽन्तःश्वास उपारमत् ॥ ५१ ॥

प्रकाशिका— तस्य शरीरत्यागप्रकारं दर्शयति । कृष्ण इति । आत्मनि व्याप्ते आत्मानं मनोंऽतःश्वासः प्राणायामेन निरोधितश्वास उपारमदुपरमेत् । योगाभ्यासेन शरीरं जहावित्यर्थः ॥ ५१ ॥

सम्पद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले ।
सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ॥ ५२ ॥

तत्र दुन्दुभयो नेदुः देवगन्धर्वनादिताः ।
शशंसुः साधवो ब्रह्मन् खात्पेतुः पुष्पवृष्टयः ॥ ५३ ॥

प्रकाशिका— मरणात्पूर्वमेव ब्रह्मणि सम्पद्यमानमसम्प्रज्ञातसमाध्यवस्थापन्नं पश्चात्स्वमूलरूपे सम्पद्यमानं प्राप्तवन्तमाज्ञाय सम्यग्ज्ञात्वा दिनात्यये सायङ्काले वयांसि पक्षिणः ॥ ५२,५३ ॥

तस्य निर्हरणादीनि संपरेतस्य भार्गव ।
युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोऽभवत् ॥ ५४ ॥

प्रकाशिका— सम्परेतस्य मृतस्य निर्हरणादीनि शवदाहादीनि । भो भार्गव शौनक । कारयित्वा । भीमादिभिरिति शेषः ॥ ५४ ॥

तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः ।
ततस्ते कृष्णहृदयाः स्वाश्रमान्प्रययुः पुनः ॥ ५५ ॥

प्रकाशिका— ते मुनयः ॥ ५५ ॥

ततो युधिष्ठिरो गत्वा सकृष्णो गजसाह्वयम् ।
पितरं सान्त्वयामास गान्धारीञ्च तपस्विनीम् ॥ ५६ ॥

पित्रा चानुमतो राजा वासुदेवानुमोदितः ।
चकार राज्यं धर्मेण पितृपैतामहं विभुः ॥ ५७ ॥

॥ इति श्रीमद्भागवते प्रथमस्कन्धे नवमोऽध्यायः ॥

प्रकाशिका— पितरं धृतराष्ट्रम् ॥५६,५७॥ इति श्रीभागवतटिप्पण्यां नवमोऽध्यायः ॥१-९॥

अथ दशमोऽध्यायः

शौनक उवाच–

हत्वा स्वरिक्तस्पृध आततायिनो युधिष्ठिरो धर्मभृतां गवि स्थिरः ।
सहानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किमकार्षीत्ततः ॥ १ ॥

प्रकाशिका— राज्यं चकारेत्युक्तम् । तत्र पृच्छति ॥ हत्वेति । स्वरिक्थे राज्यस्वरूपे धने स्पर्धन्त इति स्वरिक्थस्पृधस्तान् । आततायिन इति ''अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहर्ता च षडेते ह्याततायिन'' इति वचनादग्न्यादिदानित्यर्थः । धर्मभृतां व्यासादीनां गवि वाचि स्थिरो निश्चलः । कथं प्रवृत्तः कस्याश्रयेण प्रवृत्तः । राज्यपालन इति शेषः । प्रत्यवरुद्धभोजनो बन्धुवधनिमित्तदुःखेन सङ्कुचितभोगः ॥ १ ॥

सूत उवाच–

वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भवतापनो हरिः ।
निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूवह ॥ २ ॥

प्रकाशिका— अजिताश्रयो गां शशासेति कृष्णाश्रित एव राज्ये प्रवृत्त इत्याद्यप्रश्नस्योत्तरं वक्तुमादौ तावद्युधिष्ठिरस्य कृष्णाश्रित्वं दर्शयति ॥ वंशमिति । कुरो राज्ञो वंशं संरोहयित्वा परीक्षिद्रक्षणेनाङ्कुरीकृत्य । कथं भूतं वंशम् । वंशदवाग्निनिर्हृतं वंश एव दवो वनं तस्मादुद्भूतो यः क्रोधरूपोऽग्निस्तेन निर्हृतं दग्धम् । भवभावनो भवं जगदुत्पत्तिं भावयति करोतीति तथा । अनेन कुरुवंशसंरोहणशक्तिरुपपादितेति ज्ञातव्यम् । भवतापन इति पाठेऽनादिसंसारदाहकस्य हरेः पाण्डववैरिनिबर्हणं न चित्रमिति दर्शयितुं तद्विशेषणम् ॥ २ ॥

याजयित्वाऽश्वमेधैस्तान्त्रिभिरुत्तमकल्पकैः ।
तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ॥ ३ ॥

प्रकाशिका— याजित्वेति श्लोकः पूर्वमेव व्याख्यातः ॥ ३ ॥

निशम्य भीष्मोक्तमथाच्युतोदितं प्रवृत्तविज्ञानविधूतविभ्रमः ।
शशास गामिन्द्र इवाजिताश्रयः प्रणिध्युपात्तामनुजानुवर्तितः ॥ ४ ॥

तात्पर्यम्— अमात्या मन्त्रिणो दूताः श्रेणयश्च पुरोहिताः । पुरं जनपदं चेति सप्त प्रणिधयः स्मृता इति ब्राह्मे ॥ ४ ॥

प्रकाशिका— इदानीं कथं प्रवृत्तः किमकार्षीदिति प्रश्नद्वयं परिहरति ॥ निशम्येति । अत्राजितः कृष्णः स उक्तरीत्याऽऽश्रयो यस्येति प्रथमप्रश्नस्योत्तरम् । शिष्टं द्वितीयप्रश्नस्य प्रवृत्तमुत्पन्नं यद्विज्ञानं विशेषज्ञानं हरिरेव स्वतन्त्रो विष्णुद्विट्तदनुबन्धिनिग्रहः परमो धर्म इत्यादि रूपं तेन विधुतो नाशितो विविधो भ्रमोऽहं हन्तेत्यादिरूपो दुर्योधनादिवधोऽधर्म इत्यादिरूपो वा यस्य स तथा । कथं भूतः अनुजानुवर्तितोऽनुजैर्भीमादिभिरनुवर्तितः सेवितः सन् । प्रणिध्युपात्तां गां भूमिं शशाम । अत्र प्रणिधिशब्दमप्रतीतेर्व्याचष्टे ॥ आमात्या इति । आमात्याः कार्ये सहकारिणो विचारवक्तारो दूताः सन्देशहराः श्रेणयोऽगरक्षकास्तथा चैवं सप्तप्रणिधिभिरुपात्त प्राप्तामिति मूलार्थोज्ञेयः । क इव । अजितो वामनस्तदाश्रय इन्द्रः स्वर्गमिवेत्यर्थः ॥ ४ ॥

कामं ववर्ष पर्जन्यः सर्वकामदुघा मही ।
सिषिचुः स्म व्रजं गावः पयसाऽत्यूधसो मुदा ॥ ५ ॥

प्रकाशिका— अजिताश्रयः शशासेत्यत्र कार्यमेव मानमित्याशयेनाह ॥ काममित्यादिना । सर्वेषामभीष्टं दोग्ध्रीति सर्वकामदुघा गावः पयसा क्षीरेण व्रजं गोष्ठं शिषिचुरभ्यषिश्चन् । कथं भूता गावः । अतिस्थूलमूधः क्षीरस्थानं यासां ता अत्यूधसो मुदा बृहत्स्नेहजातया ॥ ५ ॥

नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः ।
फलन्त्योषधयः सर्वेः काममन्वर्तु तस्य वै ॥ ६ ॥

प्रकाशिका— तस्य युधिष्ठिरस्य कामं यथा स्यात्तथा । इच्छानुसारेणेति यावत् । अन्वर्तु-मृतावृतौ फलन्ति स्वस्वफलानि रत्नादीनि प्रयच्छन्ति । वा इत्यनेनेदं सर्वं कृष्णाश्रयत्वेन कृतमिति सूचयति ॥ ६ ॥

नाधयो व्याधयः क्लेशाः दैवभूतात्महेतवः ।
अजातशत्रावभवन् जन्तूनां राज्ञि कर्हिचित् ॥ ७ ॥

प्रकाशिका— अनिष्टनिवृत्तिरपि तज्ज्ञापिकेत्याह ॥ नाधय इति आधयो मनोव्यथा व्याधयो रोगाः क्लेशाः । कथं भूताः । देवं च भूतानि चात्मा जीवश्च हेतुर्येषां ते तथा दैवहेतुकः क्लेशोऽनावृष्ट्यादिजातो भूतहेतुकश्चोरादिजनितः । आत्महेतुको नरकादिरूपः । आत्म शब्दस्य देहवाचित्वे आत्महेतुको रोगादिरूपः । अजातशत्रौ युधिष्ठिरे राज्ञि रञ्जिके सति । जन्तूनां प्राणिनां कर्हिचित्कदाचिदपि ॥ ७ ॥

उषित्वा हस्तिनपुरे मासान्कतिपयान्हरिः ।
सुहृदाश्च विशोकाय स्वसुश्च प्रियकाम्यया ॥ ८ ॥

प्रकाशिका— इदानीं द्वारकागमनं वक्तुमाह ॥ उषित्वेपि । स्वसुः सुभद्रायाः ॥ ८ ॥

आमन्त्र्य चाभ्यनुज्ञातः परिष्वज्याभिवाद्य तम् ।
आरुरोह रथं कैश्चित्परिष्वक्तोऽभिवादितः ॥ ९ ॥

प्रकाशिका— आमन्त्र्यापृच्छ्य तं युधिष्ठिरम् ॥ ९ ॥

सुभद्रा द्रौपदी कुन्ती विदुरोऽथ युधिष्ठिरः ।
गान्धारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ ॥ १० ॥

प्रकाशिका— युयुत्सुधृतराष्ट्राद्वैश्यायां जातो दुर्योधनानुजो गौतमः कृपाचार्यो यमौ नकुल-सहदेवौ ॥ १० ॥

वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः ।
न सेहिरे विमुह्यन्तो विरहं शार्ङ्गधन्वनः ॥ ११ ॥

प्रकाशिका— मत्स्यसुता उत्तरा । विमुह्यन्तोऽयमस्मत्सम्बन्धीति भ्रान्ता इत्यर्थः ॥ ११ ॥

तत्सङ्गान्मुक्तदुःसङ्गो हातुं नोत्सहते बुधः ।
कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् ॥ १२ ॥

प्रकाशिका— पार्थानां कृष्णविरहासहनं कैमुत्यन्यायेनाह ॥ तत्सङ्गादिति श्लोकद्वयेन । तस्य कृष्णस्य सङ्गान्मुक्तदुःसङ्गो दुःखविषयसङ्गो यस्य स तथा । स बुधो ज्ञानी । यस्य कृष्णस्य सद्भिः कीर्त्यमानं रोचनं रुचिकरं यशः सकृदाकर्ण्य तं हातुं नोत्सहतेत्युक्तं न शक्नोति ॥ १२ ॥

तस्याभ्यस्तधियः पार्थाः सहेरन्विरहं कथम् ।
दर्शनस्पर्शनालापशयनासनभोजनैः ॥ १३ ॥

प्रकाशिका— तस्य कृष्णस्य स्पर्शनादिभिरभ्यस्ता धीर्येषां ते तथा ॥ १३ ॥

सर्वे तेऽनिमिषैरक्षैस्तमनुद्रुतचेतसः ।
वीक्षन्तः स्नेहसंबन्धाद्विचेरुस्तत्र तत्र ह ॥ १४ ॥

प्रकाशिका— विरहमसहमानानां तेषां कृष्णप्रयाणसमये स्थितिं दर्शयति ॥ सर्व इति । अनिमिषैः पक्ष्मचलनरहितैरक्षैर्नेत्रैस्तत्र तत्र विचेरुः । प्रायेणोपयुक्तसामग्रीसम्पादनायेति शेषः । हेति तदौत्सुक्यास्वादने । तमनुद्रुतचेतस इत्यनेनेन्तस्ततश्चरन्तीत्येवपरं न पुनः किमपि सम्पादयितुं शक्ता आसन्निति सूचयति ॥ १४ ॥

न्यरुन्धन्नुद्गलद्बाष्पमौत्कण्ठ्याद्देवकीसुते ।
निर्यात्यगारान्नोभद्रमिति स्याद्बान्धवस्त्रियः ॥ १५ ॥

प्रकाशिका— अगारन्निर्याति निर्गच्छति सति औत्कण्ठ्याद्धेतोरुद्गलत्स्रवद्बाष्पमश्रूण्यवरुन्धन्नेत्रेष्वेव स्तम्भितवन्त्यः । तत्र हेतुरभद्रममङ्गलं नो स्यान्माभूदित्येतदर्थम् ॥ २५ ॥

मृदङ्गशङ्खभेर्यश्च वीणापणवगोमुखाः ।
धुन्धुर्यानकघण्टाद्या नेदुर्दुन्दुभयस्तथा ॥ १६ ॥

प्रकाशिका— भेरीपणवगोमुखधुन्धुर्यानकदुन्दुभयो वाद्यविशेषाः ॥ १६ ॥

प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया ।
ववृषुः कुसुमैः कृष्णे प्रेमव्रीडस्मितेक्षणाः ॥ १७ ॥

प्रकाशिका— कुसुमैः कुसुमानि प्रेम्णा व्रीडया स्मितेन सहितमीक्षणं निरीक्षणं यासां तास्तथोक्ताः । व्रीडा शब्दस्योभयलिङ्गत्वेन व्रीडस्मितेत्यपि पाठः ॥ १७ ॥

सितातपत्रं जग्राह मुक्तादामविभूषितम् ।
रत्नदण्डं गुडाकेशः प्रियः प्रियतमस्य ह ॥ १८ ॥

प्रकाशिका— गुडाका निद्रा । निद्रा गुडाका सम्प्रोक्तेत्यभिधानात् । तस्या ईशो गुडाकेशः । जितनिद्र इति यावत् । अर्जुनो मुक्तादामविभूषितं मौक्तिकमालाभिरलङ्कृतम् । प्रान्तमण्डलं रत्नखचितदण्डम् । हेत्यस्य पूर्ववदेव तात्पर्यम् ॥ १८ ॥

उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते ।
विकीर्यमाणैः कुसुमैः रेजे मधुपतिः पथि ॥ १९ ॥

प्रकाशिका— व्यजने चामरे जग्रहतुः । एवकारेणालस्यदिना ग्रहणायोगो व्यवच्छिद्यते । मधूनां यादवविशेषाणां पतिः कृष्णः ॥ १९ ॥

अश्रूयन्ताशिषः सत्यास्तत्र तत्र द्विजेरिताः ।
नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः ॥ २० ॥

तात्पर्यम्— पालनानुग्रहजयान् गौणेऽण्डे संस्थितो हरिः । करोत्यसौ बहिःसंस्थो न करोतीव निर्गुण इति पाद्मे । अतो नानुरूपानुरूपाश्च ॥ २० ॥

प्रकाशिका— सत्या अव्यभिचारितार्थाः । नानारूपाश्च ता अनुरूपाश्चेत्यत्रोभयत्र क्रमेण हेतुप्रदर्शनाय निर्गुणस्य गुणात्मन इति विशेषणद्वयमुक्तम् । तत्र निर्गुणत्वं गुणात्मकत्वं च विरुद्धं तत्रोभयत्र हेतुश्च कथमित्यतोऽत्र विवक्षितं निर्गुणत्वं गुणात्मकत्वं च प्रमाणेनैव दर्शयन् हेतुहेतुमद्भावमुपपादयितुमाह ॥ पालनेति । शिष्टानां पालनानुग्रहौ । दुष्टानां जयमिति विवेकः । गौणे परम्परया सत्त्वादि गुणकार्ये । अनेन गुणकार्यत्वाद्गुणमण्डमाप्नोतीत्यर्थकस्य गुणात्मकपदस्य तात्पर्यमुक्तमिति ज्ञातव्यम् । ब्रह्माण्डाद्बहिः स्थितहरिरत एव निर्गुणो निर्गुण शब्दवाच्यः । अनेन गुणादण्डान्निर्गतो बहिर्गत इति निर्गुणशब्दनिर्वचनं सूचितम् । न करोति पालानानुग्रहजयानिति वर्तते । अण्डान्तर्बहिः स्थितयोरत्यन्ताभेदेऽपि विशेषबलादियमुक्तिरिति सूचनायेव शब्दः । ततः किमित्यतो हेतुहेतुमद्भावमुपपादयति ॥ अत इति । य एवमण्डान्तस्थ एव पालनादिकं करोति । न तद्बहिर्गतोऽतो निर्गुणस्य नानुरूपागुणात्मनोऽनुरूपाश्चेति वचनम् । युक्तमिति शेषः ॥ ततश्चायं श्लोकार्थः । द्विजेरिता आशिषः शिष्टान्पालय । अस्माननुग्रहाण । दुष्टान् जयेत्यादिरूपाः । कथं भूताः । निर्गुणस्य गुणात्मनः कृष्णस्य नानुरूपानुरूपाश्च । गुणात्मनो गुणं सत्त्वादिगुणकार्यं मण्डलमाप्नोतीति गुणात्मा । गुणान्तस्थ इति यावत् । तस्यानुरूपा योग्यास्तेन पालनादीनां करणात् निर्गुणस्याण्डाद् बहिर्गतस्य नानारुपास्तेन पालनादीनामकरणादिति ॥ २० ॥

अन्योन्यमासीत्सञ्जल्प उत्तमश्लोकचेतसाम् ।
कौरवेन्द्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ॥ २१ ॥

प्रकाशिका— सर्वेषां या श्रुतयः श्रोत्राणि तासां मनोहर इत्यर्थः । सर्वासां श्रुतीनां वेदाभिमानिदेवतानां मनोहर इति वा । वेदाभिमानिन्यस्तं जल्पमभ्यनन्दन्निति भावः ॥ २१ ॥

स्त्रिय ऊचुः—

स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि ।
अग्रे गुणेभ्यो जगदात्मानीश्वरे निमीलितात्मा निशि सुप्तशक्तिषु ॥ २२ ॥

तात्पर्यम्— सत्वादिशक्तिषु ॥ २२ ॥

प्रकाशिका— श्रीकृष्णतेजः सौन्दर्याद्यतिशयदर्शनेन विस्मिताः । कात्श्चित्स्त्रियःप्रतिज्ञानाधिकाः अन्या स्त्रियोऽयं साक्षाच्छ्रीनारायणावतारोऽतोऽस्मिन्न विस्मयःकार्य इत्याशयेन कथयन्ति ॥ स वा इत्यादिना । वै शब्दोऽवधारणे । किलेति प्रमाणप्रसिद्धिद्योतकः । अयं कृष्णः स पुरातनोऽनादिकालीनः पुरुषो विष्णुरेव । स कः । य एकः प्रधानो न विद्यते विशेषोऽतिशयो

यस्मात्सोऽविशेषस्तस्मिन् जगत्कार्यजातमादत्ते संहरतीति जगदात्मा तस्मिन् जगत्संहारके ईश्वरे ईशनादिशक्तिमत्यात्मनि स्वस्वरूपे आसीत् । स्वाश्रित एवासीदित्यर्थः । कथं भूतः । निमीलितात्मा प्रकृत्याख्यतमसा गूहितःस्वरूपः सन् । शरीरवाचिन आत्मशब्दस्तदवयवलक्षकत्वेन निमीलिताक्षः सन्निति वा । अक्ष्णोर्निमेषणं कृत्वा यः शेते क्षीरसागर इति प्रमाणानुसारेणान्यत्राचार्यैस्तथा व्याख्यातत्वात् । कदा । निशि महाप्रलये सुप्तासु शक्तिषु सतीषु गुणेभ्य आदिकार्येभ्य सत्त्वादिभ्योऽग्रे प्रलयानन्तरम् । आदिकार्योत्पत्तेः पूर्वमिति यावत् । अत्र शक्ति शब्देन स्वरूपशक्तयो न ग्राह्यास्तासां सुप्त्यसम्भवात् । अत एव श्रीभूदुर्गाणां ग्रहणम् । अतोऽत्र विवक्षितं शक्ति शब्दार्थं दर्शयति ॥ सत्त्वादिशक्तिष्विति । सत्त्वादिरूपासु शक्तिष्वित्यर्थः । तथा च शक्यत्वाच्छक्तय इति व्युत्पत्त्या प्रकृतिरूपाः सत्त्वादिगुणा एव शक्तयस्तेषां च सुप्तत्वं परिणामोन्मुखत्वाभाव एवेति ज्ञातव्यम् ॥ २२ ॥

स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीम् ।
अनामरूपात्मनि रूपनामनी विधित्समानोऽनुससार शास्तिकृत् ॥ २३ ॥

तात्पर्यम्— "श्रीर्भूर्दुर्गेति या भिन्ना जीवमाया महात्मनः । आत्ममाया तदिच्छा सा गुणमाया जडात्मिकेति" महासंहितायाम् । "अप्रसिद्धेस्तद्गुणानामनामासौ प्रकीर्तितः । अप्राकृतत्वाद्रूपस्याप्यरूपोऽसावुदीर्यत" इति वासुदेवाध्यात्मे ॥ २३ ॥

प्रकाशिका— एवं श्रीकृष्णस्य प्रलयकालस्थितेश्वराभेदमुक्त्वेदानीं सृष्टिकाले जगत्स्रष्टा चायमित्याशयेनाह ॥ स एवेति । अत्र स्वजीवमायां सस्वरूपभूतजीवमोहिनीं जडप्रकृतिमिति व्याख्यानमयुक्तम् । जीवानां ब्रह्माभेदस्य जडे सिसृक्षायाश्च प्रमाणबाधितत्वादतोऽत्र विवक्षितं जीवमायाशब्दार्थं प्रमाणेनैव दर्शयति ॥ श्रीभूदुर्गेति । या प्रकृति शब्दवाच्या रमाऽभिन्नाऽनेकरूपा । सत्त्वादिगुणाभिमानित्वेनेति शेषः । सा जीवमाया जीवमायाशब्दवाच्या । जीवबन्धिका माया जीवमायेति व्याख्यानात् । महात्मनः परमात्मनः । अधीनेति शेषः । अनेन स्वाधीनां जीवबन्धिकां सत्त्वादिगुणाभिमानित्वेन श्रीभूदुर्गारूपां प्रकृतिं रमामिति मूलव्याख्यानं सूचयति । आत्ममायया आत्मशब्दविशेषितमाया यत्र श्रूयते तत्रात्मभूता मायेति व्याख्यानेन तत्स्वरूपेच्छैव वाच्या स्यादित्यर्थः । गुणमाया त्रिगुणात्मका माया यत्रोच्यते तत्र जडप्रकृतिरेव माया शब्देन ग्राह्येत्यर्थः । अनामरूपात्मनीत्यत्र सर्वथा नामरूपाभाव एवोच्यत इति प्रतीतिनिरासाय तात्पर्यं प्रमाणेनैव दर्शयति ॥ अप्रसिद्धेरिति । गुणानामित्युपलक्षणम् । रूपाणां कर्मणां चेत्यपि द्रष्टव्यम् । तथा च तद्गुणकर्मादीनां साकल्येन प्रतिपादयितुमशक्यत्वादनामा अशब्द इति प्रकीर्तितः ।

श्रुत्यादाविति शेषः । प्रशब्दः कीर्तने बाहुल्यरूपप्रकर्षवाचकः । तेन रूढोपचारोऽयमिति सूचयति ।। ततश्चायं श्लोकार्थः ।। यः प्रलयकालेऽवस्थितः स एव न तु विकृतशरीरादिकं प्राप्तः । भूयः पुनः सृष्टिप्रवाहस्यानादित्वात् । प्रकृतिं चेतनामनुससार स्वेच्छानुसारेणैव जगाम । तस्यां वीर्याधानं कृतवानीति भावः । कीदृशीम् । निजवीर्यचोदितां स्वसामर्थ्येनैव प्रेरितां स्वजीवमायां स्वाधीनां जीवबन्धिकां मायां श्रीभूदुर्गात्मिकां सिसृक्षतीं स्रष्टुमिच्छन्तीम् । सर्जनोन्मुखीति यावत् । किं कर्तुमनुससार । अनामरूपात्मनि । उक्तरीत्या नामरूपरहितस्वाधारत्वेन रूपनामनी नामरूपात्मकं जगद्विधित्समानो विधातुं स्रष्टुमिच्छन् । नन्वेतावतैव कथं सृष्टिरित्यत उक्तम् ।। शास्तिकृदिति । कालकर्मादिसकलकारणनियमनकर्ता । एवं विधो हरिरयं किलेत्यन्वयः ।। २३ ।।

स वा अयं यत्पदमत्र सूरयो जितेन्द्रिया निर्जितमातरिश्वनः ।
पश्यन्ति भक्त्युत्कलितामलात्मना न न्वेष सत्त्वं परिमार्ष्टुमर्हति ।। २४ ।।

प्रकाशिका— मोक्षार्थं ज्ञेयोऽप्ययमेवेत्याहुः ।। स वा इति । अत्राधि कार्यनधिकारिवर्गे यत्पदं यस्य स्वरूपं निर्जितो मातरिश्वा प्राणो यैस्ते तथा । ह्रस्वच्छान्दसः । केन करणेन भक्त्योत्कलितः विकसितोऽमलो रागादिदोषरहित आत्मा मनस्तेन । मनोनैर्मल्यस्याप्ययमेव हेतुरित्याह ।। हे सखि । एष एव सत्त्वमन्तःकरणं परिमार्ष्टुं सम्यक् शोधयितुमर्हति । ननु तस्मादस्माकमपि सत्त्वं शुद्धं कृत्वा स्वदर्शनं प्रयच्छतीत्याशयः । न त्विति पाठे तु विशेषाकारेण सत्त्वं ज्ञानम् । सम्यग्ज्ञानमिति यावत् । परिमार्ष्टुं दूरगमनेन नाशयितुं नार्हति । एतादृशमेव ज्ञानमस्माकं निरन्तरं भवतीत्याशयः । यद्वा । सत्त्वं स्वदर्शनं परिमार्ष्टुं दूरगमनेन नाशयितुं न तु नैवार्हति । निरन्तरमेतद्दर्शनार्थमस्माभिरप्यनेन सहैव गन्तव्यमित्याशय इत्यप्याहुः ।। २४ ।।

स वा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च वेदवादिभिः ।
य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्र सज्जते ।। २५ ।।

प्रकाशिका— सर्ववेदवेद्योऽप्ययमेवेत्याहुः ।। स वा अयमिति । हे सखि । गुह्येषूपनिषत्स्वनुगीतः सत्कथोऽन्वनु प्रतिदिनं गीताः कीर्तिताः सत्यः कथाश्चरित्राणि यस्य स तथा । गुह्यवादिभिरिति पाठे रहस्यनिरूपकैः । गानप्रकारमेवाह ।। य एक इत्यादि । अत इति शब्दोऽध्याहार्थः ।। २५ ।।

यदा ह्यधर्मेण तमोऽधिका नृपाः जीवन्ति तत्रैव हि सात्वतः किल ।
धर्मं भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद्युगे युगे ।। २६ ।।

तात्पर्यम्— सात्विकानामनुग्राहकः । 'अगुणोऽपि परो देवो ह्यनुगृह्णाति सात्विकान् । देवांस्तु मानवान्मध्यानुपेक्ष्य क्लेश्यतेऽसुरानिति ब्रह्मदर्शने । सात्वतः सात्विकस्नेहात्सत्वो ह्यानन्दरूपत इति ब्रह्मवैवर्ते । 'धारकत्वाद्धर्मरूपो ह्यैश्वर्यादेर्भगो ह्यसौ । सत्यमानन्दरूपत्वादृतो ज्ञानस्वरूपतः । यशो ह्यलं प्रसिद्धत्वाद्दया हि करुणाकर इति तन्त्रभागवते । एवं विधगुणस्वरूपाणि रूपाणि दधद्युगेयुगे ॥ २६ ॥

प्रकाशिका— दुष्टजनसंहाराय नानावतारकर्ताऽप्ययमेवेत्याहुः ॥ यदा हीति । अत्र सात्त्वत शब्देन सत्त्वगुणसम्बन्धीति प्रतीतिनिवारणाय प्रकृतसङ्गतत्वेन व्याख्याति ॥ सात्त्विकानामिति । अनुग्राहक इत्यनन्तरं सात्त्वत इति शेषः । सत्त्वगुणसम्बन्धीत्येवार्थः किं न स्यादित्यतोऽत्र बाधकं प्रमाणमाह ॥ अगुणोऽपीति । सत्त्वादिगुणशून्योऽपीत्यर्थः । हीत्यनेन तस्य स्वभाव एव तादृश इति दर्शयति । क्लिश्यते क्लेशयुक्तान्करोति । एतेनेश्वरस्यं सुरासुरानुग्रहनिग्रहकारित्वे वैषम्याद्यापत्तिरित्यपि निरस्तम् । एतादृशवैषम्यस्य तत्स्वभावत्वात् । अनेन मूले भवायेति प्रयोजनकथनमुपलक्षणमिति सूचयति । मध्यमानामुपेक्षणायासुराणामन्धे तमसि क्लेशायेत्यपि ग्राह्यम् । सात्त्वत शब्दस्योक्तार्थत्वे प्रमाणमप्याह ॥ सात्त्वत इति । स्नेहादनुग्रहात् । हीत्यनेन प्रमाणप्रसिद्धिं दर्शयति । रूपग्रहणमात्रेण कथं भक्तानां भद्रं करोतीत्यपेक्षायामुक्तम् । धर्ममित्यादि यश इत्यन्तम्। तस्य धर्मादिप्रेरकं धर्माद्यन्तर्गतं धर्मादिनामकं रूपं दधदित्यर्थो विवक्षित इत्यग्रे वक्ष्यति। तत्र धर्माद्यन्तर्गतस्य हरेः धर्मादिशब्दवाच्यत्वे प्रवृत्तिनिमित्तानि प्रमाणेनैव दर्शयति ॥ धारकत्वादिति । ऐश्वर्यादेरित्यत्रादिपदेन वीर्यादिर्ग्रहणम् । धर्मरूपो धर्म शब्दवाच्य इत्यर्थः । एवमेव भग इत्यादिकं व्याख्येयम् । हि यस्मात्करुणाकरस्तस्माद्दयाशब्दवाच्य इत्यर्थः । उक्तनिमित्तानां प्रामाणिकत्वं वक्तुं हि शब्दः । धर्मादीत्यादिनां रूपाणीत्यनेनान्वयासम्भवाद्योजनमाह ॥ एवं विधेति । एवं विधगुणाख्यानि तत्प्रेरकाणि तदन्तर्गतानि स्वस्य रूपाणि मत्स्यादिरूपाणि च युगे युगे तत्तदवसरे दधदिति । योज्यमिति शेषः ॥ ततश्चायमर्थः ॥ तमोधिकास्तामसतामसा नृपा यदाऽधर्मेण वेदाद्युक्तविरुद्धेन शैवाद्यागमोक्तमार्गेण जीवन्ति प्राणान्पुष्णन्ति। तत्र तदाऽसौ सात्त्वतः सात्त्वतामनुग्राहको भवाय भक्तजनभद्राय मध्यमानामुपेक्षाय असुराणां क्लेशाय च धर्मं धारकत्वाद्धर्मनामकं धर्मरूपगुणप्रेरकं धर्मान्तर्गतम् । भगमैश्वर्यादिगुणात्मकत्वे भग शब्दवाच्यं तदन्तर्गतं तत्प्रेरकम् । सत्यमानन्दरूपत्वेन सत्य शब्दवाच्यं तदन्तर्गतं तत्प्रेरकम् । ऋतं ज्ञानरूपत्वादृतं तच्छब्दवाच्यं तदन्तर्गतं तत्प्रेरकम् । दया कृपानिधित्वाद्दयाशब्दवाच्यं तदन्तर्गतं तत्प्रेरकम् । यशोऽतिप्रसिद्धत्वाद्यशःशब्दवाच्यं तदन्तर्गतं तत्प्रेरकं रूपं स्वस्य रूपं रूपाणि मत्स्यादीनि च युगे युगे दधानो य एष हरिः स एवायमिति ॥ २६ ॥

अहो अलं श्लाघ्यतमं यदोः कुलं त्वहो अलं पुण्यतमं मधोर्वनम् ।
यदेषु पुंसामृषभः प्रियश्रवाः स्वजन्मना चङ्क्रमणेन चाञ्चति ॥ २७ ॥

प्रकाशिका— एवं मूलरूपस्तुत्या तदभिन्नं कृष्णं स्तुत्वेदानीं श्रीकृष्णमेव स्तुवन्ति पञ्चभिः ॥ अहो इति । मधोर्वनं मधुराऽलमत्यर्थमतिशयेन पुण्यमहो आश्चर्यादप्याश्चर्यम् । यद्यस्मादेषः कृष्णः पुंसामृषभः पुरुषोत्तमः प्रियश्रवा मनोहरकीर्तिः । स्वस्य जन्मना यदोः कुलमञ्चति पूजयति । पूजितं करोतीति यावत् । अतस्तदलं श्लाघ्यतममहो । चङ्मणेन च पादन्यासेन च न केवलं स्वजन्मना मधोर्वनमञ्चति अतस्तदलं पुष्यतममहो इति योज्यम् ॥ २७ ॥

अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः ।
पश्यन्ति नित्यं यदनुग्रहेक्षितस्मितावलोकं स्वपतिं स्म यत्प्रजाः ॥ २८ ॥

प्रकाशिका— अहो बत आश्चर्यम् । स्वर्यशसः स्वर्ग उत्कृष्ट इति यशः तस्यतिरस्करीपरिभव-कर्त्री च कुशस्थली द्वारका भवः भूलोकस्य पुण्ययशः कर्त्री च । स्म यद्यस्माद्यत्प्रजा यस्यां द्वारकायां विद्यमानाः प्रजाः स्वपतिं श्रीकृष्णं नित्यं पश्यन्ति स्म । नैवं स्वर्गस्थाः । अत इति शेषः । कथं भूतं स्वपतिम् । अनुग्रहेक्षितस्मितावलोकं भक्तेष्वनुग्रहेणेक्षितं निरीक्षणं यस्य स तथा । स्मितेनाश्चर्येण मन्दहासेनावलोको भक्तानां यस्मिन्स तथा । अनुग्रहेक्षितश्चासौ स्मिताव-लोकश्च तम् । अनुग्रहार्थमीक्षितो भक्तैः प्रतीक्षितः स्मितावलोको मन्दस्मितपूर्वकनिरीक्षणं यस्य स तथा तमिति वा ॥ २८ ॥

नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः ।
पिबन्ति याः सख्यधरामृतं मुहुः व्रजस्त्रियः सम्मुमुहुर्यदाशया ॥ २९ ॥

प्रकाशिका— अस्यानेन गृहीताः पाणयो हस्ता यासां तास्ताभिः पत्नीभिरीश्वरोऽयमेव नूनं जन्मान्तरेषु समर्चितः । यस्याधरामृतस्य आशया पानेच्छया संमुमुहुः संमोहं प्राप्ताः । तदधरामृतं याः पिबन्ति ताभिर्गृहीतपाणिरिति सम्बन्धः ॥ २९ ॥

या वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्यप्रमुखान्विशुष्मिणः ।
प्रद्युम्नसाम्ब प्रमुखात्मजाः परा याश्चा हृता भौमवधे सहस्रशः ॥ ३० ॥

प्रकाशिका— कास्ता इत्यतस्ता दर्शयितुं श्लोकद्वयम् । विशुष्मिणो विशिष्टबलान्प्रमथ्य पराजित्य वीर्यं प्रभाव एव शुल्कं मौल्यं तेन । प्रद्युम्नश्च साम्बश्च तौ प्रमुखौ येषां ते तथा ।

प्रद्युम्नसाम्बप्रमुखा आत्मजा यासां तास्तथोक्ताः । रुक्मिण्याद्याः परा अपराश्च ताः का या भौमवधे सति नरकवधानन्तरं सहस्रशः शत्तोत्तरषोडशसहस्रसङ्ख्याकाः कशेर्वाद्या आहृता द्वारकां प्रति प्रेषिताः । अस्य श्लोकस्योत्तरेणपूर्वेणवान्वयः ॥ ३० ॥

एताः पुरा स्त्रीत्वमवाप्तये समं निरस्तशोकं बत साधु कुर्वते ।
यासां गृहात्पुष्करलोचनः पतिः न जात्वपैत्याकृतिभिः हृदि स्पृशन् ॥ ३१ ॥

तात्पर्यम्— अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे । "भर्तारं च जगद्योनिं वासुदेवमजं विभुमिति" महाकौर्मे ॥ ३१ ॥

प्रकाशिका— पुरा पूर्वजन्मनि । अत्र स्त्रीत्वमवाप्तय इत्युक्त्या पुरा पुरुषा इति सूचितम् । ते के पुरुषा इत्यपेक्षायां श्लोकतात्पर्यं प्रमाणेनाह ॥ अग्नीति । निरस्तशोकं यथा स्यात्तथा । समं सम्भूय साधु शोभनं तपाख्यं कर्म कुर्वतेऽकुर्वत । बत हर्षे । कुतः । यतः पुष्करलोचनः पुण्ड-रीकाक्षः । पतिः कृष्ण आकृतिभिः समीचीनचेष्टाभिरवयवैर्वा हृदि स्पृशन् सन्मनोहरः सन् यासां गृहाद्गृहेभ्यो जातु कदाचिदपि नापैति ॥ ३१ ॥

सूत उवाच—
एवंविधा गदन्तीनां स गिरः पुण्ययोषितां ।
निरीक्षणेनाभिनन्दन्सस्मितेन ययौ हरिः ॥ ३२ ॥

प्रकाशिका— एवं विधा विचित्रा गिरः ॥ ३२ ॥

अजातशत्रुः पृतनां गोपीथाय मधुद्विषः ।
परेभ्यः शङ्कितः स्नेहात् प्रायुङ्क्त चतुरङ्गिणीम् ॥ ३३ ॥

तात्पर्यम्— स्नेहमात्रात् ॥ ३३ ॥

प्रकाशिका— स हरिः पृतनां सेनाम् । गोपीथाय रक्षणाय । परेभ्यः शत्रुभ्यः शङ्कितः सन् । कथं भूतां पृतनाम् । "हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुर्विधमिति" वचनोक्तचतुरङ्गिणीम् । अत्र स्नेहादिति स्नेह शब्देन भक्तिग्रहणे माहात्म्यज्ञानवतः शङ्काया असम्भवाद्व्याख्याति ॥ स्नेहमा-त्रादिति । तथा च न भक्तिरत्र विवक्षितेति भावः ॥ ३३ ॥

अथ दूरागताञ्शौरिः कौरवान्विदुरान्वितान् ।
सन्निवर्त्य दृढं स्निग्धान्प्रायात्स्वनगरीं प्रियैः ॥ ३४ ॥

प्रकाशिका— प्रियैरुद्धवादिभिः सह ॥ ३४ ॥

कुरुजाङ्गलपाञ्चालान् शूरसेनान् सयामुनान् ।
ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान्सारस्वतानथ ॥ ३५ ॥

प्रकाशिका— कुरुक्षेत्रं कुरुदेशान्तर्गतमेव । क्रमोऽत्र न विवक्षितः ॥ ३५ ॥

मरुधन्वमतिक्रम्य सौवीराभीरसैन्धवान् ।
आनर्तान्भार्गवोपागाच्छ्रान्तवाहो मनाग्विभुः ॥ ३६ ॥

प्रकाशिका— मरुर्निरुदको देशो धन्वोऽल्पोदक आनर्ताख्यो द्वारकादेशः । हे भार्गव शौनक । आनर्तान्द्वारकादेशान् । मनागीषच्छ्रान्ता वाहा अश्वा यस्य स तथा ॥ ३६ ॥

तत्र तत्र च तत्रत्यैर्हरिः प्रत्युद्यतार्हणः ।
सायं भेजे दिशं पश्चाद्गविष्ठो गां गतस्तदा ॥ ३७ ॥

तात्पर्यम्— गविष्ठ आदित्यः । असौ वावगविष्ठोऽप्सूदेत्यप्स्वस्तमेतीति माध्यन्दिनायनश्रुतिः ॥ ३७ ॥

प्रकाशिका— तत्र तत्र देशे तत्रत्यैर्जनैः प्रत्युद्यतानि प्रत्याहृतान्यर्हणानि पूजासाधनानि यस्मै स तथा । सायं सायङ्काले पश्चाद्दिशं पश्चिमां दिशं भेजे प्राप्तः । तदा गविष्ठो गां गतः । अत्र गविष्ठ शब्दार्थं दर्शयति ॥ गविष्ठ इति । गवि दिवि समुद्रजले वा तिष्ठत्तीति योगेनेति भावः । अलुक् समासोऽयम् । युधिष्ठिर इतिवत् । गविष्ठ शब्दस्यादित्ये श्रौतमपि प्रयोगं दर्शयति ॥ असाविति । अप्सूदयास्तमयकथनं पूर्वपश्चिमसमुद्रतीरवासिभिर्जनैस्तथा दृश्यमानत्वाद्दर्शनभाषामाश्रित्येति ज्ञातव्यम् । रश्मीनामविशेषपिह्यन्यद्दृष्टिव्यपेक्षया सूर्यस्य मण्डलं यान्तीत्युच्यन्ते । तददर्शनादिति प्रमाणेन यथा गार्ग्यमारीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डले एकीभवन्तीत्यादिश्रुतिव्याख्यानवत् । अत्रोदयेऽस्तमयेऽपि देशान्तरे पृथग्दर्शनादिनादित्यस्योदयास्तमयोरविशेषात् यथोदयो रवेर्भवेत्सदोदितस्य लोकत इति वचनाच्च । ततश्च गविष्ठ आदित्यः पश्चिमां गां समुद्रजलं गतः प्रविष्ट इव लोकैर्दृष्टोऽस्तं गत इति यावदिति मूलं व्याख्येयमिति भावः ॥ ३७ ॥

आनर्तान्स उपव्रज्य स्वृद्धाञ्जनपदान्स्वकान् ।
दध्मौ दरवरं तेषां विषादं शमयन्निव ॥ ३८ ॥

प्रकाशिका— स्वृद्धान्समृद्धान् । दरवरं पाञ्चजन्यं शङ्खम् । दध्मौ वादितवान् । तेषां मानवानां विषादं रक्षणाभावप्रयुक्तं भयम् ॥ ३८ ॥

स उच्चकाशे धवळोदरो दरोप्युरुक्रमस्याधरशोणशोणिमा ।
दाध्मायमानः करकञ्जसम्पुटे यथाब्जषण्डे कलहंस उत्स्वनः ॥ ३९ ॥

प्रकाशिका— स पाञ्चजन्य उच्चकाशे शुशुभे । धवलं शुक्लमुदरं यस्य स तथा । अपितथाऽप्युरुक्रमः श्रीकृष्णस्तस्याधरोष्ठस्य शोणेन रागेण शोणिमा रक्तिमा यस्य स तथोक्तः । दध्मायमानः पुनःपुनर्वाद्यमानः । करावेव कञ्जे हस्तकमले तयोः सम्पुटे मध्ये । वर्तमान इति शेषः ॥ अत्र दृष्टान्तः । अब्जखण्डे रक्तकमलसमूहे स्थित उत्स्वन उच्चध्वनिः कलहंसो राजहंसो यथा तथेति ॥ ३९ ॥

तमुपश्रुत्य निनदं जगद्भवभयापहम् ।
प्रत्युद्ययुः प्रजाः सर्वाः भर्तृदर्शनलालसाः ॥ ४० ॥

प्रकाशिका— जगतो भवः संसारस्तद्भयमपहन्तीति जगद्भयापहस्तम् । जगद्भयापहमिति पाठे जगतो भयं यैस्ते जगद्भया दैत्यास्तेभ्यो यद्भयं तद्धन्तीति तथा तमित्यर्थः । प्रत्युद्ययुः प्रत्याजग्मुः। भर्तुः कृष्णस्य दर्शने लालसमौत्सुक्यं यासां तास्तथा ॥ ४० ॥

नत्वोपनीतबलयो रवेर्दीपमिवादृताः ।
आत्मारामं पूर्णकामं निजलाभेन नित्यदा ॥ ४१ ॥

प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा ।
पितरं सर्वसुहृदमवितारमिवार्भकाः ॥ ४२ ॥

प्रकाशिका— तत्र तस्मिन्कृष्णे उपनीता आनीता बलय उपायनानि याभिस्ता आदृता आदरयुक्ता निरपेक्षेऽपि तस्मिन्नादरेण समर्पणे दृष्टान्तः ॥ रवेर्दीपमिवेति । पितरमर्भका इव । सवर्षां सज्जनानां सुहृदमनिमित्तबन्धुम् । सुहृत्वेनैवावितारं न तु कामेन । तत्र हेतुः । आत्मारामम् । तत्रापि हेतुः ॥ नित्यदा निजलाभेन स्वरूपभूतानन्दप्राप्त्या पूर्णकाममिति ॥ ४१,४२ ॥

नताः स्म ते नाथ सदाङ्घ्रिपङ्कजं विरिञ्चवैरिञ्चसुरेन्द्रवन्दितम् ।
परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत्परप्रभुः ॥ ४३ ॥

प्रकाशिका— विरिञ्चो ब्रह्मा वैरिञ्चो रुद्रः । सुरेन्द्रैः सुरश्रेष्ठैरिन्द्रादिभिश्च वन्दितम् । इह चेतनसमूहमध्ये परं क्षेमं मोक्षमिच्छतां भक्तानां परायणमुत्तमाश्रयम् । कुतः । परेषां संसारिणां ब्रह्मादीनां प्रभुर्जननमरणाद्यापादकः । कालः यत्राङ्घ्रिपङ्कजे भक्तानां पुनर्नप्रभवेत् । जननादि-धर्मापादने समर्थो न भवेत् ॥ ४३ ॥

भवाय नस्त्वं भव विश्वभावन त्वमेव माताऽऽत्मसुहृत्पतिः पिता ।
त्वं सद्गुरुर्नः परमश्च दैवतं यस्यानुवृत्या कृतिनो बभूविम ॥ ४४ ॥

प्रकाशिका— भो विश्वभावन सकलजगदुत्पादक । भवाय भद्राय भव । यस्यानुवृत्त्या सेवया वयं कृतिनः सुकृतिनो बभूविम । सत्वमेव मातेत्यादि । आत्मना स्वेनैव सुहृत् । नास्मत्प्रय-त्नेनेत्यर्थः ॥ ४४ ॥

अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनम् ।
प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगम् ॥ ४५ ॥

प्रकाशिका— यद्यस्मात्तव रूपं पश्येम तस्माद्वयं भवता सनाथाः स्मः । अहो अस्मद्भाग्यम् । कथं भूतं रूपम् । त्रैविष्टपानां स्वर्ग सम्बन्धिनां देवानामपि दूरे दर्शनं यस्य तत् । देवैरपि न सहसा द्रष्टुं शक्यमित्यर्थः । प्रेम्णा स्मितं यस्मिन्स्निग्धं निरीक्षणं स्नेहयुक्तमवलोकनं च यस्मिन् । तथाभूतमाननं यस्मिंस्तत् । सर्वं पूर्णं सौभगं सौन्दर्यं यस्मिंस्तत् ॥ ४५ ॥

यर्ह्यम्बुजाक्षाश्वति माधवो भवान्कुरून्मधून्वाऽथ सुहृद्दिदृक्षया ।
तत्राब्दकोटिप्रतिमः क्षणो भवेद्रविं विनाऽक्ष्णामिव नस्तवाच्युत ॥ ४६ ॥

तात्पर्यम्— **कुरूणां मधूनां च नः ॥ ४६ ॥**

प्रकाशिका— हे अम्बुजाक्ष । यर्हि यदा माधवो लक्ष्मीपतिर्भवान्मधुभ्यो कुरूस्तन्ना-मकान्देशान् । अथवा कुरुभ्यो मधूंस्तन्नामकदेशान् । सुहृदां पाण्डवानां यादवानां च क्रमेण दर्शनेच्छयांऽचति गच्छति । यद्यपीदानीमानर्तदेशवासिनो यादवास्तथाऽपि पूर्वाभ्यासवशान्म-धूनित्युक्तवन्त इति ज्ञातव्यम् । हे अच्युत । तत्र तस्यामवस्थायां तव त्वां विना नोऽस्माकं य एकः क्षण एकक्षणरूपकालोऽब्दकोटिप्रतिमो वर्षकोटिसमानो भवेद्भवति । केषामिव । रविं चक्षुरिन्द्रियाभिमानिनं बहिः प्रकाशवन्तं वा विनाऽक्ष्णा चक्षुषा तथा तथेत्यर्थः । अत्र न इत्यनेन मधूनामेव ग्रहणे मधूनश्वतीत्यस्य कुरूणां ग्रहणे कुरूनित्यस्य च वैयर्थ्यम् । योग्यता-

भावश्चापद्येतातस्तद्व्याह्यं दर्शयति ॥ कुरूणामिति । न इत्यनूद्य कुरूणां मधूनां चेति व्याख्यातम् । तथा च नान्यतरमात्रग्रहणं येनोक्तदोषः किं तूभयोरपि । ततश्च यदा कुरूनश्चति तदा नो मधूनां यदा मधूनश्चति तदा नः कुरूणामिति मूलं योज्यमिति भावः ॥ ४६ ॥

इति चोदीरिता वाचः प्रजानां भक्तवत्सलः ।
शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन्प्राविशत्पुरीम् ॥ ४७ ॥

प्रकाशिका— इत्येवं विधा वाचः । च शब्दादन्याश्च शृण्वानः शृण्वन् ॥ ४७ ॥

मधुभोजदशार्हार्हकुकुरान्धकवृष्णिभिः ।
आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ॥ ४८ ॥

प्रकाशिका— द्वारकां वर्णयति पञ्चभिः । मधुभोजादिशब्दा यादवविशेषवाचकाः । आत्मना स्वेन तुल्यं बलं येषां तैरित्यर्थवादमात्रम् । गुप्तां रक्षिताम् । भोगवती नाम नागानां पुरी ॥ ४८ ॥

सर्वर्तुसर्वविभवैः पुण्यवृक्षलताश्रमैः ।
उद्यानोपवनारामैर्धृतपद्माकरश्रियम् ॥ ४९ ॥

प्रकाशिका— सर्वेषु ऋतुषु सर्वे विभवाः पुण्यादिसम्पदो येषां ते । पुण्यवृक्षा अश्वत्थादयो लताश्रमा लतामण्टपाश्च तैरुद्यानादिभिश्च । धृता पद्माकराणां सरोवराणां श्रीः शोभा यस्याः सा तथोक्ता ताम् । उद्यानं फलप्रधानं वनम् । उपवनं पुष्पप्रधानम् । आरामः क्रीडार्थं वनम् ॥ ४९ ॥

गोपुरद्वारमार्गेषु कृतकौतुकतोरणाम् ।
चित्रध्वजपताकाग्रैरन्तःप्रतिहतातपाम् ॥ ५० ॥

प्रकाशिका— गोपुरं पुरद्वारं द्वाराणि गृहद्वाराणि । मार्गाश्च तेषु कृतानि कौतुकेन तोरणानि यस्यां सा तथा ताम् । चित्राणां ध्वजपताकानामग्रैरन्तः प्रतिहतो निवारित आतपो यस्यां सा तथा ताम् ॥५०॥

सम्मार्जितमहामार्गरथ्यापणकचत्वराम् ।
सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षतांकुरैः ॥ ५१ ॥

प्रकाशिका— संमार्जितान्यपसारितरजस्कानि महामार्गादीनि यस्यां सा तथा ताम् । महामार्गो राजमार्गरथ्यारथगमनमार्गः, आपणकाः पण्यवीथयश्चत्वराण्यङ्गणानि सिक्ता प्रोक्षितामुत्पावकीर्णाम् ॥ ५१ ॥

द्वारि द्वारि गृहाणाञ्च दध्यक्षतफलेक्षुभिः ।
अलङ्कृतां पूर्णकुम्भैर्बलिभिर्धूपदीपकैः ॥ ५२ ॥

निशम्य कृष्णमायान्तं वसुदेवो महामनाः ।
अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥ ५३ ॥

प्रकाशिका— दृष्टिदोषपरिहारार्थं श्रीकृष्णोपरिभ्रमणाय कल्पितैः कुसुममिश्रितान्नादिरूपैर्बलिभिः ॥५२,५३॥

प्रद्युम्नश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः ।
प्रहर्षवेगोच्छ्वसितशयनासनभोजनाः ॥ ५४ ॥

प्रकाशिका— प्रहर्षवगेनोच्छ्वसितानि सहसा परित्यक्तानि शयनासनभोजनानि यैस्ते तथा । ॥ ५४ ॥

वारणेन्द्रं पुरस्कृत्य ब्राह्मणैः ससुमङ्गलैः ।
शङ्खतूर्यनिनादेन ब्रह्मघोषेण चादृताः ।
प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः ॥ ५५ ॥

प्रकाशिका— वारणेन्द्रं मङ्गलार्थं पुरस्कृत्य । समुमङ्गलैः सुमङ्गलफलपुष्पादितद्युक्तपाणिभिः । ब्रह्मघोषो वेदध्वनिः । आदृता आदरयुक्ताः प्रणयेन स्नेहेनागतं साध्वसं भ्रमो येषां ते तथा । प्रणयेन भक्त्यातिशयेनागतं साध्वसमालस्यकरणेऽपराधो भविष्यतीति भयं येषामिति वा ॥ ५५ ॥

वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः ।
चलत्कुण्डलनिर्भातकपोलवदनश्रियः ॥ ५६ ॥

प्रकाशिका— चलत्कुण्डलैर्निर्भातानि द्योतितानि यानि कपोलानि तैर्वदनेषु श्रीर्यासां ताः । वारमुख्या वेश्यासु श्रेष्ठाः । प्रत्युज्जग्मुः ॥ ५६ ॥

नटनर्तकगन्धर्वाः सूतमागधवन्दिनः ।
गायन्ति चोत्तमश्लोकचरितान्यद्भुतानि च ॥ ५७ ॥

प्रकाशिका— नटा अभिनयेन शृङ्गाराद्यनुकरणकर्तारः । गीतवाद्यानुसारेण नृत्यन्तो नर्तकाः। गायका गन्धर्वाः । सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः । बन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयो गायन्ति च । न केवलं प्रत्युज्जग्मुः । अन्ते विद्यमानस्य चकारस्य बन्दिनश्चेत्यन्वयः ॥ ५७ ॥

भगवांस्तत्र बन्धूनां पौराणामनुवर्तिनाम् ।
यथाविध्युपसङ्गम्य सर्वेषां मानमादधे ॥ ५८ ॥

प्रकाशिका— यथाविध्युपसङ्गम्य । यैः सह यथोचितं तैः सह तथा समागमं कृत्वाऽऽदधे कृतवान् ॥ ५८ ॥

प्रह्वाभिवन्दनाश्लेषकरस्पर्शस्मितेक्षणैः ।
आ श्वभ्य आ श्वपाकेभ्यः वरैश्चाभिमतैर्विभुः ॥ ५९ ॥

प्रकाशिका— कैरित्यत उक्तम् । प्रह्वेति । प्रह्वा प्रह्वात्वं नम्रीभावः । अभिवन्दनं शिरसा नतिः । आश्वास्य अभयं दत्वा । आश्वभ्य इति पाठे शुनःश्वपाकांश्चाभिव्याप्येति व्याख्येयम् । अभिमतैर्वरैरभीष्टदानैर्मानं कृतवान् ॥ ५९ ॥

स्वयश्च गुरुभिर्विप्रैस्सदारैः स्थविरैरपि ।
आशीर्भिर्युज्यमानोऽन्यैर्बन्धुभिश्चाविशत्पुरम् ॥ ६० ॥

प्रकाशिका— अन्यैश्च बन्दिभिश्च ॥ ६० ॥

राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः ।
हर्म्याण्यारुरुहुर्विप्रास्तदीक्षणमहोत्सवाः ॥ ६१ ॥

प्रकाशिका— तस्येक्षणमेव महानुत्सवो यासां तास्तथा ॥ ६१ ॥

नित्यं निरीक्षमाणानां यद्यपि द्वारकौकसाम् ।
न वितृप्यन्ति हि दृशः श्रियो धामाङ्गमच्युतम् ॥ ६२ ॥

प्रकाशिका— यद्यस्मान्नित्यं सदाऽच्युतं निरीक्ष्यमाणानामपि दृशो नैव तृप्यन्ति । अत आरुरुहुः । तृप्त्यभावे हेतुः । श्रियः शोभाया धाम स्थानमङ्गं यस्य तम् ॥ ६२ ॥

श्रियो निवासो यस्योरः पानपात्रं मुखं दृशाम् ।
बाहवो लोकपालानां सारङ्गाणां पदाम्बुजम् ॥ ६३ ॥

प्रकाशिका— शोभातिशयोप्यत्रैव कुत इत्यत आह ॥ श्रिय इति । श्रियो लक्ष्म्या यस्योरो वक्षो निवास आवासस्थानम् । यस्य मुखं सर्वप्राणिनां दृशां सौन्दर्यामृतपानस्य पात्रम् । यस्य बाहवो लोकपालानां निवासः सारं श्रेष्ठं परं ब्रह्म गच्छन्तीति सारङ्गा ज्ञानिनस्तेषां यस्य पादाम्बुजं निवासः । तं निरीक्षमाणानां दृश इति पूर्वेणान्वयः ॥ ६३ ॥

सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि ।
पिशङ्गवासा वनमालया बभौ घनो यथार्कोऽडुपचापवैद्युतैः ॥ ६४ ॥

प्रकाशिका— सितैः शुभ्रैरातपत्रव्यजनैरुपस्कृतो मण्डितः । अत्राभूतोपममाह ॥ यथेति । अर्कश्चोडूनि नक्षत्राणि पातीत्युडुपो नक्षत्रावृतश्चन्द्रश्चापमिन्द्रधनुश्च वैद्युतं विद्युत्तेजश्च तैरन्वितो मेघो यथा भाति तथेत्यर्थः । अर्कः छत्रस्योपरि सूर्यबिम्बमुभयतश्चन्द्रो सर्वतो नक्षत्राणि मध्ये च मिलितं चापद्वयं स्थिरं विद्युत्तेजश्च भवेत्तर्हि धनो यथा तैर्भाति तथा हरिरपि स्वातन्त्र्यादि-भिर्बभावित्यर्थः ॥ ६४ ॥

प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ।
ववन्दे शिरसा सप्त देवकीप्रमुखा मुदा ॥ ६५ ॥

प्रकाशिका— पित्रोर्मातापित्रोः ॥ ६५ ॥

ताः पुत्रमङ्कमारोप्य स्नेहस्नुतपयोधराः ।
हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ॥ ६६ ॥

प्रकाशिका— हर्षेण विह्वलीकृतो वशीकृत आत्माऽन्तःकरणं यासां तास्तथा सिषिचु-रभ्यषिञ्चन् ॥६६॥

अथाविशत्स्वभवनं सर्वकाममनुत्तमम् ।
प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ।
शतमष्टोत्तरं चैव वज्रवैडूर्यमण्डिताः ॥ ६७ ॥

प्रकाशिका— सर्वे कामा विषया यस्मिंस्तत् । अनुत्तमं न विद्यते उत्तमं यस्मात्तत् ॥ ६७ ॥

पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य सञ्जातमनोमहोत्सवाः ।
उत्तस्थुरारात्सहसाऽऽसनाश्रयाः साकम्पितव्रीडितलोचनाननाः ॥ ६८ ॥

प्रकाशिका— प्रोष्य देशान्तरे उषित्वा । आराद्दूरादेव विलोक्य संजातो मनसि महोत्सवो यासां ताः । आकंपितेन सहिताः साकंपिताः । व्रीडितानि लोचनान्याननानि च यासां तास्तथा । साकंपिताश्च ता व्रीडितलोचनाननाश्चेति विग्रहः । आ ईषत्कंपितं कंपनं च व्रीडितं व्रीडा च ताभ्यां सहितानि साकंपितव्रीडितानि लोचनाननानि यासां ता इति वा ॥ ६८ ॥

तमात्मजैर्दृष्टिभिरन्तरात्मना दुरन्तभावाः परिरेभिरे पतिम् ।
निरुद्धमप्यस्रवदम्बु नेत्रयोः विलज्जतीनां भृगुवर्य वैक्लवात् ॥ ६९ ॥

प्रकाशिका— आयान्तं तं पतिं दर्शनात्पूर्वमन्तरात्मना मनसा परिरेभिरे । ततो दृष्टिभिः । ततः समीपमागतं पुत्रैः पुत्रद्वाराऽऽलिङ्गितवत्य इत्यर्थः । अत्र हेतुः । दुरन्तभावा गम्भीराभिप्रायास्तदा च तासां नेत्रयोर्निरुद्धमप्यम्बुबाष्पं वैक्लवाद्वैवश्यात् । अस्रवत्सुस्राव । हे भृगुवर्य । सावधानं शृण्विति ज्ञापनाय मध्ये संबोधनम् । एवमग्रेऽपि ॥ ६९ ॥

यद्यप्यसौ पार्श्वगतो रहोगतस्तासां तथाप्यङ्घ्रियुगं नवं नवम् ।
पदे पदे का विरमेत तत्पदाच्चलापि यं श्रीर्न जहाति कर्हिचित् ॥ ७० ॥

प्रकाशिका—चित्रमेतदित्याह ॥ यद्यप्यसाविति । असौ श्रीकृष्णः पार्श्वगतः समीपस्थस्तत्रापि रहोगतः पदे पदे प्रतिक्षणं नवं नवं नूतनान्नूतनम् । अलंबुद्ध्यास्पदं न भवतीति यावत् । अत्र कैमुत्यन्यायमाह ॥ का विरमेतेति । अन्या चंचला चपलाऽपि श्रीर्यं कर्हिचित्कदाचिदपि न जहाति । तत्पदात्का स्त्री विरमेत् अलंबुद्धिं कुर्यात् ॥ ७० ॥

एवं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसाम् ।
विधाय वैरं श्वसनो यथानलं मिथो वधेनोपरतो निरायुधः ॥ ७१ ॥

प्रकाशिका— सङ्क्षिप्योक्तं कृष्णचरितमुपसंहरति । एवमिति । क्षितेर्भाराय जन्म येषां तेषामक्षौहिणीभिः परिवृतं सर्वतः प्रसृतं तेजः प्रभावो येषां तेषाम् । स्वयं निरायुध एव सन् वैरं विधायोत्पाद्य मिथः परस्परं वधेन जातेन निमित्तेनोपरतो निवृत्तव्यापारो जातः । अत्र दृष्टान्तः । श्वसनो वायुर्यथा वेणूनामन्योन्य सङ्घर्षणेनानलमग्निं विधाय मिथो दाह्ये शाम्यति तथैवेति ॥७१॥

स एष नरलोकेऽस्मिन्नवतीर्णः स्वमायया ।
रेमे स्त्रीरत्नकूटस्थः भगवान्प्राकृतो यथा ॥ ७२ ॥

प्रकाशिका— नायं मनुष्य इति प्रतिपत्तुमर्ह इत्याह ॥ स एष इति । स्वमायया स्वेच्छया स्त्रीरत्नकूटस्थः स्त्रीश्रेष्ठसमूहगतः । प्राकृतो मूर्खः ॥ ७२ ॥

उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकविहतो मदनोऽपि यासाम् ।
सम्मुह्य चापमजहात् प्रमदोत्तमास्ता यस्येन्द्रियं विमथितुं कुहकैर्न शेकुः ॥७३॥

प्रकाशिका— ननु स्त्रीजितस्य कथमीश्वरावतारत्वमित्यत आह ॥ उद्दामेति । यासामुद्दामभावस्योत्कृष्टशृङ्गारचेष्टाविशेषस्य पिशुनः पिशुन इव सूचकोऽमलो दुर्लक्षणरहितो वल्गु सुन्दरो हासो व्रीडयाऽवलोकश्च ताभ्यां विहतस्ताडितो मदनोऽपि संमुह्य सम्यङ्मोहं प्राप्य पुष्पाख्यं चापमजहान्मुक्तवान् । ताः प्रमदोत्तमाः कुहकैः पुरुषचित्तविभ्रमकरैर्वल्गुहासादिभिर्यस्य श्रीकृष्णस्येन्द्रियं मनो विमथितुं क्षोभयितुं न शेकुर्न शक्ता बभूवुस्तमित्युत्तरेणान्वयः ॥ ७३ ॥

मन्यते तन्मयं लोको ह्यसङ्गमपि सङ्गिनम् ।
आत्मौपम्येन मनुजं प्रावृण्वानमतोऽबुधः ॥ ७४ ॥

प्रकाशिका— आत्मौपम्येन स्वात्मदृष्टान्तेन । कथं भूतम् । मनुजं प्रत्यात्मानं प्रावृण्वानमाच्छादयन्तं हि यास्मात्तस्मादयं जनोऽबुधस्तत्त्वज्ञानशून्यः एतादृशे । स्त्रीजितत्वप्रवादोऽज्ञानमूलक एवेत्याह ॥ मन्यत इति तन्मयं स्त्रीप्रधानकम् । तथा च नायं स्त्रीजितः किं त्वेतासां स्त्रीणां स्वभक्तत्वात्तास्वनुग्रहायैव स्वरमणोऽपि रमते । स्त्रीजितत्वप्रवादस्त्वज्ञानमूलक एवेति श्लोकद्वयस्याभिप्रायः ॥ ७४ ॥

यत्तदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः ।
न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया ॥ ७५ ॥

तात्पर्यम्— तदाश्रया बुद्धिः । तज्ज्ञानिनामपि प्रकृतिस्थानां न तत्सङ्गः किमु तस्येति व्यत्यासदृष्टान्तः । व्यत्यासोऽनन्वयश्चैव प्रसिद्धो भूत एव च । सर्वसांहार(रि)कश्चेति दृष्टान्तः पञ्चधा स्मृत इति ब्राह्मे ॥ ७५ ॥

प्रकाशिका— ननु प्राकृतस्त्रीसङ्गिनो न तत्कार्य सुखादिगुणसम्बन्ध इत्येतत्कथमित्यपेक्षायामैश्वर्यादिवेत्याशयेनैश्वर्यस्वरूपं दर्शयति ॥ यत्तदिति । प्रकृतिस्थोऽपि सदाऽऽत्मस्थैः स्वाश्रितै-

स्तद्गुणैः सत्त्वादिभिस्तत्कार्यैः सुखादिभिश्च न युज्यते न सम्बद्ध्यत इति यत्तदेवेशस्येशनमीश्वरत्वम् । अत्र दृष्टान्तमाह ॥ यथा बुद्धिरिति । इदमप्रतीत्या व्याख्याति ॥ तदाश्रयेति । तदाश्रया बुद्धिर्व्यत्यासदृष्टान्त इति सम्बन्धः । कथमित्यतो व्यत्यासदृष्टान्तत्वमुपपादयति । तज्ज्ञानिनामपीति । भगवत्ज्ञानवतामपीत्यर्थः । तथा च बुद्धि शब्देन तद्वन्तो लक्ष्या इति भावः । प्रकृतिस्थानां तत्कार्यदेहस्थानां न सङ्गस्तत्कार्यैर्दुःखादिभिः । एवं च कैमुत्यप्रदर्शनाय यो दृष्टान्त उपादीयेत स एव व्यत्यासदृष्टान्त इत्युक्तं भवति । दृष्टान्तबलेन हि सर्वत्र दार्ष्टान्तिके साध्यसिद्धिः । अत्र तु दार्ष्टान्तिकधर्मिबलेन दृष्टान्तसाध्यधर्मसिद्ध्या दार्ष्टान्तिकधर्मिणि साध्यधर्मसिद्धिरित्यर्थः । व्यत्यासेनायं व्यत्यासदृष्टान्त इति ज्ञेयम् । नन्वेतादृशदृष्टान्तो न प्रामाणिक इत्यतोऽत्र प्रमाणमाह ॥ व्यत्यास इति । आद्ये एव शब्दश्च शब्दार्थः । प्रसिद्ध इत्यनेन सम्बद्ध्यते । द्वितीयस्यैव शब्दस्य पश्चधैवेत्यन्वयः । व्यत्यासः प्रकृत एव । स्वयं तु भगवान्व्यासो व्याप्तज्ञानमहांशुमान् । अनन्ताकाशवत्पश्यन्नित्यत्रानन्तकाशवदित्यनन्वयदृष्टान्तः । अस्यार्थस्तत्त्वप्रकाशिकायामुक्तः । यथाऽऽकाशो व्याप्तस्तथा ज्ञानमिति । तथा च पश्यन्निति समभिव्याहृते दाष्टान्तिके विधीयमानस्य दर्शनस्यानन्ताकाशेऽनन्वयादयमनन्वयदृष्टान्तः । तर्हि कुत्रायमन्वित इत्यपेक्षायां यथाऽऽकाशो व्याप्त इति टीकावाक्यम् । तथा चानन्ताकाशवद्व्याप्तं यत्ज्ञानं तल्लक्षणमाह ॥ अंशुमानिति । पूर्वार्धोक्ते ज्ञानव्याप्तत्व एवायं दृष्टान्त इति तद्वाक्यं व्याख्यातं भवतीति ज्ञातव्यम् । प्रसिद्ध उपमेयधर्मवत्तया प्रसिद्धः । यथा चन्द्रवदनः पङ्कजलोचनो बिम्बोष्ठ इत्यादि । अभूतः कदाऽपि न जातः यथाऽत्रैव पूर्वमुक्तः । घनो यथाऽर्कोडुपश्चापवैद्युतैरिति । "दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता । यदि भासदृशी सा स्याद्भासस्तस्य महात्मन" इत्यादिश्च । सर्वसंहारकः सर्वोपसंहारेण गृह्यमाणव्याप्तिप्रदर्शनस्थानम् । यथा यो यो धूमवान्सो सोऽग्निमान्यथा महानस इत्यादि । प्रसिद्धदृष्टान्तः । यथा सम्प्रतिपन्नमित्यादि सम्प्रतिपन्नः सर्वार्थसङ्ग्रहकः सर्वसंहारकदृष्टान्तः । ततश्च यथा यदा हरिविषयकबुद्धिमान्प्रकृतिस्थः प्रकृतिकार्यदेहे स्थितोऽपि तद्गुणैर्दुःखादिभिर्न युज्यते । तदा हरिस्तत्स्थोऽपि तद्गुणेन न युज्यते इति किं वाच्यमिति मूलं योज्यमिति भावः ॥ ७५ ॥

तं मेनिरे खला मूढास्त्रैणश्चानुव्रतं हरेः ।
अप्रमाणविदो भर्तुरीश्वरं मतयो यथा ॥ ७६ ॥

तात्पर्यम्— मतयो यथा यथामति मेनिरे ॥७६॥ इति प्रथमतात्पर्ये दशमोऽध्यायः ॥१०॥

प्रकाशिका— मन्यते तन्मयं लोक इत्युक्तमेव विशदयति ॥ तं मेनिर इति । खला इन्द्रियारमा मूढा भ्रान्ता अनुव्रतमनुसारिणमीश्वरमपि । कथं भूताः । भर्तुर्जगत्पोषकस्य हरेरप्रमाणविदोऽनं

तगुणत्वादिमर्यादाऽज्ञानिनो निरपेक्षादिमाहात्म्यप्रतिपादकप्रमाणाज्ञानिन इति वा । अत्र मेनिर इत्यत्र मतयो यथेति दृष्टान्तउच्यत इति भाति । न तद्युक्तम् । मतिषु ज्ञानकर्तृत्वासम्भवात् । अतो योजयति ॥ मतयो यथेति । तथा च मूले यथा शब्दो न दृष्टान्तार्थः । किं त्वनतिक्रमार्थः । तथात्वेऽपि समासाभावश्छान्दस इति भावः । तथा च स्वस्वबुद्ध्यनुसारेण मेनिर इति मूलार्थः ॥ ७६ ॥ इति श्रीभागवतटिप्पण्यां दशमोऽध्यायः ॥ १-१० ॥

अथ एकादशोऽध्यायः

शौनक उवाच–

अश्वत्थाम्ना विसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा ।
उत्तराया हतो गर्भ ईशेनोज्जीवितः पुनः ॥ १ ॥

प्रकाशिका— परीक्षितोऽथ राजर्षेर्जन्मकर्मविलापनम् । संस्थाश्च पाण्डुपुत्राणां वक्ष्ये कृष्ण-कथोदयामिति प्रतिज्ञाय पाण्डवानां राज्यस्थितिरूपोद्धातरूपा निरूपिता । इदानीं प्रतिज्ञातं परीक्षिज्जन्मादिकमुक्त्वाऽनुवादपूर्वकं पृच्छति ॥ अश्वत्थाम्नेति ॥ ब्रह्मशीर्ष्णा ब्रह्मास्त्रेण । पुनरित्यनन्तरमिति त्वयोक्तमिति शेषः ॥ १ ॥

तस्य जन्म महाबुद्धेः कर्माणि च गृणीहि नः ।
निधनञ्च यथैवासीत्स प्रेत्य गतवान्यथा ॥ २ ॥

प्रकाशिका— निधनं मरणम् । यथा कथं प्रेत्य मृत्वा गतवान् । लोकमिति शेषः ॥ २ ॥

तदिदं श्रोतुमिच्छामि वक्तुं वा यदि मन्यसे ।
ब्रूहि नः श्रद्धधानानां यस्य ज्ञानमदाच्छुकः ॥ ३ ॥

प्रकाशिका— वा शब्दोऽवधारणे । नास्माकं त्वयि बलात्कारः किन्तु त्वमेव यद्यनुग्रहेण वक्तुं मन्यसे तर्हि ब्रूह्येवेत्यर्थः । यस्य ज्ञानमदाच्छुक इति श्रोतुमिच्छायां हेतुः ॥ ३ ॥

सूत उवाच–

अपीपलद्धर्मराजः पितृवद्रञ्जयन्प्रजाः ।
निस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया ॥ ४ ॥

प्रकाशिका— युधिष्ठिरस्य राज्यपरिपालनसमयेऽश्वमेधकरणात्पूर्वमेव परीक्षिज्जन्मजातमिति सूचयितुं पुनः युधिष्ठिरराज्यपरिपालनादिकं सङ्क्षेपत आह ॥ अपीपलदिति ॥ अपीपलदरक्षत् । निस्पृहः सर्वकामेभ्य इति कामानां हेयत्वम् । कृष्णपादानुसेवयेति कृष्णपादसेवाया उपादेयत्वं चोक्तम् ॥ ४ ॥

सम्पदः क्रतवो विप्रा महिषी भ्रातरो मही ।
जम्बुद्वीपाधिपत्यञ्च यशश्च त्रिदिवं गतम् ॥ ५ ॥

प्रकाशिका— तदुभयं विशदमाह ॥ सम्पद इति ॥ ते सम्पदादयः ॥ ५ ॥

किन्ते कामातुरस्यार्थाः मुकुन्दमनसो द्विजाः ।
नाधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ॥ ६ ॥

प्रकाशिका— मुकुन्दे एव मनो यस्य तस्य राज्ञः । अर्थाः पुरुषार्थाः । किं नैव । यतः कामातुरस्यार्थाः पुरुषार्थाः । अयं तु विरक्तः । अतस्तस्य मुदं नाजह्रुर्नाधिक्येन हृतवन्तः । क्षुधितस्यान्नैकमनसो यथेतरे स्रक्चन्दनादयो मुदं न कुर्वन्ति तद्वत् ॥ ६ ॥

मातुर्गर्भगतो वीरः स तदा भृगुनन्दन ।
ददर्श पुरुषं कञ्चिद्दह्यमानोऽस्त्रतेजसा ॥ ७ ॥

प्रकाशिका— इदीनीं प्रकृतमाह ॥ मातुरिति ॥ कञ्चिल्लोकविलक्षणम् ॥ ७ ॥

अङ्गुष्ठमात्रममलं स्फुरत्पुरटमौलिनम् ।
आपीच्यदर्शनं श्यामं तडिद्वाससमच्युतम् ॥ ८ ॥

प्रकाशिका— स्फुरत्पुरटमौलिनं दीप्यमानस्वर्णमुकुटम् । व्रीह्यादित्वादिनिः । आपीच्यः षोडशवर्षस्तद्वद्दृश्यमानम् ॥ ८ ॥

श्रीमद्दीर्घचतुर्बाहुं तप्तकाञ्चनकुण्डलम् ।
क्षतजाक्षं गदापाणिमात्मनः सर्वतोदिशम् ॥ ९ ॥

प्रकाशिका— क्षतजं रक्तं तद्वदक्षिणी यस्य तम् । आत्मनः स्वस्य । सर्वतो दिशं । सर्वासु दिक्षु परिभ्रमन्तं परितश्चलन्तम् ॥ ९ ॥

परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां मुहुः ।
अस्त्रतेजः स्वगदया नीहारमिव गोपतिः ।
विधमन्तं सन्निकर्षे पर्यैक्षत क इत्यसौ ॥ १० ॥

प्रकाशिका— उल्काभां गगनात्पतत्तारकसदृशम् । नीहारं हिमम् । गोपतिः सूर्य इव ॥ विधमन्तं नाशयन्तं सन्निकर्षे समीपे ददर्शेत्यन्वयः । दृष्ट्वा चासौ क इति पर्यैक्षत तर्कितवान् । अनेन परीक्षिदिति नामनिर्वचनं कृतं भवति ॥ १० ॥

विधूय तदमेयात्मा भगवान् धर्मगुब्विभुः ।
मिषतो दशमास्यस्य तत्रैवान्तर्दधे हरिः ॥ ११ ॥

प्रकाशिका— धर्मं गोपायति रक्षतीति धर्मगुप् । दशमासस्य दशमासकालावच्छिन्नस्य । मिषतः पश्यतः सतः । उत्पन्नमपि लोकसमक्षं रक्षितवानित्यपि ग्राह्यम् ॥ ११ ॥

ततः सर्वगुणोदर्के सानुकूलग्रहोदये ।
जज्ञे वंशधरः पाण्डोर्भूयः पाण्डुरिवौजसा ॥ १२ ॥

प्रकाशिका— सर्वैर्गुणैरुदर्क उत्कृष्टस्तस्मिन् । सानुकूला ये ग्रहास्तेषामुदयो यस्मिन्स तथोक्तस्तस्मिन् लग्ने । ओजसा भूयः पुनरुत्पन्नः पाण्डुरिव स्थितः ॥ १२ ॥

तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः ।
जातकं कारयामास वाचयित्वा च मङ्गलम् ॥ १२ ॥

प्रकाशिका— जातकं जातकर्म । मङ्गलं पुण्याहम् ॥ १३ ॥

हिरण्यं गां महीं ग्रामान्हस्त्यश्वान्नृपतिर्वरान् ।
प्रादात्स्वन्नश्च विप्रेभ्यः प्रजातीर्थे स तीर्थवित् ॥ १४ ॥

प्रकाशिका— वरान् श्रेष्ठान् । स्वन्नं शोभनान्नम् । यावन्न छिद्यते नालं तावन्नाप्नोति सूतकम् । छिन्ने नाले ततः पश्चात्सूतकं तु विधीयत इति वचनात् । नालच्छेदात्पूर्वमेवान्नं दत्तवानिति भावः। आमान्नं वा । प्रजातीर्थे पुत्रोत्पत्तिपुण्यकाले । पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयमिति वचनात् । तीर्थं शास्त्रं पात्रं वा वेत्तीति तीर्थवित् ॥ १४ ॥

तमूचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयानतम् ।
एष ह्यस्मिन्प्रजातन्तौ कुरूणां पौरवर्षभ ॥ १५ ॥

दैवेनाप्रतिघातेन कुले संस्थामुपेयुषि ।
रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना ॥ १६ ॥

तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्रवाः ।
भविष्यति न सन्देहो महाभागवतो महान् ॥ १७ ॥

प्रकाशिका— हे पौरवर्षभ पुरुवंशेषु श्रेष्ठ । कुरूणां कुरुवंशजातानाम् । अस्मिन्कुले प्रजातन्तौ पुत्राख्यसन्ताने । अप्रतिघातेन दुर्वारेण दैवेन संस्थां विनाशमुपेयुषि गच्छति सति वोऽनुग्रहार्थाय यस्मात्प्रभवनशीलेन विष्णुना रातो दत्तस्तस्माल्लोके विष्णुरात इति नाम्ना भविष्यति । बृहच्छ्रवा विख्यातयशाः । महाभागवतश्च गुणैश्च महान् भविष्यति ॥ १५-१७ ॥

राजोवाच—

अप्येष वंश्यान्राजर्षीन्पुण्यश्लोकान्महात्मनः ।
अनुवर्तिता स्विद्यशसा साधुवादेन सत्तमाः ॥ १८ ॥

प्रकाशिका— ब्राह्मणैरेवमुक्ते हृष्टः पृच्छति ॥ अप्येष इति । अपि स्विदित्यन्वयः । साधुवादो वचनं तेन । साधुरिति वादेन वा । अनुवर्तिता । भविष्यतीत्यस्यातःपरमप्यन्वयः । हे सत्तमाः ॥ १८ ॥

ब्राह्मणा ऊचुः—

पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः ।
ब्रह्मण्यः सत्यसन्धश्च रामो दाशरथिर्यथा ॥ १९ ॥

प्रकाशिका— प्रजानामविता रक्षकः । मानवो मनुपुत्रः । ब्रह्मण्यो ब्राह्मणेषु हितः। सत्यसन्धः सत्यप्रतिज्ञः । दाशरथिर्दशरथपुत्रः । रामस्य दृष्टान्तत्वोक्त्या परीक्षित्साम्यप्रतीतिवारणाय तात्पर्यमाह ॥ राम इति । इति शब्दोऽध्याहार्यः । अधिकदृष्टान्तः । उच्यत इति शेषः । यथा शब्दस्य सादृश्यमात्रार्थत्वा दधिकेऽपि न्यूनसादृश्यसद्भावादृष्टान्तोपपत्तिरिति भावः । अनेन यथा देवो रमाश्रय इति वक्ष्यमाणमप्युक्ततात्पर्यम् । उपलक्षणं चैतत् । कार्तवीर्यार्जुनादयः पितामहपर्यन्ता

ये परीक्षिदपेक्षयोत्तमा अत्रोक्तास्तेऽप्यधिकदृष्टान्ततयैवोक्ताः । इतरे क्षितिपाः समदृष्टान्ताः । मृगेन्द्रादय ऊनदृष्टान्ता इत्यपि ग्राह्यम् । एवं दृष्टान्तत्रैविध्ये प्रमाणं दर्शयति । ऊर्णनाभ्यादिक इति। आदिक इत्यनेन यथा पृथिव्यामोषधयः सम्भवन्तीत्युक्ते पृथिव्यादिग्रहणम् । दृष्टान्त इत्यस्यात्र विष्णुरित्यत्र च सम्बन्धः । जीवस्य परीक्षिदादेः । क्रमादूनसाम्याधिकाः आद्य ऊनः । द्वितीयः समस्तृतीयोऽधिक इति विवेकः ॥ १९ ॥

एष धाता शरण्यश्च यथा ह्यौशीनरः शिबिः ।
यशो वितनिता स्वानां दौष्यन्तिरिव यज्वनाम् ॥ २० ॥

प्रकाशिका— औशीनर उशीनरपुत्रः । उशीनरदेशाधिपतिरिति वा । शिबिना हि स्वमांसं श्येनाय दत्वा शरणागतः कपोतो रक्षितः । स्वानां ज्ञातीनां यज्वानां च । दौष्यन्तिर्दुष्यन्तपुत्रो भरत इव । यशो वितनिता विस्तारकर्ता ॥ २० ॥

धन्विनामग्रणीरेषः तुल्यश्चार्जुनयोर्द्वयोः ।
हुताश इव दुर्धर्षः समुद्र इव दुस्तरः ॥ २१ ॥

प्रकाशिका— अर्जुनयोः कार्तवीर्यपाण्डवयोः । दुर्धर्षो दुःसहः ॥ २१ ॥

मृगेन्द्र इव विक्रान्तो निषेव्यो हिमवानिव ।
तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव ॥ २२ ॥

प्रकाशिका— हिमवानिव सतां निषेव्यः । अनन्यगतिकृतत्वेन वसुधेव तितिक्षुः क्षमावान् । प्रीत्या पितरौ मातापितराविव सहिष्णुः सहनशीलः ॥ २२ ॥

पितामहसमः साम्ये प्रसादे गिरिशोपमः ।
आश्रयः सर्वभूतानां यथा देवो रमाश्रयः ॥ २३ ॥

प्रकाशिका— साम्ये सामञ्जस्ये पितामहो ब्रह्मा । ब्रह्मादिदेवान्दैत्यांश्च प्रति समञ्जसः । प्रसादे आशु प्रसादे ॥ २३ ॥

सर्वसद्गुणमाहात्म्य एष कृष्णमनुव्रतः ।
रन्तिदेव इवोदारो ययातिरिव धार्मिकः ॥ २४ ॥

प्रकाशिका— सर्वैः सद्गुणैर्यन्माहात्म्यं महत्त्वं तस्मिन्विषयेऽनुव्रतोऽनुगतः । तथाभूत इति यावत् ॥ २४ ॥

धृत्यां बलिसमः कृष्णे प्रह्लाद इव सद्ग्रहः ।
आहर्तैषोऽश्वमेधानां वृद्धानां पर्युपासकः ॥ २५ ॥

प्रकाशिका— धृत्यां धैर्ये । सति ब्रह्मणि ग्रह आग्रहो यस्य स तथा सन् । समीचीनो ग्रहो यस्येति वा ॥ २५ ॥

राजर्षीणां जनयिता शास्ता चोत्पथगामिनाम् ।
निगृहीता कलेरेष भुवो धर्मस्य कारणात् ॥ २६ ॥

प्रकाशिका— आहर्ता कर्ता । राजर्षीणां जनमेजयादीनां पुत्राणाम् । उत्पथगामिनां शास्त्रविरुद्धमार्गवर्तिनाम् । गोरूपाया भुवो वृषभरूपस्य धर्मस्य च कारणात्तद्रक्षणरूपान्निमित्तात् । कलेः शूद्रवेषस्य निग्रहीता निग्रहकर्ता ॥ २६ ॥

तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात् ।
प्रपत्स्यत उपश्रुत्य मुक्तसङ्गः पदं हरेः ॥ २७ ॥

प्रकाशिका— द्विजपुत्रेण शापेनोपसर्पितात्प्रापितात् हरेः पदं प्रपत्स्यते भजिष्यति ॥ २७ ॥

जिज्ञासितात्मयाथात्म्यो मुनेर्व्याससुतादसौ ।
हित्वेदं नृप गङ्गायां यास्यत्यद्धाऽकुतोभयम् ॥ २८ ॥

प्रकाशिका— ततश्च जिज्ञासितं विचारितमात्मनः परमात्मनो याथात्म्यं सर्वोत्तमत्वादिरूपं माहात्म्यं येन स तथोक्तः । इदं शरीरम् । अद्धा निश्चयेन । न विद्यते कुतोऽपि भयं यस्मिंस्त- द्वैकुण्ठम् ॥ २८ ॥

इति राज्ञ उपादिश्य विप्रा जातककोविदाः ।
लब्धापचितयः सर्वे प्रतिजग्मुः स्वकान्गृहान् ॥ २९ ॥

तात्पर्यम्— रामो दाशरथिर्यथा अधिकदृष्टान्तः । ऊर्णनाभ्यादिको विष्णोर्विष्णुर्विष्णो- स्तथैव च । विष्णुर्जीवस्य दृष्टान्ता ऊनसाम्याधिकाः क्रमादि'ति ब्राह्मे ॥ १९ ॥

प्रकाशिका— लब्धाऽपचितिः पूजा यैस्ते तथा ॥ २९ ॥

स एष लोके विख्यातः परीक्षिदिति यः प्रभुः ।
सर्पदृष्टिमनुध्यायन्परीक्षेत नरेष्विह ॥ ३० ॥

प्रकाशिका— प्रकारान्तरेण परीक्षिदिति नाम निर्वक्ति ॥ स एष इति । यः श्रुतस्वचरितः । प्रभुः समर्थः सन् । सर्पदृष्टिं तक्षकाख्यसर्पदर्शनम् अनुध्यायन्सन्ततं चिन्तयन्निव स्वसमीपमागतेषु नरेषु परीक्षेतायमेव तक्षको भवेदुत नेति विचारयेदिति यद्यस्मातस्मात् एषो लोके परीक्षिदिति विख्यात इत्यन्वयः ॥ ३० ॥

स राजपुत्रो ववृधे आशु शुक्ल इवोडुपः ।
आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहम् ॥ ३१ ॥

तात्पर्यम्— पूरयन्ति दिशः सोमं देवा गावः सरस्वती'ति गारुडे ॥ ३१ ॥ इति प्रथमतात्पर्ये एकादशोऽध्यायः ॥ ११ ॥

प्रकाशिका— शुक्ले पक्षे । उडुपश्चन्द्रः प्रसिद्ध उडुप इत्येतच्छब्दान्वयः । अत्र काष्टाभिः पञ्चदश कलाभिरिति व्याख्यानमशाब्दमित्याशयेन तद्व्याख्यानं प्रमाणेनैव सूचयति ॥ पूरयन्तीति । कलाभिरिति शेषः । दिशो दिङ्नामका देवता देवा वन्ह्यादयः । सरस्वतीत्यनन्तरमित्येते इति शेषः । ततश्च स प्रसिद्ध उडुपश्चन्द्रोऽन्वहं शुक्लपक्षे प्रतिपदमारभ्य पौर्णिमीपर्यन्तं काष्टाभिर्यथा आपूर्यमाणः सम्यक्पूर्यमाणकलौ वर्धते तथा स राजपुत्रः परीक्षिदपि पितृभिः युधिष्ठिरादिभिः अन्नपानादिभिः चतुष्षष्ठि कलाभिश्चापूर्यमाणो ववृधे ॥ ३१ ॥

यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रोहजिघांसया ।
राजालब्धधनो दध्यावन्यत्र करदण्डयोः ॥ ३२ ॥

प्रकाशिका— परीक्षिज्जन्मान्तरमश्वमेधकरणमिति दर्शयन् अश्वमेधकरणं सप्रकारमाह ॥ यक्ष्यमाण इति । ज्ञातीनां भीष्मादीनां वधनिमित्तो यो द्रोहः पापं तज्जिघांसया हननेच्छया । यद्वा । ज्ञातिद्रोहजिघांसयो । द्रोहे दुर्योधनादिवधे विष्णुद्विट्तदनुबन्धिनिग्रहात्मकत्वात्परमधर्मभूते या पापत्वशङ्का तज्जनितं यत्पापं तस्यानिष्टपरिहारेच्छयेत्यर्थः । निशम्य भीष्मोक्तमथाच्युतोदितं प्रवृत्तविज्ञानविधूतविभ्रम इति पूर्वाध्याये दुर्योधनादिवधस्य पापत्वभ्रान्तेर्भीष्मवाक्येन निवृत्त्युक्तेः । अपापे पापं शङ्कितत्वादश्वमेधैर्यजाच्युतमिति कृष्णवेदव्यासाभ्यामुपदिष्टत्वाच्च । अश्वमेधेन यज्ञेन यष्टुं भगवन्तं पूजयितुं कामो यस्य स तथा । करदण्डयोरन्यत्र करं च दण्डं च वर्जयित्वा न लब्धं धनं येन स तथोक्तः ॥ ३२ ॥

तदभिप्रेतमालक्ष्य भ्रातरोऽच्युतनोदिताः ।
धनं प्रहीणमाजह्रुरुदीच्या भूरिशो दिशः ॥ ३३ ॥

प्रकाशिका— तदभिप्रेतम् । उत्तमकल्पेन यज्ञः कर्तव्यस्तदर्थं बहु धनमपेक्षितम् । हतशेषात्क्षत्रसङ्घाद्दण्डेन करो न ग्राह्य इति तन्मनोगतमित्यर्थः । अच्युतो व्यासस्तेन प्रेरिताः । प्रहीणं विष्ण्वादिकृतयज्ञोच्छिष्टम् ॥ ३३ ॥

तेन सम्भृतसम्भारो लब्धकामो युधिष्ठिरः ।
वाजिमेधैस्त्रिभी राजा यज्ञेशमयजद्धरिम् ॥ ३४ ॥

प्रकाशिका— तेन द्रव्येण सम्भृतः सम्पादितः सम्भारो यज्ञोपकरणानि येन स तथोक्तः । त्रिभिस्त्रिगुणफलकैः ॥ ३४ ॥

आहूतो भगवान् राज्ञा याजयित्वा द्विजैर्नृपम् ।
उवास कतिचिन्मासान्सुहृदः प्रियकाम्यया ॥ ३५ ॥

ततो राज्ञाऽभ्यनुज्ञातः कृष्णया सह बन्धुभिः ।
ययौ द्वारवतीं ब्रह्मन्सार्जुनो यदुभिर्वृतः ॥ ३६ ॥

॥ इति एकादशोऽध्यायः ॥

प्रकाशिका— यज्ञसमाप्त्यनन्तरं कतिचिन्मासान् ॥ ३५-३६ ॥ इति श्रीभागवतटिप्पण्यामेकादशोऽध्यायः ॥ १-११ ॥

अथ द्वादशोऽध्यायः

सूत उवाच—

विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिम् ।
ज्ञात्वाऽऽगाद्धस्तिनपुरं तयावाप्तविवित्सितः ॥ १ ॥

प्रकाशिका— इदानीं परीक्षितो राज्याभिषेकादिकं वक्तुं धृतराष्ट्रधर्मराजादिषु सत्सु न कनिष्ठस्य राज्याभिषेक उचित इत्याशङ्कापरिहाराय धृतराष्ट्रादीनां सर्वेषां प्रस्थानं सविस्तारं

तावदादौ निरूपयति त्रिभिरध्यायैः । तत्रादौ धृतराष्ट्रप्रस्थानस्य विदुरोपदेशसाध्यत्वाद्विदु-रागमन-प्रकारं तावदाह ।। विदुर इति । तीर्थयात्रायां तीर्थयात्रासमये । आत्मनः परमात्मनो जीवस्य वा गतिं स्थितिम् । तया ज्ञातया जीवे परमात्मस्थित्यावाप्तं विवित्सितं ज्ञातुमिष्टं येन स तथा ।। १ ।।

यावतः कृतवान्प्रश्नान्क्षत्ता कौषारवाग्रतः ।
जातैकभक्तिर्गोविन्दे तेभ्यश्चोपरराम ह ।। २ ।।

प्रकाशिका— आवाप्तविवित्सित इत्येतदेव विशदयति ।। यावत इति । कुषारवस्यापत्यं कौषारवो मैत्रेयस्तस्याग्रतः पुरतः । पश्चात्तेभ्यः प्रश्नेभ्यः परिहृतेभ्यो गोविन्दे जातैकभक्तिः कृतार्थः सन् उपररामालम्बुद्धिमानभूत् । ज्ञातव्यस्य ज्ञातत्वात्पुनः प्रश्नान्न चकारेत्याशयः । ह शब्द स्तृप्तिसूचकः । च शब्दः परिहृतेभ्य इत्यस्य समुच्चायकः ।। २ ।।

तं बन्धुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः ।
धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा ।। ३ ।।

गान्धारी द्रौपदी ब्रह्मन्सुभद्रा चोत्तरा कृपी ।
अन्याश्च जामयः पाण्डोर्ज्ञातयः ससुताः स्त्रियः ।। ४ ।।

प्रकाशिका— युयुत्सुधृतराष्ट्राद्वेश्यायां जातः । सूतः सञ्जयः । शारद्वतः कृपः । कृपी द्रोण-भार्या । पण्डोर्जामयः स्नुषाः स्वसारो वा ।। ४ ।।

प्रत्युज्जग्मुः प्रहर्षेण प्राणांस्तन्व इवागतान् ।
अभिसङ्गम्य विधिवत्परिष्वङ्गाभिवन्दनैः ।। ५ ।।

तात्पर्यम्— तत्प्राणे प्रपन्न उदतिष्ठदिति श्रुतिः ।। ५ ।।

मुमुचुः प्रेमबाष्पौघं मिथ औत्कण्ठ्यकातराः ।
राजा तमर्हयाञ्चक्रे कृतासनपरिग्रहम् ।। ६ ।।

तं भुक्तवन्तमासीनं विश्रान्तं सुखमासने ।
प्रश्रयावनतो राजा प्राह स्वानाञ्च शृण्वताम् ।। ७ ।।

प्रकाशिका— कथं प्रत्याजग्मुः प्राणकलहसमये विराट्शरीरे आगतं प्रविष्टं प्राणं तन्व इव । पूर्वप्रविष्टचक्षुरादिकरणाभिमानिन इवेत्यर्थः । अत्र प्रमाणं दर्शयति ।। तत्प्राण इति ।

तच्चक्षुरादिकरणसमूहोपेतं विरिञ्चशरीरं प्राणे मुख्यप्राणे प्रपन्ने प्राप्ते । प्रविष्टे सतीति यावत् । उदतिष्ठदुतस्थौ । अस्यां श्रुतावयं दृष्टान्तः । प्रसिद्ध इति शेषः । अभिसङ्गम्य सत्कृत्य । शृण्वतां सताम् ॥ ५-७ ॥

युधिष्ठिर उवाच–

अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान् ।
विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः ॥ ८ ॥

प्रकाशिका— पक्षिणो ह्यपत्यानि यथाऽतिस्नेहेन पक्षछायया वर्धयन्ति । तद्वद्युष्मत्पक्षपात-छायया समेधितान्नोऽस्मान्किं स्मरथ । कथं समेधिता इत्यत आह ॥ विपद्गणादिति । विषाग्न्यादेर्विपद्गणाद्यतो यस्मान्मोचितास्तस्मात् ॥ ८ ॥

कया वृत्या वर्तितं वै चरद्भिः क्षितिमण्डलम् ।
तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले ॥ ९ ॥

प्रकाशिका— युष्माभिः कया वृत्त्या वर्तितं केन जीवनोपायेन देहधारणं कृतमित्यर्थः । वै शब्दो जीवनोपायानुसरणं देहधारणार्थमावश्यकमिति सूचयति । तीर्थानि भागीरथ्यादीनि । क्षेत्रेषु मुख्यानि प्रधानानि च कुरुक्षेत्रादीनि कानि कानि सेवितानीत्यर्थः ॥ ९ ॥

भवद्विधा भागवतास्तीर्थभूतास्स्वयं प्रभो ।
तीर्थीकुर्वन्ति तीर्थानि स्वात्मस्थेन गदाभृता ॥ १० ॥

प्रकाशिका— भवादृशानां तीर्थाटनं न स्वार्थं किन्तु तीर्थाभिमानिन्यनुग्रहार्थमेवेत्याह ॥ भव-द्विधेति । स्वेषामन्तःस्थितेन गदाभृता हरिणा स्वयं तीर्थभूताः पवित्रभूताः सन्तस्तीर्थानि गङ्गादीनि तीर्थीकुर्वन्ति पवित्रीकुर्वन्ति ॥ १० ॥

अपि नः सुहृदस्तात बान्धवाः कृष्णदैवताः ।
दृष्टाः श्रुताः वा यदवः स्वपुर्यां सुखमासते ॥ ११ ॥

प्रकाशिका— अपि शब्दः किमित्यर्थकः । तथा च सुखमासते किमित्यर्थः ॥ ११ ॥

इत्युक्तो धर्मराजेन सर्वं तत्समवर्णयत् ।
यथानुभूतं भ्रमता विना यदुकुलक्षयम् ॥ १२ ॥

तात्पर्यम्— यदुकुलक्षयमेष्यत् । 'शापं श्रुत्वा ब्राह्मणानामुद्धवः खिन्नमानसः । उदासीनं तथा कृष्णमिव सुप्रीतमेव च ।। न शिष्यमाणं स्वकुलं स्वर्यियासुं च केशवम् । ज्ञात्वा पप्रच्छ भगवत्स्वरूपं तमुपह्वरे ।। मैत्रेयोऽपि तदैवागाज्जिज्ञासुस्तत्त्वमुत्तमम् । तयोरदात्स भगवान् ज्ञानं निर्मलमञ्जसा ।। षड्विंशद्वत्सरात्पूर्वं स्वर्गतेः पुरुषोत्तमः । प्रेषयामास च हरिरुद्धवं बदरीमनु ।। कलापग्रामिणां वक्तुमेतत्तत्त्वमशेषतः । विदुरं तीर्थयात्रास्थमन्तराले स उद्धवः ।। दृष्ट्वा नशिष्यमाणं च कुलं जिगमिषुं हरिम् । कथयित्वा बदर्यां च कलापग्रामवासिनाम् ।। प्रोच्य तत्त्वमशेषेण वासुदेवमुखोद्गतम् । षड्विंशद्वर्षगमने पुनरागतिमात्मनः ।। तेषामुक्त्वा पुनः कृष्णसन्निधौ विचचार ह । मैत्रेयो विदुरायैतदूचिवान्कृष्णचोदितः ।। विदुरः पाण्डवानां च विना यदुविनाशनम् । षट्त्रिंशद्वर्षतः पूर्वं ज्ञात्वाऽप्यप्रियमेव तत् ।। नावोचद्विदुरो धीमांस्तस्मान्नाप्रियमावदेदिति पाद्मे । तावच्छशासक्षितिमेकचक्रामेकातपत्रामजितेन पार्थ इति चोपरि ।। विदुरं चागतं पुनरिति च । भारते चैकविंशद्वर्षात्पूर्वं विदुरस्य युधिष्ठिरभाव उक्तः ।। १२ ।।

प्रकाशिका— भ्रमता तीर्थानि चरता । अत्र यदुकुलक्षयं विना सर्वं समवर्णयदित्युक्त्या इदानीं जातमपि कुलक्षयमप्रियत्वान्नावर्णयदिति भाति । न च तद्युक्तं प्रमाणविरोधप्रसङ्गात् । अतोऽत्र विवक्षितं तात्पर्यं दर्शयति ।। यदुकुलक्षयमिति । एष्यदित्यध्याहारेणैव योजनां सूचयति । यदुकुलक्षयमिति पदद्वयम् । तत्र पूर्वपदे सुपां सुलुगिति विभक्तिलोपः । तथा च क्षयम् एष्यत् । यदुकुलं विनेति । यद्वा । क्षयं मरणमिति व्याख्यानापेक्षयैष्यदिति नपुंसकलिङ्गप्रयोगः । तथा चोक्तं प्रमेयदीपिकायाम् । मम भूतमहेश्वरमित्येतद्व्याख्यानावसरे । भावं याथार्थ्यमिति व्याख्यानापेक्षया नपुंसकमिति । एवं च ब्राह्मणशापेनेतः षड्विंशाद्वर्षादुपरि यदुकुलं नाशमेष्यतीत्युद्धवमुखात् श्रुतं भाविनं यदुकुलनाशमप्रियत्वान्नावर्णयदिति भावः । प्रतीतार्थे प्रमाणविरोधप्रसंग इत्युक्तम् । कानि तानि प्रमाणानीत्यपेक्षायां तानि दर्शयति ।। शापं श्रुत्वेत्यादिना । उदासीनमिव स्थितमिति शेषः । प्रत्युत प्रीतमेव । च शब्दो विशेषणसमुच्चयार्थः । उपह्वरे एकान्तस्थले । तयोरुद्धवमैत्रेययोः । प्रेषयामास । ज्ञानं दत्वेति शेषः । बदरीमनु प्रति । अन्तराले मध्यमार्गे । एतत्कृष्णोक्तं यस्मात्तत् । यदुविनाशमप्रियं तस्मादेवेत्यर्थः । अनेन तत्त्वप्रियमित्युत्तरश्लोकतात्पर्यमुक्तमिति ध्येयम् । नावदेत् । कोऽपीति शेषः । उपरि तृतीये । अत्र विदुरस्तीर्थयात्रापरिसमाप्तिसमयेऽजितेन कृष्णेन सहितः । पार्थो युधिष्ठिरः क्षितिं शशासेत्युक्त्या न तदा यदुकुलक्षयो जात इति गम्यते । अत एष्यदिति व्याख्यानं युक्तमिति भावः । उपरितनं वाक्यान्तरमपि उक्तार्थे उक्तार्थे दर्शयति । विदुरमिति । दशमे धर्मराजं राज्येऽभिषिच्य कृष्णो यदा द्वारकां गमनोन्मुखः । तदा गान्धारीं धृतराष्ट्रं च विदुरं चागतं पुनः प्रसादेत्युक्तम् । तेन विदुरागमनकाले न यदुकुलनाश इति भावः । अत्र विदुरं च

महामतिमिति पाठो नाचार्याणां सम्मत इति ध्येयम् । प्रतीतार्थे वाधकं भारतोक्तं लिङ्गमपि दर्शयति ॥ भारते चेति । यदुकुलक्षयादिति शेषः । यदुकुलक्षयापेक्षयैकविंशद्वत्सरात्पूर्वं विदुरस्य युधिष्ठिरभावः युधिष्ठिरेणैकीभावः । विदुरदेहत्याग इति यावत् । उक्तो यतोऽतो विदुरवचनसमये न यदुकुलक्षयो जातः । किन्तु भाव्येवेति निश्चीयत इति भावः ॥ १२ ॥

तदप्रियं दुर्विषयं नृणां स्वयमुपस्थितम् ।
नावेदयेत्सकरुणो दुःखितान्द्रष्टुमक्षमः ॥ १३ ॥

प्रकाशिका— यदुकुलक्षयवर्णने हेतुमाह ॥ तदप्रियमिति । सकरुणः स्वयं नावेदयेत् । यस्मात्तस्माद्विना यदुकुलक्षयमित्यन्वयः ॥ १३ ॥

कञ्चित्कालमथावात्सीत्सत्कृतो देववत्स्वकैः ।
भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् ॥ १४ ॥

प्रकाशिका— श्रेयस्कृत्तत्त्वमुपदिशन् ॥ १४ ॥

अबिभ्रदर्यमा दण्डं यथाघमघकारिषु ।
यावद्बभार शूद्रत्वं शापाद्वर्षशतं यमः ॥ १५ ॥

तात्पर्यम्— योऽर्यमा दण्डमबिभ्रत्सवर्षशतं यावच्छूद्रत्वं बभार । 'न देवानां न देवीनां सामस्त्येन जनिर्भुवि । अंशांशेनैव जायन्ते सर्वे त्वाजानजादयः ॥ १५ ॥

प्रकाशिका— ननु शूद्रोऽसौ कथमुपदिष्टवानत्याशकांयां नायमितरशूद्रवदनधिकारी किन्तु सकलपापिशिक्षकोऽयमेवशापमिषेण शूद्रो बभूवेत्याह ॥ अबिभ्रदिति । अत्र विवक्षितान्वया-प्रतीतेर्यत्तच्छब्दावध्याहृत्यान्वयं दर्शयति ॥ योऽर्यमेति । यावदित्यनन्तरं तावदिति शेषः । नन्वेवं यमस्यैवात्र गमने संयमिन्यां दण्डधारकाभावः प्राप्त इत्याशङ्कां प्रमाणेनैव परिहरति ॥ यावदिति । सामस्त्येनांशिरूपेण । ब्रह्माण्डाद्बहिः स्थितस्यांशिनो योंऽशः स्वस्वलोकगतः तस्यांशेनेत्यर्थः । तु शब्दसूचितमेव विशेषं दर्शयति ॥ अजानजादय इति । आदि पदेन तदुपरितनानां पुष्करादीनां ग्रहणम् । अत्राजानजग्रहणेन तदर्वाक्तनानां नाशेन जनिरिति सूचयति । कालः परमदुस्तर इति वक्ष्यमाणकालशब्दार्थमुदाहृतप्रमाणशेषेणैव दर्शयति ॥ संहर्तेति । कल छेदन इति धातोरिति भावः ॥ गुणसर्वस्वमिति । गुणलक्षणं सर्वस्वं स्वीयमित्यर्थः । कल कामधेनाविति धातोरिति भावः।

व्यनक्ति प्रतिपादयति ॥ ततश्चाबिभ्रदर्यमेत्यादेरयमर्थः ॥ योऽर्यमा वैवस्वतो यमः । अघकारिषु पापकृत्सु यथाऽघं पापमनतिक्रम्य दण्डमबिभ्रद्धृतवान् शिक्षामकरोत् । पापफलमभोजयदिति यावत् । स यमो माण्डव्यशापाद्यावद्वर्षशतं तावच्छुद्रत्वं शूद्रशरीरम् । कचिच्चोराननुधावतो राजभटास्तपश्चरतो माण्डव्यस्य ऋषेः समीपं गतांस्तान्सम्प्राप्यायमपि चोर इति बुद्ध्या तेन सह निबद्ध्यानीय राज्ञे निवेद्य तदाज्ञया सर्वान् शूलेषु स्थापयामासुः । ततो मुनिर्यमं दृष्ट्वा कुपित उवाच । कस्मात्पापान्मम शूलप्राप्तिरिति । तदा यमो वसिष्ठसाम्येच्छया तपःकरणरूपादयोग्यसम्प्राप्तिकृतप्रयत्नजाताद्दोषाच्छूलेसमारोपितोऽयमिति जानन्नपि तदीयतपोह्रासेच्छयैव शापं गृहीतुम् बाल्ये त्वया काचिन्मक्षिका शूले समारोपिताऽतस्तव शूलप्राप्तिरित्यवदत् । अनन्तरं मुनिः कुपितस्तं शशाप । यस्मादज्ञानावस्थायां मक्षिकावधेनैतादृशं दण्डम् उक्तवांस्तस्मात्त्वं शूद्रो भवेति पुराणान्तरे प्रसिद्धः शापप्रकारः ॥ १५ ॥

युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कुलन्धरम् ।
भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया ॥ १६ ॥

प्रकाशिका— विदुरागमनानन्तरं युधिष्ठिरः किं चकारेत्यपेक्षायामाह ॥ युधिष्ठिर इति । कुलधरं वंशधरम् । पौत्रं परीक्षितम् ॥ १६ ॥

अथामन्त्र्याच्युतो बन्धून्निवर्त्यानुगतान्विभुः ।
अर्जुनोद्धवशैनेयैर्ययौ द्वारवतीं हयैः ॥ १७ ॥

प्रकाशिका— श्रीकृष्णस्य पूर्वोक्तं द्वारकागमनं विदुरागमनानन्तरमेवेति दर्शयितुं पुनः सङ्क्षेपत आह ॥ अथामन्त्र्येति ॥ १७ ॥

एवं गृहेषु सक्तानां प्रमत्तानां गृहेहया ।
अत्यक्रामदविज्ञातः कालः परमदुस्तरः ॥ १८ ॥

प्रकाशिका— गृहेहया गृहकृत्यचेष्टया । प्रमत्तानां धृतराष्ट्रादीनाम् । अत्याक्रमत्तानभ्यभवत् । कालः सर्वसंहारको गुणपूर्णत्वात्कालनामा भगवान् दुस्तरस्तर्तुमशक्यः ॥ १८ ॥

विदुरस्तदभिप्रेत्य धृतराष्ट्रमभाषत ।
राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतम् ॥ १९ ॥

प्रकाशिका— तत्कालकृतमभिभवनमभिप्रेत्य ज्ञात्वा निर्गम्यताम् । गृहादिति शेषः । इदं मरणभयम् ॥ १९ ॥

प्रतिक्रिया न यस्येह कुतश्चित्कर्हिचित् प्रभो ।
स एष भगवान्कालः सर्वेषां नः समागतः ॥ २० ॥

तात्पर्यम्— संहर्ता भगवान्विष्णुः काल इत्यभिधीयते । अथवा गुणसर्वस्वं कालशब्दो व्यनक्ति ही'ति स्कान्दे ॥ २० ॥

प्रकाशिका— तत्प्रतीकारः क्रियताम् । किं निर्गमनेनेत्यत आह ॥ प्रतिक्रियेति । मरणभयप्रदस्य कालस्य ॥ सर्वेषामिति । यैः प्रतिकर्तव्यं तेषामपीत्यर्थः ॥ २० ॥

येन चेहाभिपन्नोऽयं प्राणैः प्रियतमैरपि ।
जनः सद्यो वियुज्येत किमुतान्यैर्धनादिभिः ॥ २१ ॥

प्रकाशिका— ननु धनादिना तत्प्रतिक्रिया भविष्यतीत्यत आह ॥ येन चेति ॥ २१ ॥

पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयः ।
आत्मा च जरया ग्रस्तः परगेहमुपाससे ॥ २२ ॥

प्रकाशिका— इदानीं तस्य निर्गमनसाधनीभूतं वैराग्यमुत्पादयितुमाह ॥ पितृभ्रात्रित्यादिना । आत्मा देहः ॥ २२ ॥

अहो महीयसी जन्तोर्जीविताशा यया भवान् ।
भीमापवर्जितं पिण्डमादत्से गृहपालवत् ॥ २३ ॥

प्रकाशिका— जीविताशा एवमेव बहुकालं जीवामीत्याशा । भीमापवर्जितं येन त्वत्पुत्रा हतास्तेन भीमेनापवर्जितमनिवारितम् । औदासीन्येन दापितमिति यावत् । पिण्डमन्नम् । गृहपालः सारमेयः ॥ २३ ॥

अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः ।
हृतं क्षेत्रं धनं येषां तदन्नैरसुभिः कियत् ॥ २४ ॥

प्रकाशिका— स्वेनापकृतैरुपकृतं चेत्तद्विदुषामतीवासह्यपित्याह ॥ अग्निरिति । निसृष्टः प्रक्षिप्तो । गरो विषं । दूषिता अवमानितास्तेषामन्नैः पुष्टैरसुभिः प्राणैः कियत्प्रयोजनं न किमपीत्यर्थः । एतदपेक्षया मरणमेव श्रेय इति भावः ॥ २४ ॥

तस्यापि तव देहोऽयं कृपणस्य जिजीविषोः ।
परैत्यनिच्छतो जीर्णो जरया वाससी इव ॥ २५ ॥

प्रकाशिका— ननु येन केनापि प्रकारेण देहधारणं सम्पाद्यमतः कथमेवमुच्यत इत्यत आह ॥ तस्यापीति । तस्येत्युक्तमेवाह ॥ कृपणस्येति । दैन्यमनुभवत इत्यर्थः । अयं पाञ्चभौतिकः । परेति क्षीयते । यतो जीर्ण इतः परं देहो न बहुकालं स्थास्यति । यदर्थं त्वया दैन्यमनुभोक्तव्यमिति भावः ॥ २५ ॥

गतस्वार्थमिमं देहं वियुक्तो मुक्तबन्धनः ।
अविज्ञातगतिर्जह्यात्स वै धीर उदाहृतः ॥ २६ ॥

प्रकाशिका— ननु विषयासक्तेन प्राणिनामन्तकालेऽनुष्ठेयं परलोकसाधनं किमित्यपेक्षायां तस्य प्रकारद्वयं श्लोकद्वयेनाह ॥ गतस्वार्थमिति । गतः स्वार्थो धर्मादिसाधनलक्षणो यस्मात्स तथा तम् । विमुक्तो देहाभिमानात् । अत एव मुक्तबन्धनः कलत्रादिबन्धनान्मुक्तः । अविज्ञाते विविक्तदेशे गतिर्यस्य स तथा । वानप्रस्थ इति यावत् । स धीरो यथा मरणसमये देहगेहाद्यासक्तिमान् अधोलोकं याति । न तथाऽयमधमः, किन्तु मध्यम इति भावः ॥ २६ ॥

यः स्वतः परतो वेह जातनिर्वेद आत्मवान् ।
हृदि कृत्वा हरिं गेहात्प्रव्रजेत्स नरोत्तमः ॥ २७ ॥

प्रकाशिका— अत एवोत्तमप्रकारमाह ॥ य इति । स्वतः स्वबुद्ध्या परतः परोपदेशेन वा । जातनिर्वेद उत्पन्नवैराग्यः । आत्मवान् वशीकृतमनाः । प्रव्रजेत्परमहंसो भवेत् ॥ २७ ॥

अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान् ।
इतोऽर्वाक्प्रायशः कालः पुंसां गुणविकर्षणः ॥ २८ ॥

तात्पर्यम्— स्वैरज्ञातगतिः विविक्तगतिः ॥ २८ ॥

प्रकाशिका— त्वं तु प्रथमप्रकारो भवेत्याह ॥ अथेति । तस्मादित्यर्थः । अत्र स्वैरज्ञातगति-रित्येतस्य स्वैः स्वकीयैरज्ञातगमन इति व्याख्याने भारतादिविरोधप्रसङ्गाद्विवक्षितं तात्पर्यं दर्शयति ॥ स्वैरज्ञातेति । स्वैरविज्ञात इत्यनेन विविक्तदेशो गौण्या वृत्त्या व्याख्येय इति भावः । नन्वयं वैराग्योपदेशः किमिदानीं चरमे वयसि क्रियते पूर्वमेव कस्मान्न कृत इत्यत आह । मूले

इतोऽर्वागिति । कालः परमात्मा । पुंसाम् अधिकारिणां गुणानां ज्ञानभक्तिवैराग्यादीनां विशेषेण कर्षतीति विकर्षणः । विनाशक इति यावत् । पूर्वे वयसि विषयाभिनिवेशेन वैराग्योपदेशोऽकिंचित्कर इति भावः ॥ २८ ॥

एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधित आजमीढः ।
छित्वा स्वेषु स्नेहपाशान्द्रढिम्नो निश्चक्राम भ्रातृसन्दर्शिताध्वा ॥ २९ ॥

प्रकाशिका— प्रज्ञाचक्षुरन्धः । आजमीढोऽजमीढवंशजातः । स्नेह लक्षणान् पाशान् । द्रढिम्नो दृढतरान् भ्रात्रा विदुरेण सम्यग्दर्शितः अध्वा वनमोक्षयोर्मार्गो यस्य स तथा । निश्चक्राम गृहान्निर्गतो बभूव ॥ २९ ॥

पतिं प्रयान्तं सुबलस्य पुत्री पतिव्रता चानुजगाम साध्वी ।
हिमालयं न्यस्तदण्डप्रहर्षं मनस्विनामवसत्संविहारम् ॥ ३० ॥

प्रकाशिका— सुबलस्य पुत्री गान्धारी । चशब्दात्कुन्ती च । न्यस्तः परित्यक्तो दण्डो भूतद्रोहलक्षणो यैस्तेषाम् प्रकर्षेण हर्षो यस्मात्तम् । अत एव मनस्विनां वशीकृतमनसां योगिनां सम्यग्विहारं यथेष्टसञ्चारो यस्मिंस्तम् । हिमालयं गत्वा बदरिकाश्रमेऽवसदित्यर्थः । न्यस्तदण्डप्रहर्षं मनस्विनांसंविहारमिति विशेषणद्वयेन न तादृशानां हिमालयः हिमादिना दुःखद इति सूचयति ॥३०॥

अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान्नत्वा तिलगोवस्त्ररुग्मैः ।
गृहान्प्रविष्टो गुरुवन्दनाय न चापश्यत्पितरौ सौबलीञ्च ॥ ३१ ॥

तात्पर्यम्— पितरौ कुन्तीधृतराष्ट्रौ । न चापश्यत् । तस्य मनसि तेषां विपद्भावो बभूव । अन्यथा महाभारतविरोधात् । स्कान्दे च । भीमसन्तर्जितो राज्ञस्त्वनुज्ञां प्राप्य यत्नतः । धृतराष्ट्रो वनेवासमकरोद्वत्सरत्रयम् । विदुरस्तद्दिदृक्षार्थमागतेषु वनं पुरा । पाण्डवेषु तु राजानं प्रविश्यैकत्वमागतः । ततो दावाग्निना दग्धं धृतराष्ट्रं च सौबलीम् । श्रुत्वा कुन्तीं च चिन्तां ते प्रापुः पाण्डुसुतास्तदा ॥ तांस्तदा नारदो विद्वान् शमयामास धर्मवित् । उक्त्वोत्तमां गतिं तेषां निष्ठां तात्कालिकीं तथेत्यादि ॥ ३१ ॥

प्रकाशिका— नन्वजातशत्रुरिति श्लोके पितरावित्यनेन तावद्गान्धारीधृतराष्ट्रौ मातापितरौ गृहीतुमशक्यौ । सौबलीं चेति गान्धार्याः पृथग्ग्रहणात् । नापि विदुरधृतराष्ट्रौ । धर्मराजदर्शन-

कालात्पूर्वमेव वक्ष्यमाणरीत्या विदुरस्य नष्टत्वेनावगमात् । अतस्तत्र विवक्षितमर्थं दर्शयति ॥ पितराविति । न चापश्यदित्येतस्य यदा गृहं प्रविष्टस्तदा तत्र गृहे तान्नापश्यत् । तेषां राजानमदृष्ट्वैव गतत्वादित्यन्यथाप्रतीतिवारणाय तात्पर्यमाह ॥ न चापश्यदिति । तस्य युधिष्ठिरस्य मनसि तेषां धृतराष्ट्रादीनां विपद्भावो मृतिर्बभूव । स्फुरित इति शेषः । तेषामदर्शनेन तस्य चेतसि मरणशङ्का जातेत्यर्थः । ननु प्रतीत एवार्थः किं न स्यादित्यत आह ॥ अन्यथेति । प्रतीतार्थाङ्गीकार इत्यर्थः । भारते हि विदुरेण बोधितो धृतराष्ट्रस्तपः कर्तुं वनं गमिष्यामिति धर्मराजमुक्तवान् । ततस्तेन त्वया न गन्तव्यं त्वदर्थं वयमेव वनं गत्वा तपः कुर्म इति तदीयस्नेहान्निवारणं कृतम् । तदनन्तरं धृतराष्ट्रः धर्मराजानुज्ञां प्राप्तुं दिनत्रयमुपवासं चकार । तदा भगवान्व्यासः स्वयमागत्यानुज्ञां दापितवान् । ततो धृतराष्ट्रः सर्वान्पृष्ट्वैव वनं प्रति विदुरसञ्जयकुन्तीगान्धारीसहितो जगाम । तत्र तेषु वसत्सु सभार्याः पाण्डवा धृतराष्ट्रादीन्द्रष्टुं तत्रागताः । तदा विदुरो धर्मराजेनैकीभूतः । ततः पाण्डवेष्वागतेषु धृतराष्ट्रादयस्त्रयस्तदाऽग्निदग्धदेहाः परलोकं गता इत्याद्युक्तम् । अतस्तदनुसारेणैवात्रापि धर्मराजः स्वानुज्ञया धृतराष्ट्रे वनं गतेऽपि धृतराष्ट्राधिष्ठितं स्थलमावश्यकं कर्मकरणान्ते प्रत्यहं वन्दमानो ज्ञानदृष्ट्या तानापश्यत् । तस्मिंश्च दिने ज्ञानदृष्ट्या तान्नापश्यदित्येव व्याख्येयमिति भावः । भागवतविरोधेन भारतमेव कस्मान्नान्यथा व्याख्येयमित्यपेक्षायां पुराणान्तरसंवादमप्यत्र दर्शयति ॥ स्कान्दे चेति । भीमसन्तर्जितः । ताविमौ मे भुजौ वृत्तौ पीनौ चन्दनदषितौ । ययोरन्तरमासाद्य जरठस्य सुता हता इत्यादिदुरुक्त्याऽवमानितो धृतराष्टः । राज्ञो धर्मराजस्यापुरा वत्सरत्रयात्पूर्वम् । राजानं धर्मराजम् । तांस्तदा नारदो विद्वानित्यादिना तस्मिन्नन्तरे विप्रो नारदः प्रत्यदृश्यतेत्यादिकमपि प्रमापितमिति ज्ञातव्यम् । तेषां पाण्डवानामुत्तमां गतिमुत्तमज्ञानम् । मा कश्चन शुचो राजन् यदीश्वरवशं जगदित्यादिनोक्त्वा तात्कालिकीं तस्मिन्काले कर्तव्यां निष्ठां मनोवृत्तिविशेषं तावद्यूयमवेक्षध्वं भवेद्यावदिहेश्वर इत्युक्त्वा शमयामासेत्यन्वयः । यद्वा तेषां धृतराष्ट्रादीनामुत्तमां गतिं ज्ञानं तात्कालिकीं मरणकालसम्बन्धिनीं निष्ठां स्थितिमुक्त्वेति व्याख्येयम् । नन्वेवं तत्र सञ्जयमासानमित्युत्तरग्रन्थविरोधः । तत्र हि धर्मराजप्रश्ने सञ्जयेनाहं च व्यंसित इत्याद्युत्तरमुच्यते । तेन च स्वैरज्ञाता एव धृतराष्ट्रादयो वनं गता इति प्रतीयते । अतः सञ्जयोत्तराभिप्रायं प्रमाणेनैव दर्शयति ॥ ब्रह्माण्डे चेति । पाण्डुसूनवे धर्मराजाय । गतिं स्थितिम् । तथा च यदा राजा तु तान्ज्ञानदृष्ट्या नापश्यत् । तदैव सञ्जयोऽपि धृतराष्ट्रादीनां मरणानन्तरं वनादागतस्तं राजा पप्रच्छ तदा सञ्जयेनाहं च व्यंसितो वञ्चित इत्यादिकमुत्तरमुक्तम् । अतो न कोऽपि विरोध इति भावः । नन्वेवं धृतराष्ट्रादीनां मरणानन्तरमागतं सञ्जयं प्रति यदि राज्ञः प्रश्नस्तदा पितृव्यः कगतः सुहृदिति विदुरगमनप्रश्नोऽनुपपन्नः विदुरमरणस्य पूर्वमेव जातस्य धर्मराजेन ज्ञातत्वादित्यत आह ॥

पितृव्योऽपीति । ननु धृतराष्ट्रस्य क नस्तात इति पूर्वमेव पृष्टत्वाद्व्यर्थं पितृव्य शब्देन तद्ग्रहणमित्यत आह ।। द्विरुक्तिरिति । तात्पर्यार्था तात्पर्यातिशयज्ञापनार्था । अत्र प्रमाणमाह यत्रेति । अधिकं यथा स्यात्तथा तत्परतातात्पर्यम् । नन्वेवमुत्तरवाक्ये पितृव्यौ क गताविति विदुरग्रहणमनुपपन्नमित्यत आह ।। पितृव्याविति । तथा च नात्र विदुरविवक्षया द्विवचनम् । किन्तु गान्धारीविवक्षयैव । पितृव्यश्च पितृव्या च पितृव्यावित्येकशेषस्य पुमान् स्त्रियेत्यनेन सम्भवात् । पितृव्यभार्यायां पितृव्य शब्दस्य पितृव्यश्वयोगसम्भवादिति भावः । नन्वेवं स्वैरज्ञातानां गमनमत्र विवक्षितं चेन्मुषितोऽस्मि व्यंसित इति सञ्जयोक्तिः कथमित्यतस्तत्तात्पर्यमाह ।। मुषितोऽस्मीति । इदमुपलक्षणम् । व्यंसित इत्यपि ग्राह्यम् । प्रलापेषु च हि तादृशवचनानि प्रसिद्धानीति भावः । नन्वेवं क गताविति गमनप्रश्नासम्भवः । गमनस्य युधिष्ठिरादिभिर्ज्ञातत्वादित्यत आह ।। क गताविति । यत्र वने स्थितास्तत्रादृष्ट्वा मरणसम्भावनया लोकान्तरगमनविषय एवायं प्रश्न इत्याशयः ।। ततश्चाजातशत्रु-रित्यादेर्मूलस्यायमर्थः ।। मित्रः सूर्यः । तद्दैवत्यं सन्ध्यावन्दनं मैत्रम् । कृतं मैत्रं येन स तथा । नत्वा सम्पूज्य । रुक्मं सुवर्णम् । गुरुवन्दनाय गुर्वधिष्ठितस्थलवन्दनाय । पितरौ कुन्तीधृतराष्ट्रौ । सौबलीं गान्धारीं च नापश्यत् । वने यस्मिन्नाश्रमे ते स्थितास्तत्रत्यान्प्रत्यहं वन्दनकाले ज्ञानदृष्ट्या पश्यन्नपि तस्मिन्दिवसे तत्र तान्नापश्यत् । किन्तु ते मृता इति शङ्कावान् जात इत्यर्थः ।। ३१ ।।

तत्र सञ्जयमासीनं पप्रच्छोद्विग्नमानसः ।
गावल्गणे क नस्तातो वृद्धो हीनश्च नेत्रयोः
अम्बा वा हतपुत्रार्ता पितृव्यः क गतः सुहृत् ।। ३२ ।।

तात्पर्यम्— ब्रह्माण्डे च । धृतराष्ट्रे मृते सूतः सञ्जयः पाण्डुसूनवे । गतिं शशंस कुन्त्याश्च गान्धारीधृतराष्ट्रयोरित्यादि ।। पितृव्योऽपि धृतराष्ट्र एव । द्विरुक्तिस्तात्पर्यार्था । यत्राधिकं तत्परता बहुवारमपि ध्रुवम् । तद्वदन्ति महाप्राज्ञा लोकवेदानुसारत' इति ब्रह्मतर्के ।। ३२ ।।

प्रकाशिका— तत्र तस्मिन्समये वनादागत्यासीनं सञ्जयं पप्रच्छ । हे गावल्गणे गवल्गणस्य पुत्र सञ्जय । नस्तातो धृतराष्ट्रः क गतो यत्र स्थितस्तत्र नोपलभ्यते । अतः किमाश्रमान्तरं गत लोकान्तरमिति प्रश्नाशयः । नेत्रयोनेत्राभ्याम् । अम्बा वा गान्धारी । च शब्दात् च । पितृव्यो धृतराष्ट्रः । पुनस्तद्वचनं तात्पर्यातिशयद्योतनाय ।। ३२ ।।

अपि मय्यकृतप्रज्ञे हतबन्धुः स्वभार्यया ।
आशंसमानः शमलं गङ्गायां दुःखितोऽपतत् ।। ३३ ।।

प्रकाशिका— अकृतप्रज्ञेऽशिक्षितबुद्धौ मयि । शमलमपराधमाशंसमान आशङ्कमानः । स्वभार्यया सह गङ्गायामपतदपि किमित्यर्थः ॥ ३३ ॥

पितर्युपरते पाण्डौ सर्वान्नः सुहृदः शिशून् ।
अरक्षतां व्यसनतः पितृव्यौ क गतावितः ॥ ३४ ॥

तात्पर्यम्— पितृव्यौ गान्धारीधृतराष्ट्रौ ॥ ३४ ॥

प्रकाशिका— तत्र तात्पर्यातिशये कारणं दर्शयन्पुनः पृच्छति ॥ पितरीति । यावरक्षतां तौ पितृव्यौ पितृव्यश्च पितृव्या च पितृव्यौ धृतराष्ट्रगान्धर्यौ । इतो बदरिकाश्रमतः । प्रश्नाशयः पूर्ववत् ॥ ३४ ॥

सूत उवाच–

कृपया स्नेहवैक्लव्यात्सूतो विरहकर्शितः ।
आत्मेश्वरमचक्षाणो न प्रत्याहाति पीडितः ॥ ३५ ॥

प्रकाशिका— कृपया स्नेहेन जाताद्वैक्लव्याच्चित्ततोदादतिपीडितः स्वात्मनः स्वस्येश्वरं स्वामिनं धृतराष्ट्रमचक्षाणो मृतत्वादेव भूम्यामपश्यन् अत एव विरहेण वियोगेन कर्षितः कृशतरः । सूतः संजयो न प्रत्याहोत्तरं वक्तुं नाशकदित्यर्थः ॥ ३५ ॥

विमृज्यपाणिनाश्रूणि विष्टभ्यात्मानमात्मना ।
अजातशत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन् ॥ ३६ ॥

प्रकाशिका— आत्मना मनसा । आम्प्रानं स्वात्मानम् । विष्टभ्य संस्थाप्य । धैर्ययुक्तं कृत्वेति यावत् । प्रभोर्धृतराष्ट्रस्य ॥ ३६ ॥

सञ्जय उवाच–

अहश्च व्यंसितो राजन् पित्रोर्वः कुलनन्दन ।
न वेद साध्व्या गान्धार्या मुषितोऽस्मि महात्मभिः ॥ ३७ ॥

तात्पर्यम्— मुषितोऽस्मीति प्रलापः ॥ ३७ ॥

प्रकाशिका— न केवलं त्वमेवाहं च व्यंसितो वञ्चितः । पित्रोर्मातापित्रोः कुन्तीधृतराष्ट्रयोः । न वेद । प्राप्यस्थानमिति शेषः । मुषितोऽस्म्यपहृतोऽस्मि । हतोऽस्मीति यावत् । इदं च

प्रलापकुर्वतोक्तम् । अतो मोहाभावात्कथमेतदिति शङ्काऽनवकाशः । परिहासप्रतापादिष्वनर्था वाग्भवेत्कचिदिति वचनात् । एवं व्यंसित इति वचनमपि प्रलापरूपम् ॥ ३७ ॥

सूत उवाच–

एतस्मिन्नन्तरे विप्राः नारदः प्रत्यदृश्यत ।
वीणां त्रितन्त्रीं ध्वनयन्भगवान्सहतुम्बुरुः ॥ ३८ ॥

राज्ञादरोपनीतार्घ्यं प्रत्युत्थानाभिवन्दितम् ।
परमासन आसीनं कौरवेन्द्रोऽभ्यभाषत ॥ ३९ ॥

प्रकाशिका— त्रितन्त्रीमारोपितन्त्रीत्रयाम् । गतिं प्राप्यस्थानम् ॥ ३८,३९ ॥

युधिष्ठिर उवाच–

नाहं वेद गतिं पित्रोर्भगवन्कगतावितः ।
कर्णधार इवापारे सीदतां पारदर्शनः ॥ ४० ॥

तात्पर्यम्— क गतावित्यदृष्ट्यपेक्षया ॥ ४० ॥

प्रकाशिका— इतो बदरिकाश्रमात् । अपारेऽदृश्यपारे समुद्रे सीदतां बिभ्यतां कर्णधारो नाविक इव । त्वमपारे संसारे सीदतां पारं दुःखस्यान्तं दर्शयतीति पारदर्शनः । अतस्त्वां पृच्छामीति शेषः ॥ ४० ॥

नारद उवाच–

मा कञ्चन शुचो राजन्यदीश्वरवशं जगत् ।
स संयुनक्ति भूतानि स एव वियुनक्ति च ॥ ४१ ॥

प्रकाशिका— धृतराष्ट्रादिषु कञ्चन कमपि प्रति मा शुचः शोकं मा कार्षीः ॥ ४१ ॥

यथा गावो नसि प्रोता तन्त्यां बद्धाः स्वदामभिः ।
वाक्तन्त्यां नामभिर्बद्धा वहन्ति बलिमीशितुः ॥ ४२ ॥

प्रकाशिका— जगदीश्वरवशमित्युक्तमपपादयति ॥ यथेति । गावो बलीवर्दा नसि नासिकायां प्रोतास्तन्तुमयसूक्ष्मरज्जुस्यूताः । अनेनानुद्धृता इति सूचयति । स्वदामभिः स्वबन्धकावान्तरदामभिस्तंत्यामवान्तरदामाधारभूतदीर्घरज्जुरूपायां बद्धाः सन्त ईशितुः स्वस्वामिने बलिं गोण्यादिकं वहन्ति । तथा वाक्तन्त्यां विधिनिषेधात्मकवेदलक्षणतन्त्यां ब्राह्मणादिनामभूतावान्तरदामभिर्बद्धाः सूत्रनामकेन वायुना हरिणा च प्रोता ईशितुरीश्वरस्य बलिं यज्ञादिरूपां पूजां वहन्ति कुर्वन्ति । तस्मात् ब्राह्मणादिरूपं जगदीश्वरवशमिति सम्बन्धः ॥ ४२ ॥

यथा क्रीडोपस्कराणां संयोगविगमाविह ।
इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणाम् ॥ ४३ ॥

प्रकाशिका— एवमीश्वरस्याधीनमित्युपपाद्येदानीं स संयुनक्ति स एव वियुनक्ति चेत्येतद्दृष्टान्तमुखेनोपपादयति ॥ यथेति । यथा क्रीडोपस्काराणां क्रीडासाधनानां संयोगविगमौ क्रीडितुः पुरुषस्येच्छया भवतः । तथैवेशेच्छया नृणां पितापुत्रादिरूपाणां नृणां संयोगविगमौ स्यातामित्यर्थः ॥ ४३ ॥

यन्मन्यसे ध्रुवं लोकमध्रुवञ्चाथवोभयम् ।
सर्वथा हि न शोच्यास्ते स्नेहादन्यत्र मोहजात् ॥ ४४ ॥

तात्पर्यम्— **अपरिहार्यत्वादशोच्याः ॥ ४४ ॥**

प्रकाशिका— एवं तवास्वतन्त्रत्वान्न शोककर्तृतेत्युपपाद्येदानीं तेषां शोककर्मताऽपि युक्तिबाधितेत्याह ॥ यन्मन्यस इति । ध्रुवं लोकं नित्यं प्रकाशरूपम् । जीवमुद्दिश्य शोक इति यद्यदि मन्यसे । अध्रुवमनित्यं लोकं देहं वाऽथवोभयं देहविशिष्टं जीवम् । पक्षत्रयमपि न युक्तमित्याह ॥ सर्वथेति । ते पित्राद्याः शोच्याः शोकार्हा न । कुत इत्यतो हिशब्देन ध्रुवाध्रुवपदसूचितो हेतुरुक्तः। तथा च जीवमुद्दिश्य शोको न युक्तः । तस्य नित्यत्वात् । नापि देहमुभयं वोद्दिश्य । तयोरनित्यत्वादित्यर्थः । अत्रानित्यत्वहेतोर्न शोच्यत्वसाधकता विरुद्धत्वात् । अतोऽभिप्रायमाह ॥ अपरिहार्यत्वादिति । तथा च देहस्य विशिष्टस्य वाऽनित्यवान्नाशोऽपरिहार्यः । ततश्चापरिहार्येऽर्थे शोको वृथेत्याशय उक्त इति ध्येयम् । तर्हि मृतानुद्दिश्य लोकानां शोकः परिदृश्यमानः किंनिमित्त इत्यत उक्तम् । स्नेहादिति । स्नेहोऽपि न स्वाभाविक इत्याह । मोहजादिति । एते मदीया अहं चैतेषां पोषकः । अतो मां विना कथमेते भविष्यन्तीत्यादिरूपो भ्रमो मोहः । तेन जातात्स्नेहात् । अन्यत्र ऋते कारणान्तरेण न शोच्याः । शोकः स्नेहद्वारा मोह एव हेतुरिति भावः ॥ ४४ ॥

तस्माज्जह्यङ्ग वैक्लव्यमज्ञानकृतमात्मनः ।
कथं त्वनाथाः कृपणा वर्तेरन्बतमामृते ॥ ४५ ॥

प्रकाशिका— मोहेऽपि निमित्तं दर्शयन् त्वं मोहं स्नेहं च त्यजेत्याह ॥ तस्मादिति । आत्मनः परमात्मनो जीवस्य स्वातन्त्र्येण पारतन्त्र्येण चाज्ञानं तेन कृतं वैक्लव्यं चित्तविकारं मोहं स्नेहं च जहि त्यज । त्यागहेतुः ॥ तस्मादिति । ईशजीवयोः स्वातन्त्र्यपारतन्त्र्यनिश्चयादित्यर्थः । तथा च तव तन्निमित्तः शोको न भविष्यतीति भावः । वैक्लव्यशब्दोऽक्तं मोहमेव दर्शयति ॥ कथमिति । अनाथा मद्व्यतिरिक्तरक्षकरहिताः । कृपणा अलब्धजीवनोपायाः । वर्तेरन् प्रवृत्ता इति वैक्लव्यमिति सम्बन्धः ॥ ४५ ॥

कालकर्मगुणाधीनो देहोऽयं पाञ्चभौतिकः ।
कथमन्यांस्तु गोपायेत् सर्पग्रस्तो यथा परम् ॥ ४६ ॥

प्रकाशिका— नन्वहं तेषां पालक इति निश्चयस्य बाधाभावात् कुतो भ्रमत्वमित्यतोऽत्र युक्तिबाधं दर्शयति ॥ कालकर्मेति । कालः शतवर्षायुष्यरूपः । कर्म तावत्पर्यन्तं जीवनप्रदमदृष्टम् । गुणा ईश्वरेच्छादिरूपाः । तमोऽभिमानिनी दुर्गा वा । एतैर्ग्रस्तः एतेषामधीनः । कवलीकृत इति यावत् । कुतः । यतः पाञ्चभौतिकः पञ्चमहाभूतनिर्मितोऽयं त्वदीयः । कथमित्याक्षेपे । अन्यान्पित्रादीन् गोपायेद्रक्षयेत् । अत्र दृष्टान्तः सर्पग्रस्तोऽजगरगलितो यथाऽन्यं न रक्षति तद्वत् । अयं भावः । न तावद्देहं विना त्वच्चेतन एव रक्षकः । असामर्थ्यात् । देहविशिष्टश्च कालकर्मादिप्रेरकमृत्युग्रस्तोऽतो न रक्षकः । विमतोऽयं देहविशिष्टो न पररक्षकः स्वापेक्षया प्रबलेन कवलीकृतत्वात् । सर्पग्रस्तपुरुषवदिति प्रयोगसम्भवादिति अत्र देहविशिष्टस्य ग्रहणे कर्तव्ये देहस्य ग्रहणं विशेषणीभूतदेहनाशेनैव विशिष्टनाशो न विशेष्यनाशेनेति सूचयितुम् ॥ ४६ ॥

अहस्तानि सहस्तानामपदो द्विचतुष्पदाम् ।
अणूनि तात महतां जीवो जीवस्य जीवनम् ॥ ४७ ॥

प्रकाशिका— यश्च कृपणा इत्यनेन जीवनोपायलाभ उक्तः तन्निश्चयोऽपि तव भ्रम एवेत्युपपादयति ॥ अहस्तानीति । यद्वा तव रक्षकत्वं किं मुक्तिदानेनोत जीवनोपायभूतान्नादिदानेन । नाद्य इत्याह ॥ कालेति । अत एव तु अतिशयेन गोपायेदित्युक्तम् । द्वितीये त्वाह । अहस्तानीति । हे तात वत्स । अहस्तानि पश्वादीनि । अपदस्तृणान्नादयः सहस्ता गजादयोऽपि सन्ति । अतो द्विपदां पुनर्ग्रहणेन न पौनरुक्त्यमिति ध्येयम् । अणूनि मनुष्यादीनि महतां

राक्षसादीनाम् । एवं जीवो जीवदेहो जीवस्य चेतनजातस्य जीवनं देहधारणोपायः । हरिणैव कल्पितमिति शेषः । अतोऽहमेवैतेषां रक्षक इति त्वज्ज्ञानं मोहरूपमेवेति भावः ॥ ४७ ॥

तदिदं भगवान्राजन्नेक आत्माऽऽत्मनां स्वदृक् ।
अन्तरोऽनन्तरो भाति पश्य त्वं माययोरुताम् ॥ ४८ ॥

प्रकाशिका— नन्वेवं जीवानामेवान्योन्यरक्षकत्वमनुभवसिद्धं कथमपलापार्हमित्यतस्तत्तदन्तर्गत-भगवद्रूपाणामेव रक्षकत्वं ज्ञानिप्रत्यक्षसिद्धमित्याशयेनाह ॥ तदिदमिति । सप्तसु प्रथमेति सूत्रात् । तस्मिन्नहस्तादावस्मिन्सहस्तादौ जीवसङ्घेऽन्तरोन्तःस्थित्वा रक्षणकृत् । आत्मनां जीवानामेको मुख्य आत्माऽऽदानादिकर्ता । स्वदृक् स्वविषयकसाक्षात्कारवान् । अनेनात्रेश्वरप्रत्यक्षमपि मानं सूचितं भवति । ज्ञानिनामपीति शेषः । नन्वेवं स्थानभेदेनास्य भेदः प्राप्त इत्यत उक्तम् ॥ अनन्तरो भेदरहित इति । ज्ञानिनामस्यार्थस्य सिद्धौ मम कथं तत्सिद्धिरित्यत उक्तम् । तं भगवन्तं माययेच्छया तस्योरुतां भेदाभावेऽप्यनेकत्वं च त्वं पश्य । त्वयाऽपि ज्ञानित्वादालोचने कृतेऽयमर्थो भास्वतीति भावः ॥ ४८ ॥

सोऽयमद्य महाराज भगवान्भूतभावनः ।
कालरूपोऽवतीर्णोऽस्यामभावाय सुरद्विषाम् ॥ ४९ ॥

प्रकाशिका— न केवलमेवमन्तःस्थित एव रक्षति किन्तु बहिर्गतरूपेणापीत्याशयेनाह ॥ सोऽयमिति । यो वशीकृताखिलचेतनसमुदायो यश्च स कालान्तर्गतो रक्षक उक्तः सोऽयं भूत-भावनः प्राणिवर्धनो भगवान् अद्येदानीं कालरूपः सकलदुष्टसंहारकरूपः सन् अस्यां भूम्यामव-तीर्णोऽस्ति । सुरद्विषां दैत्यानामभावाय नाशाय ॥ ४९ ॥

निष्पादितं देवकृत्यमवशेषं प्रतीक्षते ।
तावद्यूयमवेक्षध्वं भवेद्यावदिहेश्वरः ॥ ५० ॥

प्रकाशिका— भवतामपि नाशः समीपस्थोऽतोऽपि न शोकः कार्य इति वक्तुमाह ॥ निष्पादितमिति । देवकृत्यं भूभारहरणरूपमवशेषमवशिष्टं यदुकुलनाशम् । पश्चात् स्वलोकं गमिष्यतीति भावः । इह भूम्यामवेक्षध्वम् । स्थातुमिति शेषः । ततः परं भवद्भिरपि गन्तव्यम् । अतो न शोकेन कृत्यमित्याशयः ॥ ५० ॥

धृतराष्ट्रः सह भ्रात्रा गान्धार्या च स्वभार्यया ।
दक्षिणेन हिमवता ऋषीणामाश्रमं गतः ॥ ५१ ॥

तात्पर्यम्— गमनकाले सह भ्रात्रा ॥ ५१ ॥

प्रकाशिका— धृतराष्ट्रादीनां मरणं कथं जातमिति जिज्ञासायां तन्मरणप्रकारं वक्तुं गृहान्निर्गमनमारभ्य तदीयां स्थितिं वक्ति ॥ धृतराष्ट्र इति । ननु नारदागमनकाले विदुरस्याभावात्कथं सभ्रात्रेत्युक्तमित्यत आह ॥ गमनकाल इति । गृहान्निर्गमनकाल इत्यर्थः । च शब्दात्कुन्त्या च । तथा च पूर्ववृत्तान्तकथनमेतदिति भावः । दक्षिणेन दक्षिणभागे स्थितम् ॥ ५१ ॥

स्रोतोभिः सप्तभिर्यत्र स्वर्धुनी सप्तधाऽभ्यगात् ।
सप्तानां प्रीतये तेन सप्तस्रोतः प्रचक्षते ॥ ५२ ॥

प्रकाशिका— निरुक्तिं दर्शयन् आश्रमनामाह ॥ स्रोतोभिरिति । यत्र यस्मिन्नाश्रमे स्वर्धुनी स्वर्गनदी मन्दाकिनी सप्तानामृषीणां प्रीतये सप्तभिः स्रोतोभिः प्रवाहैः सप्तमार्गगामिन्यभ्यगात् । समुद्रमिति शेषः । इति यत्तेन प्रकारेण तमाश्रमं सप्तस्रोतस्तच्छब्दवाच्यं प्रचक्षते ॥ ५२ ॥

स्नात्वा त्रिषवणं तस्मिन्हुत्वा चाग्नीन्यथाविधि ।
अब्भक्ष उपशान्तात्मा स आस्ते विगतेक्षणः ॥ ५३ ॥

तात्पर्यम्— आस्त इत्याद्यतीतार्थे । स एष तर्ह्यध्यास्त आसनं पार्थिवोचितमित्यादिवत् । सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च । व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेनेति महाव्याकरणे । व्यासादयो वर्तमानसतीतानागते तथा । व्यत्यस्यापि वदन्त्यद्धा मोहनार्थं दुरात्मनाम् ॥ पौर्वापर्यं यतो नैव सदैव परिवर्तनात् । अतश्च व्यत्ययादेतद्वदन्ति ज्ञानचक्षुष इति ब्राह्मे ॥ ५३ ॥

प्रकाशिका— तदनुष्ठितयोगप्रकारमाह ॥ स्नात्वेति । उपशान्तो विषयविरक्त आत्मा मनो यस्य स तथा । अविगतेक्षणोऽनपगतो व्यासाद्युपदिष्टज्ञानः । विगतेषण इति पाठे विगता पुत्राद्येषणा यस्मादित्यर्थः । ननु नारदागमनकाले धृतराष्ट्रस्य मृतत्वात्कथमत्रोत्तरत्र चास्त इति वर्तमानार्थकलट्प्रयोग इत्यत आह ॥ आस्त इत्यादीति । आदिपदेन तच्च भस्मीभविष्यति तमग्निमनुवेक्ष्यतीत्यादेर्ग्रहणम् । इत्यादिशब्दरूपमतीतार्थविषये । मुख्यवृत्त्यैव वर्तत इति शेषः । तथा चास्त इत्येतदासीदिति व्याख्येयमिति भावः । कुत इत्याशङ्कायामास्त इत्यस्यातीतार्थे प्रयोगं तावद्दर्शयति

॥ स एष इति । इदं हि शौनकादीन्प्रति सूतस्य वचनम् । सूतशौनकसंवादश्च परीक्षिन्मरणोत्तरभावी । अतोऽयमध्यास्त इति प्रयोगो न वर्तमानविषयः । किं त्वतीतविषय एवेति भावः । नन्वेवं प्रयोगबलादास्त इत्यस्यातीतार्थकत्वनिश्चयेऽप्युदाहृतभविष्यदर्थकप्रयोगाणां कथमतीतार्थत्वनिश्चय इत्यतः सर्वत्र नियामकं महाव्याकरणसूत्रं पठति ॥ सुप्तिङिति । सुप् विभक्तिः । तिङ् विभक्तिः । उपग्रहो विकरणं शब्दादि परस्मैपदात्मनेपदे वा लिङ्गं स्त्रीलिङ्गादि । नराः प्रथमपुरुषादयः । कालो वर्तमानादिकालवाचकः शब्दः । स्वर उदात्तादयः । कर्तृशब्देन तद्वाचकः शब्दो ग्राह्यः । यङ् प्रत्ययस्तेषाम् । नन्वनुक्तं कथमिच्छतीत्यत उक्तम् ॥ सोऽपि व्यत्ययोऽपीति । बाहुलिकेन बहुलशब्दोपेतविधिना । ननु कृपालूनां पुराणकृतामित्थं मोहकं वचनं किमर्थमित्यतोऽत्र प्रयोजनं प्रमाणेनैव दर्शयति ॥ व्यासादय इति । अद्धा निश्चयेन । भविष्यदर्थकेष्वतीतार्थकेषु च प्रयोगेषु प्रकारान्तरेण योजनामभिप्रेत्याह ॥ पौर्वापर्यमिति । कथाप्रवाहस्येति शेषः । सदैव प्रतिकल्पमेव । परिवर्तनाच्चक्रवद्भ्रमणात् । एतद्धृतराष्ट्रदेहभस्मीभवनादिकम् । तथा च तच्च भस्मीभविष्यतीत्यादिकमुत्तरकल्पेऽप्येवं भविष्यतीति व्याख्येयम् । यत्र तु वर्तमाने भविष्यति वार्थेऽतीतार्थे च शब्दप्रयोगस्तत्रातीतकल्पे तदासीदिति व्याख्येयमिति भावः ॥ ५३ ॥

जितासनो जितश्वासः प्रत्याहृतषडिन्द्रियः ।
हरिभावनया ध्वस्तरजःसत्वतमोमलः ॥ ५४ ॥

प्रकाशिका— ध्वस्तानि रजःसत्त्वतमःकृतानि रागादिरूपमलानि यस्य स स्तथा ॥ ५४ ॥

विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तम् ।
ब्रह्मण्यात्मानमाधारे घटाम्बरमिवाम्बरे ॥ ५५ ॥

तात्पर्यम्— विज्ञानात्मा विरिञ्चोऽयं यस्तस्मिंल्लीयते जगत् । यदांसि सागरे यद्वत्स क्षेत्रज्ञे जनार्दने । हृदिस्थे च स च व्याप्ते स्वात्मन्येकीभवत्युत ॥ प्रलयौ भेदवन्तौ तु पूर्वोक्तौ ब्रह्मकृष्णयोः अन्तस्थस्य बहिष्ठे तु तस्य तस्मिन्नभेदत इति ब्रह्मवैवर्ते । काले तस्य तत्र लयो भविष्यतीति ध्यानमात्रं विलापनम् ॥ अविद्यमानमपि यो ध्यायेतैवं विनिश्चितः । उच्यते तस्य कर्तेति तथैव मुनयोऽमलाः । जगद्विलापयामासुरित्युच्यन्तेऽथ तत्स्मृतेः ॥ न च तत्स्मृतिमात्रेण लयो भवति निश्चितमि'ति नारदीये । स्वरूपं जायमानं च आकाशं च घटे द्विधा ॥ स्वरूपं जायमानं तु घटे निर्भेदमेव तु । भिन्नवद्व्यवहाराय समर्थ तल्लये भवेत् । तद्वद्देवावतारेषु देहस्थश्च हरिः स्वयम् । भिन्नवद्व्यवहाराय शक्तो लीने जगत्यपि । स एव

पूर्ववज्ज्ञेयो निर्विशेषेण केशवः । जायमानं घटे जाते जायते तल्लयेन तु । तस्माद्भिन्नं महाकाशादेवं जीवोऽपि कीर्तितः ॥ उपाधेश्चैव नित्यत्वान्नैव जीवोऽपि नश्यति । स्वरूपत्वादुपाधेश्च न भिन्नोपाधिकल्पनम् ॥ न चाभिन्नत्वमीशेन चिन्मात्रत्वं च युज्यत इति ब्रह्मतर्के ॥ ५५ ॥

प्रकाशिका— इदानीमन्तकालेऽवश्यचिन्तनीयं तेन चिन्तितं लयप्रकारं दर्शयति ॥ विज्ञानात्मनीति । इदमप्रतीत्या प्रमाणेनैव व्याख्याति ॥ विज्ञानात्मेति । महत्तत्त्वाभिमानिनीत्यर्थः । संयोज्येत्यत्र प्रतिसम्बन्धिप्रदर्शनाय जगदित्युक्तम् । लीयत इत्यनेन संयोज्येत्येतदुक्ततात्पर्यम् । यादांसि जलचराणि । स विरिञ्चः क्षेत्रज्ञे गुणत्रयात्मकक्षेत्रनियामके जनार्दने । आनन्दमयनामके लीयते । स क्षेत्रज्ञनामा व्याप्ते स्वात्मनीत्यनेन ब्रह्मण्यत्मानमित्येतदुक्तार्थम् । प्रविलाप्येत्यस्य तात्पर्यमेकीभवतीति । हृदि स्थित इत्यनेन हृदि स्थिते देहान्तःस्थे तस्मिन्विज्ञानात्मनि विरिञ्चे जगद्रागादिरूपं लीयते । सोऽन्तस्थो विरिञ्चः क्षेत्रज्ञे देहान्तर्गतप्रकृत्यादिनियामके जनार्दने लीयते स क्षेत्रज्ञः व्याप्ते स्वामिन्येकीभवतीत्यपि मरणकाले चिन्तनीयमिति सूचयति । स क्षेत्रज्ञः स्वात्मन्येकीभवतीत्युक्त्या विरिञ्चलयोऽपि क्षेत्रज्ञे एकीभावरूप एवेति प्रतीतिवारणायोक्तं विशदयति ॥ प्रलयाविति । भेदवन्तौ नैकप्रकारावित्यर्थः । ब्रह्मकृष्णयोर्विरिञ्चक्षेत्रज्ञयोरित्यर्थः । तमेव भेदं दर्शयति ॥ अन्तःस्थस्येति । तु शब्दोऽवधारणार्थः । अन्तःस्थस्य देहान्तःस्थस्याव्यक्तान्तःस्थस्य वा तस्य क्षेत्रज्ञस्य तस्मिन्व्याप्तेऽभेदत एवाभेदमपेक्ष्यैव लयः । उच्यत इति शेषः । विरिञ्चस्य तु देहलयमपेक्ष्यैवेति भावः । ननु मूले विलाप्येति कथमुक्तं, धृतराष्ट्रमरणकाले प्रलयस्याजातत्वादित्यतोऽत्र विलापनशब्दो लक्षणया ध्यानकरणपरो विवक्षित इत्याह ॥ काले तस्येति । प्रलयकाले तस्य जगतो विरिञ्चस्य तत्र विरिञ्चे क्षेत्रज्ञे च तथा तस्य क्षेत्रज्ञस्य तत्र व्याप्ते स्वात्मनि लय एकीभाव इति ध्यानमात्रं ध्यानकरणमात्रमित्यर्थः । नन्वेवममुख्यप्रयोगे किं प्रयोजनमित्यतो रूढलक्षणेयमिति भावेन लौकिकवैदिकप्रयोगप्राचुर्यं प्रमाणेनैव दर्शयति ॥ अविद्यमानमपीति । अजातमपीत्यर्थः । सुनिश्चितः सम्यङ्निश्चयोपेतः । ध्यायेतैव न तु क्रियेत । स तस्य ध्यातस्यार्थस्य कर्तेत्युच्यते । लोक इति शेषः । तथा श्वस्तत्कार्यमहं करिष्य इति निश्चित्य तदेव ध्यायेत् । तं दृष्ट्वाऽन्यो वदति । अनेन स्वमनसि तथा कृतमस्तीति । तथाशब्दो वक्ष्यमाणवैदिकशब्दप्रयोगसमुच्चये । एवशब्दस्य तत्स्मृतेरेवेत्यन्वयः । मुनयो ध्यानकर्तारो जगद्विलापयामासुः । जगद्विलयकर्तार इत्युच्यन्ते । वेदेषु वैदिकग्रन्थेषु च तत्स्मृतेस्तद्ध्यानकर्तृत्वान्निमित्तात् । अमुख्य एवायं प्रयोगो मुख्यार्थस्य बाधितत्वादित्याह ॥ न चेति । निश्चितं यथा स्यात्तथा । तत्स्मृतिमात्रेण लयस्मृतिमात्रेणेदानीं नैव भवतीत्यर्थः । अतोऽयं प्रयोगोऽमुख्य इति शेषः । घटांबरमिवाम्बर

इत्युक्तं दृष्टान्तं विवृण्वन् दार्ष्टान्तिकमपि दर्शयति ॥ स्वरूपमिति । स्वरूपं बहिर्गताव्याकृताकाशस्वरूपम् । तुशब्द आकाशयोर्वक्ष्यमाणवैलक्षण्यद्योतकः । एवं घटाम्बरशब्दो द्विविधाकाशपर इति व्याख्यायाव्याकृताकाशपरत्वे दृष्टान्तदार्ष्टान्तिकभावं तावद्दर्शयति ॥ स्वरूपमिति । स्वरूपं घटान्तर्गतमव्याकृताकाशम् । तुशब्दोऽप्यर्थः । घटे जायमानेऽपि बाह्याकाशान्निर्गतभेदमेव । तत्तु विशेषशक्त्या भिन्नवद्व्यवहारस्य समर्थम् । आस्पदं भवतीति शेषः । तल्लये च घटलयेऽपि तत्तदन्तर्गतमव्याकृतस्वरूपं निर्भेदमेव निर्विशेषमेव । घटस्य लयप्रयुक्तः कोऽपि विशेषो नैवेत्यर्थः। तल्लये न त्विति पाठे घटनाशे भिन्नवद्व्यवहारस्य समर्थं नेत्यर्थः । स्वयमभिन्न एव जगति देहादौ लीनेऽपि स एव हरिरेव पूर्ववद् ज्ञेयः पूर्ववद्विज्ञेयः । एतदेव विवृणोति ॥ निर्विशेषेणेति । जगल्लयप्रयुक्ते विशेषाभाववत्तयेत्यर्थः । घटाम्बरशब्दस्य जायमानाकाशपरतायां दृष्टान्ततदार्ष्टान्तिकभावं दर्शयति ॥ जायमानमिति । आकाशमित्यनुवर्तते । तल्लये घटलये । न तु नैव । तिष्टतीति शेषः । नश्यतीति यावत् । तस्मादुत्पत्तिनाशवत्वात् । महाकाशादव्याकृताकाशात् । कीर्तितः श्रुत्यादौ हरेर्भिन्न इति प्रतिपादित इत्यर्थः । नन्वेवं घटावच्छिन्नभूताकाशवज्जीवस्याप्युपाधिजन्मनाशाभ्यां जन्मनाशौ स्यातामित्यत आह ॥ उपाधेश्चेति । चशब्दोऽनादित्वसङ्ग्रहार्थः । अपि शब्दान्नैव जायत इत्यपि ग्राह्यम् । नन्वेवं यदि जीवस्य नित्योपाधिकल्पनं तर्हि स्वाभाविकं जीवरूपमीशाभिन्नमिति प्राप्तम् । अन्यथोपाधिकल्पनस्य वैयर्थ्यप्रसङ्गात् । उपाधेर्जडरूपस्य नित्यत्वे मोक्षेऽपि तदनुवृत्तिप्रसङ्गेन चिन्मात्रेण देहेन तदवस्थानं जीवस्येति सिद्धान्तहानिश्चेत्यत आह ॥ स्वरूपत्वादिति । चशब्दो यस्मादित्यर्थे । तथा च यस्मान्न भिन्नोपाधिकल्पनं वा तस्मादीशेनाभिन्नत्वम् । स्वाभाविकत्वमिति शेषः । न च नैव । यदीह जीवे कल्प्यमान उपाधिर्वा जीवाद्भिन्नस्तदैव स्वरूपमीशे न स्वभावतोऽभिन्नं स्यात् । न चैवम् । उपाधेर्जीवस्वरूपत्वात् । जीवस्वरूपभूतोपाधेरीशात्स्वाभाविकभेदे विशेषशक्त्या तदवच्छिन्नस्य जीवस्यापि स्वाभाविको भेद एवं सिद्ध्यति नाभेद इति भावः । चिन्मात्रत्वं च । मुक्ताविति शेषः। उपाधेरपि जीवस्वरूपत्वेन चिन्मात्रत्वादिति भावः । ध्वस्तमायागुणेत्यत्र मायागुणान् विवक्षितान्दर्शयितुं तावन्मायाशब्दार्थान्प्रमाणेनैव दर्शयति ॥ त्रिगुणात्मकेति । जडप्रकृतिरित्यर्थः । अन्त्यश्चशब्दो विष्णिवच्छादिरूपानुक्तार्थसङ्ग्राहकः । एव शब्दस्याध्याहृतेनैतदित्यनेन सम्बन्धः । नाममहोदधौ तन्नामकग्रन्थे । यतो मायाशब्दस्यानेकार्था उक्ता अतोऽत्र सत्त्वादयः प्रकृतिगुणा मायागुणा मायागुणशब्दवाच्या इत्यर्थः । ननु धृतराष्ट्रमरणानन्तरं नारदागमनमिति व्याख्याने स वा अद्यतनाद्राजन् परतः पञ्चमेऽहनीति वक्ष्यमाणविरोध इत्यतस्तत्रापि परत इत्यस्य पूर्वत इत्येवार्थ इत्यभिप्रेत्य परशब्दस्य पूर्वार्थकत्वेऽभिधानं दर्शयति ॥ परावर इति । परावरादयः शब्दाः पूर्वापरवरावरदूरसमीपरूपोभयार्थाभिधायिन एवेत्यर्थः । अतो न कोऽपि विरोध इति भावः ।

नन्वथाऽपि विदुरस्य पूर्वमेव मृतत्वाद्विदुरस्तु तदाश्चर्यं निशाम्येत्येतदयुक्तमित्यतस्तस्याप्यभिप्रायमाह ॥ एतत्सर्वमिति । तदाश्चर्यमित्यस्यार्थः एतत्सर्वमिति । कौरवनाशादिकं निशाम्येत्यस्य तात्पर्यम् ॥ पूर्वमेव ज्ञात्वेति ज्ञानदृष्ट्येति शेषः । अवधारणार्थस्य तुशब्दस्य तस्मादित्यनेनान्वय इत्यभिप्रेत्य तस्मादेवेत्युक्तम् । आसन्नविनाशेष्वनासक्तिरुच्यतेत्यस्मादेव कारणादित्यर्थः । तीर्थनिषेवको गन्तेत्यस्य तात्पर्यम् ॥ तीर्थानि ययाविति । तथा च नारदेन युद्धात्पूर्वमेव विदुरः कुरुकुलनाशमारभ्य धृतराष्ट्रादिमरणपर्यन्तमनर्थं स्वकीयानां ज्ञानदृष्ट्या दृष्ट्वा नात्रासक्तिः कर्तव्येति बुद्ध्या तीर्थानि सेवितुं गत इति पूर्वतन एव वृत्तान्तः कथितो न स्वागमनकालीनः । अतो न विरोध इति भावः ॥ ततश्च विज्ञानात्मनीत्यादिमूलस्यायमर्थः ॥ रुद्रादिकं जगद्विज्ञानात्मनि महत्तत्त्वाभिमानिनि विरिञ्चे संयोज्य प्रलयकाले लयमेष्यतीति स्मृत्वा क्षेत्रज्ञे त्रिगुणात्मकप्रकृति-नियामके आनन्दमये तं विरिञ्चे प्रविलाप्य ध्यात्वाऽऽत्मानमव्यक्तान्तर्गतं क्षेत्रज्ञमाधारे सर्वजगदाश्रये ब्रह्मणि व्याप्ते हरौ प्रविलाप्यैकीभवन्तीति विचिन्त्य तथा मरणकाले वागादिके विज्ञानात्मनि देहस्थे विरिञ्चे संयोज्य तं विरिञ्चे क्षेत्रज्ञे हृदि स्थिते हरौ प्रविलाप्यात एवाभिन्नं विचिन्त्यात्मानं हृदिस्थितं क्षेत्रज्ञमाधारे सर्वजगदाधारे ब्रह्मणि प्रविलाप्यास्त इति बक्ष्यमाणेनान्वयः। अत्रोभयत्र दृष्टान्तमाह ॥ घटांबरमिति । घटाम्बरं घटावच्छिन्नमव्याकृताम्बरमम्बरे बहिःस्थिते व्याप्तेऽव्याकृताकाशे यथैकीभवति तथाऽऽत्मानं ब्रह्मणि प्रविलाप्य, यथा च घटाम्बरं घटावच्छिन्न-भूताकाशं घटेन सह जायमानं घटे नष्टेऽम्बरे महाकाशे नश्यति । एवं तं विरिञ्चं क्षेत्रज्ञे प्रविलाप्येत्यर्थः ॥ ५५ ॥

ध्वस्तमायागुणोद्रेको निरुद्धकारणाशयः ।
निवर्तिताखिलाहार आस्ते स्थाणुरिवाधुना ।
तस्यान्तरायो नैवाभूत् सन्यस्ताखिलकर्मणः ॥ ५६ ॥

तात्पर्यम्— त्रिगुणात्मिका तथा ज्ञानं विष्णुशक्तिस्तथैव च । मायाशब्देन भण्यन्ते शब्दतत्वार्थवेदिभिरिति नाममहोदधौ । अत्र सत्वादयो मायागुणाः । परावरे तथैवारादु-भयार्थाभिधायिन इति च ॥ ५६ ॥

प्रकाशिका— ध्वस्तो मायागुणानां प्रकृतिगुणानां सत्त्वादीनामुद्रेकः कामादिरूपेणोद्भवो यस्य स तथा । हरावेव निरुद्धानि करणान्याशयो मनश्च यस्य स तथा । अत एव निवर्तितोऽखिल आहारो भोग्यं यस्य स तथा । स्थाणुरिवाचलोऽधुना मरणात्पूर्वं चतुर्थे दिवसे आस्ते आसीत् । तस्य श्रीव्यासदेवकृपया ध्यानविघ्नो न जात इत्याह ॥ तस्येति । तस्यैवं ध्यायतोऽन्तरायो विघ्नः । संन्यस्तानि हरावेव समर्पितान्यखिलानि कर्माणि यस्य स तथा तस्य ॥ ५६ ॥

स वा अद्यतनाद्राजा परतः पञ्चमेऽहनि ।
कलेवरं हास्यति ह तच्च भस्मीभविष्यति ॥ ५७ ॥

प्रकाशिका— तस्य मृतिकालमप्याह ॥ स वा इति । अद्यतनादह: परतः पूर्वतो हास्यति जहौ । तर्हि दाहार्थं गमिष्यामीत्यत आह ॥ तच्चेति । भस्मीभविष्यति । भस्मसादभूत् । वा इत्यनेन तांस्तदा नारदो विद्वानित्यादिप्रमाणप्रसिद्धिं दर्शयति ॥ ५७ ॥

दह्यमानेऽग्निभिर्देहे पत्युः पत्नी सहोटजे ।
बहिस्स्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति ॥ ५८ ॥

प्रकाशिका— तर्हि गान्धार्याः कुन्त्याश्चानयनाय गमिष्यामीत्यत आह ॥ दह्यमान इति । अग्निभिर्गार्हपत्यादिभिः । कथं भूते देहे । सहोटजे पर्णशालासहिते । साध्वीशब्देन कुंत्यपि ग्राह्या । पतिमन्वग्निं वेक्ष्यति प्राविशत् ॥ ५८ ॥

विदुरस्तु तदाश्चर्यं निशाम्य कुरुनन्दन ।
हर्षशोकयुतस्तस्माद्गन्ता तीर्थनिषेवकः ॥ ५९ ॥

इत्युक्त्वाऽथारुहत्स्वर्गं नारदः सहतुम्बुरुः ।
युधिष्ठिरो वचस्तस्य हृदि कृत्वाऽजहाच्छुचः ॥ ६० ॥

॥ इति श्रीमद्भागवते द्वादशोऽध्यायः ॥

तात्पर्यम्— एतत्सर्वं पूर्वमेव ज्ञात्वा तस्मादेव कारणाद्विदुरस्तीर्थानि ययौ ॥ ६० ॥ इति प्रथमतात्पर्ये द्वादशोऽध्यायः ॥ १२ ॥

प्रकाशिका— धृतराष्ट्रस्य यथा गृहपरित्यागोऽन्यप्रेरणेनैव जातो, न तथा विदुरस्य किन्तु स्वबुद्ध्यैवेत्याह ॥ विदुरस्त्विति । तुशब्दो धृतराष्ट्रात्ज्ञानित्वरूपविशेषद्योतकः । अवधारणार्थो वा । तस्मादित्यनेन सम्बध्यते । तत्कौरवविनाशादिरूपमाश्चर्यं हरेः कर्तव्यं ज्ञानदृष्ट्या निशाम्य पूर्वमेवावलोक्य । हरिसामर्थ्यानुसन्धानेन हर्षो । बन्धुमरणेन शोकस्ताभ्यां युतः । तस्मादासन्नविनाशेषु नासक्त्या प्रयोजनमित्यस्मात्कारणाद्युद्धात्पूर्वमेव । तीर्थनिषेवकस्तीर्थानि सेवितुं गन्ता गतः । युद्धानन्तरमग्रजदर्शनार्थमागतोऽपि न गृहं गतः । अत एव धृतराष्ट्रेण सह पुनर्वनं गतस्तत्रैव त्वया पूर्वमेकीभूत इति वाक्यशेषः शुचः शोकान् ॥ ५९-६० ॥ इति श्रीभागवतटिप्पण्यां द्वादशोऽध्यायः ॥ १-१२ ॥

अथ त्रयोदशोऽध्यायः

सूत उवाच–

सम्प्रस्थिते द्वारकायां जिष्णौ बन्धुदिदृक्षया ।
ज्ञातुं मायामनुष्यस्य वासुदेवस्य चेहितम् ॥ १ ॥

प्रकाशिका— द्वारकायां स्थितानां बन्धूनां दर्शनेच्छया । जिष्णौ अर्जुने । माययेच्छया गृहीतो मनुष्याणां देह इव देहो यस्य स तथा । तस्येहितं चेष्टितं ज्ञातुं च सम्प्रस्थिते गते सति ॥ १ ॥

व्यतीताः कतिचिन्मासास्तदा तु शतशो नृपः ।
ददर्श घोररूपाणि निमित्तानि भृगूद्वह ॥ २ ॥

तात्पर्यम्— मासशब्देनाहान्युच्यन्ते । तथाहि महाभारते । 'अहस्तु मास शब्दोक्तं यत्र चिन्तायुतं व्रजेत् । एवं वत्सरभाद्यं च विपरीते विपर्यय' इति नाममहोदधौ ॥ २ ॥

प्रकाशिका— कतिचिन्मासा व्यतीता अतिक्रान्तास्तदा तस्यामवस्थायां नृपो युधिष्ठिरो शतशः शतसङ्ख्याकानि । तु विशेषेण । घोररूपाण्यनिष्टकराणि निमित्तान्याध्यात्मिकाधिदैविकाधिभौतिकोत्पातान्ददृशे ददर्श । अत्र मासशब्देन प्रसिद्धमासग्रहणमित्यन्यथाप्रतीतिवारणाय व्याख्याति ॥ मासशब्देनेति । अत्रोत्तरत्र चेति शेषः । कुतः प्रसिद्धार्थत्याग इत्यत आह ॥ तथाहीति । हि यस्माद्भारते । तथा कतिचिद्दिवसा गता इति स्पष्टमुक्तमत इत्यर्थः । मास शब्दस्याहर्वाचकत्वे प्रमाणं दर्शयति अहस्त्विति ॥ तुशब्दोक्त विशेषमेव दर्शयति ॥ यत्रेति । यदेत्यर्थः । चिन्तायुतम् । अहरिति वर्तते ॥ वत्सरेति । वत्सरादिशब्दैरपि चिन्तायुतमहरेवोच्यत इत्यर्थः । भशब्देन नक्षत्रपरिवृत्तिगणनयाऽऽद्य शब्दाद्ग्रहपरिवृत्तिगणनया च कृतः कालविशेष उच्यते । विपरीते सुखयुक्ते । विपर्ययो वैपरीत्यम् । यदा सुखयुक्तो मासो वत्सरो वाऽतिक्रान्तः । तदाऽहःशब्देन मासादय उक्ता इत्यर्थः । प्रकृते चिन्तायुतानामह्नां गतत्वात्तेषु मासा इति प्रयोग इति भावः ॥ २ ॥

कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः ।
पापीयसीं नृणां वार्तां क्रोधलोभानृतात्मनाम् ॥ ३ ॥

प्रकाशिका— रौद्रां घोरां गतिमित्यादिनां वक्ष्यमाणेन दृष्ट्वेत्यनेन सम्बन्धः । तदेवाह ॥ विपर्यस्तेति । विपर्यस्ता व्यत्यस्ता ऋतूनां वसन्तादीनां धर्माः पुष्पोद्गमादयोऽस्य सन्तीति

विपर्यस्तर्तुधर्मी तस्य वार्ता जीविकाम् । कथं भूतानां नृणाम् । क्रोधलोभानृतैर्युक्त आत्मा मनो येषां ते तथा तेषाम् ॥ ३ ॥

जिह्मप्रायं व्यवहृतं साध्यमिश्रञ्च सौहृदम् ।
पितृमातृसुहृद्भ्रातृदम्पतीनाञ्च कल्किताम् ॥ ४ ॥

प्रकाशिका— जिह्मप्रायं कपटबहुलम् । व्यवहृतं क्रयविक्रियादिरूपम् । व्यवहारं सौहृदं सख्यम् । साध्यमिश्रं प्रयोजनोपेतम् । पित्रादीनां परस्परं कल्कितां कलहम् ॥ ४ ॥

निमित्तान्यप्यरिष्टानि काले त्वनुगते नृणाम् ।
लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः ॥ ५ ॥

युधिष्ठिर उवाच–

सम्प्रेषिते द्वारकायां जिष्णौ बन्धुदिदृक्षया ।
ज्ञातुञ्च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥ ६ ॥

प्रकाशिका— काले कलिस्वामिकत्वरूपविशेषसूचकस्तुशब्दः । अनुगते प्राप्ते सत्यरिष्टान्यनिष्टसूचकानि निमित्तानि । ऊबक्षिबाहव इत्यादिना वक्ष्यमाणानि । अपिशब्दः पूर्वोक्तसमुच्चयार्थः । लोभाद्यधर्मप्रकृतिं लोभकामक्रोधमोहादिभिरधर्मे प्रकृष्टयत्नं च दृष्ट्वा । अनुजं भीमसेनम् ॥ ५,६॥

गताः सप्ताधुना मासा भीमसेन तवानुजः ।
नायाति कस्य वा हेतोर्नाहं वेदेदमञ्जसा ॥ ७ ॥

प्रकाशिका— मासा दिवसाः ॥ ७ ॥

अपि देवर्षिणाऽऽदिष्टः स कालः प्रत्युपस्थितः ।
यदात्मनोऽङ्गमाक्रीडं भगवानुत्सिसृक्षति ॥ ८ ॥

तात्पर्यम्— अङ्गं पृथिवीम् । यदा त्यागादिरुच्येत पृथिव्याद्यङ्गकल्पना । तदा ज्ञेया नहि स्वाङ्गं कदाचिद्विष्णुरुत्सृजेदिति ब्रह्मतर्के ॥ ८ ॥

प्रकाशिका— अपि किम् । यदा यस्मिन्काले । आत्मनः स्वस्य । आक्रीडं क्रीडास्थानमङ्गमुत्सिसृक्षत्युत्स्रष्टुमिच्छति । स कालो देवर्षिणा नारदेन यूयं तावदवेक्षध्वमित्यादिष्टः ।

प्रतिसम्प्रत्युपस्थितः प्राप्तः किमित्यर्थः । अत्राङ्गं देहमित्यन्यथाप्रतीतिवारणाय तात्पर्यं सप्रमाणकमाह ॥ अङ्गमिति । पृथिवीं भूलोकम् । त्यागादिरित्यत्रादिपदेन वियोगादिग्रहणम् । उच्यते । पुराणादाविति शेषः । तदा तत्र पृथिव्याद्यङ्गकल्पना पृथिव्यादावङ्ग शब्दवाच्यताकल्पना ज्ञेयेत्यन्वयः । कुत इत्यतो देहार्थत्वे बाधकमाह ॥ नहीति ॥ स्वाङ्गं स्वरूपभूतमङ्गम् । हेतुगर्भविशेषणमिदम् । अत्र प्रमाणप्रसिद्धिं दर्शयितुं हिशब्दो हेत्वर्थश्च । यस्मादेवं तस्मात् । ज्ञेयेति ॥ ८ ॥

येषां नः सम्पदो राज्यं दाराः प्राणाः कुलं प्रजाः ।
आसन्सपत्नविजयो लोकाश्च यदनुग्रहात् ॥ ९ ॥

प्रकाशिका— अस्माकं सर्वपुरुषार्थहेतुः श्रीकृष्णः परमेष्टतमोऽतस्तस्यैव वियोगसूचकान्येतानि निमित्तानीत्याशयेनाह ॥ येषां न इति । सपत्नानां वैरिणाम् । जयोऽभिभवः । लोकाश्च । यज्ञकरणात्तेषां नः स काल इति पूर्वेणान्वयः ॥ ९ ॥

पश्योत्पातान्नरव्याघ्र भौमान्दिव्यान्सदैहिकान् ।
घोरमाशंसतोऽदूराद्भयं नो बुद्धिमोहनम् ॥ १० ॥

प्रकाशिका— कुत इयं तव शङ्केत्यत आह ॥ पश्येति । उत्पातान्दुर्निमित्तानि । देहे भवा दैहिकास्तैः सह वर्तमानाः सदैहिकास्तान् । अदूरात्समीपकाले एव । नोऽस्माकं । बुद्धिमोहनं बुद्धिमोहप्रदम् । घोरमसह्यम् । भयमाशंसतः कथयत इत्यन्वयः ॥ १० ॥

ऊर्वक्षिबाहवो मह्यं स्फुरन्त्यङ्ग पुनः पुनः ।
वेपथुश्चापि हृदये आराद्दास्यन्ति विप्रियम् ॥ ११ ॥

प्रकाशिका— दैहिकान्दर्शयति । ऊर्वक्षीति । वाम इति शेषः । स्फुरन्ति कम्पते । वेपथुः कम्पः । एते मह्यं विप्रियं दास्यन्ति ॥ ११ ॥

शिवैषोद्यन्तमादित्यमभिरौत्यनलानना ।
मामङ्ग सारमेयोऽयमभिधावत्यभीतवत् ॥ १२ ॥

प्रकाशिका— भौमानाह ॥ सार्धैस्त्रिभिः । शिवा क्रोष्ट्री आदित्यमभिमुखं रौति क्रोशति । अनलोऽग्निराननेे यस्याः सा तथोक्ता । मुखादग्निमुद्गिरतीत्यर्थः । हे अङ्ग प्रिय भीम । अभीतवन्निःशङ्कम् ॥ १२ ॥

शस्ताः कुर्वन्ति मां सव्यं दक्षिणं पशवोऽपरे ।
वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम ॥ १३ ॥

प्रकाशिका— शस्ता गवादयः । सव्यं वामम् । अप्रदक्षिणमिति यावत् । अपरे गर्दभाद्या दक्षिणं प्रदक्षिणम् । वाहानश्वादीन् ॥ १३ ॥

मृत्युदूतः कपोतोऽग्नावुलूकः कम्पयन्मनः ।
प्रत्युलूकश्च हुङ्कारैरनिद्रौ शून्यमिच्छतः ॥ १४ ॥

तात्पर्यम्— अग्नौ पदं करोति । यदुलूको वदति मोघमेतद्यत्कपोतः पदमग्नौ कृणोतीति हि श्रुतिः ॥ १४ ॥

प्रकाशिका— मृत्युदूतो मृत्युसूचकः कपोतः शिलाकणाशनः पक्षी । अत्र कपोताग्राविति साकांक्षं वाक्यमपेक्षितं सप्रमाणकमध्याहृत्य व्याख्याति ॥ अग्नाविति । तथा च पदं करोतीत्यध्याहार्यमिति भावः । यद्यद्युलूको वदति शब्दं करोति । कार्यचिन्तनसमय इति शेषः । एतच्चिन्तितं मोघं व्यर्थं न भविष्यतीति यावत् । यद्यद्यभीष्टचिन्तनसमये कपोतोऽग्नौ पदं कृणोति करोत्येतन्मोघमिति श्रुत्यर्थः । उलूकः पेचिकः । प्रत्युलूकस्तत्प्रतिपक्ष परो मिथो हुङ्कारैर्जगच्छून्यं कर्तुमिच्छतः । तत्सूचकं हुङ्कारं कुरुत इत्यर्थः ॥ १४ ॥

धूम्रा दिशः परिधयः कम्पते कुः सहाद्रिभिः ।
निर्घातश्च महांस्तात साकश्च स्तनयित्नुभिः ॥ १५ ॥

प्रकाशिका— धूम्रा धूम्रवर्णाः । परिधयः सूर्यचन्द्रपरिवेषाश्च । धूम्राः भवन्तीति शेषः । दिव्यानाह सार्धश्लोकद्वयेन । स्तनयित्नुभिर्निर्मेघाशनिभिरकालमेघैर्वा । साकं सह । महान्निर्घातोऽशनिपातो गर्जनं वा । भवतीति शेषः । चशब्दौ समुच्चयार्थौ ॥ १५ ॥

वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः ।
असृग्वर्षन्ति जलदाः बीभत्समिव सर्वतः ॥ १६ ॥

प्रकाशिका— खरस्पर्शोऽसह्यस्पर्शः । रजसा धूल्या तमोऽन्धकारम् । विशेषेण सृजन् असृग्रक्तम् । कथंभूतम् । बीभत्समिव भीषकमिव विद्यमानम् ॥ १६ ॥

सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि ।
ससङ्कुले तु भगणे ज्वलिते इव रोदसि ॥ १७ ॥

प्रकाशिका— दिवि व्योम्नि । ग्रहाणामादित्यादीनाम् । मिथो मर्दं परस्परयुद्धम् । भगणे नक्षत्रसमूहे । ससङ्कुले । भावप्रधानो निर्देशः । सङ्कुलत्वेन साङ्कर्येण सहिते सति । रोदसी द्यावा-पृथिव्यौ ज्वलिते ज्वालाकुले इव भातः ॥ १७ ॥

नद्यो नदाश्च क्षुभिताः सरांसि च मनांसि च ।
न ज्वलत्यग्निराज्येन कालोऽयं किं विधास्यति ॥ १८ ॥

प्रकाशिका— पुनर्भौमानाह ॥ नद्य इति सार्धैस्त्रिभिः । नदाः पुंनद्यः । शोणा भद्रादयः क्षुभिताः कलुषाः । प्राणिनां मनांसि च क्षुभितानि । किमनिष्टं विधास्यति करिष्यति । एतैर्निमित्तैरिति शेषः ॥ १८ ॥

न पिबन्ति स्तनं वत्साः न दुह्यन्ति च मातरः ।
रुदन्त्यश्रुमुखा गावो न हृष्यन्त्यृषभा व्रजे ।
दैवतानि रुदन्तीव खिद्यन्ति ह्युचलन्ति च ॥ १९ ॥

प्रकाशिका— न दुह्यन्ति । कर्मकर्तरि छान्दसमिदम् । न प्रस्नुवन्तीत्यर्थः । अश्रुर्मुखे यासां तास्तथा । व्रजे गोष्ठे । वृषभा न हृष्यन्ति न नर्दन्ति । न वा प्रक्रीडादिकं कुर्वन्तीत्यर्थः दैवतानि प्रतिमाः खिद्यन्तीव प्रचलन्तीव ॥ १९ ॥

इमे जनपदाः ग्रामाः पुरोद्यानकराश्रमाः ।
भ्रष्टश्रियो निरानन्दा किमघं दर्शयन्ति नः ॥ २० ॥

प्रकाशिका— रोदनादौ यो भावस्तं दर्शयन्तीत्यर्थः । अघमनिष्टम् ॥ २० ॥

मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः ।
अनन्यपुरुषस्त्रीभिर्हीना भूर्हतसौभगा ॥ २१ ॥

प्रकाशिका— स्वयमेवैषां फलमनुमायाह ॥ मन्य इति । एतैर्लिङ्गैः । कथंभूतैः । पदैरनन्यपुरुषस्त्रीभिर्न विद्यन्तेऽन्ये पुरुषाः स्त्रियश्च सौन्दर्यादिविषये येषां तान्यनन्यपुरुषस्त्रीणि तैः ।

दीर्घश्छान्दसः । अनन्या भगवदेकशरणाः पुरुषाः स्त्रियश्च ताभिश्च हीनेति वा । अनन्यपुरुष-श्रीभिरिति पाठे न विद्यतेऽन्येषु पुरुषेषु श्रीः शोभा येषां तानि तैरिति व्याख्येयम् ॥ २१ ॥

इति चिन्तयतस्तस्य दृष्टारिष्टेन चेतसा ।
राज्ञः प्रत्यागमद्ब्रह्मन्यदुपुर्याः कपिध्वजः ॥ २२ ॥

प्रकाशिका— दृष्टान्यरिष्टानि येन तेन चेतसा चितं यतः सतः । कपिध्वजोऽर्जनः ॥ २२ ॥

तं पादयोर्निपतितमयथापूर्वमातुरम् ।
अधोवदनमब्बिन्दून्मुञ्चन्तं नयनाब्जयोः ॥ २३ ॥

प्रकाशिका— अयथापूर्वं यथापूर्वं न भवति तथा निपतितम् । आतुरं रोगिणमिव स्थितम् । नयनाब्जयोः सकाशात् ॥ २३ ॥

विलोक्योद्विग्नहृदयो विच्छायमनुजं नृप ।
पृच्छति स्म सुहृन्मध्ये संस्मरन्नारदेरितम् ॥ २४ ॥

प्रकाशिका— विच्छविं विगतकान्तिम् । विच्छायमिति पाठेऽप्ययमेवार्थः ॥ २४ ॥

युधिष्ठिर उवाच—

कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते ।
मधुभोजदशार्हार्हसात्वतान्धकवृष्णयः ॥ २५ ॥

प्रकाशिका— आनर्तपुर्यां द्वारवत्याम् । स्वजना बान्धवाः ॥ २५ ॥

शूरो मातामहः कच्चित्स्वस्त्यास्त चाथ मारिषः ।
मातुलः सानुजः कच्चित्कुशल्यानकदुन्दुभिः ॥ २६ ॥

प्रकाशिका— मारिषः । रुष निष हिंसायाम् । मा रिष्यते वचसाऽपि अवमानहिंसार्हो न भवतीति मारिषो मान्य इत्यर्थः । मातामहो मातुः पिता । मातुलो मातुः सहोदरः । सानुजोऽनुजादिभिः सहितः । आनकदुन्दुभिर्वसुदेवः । कच्चिच्छब्दः प्रश्नार्थे ॥ २६ ॥

सप्तस्वसारः तत्पत्न्यो मातुलान्याः सहात्मजाः ।
आसते सस्नुषा क्षेमं देवकीप्रमुखाः स्त्रियः ॥ २७ ॥

प्रकाशिका— तत्पत्न्यस्तस्य वसुदेवस्य पत्न्यः सप्त सङ्ख्याकाः परस्परं स्वसारोऽस्माकं मातुलान्यो मातुलभार्याः । ता निर्दिशति ॥ देवकीप्रमुखा इति ॥ २७ ॥

कच्चिद्राजाहुको जीवत्यसत्पुत्रोऽस्य चानुजः ।
हृदिकः ससुतोऽक्रूरो जयन्तगदसारणाः ॥ २८ ॥

प्रकाशिका— आहुक आहुकस्यापत्यमुग्रसेनः । स कथं भूतः । असन्दुष्टः कंसः पुत्रो यस्य स तथा । अस्योग्रसेनस्यानुजो देवकः । ससुतः कृतवर्मनाम्ना सुतेन सहितो हृदिको जयन्तादयः ॥२८॥

आसते कुशलं कच्चिद्ये च शत्रुजिदादयः ।
कच्चिदास्ते सुखं रामो भगवान्सात्वतां पतिः ॥ २९ ॥

प्रकाशिका— शत्रुजिदादयश्च कृष्णभ्रातरः ॥ २९ ॥

प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः ।
गम्भीररयोऽनिरुद्धो वर्तते भगवानुत ॥ ३० ॥

प्रकाशिका— सर्ववृष्णीनां मध्ये महारथः । गम्भीररयो युद्धे महावेगः । वर्तते मोदत इत्यर्थः । ॥ ३० ॥

सुषेणश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः ।
अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः ॥ ३१ ॥

प्रकाशिका— कृष्णस्यापत्यानि कार्ष्णेयास्तेषु प्रवराः ॥ ३१ ॥

तथैवानुचराः शौरेः श्रुतसेनोद्धवादयः ।
सुनन्दनन्दशीर्षण्या ये चान्ये सात्वतर्षभाः ॥ ३२ ॥

प्रकाशिका— शौरेः कृष्णस्यानुचरा भृत्याः सुनन्दनन्दौ शीर्षण्यौ प्रधानौ येषां ते सुनन्दनन्दशीर्षण्याः ॥ ३२ ॥

अपि स्वस्त्यासते सर्वे रामकृष्णभुजाश्रयाः ।
अपि स्मरन्ति कुशलमस्माकं बद्धसौहृदाः ॥ ३३ ॥

प्रकाशिका— बद्धसौहृदा बद्धस्नेहाः ॥ ३३ ॥

भगवानपि गोविन्दो ब्रह्मण्यो भक्तवत्सलः ।
कच्चित्पुरे सधर्मायां सुखमास्ते सुहृद्वृतः ॥ ३४ ॥

तात्पर्यम्— यथाऽन्येषां सुखं भविष्यति तथा । नित्यसुखात्वाद्धरेः । अत्युत्तमानां कुशलप्रश्नो लोकसुखेच्छया । नित्यदाऽऽप्तसुखत्वात्तु न तेषां युज्यते कचिदिति नारदीये ॥ ३४ ॥

प्रकाशिका— भगवानपि गोविन्द इत्यत्रेतरप्रश्नवदेवायमपि प्रश्न इति प्रतीतिवारणायाभिप्रायमाह ॥ यथेति । तथा चान्येषामित्यध्याहृत्य सुखमित्येतदास्त इति क्रियाविशेषणतया योज्यमिति भावः । एवं व्याख्याने बीजमाह ॥ नित्यसुखत्वादिति । तथा च कदाचित्सुखवत्स्वेवैतादृशः प्रश्नो युक्तो न नित्यसुखे । असुखप्रसक्तेरेवाभावात् । अत एवं व्याख्यातमिति भावः । अत्र प्रमाणमप्याह ॥ अत्युत्तमानामिति । अत्युत्तमानां सर्वोत्तमानां हर्यवताराणाम् । लोकसुखेच्छया लोकसुखकरणापेक्षया । व्याख्येय इति शेषः । कुत एवं व्याख्येयमित्यतोऽत्र बीजं दर्शयति ॥ नेति ॥ तेषां भगवदवताराणां कचित्कदाचिज्जायमानम् । सुखमिति शेषः । येन प्रश्नो यथास्थितः स्यादिति भावः। इति हेतोर्लोकसुखेच्छया व्याख्येय इत्यन्वयः ॥ ३४ ॥

मङ्गलाय च लोकानां क्षेमाय च भवाय च ।
आस्ते यदुकुलाम्भोधावाद्योऽनन्तसखः पुमान् ॥ ३५ ॥

प्रकाशिका— एतमेवार्थं दर्शयति ॥ मङ्गलायेति चतुर्भिः । मङ्गलाय शुभाय । क्षेमाय प्राप्तपरिपालनाय । भवायाप्राप्तलाभाय अभिवृद्ध्ये वा । भवो वृद्धिः समुद्दिष्ट इति वचनात् । चशब्दः परस्परसमुच्चये । यदुकुलसमुद्रमध्ये । अनन्तः शेषावतारो बलभद्रः सखा यस्य स तथा ॥ ३५ ॥

यद्बाहुदण्डैर्गुप्तायां स्वपुर्यां यदवोऽर्चिताः ।
क्रीडन्ति परमानन्दं महापौरुषिका इव ॥ ३६ ॥

प्रकाशिका— अर्चिताः सर्वैः पूजिताः सन्तः । परमानन्दं यथा भवति तथा । महापौरुषिका महापुरुषो हरिस्तद्भक्ता मुक्ता इवेत्यर्थः ॥ ३६ ॥

यत्पादशुश्रूषणमुख्यकर्मणासत्यादयो द्व्यष्टसहस्रयोषितः ।
निर्जित्य सङ्ख्ये त्रिदशांस्तदाशिषोहरन्ति वज्रायुधवल्लभोचिताः ॥ ३७ ॥

प्रकाशिका— यस्य कृष्णस्य पादशुश्रूषणमेव मुख्यं तपआद्यपेक्षया श्रेष्ठं कर्म तेन । सत्यादयः सत्यभामादयः । सङ्ख्ये युद्धे । त्रिदशानिन्द्रादींस्तदाशिषस्तदभीष्टाः पारिजाताद्या हरन्ति । कथं भूताः । वज्रायुधस्येन्द्रस्य वल्लभा शची तस्या उचिता योग्याः ।। ३७ ।।

यद्बाहुदण्डाभ्युदयानुजीविनो यदुप्रवीराः ह्यकुतोभयाः मुहुः ।
अधिक्रमन्त्यङ्घ्रिभिराहृतां बलात् सभां सुधर्मां सुरसत्तमोचिताम् ।। ३८ ।।

प्रकाशिका— अभ्युदयः प्रभावः । बलादाहृतां सुधर्मां सुधर्मनामिकां सभाम् । कथंभूतां सुरसत्तम इन्द्रस्तस्योचितां योग्याम् । अनेन सर्वैवन्द्यामिति सूचयति । स्वाङ्घ्रिभिः स्वपादैः । मुहुर्मुहुरनुदिनम् । अधिक्रामन्ति आक्रम्य तिष्ठन्ति । स गोविन्दः सुखमास्त इति पूर्वेणान्वयः । अनेन लोकानां सत्यभामादिस्वस्त्रीणां च यथासुखं स्यात्तथाऽऽस्ते किमिति प्रश्नाशयो दर्शित इति ज्ञातव्यः ।। ३८ ।।

कच्चित्तेऽनामयं तात भ्रष्टतेजा विभासि मे ।
अलब्धमानोऽवज्ञातः किं वा तात चिरोषितः ।। ३९ ।।

तात्पर्यम्— पूर्वं चिरोपितः ।। ३९ ।। इति त्रयोदशोऽध्यायः ।। १३ ।।

प्रकाशिका— इदानीमर्जुनस्यैवानामयं पृष्ट्वा भ्रष्टतेजस्त्वे कारणं पृच्छति ।। कच्चिदिति षड्भिः । अनामयमारोग्यम् । न लब्धमानो बन्धुकृतो येन स तथोक्तः । प्रत्युत किं वाऽवज्ञातस्तिरस्कृतः । अत्र चिरोषित इत्येतदनुपपन्नमिवाभाति । सप्तदिवसानन्तरमेवागतत्वस्य पूर्वमुक्तत्वादितोऽत्र विवक्षितं तात्पर्यं दर्शयति ।। पूर्वं चिरोषित इति । पूर्वं यदा तव द्वारकागमनं तदा तत्र चिरकालमेव तव वासोऽभूदिदानीं तु शीघ्रमेवागतोऽसि । अतोऽवज्ञादिसम्भावनेत्यर्थ इति भावः ।। ३९ ।।

कच्चिन्नाभिहतो भावैः शब्दादिभिरमङ्गलैः ।
न दत्तं युक्तमर्थिभ्यः आशया यत्प्रतिश्रुतम् ।। ४० ।।

प्रकाशिका— अमङ्गलैरशुभैः शब्दादिभिः शब्दस्पर्शरूपरसगन्धलक्षणैर्भावैः पदार्थैरभिहितः स्पृष्टो न कच्चित् । न किमपीत्यर्थः । आशायुक्तं तदाशाविषयीभूतं यद्द्रव्यं त्वया प्रतिश्रुतं दास्यामीति प्रतिज्ञातं तद्द्रव्यं न दत्तं कच्चित् ।। ४० ।।

कच्चित्त्वं न ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियम् ।
शरण्योपसृतं सत्वं नात्याक्षीः शरणप्रदः ।। ४१ ।।

प्रकाशिका— ब्राह्मणादिसत्त्वं प्राणिजातम् । कथं भूतम् । शरण्योपसृतं शरणं गन्तुं योग्यं त्वां प्रति प्राप्तम् । नात्याक्षीः किं न त्यक्तवानसि किम् । यतस्त्वं पूर्वं शरणप्रदः ।. तादृशप्राणिनामाश्रयप्रदः ॥ ४१ ॥

कच्चित्त्वं नागमोऽगम्यां गम्यां वाऽसत्कृतां स्त्रियम् ।
पराजितो वाऽथ भवान्नोत्तमैर्नाधमैः पथि ॥ ४२ ॥

प्रकाशिका— अगम्यां विधवां निषिद्धां वा । स्त्रियं नागमो न गतवानसि किम् । नोत्तमैरनुत्तमैः। समैरिति यावत् । असमैरधमैर्वा पराजितो न कच्चित् ॥ ४२ ॥

अपिस्वित्पर्यभुङ्थास्त्वं सम्भोज्यावृद्धबालकान् ।
जुगुप्सितं कर्म किञ्चित्कृतवानसदक्षमम् ॥ ४३ ॥

प्रकाशिका— सम्भोज्यान्सम्भोजनार्हान्वृद्धान् बालकांश्चापि स्वित् किं स्वित् त्वं पर्यभुङ्थाः परित्यज्य भुक्तवानासि किम् । अक्षमं कर्तुमयोग्यं यज्जुगुप्सितं शास्त्रनिषिद्धं कर्म ब्रह्महत्यादिकं तत्कृतवानसि किम् ॥ ४३ ॥

कच्चित्प्रेष्ठतमेनाथ हृदयेनात्मबन्धुना ।
शून्योऽसि रहितो नित्यं मन्यसे तेऽन्यथा हि रुक् ॥ ४४ ॥

॥ इति श्रीमद्भागवते प्रथमस्कन्धे त्रयोदशोध्यायः ॥

प्रकाशिका— नित्यं सर्वदा प्रेष्टतमेन हृदयेन मनोगतेनात्मबन्धुना स्वबन्धुना कृष्णेन रहितोऽसि । यत आत्मानं शून्योऽस्मीति मन्यसे कच्चित् । हि यस्मात्ते रुक्कान्तिरन्यथा न पूर्ववत् । अत एते प्रश्ना मया कृता इति शेषः ॥ ४४ ॥ इति श्रीभागवतटिप्पण्यां त्रयोदशोऽध्यायः ॥ १-१३ ॥

अथ चतुर्दशोऽध्यायः

सूत उवाच–

एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः ।
नानाशङ्कास्पदं रूपं कृष्णविश्लेषकर्शितः ॥ १ ॥

प्रकाशिका— कृष्णोऽर्जुनो रूपं शरीरं नानाशङ्कास्पदम् । आलक्ष्येति शेषः । विकल्पितो विकल्पप्रश्नकोटीकृतः । लोकानां नाना शङ्का स्यात्तथा विकल्पित इति वा । प्रतिभाषितुं

नाशक्नोदित्युत्तरेणान्वयः । तत्र हेतवः कृष्णविश्लेषकर्षित इत्यादयः । कृष्णस्य विश्लेषो वियोगस्तेन वशीकृतः ॥ १ ॥

शोकाग्निशुष्यद्वदनहृत्सरोजं हतप्रभम् ।
विभुं तमेवानुध्यायन्नाशक्नोत्प्रतिभाषितुम् ॥ २ ॥

प्रकाशिका— शोकेन हेतुना । वदनं च हृच्च । ते एव सरोजे । शुष्यती वदनहृत्सरोजे यस्य स तथोक्तः । शुचः शोकान् । शोकहेतूनामनेकत्वाद्बहुवचनम् ॥ २ ॥

कृच्छ्रेण संस्तभ्य शुचः पाणिनाऽऽमृज्य नेत्रजम् ।
पारोक्ष्येण समुन्नद्धप्रणयौत्कण्ठ्यकातरः ॥ ३ ॥

प्रकाशिका— नेत्रजमश्रु पाणिनाऽऽमृज्य । पारोक्ष्येण कृष्णस्य दर्शनागोचरत्वेन हेतुना । समुन्नद्धं सम्यगभिवृद्धम् । यत्प्रणयेन स्नेहेनौत्कण्ठ्येन कातरो विवशः ॥ ३ ॥

सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन् ।
नृपमग्रजमित्याह बाष्पगद्गदया गिरा ॥ ४ ॥

प्रकाशिका— सारथ्यादिषु कर्मसु सख्यं हितैषिताम् । मैत्रीमुपकारितां क्लेशस्थानं निरूप्य रक्षकताम् । सौहृदं प्रत्युपकारमनपेक्ष्य उपकारकत्वम् । बन्धुत्वं स्नेहं वा । बाष्पेण कंण्ठावरोधाद्गलन्त्या स्रवत्या ॥ ४ ॥

अर्जुन उवाच–

वञ्चितोऽहं महाराजन् हरिणा बन्धुरूपिणा ।
येन मेऽपहृतं तेजो देवविस्मापनं महत् ॥ ५ ॥

प्रकाशिका— वञ्चित इति वचनं प्रलापरूपम् । हेतुः सामर्थ्यम् । देवानपि विस्मापयतीति देवविस्मापनम् । अपहृतं सहैव नीतम् ॥ ५ ॥

यस्य क्षणवियोगेन लोको ह्यप्रियदर्शनः ।
उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा ॥ ६ ॥

प्रकाशिका— यस्येत्यादि यच्छब्दानां तेनाहमद्य मुषित इति वक्ष्यमाणेन तच्छब्देनान्वयः । लोको भूलोकः । अप्रियतया हेयतया दृश्यत इत्यप्रियदर्शनः । अत्र दृष्टान्तमाह ।। उक्थेनेति । प्राणेनेत्यर्थः । एष पित्रादिदेहो मृतकः शव इति प्रोच्यतेऽत एवाप्रियत्वेन दृश्यते ।। ६ ।।

यत्संश्रयाद्द्रुपदगेह उपागतानां
राज्ञां स्वयंवरमुखे स्मरदुर्मदानाम् ।
तेजो हृतं खलु मया विहतश्च मत्स्यः
सज्जीकृतेन धनुषाऽधिगता च कृष्णा ।। ७ ।।

प्रकाशिका— मैत्रीं संस्मरन्नित्युक्तमेव विशदयति ।। यत्संश्रयादिति दशभिः । यस्य कृष्णस्य संश्रयाद्बलात् । द्रुपदगेहे उपागतानां मिलितानां स्मरणेन निमित्तेन जातो दुष्टो मदो येषां ते तथोक्तास्तेषाम् । तेजः प्रभावो हृतमपहृतम् । केन सज्जीकृतेन धनुषा धनुषः सज्जीकरणेनेत्यर्थः । पश्चात्तेनैव मत्स्यो यन्त्रोपरि लक्ष्यतया स्थापितोऽभिहतो विद्धश्च । अधिगता प्राप्ता च ।। ७ ।।

यत्सन्निधावहमु खाण्डवमग्नयेऽदा-
मिन्द्रञ्च सामरगणं तरसा विजित्य ।
लब्धा सभा मयकृताऽद्भुतशिल्पमाया
दिग्भ्योऽहरन्नृपतयो बलिमध्वरे ते ।। ८ ।।

प्रकाशिका— अहम् उ खाण्डवमिति पदच्छेदः । उ शब्दो विस्मये । खाण्डवसंज्ञकमिन्द्रस्य वनम् । अदां दत्तवानस्मि । खाण्डवदाहे रक्षितेन मयेन कृता सभा च यत्सन्निधावेव लब्धा । कथं भूता सभा । अद्भुतशिल्पमाया अद्भुतानि शिल्पानि जले स्थलबुद्धिजनिकादिमायाश्च यस्यां सा । यत्सन्निधावेव तेऽध्वरे राजसूये यागे दिग्भ्य आगता नृपतयस्ते बलिं करमहरन्ददुः ।। ८ ।।

यत्सन्निधौ नृपशिरोङ्घ्रिमहन्मखार्थं
आर्योऽनुजस्तव गदायुधसत्ववीर्यः ।
तेनाहृताः प्रमथनाथमखाय भूपा
यन्मोचिता भ्युदनयन्बलिमध्वरे ते ।। ९ ।।

प्रकाशिका— गदाख्यमायुधं सत्त्वं मनोबलं ज्ञानं वा । वीर्यं शरीरबलं च यस्य स तथा । तवानुजो भीमः । यस्य कृष्णस्य तेजसा सामर्थ्येन नृपशिरःस्वङ्घ्रिर्यस्य तं जरासन्धं मखार्थमहन्ह-

तवान् । तदभावे राजसूययागासम्भवात् । तेन जरासन्धेन प्रमथानां भूतानां नाथो रुद्रस्तद्देवताकयज्ञाय हृताः पशुत्वेन कल्पिता यद्येन कृष्णेन मोचिताः सन्तस्ते तवाध्वरे बलिमभ्युदयन् आनीय दत्तवन्तः ॥ ९ ॥

पत्न्यास्तवापि मखक्लृप्तमहाभिषेक-
श्लाधिष्ठचारुकबरं कितवैः सभायाम् ।
स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्यो
यैस्तत्स्त्रियो न्यकृत तत्स विमुक्तकेश्यः ॥ १० ॥

तात्पर्यम्— यत्पदयोः पतिताया अश्रुप्रधानः । यैः कबरं स्पृष्टं तत्स्त्रियः तत्पदयोः पतितत्वादेव । स विमुक्तकेश्यो न्यकृत ॥ १० ॥

प्रकाशिका— न केवलं मम भीमस्य च तेनोपकारः कृतः किन्तु तव पत्न्या अपीत्याह ॥ पत्न्यास्तवापीति । अत्र यत्सन्निधावित्यादाविव यच्छब्दाभावात्तेनाहमद्य मुषित इति वक्ष्यमाणेनान्वानुपपत्तिमालोच्य यच्छब्दमध्याहृत्य योजयति ॥ यत्पादयोरिति । यस्य कृष्णस्य पादयोरित्यर्थः । पतिताया इत्ययमध्याहारः न तु पतिताश्रुमुख्य इति समासान्तर्गतपतितशब्दव्याख्यानमिदं तस्य समस्तत्वेन पत्न्येत्यनेनान्वयानुपपत्तेः । तथा च यस्य कृष्णस्य पादयोः पतितायाः प्रणतायास्तव पत्न्यास्तत्रैव पतितः प्रणत इव स्थितः । अश्रुलक्षणो मुख्यः प्रधानो मन्त्रीति मूलं व्याख्येयमिति सूचयति । तत्स्त्रिय इत्यत्र तच्छब्दपरामर्शान्दर्शयति ॥ यैः कबरमिति । न्यकृतेत्यत्र हेतुकथनाय मूले तदित्युक्तम् । तद्व्याख्याति ॥ तत्पदयोरिति । तथा च तदित्यव्ययं तस्मादित्यर्थे । तस्य च तत्पदयोः पतितत्वादेवेत्यर्थ इत्युक्तं भवति । तथा चाश्रुलक्षणो मन्त्री स्वयमपिकृष्णपादौ प्रणम्य तत्सामर्थ्येनैव न्यकृतेति भावः । सविमुक्तकेश्य इत्यस्य व्याख्यानम् ॥ सह विमुक्तकेश्य इति । सहेत्यस्य युगपदेवेत्यर्थः ॥ ततश्चायं श्लोकार्थः ॥ यत्पादयोर्यस्य कृष्णस्य पादयोः पतिताया दुःखेन प्रणतायास्तत्र पतितः प्रणत इव स्थितः । अश्रुमुख्योऽश्रुलक्षणप्रधानः । मन्त्रीति यावत् । तव पत्न्या मखे राजसूयनामके यज्ञे क्लृप्तेन कृतेन महाभिषेकेण श्लाधिष्ठमतिशयेन श्लाघ्यम् । अनेन पापिभिः स्पृष्टुमयोग्यमिति सूचयति । चारु रुचिरं कबरं सभायां यैर्दुःशासनादिभिः कितवैर्विकीर्योन्मुच्य स्पृष्टमाकृष्टं तत्स्त्रियस्तेषां भार्यास्तस्मात्कृष्णपादयोः पतितत्वादेव । तत्प्रणामसामर्थ्येनेति यावत् । सविमुक्तकेश्यः सह विमुक्तकेशा वैधव्याद्युगपदेव मुण्डितकेशा न्यकृत नितरां चकारेति ॥ १० ॥

यत्तेजसाऽथ भगवान्युधि शूलपाणि-
र्विस्मापितः स गिरिशोऽस्त्रमदान्निजं मे ।

अन्येऽपि चाहममुनैव कलेवरेण
प्राप्तो महेन्द्रभवने महदासनार्थम् ॥ ११ ॥

प्रकाशिका— पुनः स्वस्य कृष्णकृतमुपकारं स्मरति ॥ यत्तेजसेति । यस्य कृष्णस्य तेजसा सामर्थ्येन । अथशब्दः समुच्चयार्थः । युधि वराहनिमित्ते युद्धे विस्मापितो विस्मयं गमितः । शूलं पाणौ यस्य सः शूलपाणिः प्रसिद्धो गिरिशः । सगिरज इति पाठे गिरिजा पार्वती तया सहित इत्यर्थः । निजमस्त्रं पाशुपताख्यं मे मह्यमदात् । अन्ये लोकपाला अपि स्वास्त्राण्यदुरिति शेषः । महेन्द्रभवने स्वर्गे । महतो देवेन्द्रस्यासनार्थं सिंहानासार्थं प्राप्तोऽधिरूढोऽस्मि ॥ ११ ॥

तत्रैव मे विहरतो भुजदण्डयुग्मं
गाण्डीवलक्षणमरातिवधाय देवाः ।
सेन्द्राः श्रिता यदनुभावितमाजमीढ
तेनाहमद्य मुषितः पुरुषेण भूम्ना ॥ १२ ॥

प्रकाशिका— तत्रैव स्वर्ग एव । विहरतः क्रीडमानस्य मे । गाण्डीवं लक्षणं चिह्नं यस्य तत् । यदनुभावितं येन कृष्णेनानुभावितं प्रभावयुतं कृतम् । भुजलक्षणं दण्डयुगलम् अरातयो निवात-कवचनामानोऽसुरास्तेषां वधाय सेन्द्रा देवाः श्रिता आश्रितवन्तः । हे अजमीढवंशज युधिष्ठिर । तेन भूम्ना परिपूर्णेन पुरुषेण सर्वदेहान्तर्यामिणा मुषितोऽस्म्यपहृतस्वापरोक्ष्योऽस्मि ॥ १२ ॥

यद्बान्धवः कुरुबलाब्धिमनन्तपार-
मेको रथेन तरसाऽतरमार्यसत्वः ।
प्रत्याहृतं पुरधनञ्च मया परेषां
तेजः परं मणिमयञ्च हृतं शिरोभ्यः ॥ १३ ॥

प्रकाशिका— यद्बान्धव इत्यादिश्लोकेष्वपि यच्छब्दानां तेनाहं मुषित इत्यनेनाऽन्वयः । यद्बान्धवो यस्य कृष्णस्य बान्धव बन्धुसंम्बन्धिस्नेहो यस्य स तथा । यत्स्नेहवानित्यर्थः । एक एवाहमनन्तपारं न विद्यतेऽन्तः परिच्छेदो निर्णयो यस्य तदनन्तम् । अनन्तं पारं परतीरं यस्य स तथोक्तस्तम् । अदृश्यपरतीरमिति यावत् । कौरवसैन्यसमुद्रमतरं तीर्णवानस्मि । कथं भूतः आर्यसत्त्वः श्रेष्ठबलः । किञ्च यद्बान्धवेन मया विराटनगरे पुरुधनं बहुगोधनं प्रत्याहृतं पुनरानीतम् । तथा परेषां शत्रूणां कौरवाणां शिरोभ्यो मणिमयरत्नखचितकिरीटादिरूपं धनं परमुत्तमं तेजः सामर्थ्यं च सम्मोहनास्त्रेण तान्मोहयित्वा हृतमपहृतम् ॥ १३ ॥

यो भीष्मकर्णगुरुशल्यचमूष्वदभ्र-
राजन्यवर्यरथमण्डलमण्डितासु ।
अग्रेचरो मम रथे रथयूथपाना
मायुर्मनांसि च दृशा सहसा य आर्च्छत् ॥ १४ ॥

प्रकाशिका— अदभ्रा अनल्पा राजन्यवर्याः क्षत्रियश्रेष्ठास्तेषां रथमण्डलैः रथसमूहैर्मण्डितास्वलङ्कृतासु भीष्मादीनां चमुषु स्थितो यो मम रथस्तस्मिन्सारथितया ममाग्रेचरः सन् रथयूथपानां भीष्मादीनामायुर्मनांसि च धैर्याणि च सहसा शीघ्रमार्च्छदपाहरत् । यदार्च्छत्तद्दृशैव नायुधादिनेत्यर्थः। सह ओज आर्च्छदिति पाठे सहो बलमोजोऽवष्टम्भशक्तिमिति व्याख्येयम् ॥ १४ ॥

यद्दोष्षु मां प्रणिहितं गुरुभीष्मकर्ण-
द्रौणित्रिगर्तशलसैन्धवबाह्लिकाद्यैः ।
अस्त्राण्यमेयमहिमानि निरूपितानि
नोपस्पृशुर्नृहरिदासमिवासुराणि ॥ १५ ॥

प्रकाशिका— यस्य दोःषु मां प्रणिहितं स्थापितम् । येन रक्षितमिति यावत् । गुरुर्द्रोणः । त्रिगर्तस्त्रिगर्तदेशाधिपतिः सुशर्मा । शलः सोमदत्तपुत्रः । गुर्वादिभिर्निरूपितानि प्रयुक्तान्यमेयमहिमान्यचिन्त्यसामर्थ्यान्यस्त्राणि नोपस्पृशुर्नोपतापं चक्रुः । स्पृश उपताप इति धातुः । अत्र दृष्टान्त आसुराणि हिरण्यकशिपुप्रेरितासुरप्रयुक्तान्यस्त्राणि नृहरिदासं प्रह्लादं यथा तथैवेति ॥ १५ ॥

यन्मे नृन्पेद्र तदतर्क्यविहार ईशो
यो(ऽ)लब्धरूपमवदद्रणमूर्ध्नि दर्शी ।
यन्मायया৻वृतदृशो न विदुः परं तत्
सूत्रादयोऽहमहमस्मि ममेति भव्याः ॥ १६ ॥

प्रकाशिका— हे नृपेन्द्र । अतर्क्यविहारोऽचिन्त्यक्रीड ईशः सकलजगत्प्रेरको यःकृष्णः अलब्धरूपं स्वप्रसादमृते केनापि न दृष्टं प्राप्तं वा यद्रूपं तद्रणमूर्ध्नि रणश्रेष्ठे तन्मध्ये मेऽवदत् । किं कुर्वन् । दर्शी तद्रूपं मम दर्शयन् सन् । पुनः कथंभूतं तद्रूपमित्यत उक्तम् ॥ परं सर्वोत्तममिति । कुत इत्यत उक्तं सूत्रादयो वाय्वादयस्तं यद्यस्मान्नविदुस्तत्तस्मादिति । सूत्रादयोऽपि कुतो न विदुरित्यत उक्तम् ॥ माययेति । मायया हरीच्छयाऽऽवृतदृश आवृतस्वरूपज्ञानाः । अहं कर्ताऽस्मीदं ममेति

भाव्या भवितुमनुभवितुं योग्याः । एवं भ्रान्ता इत्यर्थः । इदं वायुदेवव्यतिरिक्तविषयं छत्रिन्याये-नोक्तमिति ज्ञातव्यम् । तथा च हरीच्छयाऽवृतस्वरूपज्ञानत्वेनाहंममेति भ्रान्त्या च यस्मात्तद्रूपं सूत्रादयोऽपि न तत्प्रसादमृते सम्यग्विदुस्तस्मात्परं सूत्राद्युत्तमं तद्रूपमवदेतित्यन्वयः ॥ १६ ॥

सौत्ये वृतः कुमतिनाऽऽत्मद ईश्वरो मे
यत्पादपद्ममभवाय भजन्ति भव्याः ।
संश्रान्तवाहमरयो रथिनो भुविष्ठं
न प्राहरन्यदनुभावनिरस्तचित्ताः ॥ १७ ॥

प्रकाशिका— इदानीं स्वापराधमनुस्मरंस्तप्यपान आह ॥ सौत्य इति । भव्या मुक्तियोग्याः महान्तो यस्य कृष्णस्य पादपद्मभवाय मोक्षाय भजन्ति । यस्य कृष्णस्यानुभावेन निरस्तानि मोहितानि चित्तानि येषां ते । अरयः कर्णादयो रथिनोऽपि जयद्रथवधसमये मदीयरथाश्वेषु जलपानाभावेन श्रान्तेषु वारुणास्त्रेण मया सम्पादितं जलं पातुं गतेषु सत्स्वहं भूमितले स्थितस्तस्मिन्समये श्रान्तावाहा अश्वा यस्य तं भुविष्ठं मां न प्राहरन् । स एकान्तानामात्मानमपि ददातीत्यात्मद ईश्वरो मे मया कुमतिनाऽयं मम मातुलेय इति दुर्बुद्धिना सौत्ये सारथ्यार्थं वृतः स्वीकृतोऽतोऽमहतीव पापीति भावः ॥ १७ ॥

नर्माण्युदाररुचिरस्मितशोभनानि
हे पार्थ हेऽर्जुन सखे कुरुनन्दनेति ।
सञ्जल्पितानि नरदेव हृदिस्पृशानि
स्मर्तुर्लुठन्ति हृदयं मम माधवस्य ॥ १८ ॥

प्रकाशिका— तदीयवचनानि मम हृदयान्नापगच्छन्तीत्याह ॥ नर्माणीति । हे नरदेव । माधवस्य श्रीकृष्णस्योदारं गम्भीरं रुचिरं मनोहरं यत्स्मितम् । तेन शोभितानि मङ्गलीकृतानि नर्माणि परिहासवचनानि तथा । तत्र तत्र कार्येषु हे पार्थेत्यादीनि सञ्जल्पितानि मधुरसम्भाषणानि च यानि तानि हृदिस्पृशानि मनोज्ञानि । इदानीं स्मुर्तुर्मम हृदयं प्राप्य लुठन्ति । तत्रैव परिवर्तते । हृदयान्न निर्गच्छन्तीति भावः ॥ १८ ॥

शय्यासनाटनविकत्थनभोजनादि-
ष्वैक्याद्वयस्य ऋभुमानिति विप्रलब्धः ।

सख्युः सखेव पितृवत्तनयस्य सर्वं
सेहे महामहितया कुमतेरघं मे ॥ १९ ॥

प्रकाशिका— मया स्वापराधे कृतेऽपि न तस्य मनसि प्रत्युपकारबुद्धिर्मयि जातेत्याह ॥ शय्येति । विकत्थनं स्वगुणश्लाघनम् । शय्यादिष्वैक्यादव्यतिरेकात् । नियमेन सहभावाद्धेतोरसौ वयस्य इति मत्वा विप्रलब्धस्तिरस्कृतः । महात्मभिः शय्यादौ सहभाव एव तेषां तिरस्कार इति भावः । कीदृशोसौ । ऋभवो देवा अस्य सेवकाः सन्तीति ऋभुमान् । अनेन देवैरपि शय्यासनादौ सहभावो निषिद्धः किमु देवस्वामिना सहेति सूचयति । एवं मया तिरस्कृतोऽपि कुमतेरयं मम वयस्य इति कुत्सितबुद्धेर्मे मम सर्वमघं तिरस्काररूपमपराधं सेहेऽसहत । केन कारणेन महामहितया महान्महिमा यस्य स महामहिस्तस्य भावो महामहितातयेत्यर्थः । महामहित्वेनेति यावत् । अल्पक एव शापादिना प्रत्युपकारं करोति । अयं तु न तादृश इति भावः । तर्हि किमुपेक्षयैव सेहे न किन्तु स्नेहेनैवेत्याशयेन दृष्टान्तावाह । सख्युरघं सखव तनयस्य पुत्रस्याघं पितेवेति ॥ १९ ॥

सोऽहं नृपेन्द्ररहितः पुरुषोत्तमेन
सख्या प्रियेण सुहृदा हृदयेन शून्यः ।
अध्वन्युरुक्रमपरिग्रहमङ्ग रक्ष-
न्गोपैरसद्भिरबलेन विनिर्जितोऽस्मि ॥ २० ॥

प्रकाशिका— त्वया शङ्कितं नीचैः पराभवं च तद्वियोगेनैव प्राप्तोऽस्मीत्याह ॥ सोहमिति । प्रियेण देहादिभ्योऽप्यतिप्रियेण सुहृदाऽनिमित्तबन्धुना पुरुषोत्तमेन क्षराक्षरपुरुषावतीत्य वर्तमानेन सख्याऽनाद्यनन्तकाले सह वर्तमानेन श्रीकृष्णेन यस्माद्रहितोऽन्तर्हितरूपस्तस्माद्धृदयेन कर्तव्यकार्य-विषयकेनान्तःकरणेन शून्योऽस्मि । अत एव अङ्ग राजन् । उरुक्रमस्य श्रीकृष्णस्य परिग्रहं शताधिक षोडशसहस्रस्त्रीलक्षणमागमनसमये रक्षन् असद्भिर्नीचैरबलेव योषेव ॥ २० ॥

तद्वै धनुस्त इषवः स रथो हयास्ते
सोऽहं रथी नृपतयो यत आमनन्ति ।
सर्वं क्षणेन तदभूदसदीशरिक्तं
भस्मन्हुतं कुहकराद्धमिवोप्तमूषे ॥ २१ ॥

तात्पर्यम्— स रथो हयास्ते । तादृशा इत्यर्थः । त इषव इतीव । सदृशे वा प्रधाने वा कारणे वा तदित्ययम् । शब्दः सङ्घटते भेदे विद्यमानेऽपि तत्त्वत इति ब्रह्मतर्के । तद्रथहयानां दाहोक्तेः ॥ २१ ॥ इति प्रथमतात्पर्ये चतुर्दशोऽध्यायः ॥ १४ ॥

प्रकाशिका— श्रीकृष्णवियोगेनैवायं मम पराभवो नान्येनेत्येतदेव विशदयति ॥ तद्वै धनुरिति । अत्र सरथो हयास्त इति तच्छब्दाभ्यां युद्धकालीना एव रथा हयाः परामृश्यन्त इति प्रतीतिवारणाय तयोस्तच्छब्दयोरर्थं दर्शयति ॥ सरथ इति । तथा च स तादृशो रथस्ते तादृशा हया इत्येव व्याख्येयमिति भावः । ननु कुत एवं तच्छब्दयोः सादृश्यार्थत्वमित्यतोऽत्रैव सादृश्ये प्रयोगादित्याह ॥ त इषव इतीवेति । त इषव इत्यत्र युद्धकाले मुक्तानामिषूणां पुनरर्जुनं प्रत्यनागतत्वात्सादृश्यार्थत्वमेव वर्णनीयमिति भावः । तच्छब्दस्य सादृश्यार्थत्वे प्रमाणमपि दर्शयति ॥ सदृश इति । वा शब्दाः समुच्चयार्थाः । एषामुदाहरणं तत्त्वमसीत्यादिकम् । त्वं तत्सदृशस्तत्प्रधानकस्तत्कारणकश्चेन्यत्र व्याख्यातत्वात् । यद्वा । सादृश्ये प्रयोगः प्रकृते प्राधान्ये प्रयोगः । तं दुर्जयं शत्रुमसह्यवेगमरुन्तुदं तान्नविजित्य केचिदित्येकादशस्कंधे भिक्षुगीतायाम् । यथोक्तं तात्पर्ये । एकस्थानाधिपत्ये तु भिन्नानामपि युज्यते । अभेदेन परामर्शः सादृश्येनापि वस्तुनोरिति । कारणत्वे प्रयोगः । स एष भगवान्द्रोणः प्रज्ञारूपेण वर्तत इति । अस्मिन्नेव स्कन्धे सप्तमेऽध्याये । भेदे समभिव्याहृतपदार्थयोः । ननु कुत एवं व्याख्येयम् । प्रतीत एवार्थः किं न स्यादित्यतोऽत्र बाधकमाह ॥ तद्रथहयानामिति । युद्धसमाप्त्यनन्तरं युद्धकालीनस्य रथस्य हयानां च कर्णादिभिर्विमुक्तास्त्रतेजसा भारते दाहस्योक्तत्वादित्यर्थः । युद्धसमये कर्णादिभिरर्जुनरथदाहायास्त्राणि प्रयुक्तान्यपि कृष्णसंनिधानेन तत्समीपं प्राप्तानि युद्धानन्तरं श्रीकृष्णवियोगेन तद्रथादिकं तैरस्त्रैर्दग्धमिति हि भारती कथा ॥ ततश्चायं श्लोकार्थः ॥ धनुस्तद्वै तदेव । गाण्डीवस्याद्याप्यर्जुने सत्वात् । ते तत्सदृशा इषवो बाणाः । रथस्सस्तादृशः । हयास्ते तत्सदृशा रथी सोऽहं नान्यः । यतो यस्मै मह्यं तत्सर्वं धनुरादिकमीशेन श्रीकृष्णेन रिक्तमरक्षितं क्षणेनासत् कार्याक्षममभूत् । कथमिव । भस्मन् भस्मनि मन्त्रोच्चारणादिना हुतमिव । कुहकादैन्द्रजालिकान्मायाविनः पुरुषाद्प्राप्तं लब्धं तत्फलादि यथा कार्याक्षममविद्यमानत्वात् । तथैव । आद्यदृष्टान्ते मन्त्रोच्चारणजनितं किञ्चिन्त्पुण्यमस्त्यतो न सर्वथा वैयर्थ्यमित्यतो द्वितीयदृष्टान्तः । तत्रापि न सर्वथा वैयर्थ्यमैन्द्रजालिकाय तुष्टैः राजादिभिर्द्रव्यस्य दीयमानत्वादतोऽन्यदृष्टान्तमाह ऊषे ऊषरे भूप्रदेशे उप्तं बीजमिवेति । ऊषरे बीजावापो न सर्वथा कस्यापि कार्यक्षम इति भावः ॥ २१ ॥

राजंस्त्वयाभिपृष्टानां सुहृदां नः सुहृत्पुरे ।
विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः ॥ २२ ॥

प्रकाशिका— इदानीं कच्चिदानर्तपुर्यामित्यादिना पृष्टस्योत्तरमाह ॥ राजंस्त्वयेति । सुहृत्पुरेद्वारवत्यां त्वयाऽभिपृष्टानां नः सुहृदां मध्ये चत्वारः पञ्च वाऽवशेषिताः । तत्र हेतुः ॥ विप्रशापेत्यादि । ब्राह्मणशापेन विमूढानां कार्याकार्यमजानताम् ॥ २२ ॥

वारुणीं मदिरां पीत्वा मदोन्मथितचेतसाम् ।
अजानतामिवात्मानं चतुःपञ्चावशेषिताः ॥ २३ ॥

प्रकाशिका— वारुणीं वरुणनिर्मितां मदिरां मदजननीं सुरामात्मानं स्वात्मानमजानतामिव निघ्नन्तामित्यन्वयः । अवशेषिता अवशिष्टाः कृता इति ॥ २३ ॥

प्रायेणैतद्भगवतः ईश्वरस्य विचेष्टितम् ।
मिथो निघ्नन्ति भूतानि भावयन्ति च यन्मिथः ॥ २४ ॥

प्रकाशिका— श्रीकृष्णस्य यादवनाशने प्राधान्यमुक्तं तदेवोपपादयति ॥ प्रायेणेति प्राधान्येनेत्यर्थः । भूतानि मिथोऽन्योन्यं घ्नन्ति भावयन्त्युत्पादयन्ति । पालयन्ति चेति यत्तद्भगवत ईश्वरस्य पाधान्येन विचेष्टितं विचेष्टा । व्यापार इति यावत् । स एव तेषु स्थित्वा तत्कारयतीति भावः ॥ २४ ॥

जलौकसां जले यद्वन्महान्तोऽदन्त्यणीयसः ।
दुर्बलान्बलिनो राजन्महान्तो बलिनो मिथः ॥ २५ ॥

प्रकाशिका— यदुभिभूर्भारसंहर्तृत्वं च यादवसंहर्तृत्वं श्रीकृष्णस्यैवेत्येतद्दृष्टान्तमुखेनोपपादयति ॥ जलौकसामिति । जलचराणां मत्स्यादीनां मध्ये इत्यर्थः । यद्वद्यथा महान्तः स्थूला अदन्ति भक्षयन्त्यणीयसः सूक्ष्मान्ये महान्तो ये च बलिनस्तेऽपि मिथोऽदन्तीत्यर्थः ॥ २५ ॥

एवं बलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः ।
यदून्यदुभिरन्योन्यं भूभारं सञ्जहार ह ।
कण्टकं कण्टकेनैव द्वयञ्चापीशितुः समम् ॥ २६ ॥

प्रकाशिका— दार्ष्टान्तिकमाह ॥ एवमिति । इतरान्दुर्बलान् । सूक्ष्मांश्च । भूभारभूतान् । राज्ञ इति शेषः । सञ्जहारेत्यन्वयः । महान्तो बलिनो मिथ इत्यस्य दार्ष्टान्तिकमाह ॥ यदून्यदुभिरिति । हेत्यास्वादने । दृष्टान्तमाह ॥ कण्टकं कण्टकेनैवेति । यथा कण्टकं पादतललग्नं प्रबलेन कण्टकेन निष्कासयति तथा भूभारं भूमिभारभूतं राजमण्डलं प्रबलैः पाण्डवयादवभूतै राजन्यैरेव सञ्जहारेत्यर्थः । ननु स्वरक्षितं यदुकुलं कथं कृष्णो नाशितवानित्यत उक्तम् ॥ द्वयं चेति । यदुरक्षणं विनाशं चेति द्वयमित्यर्थः । ईशितुस्तत्कर्मानुसारेण फलप्रदस्येत्यर्थः । समम् । रक्षणेन न सुखं नाशनेन न दुःखमित्यर्थः । तत्तत्कर्मानुसारेणैव रक्षणं विनाशं वा करोति । न तेन तस्य प्राप्तव्यं किञ्चिदस्तीति भावः ॥ २६ ॥

देशकालार्थयुक्तानि हृत्तापोपशमानि च ।
हरन्ति स्मरतश्चित्तं गोविन्दाभिहितानि मे ॥ २७ ॥

प्रकाशिका— अतः परं वक्तुं न शक्तोऽस्मीति सूचयन्नाह ॥ देशकालेति । गोविन्दस्य श्रीकृष्णस्याभिहितानि वचनानि स्मरतो मे चित्तं हरन्त्यपहरन्ति । चित्तभ्रंशे न किञ्चिद्वक्तुं शक्यमिति भावः ॥ २७ ॥

सूत उवाच–
एवं चिन्तयतो जिष्णोः कृष्णपादसरोरुहम् ।
सौहार्देनातिगाढेन शान्ताऽऽसीद्विमला मतिः ॥ २८ ॥

॥ इति श्रीमद्भागवते प्रथमस्कन्धे चतुर्दशोऽध्यायः ॥

प्रकाशिका— एवं चिन्तयत इति सूतवाक्यम् । सौहार्देन स्नेहेन । भक्त्येति यावत् । मतिर्मननरूपा बुद्धिः । शान्ता सुखपूर्णाऽऽसीत् । विमल विषयरागादिरहिता । श्रीकृष्णगुणान् बुद्ध्याऽऽलोच्य परमानन्दमग्नो जात इति भावः ॥२८॥ इति श्रीभागवतटिप्पण्यां चतुर्दशोऽध्यायः ॥१-१४॥

अथ पञ्चदशोऽध्यायः

सूत उवाच–

वासुदेवाङ्घ्र्यभिध्यानपरिबृंहितरंहसा ।
भक्त्या निर्मथिताशेषकषायधिषणोऽर्जुनः ॥ १ ॥

तात्पर्यम्— ज्ञानिनां प्रारब्धस्यैव विनिर्मथनं योग्यस्य (स्यैव) । महता कारणेनैव प्रारब्धान्यपि कानिचित् । कर्माणि क्षयमायान्ति ब्रह्मदृष्टिमतः क्वचिदिति भविष्यत्पर्वणि । तेषामपि काम्यकर्मफलदृष्टेश्च ॥ १ ॥

गीतं भगवता ज्ञानं यत्तत्संग्राममूर्धनि ।
कालकर्मतमोरुद्धं पुनरध्यगमद्विभुः ॥ २ ॥

तात्पर्यम्— तम आदिनिरोधश्च प्रारब्धकर्मणैव । 'ज्ञानादिव्यक्तिरव्यक्तिः सुखदुःखादिकं तथा । सुदृष्टब्रह्मतत्त्वानां भवत्यारब्धकर्मणेति ब्रह्मवैवर्ते ॥ २ ॥

विशोको ब्रह्मसम्पत्या सञ्छिन्नद्वैतसंशयः ।
लीनप्रकृतिनैर्गुण्यादलिङ्गत्वादसंभवः ॥ ३ ॥

तात्पर्यम्— ब्रह्मसम्पत्तिरवगतिः । 'भगवन्तं विनाऽन्यत्र प्रवृत्त्यादिप्रकाशनम् । प्रारब्ध-कर्मणैव स्वात्कदाचिज्ज्ञानिनामपि । तां द्वैतदृष्टिं मे देव छिन्धि ज्ञानवरासिनेति ब्राह्मे । तदेव सञ्छिन्नद्वैतसंशयत्वम् । लीनप्रकृतित्वं नैर्गुण्यं च लीनप्रकृतिनैर्गुण्यम् । तस्मादसूक्ष्मशरीर-त्वादनारब्धकर्ममूलत्वात् । असम्भवः पुनरुत्पत्तिवर्जितः । ज्ञानोदयकाल एवैवम्भूतः सन्पुन-रध्यगच्छत् । प्रकृतिं स्वात्मसंश्लिष्टां गुणान्सत्वादिकानपि । कर्माणि सूक्ष्मदेहं च जायमाना हरेर्दृशिः । दहेदथापि सन्दग्धेन्धनवत्तत्पुनः पुनः । यावदारब्धकर्म स्यादाविर्वापि तिरो व्रजेदिति ब्रह्मतर्के ॥ ३ ॥

प्रकाशिका— मननोत्तरभाविनीमर्जुनस्यावस्थां दर्शयंस्तत्फलमाह ॥ वासुदेवेति । नन्वत्र निर्मथिताशेषकषायधिषण इतीदानीमर्जुनबुद्ध्याऽशेषकषायपदवाच्यकर्मक्षय उच्यते । न चेदं सम्भवति। अर्जुनस्यापरोक्षज्ञानित्वेन कर्मक्षयस्य पूर्वं ज्ञानोदयकाल एव जातत्वादतोऽस्याभि-प्रायमाह ॥ ज्ञानिनामिति । प्रारब्धस्यैव । नाप्रारब्धस्य । तस्य पूर्वमेव नष्टत्वादिति भावः । समुदायापेक्षयैकवचनम् । ननु प्रारब्धानामपि कथमिदानीमशेषाणां नाश इत्यत उक्तम् ॥ योग्यस्येति । नाशयोग्यस्य दुष्ट फलोत्कर्षद्वारेत्यर्थः । अयं भावः । नाभुक्तः क्षीयते कर्मेति वचना-त्प्रारब्धं सर्वम् । ज्ञानिभिर्भुज्यत एव । तथाऽप्यज्ञानिभिर्यथा निषिद्धं कर्म भुज्यते न तथा । अपि तु फलह्रासः । यथोक्तं पुरस्तात् । न वै जनो जातु कथञ्चनाव्रजेन्मुकुन्दसेव्यन्यवदङ्ग संसृतिमिति । एतादृशफलन्ह्रास एवोपमर्दं चेत्यत्रोक्तोपमर्दः । तदभिप्रायकमेवात्र कर्मनिर्मथनवचनमिति । तथा चा शेषकषायपदं सङ्कोचेन दुष्टकर्मफलोत्कर्षपरमिति सूचितं भवति । नन्वशेषस्य कुतः सङ्कोच इत्यतोऽत्र प्रमाणमाह ॥ महतेति । महता कारणेन । ज्ञानभक्त्याद्यभिवृद्धिरूपेण । कानिचिद्दुष्टानि प्रारब्धान्यपि कर्माणि भुज्यमानानि वस्तुत उत्कृष्टफलानि क्षयं कचित्फलोत्कर्षे आयान्तीत्यन्वयः । युक्तिं चाह ॥ तेषामपीति । ज्ञानिनामपीत्यर्थः । काम्यपदं निषिद्धस्याप्युपलक्षकम् । तथा च यदि ज्ञानिनामिदानीमशेषप्रारब्धक्षयः स्यात्तर्हीदानीं तेषां काम्यकर्मनिषिद्धफलस्योपलम्भो न स्यात् । वर्तते चासौ । तेन ज्ञायते नाशेषनाश इति । तत्रापि नाभुक्तं क्षीयत इति वचनात्प्रारब्धकर्म-नाशवचनार्थतया फलोत्कर्षनाश एव न सर्वथा कर्मनाश इत्यपि कल्पनीयमिति भावः । यथोक्तं सुधायाम् । ईषद्विनाशस्तु फलद्वारैवेति । यद्वा नाभुक्तं क्षीयते कर्म इति वचनात् प्रारब्धकर्मणां सर्वात्मना नाशाभाव एव किं न स्यादित्यत आह नामहता कारणेनेति । तत्रैव युक्तिमत्याह ॥ तेषामपीति ॥ अत्र काम्यकर्मवदेन ब्रह्महत्यादि कर्मफल क्षयसेगादि निवृत्यर्थाः प्रायश्चितविधयो

विवक्षिता: । तथा चायं भाव: । ब्रह्महा क्षयरोगीस्यादित्यादि स्मरणात् क्षयादिकं तावत् ब्रह्महत्यादेः फलम् । तत उत्पादितं क्षयादिकं ब्रह्महत्यादिप्रारब्धमेव । तस्य प्रारब्धकर्मफलस्य क्षयादेः प्रायाचित्तकरणेन निवृत्तिर्दृश्यते । तत्कथं प्रारब्धकर्मफलस्य सर्वथाप्यनुपमर्दः । अन्यथा प्रायश्चित्त वैय्यर्थयापत्तेरिति कालकर्मतमोरुद्धमित्यत्र कालतमसोरपि कर्मवत्स्वातन्त्र्येण ज्ञानरोधकत्वमुच्यत इति प्रतीयते । न च तत्सम्भवति । प्रारब्धकर्माभावे तयोः सत्वेऽपि ज्ञानव्यक्तिदर्शनादित्यतोऽत्र विवक्षितं तात्पर्यं दर्शयति ॥ तम आदिनिरोधश्चेति । तमसा कालेन वा जायमानो निरोध इत्यर्थः । च शब्दः प्रकृतत्वानुसन्धानार्थः । तथा चात्रोक्त इत्यर्थः । प्रारब्धकर्मणैव भवतीति शेषः । प्रारब्धकर्मणैव जायमाने निरोधे तमःकालयोरतिशयाधायकत्वमेव । न कर्मसमकक्षतया स्वातन्त्र्येण कारणत्वमित्यर्थः । मूले कालस्यादितया ग्रहणेऽपि अत्र तमस आदितया ग्रहणं कालापेक्षया तस्य प्राबल्यसूचनाय । अत्र प्रमाणमप्याह ॥ ज्ञानादीति । आदि पदेन भक्त्यादिग्रहणम् । सु सम्यग्दृष्टम् । ब्रह्मलक्षणं तत्त्वं यैस्तेषाम् । दैत्यदर्शनव्यावृत्त्यर्थं स्वित्युक्तम् ॥ आरब्धकर्मणेति । आरब्धकर्मणैवेत्यर्थः । पुण्यरूपेणारब्धकर्मणा ज्ञानादिव्यक्तिः सुखं च भवति । पापरूपेण तेनाव्यक्तिर्दुःखं च भवतीति विवेकः । ब्रह्मसम्पत्त्येत्यत्र ब्रह्मप्राप्त्यति प्रतीतिवारणाय सम्पत्तिशब्दार्थमाह ॥ ब्रह्मसम्पत्तिरिति । गत्यर्थानां ज्ञानार्थत्वाद्ब्रह्मप्राप्तेश्चेदानीमर्जुने बाधितत्वादिति भावः । अवगतिश्चापरोक्षैव विवक्षितेति द्रष्टव्यम् । संच्छिन्नद्वैतसंशय इत्यत्र द्वैतसंशयपदस्य भेदभ्रमपरत्वप्रतीतिनिरासाय विवक्षिततात्पर्यं प्रमाणोदाहरणपूर्वकमाह ॥ भगवन्तं विनेति । अन्यत्र विषयेषु प्रवृत्त्यादिकम् । आदिपदेन तज्जन्यसुखादिकं तेन सहितं प्रकाशनमनुभवः । ननु भगवत्पूजार्थत्वेन भगवद्व्याप्तत्वेन वा विषयेष्वनुभवः प्रवृत्त्यादिकं च गुण एवातः कथं तच्छेदप्रार्थनमित्यत उक्तम् ॥ भगवन्तं विनेति । तथा च भगवत्पूजाद्यनुपयुक्तकेवलविषयेषु प्रवृत्त्यादिकं निन्दितमेवेति तच्छेदप्रार्थनं युक्तमेवेति भावः । प्रकाशनमित्यनन्तरं द्वैतदृष्टिरिति शेषः । ज्ञानवरासिनेत्यपरोक्षज्ञानरूपोत्तमखड्गेनेत्यर्थः । जिज्ञासुवाक्यमिदम् ॥ तदेवेति । उदाहृतप्रमाणे यदुक्तं भगवदनुसन्धानशून्यविषयानुभवादिछेदनं तदेवेत्यर्थः । न तु भेदभ्रमच्छेदनरूपमित्येवार्थः । प्रमाणविरोधादिति भावः । लीनप्रकृतिनैर्गुण्यादित्येतल्लीनप्रकृतेर्यन्नैर्गुण्यं तस्मादित्यन्यथाप्रतीतिवारणाय व्याचष्टे ॥ लीनप्रकृतित्वमिति । तथा च लीनप्रकृतिरित्यत्र भावप्रधानो निर्देशः । लीनप्रकृतित्वेन सहितम् नैर्गुण्यं तस्मादिति मध्यमपदलोपी समास इति सूचितं भवति । द्वन्द्वैकवद्भावो वा । अलिङ्गत्वादित्येतदप्रतीत्या व्याख्याति । असूक्ष्मशरीरत्वादिति । तथा च लिङ्गपदं सूक्ष्मलिङ्गशरीरपरमिति भावः । असम्भव इत्यस्य पुनरुत्पत्तिराहित्यार्थत्वं बाधितं प्रारब्धनिमित्तोत्पत्तेरर्जुने ब्रह्मप्रलयपर्यन्तं सत्वादतोऽस्याभिप्रायमाह ॥ अनारब्धेति । अनारब्धकर्मणां ज्ञानोदयेनैव नष्टत्वात्तन्निमित्तोत्पत्त्यभाव

एवात्र विशेषणाभावप्रयुक्तविशिष्टाभावाभिप्रायेणसम्भव शब्दार्थतयोच्यते । न तूत्पत्तिसामान्याभाव इति भावः । भगवता गीतं ज्ञानं पुनरध्यगमदित्युक्त्वानन्तरं ब्रह्मसम्पत्त्या संच्छिन्नद्वैतसंशयादि-त्वादेरुक्तत्वेनार्जुनस्येदानीमेवेत्थं भावो जात इति प्रतीयते । अतोऽभिप्रायमाह ।। ज्ञानोदयकाल एवेति । एवं भूतः संच्छिन्नद्वैतसंशयादित्वं प्राप्तः । एवं भूतः सन् पुनरप्यध्यगच्छदित्यन्वयप्रदर्शनेन मूले उक्तरीत्या यथास्थितोऽन्वयो न ग्राह्य इति सूचयति । कुत इत्यतोऽत्र प्रमाणं दर्शयति ।। प्रकृतिमिति । जगदुपादानभूतमूलप्रकृतेर्नित्यत्वेन दाहासम्भवादाह ।। स्वात्मसंश्लिष्टमिति । तथा चेयं स्वगुणाच्छादिकादिरूपा दुष्टप्रकृतिरेव विवक्षितेति भावः । सत्त्वादिकान् गुणानपीत्युक्त्या सत्त्वादिगुणरूपा जडप्रकृतिरपि जीवस्वरूपाच्छादिकाऽस्तीति सूचयति । अनेन लीनप्रकृति-नैर्गुण्यादित्येतदुक्तार्थम् । कर्माण्यनारब्धानि । सूक्ष्मदेहं लिङ्गशरीरम् । अनेनालिङ्गत्वादि-त्येतदुक्ततात्पर्यम् । तद्दग्धं प्रकृत्यादिकम् । दुष्टप्रारब्धबलेनाविर्भवेत् । पुनः स्वकार्यक्षमं भवेदित्यर्थः। अनेन कालकर्मतमोरुद्धमित्येतदुक्ततात्पर्यम् । तिरो वा भवेत् । पुनः स्वकार्यक्षमं न भवेदित्यर्थः । ज्ञानव्यक्त्येति शेषः । अनेन पुनरध्यगमत्ततश्च विशोको जात इत्येतदुक्तार्थम् ।। ततश्चायं श्लोकार्थः ।। अभिध्यानं सम्यग्ध्यानम् । तेन परिबृंहितमभिवृद्धं रंहो वेगो यस्याः सा तया । भक्त्या जातया ब्रह्मसम्पत्त्या । इमं ब्रह्मकल्पमारभ्य विंशतिकल्पेभ्यः पूर्वमुत्पन्नया ब्रह्मापरोक्षावगत्या सञ्छिन्नः सम्यक् छिन्नो दग्धो द्वैतस्य द्वितीयस्य भगवद् ज्ञानानुकूलविषयजातस्य संशयोनुभवः । उप-लक्षणमेतत् । प्रकृत्त्यादिकं च यस्य स तथोक्तः । उत्तरत्रानुवादादत्र लीनप्रकृतिनिर्गुणलिङ्गोऽकर्मा च जात इत्यपि वक्तव्यम् । पुनः कथं भूतः । असम्भवोऽज्ञानिवदप्रारब्धनिमित्तोत्पत्तिशून्यः । अत्र हेतुकथनाय लीनप्रकृतीत्यादिकम् । भावप्रधानो निर्देशः । लीना दग्धा प्रकृतिः स्वगुणाच्छादि-कादिरूपा यस्य स तथोक्तस्तस्य भावो लीनप्रकृतित्वं च निर्गता गुणाः सत्त्वाद्या यस्मात्स निर्गुणस्तस्य भावो नैर्गुण्यं च तस्मात् । द्वन्द्वैकवद्भावः । अलिङ्गत्वात् दग्धसूक्ष्मलिङ्गशरीरत्वात् । उपलक्षणमेतत् । दग्धप्रारब्धकर्मत्वाच्चेत्यपि द्रष्टव्यम् । पुनः कथं भूतः । निर्मथिताशेषकषायधिषणो नितरां मथिता नाशिता अशेषकषाया दुष्टप्रारब्धकलोत्कर्षा यस्याः सामर्थ्यात्सा धिषणा ब्रह्मापरोक्षबुद्धिर्यस्य स तथोक्तः । ज्ञानस्य सामर्थ्येन नाशितदुष्टप्रारब्धफलोत्कर्ष इति यावत् । ज्ञानोत्पत्तिकालमारभ्यैवं भूतोऽर्जुनो भगवता श्रीकृष्णेन सङ्ग्राममूर्धनि सङ्ग्रामस्यादौ गीतोपदेशेन यत्ज्ञानं गीतमुत्पादितं तत्कालकर्मतमोरुद्धं दुष्टप्रारब्धोपोद्बलितेन द्वापरान्त्यादिरूपकालेन दग्धेन्ध-नसदृशेन तमोगुणेन च रुद्धमव्यक्तं पुनरध्यगमत्प्रारब्धपुण्येन व्यक्तीचकार । ततो विशोको बन्धुमरणादिजन्यशोकशून्यो जात इति ।। ३ ।।

निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च ।
स्वःपथाय मतिं चक्रे निवृत्तात्मा युधिष्ठिरः ।। ४ ।।

प्रकाशिका— भगवन्मार्गं श्रीकृष्णस्यस्वधामगमनप्रकारम् । संस्थां नाशम् । निवृत्तात्मा राज्यादिभोगव्यावृत्तमनाः । स्वःपथाय स्वर्गमार्गाय ॥ ४ ॥

यदा मुकुन्दो भगवानिमां महीं
जहौ स्वतन्वा श्रवणीयसत्कथः ।
तदा हरावप्रतिबुद्धचेतसा-
मभद्रहेतुः कलिरन्ववर्तत ॥ ५ ॥

प्रकाशिका— स्वर्याननिर्याणं राजा कस्मात्कृतवानित्यत आह ॥ यदेति । स्वतन्वा स्वरूपभूतमूर्त्या । हरौ विषये । प्रतिबुद्धं जाग्रत् । न प्रतिबुद्धमप्रतिबुद्धं तादृशं चेतो येषां ते तथा तेषाम् । अभद्राणां पापानां हेतुः अन्ववर्तत स्वेच्छानुसारेण प्रवर्तितवान् ॥ ५ ॥

युधिष्ठिरस्तत्परिसर्पणं बुधः पुरे च राष्ट्रे च गृहे तथात्मनि ।
विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्यधात् ॥ ६ ॥

प्रकाशिका— बुधो विवेकज्ञो युधिष्ठिरस्तस्य कलेः परिसर्पणं प्रसर्पणम् । व्याप्तिमिति यावत् । विभाव्य ज्ञात्वा । कथंभूतम् । लोभाद्यधर्मचक्रं समूहो यस्मात्तत् । जिम्हं कौटिल्यम् । गमनाय स्वर्गं प्रति गमनाय । पर्यधान्निश्चितवान् प्रणिधानं तु निक्षेपः परिधानं तु निश्चय इत्यभिधानात् ॥ ६ ॥

स्वराट् पौत्रं विनीतन्तमात्मनोऽनवमं गुणैः ।
तोयनीव्याः पतिं भूमेरभ्यषिञ्चद्गजाह्वये ॥ ७ ॥

तात्पर्यम्— पौत्रत्वे योग्यत्वमनवमत्वम् । इन्द्राद्युत्तमताऽन्येषां समता वा स्वके कुले । उत्तमत्वमुपास्त्यादि योग्यता वा निगद्यत इति ब्रह्मतर्के ॥ ७ ॥

प्रकाशिका— स्वराट् चक्रवर्ती । आत्मनः स्वस्य गुणैरनवमं विनीतं विनयवन्तम् । पौत्रमभिमन्युसुतम् । तोयं सर्वतः स्थितं समुद्रोदकं नीवी परिधानविशेषो यस्यास्तस्या भूमेः पतिं पतित्वेनाभ्यषिञ्चदभिषिक्तवान् । अत्र स्वस्य गुणैरनवममित्येतद्बाधितार्थकम् । परीक्षितः क्षितिपतित्वेन देवोत्तमापेक्षयाऽतिनीचत्वादतोऽत्र विवक्षितं तात्पर्यमाह ॥ पौत्रत्व इति । तथा चात्मनो देवावतारस्य स्वस्य गुणैः पौत्रत्वयोग्यतापादकैर्धर्मैर्हर्युपास्त्यादिरूपैरनवममनवरं पूर्णम् । तद्योग्यमिति यावत् । इति व्याख्येयमिति भावः । अत्र प्रमाणमाह ॥ इन्द्राद्युत्तमतेति । मानुषादावुत्पन्नानामिन्द्राद्यपेक्षयोत्तमता समता वा । अन्येषां तत्कुलप्रसूतानां नीचानाम् । यद्युच्यत इति शेषः ।

तदा स्वके कुले । अत्र स्वशब्दः पूर्वोक्तनीचपरः । स्वसम्बन्धिकुलमध्ये य इन्द्रादिः स्वकुले जातोऽस्ति तं परित्यज्येतरकुलापेक्षया हर्युपास्त्यादियोग्यताया उत्तमत्वं यत्तत्पौत्रत्वयोग्यतापादकगुणरूपं तदेव तत्र निगद्यते तात्पर्यतः प्रतिपाद्यते । ननु तत्रोत्पन्नदेवापेक्षयोत्तमत्वं समत्वञ्चेत्यर्थः । उत्तमत्वमुपास्त्यादियोग्यताया इत्येव पाठः स्वरस इति प्रतिभाति । उपास्त्यादियोग्यता वेति पाठे वाशब्दोऽवधारणार्थः । तथा च स्वके कुले देवेतरस्वकुलीनापेक्षया हर्युपास्त्यादियोग्यता सप्तम्यर्थे प्रथमा । तद्विषये उत्तमत्वमेव निगद्यत इति व्याख्येयम् ॥ ७ ॥

मधुरायां ततो वज्रं शूरसेनपतिं ततः ।
प्राजापत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः ॥ ८ ॥

प्रकाशिका— मूले वज्रम् अनिरुद्धस्य सुतम् । अभ्यषिञ्चदित्यस्यानुकर्षणार्थस्तथाशब्दः । प्राजापत्यां प्रजापतिर्दैवेत्याम् । निरूप्य कृत्वा । अग्नीन् गार्हपत्यादीन् । अपिबदात्मन्यारोपयामास । ईश्वरः । क्षितेरिति शेषः । राज्यं परित्यज्य गमने समर्थ इति वा ॥ ८ ॥

विसृज्य तत्र तत्सर्वं दुकूलवलयादिकम् ।
निर्ममो निरहङ्कारः सञ्छिन्नाशेषबन्धनः ॥ ९ ॥

प्रकाशिका— सञ्छिन्नान्यशेषाणि बन्धनानि विषयस्नेहरूपाणि येन सः ॥ ९ ॥

वाचं जुहाव मनसि तत्प्राण इतरे परम् ।
धृत्या ह्यपानं सोत्सर्गं तत्परत्वे ह्यजोहवीत् ॥ १० ॥

त्रित्वे हुत्वाऽथ पञ्चत्वं तच्चैकत्वेऽजुहोन्मुनिः ।
सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये ॥ ११ ॥

तात्पर्यम्— प्राणमपाने तं व्याने । समानोदानौ तेषु । तांश्च मूलप्राणे । आत्मा हृदिस्थो विष्णुः । ब्रह्म सर्वगतम् । उमावागात्मिका रुद्राज्जाता सा मन आत्मनः । प्राणाह्वयात्स वायोश्च सोऽपानादात्मरूपतः । स्वरूपादेव स व्यानादुदानो व्यानतस्तथा । तस्मात्समानो व्यानाच्चाप्यपानः प्राण एव च ॥ अपानात्तिसृभिश्चापि समानोदानयोर्जनिः । त्रयाणामथ पञ्चानामनाद्वा प्राणतो भवः ॥ एकस्यैव स्वरूपाणि प्राणस्यैतानि पञ्च च । स च प्राणो हरेर्जातो हृदिस्थादात्मनो मतः । स आत्मा ब्रह्मणो जातो विश्वरूपाज्जनार्दनात् । एतेषां ब्रह्मपर्यन्तं विलयोत्पत्तिचिन्तनम् । ब्रह्मयज्ञ इति प्रोक्तः सर्वसंसारमोचक इति नारायणाध्यात्मे ।

अस्यास्मिन्विलयो भवतीत्येवं विज्ञानमाहुतिः । न तु तत्कालविलयस्त्वन्यो वा तस्य दर्शनादि'-ति ब्रह्मतर्के ॥ १०, ११ ॥

प्रकाशिका— श्रुत्यादौ मरणकाले चिन्तनीयतयोक्तं यद्वागादिलयादिकं तत्तेन चिन्तितमित्याह ॥ वाचमिति । इदं श्लोकद्वयं दुर्गमार्थत्वाद्व्याख्याति ॥ प्राणमिति । इतरे परमित्यस्यार्थः ॥ अपापेन प्राणमिति । तमपानं व्यान इत्यनेनापानं तत्परत्वे इत्येतद्विवृतम् । तस्मादपानात्परत्वे । धर्मिप्रधानो निर्देशः । परे व्यान इति । त्रित्वे हुत्वा । अथेत्यस्य व्याख्यानं तेषु प्राणापानव्यानेषु समानोदानाविति । अनेन त्रित्वेति भवितृप्रधानो निर्देशः । उक्तेषु त्रिष्वित्यर्थः । अथानन्तरं विद्यमानौ समानोदानाविति । अथ शब्दार्थतया समानोदानौ ग्राह्याविति सूचयति । तच्च पञ्चत्वमेकत्वे इत्यस्य विवरणम् ॥ तांश्च मूलप्राण इति । अत्रापि पञ्चत्वैकत्व शब्दौ भवितृप्रधानौ । एवं च तांश्च मुख्यप्राणावतारभूतान् पञ्चप्राणादीन् एकस्मिन्मूलप्राणे मूलरूपे मुख्यप्राण इत्यर्थ इति भावः । सर्वमात्मनीत्युक्तमात्मशब्दार्थं दर्शयति ॥ आत्मेति । तथा च सर्वेषामात्मनि हृदि स्थिते विष्णौ मूलप्राणमित्यध्याहृत्य व्याख्येयमिति भावः । ब्रह्मण्यात्मानमित्यत्र ब्रह्मशब्दविवक्षितमर्थं दर्शयति ॥ ब्रह्मेति । सर्वगतं व्याप्तम् । तथा चात्मानं हृदि स्थितं विष्णुं ब्रह्मणि व्याप्ते हराविति व्याख्येयमिति भावः । ननु यस्माद्यो जातः स तत्र लीयत इति हि सिद्धान्तः । अत्र च वागादेर्मनआदिजातत्वे भवेत्तेषां तत्र लयस्तदेव कुत इत्याशङ्कां परिहर्तुं वागादेर्मनआदिजातत्वे प्रमाणं दर्शयति ॥ उमेति । जडचिन्तनस्याप्रयोजनत्वात्तदभिमानिदेवताजन्मादिचिन्तनमेव मुमुक्षुणा कार्यमित्यभिप्रेत्योमादीनां ग्रहणम् । जातेत्यादावतस्तत्र लीयत इति लयोऽपि ग्राह्यः । वागात्मिका वागाभिमानिनी वाक्शब्द-वाच्या च । एवं मन आत्मनो रुद्रादित्येतदपि व्याख्येयम् । प्राणाह्वयाद्वायोर्मुख्यवायोः सकाशाद्रुद्रो जातस्तत्र लीयते च । एवमग्रेऽपि । आत्मरूपतः स्वस्वरूपतोऽपानात् । प्राणः सोऽपानः । अत्र सोऽपानादात्मरूपत इत्यादिना प्राणादीनामपानजातत्वोक्त्या मूले च शब्देन सूचिता ग्रन्थान्तरोक्ताः प्राणादीनामपानादौ लयचिन्तनप्रकारा उपपादिता इति ज्ञातव्यम् । अत्र प्रकारद्वयम् । व्यानादपान-स्यापानाच्च प्राणस्य जातत्वोक्त्या प्राणस्यापानेऽपानस्य व्याने लय इत्येकः प्रकारः । व्यानादुदा-नस्योदानात्समानस्य जन्मोक्त्या समानस्योदाने उदानस्य व्याने लय इत्यपर इति । प्रकारान्तरमप्याह ॥ व्यानाद्वेति । तथा चात्र व्यानात्समानस्याप्युत्पत्तिकथनेन व्याने समानोदानयोर्लय उक्त इति ज्ञातव्यम् । अन्यमपि प्रकारमाह ॥ अपानः प्राण एव चापानादिति । अपानादेवापानः प्राणश्चेतीमौ जातौ तस्मादपाने एव तौ लीयेते इति । त्रित्वे हुत्वाऽथेत्यस्योपपादनम् ॥ तिसृभिरिति । प्राणापान-व्यानाख्याभिस्तिसृभिः । मूर्तिभिरिति शेषः । अथेत्यनुवादेन समानोदानयोरिति व्याख्यानम् । अतः समानोदानौ तासु लीयेते इति भावः । ग्रन्थान्तरोक्तं प्रकारान्तरमाह ॥ त्रयाणामिति ।

प्राणापानव्यानानामनाह्वयान्मुख्यवायुनामकान्मूलरूपात्प्राणभवोऽतस्तत्रैव लय इति । तत्पञ्चकत्वमेकत्व इत्येतदुपपादयति ॥ पञ्चानामिति । प्राणादीनां पञ्चानां मूलरूपात्प्राणतो भवोऽतस्तत्रैव लयश्चिन्तनीय इति । एवं जन्यजनकभावेन भेदशङ्कायामाह ॥ एकस्यैवेति । तथाऽपि रूपभेदेन । जन्यजनकभावोपपत्तिरिति शेषः । चशब्देन त्रयाणां ग्रहणम् । सर्वमात्मनीत्यस्योपपादनम् ॥ स चेति । ब्रह्मण्यमात्मानमित्येतदुपपादनायाह ॥ स आत्मेति । जातो व्यक्तः । विश्वरूपात्सर्वत्र व्याप्तरूपादित्यर्थः । एवं चिन्तनस्य फलमाह ॥ एतेषामिति । वागादिब्रह्मपर्यन्तानामित्यर्थः । ननूक्तविलयस्य युधिष्ठिरचिन्तनकालेऽजातत्वात्कथमविद्यमानचिन्तनेन फलमुक्तमित्याशङ्कां प्रमाणेनैव परिहरति ॥ अस्यास्मिन्निति । विलयः सर्पदेहे प्रविष्टस्य भेकादेरिव । आहुतिर्होमस्तच्छब्दार्थ इत्यर्थः । अन्यो देवतामुद्दिश्य वन्हौ प्रक्षेपरूपः । कुत इत्यत आह ॥ तस्येति । तस्य वागादिब्रह्मपर्यन्तस्य युधिष्ठिरचिन्तनानन्तरमपि दर्शनादित्यर्थः । अतो वागादेर्मन आदावध्यात्मं मरणकालेऽधिदैवं प्रलयकाले भाविविलयविज्ञानमेवात्रोच्यमानहोमशब्दार्थ इति भावः ॥ ततश्चायं वाचं जुहावेत्यादि श्लोकद्वयार्थः । वाचं वागभिमानिनीमुमां मनसि तज्जनकमनोऽभिमानिरुद्रे जुहाव । तत्र भाविलयं चिन्तितवान् । तन्मनस्तदभिमानिनं रुद्रं तज्जनके प्राणे प्राणवृत्तिप्रेरके मुख्यप्राणावतारे । जुहावेत्यत्रोत्तरत्र सम्बध्यते । परपरापेक्षया पश्चाद्भाविनं प्राणं तज्जनके इतरे इतरस्मिन्नपाने । धृत्या मनोधैर्येण । एकाग्रतयेति यावत् । सोत्सर्गमुत्सर्गरूपवृत्तिसहितमपानम् । एवं वागादिष्वपि तत्तद्वृत्तिसाहित्यं ज्ञेयम् । तत्परत्वे । धर्मिप्रधानो निर्देशः । तत्पूर्वभाविनि तज्जनके व्यानेऽजोहवीत् । तस्य तत्र भाविलयं चिन्तितवान् । हिशब्दद्वयं प्रमाणप्रसिद्धिद्योतकम् । अथानन्तरं विद्यमानावुदानसमानौ । त्रित्वे । अत्रापि धर्मिप्रधानो निर्देशः । त्रिषु तदुभयजनकेषु प्राणापानव्यानेषु हुत्वा भाविलयं विचिन्त्य तत्पञ्चत्वं प्राणादिपञ्चकमेकत्वे एतज्जनकप्राणनामकमुख्यवायुं मूलरूपेऽजुहोत् भाविलयं चिन्तितवान् । मुनिर्मौनी । सर्वमुक्तरीत्या सर्वेषां कारणं मूलप्राणमात्मनि तज्जनके हृदि स्थिते विष्णावजुहोत् । आत्मानं हृदि स्थितं विष्णुरूपम् । अव्ययेऽन्यत्राचिन्तनीयलये तदभिव्यक्तिकारणे ब्रह्मणि परिपूर्णेऽजुहोत् । ऐक्यं चिन्तितवानिति ॥ १०, ११ ॥

चीरवासा निराहारो बद्धवाङ्मुखमूर्धजः ।
दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत् ।
अनपेक्षमाणो निरगादशृण्वन्बधिरो यथा ॥ १२ ॥

प्रकाशिका— एवमान्तरस्थितिमुक्त्वा बाह्यस्थितिमाह । एवं मातरिश्वस्थितिमुक्त्वा ब्राह्यस्थितिमाह ॥ चीरवासा वल्कलवस्त्रो बद्धवाङ्मौनी । अत एवानपेक्षमाणः । कस्यचिदाज्ञामिति शेषः । निरगात् । गेहादिति शेषः । बधिरो यथा तथा । अशृण्वन् ॥ १२ ॥

उदीचीं प्रविवेशाशां गतपूर्वां महात्मभिः ।
हृदि ब्रह्मपरं ध्यायन्नावर्तेत गतो यतः ॥ १३ ॥

तात्पर्यम्— नावर्तेत वीरगतिम् ॥ १३ ॥

प्रकाशिका— उदीचीमाशामुत्तरदिक्स्थितं मार्गम् । यतो मार्गाद्गतो नावर्तेत । अत्रोदीचीदिग्गमनमात्रेण मुक्तिरुच्यत इति प्रतीतिनिरासाय तात्पर्यमाह ॥ नावर्तेतेति । नावर्तेत यतो गत इत्यनेन वीरगतिं वीराणां शरीरपातपर्यन्तं गमनमेव कार्यं न पुनरागमनमिति निश्चयवतां धीराणां गतिर्गमनं यस्मिन्नध्वन्यसौ वीरगतिस्तं वीराध्वानं गत इत्येवोच्यते न त्वपुनरावृत्तिरूपा मुक्तिरित्यर्थः । तथा च यतो मार्गाद्गतो नावर्तेत पुनर्गृहं प्रति प्रत्यावर्तनं न कुर्यात्तामुदीचीं दिशं तमुत्तरदिक्स्थितं मार्गं वीराध्वसंज्ञं प्रविवेशेति मूलं योज्यमिति भावः ॥ १३ ॥

सर्वे तमनु निर्जग्मुर्भ्रातरः कृतनिश्चयाः ।
कलिनाऽधर्ममिश्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि ॥ १४ ॥

प्रकाशिका— अधर्ममिश्रणाधर्मप्रधानेन ॥ १४ ॥

ते साधुकृतसर्वार्थाः ज्ञात्वाऽऽत्यन्तिकमात्मनः ।
मनसा धारयामासुर्वैकुण्ठचरणाम्बुजम् ॥ १५ ॥

तात्पर्यम्— आत्मनः स्वरूपमात्यन्तिकं ज्ञात्वा ॥ १५ ॥ इति पञ्चदशोऽध्यायः ॥ १५ ॥

प्रकाशिका— साधु सम्यक् कृताः सम्पादिताः सर्वेऽर्थाः पुरुषार्था धर्मादयो यैस्ते साधुकृतसर्वार्थाः । आत्मन आत्यन्तिकमित्यस्य विशेषमध्याहृत्य योजयति ॥ आत्मनः स्वरूपमिति । तथा चात्मनः परमात्मनः । परमात्मस्वरूपमात्यन्तिकमत्यन्तश्रेयःसाधनं ज्ञात्वा वैकुण्ठचरणाम्बुजमाराधयामासुरित्यन्वय इति भावः ॥ १५ ॥

तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणाः परे ।
तस्मिन्नारायणपद एकान्तमतयोऽपतन् ॥ १६ ॥

प्रकाशिका— परे सर्वोत्तमेऽपतन् । शरीराणि तत्यजुः ॥ १६ ॥

अवापुर्दुरवापन्ते असद्भिर्विषयात्मभिः ।
विधूतकल्मषस्थानं विरजेनात्मनैव हि ॥ १७ ॥

प्रकाशिका— विषयात्मभिर्विषयासक्तमनस्कैः । दुरवापमाप्तुमशक्यं स्थानं स्वमूलरूपं स्थानं विरजेन विगतदोषेणात्मना मनसैव । अवधारणं मनसः प्रधानसाधनत्वद्योतनाय । हि शब्दः प्रमाण-प्रसिद्धिद्योतकः ॥ १७ ॥

द्रौपदी च तदाज्ञाय पतीनामनपेक्षताम् ।
वासुदेवे भगवति एकान्तमतिरापतत् ॥ १८ ॥

प्रकाशिका— अनपेक्षितां देहाद्यनभिमानिनाम् । एकान्तमतिस्तारतम्यान्तर्गतत्वेन ज्ञानमती । अत्र क्रमो न विवक्षितः । भारते द्रौपदीदेहस्यादावेव पातोक्तेः ॥ १८ ॥

यः श्रद्धयैतद्भगवत्प्रयाणं पाण्डोः सुतानामपि संप्रयाणम् ।
शृणोत्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति शान्तिम् ॥ १९ ॥

॥ इति श्रीमद्भागवते प्रथमस्कन्धे पञ्चदशोऽध्यायः ॥

प्रकाशिका— उक्तकथाश्रवणफलमाह ॥ य इति । अलं मनःशुद्ध्याद्यतिशयेन स्वस्त्ययनं मङ्गलास्पदम् । शान्तिं मुक्तिम् ॥ १९ ॥ इति श्रीभागवतटिप्पण्यां पञ्चदशोऽध्यायः ॥ १-१५ ॥

अथ षोडशोऽध्यायः

सूत उवाच–

ततः परीक्षिद् द्विजवर्यशिक्षया महीं महाभागवतः शशास ह ।
यथा हि सूत्यामभिजातकोविदाः समादिशन्विप्रमहद्गुणांस्तथा ॥ १ ॥

प्रकाशिका— अत्र भगवति भक्ति विधानार्थं भगवद्भक्तवशीक्षितः कलिबन्धनादि माहात्म्य वर्णनेन हरिमहिमैव प्रतिपाद्यत इति तन्महिमा प्रतिपाद्यतेऽस्मिन्नध्याये द्विजवर्याणां ब्राह्मणोत्तमानां कृपादीनां शिक्षया सद्विद्योपदेशेन । तदुक्तप्रकारेणेति यावत् । सूत्यामुत्पत्तिकाले । अभिजातस्योत्पन्नस्य प्राणिनो भाविकर्तव्यज्ञाने कोविदाः कुशला ब्राह्मणा महतामिक्ष्वाकुप्रभृतीनां गुणान् प्रजावनादीन् । हे विप्र । समादिशन्निरूपितवन्तः ॥ १ ॥

स उत्तरस्य तनयामुपयम इरावतीम् ।
जनमेजयादींश्चतुरस्तस्यामुत्पादयत्सुतान् ॥ २ ॥

प्रकाशिका— तथा तदुक्तप्रकारेणोत्तरस्य विराट्पुत्रस्य । नाम्नेरावतीम् ॥ २ ॥

आजहाराश्वमेधांस्त्रीन्गङ्गायां भूरिदक्षिणान् ।
शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः ॥ ३ ॥

प्रकाशिका— आजहार कृतवान् । शारद्वतं कृपम् । यत्र येष्वश्वमेधेषु ॥ ३ ॥

निजग्राहौजसा धीरः कलिं दिग्विजये क्वचित् ।
नृपलिङ्गधरं शूद्रं घ्नन्तं गोमिथुनं पदा ॥ ४ ॥

प्रकाशिका— ओजसा स्वाभाविकसामर्थ्येन । निजग्राहि निगृहीतवान् । दिग्विजसमये क्वचित् । एकान्तदेशे । कथंभूतं कलिम् । नृपाणां यानि लिङ्गानि छत्रचामरादीनि तानि धारयतीति नृपलिङ्गधरस्तम् । कर्मणा शूद्रवत् । एतदेवाह । पदा पादेन गोमिथुनं गां वृषं चे न्ति द्वयं घ्नन्तं ताडयन्तम् ॥ ४ ॥

शौनक उवाच–

कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः ।
नृदेवचिह्नधृक् शूद्रः कोऽसौ गां यः पदाऽहनत् ॥ ५ ॥

तात्पर्यम्— कोऽसावित्याक्षेपः । कलिमित्युक्तत्वात् ॥ ५ ॥

प्रकाशिका— कोऽसाविति किंशब्दः प्रश्नार्थ इति भात्यतोऽस्यार्थमाह ॥ कोऽसाविति । तथा च यः शूद्रो गां पदाऽहनदहन् । असौ कः सज्जनो न कोऽपि किन्तु कः कुत्सित एवेति मूलं योज्यमिति भावः । प्रश्नार्थ एव किं न स्यादित्यत आह ॥ कलिमिति । ज्ञातेऽर्थे प्रश्नायोगादिति भावः ॥ ५ ॥

तत्कथ्यतां महाभाग यदि विष्णुकथाश्रयम् ।
अथ वाऽस्य पदाम्भोजमकरन्दलिहां सताम् ॥ ६ ॥

तात्पर्यम्— अथेति पक्षान्तरे वा यदि ॥ ६ ॥

किमन्यैरसदालापैरायुषो पदसद्व्ययः ।
क्षुद्रायुषां नृणामङ्ग मर्त्यानां मृतिमिच्छताम् ॥ ७ ॥

तात्पर्यम्— अन्यथा चेदायुषो सद्व्यय इत्यर्थः । यद्यर्थे च विकल्पार्थे वाशब्दः समुदीर्यत इति नाममहोदधौ ॥ ७ ॥

प्रकाशिका— अथवेति निपातसमुदायस्य पक्षान्तरद्योतकत्वेऽपेक्षितस्य यदीत्यस्याध्याहारप्रसङ्गः। अतो व्याख्याति ॥ अथेतीति । अथेति शब्दः पक्षान्तरेऽर्थान्तरविषये । वर्तत इति शेषः । वा शब्दो यदिशब्दसमानार्थक इत्यर्थः । तथा चाथ पक्षान्तरमस्य विष्णोः पदाम्भोजयोर्यो मकरन्दो मकरन्द-स्थानीयः सौन्दर्यविशेषस्तं लिहन्त्यास्वादयन्ति तेषां सतां हरिभक्तानाम् । यदि कथाश्रयमित्यस्य बुद्ध्या विविक्तस्यानुषङ्गस्तर्हि कथ्यताम् । चरितं वैष्णवानां तु विष्णूद्रेकाय कथ्यत इति वचनात् । तत्कथाकथनस्यापि विष्णुमाहात्म्यज्ञानसाधनत्वादिति मूलं योज्यमिति भावः ॥ किमन्यैरित्यस्य पूर्वेण सङ्गत्यप्रतीतेरपेक्षितमध्याहृत्य योजयति ॥ अन्यथा चेदिति । तथा च विष्णुवैष्णवकथाश्रयं न चेदन्यैर्विष्णुवैष्णवव्यतिरिक्तविषयैरत एवा सदालापैरमङ्गलालापैः किं न किमपि प्रयोजनम् । प्रत्युत यद्यस्मादायुषोऽसद्व्ययः । असतोऽमङ्गलस्य नरकादेः साधनायैव व्ययो नाशनम् । अतः किं तैरिति मूलं योज्यमिति भावः । वाशब्दस्य यद्यर्थत्वे प्रमाणं दर्शयति ॥ यद्यर्थे चेति । ननु मरणशङ्काग्रस्तानां युष्माकं मया कथं तत्कथनीयमित्यत आह ॥ क्षुद्रायुषामिति । क्षुद्रमल्पमायुर्येषां ते तथा तेषाम् । मर्त्यानां मरणशीलानाम् । तथाऽपि ऋतं ज्ञानमिच्छताम् । मृतिमिच्छतामिति पाठे मृतिमुत्क्रान्त-रूपामिति व्याख्येयम् ॥ ६, ७ ॥

इहोपहूतो भगवान्मृत्युः शामित्रकर्मणि ।
न कश्चिन्म्रियते तावद्यावदास्त इहान्तकः ॥ ८ ॥

प्रकाशिका— इह सत्रे । पशुसंज्ञपनकर्ता शमितेत्युच्यते तस्येदं शामित्रं कर्म पशुहिंसनरूपं तस्मिंस्तदर्थम् । मृत्युर्मारको नृसिंह उपहूतः । भो स्वामिन्नत्रागत्य याज्ञीयपशूनामेव हिंसा त्वया कार्या नान्येषामिति प्रार्थनापूर्वकं मन्त्रैरकारितो यतोऽतो न कश्चिदत्र म्रियते मरिष्यति ॥ ८ ॥

एतदर्थं हि भगवानाहूतः परमर्षिभिः ।
अहो नृलोके पीयेत हरिलीलामृतं वचः ॥ ९ ॥

प्रकाशिका— एतदर्थं हीत्यत्र पूर्वोत्तरार्धयोरन्वयाप्रतीतेरितिशब्दमध्याहृत्यान्वयं दर्शयति ॥ एतदर्थं हीति । ततश्च हरिलीलाख्यममृतं यस्मिंस्तद्वचः पुराणरूपं पीयेतेत्येतदर्थम् । पशुहिंसनं तु न मुख्यप्रयोजनमिति भावः । हीति स्वानुभवमत्र प्रमाणयति ॥ ९ ॥

मन्दस्य मन्दप्रज्ञस्य प्रायो मन्दायुषश्च वै ।
निद्रया ह्रियते नक्तं दिवा चाप्यर्थकर्मभिः ॥ १० ॥

प्रकाशिका— तदभावे आयुषो वैयर्थ्यमित्युक्तमेव प्रपञ्चयति ॥ मन्दस्येति । अलसस्येत्यर्थः । नक्तं रात्रिरूपं वयो दिवा अहोरूपम् । अर्थसम्पादकव्यापारैः । वैशब्दो हेत्वर्थे । यत एवमतो लीलामृतं वचः पीयेतेत्येतदर्थमाहूत इत्यन्वयः ॥ १० ॥

सूत उवाच–

यदा परीक्षित्कुरुजाङ्गले वसन्कलिं प्रविष्टं निजचक्रवर्तिते ।
निशम्य वार्तामनतिप्रियां ततः शरासनं संयुगरोचिराददे ॥ ११ ॥

प्रकाशिका— तत्र तावत्कलिनिग्रहे प्रसक्तिं दर्शयति ॥ यदेति । कुरुजाङ्गले कुरुदेशे निजचक्रवर्तिते स्वसेनया स्वाज्ञया वा पालिते राष्ट्रे प्रविष्टं कलिम् । शुश्रावेति शेषः । तदाऽनतिप्रियाम् । समूलघातं हन्तुमशक्य इति प्रायशोऽप्रियाम् । तात्कालिकदुष्टनिग्रहरूपधर्मलाभात्किञ्चित्प्रियां तां वार्तां निशम्य संयुगरोचिर्युद्धेच्छुः ॥ ११ ॥

स्वलङ्कृतं श्यामतुरङ्गयोजितं रथं मृगेन्द्रध्वजमास्थितः पुरात् ।
वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः ॥ १२ ॥

प्रकाशिका— दिग्विजयाय पुरान्निर्गत इत्यन्वयः ॥ १२ ॥

भद्राश्वं केतुमालश्च भारतश्चोत्तरान्कुरून् ।
किम्पुरुषादीनि सर्वाणि विजित्य जगृहे बलिम् ॥ १३ ॥

प्रकाशिका— भद्राश्वादीनि पूर्वपश्चिमदक्षिणोत्तरतः समुद्रलग्नानि वर्षाणि मेरोः सर्वत इलावृतम् । उत्तरतो रम्यकं हिरण्मयम् च । दक्षिणतो हरिवर्षं किम्पुरुषं च । तान्विजित्य । बलिं करम् ॥१३॥

तत्र तत्रोपशृण्वानः स्वपूर्वेषां महात्मनाम् ।
प्रगीयमानं पुरतः कृष्णमाहात्म्यसूचनम् ॥ १४ ॥

प्रकाशिका— तत्र तत्र वर्षेषु पुरतो गायकैर्गीयमानम् । कृष्णमाहात्म्यं सूच्यतेऽनेनेति कृष्णमाहात्म्यसूचनम् । स्वपूर्वेषां पाण्डवानाम् । यश इति शेषः ॥ १४ ॥

आत्मानञ्च परित्रातमश्वत्थाम्नोऽस्त्रतेजसः ।
स्नेहञ्च वृष्णिपार्थानां तेषां भक्तिञ्च केशवे ॥ १५ ॥

प्रकाशिका— आत्मानं चेत्यादौ गीयमानमिति शेषः ॥ १५ ॥

तेभ्यः परमसन्तुष्टः प्रीत्युज्जृम्भितलोचनः ।
महाधनानि वासांसि ददौ हारान्महामनाः ॥ १६ ॥

प्रकाशिका— तेभ्यो गायकेभ्यः । प्रीत्योज्जृम्भिते विकसिते लोचने यस्य स तथा । महाधनान्यनर्घाणि ॥ १६ ॥

सारथ्यपारषदसेवनसख्यदौत्य-
वीरासनानुगमनस्तवनप्रणामैः ।
स्निग्धेषु पाण्डुषु जगत्प्रणतस्य विष्णोः
भक्तिं करोति नृपतिश्चरणारविन्दे ॥ १७ ॥

प्रकाशिका— पुनः किं चकारेत्यपेक्षायामाह ॥ सारथ्येति । सारथ्यादिभिर्निमित्तैः स्निग्धेषु न स्वत इति प्रतयते । अतोऽन्वयं दर्शयन्व्याख्याति ॥ स्निग्धेष्विति । अनेन स्वत स्वत एव स्निग्धेषु भक्तेषु पाण्डुषु । विषयसप्तमीयम् । यानि विष्णोर्विष्णुकर्तृकाणि सारथ्यादीनि गायकैर्गीयमानानि तैः श्रुतैर्निमित्तैर्नृपतिः परीक्षित्पूर्वं भक्तिमानपि जगत्प्रणतस्य ब्रह्मादिसर्वजगद्वन्द्यस्य विष्णोश्चरणारविन्दे तस्य भक्तवात्सल्यं विचार्य तदा विशेषभक्तिं करोतीत्यर्थ उक्तो भवति । सारथेः कर्म सारथ्यम् । पारषदमिति रेफषकारयोर्विश्लेषश्छान्दसः । पार्षदं सभापतित्वम् । सेवनं चित्तानुसारेण कर्मकरणम् । सख्युः कर्म सख्यम् । दौत्यम् सन्देशकारित्वम् । वीरासनं रात्रौ स्वामिसंरक्षणार्थं खड्गपाणेस्तिष्ठतो जागरणम् । गच्छतः पृष्ठतो गमनमनुगमनम् । स्तवनं सिंहासने स्थितस्य पुरतः स्थित्वा स्तोत्रकरणम् । प्रणामस्तादृशस्यैव नमस्कारस्तैः ॥ १७ ॥

तस्यैवं वर्तमानस्य पूर्वेषां वृत्तमन्वहम् ।
नातिदूरे किलाश्चर्यं यदासीत्तन्निबोध मे ॥ १८ ॥

प्रकाशिका— पूर्वेषां पाण्डवानां वृत्तमाचारमनुदिनमेवं वर्तमानस्य सतः । नातिदूरे शीघ्रमेव॥ १८ ॥

धर्मः पदैकेन चरन्विच्छायामुपलभ्य गाम् ।
पृच्छति स्माश्रुवदनां विवत्सामिव मातरम् ॥ १९ ॥

प्रकाशिका— किं तदाश्चर्यमित्यतस्तद्दर्शयति ॥ धर्म इति । धर्मो धर्माभिमानी यमो वृषभो भूत्वा सत्याख्येनैकपदा चरन् गच्छन्विच्छायां विगतकान्तिं गां गोरूपां भूमिमुपलभ्य दृष्ट्वा पृच्छति स्म । कथं भूताम् । विवत्सां वत्सरहिताम् । मातरमिवाश्रुवदनाम् ॥ १९ ॥

धर्म उवाच–

कच्चिद्भद्रेऽनामयमात्मनस्ते विच्छायाऽसि म्लायता यन्मुखेन ।
आलक्षये भवतीमन्तराधिं दूरे बन्धुं शोचसि कञ्चनेव ॥ २० ॥

प्रकाशिका— आत्मनो देहस्य । भवतीमन्तराधिम् । यद्यपि बहिरामयो न लक्ष्यते । तथाऽप्यन्तर्मध्ये आधिः पीडा यस्यास्ताम् । त्वामालक्षये चिन्तयामि । केन लिङ्गेन । यद्यस्मान्म्लायता म्लानिं गच्छता मुखेन विच्छायासि । तत्र कारणानि विकल्पयन्पृच्छति ॥ पादैरित्यादिनोत्तरश्लोकपञ्चकेन दूरे बन्धुमित्यादिना सपादश्लोकपञ्चकेन । दूरे गतं बन्धुं प्रति शोचसीव शोकं कुर्वाणा यथा तथाऽसि । इदमेवात्र प्रायेण कारणं भविष्यतीति भावः ॥ २० ॥

पादैर्न्यूनं शोचसि मैकपादमुतात्मानं वृषलैर्भोक्ष्यमाणम् ।
अथो सुरादीन्हृतयज्ञभागान्प्रजा उतस्विन्मघवत्यवर्षति ॥ २१ ॥

प्रकाशिका— तप आदिभिस्त्रिभिः पादैर्न्यूनमत एवैकपादम् । सत्याख्येनैकपादेन युक्तम् । यद्वा तप आदीनां सर्वेषां धर्माणां त्रिभिस्त्रिभिःपादैः न्यूनं एकैकेन पादेन युक्तम् । मां प्रति शोचसि । उतशब्दः पक्षान्तरे । अहो स्विद्वृषलैः शूद्रप्रायैः राजभिरितःपरं भोक्ष्यमाणमात्मानं स्वात्मानं प्रति शोचसि । आत्मशब्दस्य नित्यपुल्लिङ्गत्वाद्भोक्ष्यमाणमिति पुल्लिङ्गनिर्देशः । अथोऽथवा हृता यज्ञाद्यकरणात्परिहृता यज्ञभागा येषां तान्सुरादीन्प्रति शोचसि । मघवतीन्द्रेऽवर्षति सत्यन्नाभावे विक्लिश्यमानाः प्रजा उद्दिश्य शोचसि ॥ २१ ॥

अरक्ष्यमाणा स्त्रिय उर्वि बालाञ्छोचस्यथो पुरुषादैरिवार्तान् ।
वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये राजकुले कुलाग्र्याम् ॥ २२ ॥

प्रकाशिका— हे उर्वि पृथ्वि । भर्तृभिररक्ष्यमाणाः स्त्रियः उद्दिश्य । अथोऽथवा पितृभिररक्ष्यमाणान्प्रत्युत पुरुषादै राक्षसैरिव स्थितैस्तैरार्तान्दुःखितान् बालानुद्दिश्य । देवीं द्योतमानां वाचं

वेदवाणीम् । आकुलाग्र्यां कुलाग्र्ये भवाः कुलाग्र्याः सदाचारा स्त्रैवर्णिका न विद्यन्ते कुलाग्र्या अध्येतारो यस्याः सा तथोक्ता ताम् । अथो शोचसीत्यन्वयः । कस्मिन्सति ब्रह्मकुले ब्राह्मणे । जात्येकवचनम् । एवमग्रेऽपि । कुकर्मणि सति कृष्यादिकरणरूपकुत्सितकर्मशीले सति । राजकुले क्षत्रियेऽब्रह्मण्ये ब्राह्मणापमानादिकुकर्मशीले सति । उपलक्षणमेतत् । वैश्ये दुराचारे सतीत्यपि ग्राह्यम् ॥ २२ ॥

किं क्षत्रबन्धून्कलिनोपसृष्टान्राष्ट्राणि वा तैरवरोपितानि ।
इतस्ततो वाऽशनपानवासस्नानव्यवायोत्सुकजीवलोकम् ॥ २३ ॥

प्रकाशिका— उपसृष्टान्व्याप्तान् । क्षत्रबन्धुभिरवरोपितान्युद्वासितानि । शोचसीति सर्वत्र सम्बध्यते । इतस्ततो निषेधानादरेण सर्वतोऽशनादि । व्यवायो मैथुनम् । जीवलोकं प्राणिसमूहम् ॥२३॥

यद्वाधते भूरिभारावतारकृतावतारस्य हरेर्धरित्रि ।
अन्तर्हितस्य स्मरती विसृष्टा कर्माणि निर्वाणविलम्बितानि ॥ २४ ॥

प्रकाशिका— अम्ब हे मातः । यद्वा । अथेति पाठे निपातसमुदायः पक्षान्तरद्योतकः । हे धरित्रि । ते तव यो भूरिभारस्तस्यावतारोऽवतरणम् । नाशनमिति यावत् । तस्मै कृतोऽवतारः प्रादुर्भावो येन स तथोक्तः । तस्येदानीमन्तर्हितस्य कर्माणि स्मरन्तीति न विसृष्टा सती शोचामि । कथं भूतानि कर्माणि । निर्वाणं मोक्षसुखं विलम्बितं विशेषेण प्रापितं यैस्तानि तथोक्तानि । निर्वाणविडम्बनानीति पाठे मोक्षं विडम्बयन्त्युपहसन्तीति व्याख्येयम् । स्वाध्यायिनामुत्तमानामधममोक्षसुखादप्यधिकसुखप्रदानीति भावः ॥ २४ ॥

इदं ममाचक्ष्व तवाधिमूलं वसुन्धरे येन विकर्शिताऽसि ।
कालेन वा ते बलिनाऽवलीढं सुरर्चितं किं प्रभुणाऽद्य सौभगम् ॥ १५ ॥

प्रकाशिका— अद्य साम्प्रतं प्रभुणा समर्थेनात एव बलिना कालेन सुरार्चितं सौभगमवलीढं ग्रस्तम् ॥ २५ ॥

धरोवाच–

भवान्हि वेद तत्सर्वं यन्मां धर्मानुपृच्छसि ।
चतुर्भिः वर्तसे येन पादैर्लोकसुखावहैः ॥ २६ ॥

सत्यं शौचं दया दानं त्यागः सन्तोष आर्जवम् ।
शमो दमः तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥ २७ ॥

तात्पर्यम्— त्यागो मिथ्याभिमानवर्जनम् । मिथ्याभिमानविरतिस्त्याग इत्यभिधीयत इति नारायणाध्यात्मे ॥ २७ ॥

ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो धृतिः स्मृतिः ।
स्वातन्त्र्यं कौशलं कान्तिः सौभगं मार्दवं क्षमा ॥ २८ ॥

तात्पर्यम्— एकान्ततः शुभभागित्वं सौभाग्यम् । शुभैकभागी सुभगो दुर्भगस्तद्विपर्यय इति गीताकल्पे ॥ २८ ॥

प्रकाशिका— यदाधिमूलं भो धर्म मां पृच्छसि तद्भवान्वेद जानाति हीत्यनेन तत्सार्वज्ञस्य प्रमाणप्रसिद्धतामाह । तथाऽपि वक्ष्यत इति शेषः । सत्यं शौचं दया दानं त्याग इत्यत्र त्याग शब्दस्य विषयपरित्यागार्थत्वे विरक्तिरित्यनेन पौनरुक्त्यमतोऽत्र तस्य विवक्षितमर्थमाह ॥ त्याग इति । मिथ्याऽभिमानोऽस्वकीये स्वकीयत्वभ्रमरूपः । अत्र प्रमाणमाह ॥ मिथ्येति । विरतिर्वर्जनम् । भगादिशब्दगतार्थतया सौभगशब्दार्थं दर्शयति ॥ एकान्तत इति । नियमेनेत्यर्थः । अत्र प्रमाणमाह ॥ शुभैकेति । तस्येदं सौभगमिति प्रसिद्धमेवेति भावः । भगस्त्वैश्वर्यादिषड्गुणरूपोऽतो न पौनरुक्त्यमिति ध्येयम् । पश्चात्तनस्यापि सौभगशब्दस्य शमादिशब्दापेक्षया पूर्वं व्याख्यानं शमादिशब्दानां सौभगशब्दार्थान्तर्गतशुभधर्मप्रदर्शकतया तद्विवरणरूपमिति द्योतनाय । शमः क्षमा तितिक्षा शब्दानां पौनरुक्त्यशङ्कापरिहाराय प्रमाणेनैव भिन्नार्थत्वं दर्शयति ॥ शम इति । प्रियादीत्यत्रादिपदेनाप्रियस्य ग्रहणम् । उज्झा । राहित्यम् । क्रोधाद्यनुत्थितिः । द्वेषदर्शनेऽपि क्रोधानुत्पत्तिः । आदिपदेन तत्कार्यवधादिग्रहणम् । इदं च दत्तव्यासादिरूपेषु द्रष्टव्यम् । महाविरोधकर्तुरपि विषये सहनं प्रत्यपकारे कारणाभावः । तुशब्दो महाविरोधकर्तरि भक्तत्वलक्षणं विशेषं सूचयति । तेन भक्तविषयमेतदिति ज्ञातव्यम् । प्रियाप्रियबुद्धिराहित्यं शम इत्युक्तमुपपादयितुं प्रमाणान्तरं पठति ॥ स्वयमिति । प्रियाप्रियविषयाभावात्तद्बुद्धिराहित्यमुपपन्नमिति भावः । नन्विदमनुपपन्नं सुरादीनां हरिप्रियतया कल्यादीनां द्वेषिणां तदप्रियतया प्रसिद्धत्वादित्यतोऽत्राभिप्रायं प्रमाणेन दर्शयति ॥ प्रियमेवेति । सुखप्रदमेवेत्यर्थः । सर्वं कल्यादिद्वेषिजातमपि कुत्रचिज्जीवे जडे च । कल्यादीनां स्वद्वेषाधिक्ये भगवतोऽतीव सुखाभिव्यक्तिरिति भावः । कुत एतदित्यत आह ॥ स्वयमेवेति । यतः कर्ता । सर्वेषामिति शेषः । यदि कल्यादयो द्वेषिणो न स्वसुखप्रदास्तर्हि सर्वज्ञो हरिस्तान्नोत्पादयेत् । अतस्तेऽपि तस्य प्रिया एवेति भावः । यतः स्वयमेव कर्ताऽतस्तस्य सर्वं

प्रियमेवातः शान्त इत्यन्वयः । शमशब्दपर्यायः शान्तशब्दः । तथा च प्रियाभावेनैव प्रियाप्रियोभयाभाव उक्तो न तूभयोरप्यभावेनेति भावः । अनेन शस्यैव सुखस्य न त्वप्रियस्य मा बुद्धिः शम इति निर्वचनं सूचितमिति ध्येयम् । मानोभिमानरूपोऽहङ्कारश्चेदमहङ्कृतिरित्यनेन विरोध इत्यतस्तस्याभिप्रेतमर्थं दर्शयति । मान इति । परेषां नारदादीनां क्रियमाणो मानो मानमित्यर्थः । नित्या यत्र महागुणा इत्याधाराधेयभावोक्त्या भगवति गुणभेदः प्रतीयते । तथा च महत्वमिच्छद्भिरित्यत्र महत्वमुक्तभगवद्गुणप्रतिबिम्बगुणत्वमिच्छद्भिरित्यनेन मुक्तानां गुणभेदोऽतस्त-दभिप्रायं प्रमाणेनैव दर्शयति ॥ गुणैरिति ॥ हरिरित्युपलक्षणम् । मुक्ता अपि स्वरूपभूतैर्गुणैर्गुणिन इत्यपि ग्राह्यम् । विशेषबलादिति हेतुसूचनाय तु शब्दः । कुत एवमित्यतः प्रतीतार्थे बाधकमाह ॥ न विष्णोरिति । मतः श्रुत्यादिसम्मत इत्यर्थः । ततश्चतुर्भिर्वर्तसे येनेत्यादेरयमर्थः ॥ येन श्रीकृष्णेन सह त्वं लोकसुखावहैस्तपःशौचदयासत्याख्यैश्चतुर्भिः पादैर्द्वापरान्तेऽपि वर्तसे । यत्र च सत्यादयो गुणाः कर्हिचिदपि न यान्ति । तेन श्रीनिवासेन रहितं लोकं शोचामीत्यन्वयः । सत्यं निर्दुःखानन्दानुभवो यथार्थवचनं वा । शौचं शुद्धता । दया परदुःखप्रहाणेच्छा । दानं जीवानां स्वरूपानुसारेण फलदानम् । त्यागोऽस्वकीये स्वकीयताबुद्धिरूपमिथ्याऽभिमानवर्जनम् । सन्तोषः पूर्णसुखम् । आर्जवं मनोवाक्कायवृत्तीनामवैपरीत्यम् । शमः शस्य प्रियस्यैव मा बुद्धिरिति व्युत्पत्त्याऽप्रियसहित-प्रियबुद्ध्यभावः । दम इन्द्रियाणां स्ववशत्वम् । तपः स्वपरगताखिलविशेषविषयकालोचनम् । साम्यं सर्वरूपेषु निर्दोषगुणपूर्णत्वेन तारतम्याभावः । तितिक्षा भक्तकृतमहापराधसहनम् । उपरतिर्विषयेष्व-लम्बुद्धिः । उः रुद्रस्तं पातीत्युपो मुख्यप्राणस्तस्मिन्रतिरिति वा । श्रुतमुपक्रमादिना शास्त्रतात्पर्य-ज्ञानम् ॥ ज्ञानं सर्वसाक्षात्काररूपम् । विरक्तिर्वैतृष्ण्यम् । स्वातन्त्र्यमपराधीनत्वम् । कौशलं सर्वक्रियासु निपुणता । कान्तिः शारीरशोभा सौन्दर्यं वा । सौभगं शुभैकभागित्वम् । मार्दवं भक्तेषु चित्ताकाठिन्यम् । क्षमा द्वेषिदर्शनेऽपि क्रोधानुत्पत्तिः ॥ २६, २७, २८ ॥

प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः ।
गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहंकृतिः ॥ २९ ॥

तात्पर्यम्— शमः प्रियादिबुद्ध्युज्झा क्षमा क्रोधाद्यनुत्थितिः । महाविरोधकर्तुश्च सहनं तु तितिक्षणमिति पाद्मे । स्वयं सर्वस्य कर्तृत्वात्कुतस्तस्य प्रियाप्रिये इति च । प्रियमेव यतः सर्वमप्रियं नास्ति कुत्रचित् । स्वयमेव यतः कर्ता शान्तोऽतो हरिरीश्वर' इति ब्रह्मतर्के ॥ मानः परेषाम् ॥ २९ ॥

प्रकाशिका— प्रागल्भ्यं सर्वत्र धाार्ष्ण्यम् । प्रश्रयो विनयः । शीलं सुस्वभावः । सहो वैरिवेग-सहनशक्तिः । ओजः पराभिभवशक्तिः । बलं स्वेच्छाकरणशक्तिः । भगः पूर्णषड्गुणत्वम् । गाम्भीर्यं परैरनवगाह्यत्वम् । स्थैर्यमचञ्चलता । आस्तिक्यं वेदाद्युक्तमस्तीति बुद्धिः । कीर्तिर्गुणैः सर्वदिग्व्याप्तिः । मानो नारदादीनां पूजनम् । अनहङ्कृतिर्गर्वाभावः ॥ २९ ॥

इमे चान्ये च भगवन्नित्या यत्र महागुणाः ।
प्रार्थ्या महत्वमिच्छद्भिः न च यान्ति स्म कर्हिचित् ॥ ३० ॥

तात्पर्यम्— गुणैः स्वरूपभूतैस्तु गुण्यसौ हरिरीश्वरः । न विष्णोर्ना च मुक्तानां कोऽपि भिन्नो गुणो मत इति ब्रह्मतर्के ॥ ३० ॥ इति प्रथमतात्पर्ये षोडशोऽध्यायः ॥ १६ ॥

प्रकाशिका— कथंभूता गुणाः । महत्त्वमुक्तगुणप्रतिबिम्बभूतगुणवत्त्वम् । मोक्षे आविर्भूत-मिच्छद्भिः सज्जनैः प्रार्थ्याः । साक्षात्कारायेति शेषः । एते उक्ता अन्ये ब्रह्मण्यत्वशरण्यत्व-जगत्सृष्ट्यादिकर्तृत्वादयोऽनन्तगुणा यस्मिन्नित्याः स्वभावतः सिद्धा यतोऽतः कर्हिचित्कदाचिदपि न च यान्ति नैवोपयान्ति ॥ ३० ॥

तेनाहं गुणपात्रेण श्रीनिवासेन साम्प्रतम् ।
शोचामि रहितं लोकं पाप्मना कलिनेक्षितम् ॥ ३१ ॥

प्रकाशिका— तेन कृष्णेनोक्तानुक्तगुणपात्रेण गुणाश्रयेण श्रीनिवासेन वक्षस्थलाश्रिता श्रीरिति संप्रदायविदः । तस्या नितरां वासभूतेन रहितं रूपविशेषेण परित्यक्तं लोकं मन्निष्ठं जनं मदभिमतं भूलोकं वा ॥ ३१ ॥

आत्मानञ्चानुशोचामि भवन्तञ्चामरोत्तम ।
देवान्नृषीन् पितॄन्साधून्सर्वान्वर्णांस्तथाश्रमान् ॥ ३२ ॥

प्रकाशिका— न केवलमेतावत्किं त्वात्मानं भवन्तं च पाप्मना सर्वपापाभिमानिना कलिनेक्षितं विचार्य शोचामि । अन्यदपि शोके निमित्तमाह ॥ देवानिति । कलिनेक्षितानिति शेषः ॥ ३२ ॥

ब्रह्मादयो बहुतिथं यदपाङ्गमोक्षकामा यथोक्तविधिना भगवत्प्रपन्नाः ।
सा श्रीः स्ववासमरविन्दवनं विहाय यत्पादसौभगमलं भजतेऽनुरक्ता ॥३३॥

प्रकाशिका— श्रीकृष्णविरहः सर्वथा सोढुमशक्य इति वक्तुं तावत्तन्माहात्म्यमाह ॥ ब्रह्मादय इत्यादिश्लोकत्रयेण । ब्रह्मादयो देवा यस्याः श्रियोऽपांगमोक्षे कामाः स्वेषु कटाक्षनिरीक्षणकामाः संतो बहुतिथं बहुकालं यथोक्तविधिनाऽस्मदादिसर्वजीवोत्तमा श्रीस्तस्या उत्तमो भगवानिति शास्त्रोक्तानुसन्धानेन भगवत्प्रपन्ना भगवन्तमेव प्रपन्नाः प्राप्ताः श्रियः कटाक्षमाकांक्षमाणाः सन्तस्तत्पतित्वेन भगवन्तमेव । अभजन्निति यावत् । सा श्रीरनुरक्ता माहात्म्यज्ञानमनुसृत्य स्निग्धा । भक्तिमती सतीति यावत् । स्वनिवासभूतमरविन्दवनं विहाय यस्य श्रीकृष्णस्य पादसौभगं पादयोर्विद्यमानं लावण्यमलं भजते ॥ ३३ ॥

तस्याहमब्जकुलिशाङ्कुशकेतुकेतैः श्रीमत्पदैर्भगवतः समलङ्कृताङ्गी ।
त्रीनत्यरोचमुपलब्धतपोविभूतिर्लोकान्समां व्यसृजदुत्स्मयतीं तदन्ते ॥३४॥

प्रकाशिका— तस्य भगवतः श्रीकृष्णस्याब्जं च कुलिशं च कुशश्च केतुर्ध्वजश्चाब्जकुलिशाङ्कुशकेतवः । एते रेखारूपाः केताश्चिन्हानि येषां तानि तथोक्तानि तैः । श्रीमद्भिः पदैः सम्यगलङ्कृतमङ्गं यस्याः साहमुपलब्धतपोविभूतिः । उपलब्धा प्राप्ता तपः फलरूपा विभूतिरैश्वर्यं यस्याः सा तथा सती त्रींल्लोकानत्यरोचमतिक्रम्य शोभावती जाताऽस्मि । स श्रीकृष्णस्तदन्ते तस्यास्तपोविभूतेरवसाने प्राप्ते सत्युत्स्मयन्तीं का नु मत्सदृशी लोक इति गर्वं कुर्वाणां मां व्यसृजत् ॥ ३४ ॥

यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुददात्मतन्त्रः ।
त्वां दुस्थमूनपदमात्मनि पौरुषेण सम्पादयन्यदुषु रम्यमबिभ्रदङ्गम् ॥ ३५ ॥

प्रकाशिका— किञ्च यो वै आत्मतन्त्रः स्वतन्त्र आसुरवंशराज्ञाम् । राज्ञां वंशा येषां ते वंशराजानोऽग्न्याहितादिवत्परनिपातः । राजवंशोत्पन्ना इति यावत् । असुराश्च ते वंशराजानश्च तेषाम् । ममाति भारमतिशयितभारभूतमक्षौहिणीशतमपानुददपाहरत् । शत शब्दः सहस्राद्युपलक्षकः। त्वां च कालबलेनोनपादमत एव दुःस्थं सन्तं पौरुषेण पराक्रमेणात्मनि स्वस्वरूपे स्थितं सम्पादयन् । लक्षणहेत्वोः क्रियाया इति हेतौ शतृप्रत्ययः । सम्पादयितुमित्यर्थः । सम्पूर्णपादचतुष्टये रूपे स्वस्मिन्स्थितम् । कर्तुमिति यावत् । अङ्गं शरीरम् । अविभ्रद्व्यक्तमकरोत् ॥ ३५ ॥

का वा सहेत विरहं पुरुषोत्तमस्य प्रेमावलोकरुचिरस्मितवल्गुजल्पैः ।
स्थैर्यं समानमहरन्मधुमानिनीनां रोमोत्सवो मम पदङ्किविटङ्किताया: ॥ ३६ ॥

प्रकाशिका— प्रेमावलोकश्च रुचिरस्मितं च वल्गुजल्पश्च तैर्यो मधुमानिनीनां मधुमानयन्तीति मधुमानिन्यस्तासाम् । मद्यास्वादननिरतानां स्त्रीणां मधुकुलस्थमानिनीनामिति वा समानं गर्वसहितस्थैर्यं स्तब्धत्वमहरत् । यस्याङ्घ्रिभ्यां विटङ्किताया अलङ्कृतायाः स्पृष्टाया इति यावत् । मम रोमोत्सवो रोमाञ्चः । अभूदिति शेषः । तस्य पुरुषोत्तमस्य विरहं वियोगं का वा सहेत । न काऽपीत्यर्थः ॥ ३६ ॥

सूत उवाच–

तयोरेवं कथयतोः पृथिवीधर्मयोस्तदा ।
परीक्षिन्नाम राजर्षिः प्राप्तः प्राचीं सरस्वतीम् ॥ ३७ ॥

॥ इति श्रीमद्भागवते प्रथमस्कन्धे षोडशोऽध्यायः ॥

प्रकाशिका— प्रवदतोः सतोः प्राचीं प्राचीदिशमुद्दिश्य स्यन्दमानां सरस्वतीं कुरुक्षेत्रगतां सरस्वतीसंज्ञांनदीं प्राप्तः ॥ ३७ ॥ इति श्रीभागवतटिप्पण्यां षोडशोऽध्यायः ॥ १-१६ ॥

अथ सप्तदशोऽध्यायः

सूत उवाच–

तत्र गोमिथुनं राजा हन्यमानमनाथवत् ।
दण्डहस्तश्च वृषलं ददृशे नृपलाञ्छनम् ॥ १ ॥

प्रकाशिका— आश्चर्यं यदासीदित्युक्ताश्चर्यप्रकारमाह ॥ तत्रेति । तत्र कुरुक्षेत्रे नदीतीरे । अनाथेन तुल्यं वर्तत इति अनाथवत् । स्वामिरहितसदृशम् । हन्यमानं ताड्यमानं गोमिथुनम् । वृषं गां चेत्युभयम् । वृषलं कर्मणा शूद्रम् । दण्डहस्तं हन्तारम् ॥ १ ॥

वृषं मृणालधवलं मेहन्तमिव बिभ्यतम् ।
वेपमानं पदैकेन सीदन्तं शूद्रपीडितम् ॥ २ ॥

तात्पर्यम्— बिभ्यतमिव मेहन्तम् ॥ २ ॥

प्रकाशिका— गोमिथुनमेव विविच्योक्त्वा तत्प्रति राज्ञः प्रश्नं दर्शयति ॥ वृषमिति । मृणालवत्कमलनालसूत्रवत् । कमलकन्दवद्वा धवलं शुक्लवर्णम् । मेहंतमिव बिभ्यतमित्यत्र

यथास्थितान्वयस्य बाधितत्वाद्व्यत्यस्यान्वयमाह ॥ बिभ्यतमिवेति । तथा च बिभ्यद्यथा भयात्पुनः पुनर्मेहनं करोति तथा मेहन्तं शकृन्मुञ्चन्तमिति व्याख्येयमिति भावः । वेपमानं भयादेव कम्पमानम् । एकेन पदा स्थित्या सीदन्तम् । शूद्रेण कलिना पीडितं ताडितं प्रपच्छेति वक्ष्यमाणेनान्वयः ॥ २ ॥

गाश्च धर्मदुघां दीनां भृशं शूद्रपदाहताम् ।
विवत्सामश्रुवदनां कृशां यवसमिच्छतीम् ॥ ३ ॥

प्रकाशिका— धर्मदुघां यज्ञोपयोगिपयोदोग्ध्रीम् । भृशं दीनां कृपणाम् । विवत्सामिवाश्रुवदनाम् । यवसं तृणम् । पृथिव्यपि सस्यादिप्रसवक्षयाद्विवत्सेव । यज्ञभागाभावात्कृशा । अत एव यज्ञभागमिच्छतीति द्रष्टव्यम् ॥ ३ ॥

पप्रच्छ रथमारूढः कार्तस्वरपरिच्छदम् ।
मेघगम्भीरया वाचा समारोपितकार्मुकः ॥ ४ ॥

प्रकाशिका— कार्तस्वरं सुवर्णं तेन कृतः परिच्छदः परिकरो यस्य तम् । सुवर्णनिबद्धमित्यर्थः ॥ ४ ॥

कस्त्वं मच्छरणे लोके बलाद्धंस्यबलौ बली ।
नरदेवोऽसि वेषेण नटवत्कर्मणाऽद्विजः ॥ ५ ॥

प्रकाशिका— तत्रादौ तावत् शूद्रं प्रति प्रश्नप्रकारमाह ॥ कस्त्वमिति । अहमेव शरणं रक्षको यस्य स मच्छरणस्तस्मिन् लोके विद्यमानौ बलात्प्रसह्य हंसिपीडयसि । अबलौ दुर्बलौ । बली त्वं कः। राजाऽहमिति चेत्तत्राह ॥ नरदेव इति । नट इव वेषमात्रेण नरदेवो राजाऽसि । कर्मणा त्वद्विजो त्रिवर्णबाह्यः ॥ ५ ॥

स त्वं कृष्णे गते दूरं सह गाण्डीवधन्वना ।
शोच्योऽस्यशोच्यान्रहसि प्रहरन्वधमर्हसि ॥ ६ ॥

प्रकाशिका— अशोच्यान्निरपराधान् । रहसि प्रहरन्यस्त्वं प्रहरसि स शोच्यः सापराधोऽसि । अतो वधमर्हसि ॥ ६ ॥

त्वं वा मृणालधवलः पादैर्न्यूनः पदा चरन् ।
वृषरूपेण किं कश्चिद्देवो नः परिखेदयन् ॥ ७ ॥

प्रकाशिका— इदानीं वृषं पृच्छति ॥ त्वं वेति । क इति वर्तते । पादैस्त्रिभिः । पदैकेन । स्वयमेव सम्भावयति ॥ वृषेति । किं कश्चिद्देव पुरुषरूपेण नोऽस्मान्परिखेदयन्वर्तसे ॥ ७ ॥

न जातु कौरवेन्द्राणां दोर्दण्डपरिरम्भिते ।
भूतले निपतन्त्यस्मिन्विना त्वां प्राणिनां शुचः ॥ ८ ॥

प्रकाशिका— परिखेदत्वं कुत इत्यत आह ॥ न जात्विति । परिरम्भिते रक्षिते । शुचोऽश्रूणि त्वां विना । त्वं तु शोचसि यस्मात्तस्मात्परिखेदयसीति भावः ॥ ८ ॥

मा सौरभेयानुशुचो व्येतु ते वृषलाद्भयम् ।
मा रोदीरम्ब भद्रं ते खलानां मयि शास्तरि ॥ ९ ॥

प्रकाशिका— एवमुक्तं श्रुत्वा पुनरपि शोचन्तं प्रत्याह ॥ मा सौरभेयेति । भो सुरभेः पुत्र । मा शुचः शोकं मा कुरु । व्येतु गच्छतु । इदानीं गां प्रत्याह ॥ मा रोदीरिति । शास्तरि मयि जीवति सति । ते भद्रमेवातो मा रोदीः ॥ ९ ॥

यस्य राष्ट्रे प्रजा मातर्हिंस्यन्ते साध्वसाधुभिः ।
तस्य मत्तस्य नश्यन्ति कीर्तिरायुर्भगो गतिः ॥ १० ॥

प्रकाशिका— न तवैवोपकारायैनं हनिष्यामि किन्तु मद्धितार्थमपीत्याशयेनाह ॥ यस्येति द्वाभ्याम् । यस्य राज्ञो राज्ये राष्ट्रे साधु सम्यग्घिंस्यन्ते पीड्यन्ते । तस्य राज्ञः कीर्त्यादयो नश्यन्ति । गतिः पारलौकिकः ॥ १० ॥

एष राज्ञः परो धर्मो ह्यार्तानामार्तिनिग्रहः ।
अत एनं वधिष्यामि भूतद्रुहमसत्तमम् ॥ ११ ॥

प्रकाशिका— आर्तिनिग्रहो दुःखनाशनम् । अतो दुष्टनिग्रहस्य स्वधर्मत्वात् । अनेन कस्य हेतोर्निजग्राहेति प्रश्नस्योत्तरमुक्तं भवतीति ज्ञातव्यम् ॥ ११ ॥

कोऽवृश्चत्तव पादांस्त्रीन्सौरभेय चतुष्पदः ।
मा भूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्तिनाम् ॥ १२ ॥

प्रकाशिका— पुनरपि वृषं प्रत्याह ॥ क इति । चतुष्पदस्तव त्रीन्पादान्कोऽवृश्चच्चिच्छेद । तमाख्याहीति वक्ष्यमाणेनान्वयः । मादृशः बहवः सन्ति । अतः किं मामेव पृच्छसीत्यत आह ॥ मा भूवन्निति । कृष्णानुवर्तिनामस्माकं राष्ट्रे ॥ १२ ॥

आख्याहि वृष भद्रं वः साधूनामकृतागसाम् ।
आत्मवैरूप्यकर्तारं पार्थानां कीर्तिदूषकम् ।
गलेऽनागस्यघं युञ्जन्सर्वतोऽस्य च मद्भयम् ॥ १३ ॥

प्रकाशिका— किं तदाख्यानेनेत्याशङ्कायामाह । हे वृष । अकृतागसामकृतापराधानां साधूनां वस्तदाख्यानेन भद्रमेव भविष्यति यद्यतोऽत आत्मनः स्वस्य वैरूप्यं पादत्रयराहित्यरूपम् । तस्य कर्तारमाख्याहि तदाख्याने कथमस्याकं भद्रं भविष्यतीत्याह ॥ गल इति । हे गले सौरभेयि ॥ सौरभेयी गला धेनुर्भद्रा नन्द्राऽमृतस्रवेत्यभिधानात् । अनागस्यपराधशून्ये जनेऽघमपराधं युञ्जन्कुर्वन् योऽस्य सर्वत इहामुत्र च मद्भयं मत्तो भयं भविष्यति तेन च वो भद्रमिति भावः । महद्भयमिति पाठे मत्तो भविष्यतीति शेषः ॥ १३ ॥

अनागस्स्विह भूतेषु य आगस्कृन्निरंकुशः ।
आहर्ताऽस्मि भुजं साक्षादमर्त्यस्यापि साङ्गदम् ॥ १४ ॥

प्रकाशिका— तस्य दण्डेऽहमसमर्थ इति मा शङ्कीरित्याह ॥ अनागस्विति । अगस्कृद-पराधकर्ता । निरङ्कुशोऽनिवारितः । तस्यामर्त्यस्य देवस्यापि भुजमाहर्ताऽस्म्याहरिष्यामि । साङ्गद-मित्यनेन मूलमारभ्यैवाहरिष्यामीति सूचितम् ॥ १४ ॥

राज्ञो हि परमो धर्मः स्वधर्मस्यानुपालनम् ।
शासतोऽन्यान्यथाशास्त्रं अनापद्युत्पथानिह ॥ १५ ॥

प्रकाशिका— नन्वेवमेकस्य निग्रहेणान्यस्यानुग्रहे तव किं प्रयोजनमित्यत आह ॥ राज्ञो हीति । कथं भूतस्य राज्ञः । अन्यान् अधर्मिष्ठान्यथाशास्त्रशास्त्रमनतिक्रम्यम् । शासतो दण्डयतः । कथं भूतानन्यान् । अनापद्यापदाभावेऽप्युत्पथान्मार्गमुत्सृज्य वर्तमानान् । इह भारते वर्षे । तथा च पर-धर्मप्राप्तिरेव दुष्टनिग्रहादिना मम प्राप्यं प्रयोजनमिति भावः । हि शब्दः प्रमाणप्रसिद्धिद्योतकः । ॥ १५ ॥

धर्म उवाच—

एतद्वः पाण्डवेयानां युक्तमार्ताभयं वचः ।
येषां गुणगणैः कृष्णो दौत्यादौ भगवान्वृतः ॥ १६ ॥

प्रकाशिका— आर्तानामभयं यस्मात्तद्वचो वो युक्तम् । उचितमेव ॥ १६ ॥

न वयं क्लेशबीजानि यतः स्युः पुरुषर्षभ ।
पुरुषं तं विजानीमः वाक्यभेदविमोहिताः ॥ १७ ॥

प्रकाशिका— क्लेशबीजानि प्राणिनां क्लेशहेतवः । यतः पुरुषात्स्युर्भवेयुः । कुतो न विजानीम इत्यतोऽत्र हेतुमाह ॥ वाक्येति । यतो वाक्यभेदैस्तत्तद्वादिविशेषवाक्यैर्विमोहिता अतो न विजानीमः ॥ १७ ॥

केचिद्वैकल्प्यवचस आहुरात्मानमात्मनः ।
दैवमेके परे कर्म स्वभावमपरे प्रभुम् ॥ १८ ॥

प्रकाशिका— वाक्यभेदानेवाह ॥ केचिदिति । विकल्पो भेदस्तत्सम्बन्धि वैकल्प्यं भेदप्रतिपादकं वचो येषां ते तथोक्ताः । प्रकृतिपुरुषयोर्भेदवादिनः सांख्याः । भेदाग्रहनिमित्तमात्मनो जीवस्य क्लेशबीजम् । आत्मानमन्तःकरणं प्रधानमाहुः । दैवमीश्वरम् । एके वैदिकाः । अपरे मीमांसकाः । कर्म स्वार्जितपापपुण्यरूपं कर्मैव सुखदुःखकारणमित्याहुः । अपरे चार्वाकाः स्वभावं तत्तद्वस्तु-स्वभावं प्रभुं सुखदुःखप्रदमाहुः ॥ १८ ॥

अप्रतर्क्यादनिर्वाच्यादिति केष्वपि निश्चयः ।
अत्रानुरूपं राजर्षे विमृश स्वमनीषया ॥ १९ ॥

प्रकाशिका— अप्रतर्क्यात्सत्वेनासत्वेन च विचारासहात् । अत एवानिर्वाच्यात्सदसद्विलक्षणात् । अज्ञानादित्यपि निश्चयः केषुचित् । इत्यपि निश्चय इत्युपहासेन प्रत्यक्षादिसिद्धजगत्सत्यत्वापलापिन एत इति सूचयति । कालाद्यनुक्त समुच्चायको वाऽपि शब्दः । यद्वा केचिद्वैकल्प्य वचस इत्यनेन प्रकृत्युपसर्जन पुरुष कर्तृक वादि साङ्ख्यमतोक्तिः । अप्रतर्क्यादनिर्देत्यादिना केवल प्रकृतिकर्तृत्ववादि सांख्यमतकथनमिति ॥ अत्रैषु पक्षेषु अनुरूपं श्रुतिस्मृत्याद्यनुकूलमेकं सिद्धान्तं स्वमनीषया स्वबुद्ध्या विमृश विचारय ॥ १९ ॥

एवं धर्मे प्रवदति स सम्राट् द्विजसत्तम ।
समाहितेन मनसा विदित्वा प्रत्याचष्ट तम् ॥ २० ॥

प्रकाशिका— धर्मे वृषरूपे समीहितेनैकाग्र्येण मनसाऽऽलोच्य तं घातकं कलिं विदित्वा निश्चित्य प्रत्याचष्ट प्रत्याभाषत ॥ २० ॥

धर्मं ब्रवीषि धर्मज्ञ धर्मोऽसि वृषरूपधृक् ।
यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत् ॥ २१ ॥

तात्पर्यम्— असतां सूचकस्य न दोषस्तथापि सतां न सूचनीयमिति दर्शयितुम् । ज्ञातुं शक्यत्वाच्च राज्ञः । यद्यधर्मः कृतः सद्भिः स च वाच्यः कथञ्चन । असत्कृतधर्मं तु वदन्धर्ममवाप्नुयादिति व्यासस्मृतौ ॥ २१ ॥

प्रकाशिका— न वयं तं विजानीम इति त्वदीयं वाक्यं किमीश्वरातिरिक्तं क्लेशप्रदं पुरुषमभिप्रेत्योतेश्वरमेवाभिप्रेत्येति विकल्पं मनसि निधायाद्ये पक्षे तद्वाक्याभिप्रायमाह ॥ धर्ममिति । अत्र यदधर्मकृतो दोषकारिणः पुरुषस्य स्थानं नरकादि तत्सूचकस्यापि तद्भवेदिति सामान्यत उक्तत्वात्कस्यापि दोषो न सूचनीय इति च प्रतीयतेऽतोऽभिप्रायमाह ॥ असतामिति । असतामिति कर्तरि षष्ठी । सूचकेत्यतः पूर्वं दोषेत्यध्याहार्यम् । यद्यपीति च । अनेन धर्मज्ञेत्येतदुक्ततात्पर्यम् । तथा च यद्यप्यसत्कृतदोषसूचकस्य पुरुषस्य न दोषः । न दोषकर्तृकफलभूतनरकप्राप्तिरित्यर्थः । तर्हि न वयं तं विजानीम इति कथं धर्मेणोक्तमित्यत आह ॥ तथाऽपीति । सतां पापं सज्जनकर्तृकपापं न सूचनीयमिति धर्मं दर्शयितुं धर्मेण न वयं तं विजानीमः इत्युक्तमिति शेषः । तथा च यदधर्मकृत इति वाक्यं सज्जनपापसूचकविषयमिति भावः । न वयमिति वाक्यस्याद्यपक्ष एवाभिप्रायान्तरमाह ॥ ज्ञातुमिति । राज्ञो अधर्मकृत्पुरुषोऽयं कलिरिति राज्ञा स्वयमेव ज्ञातुं शक्यमतः किमर्थं मया वक्तव्यमित्यभिप्रेत्य च न वयं तं विजानीम इत्युक्तमित्यर्थः । इदमभिप्रायकथनं मूलगतोक्तानुक्तसमुच्चायकापि शब्दसूचितमित्यवगन्तव्यम् । यदधर्मकृतः स्थानमिति वाक्यस्योक्तार्थानङ्गीकारे बाधकप्रमाणमाह ॥ यद्यधर्म इति । तु विशेषेण वदन्नित्यर्थः । द्वितीयपक्षेपि न वयमिति वाक्याभिप्रायमाह ॥ अथवेति । तत्र देवमायाया गतिर्भूतानां चेतसो वचश्चागोचरेत्युक्त्या धर्मस्याप्यगोचरेति भात्यतस्तदभिप्रायमाह ॥ तस्येति । तदीयचेतोवचसोरित्यर्थः । तत्र देवमायाया इति शेषः । ज्ञापयितुं वा छत्रिन्यायेन न वयं तं विजानीमः । उक्तमिति शेषः ॥ ततश्च धर्मं ब्रवीषीत्यादेरयमर्थः ॥ हे धर्मज्ञ असतां पापसूचनेऽपि न दोषः । प्रत्युत पुण्यमेवेति धर्मज्ञानिन् वृष घातकं विजानन्नपि त्वम् न वयं तं विजानीम इति यद्ब्रवीषि तत्सतां पापं सर्वथा न सूचनीयमिति धर्मं लोकानां दर्शयितुमेव ब्रवीषि । यतस्त्वं धर्मोऽसि पादत्रयराहित्यप्रदर्शनायैव वृषरूपधृक् वृषरूपं धत्से । सत्कर्तृकपापसूचने को दोष इत्यपेक्षायामाह ॥ यदधर्मकृत इति । अधर्मकृतः सज्जनस्य यदधर्मफलभूतं स्थानं नरकादि तत्तद्दोषसूचकस्यापि भवेदतः सतां पापम् सर्वथा न सूचनीयमिति शेषः ॥ २१ ॥

अथवा देवमायाया नूनं गतिरगोचरा ।
चेतसो वचसश्चापि भूतानामिति निश्चयः ॥ २२ ॥

तात्पर्यम्— तस्य गोचरत्वेऽपि भूतानामगोचरेति ज्ञापयितुं वा ॥ २२ ॥

प्रकाशिका— द्वितीयपक्षेऽपि न वयमिति वाक्याभिप्रायमाह ॥ अथवेति । देवमायाया ईश्वरेच्छाया गतिः स्थितिर्भूतानां प्राणिनां चेतसोऽपि वचसश्चागोचरा ज्ञातुं वक्तुं च न शक्येति ज्ञापयितुमेव स्वयोग्यतानुसारेणेश्वरमायां जानताऽपि त्वया छत्रिन्यायेन न वयं तं विजानीम इत्युक्तमिति निश्चयोऽस्माकत्यर्थः । अत्रेश्वरस्य प्रकृतत्वेऽपि तन्मायाया अज्ञेयत्वकथनमीश्वरस्यापीच्छाद्वारेव सुखदुःखकारणत्वमिति सूचनाय ॥ २२ ॥

तपः शौचं दया सत्यं इति पादाः कृते कृताः ।
अधर्माङ्गैस्त्रयो भग्नाः स्मयसङ्गमदैस्तव ॥ २३ ॥

प्रकाशिका— वृषरूपस्य धर्मस्यैकपादत्वे निमित्तं स्वयमेव सम्यग्विचार्याह ॥ तप इति । कृते कृतयुगे । कृतास्तप आदि संज्ञाश्चत्वारोऽपि पादास्तव स्थिता इत्यर्थः । त्रेतादिषु युगेषु क्रमेण वर्धमानैरधर्माङ्गैरधर्मांशैस्तव त्रयः पादाः तपः शौचदयासंज्ञाः क्रमेण भग्नाः । किं संज्ञकैरधर्माङ्गैः । स्मयसङ्गमदैः स्मयादिशब्दवाच्यैः स्मयो गर्वस्तेन तपसो भङ्गः सङ्गो दुर्विषयसम्बन्धस्तेत शौचनाशो मद ऐश्वर्यादिजनितोत्सेकस्तेन दयाया इति ध्येयम् ॥ २३ ॥

इदानीं धर्मपादस्ते सत्यं निर्वर्तसे यतः ।
तं जिघृक्षत्यधर्मोऽयमनृतेनैधितः कलिः ॥ २४ ॥

प्रकाशिका— इदानीं कलियुगे यतो येन पादेन निवर्तसे नितरामात्मस्थितिं करोषि । हे धर्म । ते स पादः सत्यं सत्याभिधोऽवशिष्टोऽस्ति । अधर्मोऽधर्माभिमान्ययं क्षत्रवेषः कलिरनृतेनानृतसंज्ञकेनाधर्मपादेनैधितो वर्धितः सन् तं सत्याख्यं ते पादं जिघृक्षति गृहीतुमिच्छति । अस्मिन्युगे क्रमेण सोऽपि पादो भग्नो भविष्यतीत्यर्थः ॥ २४ ॥

इयञ्च भूर्भगवता न्यासितोरुभरा सती ।
श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका ॥ २५ ॥

प्रकाशिका— एवं वृषभस्वरूपमुक्त्वेदानीं गोस्वरूपमाह ॥ इयं चेति । इयं गौर्भूर्भूमिर्भगवता कृष्णेन न्यासितोऽन्योन्यद्वारेणावरोपित उरूर्भारो यस्याः सा तथोक्ता । कृतं कौतुकं रोमाञ्चादिरूपं यस्याः सा सती ॥ २५ ॥

शोचन्त्यश्रुकला साध्वी दुर्भगेवोज्झिताऽधुना ।
अब्रह्मण्याः नृपव्याजाः शूद्रा भोक्ष्यन्ति मामिति ॥ २६ ॥

प्रकाशिका— अधुना तत्पदन्यासैरुज्झिता सती दुर्भगेव भाग्यहीनेवाश्रूणि कलयति मुञ्चतीत्यश्रुकला । शोचती । शोके निमितान्तरमप्याह ॥ अब्रह्मण्या इति । ब्राह्मणभक्तिरहिताः शूद्रा वर्णबाह्या इति हेतोः शोचतीत्यन्वयः । शोचन्तीति पाठे आस्त इति शेषः ॥ २६ ॥

सूत उवाच–

इति धर्मं महीश्चैव सान्त्वयित्वा महारथः ।
निशातमाददे खड्गं कलयेऽधर्महेतवे ॥ २७ ॥

प्रकाशिका— निशातं निशितम् । अधर्महेतवे अधर्मप्रवर्तकाय । तं हन्तुमिति यावत् ॥ २७ ॥

तञ्जिघांसुमभिप्रेत्य विहाय नृपलाञ्छनम् ।
तत्पादमूलं शिरसा समगाद्भयविह्वलः ॥ २८ ॥

प्रकाशिका— जिघांसं हन्तुकामम् । अभिप्रेत्य ज्ञात्वा । पादमूलं पादाग्रमगात् । प्रपदयोः पतितोऽभूदित्यर्थः ॥ २८ ॥

पतितं पादयोर्वीरः कृपया दीनवत्सलः ।
शरण्यो नावधीच्छ्लोक्य आह चेदं हसन्निव ॥ २९ ॥

प्रकाशिका— शरण्य आश्रयणयोग्यः । श्लोक्यः सत्कीर्त्यर्हः ॥ २९ ॥

राजोवाच–

न ते गुडाकेशयशोधराणां बद्धाञ्जलेर्भो भयमस्ति किञ्चित् ।
न वर्तितव्यं भवता कथञ्चित् क्षेत्रे मदीये त्वमधर्मबन्धुः ॥ ३० ॥

प्रकाशिका— गुडागेशोऽर्जुनस्तस्य यशोधरा ये वयं तेषां तान्प्रति बद्धाञ्जलिर्येन तस्य ते । गुडाकेशयशोधराणामस्माकं सकाशादिति वा । किन्तु कथञ्चन केनाप्यंशेन । यस्मात्त्वमधर्मस्य बन्धुः । देहराष्ट्रोभयग्रहणाय क्षेत्र इत्युक्तम् ॥ ३० ॥

त्वां वर्तमानं नरदेवदेहेष्वनुप्रवृत्तोऽयमधर्मयूथः ।
लोभोऽनृतं चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दम्भः ॥ ३१ ॥

प्रकाशिका— अधर्मबन्धुत्वमेवोपपादयति ॥ त्वामिति । नरदेवानां राज्ञां देहेषु वर्तमानं त्वाम् । अनु अनन्तरम् । यद्यस्माल्लोभादिरूपोऽधर्मयूथोऽधर्मसमूहः प्रवृत्तो भवति । तस्मादधर्मबन्धुरित्यन्वयः । लोभः सद्व्यये प्राप्तेऽपि स्ववित्तापरित्यागः । अनार्यं दौर्जन्यम् । अंहो विहिताकरणनिषिद्धजं पापम् । ज्येष्ठाऽलक्ष्मीः । माया कपटम् ॥ ३१ ॥

न वर्तितव्यं तदधर्मबन्धो धर्मेण सत्वेन च वर्तितव्ये ।
ब्रह्मावर्ते यत्र यजन्ति यज्ञैः यज्ञेश्वरं ब्रह्मवितानयज्ञाः ॥ ३२ ॥

तात्पर्यम्— ब्रह्मयज्ञा वितानयज्ञाश्च ॥ ३२ ॥

प्रकाशिका— तत् तस्माद्वर्तितव्ये वर्तितुमर्हे ब्रह्मावर्ते विन्ध्यहिमवत्पर्वतयोर्मध्ये देशे । ब्रह्मवितानयज्ञा इत्येतदप्रतीत्या व्याख्याति ॥ ब्रह्मेति । द्वन्द्वान्ते श्रूयमाणस्य यज्ञशब्दस्य प्रत्येकं सम्बन्ध इति भावः । तथा च ब्रह्मपर्यन्तमुमादिदेवानां यज्ञो विलयोत्पत्तिचिन्तनं येषां ते ब्रह्मयज्ञा इत्यर्थः । एतेषां ब्रह्मपर्यन्तं विलयोत्पत्तिचिन्तनम् । ब्रह्मयज्ञ इति प्रोक्तः इति पूर्वमुक्तत्वात् । ब्रह्मस्वाध्याय ज्ञाननं यज्ञो येषामिति वा । स्वाध्यायज्ञानयज्ञाश्चेत्यन्यत्रोक्तत्वात् । वितानं चरु पुरोडाशादिद्रव्यविस्तारस्तेन क्रियमाणो यज्ञो येषां ते वितानयज्ञाः । ब्रह्मयज्ञाश्च वितानयज्ञाश्च ब्रह्मवितानयज्ञा मुनय इति मूलं व्याख्यायमिति भावः ॥ ३२ ॥

यस्मिन्हरिर्भगवानिज्यमान इष्टात्ममूर्तिर्यजतां शं तनोति ।
कामानमोघान्स्थिरजङ्गमानामन्तर्बहिर्वायुरिवेश आत्मा ॥ ३३ ॥

तात्पर्यम्— इष्टात्ममूर्तिरिच्छातनुः ॥ ३३ ॥

प्रकाशिका— इष्टात्ममूर्तिरित्येतदप्रतीत्या व्याख्याति ॥ इष्टेति । तथा चेष्टमिच्छा । भावे क्तः । तेन गृहीताऽऽत्मभूता मूर्तिर्यस्येति व्याख्येयमिति भावः । शं सुखं कामांश्च । नन्विन्द्रादिदेवा इज्यन्ते न तु हरिरतः कथं स फलप्रद इत्यत उक्तम् ॥ स्थिरजङ्गमानामन्तर्बहिरात्मा व्याप्त इति । नाकाशव्याप्त इत्याह ॥ ईश इति । प्रेरक इत्यर्थः । क इव । वायुरिव यथा वायुरन्तर्बहिश्च व्याप्तः प्रेरकश्च तथेत्यर्थः ॥ ३३ ॥

परीक्षितैवमादिष्टः स कलिर्जातवेपथुः ।
तमुद्यतासिमाहेदं दण्डपाणिमिवोद्यतम् ॥ ३४ ॥

प्रकाशिका— उद्यतासिमुद्यतखड्गम् । दण्डपाणिमिव यममिवोद्यतमुद्युक्तम् । हन्तुमिति शेषः। ॥ ३४ ॥

यत्र क वाऽथ वत्स्यामि सार्वभौम तवाज्ञया ।
लक्षये तत्र तत्रापि त्वामात्तेषुशरासनम् ॥ ३५ ॥

प्रकाशिका— अत्र न वर्तितव्यमिति या तवाज्ञा तया यत्र क वा ब्रह्मावर्तदेशादितरस्मिन्देशेऽहं वत्स्यामि किन्तु तत्राप्यत्तो गृहीत इषुः शरासनं च येन तं त्वामेव लक्षये पश्यामि । तत्रापि मद्वधार्थं त्वमागमिष्यसीत्यर्थः ॥ ३५ ॥

तन्मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टुमर्हसि ।
यत्रैव नियतो वत्स्य आतिष्ठंस्तेऽनुशासनम् ॥ ३६ ॥

प्रकाशिका— तत्तस्मान्नियतोनिश्चलो आतिष्ठन् अनुतिष्ठन् ॥ ३६ ॥

सूत उवाच—

अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ ।
द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः ॥ ३७ ॥

प्रकाशिका— स्थानानि दर्शयति ॥ द्यूतमिति ॥ द्यूतं देवनम् । पानं मद्यादेः । सूना प्राणहिंसनम् । यत्र येषु स्थानेषु स्मयसङ्गमदातृतरूपश्चतुर्विधोऽधर्मः । स्यादिति शेषः । द्यूतेऽनृतं पाने मदः स्त्रीषु सङ्गापरपर्यायः कामो हिंसायां निर्घृणताऽपरपर्यायः स्मय इति विवेकः । चतुर्विधस्यापि यत्रैकत्रावस्थानं तादृशं स्थानं देहीति ॥ ३७ ॥

पुनश्च याचमानाय जातरूपमदात्प्रभुः ।
ततोऽनृतं मदः कामो रजो वैरञ्च पञ्चमम् ॥ ३८ ॥

प्रकाशिका— पुनर्याचमानाय जातरूपं सुवर्णमदात् । स्थानतयेति शेषः । जातरूपस्योक्तचतुर्विधाधर्मस्थानत्वं दर्शयति ॥ तत इति । जातरूपात्कामः सङ्गापरपर्यायः । रजो रागमूला हिंसा ॥ ३८ ॥

अमूनि पञ्चस्थानानि ह्यधर्मप्रभवः कलिः ।
औत्तरेयेण दत्तानि न्यवसत्तन्निदेशकृत् ॥ ३९ ॥

प्रकाशिका— अमून्यमूषु स्थानेषु न्यवसदित्यर्थः ॥ ३९ ॥

अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित् ।
विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः ॥ ४० ॥

तात्पर्यम्— विहितातिरेकेण न सेवेत ॥ ४० ॥ इति प्रथमतात्पर्ये सप्तदशोऽध्यायः ॥१७॥

प्रकाशिका— अथ तस्माद्बुभूषुर्मुक्तो भवितुमिच्छुः । गुरुर्धर्मोपदेष्टाऽपि ॥ ४० ॥

वृषस्य नष्टांस्त्रीन्पादांस्तपः शौचं दयामिति ।
प्रतिसन्दध आश्वास्य महीञ्च समवर्धयत् ॥ ४१ ॥

प्रकाशिका— नन्वत्र पानस्त्रीसूनानां वेदविहितानां धर्मसाधनत्वात्कथमेतानि न सेवेतेत्युक्तमित्यतोऽत्र विवक्षितं तात्पर्यमाह ॥ विहितेति । तथा च विहितविषयमेतदिति भावः । वृषस्य धर्मस्य पादान् प्रतिसन्दधे तप आदीनि प्रवर्तितवानित्यर्थः ॥ ४१ ॥

स एष एतर्ह्यध्यास्त आसनं पार्थिवोचितम् ।
पितामहेनोपन्यस्तं राज्ञाऽरण्यं विविक्षता ॥ ४२ ॥

प्रकाशिका— तेनैव कलिं निगृह्य धर्मस्य प्रवर्तित्वादेव भवतामिदानीं सत्रे प्रवृत्तिरित्याह ॥ य एष इत्यादिना । एतर्हि समीपकाल एव पार्थिवानां राज्ञामुचितमानसं सिंहासनमध्यास्ते । लट् लुङर्थे । उपन्यस्तं दत्तम् । विविक्षता प्रवेष्टुमिच्छता ॥ ४२ ॥

आस्तेऽधुना स राजर्षिः कौरवेन्द्रः श्रियोल्लसन् ।
गजाह्वये महाभागश्चक्रवर्ती बृहच्छ्रवाः ॥ ४३ ॥

प्रकाशिका— आस्ते आसीत् ॥ ४३ ॥

इत्थं भूतानुभावोऽयमभिमन्युसुतो नृपः ।
यस्य पालयतः क्षोणीं यूयं सत्राय दीक्षिताः ॥ ४४ ॥

॥ इति श्रीमद्भागवते प्रथमस्कन्धे सप्तदशोऽध्यायः ॥

प्रकाशिका— अधुना च समीपकाल एव । बृहच्छ्रवा महायशाः । पालयतः सतः । अनेन परीक्षिज्जीवनकाल एव सत्रारम्भ इति सूचयति । सत्रे सूतागमनं तु परीक्षिन्मरणानन्तरमेव । राज्ञः प्रायोपवेशनसमये शुकेनोपदिष्टं पुराणं मयाऽपि श्रुतम् । तत्तुभ्यं वक्ष्यामीति पूर्वं सूतेनोक्तत्वात् । अत आस्त इत्यादिसूतवचनमतीतार्थतयैव व्याख्येयं ॥ ४४ ॥ इति श्रीभागवतटिप्पण्यां सप्तदशोऽध्यायः ॥ १-१७ ॥

अथ अष्टादशोऽध्यायः

सूत उवाच—

यौ वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः ।
अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः ॥ १ ॥

प्रकाशिका— अत्र परीक्षितो मरणनिमित्तं ब्रह्मशापं वक्तुमादौ तावच्छापश्रवणेऽपि श्रीकृष्णनुग्रहेणैव तस्य चित्तखेदो न जातः किन्तु मोक्षसाधनज्ञानादिकमेव सम्पादितवानित्याह ॥ यो वा इत्यादिना । विप्लुष्टो दग्धः ॥ १ ॥

ब्रह्मशापोत्थितायस्तु तक्षकात्प्राणविप्लवे ।
न सम्मुमोहोरुभयाद्भगवत्यर्पिताशयः ॥ २ ॥

प्रकाशिका— स उत्थितात्प्रेरितात् । तक्षकान्नागात्प्राणविप्लवे जीवनाशे प्राप्ते सति । उरुभयं यस्मिंस्तस्मात् मरणान्न संमुमोह । तत्र हेतुः । भगवति कृष्णेऽर्पिताशय इति ॥ २ ॥

उत्सृज्य सर्वतः सङ्गं विज्ञानार्जितसंस्थितिः ।
वैयासकेर्जहौ शिष्यो गङ्गायां स्वकलेवरम् ॥ ३ ॥

तात्पर्यम्— विज्ञानमात्मयोग्यं स्वाज्ज्ञानं साधारणं स्मृतमिति भागवत तन्त्रे ॥ ३ ॥

प्रकाशिका— न केवलं मोहं न प्रापेत्येव किन्तु सर्वतः सङ्गं स्नेहमुत्सृज्य । वैयासकेः शुकस्य शिष्यो भूत्वा तदुपदेशेन प्राप्तं यद्विज्ञानं तेनार्जिता सम्पादिता संस्थितिः वैकुण्ठाख्यसमीचीनं स्थानं येन सः । गङ्गायां विद्यमाने प्रासादे स्वकलेवरं जहौ । अत्र विज्ञानपदस्य विवक्षितमर्थं प्रमाणेनैवाह ॥ विज्ञानमिति । आत्मयोग्यं स्वयोग्यमुक्तिसाधने समर्थम् । ज्ञानमिति शेषः । साधारणं सर्वाधिकारिसाधारणं यद्धरिसर्वोतमत्वादिज्ञानं तज्ज्ञानं स्मृतमित्यर्थः ॥ ३ ॥

नोत्तमश्लोकवार्तानां जुषतां तत्कथामृतम् ।
स्यात्सम्भ्रमोऽन्तकालेऽपि स्मरतां तत्पदाम्बुजम् ॥ ४ ॥

प्रकाशिका— नैतदाश्चर्यमित्याह ॥ नोत्तमेति । उत्तमश्लोकस्य हरेरेव वार्ता येष्वत एव तत्कथारूपममृतं जुषतां सेवतामनन्तरं तत्पदाम्बुजं स्मरतां ध्यायताम् । अन्तकाले निश्चितेऽपि सम्भ्रमश्चितखेदो न स्यात् ॥ ४ ॥

तावत्कलिर्नप्रभवेत्प्रविष्टोऽपीह सर्वतः ।
यावदीशो महानुर्व्यामाभिमन्यव एकराट् ॥ ४ ॥

प्रकाशिका— ननु परीक्षिद्राज्यपरिपालनकालस्य कलिस्वामिकत्वात्कथं तद्व्याप्तचित्तेषु ज्ञानिषु मरणे ज्ञाते सम्भ्रमो न स्यादित्यत आह ॥ तावदिति । न प्रभवेत्स्वकार्यकरणे समर्थो न भवेदित्यर्थः। आभिमन्यवोऽभिमन्योः पुत्रः । एकराट् चक्रवर्ती । ईशः शिक्षकः । न चैवं न वर्तितव्यं भवतेति पूर्वोक्ताज्ञाविरोधस्तत्रापि त्वदीयसामर्थ्यं द्यूतादावेव प्रदर्शनीयं न सर्वत्रेत्येवाभिप्रायस्य विवक्षितत्वात् ॥ ५ ॥

यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गाम् ।
तदैवेहानुवृत्तोसावधर्मप्रभवः कलिः ॥ ६ ॥

प्रकाशिका— ननु तदा कलेः प्रवेश एव किं न स्यादित्यत आह ॥ यस्मिन्नहनीति । यर्हि यस्मिन्नेव क्षणे गां पृथ्वीम् । अनुवृत्तः प्रविष्टोऽधर्मस्य प्रभवो यस्मात्सः ॥ ६ ॥

नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक् ।
कुशलान्याशु सिद्ध्यन्ति नेतराणि कृतानि यत् ॥ ७ ॥

प्रकाशिका— नन्वधर्महेतुं कलिं सर्वथा किं न हतवानित्यत आह ॥ नानुद्वेष्टीति । सारङ्गो भ्रमर इव सारभुक् सारग्राही । कलिगतं सारं दर्शयति ॥ कुशलानीति । कुशलानि पुण्यान्याश्वल्पानुष्ठानमात्रेण सिद्ध्यन्ति महाफलकारणानि भवन्ति । इतराणि पापान्याशु न सिद्ध्यन्ति किन्तु महान्त्यपि स्वल्पफलप्रदान्येव भवन्ति ॥ ७ ॥

किन्नु बालेषु शूरेण कलिना शूरभीरुणा ।
अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्तते ॥ ८ ॥

प्रकाशिका— द्वेषाभावे किं तत्र स्निग्धो न किं तूदास्त इत्याह ॥ किन्तु बालेष्विति । तेन कलिना किं नु भवेन्न किमपि । कथं भूतेन । बालेष्वधीरेषु शूरेण धीरेषु भीरुणा । यः प्रमत्तेषुनृष्वप्रमत्तः स्वयं सावधानो वृक इव वर्तते ॥ ८ ॥

उपवर्णितमेतद्वः पुण्यं पारीक्षितं मया ।
वासुदेवकथोपेतमाख्यानं यदपृच्छथ ॥ ९ ॥

प्रकाशिका— यदपृच्छथ पृष्टवन्तो यूयम् ॥ ९ ॥

या याः कथाः भगवतः कथनीयोरुकर्मणः ।
गुणकर्माश्रया पुम्भिः सेव्यास्तास्ताः बुभूषुभिः ॥ १० ॥

प्रकाशिका— यथेयं परीक्षितः कथा भगवतो गुणकर्माश्रयत्वात्सेव्यासीत् । तथाऽन्या अपि तादृश्यः कथा मुमुक्षुभिः सेव्या इत्याह ॥ या या इति । बुभूषूभिर्मोक्षकामैः ॥ १० ॥

ऋषय ऊचुः-

सूत जीव समाः सौम्य शाश्वतीर्विशदं यशः ।
यस्त्वं शंससि कृष्णस्य मर्त्यानाममृतं हि नः ॥ ११ ॥

प्रकाशिका— पुनर्विस्तरेण कथनार्थं सूतमाशीर्वादेनाभिनन्दयन्ति ॥ सूतेति । शाश्वतीः समा बहून्वत्सरान् । जीव प्राणान्धारय । अत्यन्तसंयोगे द्वितीया । हि यस्मान्मर्त्यानां मरणधर्मिणां नोऽस्माकममृतं मरणनिवर्तकं यशः शंससि कीर्तयसि ॥ ११ ॥

कर्मण्यस्मिन्ननाश्वास्ये धूमधूम्रात्मनां भवान् ।
आपाययति गोविन्दपादपद्मासवं मधु ॥ १२ ॥

प्रकाशिका— आशीर्वादे निमितान्तरमप्याह ॥ कर्मणीति । अस्मिन्कर्मणि सत्रे । अनाश्वास्येऽविश्वसनीये वैगुण्यबाहुल्येन फलनिश्चयाभावात् । धूमेन धूम्रो वर्ण आत्मा देहो येषाम् ते । कर्मणि षष्ठी । तान् । आसवं मकरन्दम् । मधु मधुरम् ॥ १२ ॥

तुलयाम लवेनाऽपि न स्वर्गं नापुनर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥ १३ ॥

तात्पर्यम्— सम्यक्स्वरूपाभिव्यक्तिरभावो जननस्य च । अप्रयत्नात्ततो वृद्धिहेतोः सत्सङ्गतिर्वरेति वायुप्रोक्ते ॥ १३ ॥

प्रकाशिका— अनाश्वास्य इत्यादिकर्मनिन्दावचनस्य न स्वार्थे तात्पर्यं किन्तु गोविन्दपादपद्मासवपानस्तुतावेवेत्यवगन्तव्यम् । अत एव कोऽसि तद्ददेत्यादि वाक्यस्य तात्पर्यमुक्तं शास्त्रे । गोविन्दपादपद्मासवपानेन किं सुखं लब्धं भवद्भिर्येनैवमुच्यत इत्याशङ्कायां भगवत्सङ्गलब्धगोविन्दपादपद्मासवपानजं यत्सुखमिदानीमस्माकं तस्य सदृशं सुखं न क्वापीत्याशयेनाहुः ॥ तुलयामेति । भगवत्सङ्गिनो विष्णुभक्तास्तेषां सङ्गस्य तल्लब्धसुखस्य यो लव एकदेशस्तेनापि स्वर्गं न तुलयामः । तुलयितुं समर्था न भवामः । न वाऽपवर्गम् । मर्त्यानां विद्यमाना आशिषो राज्याद्यास्तुच्छा न तुलयामीति किमु वक्तव्यम् । अत्र शौनकादीनामिदानीं श्रवणजनितसुखस्य लवेनापवर्गं न तुलयाम इति वचनेन मोक्षसुखस्य सांसारिकशौनकादिसुखापेक्षयाऽल्पत्वमुच्यते तत्प्रमाणबाधितमतोऽत्र विवक्षितं तात्पर्यं प्रमाणेनैव दर्शयति ॥ सम्यगिति । अल्पानामधिकारिणां प्रयत्नात् । या तेषां सम्यक् स्वरूपाभिव्यक्तिर्जननस्याभावोऽनिष्ठनिवृत्तिश्च भवति । अतस्तादृशाधिकारिमुक्त्यपेक्षयोत्तमानां जीवन्मुक्तानां सत्सङ्गतिर्वरा । कुतः । वृद्धिहेतोरधिकसुखाभिव्यक्तिहेतुत्वात् । नीचाधिकारिमुक्त्यपेक्षयोत्तमाधिकारिणः सांसारिकस्यापि सत्सङ्गलब्धश्रवणादिना जायमानसुखाभिव्यक्तिरधिका । अतस्तद्विषय मे तद्वाक्यमिति भावः स्वरूपस्यात्व्यालिरिति पाठे अल्पयत्नात् सम्यक् स्वरूपस्या व्यक्तिर्यस्मिन् तादृशो यो जननस्याभावः जननराहित्य मात्रात्मक इति यावत् । ततो मोक्षात्सान्तानिकलोकवासरूपात्सत्सङ्गतिर्वरा । कुतो वृद्धिहेतोरानन्दाभिवृद्धिहेतुत्वादित्यर्थः तथा च वक्ष्यति चतुर्थ स्कन्धतात्वर्ये "सङ्गोभागवतै भूयानपुनर्भवमात्रतः । यतो विसृष्टमानन्दं मुक्तो जनयति स्पुटमिति ॥ १३ ॥

को नाम तृप्येद्रसवित्कथायां महत्तमैकान्तपरायणस्य ।
नान्तं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्ममुख्याः ॥ १४ ॥

प्रकाशिका— नन्वेतावत्पर्यन्तं मदुक्तकथामृतपानेन भवतामीदृशी सुखाभिव्यक्तिर्जाताऽतः किं पुनस्तत्कथनेनेति त्वया नोपरन्तव्यम् । अस्माकमधुनाऽपि तत्रालम्बुद्ध्यभावादित्याशयेनाहुः ॥ को नामेति । तृप्येदलम्बुद्धिं प्राप्नुयात् । रसवित्सारज्ञः शृङ्गारादिरसज्ञानी वा । भगवतः सारत्वमुपपादयितुमुक्तम् ॥ महत्तमैकान्तपरायणस्येति । महत्तमा ब्रह्माद्यास्तेषामेकान्तेन नियमेन परमयनमाश्रयो यस्तस्य कथायाम् । प्रकारान्तरेण सारत्वोपपादनाय नान्तमित्यादि । अगुणस्य सत्त्वादिगुणरहितस्य गुणानां ज्ञानानन्दादिशुभधर्माणामन्तं पारं न जग्मुः । एतावन्त एव गुणा इति न परिगणयाञ्चक्रुः । भवः शिवः पाद्मो ब्रह्मा ॥ १४ ॥

ततो भवान्वै भगवत्प्रधानो महत्तमैकान्तपरायणस्य ।
हरेरुदारं चरितं विशुद्धं शुश्रूषतां नो वितनोतु विद्वन् ॥ १५ ॥

प्रकाशिका— यतोनोस्माकं नालम्बुद्धिः ततः । हे विद्वन् । भगवानेव प्रधानः सर्वव्यापारेषू-द्देश्यो यस्य स भगवत्प्रधानो भगवान्वितनोतु विस्तारयतु ॥ १५ ॥

तन्नः परं पुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठम् ।
आख्याह्यनन्ता चरितोपपन्नं पारीक्षितं भागवराभिरामम् ॥ १६ ॥

प्रकाशिका— तदाख्यानं भागवतं पुराणम् । असंवृतार्थं यथा भवति तथा । स्पष्टमिति यावत् । तत् न आख्याहीत्यन्वयः । पुण्यं चित्तशोधकम् । अत्यद्भुतेषु लोकविलक्षणफलसाधकेषु योगेषु हरिभक्तिनिवृत्तिकर्मादिरूपज्ञानोपायेषु निष्ठा तात्पर्यातिशयो यस्य तत् अनन्तस्य हरेराचरितैः कर्मभिरुपपन्नं युक्तम् । तत्प्रतिपादकमिति यावत् । अत एव भागवताभिरामं भागवतानां मनाहरं पारीक्षितं परीक्षिते कथितत्वात्परीक्षित्सम्बन्धि । अवशिष्टं परीक्षित्सम्बन्ध्याख्यानं चेति वा ॥ १६ ॥

स वै महाभागवतः परीक्षिद्येनापवर्गाख्यमदभ्रबुद्धिभिः ।
श्रुतेन वैयासकिशब्दितेन भेजे खगेन्द्रध्वजपादमूलम् ॥ १७ ॥

प्रकाशिका— तच्च शुकपरीक्षित्संवादमुखेनैव कथयेत्याहुः ॥ स वा इति द्वाभ्याम् । अदभ्रबुद्धि-रनल्पबुद्धिः । वैयासकिना व्यासपुत्रेण शुकेन शब्दितेन कथितेन । श्रुतेन श्रवणविषयीकृतेन पुराणेन । अपवर्ग इत्याख्या यस्य तत् । खगेन्द्रध्वजस्य हरेः पादमूलं वैकुण्ठं भेजे ॥ १७ ॥

सूत उवाच-

अहो वयं जन्मभृतो महात्मन्वृद्धानुवृत्यापि विलोमजाताः ।
दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधानयोगः ॥ १८ ॥

कुतः पुनर्गृणतो नाम तस्य महत्तमैकान्तपरायणस्य ।
योऽनन्तशक्तिर्भगवाननन्तो महद्गुणत्वाद्यमनन्तमाहुः ॥ १९ ॥

तात्पर्यम्— अनन्तो देशातः कालतश्च ॥ १९ ॥

प्रकाशिका— महद्भिः श्रीमद्भागवतख्याने नियुक्तमात्मानं श्लाघते ॥ अहो वयमिति द्वाभ्याम् । हे महात्मन् शौनक । विलोमजाता नीचकूलप्रसूता अपि वयं वृद्धस्य ज्ञानवृद्धस्य शुकस्यानुवृत्त्या

सेवया । तच्छिष्यतयेति यावत् । जन्मभृतः सकलजन्मनोऽभूम । अहो आश्चर्यमस्मद्गुरुमाहात्म्यम् । शुकशिष्यतया कथं जन्मनः साफल्यमित्यत आह ॥ दौष्कुल्यमिति । दुष्कुलत्वनिमित्तं दौष्कुल्यम् । आधिं मनःपीडाम् । महत्तमानां परीक्षिदादीनां वैष्णवानामभिधानयोगः । शुकशिक्षितप्रकारेण कथाकथनलक्षण उपायः । विधुनोत्यपनयति । तस्य विष्णोर्नामगुणकर्मप्रतिपादकशब्दं गृणतः शुकोक्तप्रकारेण स्वयं कथयतो मम दौष्कुल्यमाधिं विधुनोतीति । कुतः पुनः किं पुनर्वक्तव्यम् । शुकशिक्षितवैष्णवकथाकथनेनैव यदा दौष्कुल्याधि परिहारोऽस्माकं तदा किं वाच्यं तदुक्तप्रकारेण हरिकथाकथनेनातो वृद्धानुवृत्त्या वयं जन्मभृत इति भावः । कैमुत्यं हि विष्णोर्महत्तमोत्तमत्वे भवेत् । तदेव कथमित्यत उक्तम् ॥ महत्तमैकान्तपरायणस्येति । इदमपि कुत इत्यत आह ॥ योऽनन्त इति । अत्र गुणानन्त्यस्य । महद्गुणत्वाद्यमनन्तमाहुरिति पृथगुक्तत्वात्पुनरनन्त इत्यस्य विवक्षितमर्थं दर्शयति ॥ अनन्त इति । तथा चात्र कालतो देशतश्चानन्त्यमित्यानन्त्यद्वयमेव विवक्षितमिति भावः । मूले सर्वकार्यकरणशक्तेः प्राधान्यात्पृथगुक्तिः । महान्तोऽगणिता अपरिच्छिन्ना वा गुणा यस्य स तथोक्तस्तस्य भावस्तत्वम् । तस्मादाहुर्वेदाः । स्थान्यादेशव्यत्ययेनान्महत इति विधेरनित्यत्वस्य ज्ञापितत्वान्महद्गुणेति साधु । भगवान् भगवच्छब्दमुख्यवाच्यः ॥ १८, १९ ॥

एतावताऽलं ननु सूचितेन गुणैरसाम्येऽनतिशायनेऽस्य ।
हित्वेतराम्प्रार्थयतो विभूतिर्यस्याङ्घ्रिरेणुं जुषतेऽनभीप्सोः ॥ २० ॥

प्रकाशिका— अत्र विष्णोर्महत्तमैकान्तपरायणत्वं साधयितुमनन्तशक्तित्वादिहेतुचतुष्टयमुक्तम् । तत्र तावद्गुणानन्त्यस्योक्तसाध्येन व्यतिरेकव्याप्तिप्रदर्शनायान्यस्य गुणैस्तत्साम्यं तदाधिक्यं च नास्तीत्यत्र युक्तिमाह ॥ एतावतेति । अस्य विष्णोर्गुणैर्यदा साम्यमन्यसाम्याभावः । अनतिशायनमाधिक्याभावश्च तस्मिन्विषये । एतावता सूचितेन संक्षेपत उक्तेन हेतुनाऽलं तमेवाह ॥ हित्वेति । विभूतिर्महालक्ष्मीर्विवाहसमये स्वानुग्रहं प्रार्थयत इतरान् ब्रह्मादीन्हित्वा एते मदनुग्रहोपजीव्याः, अतो मत्पतित्वे न योग्या इत्यभिप्रायेण तान्विहायेत्यर्थः । अनभीप्सोः स्वानुग्रहमनपेक्षस्य यस्य विष्णोरङ्घ्रिरेणुं जुषत इति । अनेन विष्णोर्गुणैः ब्रह्माद्युत्तमोत्तमत्वकथनेनान्यत्र गुणपूर्त्यभावो महत्तमैकान्तपरायणत्वाभावश्चोपपादित इति ज्ञातव्यम् ॥ २० ॥

अथापि यत्पादनखावसृष्टं जगद्विरिञ्चोपहृतार्हणाम्भः ।
सेशं पुनात्यन्यतमो मुकुन्दात्को नाम लोके भगवत्पदार्थः ॥ २१ ॥

प्रकाशिका— भगवत्पदमुख्यवाच्यत्वहेतोरप्यन्यत्र व्यतिरेकव्याप्तिमुपपादयति ॥ अथाऽपीति । अथेत्यर्थान्तरे । यस्य पादनखावसृष्टं पादनखसंसृष्टमपि विरिञ्चेनोपहृतं समर्पितमर्हणाम्भः

पूजासाधनमुदकं विरिञ्चकर्तृकपादावनेजनोदकमपीति यावत् । सेशं रुद्रेण सह वर्तमानं जगदधिकारिजनं पुनाति । मनःशुद्ध्यादिद्वारा मुक्तं करोति । अतो मुकुन्दादन्यतमः को नाम भगवत्पदस्यार्थो मुख्यवाच्यो न कोऽपीत्यर्थः मुख्याभिधेयस्त्वर्थः स्यात् वाच्यमन्यच्च भव्यते । जगदुत्तमयोर्विरिञ्चरुद्रयोरपि पूजकत्वपूतत्वाभ्यां नीचत्वावगमादिति भावः । एवमेव शक्त्याऽनन्तस्य स्वातन्त्र्येण देशतः कालतश्चानन्त्यस्य चान्यत्र व्यतिरेकव्याप्तिरुपपादनीया ॥ २१ ॥

यत्रानुरक्ताः सहसैव धीराः व्यपोह्य देहादिषु सङ्गमूढम् ।
व्रजन्ति तत्पारमहंस्यसत्यं यस्मिन्नहिंसोपरमश्च धर्मः ॥ २२ ॥

तात्पर्यम्— परमहंसाश्रमप्राप्यं सत्यं ब्रह्म ॥ २२ ॥

प्रकाशिका— एवमुक्तहेतुषु व्याप्तिमुपपाद्येदानीं पक्षे साध्यं निगमयन् महत्तमैकान्तपरायणत्वं विवृणोति ॥ यत्रेति । यत्र विष्णावनुरक्ता माहात्म्यज्ञानानुसारेण स्निग्धा धीरा हरिविषयकबुद्धौ रममाणाः । सङ्गं स्नेहम् । ऊढं निरूढम् । निरस्य यस्मिन्परमहंसाश्रमे । अहिंसा विहितहिसाया अप्यकरणम् । उपरमो विषयनिवृत्तिश्चधर्मः । विहित इति शेषः । तत्पारमहंस्यसत्यं व्रजन्ति । अत्र परमहंससम्बन्धिसत्यवचनमित्यन्यथाप्रतीतिनिवारणाय पारमहंस्यसत्यमित्यस्यार्थमाह ॥ परमहंसेति । तथा च परमहंसप्राप्यं पारमहंस्यं तच्च तत्सत्यं ब्रह्म चेति विग्रह इति भावः । अनेन महत्तमाः परमहंसा ब्रह्माद्या मौनवदितरेषामप्युपदेशादिति वचनात्तेषां विषयवैराग्यभक्तिज्ञानादिनैकान्तेन नियमेन परायणश्चरमप्राप्य इति महत्तमैकान्तपरायणत्वं विवृतमिति ज्ञातव्यम् । योऽनन्तशक्तिरित्यारभ्य यत्रानुरक्ता इत्यन्तानां यच्छब्दानां कुतः पुनरिति पूर्वश्लोकस्थेन तस्येत्यनेनान्वयः ॥२२॥

अहं हि पृष्टोऽस्य गुणान्भवद्भिराचक्ष आत्मावगमोऽत्र यावान् ।
नभः पतन्त्यात्मसमं पतत्रिणस्तथा समं विष्णुगतिं विपश्चितः ॥ २३ ॥

प्रकाशिका— नन्वेवं विष्णोरनन्तगुणवत्त्वेऽसौ त्वया साकल्येन वक्तुमशक्य इति प्राप्तमिति चेत् । बाढमित्याह ॥ अहं हीति । भवद्भिः पृष्टोऽहमस्य विष्णोर्गुणान् । अत्र विष्णुस्वरूपविषये यावानात्मावगम आत्मनो मम यावद्गुणविषयकं ज्ञानं तावदेव व्याचक्षे नाधिकम् । हि शब्देन वचनस्य ज्ञानानुसारित्वमनुभवसिद्धमिति दर्शयति । ननु तवात्राशक्तत्वेऽप्यन्ये ज्ञानिनः किं साकल्येन तान्गुणान्ज्ञातुं वक्तुं च समर्था इत्याशङ्कायां नेति सोदाहरणमाह ॥ नभ इति । यथा पतत्रिणः पक्षिणो नभ आकाशमात्मसमं स्वशक्त्यनुरूपमेव पतन्ति उत्पतन्ति । न कृत्स्नम् । तथा विपश्चितो ज्ञानिनो विष्णोर्गतिं स्थितिं समं स्वमत्यनुरूपमेव । वदन्तीति शेषः ॥ २३ ॥

एकदा धनुरुद्यम्य विचरन्मृगयां वने ।
मृगाननुगतः श्रान्तः क्षुधितस्तृषितो भृशम् ॥ २४ ॥

प्रकाशिका— इदानीमवशिष्टं परीक्षितमाख्यानं वक्ष्यन् तस्य निर्वेदनिमित्तं ब्रह्मशापं वक्तुमुपक्रमते ॥ एकदेति । उद्यम्य सज्जं कृत्वा । मृगयामुद्दिश्य वने विचरन् ॥ २४ ॥

जलाशयमचक्षाणः प्रविवेश स आश्रमम् ।
ददर्श मुनिमासीनं शान्तं मीलितलोचनम् ॥ २५ ॥

प्रकाशिका— जलाशयं जलस्थानं तटाकादिकमचक्षाणोऽपश्यन्ददृशे । तस्मिन्नाश्रम इति शेषः। शान्तमसम्प्रज्ञातसमाधिस्थम् ॥ २५ ॥

प्रतिरुद्धेन्द्रियप्राणमनोबुद्धिमुपारतम् ।
स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियम् ॥ २६ ॥

तात्पर्यम्— स्वतो मनः स्थितिर्विष्णौ ब्रह्मभाव उदाहृत इति ब्रह्माण्डे ॥ २६ ॥

प्रकाशिका— प्रतिरुद्धाः परमात्मन्येव सम्यक् स्थापिता इन्द्रियादयो येन तम् । अत एव विषयेभ्य उपारतम् । व्यावृत्तज्ञानम् । उपे आराद्रुद्रपालके हरौ सम्यग्रतिमिति वा । शान्तमित्युक्तमेव विशदयति ॥ स्थानेति । स्थानत्रयाज्जाग्रदाद्यवस्थात्रयात्परमवस्थान्तरम् । असम्प्रज्ञातसमाध्यवस्थामिति यावत् । प्राप्तम् । ब्रह्मभूतमित्येतद्ब्रह्मणैकीभूतमिति प्रतीतिवारणाय प्रमाणेनैव व्याख्याति ॥ स्वत इति । यत्रोपासकस्य ब्रह्मभाव उदाहृतस्तत्र विष्णावुपास्ये स्वतोऽनायासेन प्रयत्नं विना मनःस्थितिः मनसोऽवस्थानं ब्रह्मभाव शब्देन । व्याख्येयेति शेषः । एवं च ब्रह्मणि भूतं स्वत एव स्थितं मनो यस्य तमिति मूलं व्याख्येयमिति भावः । अत एवाविक्रियं विहितक्रियानुष्ठानशून्यम् । नैव तस्य कृतेनार्थ इति वचनात् ॥ २६ ॥

विप्रकीर्णजटाछन्नं रौरवेणाजिनेन च ।
विशुष्यत्तालुरुदकं तथाभूतमयाचत ॥ २७ ॥

प्रकाशिका— विप्रकीर्णाभिर्जटाभिश्छन्नं संवृतम् । रुरुर्मृगविशेषस्तस्य विद्यमानेनाजिनेन चर्मणा च छन्नम् । विशुष्यन्नीरसं तालुर्जिव्हामूलं यस्य सः । तथाभूतं एवं विशिष्टं मुनिम् ॥ २७ ॥

अलब्धतृणभूम्यादिरसंप्राप्तार्घ्यसूनृतः ।
अवज्ञातमिवाऽत्मानं मन्यमानश्चुकोप ह ॥ २८ ॥

प्रकाशिका— न लब्धं तृणं तृणासनं भूमिरूपवेशस्थानम् । आदिपदेन मधुपर्कादिकं च येन सः । न सम्प्राप्तमर्घ्यं सूनृतं स्वागतमित्यादिप्रियवचनं येन सः । आत्मानं स्वात्मानम् । मुनिनाऽवज्ञातमिव मन्यमानः । हेत्याश्चर्ये ॥ २८ ॥

अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः ।
ब्राह्मणं प्रत्यभूद् ब्रह्मन्मत्सरो मन्युरेव च ॥ २९ ॥

तात्पर्यम्— अप्रीतिर्मद्वशो नायमिति मत्सर ईरित इति नाममहोदधौ ॥ २९ ॥

प्रकाशिका— तदेवाह ॥ अभूतपूर्व इति । मत्सरो मन्युरेव चेत्यत्र मन्युशब्दागतार्थतया मत्सरशब्दं प्रमाणनैव दर्शयति ॥ अप्रीतिरिति । अप्रीतिः प्रीत्यभावः । चित्ततोद इति यावत् । न मद्वशोऽसाविति चित्ततोद एव मत्सरशब्दार्थः । मन्युशब्दार्थस्तु क्रोध एव प्रसिद्ध इति भावः । मूले मन्युरेव न भक्तिरित्येव शब्दार्थः ॥ २९ ॥

स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा ।
विनिर्गच्छन्धनुष्कोट्या निधाय पुरमागतः ॥ ३० ॥

प्रकाशिका— स राजा गतासुमुरगं मृतं सर्पं ब्रह्मर्षेरंसे धनुष्कोट्या चापाग्रेण निधाय पुरमागत इत्यन्वयः ॥ ३० ॥

एष किं निभृताशेषकरणो मीलितेक्षणः ।
मुधासमाधिराहोस्वित् किन्नः स्यात्क्षत्रबन्धुभिः ॥ ३१ ॥

प्रकाशिका— पुरमागच्छतस्यालोचनप्रकारमाह ॥ एष इति । एष ब्रह्मर्षिः किं निभृताशेषकरणो नितरां भृतानि परतत्त्वविषय एव स्थापितानि करणानि सकलेन्द्रियाणि येन स तथाविधः सन् स्थितः । आहो स्विन्नोऽस्माकं क्षत्रबन्धुभिः किं प्रयोजनं स्यादित्यस्मदवज्ञया मुधा मृषा समाधिः सन् मीलितेक्षणः स्थित इत्यालोचयन्पुरमागत इत्यन्वयः ॥ ३१ ॥

तस्य पुत्रोऽतितेजस्वी विहरन्बालकोऽर्भकैः ।
राज्ञाऽघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत् ॥ ३२ ॥

प्रकाशिका— तस्य ऋषेः पुत्रः शृङ्गी । तेजस्वीत्यनेन तस्य शापदाने सामर्थ्यं दर्शितम् । अघमवमानम् । अपराधं वा । राजकर्तृकापराधप्राप्तिविषयमित्यर्थः । तातं स्वपितरम् । तत्र बालकमध्ये ॥ ३२ ॥

अहो अधर्मः पालानां पृथ्व्याः बलिभुजामिव ।
स्वामिन्यघं यद्दासानां द्वारपानां शुनामिव ॥ ३३ ॥

प्रकाशिका— पृथ्व्याः पालानां राज्ञामधर्मो धर्मातिक्रमोऽद्य दृष्टः । अधर्ममेवाह ॥ स्वामिनीति । दासानां स्वामिनि यदघमपराधाचरणम् । केषामिव बलिभुजां काकानामिव । द्वारपालानां शुनामिव चेति यत्स एषोऽधर्म इत्यन्वयः ॥ ३३ ॥

ब्राह्मणैः क्षणबन्धुर्हि द्वारपालो निरूपितः ।
स कथं तद्गृहे द्वास्थः सभाण्डं भोक्तुमर्हति ॥ ३४ ॥

प्रकाशिका— राज्ञां ब्राह्मणदासत्वे भवेदेतत् । तदेव कुत इत्यत आह ॥ ब्राह्मणैरिति । ब्रह्माणन्तीति ब्राह्मणास्तैर्वेदज्ञानिभिर्मरीच्यादिभिर्मन्वादिभिः क्षत्रबन्धुः । ब्राह्मणानां गृहपालो दासो निरूपितो धर्मशास्त्रेषु प्रतिपादितो हि यस्मात्तस्मात्स द्वास्थो द्वारपालकेन शुना तुल्यः । कथम् । सभाण्डं भाण्डसहितं गृहं भोक्तुं स्पृष्टुमर्हति । द्वारपालके स्व तुल्येन हि द्वार एव स्थित्वोदकादिकं याच्यम् । अनेन तु कथमन्तःप्रविश्यास्मत्स्पर्शादिकं कृतम् । अतोऽसौ दण्ड्य इत्यभिप्रायः ॥ ३४ ॥

कृष्णे गते भगवति शास्तर्युत्पथगामिनाम् ।
तान्भिन्नसेतूनद्याहं शास्मि पश्यत मे बलम् ॥ ३५ ॥

प्रकाशिका— भिन्नसेतून् लङ्घितमर्यादान् शास्मि दण्डयामि । मे बलं सामर्थ्यं पश्यत । हे बाला इति शेषः ॥ ३५ ॥

इत्युक्त्वा रोषताम्राक्षः वयस्यानृषिबालकान् ।
कौशिक्यप उपस्पृश्य वाग्वज्रं विससर्ज ह ॥ ३६ ॥

तात्पर्यम्— कौशिकी कुशपाणिः ॥ ३६ ॥

प्रकाशिका— कौशिकी अप इति पदच्छेदः । तत्र कौशिकीत्यस्य विवक्षितमर्थं दर्शयति ॥ कौशिकीति । कुशनिर्मितपवित्रपाणिरित्यर्थः । तथा च कुशनिर्मितं कौशिकं पवित्रं तदस्यास्तीति कौशिकीति मूलार्थ इति भावः । कुशसम्बन्धी पाणिः कौशिकः । सोऽस्यास्तीति वा । अप उपस्पृश्याचम्य । वाग्वज्रं शापलक्षणं वज्रं विससर्ज प्रयुक्तवान् । राज्ञ इति शेषः । कौशिक्या नद्या

अप इति व्याख्यानं तु जलाशयमचक्षाण इत्यनेन विरुद्धत्वाचिन्त्यम् । ह कष्टम् । एवं विधं शापं नोचितमित्याशयः ॥ ३६ ॥

इतो लङ्घितमर्यादं तक्षकः सप्तमेऽहनि ।
धक्ष्यति स्म कुलाङ्गारं चोदितो मे पितृद्रुहम् ॥ ३७ ॥

प्रकाशिका— इतोऽद्यतनादन्हः सप्तमेऽहनि मे मया चोदितः प्रेरितस्तक्षकस्तन्नामसर्पः कुलाङ्गारं कुलस्य विनाशने वन्हिस्थानीयं पितृद्रुहं परीक्षितं धक्ष्यति भस्मीकरिष्यति । स्मेत्यनेनात्र स्वसाक्ष्येव प्रमाणमिति दर्शयति ॥ ३७ ॥

ततोऽभ्येत्याश्रमं बालो गलेसर्पकलेवरम् ।
पितरं वीक्ष्य दुःखार्तो मुक्तकण्ठो रुरोद ह ॥ ३८ ॥

प्रकाशिका— गले सर्पकलेवरं यस्येत्यलुक् समासः । मुक्तकण्ठरुच्चैरित्यर्थः । हेत्यनेन बालकत्वादिति हेतुं सूचयति ॥ ३८ ॥

स वै आङ्गिरसो ब्रह्मन्श्रुत्वा सुतविलापनम् ।
उन्मील्य शनकैर्नेत्रे दृष्ट्वा चांसे मृतोरगम् ॥ ३९ ॥

प्रकाशिका— वै शब्दः सुतस्नेहविशेषद्योतकः । विलापनं रोदनम् ॥ ३९ ॥

विसृज्य पुत्रं पप्रच्छ वत्स कस्माद्विरोदिषि ।
केन वा ते विप्रकृतमित्युक्तः स न्यवेदयत् ॥ ४० ॥

प्रकाशिका— विसृज्य निष्कास्य । विप्रकृतं विपरीतं कृतम् । केन तवापकारः कृत इत्यर्थः ॥ ४० ॥

निशम्य शप्तमतदर्हं नरेन्द्रं स ब्राह्मणो नात्मजमभ्यनन्दत् ।
अहो बतांहो महदद्य ते कृतमल्पीयसि द्रोह उरुश्रमो धृतः ॥ ४१ ॥

प्रकाशिका— अतदर्हं शापस्यार्हो योग्यो न भवतीत्यतदर्हस्तम् । न केवलं नाभ्यनन्दत्किन्तु अनिन्दच्चेत्याह ॥ अहो इति । अंहःपापं । बत कष्टम् । अल्पीयस्यणुतमे द्रोहेऽपराधे । उरुश्रमो महान्दुःखः ॥ ४१ ॥

न वै नृभिर्नरदेवोऽपराध्यः तं शप्तुमर्हस्यविपक्वबुद्धे ।
यत्तेजसा दुर्विषहेथ गुप्ता विन्दन्ति भद्राण्यकुतोभयाः प्रजाः ॥ ४२ ॥

प्रकाशिका— त्वया पापं कृतमित्यत्र हेत्वन्तरमप्याह ॥ न वा इति । वैशब्दो धर्मशास्त्र-प्रसिद्धिद्योतकः । नराणां देवः स्वामी राजा तदधीनैः नृभिर्नापराध्योऽतः कथं त्वं शप्तुमर्हसि । स्वामिद्रोहस्य पापसाधनत्वादिति भावः । तद्द्रोहे कृतघ्नता च भवतीत्याह ॥ यत्तेजसेति । यस्य राज्ञः तेजसा सामर्थ्येन विन्दन्ति प्राप्नुवन्ति ॥ ४२ ॥

अरक्षमाणे नरदेवनाम्नि रथाङ्गपाणावयमङ्ग लोकः ।
तदा हि चोरप्रचुरो विनङ्क्ष्यत्यरक्ष्यमाणो विवरूथवत्क्षणात् ॥ ४३ ॥

तात्पर्यम्— सेना पराकिणी प्रोक्ता वरूथो गुप्तिरुच्यत इत्यभिधानम् ॥ ४३ ॥

प्रकाशिका— व्यतिरेकमप्याह ॥ अरक्ष्यमाण इति । नरदेवान्तर्यामित्वान्नरदेवनाम्नि रथाङ्गपाणौ चक्रहस्ते विष्णावरक्ष्यमाणे सति । हे अङ्ग । अयं लोकश्चोरप्रचुरः स्यात् । कुतः । हि यस्माद-रक्ष्यमाणस्तदा हि चोरप्राचुर्ये सति क्षणादविलम्बेन विनंक्ष्यति नाशमेष्यति । जगत्पाल-कविष्ण्वधिष्ठानत्वाच्च नायमपराध्य इति सूचयितुं नरदेवनाम्नि रथाङ्गपाणावित्युक्तम् । क्षणाद्विनंक्ष्य-तीत्यत्र दृष्टान्तमाह ॥ विवरूथवदिति । अत्र विवरूथवदिति विच्छिद्य मेवसङ्घवदिति व्याख्यानं वरूथशब्दार्थाज्ञाननिबन्धनमित्यभिप्रेत्य वरूथ शब्दार्थं प्रमाणेनैव दर्शयति ॥ सेनेति । गुप्तिः रक्षणम् । तेन विगतो वरूथो रक्षणं यस्य तद्विवरूथं रक्षकरहितं वस्तु तद्वदित्यर्थः ॥ ४३ ॥

तदद्य नः पापमुपैत्यनन्वयं यन्नष्टनाथस्य पशोर्विलुम्पकाः ।
परस्परं घ्नन्ति शपन्ति वृञ्जते पशून् स्त्रियोऽर्थान्पुरदस्यवो जनाः ॥ ४४ ॥

तात्पर्यम्— विड्राष्ट्रं पशुरुत्सेको भ्रमरश्चेति कथ्यत इति च ॥ ४४ ॥

प्रकाशिका— लोके चोरैर्विनाशिते सति तत्पापमस्माकमेव स्यादित्याह ॥ तदद्येति । अत्र पशु शब्दो न प्रसिद्धपशुपरः प्रकृतसङ्गतस्ततोऽत्र विवक्षितं तदर्थम्प्रमाणेनैव दर्शयति ॥ विड्राष्ट्रमिति । तथा च नष्टनाथस्य पालकरहितस्य पशोः राष्ट्रस्य यद्यस्माद्विलुम्पका नाशकाश्च चोरादयो भविष्यन्ति । तत्तस्मादद्य नोऽस्माकम् अनन्वयमस्मत्सम्बन्धायोग्यं सन्ततविरोधि वा पापमुपैति । विलुम्पका इत्युक्तं विलुम्पनमेव विवृणोति ॥ परस्परमिति । शपन्त्युपालभन्ते । परुषं वदन्तीति यावत् । पश्वादीन्वृञ्जतेऽपहरन्ति पुरवो बहवो दस्यवश्चोरा येषां ते तथा ॥ ४४ ॥

तदार्यधर्मश्च विलीयते नृणां वर्णाश्रमाचारयुतस्त्रयीमयः ।
ततोऽर्थकामाभिनिवेशितात्मनां शुनां कपीनामिव वर्णसङ्करः ॥४५ ॥

प्रकाशिका— न केवलं राष्ट्रविलोपननिमित्तमस्माकं पापं किन्तु सर्वधर्मविलोपननिमित्तं वर्णसङ्करनिमित्तं च प्राप्तमित्याशयेनाह ॥ तदार्येति । तदाऽर्थाद्यपहारे सति । आर्यधर्मः श्रेष्ठधर्मो यज्ञादिः । त्रयीमयो वेदप्रतिपाद्यः । ततः शुनां कपीनामिव चार्थकामयोरेवाभिनिवेशित आत्मा मनो येषां ते तथा तेषां वर्णसङ्करो भविष्यति ॥ ४५ ॥

धर्मपालो नरपतिः स तु सम्राट् बृहच्छ्रवाः ।
साक्षान्महाभागवतो राजर्षिर्हयमेधराट् ।
क्षुत्तृट्च्छ्रमान्वितो दीनो नैवास्मच्छापमर्हति ॥ ४६ ॥

प्रकाशिका— एवं राजमात्रस्य स्वशापानर्हत्वमुक्त्वा परीक्षित्सुतरां तदनर्ह इत्याशयेनाह ॥ धर्मपाल इति । धर्मपाल इत्यादीनि हेतुगर्भविशेषणानि । सम्राट् चक्रवर्ती । बृहच्छ्रवा विततयशाः । साक्षादनुपचारेण । हयमेधराट् अश्वमेधयाजी क्षुत्तृट्श्रमान्वित इत्यनेन क्षुत्पिपासादिनाऽस्मदाश्रममागतोऽर्घ्यादिना पूज्य एव न शापार्ह इति सूचयति ॥ ४६ ॥

अपापेषु स्वभृत्येषु बालेनापक्वबुद्धिना ।
पापं कृतं तद्भगवान्सर्वात्मा क्षन्तुमर्हति ॥ ४७ ॥

प्रकाशिका— अस्य महापापस्यान्यत्प्रायश्चित्तमदृष्ट्वा स्वपुत्रकृतपापमावेदयन् भगवन्तं प्रार्थयते ॥ अपापेष्विति । सर्वात्मा सर्वान्तर्यामी ॥ ४७ ॥

तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ताः हता अपि ।
नास्य तत्प्रतिकुर्वन्ति तद्भक्ताः प्रभवोऽपि हि ॥ ४८ ॥

प्रकाशिका— अस्मदाश्रममागतोऽवज्ञातः परीक्षित्प्रभुरपि न तत्प्रतिचक्रे । येनास्मत्पापनिष्कृतिः स्यादित्याशयेनाह ॥ तिरस्कृता इति । तिरस्कृता निन्दिता विप्रलब्धा वञ्चिताः क्षिप्ता अवज्ञाता हतास्ताडिताः । अपि शब्दः प्रत्येकमभिसम्बध्यते । अस्य तिरस्कारादिकर्तुस्तत्तिरस्कारादिकमुद्दिश्य न प्रतिकुर्वन्ति प्रतिक्रियां न कुर्वन्तीत्यर्थः । तस्य हरेर्भक्ताः प्रभवाः प्रतिकर्तुं समर्था अपि । हिशब्देन यतस्तपोवृद्धिकामा इति हेतुं दर्शयति ॥ ४८ ॥

इति पुत्रकृताघेन सोऽनुतप्तो महामुनिः ।
स्वयं विप्रकृतो राज्ञा नैवाऽघं तदचिन्तयत् ॥ ४९ ॥

प्रकाशिका— अत एवाह ॥ इतीति । राजा स्वयं विप्रकृतः । अप्रकृतोऽपि तत्तस्याघमपराधम् ॥ ४९ ॥

साधवः प्रायशो लोके परैर्द्वन्द्वेषु योजिताः ।
न व्यथन्ति न हृष्यन्ति यत आत्माऽगुणाश्रयः ॥ ५० ॥

॥ इति श्रीमद्भागवते प्रथमस्कन्धे अष्टादशोऽध्यायः ॥

तात्पर्यम्— स्वकृतो गुणस्तस्यैव यतः ॥ ५० ॥ इति प्रथमतात्पर्ये अष्टादशोऽध्यायः ।
॥ १८ ॥

प्रकाशिका— साधूनामयमेव स्वभाव इत्याह ॥ साधव इति । द्वन्द्वेषु सुखदुःखादिषु । योजिताः सङ्गमिताः । यत आत्मागुणाश्रय इति हेतुवाक्यस्यागुणाश्रय इति व्याख्यानं प्रमाणविरोधादिनाऽसदिति भावेन तत्तात्पर्यमाह ॥ स्वकृत इति । स्वकृतः स्वकर्मसम्पादितः । गुणः सुखदुःखलक्षणः । स्वस्यैव न परस्येत्यर्थः । तथा च यत आत्मा जीवो गुणाश्रय ईश्वरप्रेरितस्वकर्मार्जितशुभाशुभरूपफलाश्रयो भवति । अतो नायं परोऽस्माकं सुखदुःखप्रद इत्यनुसन्धाय न व्यथन्ति न हृष्यन्तीति मूलं व्याख्येयमिति भावः ॥ ५० ॥ इति श्रीभागवतटिप्पण्यामष्टादशोऽध्यायः ॥१-१८॥

अथ एकोनविंशोऽध्यायः

सूत उवाच–

महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिन्तयन्नात्मकृतं सुदुर्मनाः ।
अहो मया नीचमनार्यवत्कृतं निरागसि ब्रह्मणि गूढतेजसि ॥ १ ॥

प्रकाशिका— ननु धर्मपालो नरपतिरिति परीक्षितो धर्मपालकत्वमुक्तम् । तदयुक्तम् । मुनिद्रोहकरणात्पश्चात्तापाभावाच्चेत्याशङ्कायां प्रमादिके मुन्यपराधे सति भूयान्पश्चात्तापस्तस्य जात इत्याह ॥ महीपतिरिति । तुशब्दः पूर्वोक्तधर्मपालकत्वादिरूपविशेषार्थः । आत्मना स्वेनैवकृतं तन्मुनिस्कन्धे मृतसर्पशरीरस्थापनरूपं कर्म गर्ह्यं निन्द्यं विचिन्तयन्सुदुर्मनाः सुदुःखितमनाः ।

अभूदिति शेषः । पश्चात्तापप्रकारं दर्शयति ॥ अहो इति सार्धश्लोकद्वयेन । मया निरागसि निरपराधे गूडतेजसि अप्रकटितसामर्थ्ये ब्रह्मणि ब्राह्मणेऽनार्यवन्नीचवन्नीचं निन्दितं कर्म कृतम् । अहो कष्टम् । स्वपापस्य महत्वोपपादनाय निरागसि गूढतेजसीति विशेषणद्वयम् ॥ १ ॥

ध्रुवं ततो मे कृतदेवहेलनाद् दुरत्ययं व्यसनं नातिदीर्घात् ।
तदस्तु काममघनिष्कृताय मे यथा न कुर्यां पुनरेवमद्धा ॥ २ ॥

प्रकाशिका— अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुत इति वचनादस्य पापस्येहैव फलं भविष्यतीत्याह ॥ ध्रुवमिति । ब्राह्मणस्य विष्ण्वादिसर्वदेवप्रतिमात्वात्तद्धेलनं सर्वदेवहेलनमेवेत्याशयेनोक्तम् ॥ मे मया कृतदेवहेलनादिति । देवावमानादित्यर्थः । व्यसनं दुःखम् । नातिदीर्घादचिरात् । भविष्यतीति शेषः । तद्व्यसनं मेऽघनिष्कृताय पापप्रायश्चित्ताय काममसङ्कोचेनास्तु भवतु । अद्धा निश्चयेन । प्रयोजनान्तरं चाह । यथा येन व्यसनेन प्राप्तेन भीतोऽहं पुनरेव मे तादृशं पापं न कुर्याम् । एतदर्थं च तदस्तु ॥ २ ॥

अद्यैव राज्यं बलमृद्धकोशं प्रकोपितब्रह्मकुलानलो मे ।
दहत्वभद्रस्य पुनर्न मेऽभूत्पापीयसी धीर्द्विजदेवतासु ॥ ३ ॥

प्रकाशिका— एतदवाह ॥ अद्यैवेति । प्रकोपितं ब्रह्मकुलमेवानलो वह्निः । अभद्रस्य मे राज्यादिकमद्यैव दहत्वित्यन्वयः । द्विजदेवतासु विषयेषु पापीयसी धीर्मे पुनर्नाभून्न भूयात् । व्यत्ययोऽनुतापस्य महत्वप्रदर्शनाय ॥ ३ ॥

स चिन्तयन्नित्थमथाशृणोद्यथा मुनेः सुतोक्तान्निष्कृतिं तक्षकाख्यात् ।
स साधु मेने न चिरेण तक्षकादलंप्रसक्तस्य विरक्तिकारणम् ॥ ४ ॥

प्रकाशिका— मुनेः सुतेनोक्ताद्दुरितात्तक्षकाख्यात्सर्पान्निष्कृतिं स्वपापप्रायाश्चित्तरूपां मृतिं यथा यथावदशृणोत् । ऋषिप्रेषितगौरमुखनामकशिष्यादिति शेषः । स परीक्षिदलमतिशयेन प्रसक्तस्य विषयेष्वासक्तस्य स्वस्य तक्षकात् । मरणमिति शेषः । विरक्तिकारणं यतोऽतस्तत्साधु मेन इत्यर्थः ॥ ४ ॥

अथो विहायेमममुश्च लोकं विमृश्य तौ हेयतया पुरस्तात् ।
कृष्णाङ्घ्रिसेवामभिमन्यमान उपाविशत्प्रायममर्त्यनद्याम् ॥ ५ ॥

प्रकाशिका— इदानीं स सम्राट् कस्य वा हेतोरिति शौनकप्रश्नं परिहरति ॥ अथेति । अथो ब्रह्मशापाकर्णनानन्तरमेव पुरस्तात्प्रथमम् । ताविहलोकपरलोकौ हेयतया विमृश्येममुं च लोकं विहाय । तत्र निर्वेदं प्राप्येति यावत् । कृष्णाङ्घ्रिसेवामेवाभिमन्यमानः श्रेयः साधनतया सम्यग्जानन् अमर्त्यनद्याममरनद्यां गङ्गायां प्रायं यावज्जीवनमनशनव्रतम् । सङ्कल्प्येति शेषः । उपाविशत् । प्रायं यावज्जीवमनशनं यथा स्यात्तथोपविशदति वा । अनशनव्रतं चकारेत्यर्थः ॥ ५ ॥

या वै लसच्छ्रीतुलसीविमिश्रकृष्णाङ्घ्रिरेण्वभ्यधिकाम्बुनेत्री ।
पुनात्यशेषानुभयत्र लोकान्कस्तां न सेवेत मरिष्यमाणः ॥ ६ ॥

प्रकाशिका— गङ्गायामेव प्रायोपवेशे किं निमित्तमित्यत आह ॥ या वा इति । लसन्ती श्रीर्यस्याः सा लसच्छ्रीः सा च तुलसी च तया विमिश्राः कृष्णाङ्घ्रिरेणवस्तैरभ्यधिकं सर्वोत्कृष्टमम्बूदकं तस्य नेत्री । तद्वाहिनी । उभयत्रोभयतीरस्थान् लोकान् जनान् ॥ ६ ॥

इति व्यवस्थाय च पाण्डवेयः प्रायोपवेशं प्रति विष्णुपद्याम् ।
दध्यौ मुकुन्दाङ्घ्रिमनन्यभावो मुनिव्रतो मुक्तसमस्तसङ्गः ॥ ७ ॥

प्रकाशिका— इत्येवं विष्णुपद्यां गङ्गायां प्रायोपवेशं प्रति व्यवस्थाय निश्चित्य । गङ्गामाहात्म्यनिश्चयपूर्वकं प्रायोपवेशं कृत्वेति यावत् । मुकुन्दाङ्घ्रिं दध्यौ । पाण्डवेय इति तत्कुलौचित्यं दर्शयति । न विद्यतेऽन्यस्मिन्विषये भावो मनो यस्य स तथोक्तः । मुनिव्रतः शमदमादियुक्तोऽत एव मुक्तः परित्यक्तः समस्तेषु देहगेहादिषु सङ्गः स्नेहो येन स तथा ॥ ७ ॥

तत्रोपजग्मुर्भुवनं पुनाना महानुभावा मुनयः सशिष्याः ।
प्रायेण तीर्थाधिगमापदेशैः स्वयं हि तीर्थानि पुनन्ति सन्तः ॥ ८ ॥

प्रकाशिका— तत्र तं देशं तद्देशस्थं तम् । पवित्रीकर्तुमिति शेषः । ननु तीर्थयात्रायास्तेषां कर्तव्यतया प्रसिद्धत्वादस्या गङ्गाया अपि तीर्थत्वात्तदर्थमेव तेऽत्रागता इति किं न स्यादित्यत आह ॥ प्रायेणेति । तीर्थयात्राव्याजैस्तेषां तीर्थाभिगमनमपि परार्थमेवेति भावः ॥ ८ ॥

अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरङ्गिराश्च ।
पराशरो गाधिसुतोऽथ राम उचथ्य इन्द्रप्रमतीध्मवाहौ ॥ ९ ॥

मेधातिथिर्देवल आर्ष्टिषेणो भरद्वाजो गौतमः पिप्पलादः ।
मैत्रेय और्वः कवषः कुम्भयोनिर्द्वैपायनो भगवान्नारदश्च ॥ १० ॥

अन्ये च देवर्षिब्रह्मर्षिवर्याः राजर्षिवर्या अरुणादयश्च ।
नानार्षेयप्रवरान्समेतानभ्यर्च्य राजा शिरसा ववन्दे ॥ ११ ॥

प्रकाशिका— गाधिसुतो विश्वामित्रः । रामः परशुरामः । कुम्भयोनिरगस्त्यः इन्द्रप्रमतिश्चेध्यवाहश्चेन्द्रप्रमतीध्मवाहौ । नारदादयो देवर्षयो रामादयो ब्रह्मर्षयः । विश्वामित्रादयो राजर्षयः । जातिभेदकथनाय पुनर्वचनम् । अरुणादयश्च काण्डर्षित्वविशेषेण पृथङ्निर्दिष्टाः । नानान्यार्षेयाणि ऋषीणां गोत्राणि तेषु प्रवरान् श्रेष्ठान् । नानाऋषिसम्बन्धिप्रवरयुतानिति वा ॥ ९-११ ॥

सुखोपविष्टेष्वथ तेषु भूयः कृतप्रणामः स्वचिकीर्षितं यत् ।
विज्ञापयामास विविक्तचेता उपस्थितोऽग्रेऽर्घ्यगृहीतपाणिः ॥ १२ ॥

प्रकाशिका— विज्ञापनार्थं पुनः कृतप्रणाम उप ऋषीणां समीपे स्थितोऽर्घ्यगृहीतपाणिः । अत्रार्घ्यशब्दः पूजापरः । ततश्चार्घ्याय पूजार्थं गृहीतावञ्जलीकृतौ पाणी येनेत्यर्थः ॥ १२ ॥

राजोवाच-

अहो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः ।
राज्ञां कुलं ब्राह्मणपादशौचमाराद्विसृष्टं बत गर्ह्यकर्म ॥ १३ ॥

प्रकाशिका— नृपाणां मध्ये महत्तमैरतिशयेन महद्भिरनुग्रहणीयं शीलं वृत्तं येषां ते तथोक्ताः । कुत इत्यतो गर्ह्यकर्मणामितरेषां राज्ञामिदं दुर्लभमित्याह ॥ राज्ञामिति । गर्ह्यं निन्द्यं कर्म यस्य तद्राज्ञां कुलं ब्रह्मद्रोहि राजकुलम् । महत्तमैर्ब्राह्मणपादशौचाद्ब्राह्मणानां पादप्रक्षालनोदकं यस्मिन्स्थले तस्मात् । तदपेक्षयाऽप्याराद्दूराद्विसृष्टं क्षिप्तवन्तम् । अयं भावः । दूरादुच्छिष्टविण्मूत्रपादाम्भसि समुत्सृजेदिति वचनात् । दूरे तावत्पादप्रक्षालनोदकं महत्तमैर्विसृज्यते । ततोपि दूरादेव गर्ह्यकर्म राजकुलं विसृष्टम् । स्थापितमित्यनुक्त्वा विसृष्टमिति वचनेन तत्रापि स्थातुमयोग्यमिति गम्यते । गर्ह्यकर्मणोऽपि वयं नैतादृशाः किन्तु महत्तमानुग्रहणीयशीला जाता अतो धन्याः । अहोऽस्मद्भाग्यमिति । ब्राह्मणपादशौचमिति पाठे यैर्ब्राह्मणपादप्रक्षालनं न कृतं तान्निन्दयतीत्यवतारिका । येन राजकुलेन ब्राह्मणपादशौचं ब्राह्मणपादप्रक्षालनोदकम् । आराद्दूरात् । सर्वथेति यावत् । विसृष्टम् परित्यक्तम् । कदापि न सम्पादितं तद्राज्ञां कुलं गर्ह्यं कर्म बत । तज्जीवनादिकं निन्द्यमिति योजना द्रष्टव्या ॥ १३ ॥

तस्यैव मेऽस्त्वद्य परावरेशे व्यासक्तचित्तस्य गृहेष्वभीक्ष्णम् ।
निर्वेदमूलो द्विजशापरूपो यत्र प्रसक्तो(ऽ)भयमेव धत्ते ॥ १४ ॥

प्रकाशिका— ब्रह्मशापमपि वैराग्यजनकत्वेनाभिनन्दति ॥ तस्यैवेति । गर्ह्यकर्मण एवेत्यर्थः । परावरेशे मुक्तामुक्तनियामके हरौ विषयेऽभीक्ष्णं निरन्तरं व्यासक्तचित्तस्य व्यासङ्गोपेतमनसो मे द्विजशापरूपो दण्डः । गृहेषु निर्वेदमूलो यतोऽतोऽद्यैवास्तु । यत्र गृहेषु प्रसक्तो वैराग्यशून्यः पुमान् भयमेव संसारभयमेव धत्ते प्राप्नोति । तेषु गृहेष्वित्यन्वयः । अथवा । यत्र हरौ प्रकर्षेण सक्तः भक्तोऽभयं मोक्षमेव धत्ते । तस्मिन्परावरेशे इत्यन्वयः ॥ परावरेशः इति पाठे द्विजशाप एव रूपं प्रतिमा यस्य स तथा । द्विजशापान्तर्गतः परावरेशो गृहेषु व्यासक्तचित्तस्य मे निर्वेदमूलो निर्वेदजनकोऽस्त्विति योज्यम् । शापस्यास्वातन्त्र्यं दर्शयितुं द्विजशापरूप इति हरिविशेषणमुक्तमिति ध्येयम् ॥ १४ ॥

तं मोपविष्टं प्रतियान्तु विप्रा गङ्गा च देवी धृतचित्तमीशे ।
द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः ॥ १५ ॥

प्रकाशिका— इदानीं स्वाशास्यं दर्शयति ॥ तं मोपविष्टमिति द्वाभ्याम् । प्रतियान्त्वायान्तु । गङ्गा च देवी निजरूपेण प्रतियातु । स्वदर्शनेन पवित्रीकर्तुमिति शेषः । द्विजेनोपसृष्टः प्रेरितस्तक्षकोऽस्मद्भृत्यभयेन निजरूपेणात्र तस्यागमनासम्भवात्कुहकः कपटवेषः सन् अत्रागत्य दशतु भक्षयतु । अनेन द्विजवाक्ययाथार्थ्यसंरक्षणमपि स्वाशास्यमिति दर्शयति । तावत्पर्यन्तं विष्णुगाथा विष्णुविषयकश्लोकान् अलं स्वरपूर्वकं गायत ॥ १५ ॥

पुनश्च भूयाद्भगवत्यनन्ते रतिः प्रसङ्गश्च तदाश्रयेषु ।
महत्सु यां याम् उपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः ॥ २६ ॥

प्रकाशिका— स्वस्य जन्मान्तरप्राप्तावपि विष्णौ तद्भक्तेषु च रतिं प्रार्थयते ॥ पुनश्चेति । यां यां सृष्टिं जनिमुपयामि तत्र सर्वत्र सृष्टौ पुनः । एतस्मिन् जन्मनीव । स आश्रयो येषां तेषु महत्सूत्तमेषु प्रकृष्टः सङ्गः स्नेहस्तारतम्यानुसारेण भक्तिरस्तु । समेषु मैत्र्यस्तु । नीचेषु दयाऽस्त्वित्यपि ग्राह्यम् । नीचयोनिप्राप्तौ द्विजेभ्यो हरिभक्तत्रिवर्णेभ्यो नमः प्रह्वीभावोऽस्तु । इदं च प्रार्थनं स्वस्यायं चरमदेह इत्यज्ञानाद्वा ज्ञानेऽपि कलौ जातोऽस्मि देवेशेत्यादिब्रह्मवाक्यवत् लोकशिक्षार्थं वेति ज्ञातव्यम् ॥१६॥

इति स्म राजा व्यवसाय युक्तः प्राचीनकाग्रेषु कुशेषु धीरः ।
उदङ्मुखो दक्षिणकूल आस्ते समुद्रपत्न्यास्स्वसुते न्यस्तभारः ॥ २७ ॥

तात्पर्यम्— गङ्गायामुदक एव किञ्चिद्दक्षिणभागे प्रासादे । तथाहि महाभारते ॥ १७ ॥ इति प्रथमतात्पर्ये एकोनविंशोऽध्यायः ॥ १९ ॥

प्रकाशिका— विष्णुपद्यां प्रायोपवेशं चकारेत्युक्तम् । तत्रापि स्थलविशेषमाह सूतः ॥ इतीति । व्यवसाययुक्तो निश्चययुक्तः । प्राचीनकाग्रेषु प्रागग्रेषु कुशेष्वास्ते स्म आसीत् । समुद्रपत्न्या गङ्गायाः। स्वसुते जनमेजये न्यस्तो भारो येन सः । अत्र दक्षिणकूल इति दक्षिणतीरे स्थितिरुच्यते । पूर्वं विष्णुपद्यामेव प्रायोपवेश उक्तोऽतो विरोध इत्यतोऽत्र विवक्षितं तात्पर्यं दर्शयति ॥ गङ्गायामिति । दक्षिणभागे दक्षिणतीरभागे स्थिते प्रासाद इत्यर्थः । तथा च कूल शब्देन लक्षितलक्षणयोदकभाग-विशेषस्थितप्रासादो ग्राह्य इति भावः । भारतसंवादाच्चैवमेव व्याख्येयामित्याह ॥ तथा हीति । हि यस्माद्यथाऽस्माभिर्व्याख्यातं तथा भारतेऽप्युक्तं तस्मादुक्तं युक्तमित्यर्थः ॥ १७ ॥

विहाय सर्वं नरदेवचिह्नं केयूरहाराङ्गदमौलिरत्नान् ।
रत्नाङ्गुलीयान्विमलान्निरस्य पवित्रपाणिर्मुनिवेष आस्ते ॥ २८ ॥

प्रकाशिका— चिन्हं छत्रचामरादिकम् ॥ १८ ॥

एवं च तस्मिन्नरदेवदेवे प्रायोपविष्टे दिवि देवसङ्घाः ।
प्रशस्य भूमौ व्यकिरन्प्रसूनैर्मुदा मुहुर्दुन्दुभयश्च नेदुः ॥ १९ ॥

प्रकाशिका— भूमौ प्रायोपविष्ट इत्यन्वयः । मुदा व्यकिरन्वर्षितवन्तः ॥ १९ ॥

महर्षयो वै समुपागता ये प्रशस्य साध्वित्यनुमोदमानाः ।
ऊचुः प्रजानुग्रहशीलसारा यदुत्तमश्लोकगुणानुरूपम् ॥ २० ॥

प्रकाशिका— यदुत्तमश्लोको हरिस्तद्विषयका गुणा ज्ञानभक्त्यादयो येषां तेषामनुरूपमनुकूलं वाक्यं तत् । पुष्पवृष्ट्यादिकं दृष्ट्वा साध्वित्यनुमोदमाना महर्षय ऊचुरित्यन्वयः । कथंभूताः । प्रजानां साधुजनानामनुग्रहे शीलसारौ स्वभावसामर्थ्ये येषां ते तथा ॥ २० ॥

न वा इदं राचर्षिवर्य चित्रं भवत्सु कृष्णं समनुव्रतेषु ।
येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः ॥ २१ ॥

प्रकाशिका— तदेव वाक्यं दर्शयति ॥ नवा इति । इदं राज्यं परित्यज्य प्रायोपवेशनं भवत्सु पाण्डववंशोत्पन्नेषु । ये पाण्डवाः सद्यः कालविलंबमकृत्वाऽध्यासनं सिंहासनं जहुः ॥ २१ ॥

सर्वे वयं तावदिहास्महेऽथ कलेवरं यावदसौ विहाय ।
अजं परं विरजस्कं विशोकं यास्यत्ययं भागवतप्रधानः ॥ २२ ॥

प्रकाशिका— कुत इत्यत आहुः ॥ यतोऽयं भागवतप्रधान इति ॥ २२ ॥

आश्रुत्य तदृषिगणवचः परीक्षित्समं मधुश्चुत् गुरूशापव्यलीकम् ।
आभाषतैनानभिवन्द्य युक्तः शुश्रूषमाणश्चरितानि विष्णोः ॥ २३ ॥

प्रकाशिका— आश्रुत्याकर्ण्य । मध्वमृतं श्च्योचतीति मधुश्चुतम् अमृतस्रावि । गुरोर्ब्राह्मणस्य शापं तत्प्रयुक्तदुर्मरणजनितदोषं व्यलीकयति फलतोऽनृतं करोति । न तु सर्पदशनाभावमिति गुरुशापव्यलीकम् ॥ २३ ॥

राजोवाच-

समागताः सर्वत एव सर्वे वेदा यथा मूर्तिधरास्त्रिपृष्ठे ।
नेहाथवाऽमुत्र च कश्चनार्थ ऋते परानुग्रहमात्रशीलाः ॥ २४ ॥

ततश्च वः प्रश्नमिमं विपृच्छे विश्रम्य विप्रा इतिकृत्यतायाम् ।
सर्वात्मना म्रियमाणैस्तु कृत्यं शुद्धश्च तत्रामृशताभियुक्ताः ॥ २५ ॥

इति श्रीमद्भागवते प्रथमस्कन्धे एकोनविंशोऽध्यायः ॥

प्रकाशिका— त्रयाणां लोकानां पृष्ठे उपरि सत्यलोके वेदा यथा मूर्तिधरा भवन्ति । तथा विद्यमानाः । अनेन ज्ञानप्रदत्वमुक्त्वा कृपालुत्वमप्याह ॥ नेहेति । भवतामिह लोके । अमुत्र च परलोके वा । कश्चनार्थः किञ्चित्प्रयोजनं परानुग्रहमृत नास्ति । यतस्ततः । हे आत्मशीलाः । शील समाधाविति धातोः । परमात्मसमाधिमन्तः । हे विप्राः । वो युष्मानिमं प्रश्नं प्रष्टव्यार्थं विपृच्छे विशेषतः पृच्छामि । किं कृत्वा । विश्रम्य विश्वासं कृत्वा । एवं कर्तव्यमित्यस्य भावः । इति कृत्यता तस्यां विषये । सर्वात्मना सर्वप्रकारेण यत्कृत्यं तत्र कृत्येषु मध्ये विशेषतश्च म्रियमाणैर्यत्कृत्यं शुद्धं मोक्षपर्यवसायि तदभियुक्ता आग्रहयुक्ताः सन्त आमृशतालोचयत । ब्रूत चेति तुशब्दः ॥ २४, २५ ॥ इति श्रीभागवतटिप्पण्यामेकोनविंशोऽध्यायः ॥ १-१९ ॥

अथ विंशोऽध्यायः

सूत उवाच—

तत्राभवद्भगवान्व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः ।
अलक्ष्यलिङ्गो निजलाभतुष्टो वृतश्च बालैरवधूतवेषः ॥ १ ॥

प्रकाशिका— यत्र परीक्षितामुनिभिश्च स्थितं तत्रागमत्प्राप्तः । अभवदिति पाठेऽप्ययमेवार्थः । यदृच्छया भगवदिच्छया गां भूमिमटमानः पर्यटन् । नार्थाशयेनेत्याह ॥ अनपेक्ष इति । अलक्ष्यमाश्रमादिलिङ्गं यस्य सः । निजलाभेन हरिस्मरणाविर्भूतस्वरूपानन्दानुभवेनान्यत्रालम्बुद्धिमान् । अवधूतवेषोऽवज्ञाय जनैस्त्यक्तोऽयमुन्मत्तादिः सोऽवधूतस्तस्य वेषो यस्य सः । अत एव बालैर्वृतः ॥ १ ॥

तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रम् ।
चार्वायताक्षोन्नसतुल्यकर्णं सुभ्र्वाननं कम्बुसुजातकण्ठम् ॥ २ ॥

प्रकाशिका— तमित्यादीनां प्रत्युत्थिता इति वक्ष्यमाणेनान्वयः । द्विगुणान्यष्टौ वर्षाणि यस्य तम् । पादौ च करौ चोरू च बाहू चांसौ च कपोलौ च गात्रं च तानि तथोक्तानि सुकुमाराणि कोमलानि पदादीनि यस्य स तथोक्तस्तम् । चारूणि आयतेऽक्षीणि यस्मिन् उन्नतानासा यस्मिन् । लम्बह्रस्वत्वादिवैषम्यं विना तुल्यौ कर्णौ यस्मिन् । शोभने च भ्रुवौ यस्मिन् । एवं भूतमाननं यस्य तम् । कम्बुवच्छंखवद्रेखात्रयाङ्कितः सुजातः सुन्दरः कण्ठो यस्य तम् ॥ २ ॥

निगूढजत्रुं पृथुतुङ्गवक्षसमावर्तनाभिं वलिवल्गूदरञ्च ।
दिगम्बरं वक्त्रविकीर्णकेशं प्रलम्बबाहुं स्वमरोत्तमाभम् ॥ ३ ॥

प्रकाशिका— कण्ठस्याधोभागस्थितमंसवक्षस्थलयोर्मध्यं जत्रु । निगूढं मांसेन पीवरं जत्रु यस्य तम् । पृथु विस्तीर्णं तुङ्गमुन्नतं वक्षो यस्य तम् । आवर्तः पयसां भ्रमणं तद्वन्निम्नो नाभिर्यस्य तम् । वलिभिस्तिर्यग्रेखाभिर्वल्गु सुन्दरम् उदरं यस्य तदिश एवाम्बरं यस्य तम् । वक्राः कुटिला विकीर्णाः केशा यस्य तम् । प्रलम्बौ दीर्घौ बाहू यस्य तम् । स्वमरेषु देवश्रेष्ठेषूत्तमो व्यासस्तद्वदाभा यस्य तम् ॥ ३ ॥

श्यामं सदाऽऽपीच्यवयोऽङ्गलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन ।
प्रत्युत्थिता मुनयश्चासनेभ्यः तल्लक्षणज्ञा अपि गूढवर्चसम् ॥ ४ ॥

तात्पर्यम्— कैशोरयौवनाभ्यन्तः काल आपीच्यमुच्यत इत्यभिधानम् ॥ ४ ॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भागवततात्पर्यनिर्णये प्रथमस्कन्धे विंशोऽध्यायः ॥ २० ॥ प्रथमस्कन्धः समाप्तः ॥ १ ॥

प्रकाशिका— सदा विद्यमानयाऽऽपीच्यवयोऽङ्गलक्ष्म्येत्यत्रात्यन्तमुत्तममापीच्यं वयो यौवनमिति व्याख्या न प्रमाणिकीत्याशयेनापीच्य शब्दार्थं प्रमाणेनैव दर्शयति । कैशोरेति । कैशोर-यौवनयोरभ्यन्तो मध्यस्थः कालो वयोविशेष आपीच्य शब्देनोच्यत इत्यर्थः । तथा चापीच्यं कैशोरयौवनमध्यस्थितं वयोऽवस्थाविशेषो यस्य तदापीच्यवयस्तच्च तदङ्गं च तस्य लक्ष्म्या कान्त्या । रुचिरस्मितेन च । स्त्रीणां मनोज्ञं मनोहरं गूढवर्चसमपि । शुकत्वेन ज्ञात्वेति शेषः ॥ ४ ॥

स विष्णुरातोऽतिथय आगताय तस्मै सपर्यां शिरसाऽऽजहार ।
ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भका महासने सोपविवेश पूजितः ॥ ५ ॥

प्रकाशिका— विष्णुना रातो दत्तो रक्षितः परीक्षित् । न तिथिर्दिनविशेषः पूजार्थं यस्य सोऽतिथिस्तस्मै सपर्यां पूजाम् । शिरसा नमस्कृत्येति शेषः । आजहार चकार । स्त्रियोऽर्भकाः । तेन सहागता इति शेषः । ततः प्रत्युत्थानादिदर्शनानन्तरं निवृत्ताः परावृत्य गताः । पूर्वं कस्मात्सहागता इत्यत उक्तम् । हि यस्मादबुधा इति । शुकोऽयमिति ज्ञानरहिताः । कश्चिदुन्मत्त एवायमिति ज्ञानिन इत्यर्थः । महासने उपविवेश पूजितश्च ॥ ५ ॥

स संवृतस्तत्र महान्महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसङ्घैः ।
व्यरोचतालं भगवान्यथेन्दुर्ग्रहर्क्षतारानिकरैः परीतः ॥ ६ ॥

प्रकाशिका— स भगवान् शुको ब्रह्मर्ष्यादिसङ्घैः संवृतः सम्यक् परितो वृतः सन् अलं व्यरोचत । ग्रहा बृहस्पतिशुक्रादयः । ऋक्षाण्यश्विन्यादीनि । तारा अन्यनक्षत्राणि ॥ ६ ॥

प्रशान्तमासीनमकुण्ठमेधसं मुनिं नृपो भागवतोऽभ्युपेत्य ।
प्रणम्य मूर्ध्नाऽवहितः कृताञ्जलिर्नत्वा गिरा सूनृतयाऽन्वपृच्छत् ॥ ७ ॥

प्रकाशिका— न कुण्ठिता अकुण्ठिता सर्वार्थेषु मेधा यस्य तम् । प्रश्नार्थं पुनः प्रणम्य । सूनृतया गिरा प्रियवचनेन सह । प्रियवचनोक्तिपूर्वकमित्यर्थः ॥ ७ ॥

राजोवाच—

अहो अद्य वयं ब्रह्मन्सत्सेव्याः क्षत्रबन्धवः ।
कृपयाऽतिथिरूपेण भवद्भिस्तीर्थकाः कृताः ॥ ८ ॥

प्रकाशिका— सूनृतां गिरं तावद्दर्शयति ॥ अहो इति श्लोकपञ्चकेन । सतां सेव्या अभूम । अहो भाग्यम् । अतिथिरूपेणागतैर्भवद्भिस्तीर्थकाः कृताः । इवार्थे क प्रत्ययः । तीर्थसदृशा इत्यर्थः । यथा तीर्थानि भवदागमनेन शुद्ध्यन्ति तथा वयमपि शुद्धाः कृता इत्याशयः ॥ ८ ॥

येषां संस्मरणात्पुंसः सद्यः शुद्ध्यन्ति वै गृहाः ।
किम्पुनर्दर्शनस्पर्शपादशौचासनादिभिः ॥ ९ ॥

प्रकाशिका— आगतानां भवतां शुद्धीकरणसामर्थ्यं कैमुत्यसिद्धमित्याह ॥ एषामिति । दूरस्थानामित्यर्थः ॥ ९ ॥

सान्निध्यात्ते महायोगिन्पातकानि महान्त्यपि ।
सद्यो नश्यन्ति वै पुंसां विष्णोरिव सुरेतराः ॥ १० ॥

प्रकाशिका— न केवलं गृहाः शुद्ध्यन्ति किन्तु तत्रत्याः पुरुषा अपीति सोदाहरणमाह ॥ सान्निध्यादिति । सुरेतरा असुरा इव ॥ १० ॥

अपि मे भगवान्प्रीतः कृष्णः पाण्डुसुतप्रियः ।
पैतृष्वसेयप्रीत्यर्थं तद्गोत्रस्याप्तबान्धवः ॥ ११ ॥

प्रकाशिका— अस्मिन्काले भवदागमनं मद्बन्धुना प्रीतेन श्रीकृष्णेनैव नूनं कारितमित्याशयेनाह ॥ अपीति । भगवान्कृष्णः प्रीतोऽपि प्रीतः किं प्रीत एवेत्यर्थः । कथंभूतः । पाण्डुसुतानां प्रियः । अतस्तेषां पैतृष्वसेयानां पितृष्वसा कुन्ती तदपत्यभूतानां पाण्डवानां प्रीत्यर्थम् । तेषां गोत्रं यस्य तस्य मे आप्तं स्वीकृतं बान्धवं बन्धुकृत्यं येन सः स्वयं पाण्डवानां प्रियोऽतस्तेषां प्रीत्यर्थम् । तद्गोत्रोत्पन्ने मयि बन्धुकृत्यं दर्शितवानिति भावः ॥ ११ ॥

अन्यथा तेऽव्यक्तगतेर्दर्शनं नः कथं नृणाम् ।
नितरां म्रियमाणानां संसिद्धस्य वरीयसः ॥ १२ ॥

प्रकाशिका— अन्यथा कृष्णप्रीत्यभावेऽव्यक्ता गतिर्यस्य तस्य ते दर्शनम् । संसिद्धस्य कृतकृत्यस्य । वरीयसो वरणीयेषूत्तमस्य ॥ १२ ॥

अतः पृच्छामि संसिद्धं योगिनां परमं गुरुम् ।
पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वदा ॥ १३ ॥

प्रकाशिका— अतः कृष्णप्रसादेनैवात्र भवद्भिरागतत्वात् । म्रियमाणस्य पुरुषस्य । कर्तरि षष्ठी । इह भारते वर्षे । यत्कार्यमित्यादौ यच्छब्दाः प्रश्नार्थककिं शब्दार्थाः । अन्यथाऽस्य प्रश्नत्वासम्भवात् । तथा च किं कार्यं कर्तुं योग्यम् ॥ १३ ॥

यच्छ्रोतव्यमथो जाप्यं यत्कर्तव्यं नृभिः सदा ।
स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययम् ॥ १४ ॥

प्रकाशिका— यच्छ्रोतव्यमित्यादौ श्रोतव्यादिषु किमुत्तममिति प्रश्नाशयः । अन्यैश्च नृभिर्यत्कर्तव्यम् । अवश्यकर्तव्यं च किमित्यर्थः । यद्वा । किंवा विपर्ययं श्रोतव्यादिषूत्तमं न भवति । अस्य सर्वस्योत्तरं ब्रूहीत्यर्थः ॥ १४ ॥

नूनं भगवतो ब्रह्मन् गृहेषु गृहमेधिनाम् ।
न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित् ॥ १५ ॥

प्रकाशिका— तव चिरकालं नैकत्रावस्थानमथाऽपि मत्कृपयाऽत्रोपदेशार्थमत्रोपविष्टोऽसीत्याशयेनाह ॥ नूनमिति । गृहमेधिनां गृहस्थाश्रमोचितयज्ञवतां गृहेषु न लक्ष्यते न ज्ञायते । नृभिरिति शेषः । गोदोहनमपि गोदोहनमात्रकालमपि ॥ १५ ॥

सूत उवाच—

एवमाभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा ।
प्रत्यभाषत धर्मज्ञो भगवान् बादरायणिः ॥ १६ ॥

॥ इति श्रीमद्भागवते प्रथमस्कन्धे विंशोऽध्यायः । इति प्रथमस्कन्धः ॥

प्रकाशिका— एवमहोऽद्य वयमित्यादिकया श्लक्ष्णया मधुरया गिरा । आभाषितः स्तुतः पृष्टश्च ॥ १६ ॥

वासवी नन्दनं व्यासं वासुदेवपराभिधम् ।
श्रीशं नौमि सदा मध्वहृदयाम्बुजवासिनम् ।
प्रथम स्कन्धतात्पर्य फक्किकार्थ प्रकाशिनी ।
कृतिर्यदुपतेर्भूयात् प्रीत्यैमाधवमध्वयोः ।
प्रथमस्कन्ध तात्पर्य टिप्पणीया मया कृता ।
तया प्रीतोस्तु देवेशो गुरुसंस्थो रमापतिः ।

इति श्री मदानन्दतीर्थभगवत्पादाचार्यविरचित श्रीमद्भागवत प्रथमस्कन्धतात्पर्य टिप्पण्यां श्रीमद्वेदेशतीर्थ पूज्य पाद शिष्य यदुपतिनाकृतायां विंशोऽध्यायः समाप्तः ॥ १-२० ॥

अथ द्वितीयस्कन्धः

अथ प्रथमोऽध्यायः

शुक उवाच—

वरीयानेष ते प्रश्नः कृतो लोकहितं नृप ।
आत्मवित्सम्मतः पुंसां श्रोतव्यादिषु यः परः ॥ १ ॥

तात्पर्यम्— यः पर इति ॥ १ ॥

प्रकाशिका— श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ सत्यवत्यालवालोत्थं सद्विद्यालतया युतम् ॥ नानाशाखाभिरुत्कृष्टं व्यासकल्पद्रुमं भजे ॥ १ ॥ प्रथमस्कन्धान्ते कृतं परीक्षित्प्रश्नमनूद्य स्तौति ॥ वरीयानिति । अत्र पुंसां श्रोतव्यादिषु यः पर इत्यनुवादः स एवेति शब्दाभावात्साकांक्षोऽतः सोऽध्याहार्य इत्याह ॥ यः पर इतीति । यद्यपि यच्छ्रोतव्यमथो जाप्यं यत्कर्तव्यं नृभिः प्रभो इति पूर्वं पृष्टत्वात्तथैवानुवादो युक्तः । तथाऽप्यर्थानुवादोऽयमित्यदोषः । श्रोतव्यादिषु परं किमित्येव तत्राभिप्रेतत्वात् ॥ ततश्चायं श्लोकार्थः ॥ हे नृप । पुंसां श्रोतव्यादिषु यः कः पर इति यस्ते त्वया कृतः प्रश्नः स एष वरीयान् अङ्गीकार्यतमः । कुतः । यतो लोकहितं यथा स्यात्तथा कृतः । यतश्चात्मविदां ब्रह्मादीनां सम्मत इति ॥ १ ॥

श्रोतव्यानीह राजेन्द्र नृणां सन्ति सहस्रशः ।
अपश्यतामात्मतत्वं गृहेषु गृहमेधिनाम् ॥ २ ॥

तात्पर्यम्— अपश्यताम् ॥ २ ॥

प्रकाशिका— त्वयोच्यमानश्रोतव्यादौ कथं मम विश्वासः । तत्तद्वादिभिस्तदनुवर्तिभिश्चानेकेषां श्रोतव्यतयोक्तत्वेन विप्रतिपत्त्या संशयस्यैव प्राप्तेरिति राज्ञः शङ्कामुपोद्धातेनापाकरोति ॥ श्रोतव्यानीहेति । आत्मतत्त्वमित्यत्रात्मशब्दस्तदितरस्याप्युपलक्षकः । ततश्चेह लोकेऽधिकार्यनधिकार्यवर्गे । आत्मतत्त्वम् परमपरं च तत्त्वमपश्यतां सम्यग्जानतां गृहेषु गृहस्थाश्रमेषु । वर्तमानानामिति शेषः । अत एव गृहमेधिनां गृहस्थाश्रमविहितयज्ञानुष्ठानवताम् । काम्यकर्मणामिति यावत् । नृणां बहिर्मुखानामेव सहस्रशः श्रोतव्यानि श्रोतव्यादीनि सन्ति भवन्ति । तथा चानेकश्रोतव्यादिवादि-

नामज्ञानादिमत्वान्न तद्वचनैस्तव संशयो युक्त इति भावः । तेषां तत्त्वज्ञानाभावे किं कारणमित्याशङ्कापरिहाराय निद्रयेति वक्ष्यमाणमत्रानुप्यसन्धेयमित्याह ॥ अपश्यतां निद्रयेति । तथा चात्र निद्राशब्दोऽविद्यापरपर्यायबन्धकप्रकृतिपर इति भावः ॥ २ ॥

निद्रया ह्रियते नक्तं व्यवायेन नवं वयः ।
दिवा चार्थेहया राजन्कुटुम्बभरणेन वा ॥ ३ ॥

तात्पर्यम्— **निद्रया ॥ ३ ॥**

प्रकाशिका— अनेकश्रोतव्यवादिनो न सम्यक् तत्त्वज्ञानिन इत्यत्र युक्तिमाह ॥ निद्रयेति । अनेकश्रोतव्यवादिभिः । तदनुवर्तिभिश्चेति शेषः । नक्तं रात्रिरूपं वय आयुष्यं व्यवायेन स्त्रीसम्भोगेन। नवं यौवनावस्थाऽऽपादकम् । दिवा अहोरूपम् । अर्थेहया ईश्वराराधनानुपयोगिद्रव्यसम्पादकव्यापारेण । धविकश्चेत् कुटुम्बभरणेन वा विवादास्पदाः वादिनस्तदनुवर्तिनश्च सम्यग्ज्ञानिनो व्यर्थायुष्यहरणकर्तृत्वादिति युक्तिरत्राभिप्रेतेति ज्ञातव्यम् ॥ ३ ॥

देहापत्यकलत्रादिष्वात्मदैन्येष्वसत्स्वपि ।
तेषु प्रसक्तो निधनं पश्यन्नपि न पश्यति ॥ ४ ॥

तात्पर्यम्— असत्सु अभद्रेषु । 'सद्भावे साधुभावे चे'ति वचनात् ॥ ४ ॥

प्रकाशिका— ननु नश्वरात्मदैन्यापादकासाधुकुटुम्बपोषणाय कथमायुर्व्ययं कुर्यात्प्रेक्षावानित्यत आह ॥ देहापत्येति । असत्स्वित्येतदनूद्य मिथ्याभूतेष्विति प्रतीति वारणाय सप्रमाणकं व्याचष्टे ॥ असत्स्विति । अभद्रेष्वसाधुषु । सद्भावे सत्वे साधुभावे समीचीनत्वे च प्रवृत्तिनिमित्ते सति सदित्येतत्पदं प्रयुज्यत इत्यर्थः ॥ ततश्चायं श्लोकार्थः ॥ आत्मदैन्येष्वात्मनः स्वस्य दैन्यं क्षीणत्वमापादयन्तीत्यात्मदैन्यानि तेषु । दीङ् क्षय इति धातोः । असत्स्वसाधुषु । एतादृशेष्वासक्तिर्गर्हितेत्यपिना दर्शयति । प्रसक्तः प्रकर्षेणासक्तः । निधनं नाशम् । स्वपित्रादि दृष्टान्तेन पश्यन्नपि जानन्नपि न पश्यति नानुसन्धत्ते । उपलक्षणमेतत् । आत्मदैन्यापादकत्वमसाधुत्वं च नानुसन्धत्त इत्यपि ग्राह्यम् । एवं चातिशयेन कुटुम्बासक्तिः प्रेक्षाप्रतिबन्धिकेति भावः ॥ ४ ॥

तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वरः ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम् ॥ ५ ॥

प्रकाशिका— एवमुपोद्घातेन राज्ञः शङ्कामपाकृत्येदानीं यच्छ्रोतव्यमित्यादिना पृष्टस्योत्तरमाह ॥ तस्मादिति । ततश्चायं श्लोकार्थः ॥ इतरोक्तश्रोतव्यादीनामज्ञानादिमूलकत्वेन व्यर्थायुष्यहरणहेतुत्वादित्यर्थः । भारत भरतवंश्य । सर्वात्मा सर्वस्वामी सर्वाभीष्टदो वा । भगवान्निरतिशयैश्वर्यादिगुणो हरिः संसारभयहर्ता । ईश्वरः अघटितघटकशक्तिमान् । कीर्तनं मननं स्मरणं ध्यानम् । यत्कर्तव्यमिति सामान्यतो मननादेः पृष्टत्वादुत्तरे तदुक्तिः । अभयं न विद्यते भयं संसाररूपं यस्मात्तदभयमपरोक्षज्ञानम् । तदपरोक्षज्ञानं कुतः संसारनिवर्तकमित्यत उक्तम् ॥ हरिरिति । दृष्ट इति शेषः । अनादेः संसारस्य कथमयं निवर्तकः । कथं चाव्यक्तस्वभावस्य दर्शनमित्यत उक्तम् ॥ ईश्वर इति । न केवलं दृष्टोऽयमनिष्टनिवर्तकः । किन्तु स्वरूपानन्दादि सर्वेष्टप्रदश्चेति वक्तुं सर्वात्मेत्युक्तम् । कुत एतत्सर्वमस्यैवेति जिज्ञासायां भगवानित्युक्तम् । अनेन हरेरितरश्रोतव्यादिभ्यः परत्वमप्युक्तमिति ज्ञेयम् ॥ ५ ॥

एतावान्साङ्ख्ययोगाभ्यां स्वधर्मपरिनिष्ठया ।
जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः ॥ ६ ॥

प्रकाशिका— नन्वपरोक्षज्ञानसाधनतया साङ्ख्यादेरपि विहितत्वात्किं भगवच्छ्रवणादि नियमेनेत्यत आह ॥ एतावानिति । साङ्ख्यं जैवम् । ज्ञानं योगोऽष्टाङ्गः । स्वधर्मपरिनिष्ठा स्वधर्मानुष्ठाननियमः । एतैर्नारायणस्मृतिस्तच्छ्रवणादिकं सम्पाद्यत इति यद्येतावान्पुंसां जन्मलाभो जन्मनः फलम् । अन्ते तु स्मृतिः परो लाभ इत्यर्थः । तथा च साङ्ख्यादिकं न स्वातन्त्र्येणापरोक्षज्ञानसाधनं किन्तु श्रवणादिद्वारैवातः श्रवणादिकमावश्यकमेव । तेनैव जन्मनः साफल्यादित्याशयः । अन्ते स्मृतिः परो लाभ इत्येतत् प्रसङ्गादेवोक्तमिति ज्ञेयम् ॥ ६ ॥

प्रायेण मुनयो राजन्निवृत्ता विधिनिषेधतः ।
नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः ॥ ७ ॥

तात्पर्यम्— **ध्यानापेक्षया प्रायेण । नैर्गुण्यस्था मुक्ताः । 'एतत्सामगायन्नास्त' इति श्रुतेः ॥ ७ ॥**

प्रकाशिका— सर्वथा जिज्ञासुभिर्हरिश्रवणादिकं कार्यमित्यत्र कैमुत्यन्यायमाह ॥ प्रायेणेति । मुनयः स्वस्वयोग्यज्ञानवन्तो विधिनिषेधतो विधिनिषेधाभ्यां निवृत्ता नैर्गुण्यस्था हरेर्गुणानुकथने प्रायेण रमन्त इत्यन्वयः । तथा च विधिनिषेधबद्धैर्गुणमयदेहस्थितैर्जिज्ञासुभिर्हरिश्रवणादिकं सर्वदा कार्यमिति किं वाच्यमिति भावः । अत्र प्रायेणेत्युक्त्या कदाचिन्न गुणानुकथने रमन्त इति

प्रतीयतेऽतस्तदुक्तेरभिप्रायमाह ॥ ध्यानेति । सत्यं कदाचित्तत्र न रमंत इति । तथाऽपि तदाऽपि ध्यानमेव कुर्वन्ति न लौकिकवार्तामतः प्रायेणेत्युक्तेऽपि न विरोध इति भावः । नैर्गुण्यस्था इत्येतत्पदमनूद्याप्रतीतेर्व्याचष्टे ॥ नैर्गुण्यस्था इति । अनेन निर्गुणो भगवान् तत्सम्बन्धि स्थानत्रयं नैर्गुण्यं तत्र स्थिता नैर्गुण्यस्था इति व्याख्यानं सूचयति । मुक्ताः श्रवणादिकं कुर्वन्तीत्यत्र स्मेत्यनेन सूचितां प्रमाणप्रसिद्धिं दर्शयति ॥ एतदिति । एतद्वक्ष्यमाणमित्यर्थः ॥ ७ ॥

इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
अधीतवान्द्वापरादौ पितुर्द्वैपायनादहम् ॥ ८ ॥

तात्पर्यम्— द्वापरे च आदौ च । कृष्णावतारापेक्षया । 'व्यासः षट्शतवर्षीयो धृतराष्ट्रमजीजनदि'ति स्कान्दे ॥ ८ ॥

प्रकाशिका— तर्हि भगवद्विषयकं कश्चिद्ग्रन्थमाश्रावयेति शङ्कायामोमित्याशयेन भागवतं तावत्स्तौति ॥ इदं भावगतमित्याद्यर्धेन । इदं वक्ष्यमाणतया बुद्धिसन्निहितम् । भागवतं नाम भगवद्विषयतया प्रसिद्धम् । अत एव भागवतशब्दाभिधेयम् । ब्रह्मसम्मितं वेदसमम् । नेदं स्वकपोलकल्पितं किन्तु सम्प्रदायागतमिति दर्शयति ॥ अधीतवानिति । अध्यापकस्य प्रतारकत्वशङ्कां वारयति ॥ पितुरिति । नन्वधीतमपि बहुकालव्यवधानेन विस्मृतं किं न स्यादित्यतो न बहुकालव्यवधानमित्याह ॥ द्वापरादाविति । एतत् द्वापरस्यादावित्यन्यथाप्रतीतिवारणाय व्याचष्टे ॥ द्वापर इति । अनेन द्वापरेत्यत्र सप्तम्या लोपेन पदद्वयमेवेदमित्युक्तं भवति । द्वापरे चादौ चेति पाठे द्वन्द्वैकवद्भाव इत्याशयः । तर्हि किमपेक्षयाऽऽदित्वमध्ययनस्येत्यतस्तदवधिप्रदर्शनाय कृष्णावतारापेक्षयेत्यध्याहार्यमित्याह ॥ कृष्णावतारेति । तथा च कृष्णावतारस्य द्वापरान्ते भारतादौ कथितत्वात्तदपेक्षयाऽऽदौ द्वापरान्ते एवाधीतवानित्याशय उक्तो भवतीति ज्ञातव्यम् । ननु कुत एतत् । द्वापरस्यादावित्येव व्याख्यानं किं न स्यादित्यतस्तत्र बाधकमाह ॥ व्यास इति । तथा च धृतराष्ट्रस्य द्वापरान्त एवोत्पत्तेर्भारतादौ प्रसिद्धत्वेन तदा व्यासस्य षट्शतवर्षीयत्वकथनेन च व्यासावतारस्य द्वापरान्तकालीनत्वावगमाद्वापरादिभागे व्यासावतार एव नासीत् । कुतस्ततोऽध्ययनमतस्तथा न व्याख्येयमिति भावः । प्राधान्यतः कृष्णप्रतिपादकं भागवतं तदवतारापेक्षया प्रागेवानागतज्ञानिना द्वैपायनेन निर्मितमतः स सर्वज्ञ इति तस्य विवक्षितार्थतत्त्वज्ञानोपपादनाय शुकेन द्वापरान्त इति स्पष्टमनुक्त्वैवमुक्तमिति ज्ञातव्यम् ॥ ८ ॥

परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया ।
गृहीतचेता राजर्ष आख्यानं यदधीतवान् ॥ ९ ॥

तात्पर्यम्— परिनिष्ठितोऽपि मुक्तिरस्य भविष्यतीति निश्चितोऽपि । 'उदरं संशयः प्रोक्तः परिनिष्ठा विनिश्चय' इत्यभिधाने ।। 'ऋष्युत्तमा देवताश्च विमुक्तौ परिनिश्चिताः । तथाप्यधिकसौख्यार्थं यतन्ते शुभकर्मसु ।। विमुक्तास्तु स्वभावेन नित्यं ध्यानादितत्परा' इति गारुडे ।।९।।

प्रकाशिका— निश्चितमुक्तिकस्य तव भागवताध्ययनं किमर्थमित्याशङ्कां परिहरंस्तदभिधानं प्रतिजानीते ।। परिनिष्ठित इति श्लोकद्धयेन । गृहीतचेता आकृष्टचित्तः । आख्यायते भगवाननेनेत्याख्यानं भागवतम् । राज्ञोऽभिधाने निमित्तमाह ।। महापुरुषिको भवानिति । पुरुषो विष्णुस्तद्भक्तः पुरुषिकः । महांश्चासौ पुरुषिकश्चेति कर्मधारयः ।। ९ ।।

तदहं तेऽभिधास्यामि महापूरुषिको भवान् ।
यत्र श्रद्दधतामाशु स्यान्मुकुन्दे मतिः सती ।। १० ।।

प्रकाशिका— ततश्च भवान्विष्णुभक्तोत्तमो यतस्तस्मादित्यर्थः । भागवतस्यैवाभिधाने निमित्तमाह ।। यत्रेति । यत्र यस्मिन्भागवते प्रतिपादितेऽर्थ इति शेषः । अत्र परिनिष्ठित इत्येतन्नैर्गुण्यं मोक्षे परिनिष्ठितः स्थित इत्यन्यथाप्रतीतिनिवारणायानूद्य व्याचष्टे ।। परिनिष्ठितोऽपीति । अनेन मोक्षविषयकनिश्चयाकारप्रदर्शनेन नैर्गुण्य इति विषयसप्तमीति सूचितम् । परिनिष्ठाशब्दस्य निश्चयवाचित्वे प्रमाणमाह ।। उदरमिति । नन्वस्तु परिनिष्ठा शब्दो निश्चयवाची । तथाऽपि शुकस्यैतादृशनिश्चयवत्त्वे किं प्रमाणम् । तथात्वे तस्य शुभकर्मानुष्ठानानुपपत्तिश्च वैय्यर्थ्यादित्यत आह । ऋष्युत्तमा इति । तथा च शुकस्यापि देवावतारत्वान्मुक्तिनिश्चयवत्त्वसिद्धिरिति भावः ।। तथापीति । संसारनिवृत्तिरूपमोक्षस्य निश्चितत्वेऽपीत्यर्थः । अधिकसौख्यार्थं यावत्स्वस्वरूपानन्दाविर्भावार्थम् । नन्वेवं प्राप्तमुक्तीनामपि नैर्गुण्यस्था रमन्त इति पूर्वश्लोकोक्तध्यानादिरूपं शुभं कर्म किमधिकसौख्यार्थं नेत्याह ।। विमुक्तास्त्विति ।। १० ।।

एतन्निर्विद्यमानानाम् इच्छतामकुतोभयम् ।
योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम् ।। ११ ।।

प्रकाशिका— कीदृशानामधिकारिणामेतद्ग्रन्थश्रवणादिकं कर्तव्यतया शास्त्रे निर्णीतमित्यपेक्षायां मूलेऽत्राधिकारिणो दर्शयति ।। एतदिति । एतत्पूर्वोक्तं हरेर्नामानुकीर्तनम् । अत्र नामशब्दो ग्रन्थपरः। सोऽहं नाम विदेवास्मीत्यादौ तस्य ग्रन्थे प्रयोगदर्शनात् । हरिविषयकग्रन्थश्रवणादिकमिति यावत् । निर्विद्यमानानां सांसारिकक्लेशैर्विरज्यमानानाम् । न विद्यते कुतोऽपि भयं यस्मिन्सोऽकुतोभयो मोक्षस्तमिच्छतां योगिनां शमदमादिरूपयोगवतां निर्णीतं कर्तव्यतया शास्त्रे निर्धारितमित्यर्थः । अत्र

वैराग्यं मुमुक्षा शमदमादिसम्पत्तिश्चेति यान्यधिकारविशेषणानि शास्त्रे प्रसिद्धानि तान्येवोक्तानीति ज्ञातव्यम् ॥ ११ ॥

किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह ।
परं मुहूर्तं विदितं घटते श्रेयसे यतः ॥ १२ ॥

प्रकाशिका— ननु भगवद्विषयग्रन्थश्रवणादिकमत्यन्ताल्पायुषो मम कथं घटेतेति शङ्का मा भूदित्याह ॥ किमिति । परोक्षैरियत्तावत्त्वेनाविदितैः । अत एव श्रेयोघटनशून्यैरागामिभिर्हायनैर्वत्सरैः किम् । यतो येनेयत्तावत्त्वेन विदितेन मुहूर्तेन श्रवणादिरूपश्रेयसे घटते यतते तदेकं विदितं मुहूर्तं घटिकाद्वयमपि परमुत्तमं सार्थकमित्यर्थः ॥ १२ ॥

खट्वाङ्गो नाम राजर्षिः ज्ञात्वेयत्तामिहायुषः ।
मुहूर्तात्सङ्गमुत्सृज्य गतवानभयं हरिम् ॥ १३ ॥

प्रकाशिका— एतमर्थमाख्यानेन दृढयति ॥ खट्वाङ्ग इति । नामशब्दः प्रख्यातार्थः । इयत्तां मर्यादाम् । मुहूर्तान्मुहूर्तकालमेवाश्रित्य । सङ्गं राज्यादिस्नेहम् । अभयं न विद्यते भयं यस्मादि-त्यभयरूपमोक्षपदम् । खट्वाङ्गो हि राजा देवपक्षे स्थित्वा दैत्यानजयत् । ततः प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्ते तेनोक्तम् । प्रथमं तावन्ममायुः कथ्यतामिति । ततो देववरैरुक्तम् । तत्तु मुहूर्तमात्र-मवशिष्टमस्तीति । ततो भीतः सन्नतिशीघ्रं भुवमागत्य मुहूर्तकाल एव पारलौकिकं संपादितवानिती-मामाख्यायिकामनेन सूचयति ॥ १३ ॥

तवाप्येतर्हि कौरव्य सप्ताहं जीविताविधिः ।
उपकल्पय तत्सर्वं यत्तावत्साम्परायिकम् ॥ १४ ॥

प्रकाशिका— तव तु तदपेक्षयाऽधिकमायुरवशिष्टमस्ति । अतस्तद्भागवतश्रवणादिना सार्थकं कुर्वित्याह ॥ तवाप्येतर्हीति । एतर्हीदानीम् । सप्तानामन्हां समाहारः सप्ताहम् । जीविताविधिरायु-ष्यमर्यादा । तावत्तावता कालेन । साम्परायिकं साम्परायो मोक्षस्तत्सम्बन्धिसाधनमुपकल्पय सम्पादय ॥ १४ ॥

अन्तकाले तु पुरुष आगते गतसाध्वसः ।
छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम् ॥ १५ ॥

प्रकाशिका— किं तन्मोक्षसाधनं यन्मयाऽवशिष्टेनायुषा सम्पादनीयमित्यतः प्रथमसाधनं वैराग्यं तावदाह ॥ अन्तकाल इति । अनेन यत्कर्तव्यं नृभिः प्रभो इति प्रश्नस्योत्तरमुक्तं भवतीति ज्ञातव्यम् । आगते स्वतः परतो वाऽवगते सति । गतसाध्वसो गतमपगतं साध्वसं मरणभयं यस्य स तथोक्तः । देहगेहादिस्नेहः संगस्तद्विरोधी नित्यानित्यवस्तुविवेकनिश्चयोऽसङ्गस्तेन शस्त्रेण स्पृहामासक्तिम् । तं देहमनु ये स्त्रीपुत्रादयस्तेषु च स्पृहां छिन्द्यादित्यन्वयः ॥ १५ ॥

गृहीत्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः ।
शुचौ विविक्त आसीनो विधिवत्कल्पितासने ॥ १६ ॥

प्रकाशिका— वैराग्यानन्तरं कर्तव्यमाह ॥ गृहादिति । प्रव्रजितो निर्गतः । गृहे स्थितस्य पुनरासक्तिसम्भवात् । धीर इन्द्रियजयदक्षः । पुण्यतीर्थजलाप्लुतो गङ्गादिपुण्यतीर्थजले स्नातः । शुचौ शुद्धे विविक्ते दुर्जनसङ्गरहिते । देश इति शेषः । विधिवद्विधौ यथा तथा । नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरमित्यादि विध्युक्तप्रकारेणेति यावत् । कल्पिते निर्मिते आसने आसीन इत्यन्वयः ॥ १६ ॥

अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम् ।
मनो यच्छेज्जितश्वासो ब्रह्मबीजमनुस्मरन् ॥ १७ ॥

प्रकाशिका— स्थिरासनस्य कृत्यमाह ॥ अभ्यसेदिति । त्रिवृत् त्रीन् अकारादीन्वर्णान्वृणोतीति त्रिवृत् । अकारोकारमकारात्मकमिति यावत् । परं सर्वमन्त्रोत्तमं ब्रह्माक्षरं ब्रह्मप्रतिपादकं प्रणवं मनसा शुद्धं यथा स्यात्तथाऽभ्यसेदावर्तयेदित्यर्थः । आवर्तने द्रुतत्वादिदोषपरिहाराय शुद्धमिति विशेषणम् । मनसेत्युच्चैरुच्चारणवारणाय । एवं जपं विधाय जपकाले जपात्पूर्वकाले च कर्तव्यं दर्शयति ॥ मन इति । ब्रह्मबीजं ब्रह्मणो वेदरूपमन्त्रस्य बीजाक्षररूपं प्रणवमनुस्मरन् मनसाऽऽवर्तयन् बीजं जगत्कारणं ब्रह्म प्रणवार्थरूपं परं ब्रह्मानुस्मरन्निति वा जितश्वासः प्राणायामेन प्राप्तप्राणप्रसादः । भवेदिति शेषः । अनेन जपात्पूर्वं प्राणायामकालेऽपि मनसा प्रणवावर्तनं तदर्थरूपपरब्रह्मस्मरणं च कर्तव्यमिति सूचयति । अनन्तरं जपकाले मनो यच्छेत् स्ववशं कुर्यान्मनोऽभिमानिरुद्रप्रसादं सम्पादयेदित्यर्थः ॥ १७ ॥

नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः ।
मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया ॥ १८ ॥

तात्पर्यम्— शुभार्थे भगवति ॥ १८ ॥

प्रकाशिका— बाह्येन्द्रियाणां विषयान् प्रति गमने मनः पुनरवशं स्यादित्यत आह ॥ नियच्छेदिति । बुद्धिसारथिर्बुद्धिर्मोक्षेतरपुरुषार्थस्यानित्यत्वनिश्चयः सारथिर्यस्य स तथोक्तः । वशीकृतेन मनसा निमित्तेनाक्षान् बाह्येन्द्रियाणि नियच्छेत्प्रत्याहरेत् । इतरेन्द्रियदेवताप्रसादमपि सम्पादयेदित्यर्थः । ध्येयमाह ॥ मन इति । अत्र शुभार्थे शब्दाद्यन्यतमः कश्चिद्विषय इत्यन्यथाप्रतीतिवारणाय तदनूद्य व्याचष्टे ॥ शुभार्थ इति । तस्यैव श्रोतव्यादित्वेन प्रकृतत्वात् । पदं तत्परमं विष्णोरिति वक्ष्यमाणत्वाच्चेति भावः ॥ तथा चायमर्थः ॥ पूर्वकर्मभिरशुभविषयव्यापारैराक्षिप्तं निरस्तम् । क्लेशितमिति यावत् । बुद्ध्या सारथिरूपया शुभार्थे भगवति धारयेत् । तत्र च मनः परमानन्दम् लभत इति शेषः । एतदुपपादनायैव भगवतः शुभार्थतया निर्देशः । कर्मभिराक्षिप्तमिति पूर्वावस्थानुवादोऽप्येतदर्थमेव । लोके दारिद्र्येण दुःखितस्य महानिधिलाभे परमानन्ददर्शनादिति ॥ १८ ॥

तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा ॥
मनो निर्विषयं युंक्त्वा ततः किञ्चिन्न संस्मरेत् ।
पदं तत्परमं विष्णोः मनो यत्र प्रसीदति ॥ १९ ॥

तात्पर्यम्— विषयेभ्यो निर्गत्य तत्रैव मनोयुङ्क्त्वाऽन्यन्न स्मरेत् ॥ १९ ॥

प्रकाशिका— युगपत्सर्वावयवयुक्तध्यानाशक्तौ धारणा कर्तव्येत्याह ॥ तत्रेति । तत्र भगवद्रूपे एकावयवमेकैकावयवमव्युच्छिन्नेन विषयवासनाभिरखण्डितेन ध्यायेदनायासेन स्मरणविषयं कुर्यात् । एकैकावयवस्मृतिरेव धारणा । खण्डस्मृतिर्धारणा स्यादखण्डाध्यानमुच्यत इत्यन्यत्रोक्तत्वात् । खण्डस्मृतिरेकैकावयवयुक्ता स्मृतिः । अखण्डा समग्रावयवयुक्ता स्मृतिरिति तट्टीकायां व्याख्यातत्वाच्चेति ज्ञातव्यम् । तदनन्तर्भावि कर्तव्यमाह ॥ मनो निर्विषयमिति । अत्र निर्विषयं मनो युङ्क्त्वेति व्याहतं विषयाभावे मनोयोजनासम्भवात् । किञ्चिन्न संस्मरेदिति स्मरणीयाभाव एवोच्यत इति च भाति । अतस्तदर्थं यथावद्व्याचष्टे ॥ विषयेभ्य इति । निर्गत्य स्थितमिति शेषः । अनेन निर्विषयमित्यत्र निर्गतमाकृष्टं विषयेभ्यः शब्दादिभ्य इति व्याख्यानं सूचयति । तत्रैवेति मूलेऽध्याहृतम् । किञ्चिदित्यस्य व्याख्यानमन्यदिति ॥ ततश्चायं मूलार्थः ॥ निर्गतं विषयेभ्य इति निर्विषयं पूर्वोक्तप्रत्याहारयुतं मनस्तत्रैव सर्वावयवयुक्तभगवद्रूप एव युङ्क्त्वा समाधाय ततः शुभार्थात्किञ्चिदन्यन्न स्मरेत् । तत्रैव मनोयोगस्य मनसः परमानन्दलाभहेतुत्वादिति । अनेन धारणानन्तरमुक्तं लक्षणं स्वयोग्यध्यानं कार्यमित्युक्तं भवति । ननु कोऽसौ शुभार्थो यत्र समाहितं मनः परमानन्दं

लभत इत्यतस्तद्दर्शयति ॥ पदमिति । यत्र शुभार्थे मनः प्रसीदति परमसुखं लभते तद्विष्णोः परमं पदं स्वरूपमित्यर्थः । ततश्च मूलोक्तशुभार्थपदेन विष्णुस्वरूपमेव विवक्षितमिति मूलकारेण स्वपदमत्र विवृतम् । तात्पर्यकृता तु शिष्यहितैषिणा वक्ष्यमाणशुभार्थपदव्याख्यानमादावेव कृतमिति ज्ञातव्यम् ॥ १९ ॥

रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः ।
यच्छेद्धारणया धीरो हन्ति या तत्कृतं मलम् ॥ २० ॥

प्रकाशिका— एवं क्रमेण ध्यानपर्यन्तकर्तव्यान्युक्तानि । इदानीं मनो यच्छेदित्युक्तमनोजयोऽशक्यस्तस्य रजस्तमोभ्यां दूषितत्वादित्याशङ्कायां तज्जयोपायं दर्शयति ॥ रजस्तमोभ्यामिति । रजसा तत्कार्येण रागादिनाऽक्षिप्तं बहिर्मुखम् । तमसा तत्कार्येणाज्ञानादिना विमूढं कर्तव्याकर्तव्यविषये भ्रान्त्यादिमत् । आत्मनः स्वस्य मनः । धारणया एकैकावयवयुक्तस्मृत्या या धारणा तत्कृतं रजस्तमोभ्यां कृतं मलं रागाज्ञानादिकं हन्ति तयेत्यन्वयः । धारणया मनोदोषस्य रागादेः क्षये मनोजयः सुशक एवेति भावः ॥ २० ॥

यस्यां सन्धार्यमाणायां योगिनो भक्तिलक्षणः ।
आशु सम्पद्यते योग आश्रयं भद्रमीक्षतः ॥ २१ ॥

तात्पर्यम्— भद्रं हरिम् ॥ २१ ॥

प्रकाशिका— न केवलं रागादिमलनाशो धारणायाः फलं किन्तु मनोजयोपयुक्तभक्तिरपीत्याह ॥ यस्यामिति । यस्यां धारणायां सन्धार्यमाणायां सम्यक् क्रियमाणायां सत्यामाश्रयं वक्ष्यमाणरीत्या सर्वजगदाश्रयं भद्रमीक्षतश्चिन्तयतो योगिनो मनोजयोपायमनुतिष्ठतो भक्तिलक्षणयोगो मनोजयोपाय आशु सम्पाद्यत इत्यन्वयः । धारणया मनोमलनाशे मनो हरिमाहात्म्यश्रवणादिना तत्रैव स्निग्धं भवति । ततस्तत्रैव मनोनिवेशनरूपो मनोजयः सुलभ इति भावः । अत्र भद्र इति शब्दमनूद्य तस्य प्रकृतोपयुक्तमर्थं दर्शयति ॥ भद्रमिति ॥ २१ ॥

राजोवाच—

यथा सन्धार्यते ब्रह्मन्धारणा यत्र संमता ।
यादृशी वा हरेदाशु पुरुषस्य मनो मलम् ॥ २२ ॥

तात्पर्यम्— यच्छब्दः प्रश्ने । 'यतश्चोदेति सूर्य' इत्यादिवत् । 'यच्छब्दस्तु परामर्शे प्रश्नार्थे चाभिभण्यत' इत्यभिधाने ॥ यथेत्यस्य जितासन इत्यादि । यत्र स्थूले ॥ यादृशीत्यस्य विशेष इत्यादि ॥ २२ ॥

श्रीशुक उवाच—

जितासनो जितश्वासो जितसङ्गो जितेन्द्रियः ।
स्थूले भगवतो रूपे मनः सन्धारयेद्धिया ॥ २३ ॥

प्रकाशिका— उक्तधारणायां विषयादिबुभुत्सया राजा पृच्छति ॥ यथेति । अत्र यथा यत्र यादृशीति पदेषु प्रकृतिभूतस्य यच्छब्दस्य परामर्शार्थत्वं प्रकृतासङ्गतं तच्छब्दाभावेनानन्वितं चातस्तस्य प्रकृतोपयुक्तमर्थं दर्शयति ॥ यच्छब्द इति । यथेत्यादि शब्दत्रये प्रकृतिरूपो यच्छब्द इत्यर्थः । तथा च तत्प्रकृतिकोऽपि यथेत्यादिशब्दः प्रश्नार्थ एवेति भावः । यच्छब्दप्रकृतिकस्य प्रश्नार्थत्वे प्रयोगं दर्शयति ॥ यतश्चेति । आदि शब्देनास्तं यत्र च गच्छतीत्यादेर्ग्रहणम् । ननु भवेदिदं यदि यच्छब्दः प्रश्नार्थः इत्यत्र प्रमाणं स्यादित्यतस्तत्राभिधानमाह ॥ यच्छब्दस्त्विति । ततश्चायमर्थः ॥ धारणायाः पूर्वं मनोजयसाधनत्वेनोक्ता सा धारणा । यथा कथं केनाङ्गकलापेन युक्तेतीति-कर्तव्यताप्रश्नः । यत्र कुत्रेति विषयप्रश्नः । किं मनोजयानन्तरभाविस्वयोग्यधारणाविषये भगवद्रूपे उतान्यत्र । नाद्यः । तद्धारणाया मनोजयसाध्यतया पूर्वमुक्तत्वेन तत्साधनत्वासम्भवात् । द्वितीय-श्चेत्तद्धारणाविषयीभूतं भगवद्रूपं किमित्याशयः । यादृशी कीदृशीति तद्विशेषणानां प्रश्न इति । जितासन इत्यादौ किं कस्योत्तरमिति न प्रतीयतेऽतस्तद्विविच्य दर्शयति ॥ यथेत्यस्येत्यादिना । इत्यादीत्यनन्तरमुत्तरमिति शेषः । एवमग्रेऽपि । यत्रेत्यनन्तरमित्यस्येति शेषः । स्थूल इत्यनन्तर-मितिशब्दोऽध्याहार्यः । तथा च यत्रेत्यस्य प्रश्नस्य स्थूल इति उत्तरमित्यर्थः । मूले जितासन इत्यस्य जितं वशीकृतमासनं येनेत्यर्थः । जितः पराजितः सङ्गो विषयस्नेहो येन स जितसङ्गो विरक्त इत्यर्थः। स्थूले विराण्णामकब्रह्मदेहान्तर्गते ॥ २२, २३ ॥

विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम् ।
यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च यत् ॥ २४ ॥

तात्पर्यम्— विशेष आण्डकोशः । 'शिलावत्तस्य देहोऽयमण्डकोशस्तु सावृतिः । तत्तन्त्र-त्वान्न तत्संस्थदुःखभोगोऽस्य न कचिदि'ति ब्रह्मवैवर्ते ॥ २४ ॥

प्रकाशिका— विशेषस्तस्य देह इत्यत्र विशेषशब्दो भूतविशेषपृथ्वीपर इत्याभाति तन्न सम्भवति । तस्य वक्ष्यमाणसप्तावरणसंयुक्तत्वासम्भवात् । पातालाद्यात्मकपादमूलत्वाद्यसम्भवाच्चा-तोऽत्र विवक्षितं तदर्थमनूद्य दर्शयति ॥ विशेष आण्डकोश इति । अत्र सर्वत्राण्डकोश शब्देनाण्ड-कोशान्तर्वर्ती चतुर्दशभुवनात्मको ब्रह्मदेहो ग्राह्यः । ननु कुत एवं विशेष शब्दव्याख्यानम् । भगवतो

जडदेहाङ्गीकारे तद्गतसुखदुःखादिभोगप्रसङ्गश्चेत्याशङ्कां प्रमाणान्तरसंवादेन परिहरति ।। शिलावत्तस्येति । शिलावच्छिलामयप्रतिमावत् । तथा च तत्र देहे शरीरादि शब्दा गौणा इत्यर्थः । सावृतिः । पृथिव्याद्यावरणैः सहितः । गौण्यां वृत्तौ निमित्तमाह ।। तत्तन्त्रत्वादिति । अनेन देहादि शब्दमुख्यर्थेऽधिष्ठातृनियन्तृत्वं दृष्टं तदत्राप्यस्तीति तत्सादृश्यं निमित्तमुक्तमिति ज्ञातव्यम् । तत्संस्थदुःखभोगस्तत्संस्थत्वप्रयुक्तदुःखभोगः ।। ततश्चायं श्लोकार्थः ।। यदिदं भूतं भव्यं भवच्च विश्वं यत्राण्डकोशे दृश्यते प्रमाणैर्ज्ञायते । सोऽयं स्थवीयसां स्थूलतराणां सकाशात् स्थविष्ठः स्थूलतमो विशेषः । आण्डकोशस्तस्य तदन्तस्थस्य हरेर्देहो देहसदृश इति ।। २४ ।।

आण्डकोशे शरीरेऽस्मिन्सप्तावरणसंयुते ।
वैराजः पुरुषो योऽसौ भगवान्धारणाश्रयः ।। २५ ।।

तात्पर्यम्— अण्डकोशो विराट्प्रोक्तो विशेषेण प्रकाशनात् । वैराजस्तद्गतो विष्णुरथवा सर्वतो वर'इति भागवततन्त्रे ।। २५ ।।

प्रकाशिका— ननु कथमिदं यादृशीत्यस्योत्तरं भगवद्विशेषणस्यानुक्तत्वादित्यतस्तदन्तस्थत्वरूपविशेषणविशिष्टतया भगवतो धारणात्राभिप्रेतेत्याह ।। आण्डकोश इति । अत्र वैराजः पुरुषो विरिञ्च इति भाति । न तद्युक्तम् । पूर्वोत्तरविरोधादित्यतोऽत्राभिप्रेतं तदर्थं प्रमाणेनैव दर्शयति ।। आण्डकोश इति ।। सर्वतो वर इति । राट् शब्दो राजशब्दपर्यायो वरवाची । अतो विशेषेण वरो विराडित्युच्यते । विराडेव वैराजस्तस्येदं तात्पर्यं सर्वतो वर इति ।। ततश्चायं मूलार्थः ।। आण्डकोशे पूर्वोक्ते सप्तावरणसंयुते पञ्च भूताहङ्कारमहत्तत्त्वसंज्ञैः सप्ताभिरावरणैः कवचस्थानीयैः संयुते बहिरावृत्तेऽस्मिन्पूर्वोक्ते शरीरे तत्तन्त्रत्वेन शरीरसदृशे ब्रह्मदेहे यः पुरवःषाः षड्गुणा यस्येति पुरुषो वर्तते । अत एव वैराजोऽसौ भगवान्विष्णुर्धारणाश्रयो धारणाविषयः । अत एतद्विशेषणविशिष्टतया कृता धारणा पुरुषस्य मनोमलं हरतीत्येतदुत्तराशय इति ।। २५ ।।

पातालमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम् ।
महातलं विश्वसृजस्सुगुल्फौ तलातलं वै पुरुषस्य जङ्घे ।। २६ ।।

तात्पर्यम्— प्रतिमापेक्षयाऽङ्गानि स्वरूपाक्षया तज्जानि तदाश्रितानि च ।। २६ ।।

प्रकाशिका— वैराजः पुरुषो धारणाश्रय इत्युक्तम् । तद्रूपे एकैकावयवयुक्तस्मृतिरूपां धारणां दर्शयति ।। पातालमित्यादिना । अत्र पातालं पादमूलमित्यादि सामानाधिकरण्यप्रयोगेन पातालादीनां

भगवदवयवाभेदः प्रतीयते । न चासौ युज्यते । तेषां जडत्वेन चिदान्दाद्यात्मकावयवाभेदासम्भवात् । अतोऽत्राभिप्रेतं विवक्षाभेदं दर्शयति ॥ प्रतिमापेक्षयेति । अण्डान्तर्वर्ती चतुर्दशभुवनात्मको विराट् देहः । शिलावद्भगवत्प्रतिमेति प्रागुक्तम् । तद्गतस्यैव चेयं धारणोच्यते । तथा च प्रतिमापेक्षया प्रतिमाविवक्षया । पातालादीनीति शेषः । अङ्गानि पादमूलाद्यङ्गाभिन्नानि । अतस्तत्र न सामानाधिकरण्यप्रयोगानुपपत्तिरिति शेषः । तदन्तर्गतभगवत्स्वरूपापेक्षया तज्जानि भगवत्स्वरूपाङ्गनिमित्तकानि तदाश्रितानि चेति सामानाधिकरण्यमुपपन्नमिति शेषः ।

ब्राह्मणोऽस्य मुखमासीदित्यादौ तज्जत्वादि विवक्षयाऽपि सामानाधिकरण्यप्रयोगदर्शनादिति भावः । नन्वेवं सूर्यचन्द्रमसोश्चक्षुरभूत्पतङ्गोमनश्चन्द्रमा इति चक्षुर्मनोभ्यां सामानाधिकरण्यमभिधाय पुनः दंष्ट्रार्यमेन्दू इति दंष्ट्रयाऽपि सामानाधिकरण्याभिधानमनुपपन्नं स्यात् । एकत्र जातयोरन्यत्र जन्मासम्भवादित्यत आह ॥ बहुरूपत्वादिति । सामानाधिकरण्यमुपपन्नमिति शेषः आदिपदेन सत्यं तु शीर्षाणि । तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमित्यादेर्ग्रहणम् । तथा च सूर्यादेरेकैकत्वेऽपि तद्रूपाणामनेकत्वादनेकाङ्गजातत्वाभिप्रायकसामानाधिकरण्याभिधानान्युपपद्यन्त इति भावः । सर्वस्मिन्नित्युक्तार्थे प्रमाणमाह ॥ प्रतिमापेक्षयेति । अङ्गान्यङ्गाभिन्नानि । स्वरूपतः स्वरूपापेक्षयेत्यर्थः । बह्वङ्गत्वं बह्वङ्गाश्रितत्वादिकम् । बहुत्वतो बहुरूपत्वतः । उपपद्यत इति शेषः ॥ ततश्च पातालमित्यादेर्मूलस्यायमर्थः ॥ एतस्य वैराजस्य हरेः पादमूलं पादतलम् । पादाधोभागमिति यावत् । पातालं पठन्त्युपदिशन्ति । उपदिष्टाश्च ते तथोपासते । एवमुत्तरत्रापि पठन्तीत्यस्यान्वयो द्रष्टव्यः । हिशब्दोऽत्र प्रमाणप्रसिद्धिद्योतकः । पार्ष्णिश्च प्रपदं च पार्ष्णिप्रपदे । पार्ष्णिः पादस्य पृष्ठभागः । प्रपदं पादाग्रम् विश्वं सृजतीति विश्वसृक् । तस्येति हेतुगर्भविशेषणम् । सुगुल्फौ शोभनौ पर्वविशेषौ ॥ २६ ॥

द्वे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलञ्चातलञ्च ।
महीतलं तज्जघनं महीपते नभस्तलं नाभिसरो गृणन्ति ॥ २७ ॥

प्रकाशिका— विश्वं मूर्तौ देहे यस्य स इति वा विश्वं तदात्मकं ब्रह्मशरीरं मूर्तिः प्रतिमा यस्येति वा विश्वमूर्तिस्तस्येत्यर्थः । इदमपि हेतुगर्भविशेषणम् । ऊरुद्वयमतलं वितलं च तस्याधोभागे वितलमुपरितने उपरि भागे त्वतलमिति ज्ञेयम् ॥ जघनं कटितटम् । एतत्स्मरणं विशेषतस्त्वया कार्यमिति दर्शयितुं महीपत इति सम्बोधनम् । एवमग्रेऽपि । नभस्थलमन्तरिक्षम् । भुवर्लोकमिति यावत् । नाभिसरो नाभिः सर इव । अगाधत्वपद्माश्रयत्वादिसाम्यात् ॥ २७ ॥

ऊरुस्थलं ज्योतिरनीकमस्य ग्रीवामहर्वदनं वै जनोऽस्य ।
ततो रराटिं विदुरादिपुंसः सत्यन्तु शीर्षाणि सहस्रशीर्ष्णः ॥ २८ ॥

प्रकाशिका— ज्योतिरनीकं ज्योतिश्चक्रस्थानीयं स्वर्गलोकम् । महर्लोकं हरेर्ग्रीवेति गृणन्ति । जनो जनोलोकम् तपोलोकम् । रराटिं ललाटम् । सत्यं सत्यलोकम् ।। २८ ।।

इन्द्रादयो बाहव आहुरस्य कर्णौ दिशः श्रोत्रममुष्य शब्दः ।
नासत्यदस्रौ परमस्य नासे घ्राणश्च गन्धो मुखमग्निरिद्धः ।। २९ ।।

प्रकाशिका— इन्द्रादयो लोकपालाश्चास्य हरेर्बाहव इत्याहुः । अत्रोत्तरत्र च सामानाधिकरण्यप्रयोगे तज्जत्वादिकमेव निमित्तमितिध्येयम् । दिशः श्रोत्राभिमानिन्यो दिग्देवताः । कर्णौ श्रोत्रेन्द्रियगोलकौ । अमुष्य हरेः श्रोत्रमिन्द्रियम् । शब्दः शब्दजनकस्तदाश्रयश्चेत्यर्थः ।। एवमग्रेऽपि । नासत्यदस्रावश्विनौ । नासे तन्नासापुटे । अस्य घ्राणं घ्राणेन्द्रियम् । इद्धो दीप्तः ।।२९।।

द्यौरक्षिणी चक्षुरभूत्पतङ्गः पक्ष्माणि विष्णोरहनी उभे च ।
तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमापोऽस्य तालू रस एव जिह्वा ।। ३० ।।

प्रकाशिका— द्यौर्द्युलोकः । अक्षिणी गोलके । चक्षुरिन्द्रियम् । पतङ्गः सूर्यः । अहनी रात्र्यहनी देवानां मनुष्याणां चेत्युभेऽपि विष्णोः पक्ष्माणि ।। परमेष्ठधिष्ण्यम् । ब्रह्मपदं तालुरधिष्ठानं जिह्वेन्द्रियम् । रसो मधुरादिः ।। ३० ।।

छन्दांस्यनन्तस्य गिरो गृणन्ति दंष्ट्रार्यमेन्दूडुगणा द्विजानि ।
हासो जनोन्मादकरी च माया दुरन्तसर्गो यदपाङ्गमोक्षः ।। ३१ ।।

तात्पर्यम्— बहुरूपत्वाद्दंष्ट्रार्यमेन्दू इत्यादि । 'प्रतिमापेक्षयाङ्गानि भूरादीनि स्वरूपतः । तदाश्रितानि तज्जानि बहङ्गत्वं बहुत्वत' इति ब्रह्मतर्के ।। ३०, ३१ ।। इति द्वितीयतात्पर्ये प्रथमोऽध्यायः ।। १ ।।

प्रकाशिका— छन्दांसि गायत्र्यादीनि गिरो वचनानि । अर्यमेन्दू सूर्यचन्द्रौ । अस्य दंष्ट्रा । उडुगणा नक्षत्राणि । द्विजानि दन्ताः । अत्र प्रगृह्यसंज्ञाभावो लिङ्गव्यत्ययश्च लोकवैलक्षण्यज्ञापनाय ।। ।। ३१ ।।

व्रीडोत्तरोष्ठोऽधर एव लोभो धर्मःस्तनोऽधर्मपथश्च पृष्ठः ।
कस्तस्य मेढ्रं वृषणौ च मित्रः कुक्षिः समुद्रा गिरयोऽस्थिसङ्घाः ।। ३२ ।।

प्रकाशिका— माया मोहनशक्तिः । हासो मन्दस्मितम् । दुरन्तोऽपारः सर्गो यस्य सः । तस्यापाङ्गमोक्षः कटाक्षः । व्रीडा लज्जा । अधरोऽधरोष्ठः । एवशब्दोऽन्ययोगव्यवच्छेदकः । अधर्मपथोऽधर्ममार्गः । पृष्ठः पृष्ठभागः ।। ३२ ।।

नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेन्द्र ।
अनन्तवीर्यं श्वसितं मातरिश्वा गतिर्वयः कर्म गुणप्रवाहः ॥ ३३ ॥

प्रकाशिका— कः प्रजापतिः । मेण्ढ्रं गुह्येन्द्रियम् । वृषणौ बीजद्वयं मित्रः ॥ ३३ ॥

ईशस्य केशान्विदुरम्बुवाहान्वासस्तु सन्ध्ये कुरुवर्य भूम्नः ।
अव्यक्तमाहुर्हृदयं मनस्तु स चन्द्रमाः सर्वविकारकोशः ॥ ३४ ॥

प्रकाशिका— अन्नं प्राणिभोग्यम् । तस्य वीर्यं रेतः । वयः प्राणिनामायुष्यम् । तस्य गतिर्गमनम् । गुणप्रवाहः सत्त्वादि गुणप्रवाहकार्यरूपः । प्राणिनां संसारस्तस्य कर्म व्यापारविशेषः । सन्ध्ये द्वे ॥ ३४ ॥

विज्ञानशक्तिं मतिमामनन्ति सर्वात्मनोऽन्तःकरणं गिरित्रः ।
अश्वाश्वतर्युष्ट्रगजा नखानि सर्वे मृगाः पशवः श्रोणिदेशे ॥ ३५ ॥

प्रकाशिका— अव्यक्तं मूलप्रकृतिम् । सर्वेषां कामादिविकाराणां कोश इवाश्रयभूतः स प्रसिद्धः। चन्द्रमास्तदीयं मनः । चन्द्रस्य कामादि विकाराश्रयमनोऽभिमानित्वात्सर्वविकारकोशत्वोक्तिर्युक्तेति ध्येयम् । विज्ञानशक्तिं विरिञ्चम् । मतिं बुद्धिम् । गिरित्रः कैलासरक्षको रुद्रः । सर्वात्मनः सर्वस्वामिनोऽन्तःकरणमहङ्कारः ॥ ३५ ॥

वचांसि तद्व्याहरणं विचित्रं मनुर्मनीषा मनुजो निवासः ।
गन्धर्वविद्याधरचारणाप्सरः स्वरस्मृतिर्ह्यसुरानीकवीर्यः ॥ ३६ ॥

प्रकाशिका— गर्दभाद्वडवायामुत्पन्नाऽश्वतरी । श्रोणिदेशे श्रितास्तस्माज्जाताश्च । वचांसि लौकिकवैदिकरूपाणि । विचित्रमनेकरूपम् । तद्व्याहरणं तस्य हरेः शब्दोच्चारणरूपक्रिया । मनुः स्वायम्भुवः । मनीषा विचाररूपा बुद्धिः । मनुजः प्रियव्रतादिः । निवासस्तदीयनिवासनक्रिया गन्धर्वादीनामुत्पादिके स्वरस्मृती यस्य स तथोक्तः । स्वरः षड्जादिलक्षणः । स्मृतिरतीत-विषयज्ञानम् । यद्वा । भिन्न एवैते पदे गन्धर्वादीनां द्वन्द्वैकवद्भावः । तथा च गन्धर्वादयः स्वरस्मृति-स्तदीयषड्जादिस्वरस्मरणमित्यर्थः । असुरानीकमसुरसमूहवीर्यं पराक्रमो यस्य स तथोक्तः । असुरसमूहस्तत्पराक्रमजन्यस्तदाश्रितश्चेत्यर्थः ॥ ३६ ॥

ब्रह्माननः क्षत्रभुजो महात्मा विड्रुरुरङ्घ्रिश्रितकृष्णवर्णः ।
स्वाहास्वधावीर्यगुणोपपन्नो हव्यात्मकः कर्मवितानयोगः ॥ ३७ ॥

प्रकाशिका— ब्रह्म ब्राह्मणजात्यभिमानी आननं यस्य स तथा तदीयमाननं ब्राह्मणजात्यभिमानिनो जनकम् । एवमग्रेऽपि । क्षत्रं क्षत्रियजात्यभिमानी भुजो यस्य स तथा । विट् वैश्यजात्यभिमानी ऊरू यस्य स तथा । अङ्घ्रिश्रितः कृष्णवर्णः शूद्रजात्यभिमानी यस्य स तथा ॥ ३७ ॥

इयानसावीश्वरविग्रहस्य यः सन्निवेशः कथितो मया ते ।
सन्धार्यतेऽस्मिन् वपुषि स्थविष्ठे मनः स्वबुध्या न यतोऽस्ति किञ्चित् ॥ ३८ ॥

॥ इति श्रीमद्भागवते द्वितीयस्कन्धे प्रथमोऽध्यायः ॥

प्रकाशिका— देवेभ्यो विनियुज्यमानमन्नं स्वाहा । पितृभ्यो विनियुज्यमानमन्नं तत्स्वधा । तयोरुत्पादको वीर्यगुणो रेतोगुणः । तद्वैचित्र्यमिति यावत् । तेनोपपन्नो युक्तः । हव्यस्य जनक आत्मा मध्यदेहो यस्य सः हव्यात्मकः । अग्निष्टोमादि कर्मवितानस्य विस्तारस्य जनकं योग उपायो यस्य स तथा । उक्तार्थमुपसंहरति ॥ इयानिति । ईश्वरविग्रहस्येश्वरप्रतिमारूपस्य विराट् देहस्य यः सन्निवेशोऽवयवसंस्थानम् । इयानित्थंभूतो यतो यस्मादीश्वरविग्रहात्स्थविष्ठं किञ्चिदन्यन्नास्ति । अस्मिन् स्थविष्ठे वपुषि योगिभिर्मनः स्वबुद्ध्या सन्धार्यते । मनोनैर्मल्यायेति शेषः ॥ ३८ ॥ इति श्रीभागवतटिप्पण्यां प्रथमोऽध्यायः ॥ २-१ ॥

अत द्वितीयोऽध्यायः ॥

शुक उवाच—
एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुह्य तुष्यन् ।
तथा ससर्जेदममोघदृष्टिर्यथाप्ययात्प्राग्व्यवसायबुद्धिः ॥ १ ॥

प्रकाशिका— एवं मनोजयसाधनीभूतां भगवतः स्थूलरूपधारणामुक्त्वा यत्पूर्वं स्वयोग्यध्यानं कर्तव्यतयोक्तं तत्प्रपञ्च्यतेऽस्मिन्नध्याये । तत्र तावदुक्तधारणायां विश्वासजननाय पूर्वं ब्रह्मणा तत्फलं लब्धमिति दर्शयति मूले ॥ एवमिति । आत्मा परमात्मा योनिः कारणं यस्य स ब्रह्मा पुराऽऽदिकाले नष्टां तिरोहितां प्राक्कल्पविषयां स्मृतिम् । एवं उक्तरूपया धारणया प्रत्यवरुह्याङ्कुरीकृत्य । प्रतिलभ्येति यावत् । तुष्यन् धारणाविषये हरौ तोषं प्राप्नुवन् अत एवामोघदृष्टिः । व्यवसाये जगत्सर्जनोद्योगे बुद्धिर्यस्य स तथा । अप्ययात्प्रलयात्प्राक् पूर्वं यथेदं जगत्स्थितं तथा ससर्जेत्यन्वयः ॥ १ ॥

शब्दस्य हि ब्रह्मण एष पन्थाः यन्नामभिर्ध्यायति धीरपार्थैः ।
परिभ्रमंस्तत्र न विन्दतेऽर्थान्मायामये वासनया शयानः ॥ २ ॥

तात्पर्यम्— एष हरिः । यदपार्थैर्ध्यायति । तत्रार्थान्न विन्दते । 'सर्वनामा यतो विष्णुस्तदन्यार्थान्न तु स्मरेत् । स्मरंस्तु यावदर्थः स्यादन्यथा स्वात्महा स्मृत' इति ब्रह्माण्डे ॥ १,२॥

प्रकाशिका— एवं मनोजये स्थूलरूपभगवद्धारणारूपमेकं साधनं संक्षेपविस्ताराभ्यामुक्त्वेदानीं मुख्यतो भगवद्वाचकैरिन्द्राग्न्यादिनामभिरितरार्थस्मरणरूपमन्यदपि तत्साधनं विधातुं तावत्सर्वनाम्नां भगवानेव मुख्यवाच्य इति सप्रमाणकमाह ॥ शब्दस्य हीति । अत्रैष इत्यनेन प्रकृतविरिञ्चपरामर्शे तस्य सर्वशब्दवाच्यत्वसमर्थनानुपपत्तेस्तदनूद्य तत्परामर्शविषयं दर्शयति ॥ एष हरिरिति । आत्मयोनिरित्यात्मशब्देन तस्यापि प्रकृतत्वादिति भावः ॥ यन्नामभिरित्यत्रैकपदत्वे ध्यायतीत्यस्य कर्माभावः प्राप्नोति । अतो यदिति भिन्नमेव पदं कर्मवाचीति दर्शयंस्तस्यान्वयमाह ॥ यदिति । यत्पुरन्दरादिकमिन्द्रादिनामभिर्ध्यायति निरन्तरं स्मरति तत्र तेभ्योऽर्थान् पुरुषार्थान्न विन्दते न प्राप्नोति । कुत इत्यतो यदित्यस्य हेत्वर्थमप्यभिप्रेत्यान्वयं दर्शयति ॥ यदपार्थैरिति । यद्यस्मादपगताः परमैश्वर्यादयोऽर्थाः प्रवृत्तिनिमित्तभूता येभ्यस्तैर्नामभिर्ध्यायति तस्मादित्यर्थः । तदवाचकैरेव तान् ध्यायतीति हेतोस्तेभ्यः पुरुषार्थान्न प्राप्नोतीति भावः ॥

ततश्चायं श्लोकार्थः ॥ ध्यायतीति धीर्जीवो यत्पुरन्दरादिकमिन्द्रादिनामभिर्ध्यायति तत्र तस्मात्पुरन्दरादेरर्थान् पुरुषार्थान्न विन्दते न प्राप्नोति । कुतः । यद्यस्मादपार्थैरपगतैश्वर्यादिप्रवृत्तिनिमित्तैः । तदवाचकैरिति यावत् । नामभिर्ध्यायति तस्मात् । ननु जीवः कुतस्तदवाचकैरेव नामभिस्तान् ध्यायतीत्यत उक्तम् ॥ परिभ्रमन्निति । पुरन्दरादिकमेवेन्द्रादिशब्दमुख्यवाच्यमिति भ्रान्तो यत इत्यर्थः। भ्रमेऽपि किं निमित्तमित्यत उक्तम् ॥ मायेति । मायामये भगवदिच्छाधीने प्रकृतिनिर्मिते वा संसारे वासनयाऽविद्ययाऽनादिसंस्कारेण वा शयानो बद्ध इति । ननु तर्हीद्रादिशब्दमुख्यार्थः क इत्यत उक्तम् ॥ ब्रह्मण इति । ब्रह्मणोऽपरिमितस्य शब्दस्य वेदादिरूपस्यैष हरिः पन्था मार्गो मुख्यवाच्य इति । हीति तत्रागमप्रसिद्धिं दर्शयति ॥ ननु कर्मविध्यादेरपि वेदेन प्रतिपादनात्कथमशेषवेदराशेर्हरिरेव मुख्यवाच्य इति शङ्कानिरासाय मुख्यवाच्य इति वक्तव्ये पन्था इत्युक्तम् । तेनान्यत्रापि शब्दप्रवृत्तौ हरिरेव मार्ग इति समन्वयप्रकारस्य सूचनान्नोक्तशङ्काऽवकाशः । यद्वक्ष्यति । मां विधत्तेऽभिधत्ते मामित्यादिति । हरिरशेषेन्द्रादिशब्दमुख्यवाच्यस्तथा ध्यानेन पुरुषार्थप्रदत्वात् । व्यतिरेकेणेन्द्रादिवदित्यनुमानमप्यत्राभिप्रेतम् । तत्र न विन्दतेऽर्थानित्यनेनोक्तहेतोः सूचनात् ॥ २ ॥

अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः ।
सिद्धेऽन्यथार्थे न यतेत तत्तत्परिश्रमं तत्र समीक्षमाणः ॥ ३ ॥

प्रकाशिका— इदानीं मनोजय इतिकर्तव्यतारूपं नामभिरितरार्थास्मरणं विधत्ते ॥ अत इति । अतः सर्वनाम्नां मुख्यतो हरिवाचकत्वात् । कविर्ज्ञानी । नामस्विन्द्रादिनामसु । अप्रमत्तः

स्यादितरार्थस्मरणशीलो न स्यात् । नन्वेवं चेद्देहयात्रा तस्य कथमित्यत उक्तम् ॥ व्यवसायबुद्धिर्यावदर्थ इति । व्यवसाये शरीरयात्रारूपोद्योगे बुद्धिर्यस्य स तथा । यावदर्थः स्याद्यावतेतरपदार्थस्मरणेनार्थः प्रयोजनं यस्य स तथा । शरीरयात्रोपयुक्तमितरार्थस्मरणं न मनोजयप्रतिबन्धकमिति भावः । इतरार्थस्मरणकालेऽपि हरिविषयकत्वानुसन्धानमावश्यकमिति दर्शयितुमपि व्यवसायबुद्धिरित्युक्तम् । व्यवसायरूपा नाम्नां हरिविषयकत्वनिश्चयरूपा बुद्धिर्यस्येत्यर्थः । अन्यथेतरार्थस्मरणमन्तरेण तत्तस्मिन्नर्थे स्वत एव सिद्धे सति तत्तस्मिन्नर्थे न यतेत । कुत इत्यत उक्तम् ॥ तत्रेति । तत्र यत्ने परिश्रममिष्टस्य मनोजयस्य हानादनिष्टस्य नरकादेरादानादात्मनाशं समीक्षमाण इति । श्लोकद्वयार्थे प्रमाणमाह ॥ सर्वनामेति । स्मरन्त्वितः पूर्वं देहयात्रार्थमिति शेषः । अन्यथा प्रयोजनेऽन्यथासिद्धेऽप्यन्यार्थस्मरणे आत्महाऽऽत्मानं मनोजयालाभेनापुरुषार्थभागिनं नकराद्यनर्थभागिनं च करोतीत्यर्थः ॥ ३ ॥

सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किम् ।
सत्यञ्जलौ किं पुरुपर्णपात्रैर्दिग्वस्त्रलाभे सति किं दुकूलैः ॥ ४ ॥

प्रकाशिका— इदानीं स्वतः सिद्धिप्रकारं दर्शयति ॥ सत्यामित्यादिना । कशिपोः शय्यायाः । प्रयासैः संपादनायासैः स्वसिद्धे स्वतोऽनायासेन संपन्ने सत्युपबर्हणैः शिरःपीठैः । उच्छीर्षकैरिति यावत् । पुरुपर्णपात्रैर्विस्तीर्णैः पत्रनिर्मितभोजनपात्रैः । दिग्वस्त्रलाभे दिग्रूपाणां वस्त्राणां लाभे । दिगम्बरतारूपनग्नतायां सत्यामिति यावत् । दुकूलैः क्षौमादिवसनैः ॥ ४ ॥

चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नो वाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ।
रुद्धा गुहाः किमवधूतसुहृन्न कृष्णः
कस्माद्भजन्ति कवयो धनदुर्मदान्धान् ॥ ५ ॥

प्रकाशिका— एवं परिपक्वयोगिनां स्वतः सिद्धिप्रकारमुक्त्वाऽपरिपक्वयोगिनामपि तमाह ॥ चीराणीति । पटचीराणि गृहिभिर्देयानि । पथि तोरणे । दरिद्राणां च भिक्षूणामाच्छादनकराणि चेति स्मृतेः । पथि तोरणे । गृहस्थैर्भिक्षुकार्थं निहितानि चीर्णानि चीराणि वस्त्रखण्डानि न सन्ति किं सन्त्येव । नन्वेवं वस्त्राणामन्यथासिद्ध्या तदर्थं यत्नाभावेऽप्यन्नार्थमुदकार्थं वा स्वस्थानार्थं वा यत्न आवश्यक इत्यतस्तेषामप्यन्यथासिद्धिं क्रमेणाह ॥ दिशन्ति भिक्षामित्यादिना । अङ्घ्रिपा वृक्षाः । परान् बिभ्रति फलादिभिः पुष्णन्ति ते परभृतः । इदं हेतुगर्भविशेषणम् । वाऽपिशब्दौ

किमित्यनुकर्षणार्थे । तथा च भिक्षा फलादिरूपमन्नं किं नो दिशन्ति दिशन्त्येवेत्यर्थः । सरितो नद्योऽशुष्यन् किं नाशुष्यन्नित्यर्थः । गुहा गिरिदर्यो रुद्धाः पिहिताः किम् । केनचिदिति शेषः । गुहासु सिंहादिभये कथं वासः शक्यत इत्यत उक्तम् ॥ किमवधूतेति । अवधूतानां धूलिधूसराङ्गानाम् । योगिनामिति यावत् । सुहृन्न किं सुहृदेव । तथा च स एव सिंहादिभयं परिहरिष्यतीति भावः । कस्मादित्यतः पूर्वमेवं सन्तीति शेषः । कस्माद्भजन्ति न भजन्त्येव ॥ ५ ॥

एवं स्वचित्ते स्वत एव सिद्ध आत्मप्रियोऽर्थो भगवाननन्तः ।
तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र ॥ ६ ॥

तात्पर्यम्— एतमितस्तं प्रेत्याभिसम्भविताऽस्मी'ति नियतार्थः ॥ ६ ॥

प्रकाशिका— एवं मनोजयसाधने द्वयेनाभिधायेदानीं तत्साध्यं स्वयोग्यध्यानं कर्तव्यमिति यदुक्तं तत्प्रपञ्चयति ॥ एवमित्यादिना । एवमुक्तसाधनद्वयेन स्वचित्ते स्वस्य जडरूपे स्वस्वरूपभूते च चित्ते स्वत एवानायासेन सिद्धे वशीकृते सति यो भगवाननन्तो व्याप्तस्तं भजेत तद्ध्यानं निरन्तरं कार्यमित्यर्थः । अनेनोत्तमाधिकारिणां योग्यं ध्यानं विहितमिति ज्ञातव्यम् । भजनीयत्वे हेतुः ॥ आत्मा प्रियोऽर्थ इति । यत इति शेषः । भक्तं स्वकीयतयाऽऽदत्त इत्यात्मा यतश्च प्रियोऽर्थः । देहपुत्रादिभ्योऽपीति शेषः । भजनसमये कर्तव्यमित्थम्भावं दर्शयति ॥ निवृत्तो नियतार्थ इति । अत्र नियतार्थ इत्येतदप्रतीत्या व्याचष्टे ॥ एतमित इति । इतो देहात्प्रेत्यैतं परमात्मानमभिसम्भावता प्राप्तोऽस्मीति । श्रुत्युक्तप्रकारेण नियतार्थो निश्चितप्रयोजन इत्यर्थः । तथा च निवृत्तः स्वरूपानन्दानुभवेन समुद्भूतरोमाञ्च उक्तप्रकारेण नियतार्थश्च सन् भजेतेति मूलार्थः । न केवलम् । नियतार्थ इत्यत्रोक्तभगवत्प्राप्तिरेव ध्यानफलं किं त्वनिष्टनिवृत्तिरपीति दर्शयति ॥ संसारेति । यत्र यस्मिन् भजने सति । संसारहेतूनामविद्याकाम्यकर्मादीनामुपरमश्चात्यन्तिकनिवृत्तिश्च भवतीत्यर्थः । अत्रोक्तेत्थम्भावफले सर्वाधिकारिसाधारणध्यानपर इति ज्ञातव्यम् ॥ ६ ॥

स सर्वविद्धृद्यनुभूश्च सर्व आत्मा यथा सुप्तजनेक्षितैकः ।
तं सत्यमानन्दनिधिं भजेत सर्वात्मनाऽतोन्यत आत्मघातः ॥ ७ ॥

तात्पर्यम्— 'यथैकस्तु बहून्सुप्तानसुप्तः पश्यति प्रभुः । एवमीशो बहूञ्जीवानज्ञान्पश्यति नित्यदृगि'ति व्योमसंहितायाम् । 'स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीती'ति च ॥ 'यथेष्टभवनाद्विष्णुरनुभूः परिकीर्तितः । उदधिः कर्मणामीशः सर्वः पूर्णगुणो यतः । सत्यः केवलसारत्वान्नियमो नियतेरज' इति बृहत्संहितायाम् ॥ ७ ॥

प्रकाशिका— उपसंहार्यगुणोक्तिपूर्वकं ध्यानं पुनर्विधाय तदकरणे बाधकमप्याह ॥ ससर्वविदिति । अत्र यथा सुप्तजनेक्षितैक इत्येतदप्रतीत्या प्रमाणेनैव व्याचष्टे ॥ यथैकस्त्विति । तु शब्दोऽवधारणे । यथैक एवेशः स्वयमसुप्त एव बहून्सुप्तान् जीवान् सुप्त्यवस्थायां पश्यति । प्रभुर्यत इति हेतुगर्भविशेषणम् । एवं नित्यदृक् स्वयमज्ञानशून्यः । बहूनज्ञान् अज्ञानबद्धान् जीवान्पश्यति । जाग्रदवस्थायामिति शेषः । सुप्त्यवस्थायामसुप्त ईशः सुप्तान्पश्यति इत्यत्र श्रुतिं चाह ॥ स्वप्नेनेति । स्वप्नेन सुषुप्त्या शारीरं जीवमभिप्रहत्य संयोज्य स्वयमसुप्तः सुप्तान् जीवानभिचाकशीति सम्यक् पश्यतीत्यर्थः । अनुभूः सर्वः सत्यमिति पदत्रयार्थं प्रमाणेनैव दर्शयति ॥ यथेष्टति । अनेनेच्छामनुसृत्य भवतीत्यनुभूतिरिति व्याख्यातं भवति । उदधिनियमपदेऽन्यत्र गते प्रमाणेन व्याख्याते इति ज्ञेयम् । अनेनेदं विशेषणद्वयं च शब्दार्थतया व्याख्येयमिति सूचयति । कर्मणामीश इत्यनेनोदानि कर्माणि धीयन्ते समर्प्यन्तेऽस्मिन्नित्युदधिरिति व्याख्यातं भवति । सच्छब्द उतमं ब्रूयादिति वचनात्सच्छब्दपर्यायस्य सत्यशब्दस्योत्तमवाचित्वम् । मुख्ये सम्भवत्यमुख्यग्रहणमनुचितमिति चाभिप्रेत्य केवल्यसारत्वादित्युक्तम् । निरवधिकोत्तमत्वादित्यर्थः ॥ ततश्चायं श्लोकार्थः ॥ यो भजनीयोऽनन्तः सर्ववित् । सर्वेषां हृदि स्थित इति शेषः । स्वेच्छानुसारेण विग्रहगृहणादनुभूः । चशब्दोऽनुक्तगुणान्तरसमुच्चायकः । सर्वः पूर्णगुणः । आत्मा स्वामी । यथैकः स्वयमसुप्तः सुप्त्यवस्थायां सुप्तजनेक्षिता बहून्सुप्तान् जनान्पश्यति । तथा जाग्रदवस्थायामप्येक एव स्वयमज्ञानरहितः सुप्तजनेक्षिताऽज्ञानबद्धजनान्पश्यतीत्यावृत्त्या योज्यम् । तं सत्यं सर्वोत्तमम् । आनन्दनिधिमानन्दो नितरां धीयतेऽस्मिन्नित्यानन्दनिधिस्तम् । पूर्णानन्दमिति यावत् । सर्वात्मना सर्वथा भजेतोपासीत । आधिव्याधिसद्भावेऽप्येतदुपासनं न हातव्यमित्याशयेन सर्वात्मनेत्युक्तम् । अत्र सर्वविदात्मा सत्यमानन्दनिधिमिति पदचतुष्टयेन सत् चित् आनन्द आत्मेति गुणचतुष्टयमानन्दादयः प्रधानस्येत्यत्र सर्वाधिकारिसाधारणमुपसंहार्यमुक्तं तदेव सूचितमिति ज्ञातव्यम् । अतो भजनादन्यतोऽन्यस्मादभजनाद्विषयसेवनाच्चात्मघात आत्मनः स्वस्य नाश इव । इष्टस्य मोक्षस्यालाभादनिष्टस्य नरकस्य लाभाच्चेति ॥ ७ ॥

कस्तन्त्वनादृत्य परानुचिन्तामृते पशुत्वमसतीं नाम युञ्ज्यात् ।
पश्यञ्जनं पतितं वैतरण्यां स्वकर्मजान्परितापाञ्जुषाणम् ॥ ८ ॥

प्रकाशिका— एतदेवान्यचिन्तानिन्दया दृढयति ॥ कस्तमिति । विगततरणत्वाद्वैतरणीनामनरके विद्यमाना नदी तस्यां हरिविषयानादरेतरचिन्ताप्रयुक्तदोषेण पतितं स्वकर्मजान्स्वदुष्कर्मसमुद्भूतान्परितापान्दुःखविशेषान् जुषाणं भुञ्जानं जनं गुरूपदिष्टशास्त्रेण पश्यन् जानन् को नाम

विवेकी तं भगवन्तम् । तुशब्दो विशेषणार्थः । उक्तविशेषणविशिष्टमनादृत्यानुपास्यासतीमशुभां परानुचिन्तामितरविषयस्मृतिं पशुत्वं विवेकबुद्धिराहित्यमृते विना युञ्ज्यात्कुर्यात् । यस्तु कुर्यात्स पशुरेवेत्यर्थः ॥ ८ ॥

केचित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम् ।
चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्ति ॥ ९ ॥

प्रकाशिका— एवमुत्तमाधिकारिणां ध्यानं विधायेतरेषामपि तद्विधत्ते ॥ केचिदिति । केचिदित्यत्र मध्यमाधिकारिविवक्षायां स्वश्चासौ देहश्च स्वदेह इति व्याख्येयम् । अधमाधिकारिविवक्षायां तु स्वस्य देह इति । तथा च स्वरूपभूतस्य स्वस्वामिकस्य वा देहस्यान्तर्मध्ये यद्धृदयं तत्र योऽवकाशस्तस्मिन्वसन्तम् । प्रादेशस्तर्जन्यङ्गुष्ठयोर्विस्तारः । स एव मात्रा प्रमाणं यस्य । कञ्जं पङ्कजं रथाङ्गं चक्रम् । धारणयाऽऽदावेकैकावयवयुक्तस्मृत्या स्मरन्ति । समग्रमिति शेषः ॥ ९ ॥

प्रसन्नवक्त्रं नलिनायतेक्षणं कदम्बकिञ्जल्कपिशङ्गवाससम् ।
लसन्महाहारहिरण्मयाङ्गदं स्फुरन्महारत्नकिरीटकुण्डलम् ॥ १० ॥

प्रकाशिका— श्लोकचतुष्टयेन तमेव विशिनष्टि ॥ प्रसन्नवक्त्रमित्यादिना । नलिनवद्रक्तपद्मवदायते दीर्घे ईक्षणे यस्य स तथा तम् । कदम्बस्तरुविशेषस्तेन तत्पुष्पं लक्ष्यते । तथा च कदम्बपुष्पस्य किञ्जल्काः केसरास्तद्वत्पिशङ्गे पीते वाससी यस्येत्यर्थः । लसन्महान्हारो यस्य स लसन्महाहारः । हिरण्मयान्यङ्गदानि यस्य स हिरण्मयाङ्गदः । लसन्महाहारश्चासौ हिरण्मयाङ्गदश्चेति कर्मधारयः । तम् । स्फुरन्ति कान्तिमन्ति महान्ति च रत्नानि ययोस्ते स्फुरन्महाहारत्नकिरीटकुण्डले यस्य स तथा तम् ॥ १० ॥

उन्निद्रहृत्पङ्कजकर्णिकालये योगेश्वरास्थापितपादपल्लवम् ।
श्रीलक्षणं कौस्तुभरत्नकन्धरमम्लानलक्ष्म्या वनमालयाञ्चितम् ॥ ११ ॥

प्रकाशिका— उन्निद्रं विकसितं यद्धृत्पङ्कजं तस्य कर्णिकैवालयः स्थानं तस्मिन्योगीश्वरैरास्थापितौ पादपल्लवौ यस्य स तथा तम् । श्रीरेव लक्षणं चिह्नं यस्य स तथा तम् । कुस्तुभात्समुद्राज्जातं कौस्तुभं तेन युक्तो कन्धरो यस्य स तथा तम् । अम्लाना लक्ष्मीः शोभा यस्याः सा तथा तयाऽञ्चितं पूजितम् । भक्तैरिति शेषः ॥ ११ ॥

विभूषितं मेखलयाङ्गुलीयकैर्महाधनैर्नूपुरकङ्कणादिभिः ।
स्निग्धामलैः कुञ्चितनीलकुन्तलैर्विरोचमानाननहासपेशलम् ॥ १२ ॥

प्रकाशिका— मेखलया काञ्च्या । अङ्गुलीयकैरङ्गुलीभूषणैः । महान्ति धनानि मौल्यानि येषां तानि महाधनानि तैः । स्निग्धत्वादिविशेषणविशिष्टैः कुन्तलैः केशैर्विरोचमाने आनने यो हासस्तेन पेशलं सुन्दरम् ॥ १२ ॥

अदीनलीलाहसितेक्षणोल्लसद्भ्रूभङ्गसंसूचितभूर्यनुग्रहम् ।
ईक्षेत चिन्तामयमेनमीश्वरं यावन्मनो धारणयावतिष्ठते ॥ १३ ॥

तात्पर्यम्— चिन्तामयं चिन्ताप्रधानम् । 'यस्मात्सञ्चिन्तितो विष्णश्चिन्तितं प्रददात्यजः । तस्माच्चिन्तामयं देवं वदन्ति ज्ञानचक्षुष' इति च ॥ १३ ॥

प्रकाशिका— अदीनमुदारं यल्लीलाहसितं तेन यदीक्षणं तस्मिन्नुल्लसन्तो ये भ्रूभङ्गा भ्रूविक्षेपास्तैः संसूचिता भूर्यनुग्रहो येन स तथा । तमीक्षेत ध्यायेत् । चिन्तामयमित्येतदनूद्य चिन्ताविकार-मित्यन्यथाप्रतीतिवारणाय व्याचष्टे ॥ चिन्तेति । अत्र चिन्ताशब्देन भक्तस्य हरिविषयिणी चिन्ता विषयापेक्षा च विवक्षिता । तथा चेयमुभयरूपा चिन्ता प्रधाना फलदाने प्रधानसाधनभूता यस्य स तथोक्त इत्यर्थः । अत्र प्रमाणमाह ॥ यस्मादिति । चिन्तितं भक्तापेक्षितम् । कियत्कालमेव ध्यानमित्यत उक्तम् ॥ यावन्मन इति । यावद्धारणया एकैकावयवेन युक्तध्यानेन समग्राङ्गे मनोऽचलमवतिष्ठते । तावदिति शेषः ॥ १३ ॥

एकैकशोऽङ्गानि धियाऽनुभावयेत्पादादियावद्धसितं गदाभृतः ।
जितं जितं स्थानमपोह्य धारयेत्परं परं शुध्यति धीर्यथा यथा ॥ १४ ॥

प्रकाशिका— मनोधारणया समग्राङ्गेऽवतिष्ठत इत्युक्तमेव विशदयति ॥ एकैकश इति । अनुभा-वयेद्ध्यायेत् । हसितं हासेन विकसितं मुखं जितं जितमनायासेन ध्यानविषयं स्थानं पादगुल्फादि-कमपोह्य त्यक्त्वा परम्परं स्थानं जङ्घजान्वादिकं धारयेद्ध्यायेत् । धीर्मनो यथा यथा शुद्ध्यति क्रमेण समग्राङ्गविषयं भवति तथा तथा धारयेत् । अभ्यस्तं कुर्यादित्यर्थः ॥ १४ ॥

यावन्न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः ।
तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत ॥ १५ ॥

तात्पर्यम्— स्थवीयः पातालमेतस्येत्यादि ॥ १५ ॥

प्रकाशिका— पूर्वोक्तवैराजधारणाया उक्तध्यानानान्तरं भक्तियोगसाधनत्वमप्यस्तीत्याह ॥ यावदिति । परा ब्रह्मादयोऽप्यवरा यस्मात्स परावरस्तस्मिन्द्रष्टरि सर्वसाक्षिणि विश्वेश्वरे विश्वनियाम-

केऽस्मिन्स्वध्येये हरौ भक्तियोगः सर्वोत्तमो मम महोपकारकोऽत एव सर्वतः प्रियतम इति माहात्म्यज्ञानपूर्वकः सुदृढः प्रेमप्रवाहो भक्तिस्तल्लक्षणो योग उपायोऽखण्डध्यानप्रापको यावन्न जायत तावत्। तावत्पर्यन्तं पुरुषस्य पूर्णषड्गुणस्य भगवतः स्थवीयोऽतिस्थूलं रूपं क्रियावसाने आवश्यककर्मानुष्ठानानन्तरं प्रयतः प्रयत्नवान्स्मरेत। अनेन नित्यकर्मापि भक्तियोगसाधनमिति सूचितम्। अत्र स्थवीयोरूपं किमित्यपेक्षायां स्थवीय इत्येतनूद्य तद्दर्शयति ॥ स्थवीय इति। पातालमेतस्येत्यादिनोक्तमित्यर्थः ॥ १५ ॥

स्थिरं सुखश्चासनमास्थितो यतिर्यदा जिहासुरिममङ्ग लोकम्।
काले च देशे च मनो न सज्जेत् प्राणान्नियच्छेन्मनसा जितासुः ॥ १६ ॥

तात्पर्यम्— 'भक्त्या प्राणं वशं नीत्वा जितप्राणो भवत्युते'ति षाड्गुण्ये ॥ १६ ॥

प्रकाशिका— एवमुक्तध्यानानन्तरमपरोक्षज्ञानवतां प्रारब्धभोगानन्तरं यदा चरमदेहत्यागेच्छा तदा तेषां कर्तव्यं दर्शयन् मोक्षप्रकारमाह ॥ स्थिरमित्यादिना। यतिर्निर्जितेन्द्रियग्रामोऽपरोक्षज्ञानीमं लोकं देहं यदा जिहासुर्हातुमिच्छति तदा सुखं सुखकरं स्थिरमचलमासनमास्थितः सन् काले उत्तरायणादौ देशे पुण्यक्षेत्रादिरूपे मनो न सज्जेत् सक्तं न कुर्यात्। न तु कालविशेषोऽस्ति ज्ञानिनां नियमात्फलमित्यादि वचनात्पुण्यक्षेत्राद्यलाभे मनःखेदं न कुर्यादिति भावः। तर्हि किं कार्यमित्यत उक्तम् ॥ प्राणानिति। जितासुः प्राणान्वागादीन्द्रियदेवानुमादीन्। मनसा तदभिमानि रुद्रेण यच्छेन्नियम्यांश्चिन्तयेदित्यर्थः। अत्र जितासुरित्यनेन देवोत्तमस्य वायोर्जय उच्यते स कथमित्यतः प्रमाणेनैव तदभिप्रायमाह ॥ भक्त्या प्राणमिति। उतशब्द प्राणायामसमुच्चयार्थः। तथा च जितासुरित्यस्य भक्तिपूर्वकप्राणायामेन प्राप्तमुख्यप्राणप्रसाद इत्यर्थ उक्तो भवतीति ज्ञातव्यम् ॥ १६ ॥

मनश्च बुध्याऽमलया नियम्य क्षेत्रज्ञ एतां निनयेत्तमात्मनि।
आत्मानमात्मन्यवरुध्य धीरो लब्धोपशान्तिर्विरमेत कृत्यात् ॥ १७ ॥

तात्पर्यम्— 'जीवस्थो भगवान्विष्णुः क्षेत्रज्ञ इति गीयते। देहस्थोऽपि स एवात्मा व्याप्तोऽप्यात्मेति भण्यत' इति तत्त्वनिर्णये। हरौ हरेर्भवेन्नीतिस्तदेकत्वस्य चिन्तनम्। अन्यत्र तन्नियम्यादिचिन्तनं नीतिरुच्यत' इति प्रकाशसंहितायाम् ॥ १७ ॥

प्रकाशिका— मनोऽभिमानिनो रुद्रस्याप्यन्याधीनत्वं चिन्तनीयमित्याह ॥ मनश्चेति। अत्र क्षेत्रज्ञ शब्दमात्मशब्दद्वयं च जीवाद्यर्थत्वप्रतीतिनिरासाय प्रमाणेनैव व्याचष्टे ॥ जीवस्थ इति। स एव

विष्णुरेव । आत्मेत्यत्रेति भण्यत इत्यस्यानुकर्षणम् । क्षेत्रज्ञस्यात्मन्यात्मनश्च व्याप्ते नीतिर्न मनोबुद्ध्योरिव । प्रमाणविरोधात् । अतो हरावन्यत्र च विवक्षितां नीतिं प्रमाणेनैव दर्शयति ॥ हरौ हरेरिति । आदिपदेन लयो ग्राह्यः ॥ ततश्चायं श्लोकार्थः ॥ मनो मनोऽभिमानिनं रुद्रममलया बुद्ध्या तदभिमानिन्या सरस्वत्या । उमाव्यावृत्त्यर्थममलयेति विशेषणम् । नियम्य तदधीनं ज्ञात्वा । एतां सरस्वतीं क्षेत्रज्ञ जीवान्तर्यामिणि विष्णौ निनयेत् नितरां प्रापयेत् । ब्रह्मलक्ष्मीद्वारा तदधीनां चिन्तयेदित्यर्थः । अत एव नीत्युपसर्गः । तं जीवान्तर्यामिणमात्मनि देहान्तर्गते विष्णौ निनयेदत्यन्तमभिन्नतया चिन्तयेत् । आत्मानं देहान्तर्गतमात्मनि सर्वत्र व्याप्ते विष्णाववरुद्धचैकीभावेन सञ्चिन्त्य लब्धोपशान्तिः प्राप्तपरमानन्दःकृत्यात्पुनरन्यस्यापि तदुत्तमस्य चिन्तनरूपाद्विरमेत तमेव चिन्तयेत् । तदुत्तमस्य चिन्तनीयस्यान्यस्याभावादितिभावः ॥ १७ ॥

न यत्र कालोऽनिमिषप्रभुः प्रभुः कुतो नु देवा जगतां य ईशिरे ।
न यत्र सत्वं न रजस्तमश्च न वै विकारो न महान्प्रधानम् ॥ १८ ॥

तात्पर्यम्— कालो वायुः । 'हरिश्च प्रकृतिश्चैव ब्रह्मवायू तथैव च । सुपर्णशेषरुद्राश्च शक्रः सूर्ययमावपि । अग्निर्यमानुदश्चैव कालशब्देरिताः क्रमात् । पूर्वोक्तास्त्वपरोक्तानां प्रभवः सर्वशो मता' इत्युद्दामसंहितायाम् ॥ १८ ॥

प्रकाशिका— तत उत्तममन्यन्नास्तीत्येतदेव विशदयति ॥ न यत्रेत्यादिना । अत्र कालस्यानिमिषां परः प्रभुरिति सर्वदेवोत्तमत्वमुच्यते । तत्प्रसिद्धकालग्रहणेऽनुपपन्नमतोऽत्र विवक्षितं कालशब्दार्थमाह ॥ कालो वायुरिति । वायोः कालशब्दवाच्यत्वं कुत इत्यतस्तत्र प्रमाणमाह ॥ हरिश्चेति । तथैव चेत्यत्र विद्यमानस्य चशब्दस्य शक्र इत्यनेन सम्बन्धः । यमानुजः शनैश्वरः । अत्राद्यस्यैवशब्दस्य हरिरेव मुख्यतः कालशब्देरितो न तथाऽन्य इत्यर्थः । द्वितीयस्य त एव कालशब्देरिताः । न तथा प्रसिद्धकाल इत्यर्थः । तृतीयस्य क्रमादेवेति सम्बन्धः । अत्र सुपर्णशेषादेरपि कालशब्दवाच्यत्वकथनं मूलेऽनिमिषामिति यत्कालबहुत्वमुक्तं तदुपपादनाय । अनिमिषमित्यस्य कालवाचित्वमेव कथमिति चेत् कालस्यानिमिषत्वं चलवादेर्नित्यवीक्षणादिति वक्ष्यमाणत्वात् । अनिमिट्शब्दस्यानिमिष शब्दपर्यायत्वात् । पूर्वोक्त इत्यनेनानिमिषां पर इत्येतदपि प्रमापितमिति ज्ञातव्यम् ॥ ततश्चायं मूलार्थः ॥ यत्रात्मशब्दवाच्ये विष्णौ अनिमिषां कालशब्दवाच्यानां शेषसुपर्णादीनां देवानां पर उत्तमः कालो वायुर्न प्रभुः किमपि कर्तुं न समर्थः । तदा देवाः शेषरुद्रादयः कालशब्दवाच्याः प्रभव इति कुतो नु न कुतोऽपीत्यर्थः । देवनियम्यानां जगतां का वार्ता प्रभुत्वमित्याशयेनाह । जगतां प्राणिनां ये ईशिरे स्वस्वकार्यं प्रवर्तयामासुस्ते देवा इति

सम्बन्धः। जगत्कारणान्यपि गुणत्रयादि तत्त्वानि तत्सृष्ट्यादौ न प्रभवन्तीत्याह ॥ न यत्रेति । यत्रात्मशब्दवाच्ये विष्णौ सत्त्वं न प्रभुरित्यादि योज्यम् । विकारोऽहङ्कारः । महान् महत्तत्त्वम् प्रधानं मूलप्रकृतिः । अत्र यत्रेति पदद्वयस्याग्रिमश्लोकस्थेन तत्पदेनान्वयः ॥ १८ ॥

परं पदं वैष्णवमामनन्ति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः ।
विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यापुरमुं पदे पदे ॥ १९ ॥

प्रकाशिका— उक्तरीत्या चिन्तनीयस्य विष्णोरेव सर्वोत्तमत्वे प्रमाणं दर्शयति ॥ परं पदमिति । यद्वैष्णवं पदं विष्णुसम्बन्धिस्वरूपं नेति नेतीत्याद्या वेदाः परमामनन्ति सर्वोत्तमं प्रतिपादयन्ति तत्तदेवोक्तात्मशब्दवाच्यं चिन्तनीयमुक्तमित्यर्थः । स वा एष आत्मा नेति नेतीत्यादि वाक्यानां तात्पर्यं दर्शयति ॥ अत उत्सिसृक्षव इति । तद्ब्रह्म तस्मादन्यदात्मकृत्यादि तदुत्सिसृक्षवो न सर्वोत्तममिति त्यक्तुकामाः । अनेनैष आत्मा प्रकृतिवन्न तत्कार्यवन्न तदभिमानिवच्च न किन्तु सर्वोत्तम एवेति तद्वाक्ययोजनां सूचयति । नन्वेतदुत्सिसृक्षव इति हिरण्यगर्भः समवर्तताग्र इत्यादौ विरिञ्चादेरपि सर्वोत्तमतयाऽभिहितत्वादित्याशङ्कायां वेदाभिप्रायं दर्शयति ॥ विसृज्येति । ये वेदान् दौरात्म्यं दुष्टप्रकृतीनामापाततः प्रतीयमानं हिरण्यगर्भादिकं विसृज्य त्यक्त्वा पदे पदे हिरण्यगर्भादि सर्वपदेषु अमुं विष्णुमुपगूह्यावाच्यतयाऽभिप्रेत्यानन्यसौहृदा नान्यस्मिन्सौहृदं स्वारस्यं येषां ते तथा भूताः सन्तः सुहृदा महातात्पर्येणामुं विष्णुमेवापुः प्रतिपादितवन्तस्ते आमनन्तीति सम्बन्धः । अत्र वेदा योग्युपमया वर्णिता इति ज्ञातव्यम् । योगिनोऽप्यतदब्रह्मान्यत्सांसारिकदुःखमुत्सिसृक्षवस्त्यक्तुकामा दौरात्म्यं दुरात्मनामजितमनसां सम्बन्धिरागादिकं विसृज्यानन्यसौहृदाः सन्तो हृदा मनसाऽमुं पदे पदे क्षणे क्षणे उपगूह्य परिरभ्य ध्यात्वाऽऽपुः प्राप्तास्तथैवेति ॥ १९ ॥

इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरन्धिताशयः ।
स्वपार्ष्णिनाऽऽपीड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः ॥ २० ॥

प्रकाशिका— इदानीं तस्य ज्ञानिनो देहादुत्क्रमणप्रकारमाह ॥ इत्थमिति । इत्थमुक्तप्रकारेण व्यवस्थितो हरावेव निश्चितबुद्धिर्मुनिर्मौन्युपरमेद्देहादुत्क्रान्तो भवेत् । इतरोत्क्रान्तिवैलक्षण्यद्योतनाय तुशब्दः । कथमत्राह ॥ विज्ञानेति । विज्ञानरूपा दृक् विज्ञानमात्मयोग्यं स्यादिति वचनादात्मयोग्यापरोक्षज्ञानं तस्य वीर्यं सामर्थ्यं तेन सुष्टु रन्धितो दग्ध आशयो बाह्यान्तःकरणं यस्य स तथोक्तः । अतः एव जितक्लमो ग्लानिरहितः । प्रथमं स्वपार्ष्णिना गुल्फाधोभागेन गुदमपानद्वारमापीड्य निरुद्ध्य ततो गुदप्रदेशगतब्रह्मनाडीस्थमूलाधाररूपाच्चतुर्दलपद्मादनिलमुदानं वायुं षट्सु स्थानेषु वक्ष्यमाणेषु नाभिहृदयोरस्तालुमूलभ्रूमध्यामूर्धसु क्रमादुन्नयेदूर्ध्वं गमयेत् ॥ २० ॥

नाभ्यां स्थितं हृद्यवरोप्य तस्मादुदानगत्यो रसितं नयेन्मुनिः ।
ततोऽनुसन्धाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत ॥ २१ ॥

तात्पर्यम्— उदानगत्या ब्रह्मनाड्या । 'अथैकयोर्ध्व उदान' इति श्रुतेः । 'प्राणापानाविडायां च पिङ्गलायां च वर्ततः । व्यानः सन्धिषु सर्वत्र उदानो ब्रह्मनाडिगः । सर्वत्रैव समानस्तु समं चरति सर्वग' इति भारते ॥ २१ ॥

प्रकाशिका— संक्षिप्योक्तं विशदयति ॥ नाभ्यामित्यादि । अत्रोदानगत्येतत् षष्ठीतत्पुरुषभ्रान्ति-वारणायानूद्य व्याचष्टे ॥ उदानगत्येति । तथा चोदानस्य गतिर्यस्यामिति बहुव्रीहिरिति भावः । उदानगत्याधारा ब्रह्मनाड्येव कुत इत्यतस्तत्र श्रुतिस्मृती दर्शयति ॥ अथैकयेति । श्रुतावुदानगति-र्ब्रह्मनाड्यामिति स्पष्टोक्त्यभावात्स्मृत्युदाहरणम् । प्राण इडायामपानः पिङ्गलायामिति योज्यम् । सन्धिषु सन्धिस्थितनाडीषु । समानस्तु सर्वगः सर्वनाडीगत इति सम्बन्धः । तत्र समान शब्द-प्रवृत्तिनिमित्तं सूचयति ॥ सर्वत्रैवेति । समं यथा स्यात्तथा चरतीति । अनेन समं नयतीति समान इति निरुक्तिः सूचितेति ज्ञातव्यम् । परंगतो विसृजेदिति ब्रह्मप्राप्त्यनन्तरं देहत्यागः प्रतीयते । स चानुपपन्नः । अतो यथावद्व्यचष्टे ॥ परं चिन्तयन्निति । तथा च परङ्गत इत्यत्र मनसेति शेषः पूरणीय इति भावः ॥ ततश्चायं मूलार्थः ॥ ब्रह्मनाडी हि गुदमारभ्य मूर्धपर्यन्तम् ऋज्वी वर्तते । तन्मध्ये वक्ष्यमाणानि पद्मानि सन्ति । तान्येवात्र नाभ्यादि पदैर्लक्षणीयानि । ततश्चेयं योजना । नाभ्यां स्थितमित्यनुवादबलान्मूलाधारचतुर्दलपद्मान्नाभिप्रदेशस्थब्रह्मनाडीगतषट्दलपद्मे उन्नयेदिति ग्राह्यम् । हृदिप्रदेशगतब्रह्मनाडीस्थेऽष्टदलपद्मे उरसि कण्ठाधोदेशगतब्रह्मनाडीसंस्थे द्वारशदलपद्मे । मनस्वी मनःसमाधानान्वितस्ततो द्वादशदलपद्माद्यथा नाड्यन्तरं न गच्छेत्तथा धियाऽनुसन्धाय शनकै-स्त्वरामकुर्वन् । सावधान इति यावत् । स्वतालुमूलं तत्प्रदेशगतब्रह्मनाडीसंस्थं द्विदलपद्मम् ॥ २१ ॥

तस्माद्भ्रुवोरन्तरमुन्नयेत निरुद्धसप्ताश्वपथोऽनपेक्षः ।
स्थित्वा मुहूर्तार्धमकुण्ठदृष्टिर्निर्भिद्य मूर्धन्विसृजेत्परं गतः ॥ २२ ॥

तात्पर्यम्— परं चिन्तयन् ॥ २२ ॥

प्रकाशिका— भ्रुवोरन्तरम् । तत्प्रदेशगतब्रह्मनाडीसंस्थं चतुर्दशदलपद्मम् । एतत्पद्मं प्रति नयन-समये कर्तव्यमित्थम्भावं दर्शयति ॥ निरुद्धेति । निरुद्धाः सप्तानां कर्णाक्षिनासिकावाक्संज्ञानाम-श्वानामश्वायितानामिन्द्रियाणां पन्थानः सञ्चरणमार्गा येन स तथोक्तः । अनपेक्षो बाह्यसुखानिच्छुः । उक्तपद्मनयनानन्तरं कर्तव्यमित्थं भावमाह ॥ स्थित्वेति । मनसा परं गतस्तं चिन्तयन्निति यावत् ।

उक्तपद्मे मुहूर्तार्धं स्थित्वा मार्गगम्यविशेषेषु अकुण्ठदृष्टिर्मूर्धन्मूर्धनि तत्प्रदेशस्थब्रह्मनाडीगतद्विदलं पद्ममुन्नयेत् । पश्चान्मूर्धन्मूर्धनि निर्भिद्य विदार्य विसृजेत् । देहमिति शेषः । एतानि पद्मानि तन्त्रसारोक्तानि । यथोक्तम् ॥ मूले च नाभौ हृदयेन्द्रयोनिभ्रूमध्यमूर्धद्विषडन्तकेषु । चतुःषडष्टद्विवचतुर्द्विषट्कदलेषु पद्मेषु सितारुणेष्विति ॥ अत्रानुक्तमप्युरः स्थानगतं पद्मं पूर्वटीकोक्तमुक्तमित्यवगन्तव्यम् । साधका द्विविधाः । भक्त्यादिप्रधानाः वायुजयादियोगप्रधानाश्च । तत्र ये वायुजयादियोगप्रधानास्तेषां एवायमुत्क्रमणप्रकार उक्तो न सर्वोत्क्रमिषु साधारण इति ज्ञातव्यम् ॥२२॥

यदि प्रयास्यत्यथ पारमेष्ठ्यं वैहायसानामुत यद्विहारम् ।
अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेन्द्रियैश्च ॥ २३ ॥

प्रकाशिका— एवमुत्क्रान्तस्य योगिनः प्रलयपर्यन्तं वासस्थानं दर्शयंस्तस्य तत्र भोगार्थं जडेन्द्रियाणि सह गच्छन्त्युत नेति जिज्ञासायामाह ॥ यदीति । अथोत्क्रमणानन्तरं पारमेष्ठ्यं परिमेष्ठिनो ब्रह्मणो लोकं यदि प्रयास्यति । उत शब्दः पक्षान्तरे । अथवा वैहायसानां खेचराणां सिद्धानां यद्विहारं क्रीडास्थानं महरादिकमष्टाधिपत्यान्यणिमाद्यैश्वर्याणि यस्मिंस्तं वैकुण्ठं वा यदि प्रयास्यति तर्हि गुणानां सत्त्वादीनां सन्निवायः सन्निवासो यस्मिंलिङ्गशरीरे तस्मिन्सति । परममुक्त्यभावकाल इति यावत् । जडेन मनसा जडैरिन्द्रियैश्च सहैव गच्छेन्न तु परममुक्ताविव तानि परित्यज्येत्यर्थः । अत्र नाड्यान्तरोत्क्रान्तानामेव महरादिकं प्राप्यं स्थानमुक्तं न ब्रह्मनाड्युत्क्रान्तानाम् ॥ विष्वगन्या उत्क्रमणे भवन्तीति वचनादिति ज्ञातव्यम् । अत्रेन्द्रियैश्चिन्मात्रैरिन्द्रियैरित्येवार्थः किं न स्यादित्याशङ्कापरिहाराय प्रमाणमाह ॥ चिन्मात्राणीति । हि यस्मान्मुक्तानामिन्द्रियाणि स्वरूपतो मुक्तचित्स्वरूपादभिन्नानि तस्मात्तानि चिन्मात्राण्येवाहुः । अन्यदा तु तानि स्वरूपाभिन्नेन्द्रियाणि जडयुक्तान्येव जडेन्द्रियमिश्राण्येवेत्यर्थः ॥ २३ ॥

योगेश्वराणां गतिमामनन्ति बहिस्त्रिलोक्याः पवनान्तरात्मा ।
न कर्मभिस्तां गतिमाप्नुवन्ति विद्यातपोयोगसमाधिभाजाम् ॥ २४ ॥

तात्पर्यम्— चिन्मात्राणीन्द्रियाण्याहुर्मुक्तानामन्यदैव तु । तान्येव जडयुक्तानि ह्यभिन्नानि स्वरूपत' इति ब्राह्मे ॥ पवनस्याप्यन्तरात्मा यः तम् । पवनश्चान्तरात्मा चेति वा । 'ईयुस्त्रीन्कर्मणा लोकाञ्ज्ञानेनैव तदुत्तरान् । तत्र मुख्या हरिं यान्ति तदन्ये वायुमेव तु । अपक्वा येन ते यान्ति वायुं वा हरिमेव वा । स्थानमात्राश्रितास्ते तु पुनर्जनिविवर्जिता' इति ब्रह्मतर्के ॥ २३, २४ ॥

प्रकाशिका— उक्तस्थानानां कर्मसाध्यलोकोपरितनत्वान्न कर्मसाध्यत्वमिति वदंस्तेषामवान्तरतारतम्यं साधनानि च दर्शयति ॥ योगेश्वराणामिति । योगेनेश्वरास्तेषाम् । योगसाध्यैश्वर्यवतामिति

यावत् । अत्र पवनान्तरात्मेत्येतदनन्वितं भातीत्यतो यच्छब्दाध्याहारेण द्वेधा योजयति ।। पवनस्यापीति । पवनशब्देन ब्रह्मा ग्राह्यः । वाय्वपेक्षया वैकुण्ठगतस्य हरेरुत्तमगम्यत्वमुपपादयितुं पवनस्याप्यन्तरात्मेत्युक्तम् । पवनश्चेत्यस्यानन्तरं असाविति शेषः । ततश्च पवनरूपो योऽन्तरात्मा सत्यलोकगतस्तमित्यर्थः । मूले त्रिलोक्या बहिरिति सामान्योक्त्या महरादिरपि ज्ञानिप्राप्य इति सूचयति । कर्मभिस्तां गतिं नाप्नुवन्तीत्यनेन त्रिलोक्येव कर्मप्राप्येति सूचितम् । तर्हि किं तत्र साधनमिति जिज्ञासायामुक्तं विद्यातपोयोगसमाधिभाजामपि अधिकारिणां जायमानामिति । अत्र विद्यातपोयोगशब्दाः अपरोक्षज्ञानिविशेषवाचकाः । समाधिशब्दो नित्यध्यानपरः । विद्याशब्दोक्तज्ञानं द्विविधम् । ज्ञानं महाज्ञानं चेति । मुहूर्तमात्रं भगवद्रूपस्याखण्डितमपरोक्षण दर्शनं ज्ञानम् । तेन ब्रह्मलोकः प्राप्यः । मुहूर्तादधिकमखण्डितं भगवदपरोक्षज्ञानं महाज्ञानम् । तेन वैकुण्ठादिहरिलोकः प्राप्यः । षण्मात्रकालयाऽपरोक्षदृशायुक्तं अखण्डितं ध्यानं तपस्तेन तपोलोकः । योगः पादयोगश्चेत्युभयमिह योगशब्देन विवक्षितम् । तत्रैकमात्रायुजा अपरोक्षदृशायुक्तखण्डितं नित्यं ध्यानं योगः । तेन जनोलोकः । एकमात्राचतुर्थभागकालेनापरोक्षदृशा युतम् । नित्यं ध्यानं पादयोस्तेन च महर्लोक इति विवेकः । वक्ष्यति चेतद्भवानाचार्या एकादशे ।। नित्यशो भगवद्रूपस्यापरोक्ष्येण दर्शनम् । मुहूर्तमात्रं ज्ञानं स्यान्महाज्ञानं ततोऽधिकम् । ज्ञानेन ब्रह्मलोकः स्यान्महाज्ञानाद्धरेर्गतिः । सदैवाखण्डितं ध्यानं तप इत्युच्यते बुधैः । अपरोक्षदृशा युक्तं नित्यं षण्मात्रकालया । अपरोक्षदृशा युक्तमेकमात्रायुजा युतम् । योगनाम्ना समुद्दिष्टं ध्यानं नित्यमखण्डितम् । तच्चतुर्भागया नित्यमरोक्षदृशा युतम् । पादयोगाख्यमुद्दिष्टं ध्यानं नित्यमखण्डितम् । तदयोगान्महर्लोको जनो लोकस्तु योगतः । तपसस्तु तपोलोकः प्राप्यते नान्यतः क्वचिदिति ।। यद्यपि नित्यध्यानमपि तपोयोगशब्दार्थान्तर्गतम् अस्मिन् प्रमाणे उक्तम् । तथाऽपि मूले समाधिशब्देन तस्य पृथग्गृहीतत्वात् अत्र तपोयोग शब्दावुक्तापरोक्षज्ञानविशेषमात्रपरौ । पृथग्विशेषणपदसमवधाने विशिष्टपराणां शब्दानां विशेष्यमात्रपरत्वादिति मन्तव्यम् । अत्र हरेः पवनस्य महरादेश्च प्राप्यत्वोक्त्या तारतम्योपेतापरोक्षज्ञानानां साधनत्वोक्त्या च वैकुण्ठादि लोकेषु तारतम्यं सूचितमिति ज्ञातव्यम् । अत्र प्राप्यतयोक्तं महरादिलोकपञ्चकमेकस्यैवाधिकारिणो विरुद्धम् । अतोऽधिकारिभेदेनेदमुक्तमिति भावेनात्र प्रमाणमाह ।। ईयुस्त्रीनिति । अनेन न कर्मभिरित्यनेन यत्त्रिलोक्याः कर्मसाध्यत्वं सूचितं तत्प्रमापितमिति ध्येयम् । ज्ञानेनैव तदुत्तरानित्यनेन विद्यातपोयोगेत्येतदुक्तार्थम् । मुख्या अप्रतीकालम्बनाः । तदन्ये प्रतीकालम्बनाः । अनेन पवनान्तरात्मेत्यस्य तात्पर्यमुक्तमिति ध्येयम् । अपक्का भक्त्यादिपरिपाकशून्याः । अब्रह्मनाड्युत्क्रान्ता इति यावत् । स्थानमात्राश्रिता हरिवाय्वोः स्थानमात्रे महरादावेवाश्रिताः । न तद्व्यक्तिस्थाना इत्यर्थः । अनेन बहिस्त्रिलोक्या इत्येतदुक्तार्थमिति ज्ञातव्यम् ।। ततश्चायं मूलार्थः ।। विद्यातपोयोगसमाधिभाजां विद्या पदोदितापरोक्षज्ञानविशेषसामग्रीमताम् । योगेश्वराणां योगलब्धैश्वर्यवताम् । पुंसां गतिं गम्यं त्रिलोक्याः

भूर्भुवः स्वः संज्ञाया बहिरुपर्यामनन्ति वेदास्तां कर्मभिर्नाप्नुवन्ति । तत्रापि ब्रह्मनाड्युत्क्रान्तानां विशेषमाह ॥ पवनान्तरात्मा यस्तमिति । ब्रह्मनाड्युत्क्रान्ता द्विविधाः । अप्रतीकालम्बनाः प्रतीकालम्बनाश्चेति । तत्राप्रतीकालम्बनानां पवनस्यान्तरात्मा यो वैकुण्ठलोकगतो हरिस्तम् । प्रतीकालम्बनानां तु पवनरूपो योऽन्तरात्मा सत्यलोकगतो ब्रह्मा तमिति योज्यम् । अन्यनाड्युत्क्रान्तानां तु महरादिकमेव गम्यं न तु हरिर्वायुर्वा । तत्र तयोरव्यक्तयैवावस्थितत्वादिति । एवमेव यदि प्रयास्यतीति पूर्वश्लोकेऽप्यधिकारिभेदेन पारमेष्ठ्यादिस्थानानि व्याख्येयानि ॥ २४ ॥

वैश्वानरं यति विहायसा गतः सुषुम्नया ब्रह्मपथेन शोचिषा ।
विधूतकल्कोऽथ हरेरुदस्तात्प्रयाति चक्रं नृप शैंशुमारम् ॥ २५ ॥

तात्पर्यम्— हरेः शैंशुमारं चक्रम् । वैश्वानरोदस्तात् । 'वैश्वानरे द्युनद्यां वा सूर्ये वा देह एव वा । विधूय सर्वपापानि यान्ति किंस्तुघ्नकेशवमि'ति ब्रह्माण्डे ॥ २५ ॥

प्रकाशिका— उत्क्रान्तानामुक्तगम्यं प्रति गन्तुमार्गं संक्षेपतो दर्शयति ॥ वैश्वानरं यातीति । शोचिषा हृदयाग्रप्रज्वलनेन प्रकाशितनाडीद्वार इति शेषः । सुषुम्नया ब्रह्मनाड्या । गतोनिर्गतः । विहायसाऽऽकाशगतेन ब्रह्मपथेनार्चिरादिना वैश्वानरं याति । अथ वैश्वानरप्राप्त्यनन्तरं विधूतकल्कस्त्यक्तप्रारब्धपापः सन् वैश्वानरादधस्ताद्विद्यमानं हरेः शैंशुमारं शिंशुमारसम्बन्धिचक्रं चक्रवत्परिभ्रमणशीलं स्वरूपम् । तत्रत्यं ध्रुवं लोकमिति यावत् । प्रयातीत्यन्वयः । अत्र हरेरुदस्तात् शैंशुमारमिति यथास्थितान्वये शिंशुमारस्य हरित्वाभावः प्राप्नोत्यतोऽत्राभिमतमन्वयं दर्शयति ॥ हरेः शैशुमारं चक्रमिति । तर्ह्यधस्तादित्यस्यावधिसापेक्षत्वादवधिर्वक्तव्य इत्यतः प्रकृतो वैश्वानर एव तदवधिरित्याह ॥ वैश्वानरेति । विधूतकल्क इत्यनेनोक्तप्रारब्धपापक्षयस्य स्थानानि दर्शयन् शिंशुमारस्य हरित्वे प्रमाणमाह ॥ वैश्वानरेति । सर्वपापानि प्रारब्धानि । अधिकारिभेदादियमुक्तिः । किंस्तुघ्नः शिंशुमारः ॥ २५ ॥

योन्तः पचति भूतानां यस्तपत्यण्डमध्यगः ।
सोऽग्निर्वैश्वानरो मार्गो देवानां पितृणां मुनेः ॥ २६ ॥

तात्पर्यम्— 'पितृयानं देवयानं ब्रह्मयानमिति त्रिधा । गच्छन्वैश्वानरं याति तस्मान्मार्गः स ईरितः ॥ २६ ॥

प्रकाशिका— ननु विश्वनरसम्बन्धित्वरूपयोगेन जाठराग्नेरेव वैश्वानर शब्दवाच्यताऽवगमात्तस्य कथं ज्ञानिप्राप्यत्वमित्यत आह ॥ योऽन्त इति । यो भूतानामन्तः स्थित्वा तद्भुक्तमन्नं पचति ।

अनेन विश्वनरसम्बन्धित्वरूपयोगो दर्शितः । य एवाण्डमध्यगो ब्रह्माण्डमध्यगतः स्वलोक-मध्यगतस्तपति सोऽपि वैश्वानरो वैश्वानरशब्दवाच्यः । कुतो यतोऽग्निर्जाठराग्न्यभिन्नः । जाठराग्न्य-भिन्नत्वतो ज्ञानिप्राप्यलोकगतस्यापि वैश्वानरशब्दवाच्यत्वं युज्यत इति भावः । ननु मार्गतया प्रसिद्धेषु अर्चिरादिषु सत्सु वैश्वानरस्यैव कुतो मार्गतयात्र ग्रहणमित्यत आह ॥ मार्गो देवानामिति । अत्र देवादि पदैस्तद्यानेन गन्तारो लक्ष्यन्ते । तथा च देवानां देवयानेन गन्तॄणां पितॄणां पितृयानेन गन्तॄणां मुनेर्ब्रह्मयानेन गन्तुश्च वैश्वानरो मार्ग इत्यर्थः । सर्वैरूर्ध्वलोकगन्तृभिः प्राप्यत्वरूपं माहात्म्यं वैश्वानरस्य दर्शयितुं स एव मार्गतयाऽत्र निर्दिष्ट इति भावः । अत्र देवादीनामेव वैश्वानरो मार्ग इति प्रतीतिवारणाय विवक्षितमर्थं प्रमाणेनाह ॥ पितृयानमिति । तस्मात्सर्वोर्ध्वलोकगन्तृप्राप्यत्वात् । सःवैश्वानरो मार्गोऽर्चिरादीन्विहाय मार्गतयेरितः । पुराणादाविति शेषः ॥ २६ ॥

देवयानं पिङ्गलाभिरहान्येति शतायुषा ।
रात्रीरिडाभिः पितॄणां विषुवत्तां सुषुम्नया ॥ २७ ॥

तात्पर्यम्— 'दक्षिणाः पिङ्गलाः सर्वा इडा वामाः प्रकीर्तिताः । नाड्योऽथ मध्यमाः प्रोक्ताः सुषुम्ना वेदपारगैरि'ति भागवततन्त्रे । 'देवयानस्य मार्गस्था अहःशब्दाभिसञ्ज्ञिताः । पितृयानस्य मार्गस्था रात्रिशब्दाह्वया मता' इति बृहत्तन्त्रे ॥ 'शतायुर्मरणं चैव कालिकं परमावृतिरि'-त्यभिधाने ॥ पिङ्गलाभिः शतायुषा अहः सञ्ज्ञं देवयानमेति । इडाभी रात्रिसञ्ज्ञं पितृयानम् । 'विषुवत्ता ब्रह्मयानो विशेषेण सुखं यतः । पिङ्गला देवयानं स्यात्पिङ्गाख्यसुखदं यतः । इडाऽन्नदानात्पितॄणामेवं मार्गाः प्रकीर्तिता' इति ब्रह्मतर्के ॥ २७ ॥

प्रकाशिका— ननु देवयानादि मार्गत्रयेण गन्तारः सर्वेऽपि किं सुषुम्नानाड्यैवोत्क्रान्ता भवन्तीत्यत ॥ देवयानमिति । अत्र पिङ्गलेडासुषुम्नाशब्दवाच्यान्नाडीविशेषान्प्रमाणेनैव दर्शयति ॥ दक्षिणाः पिङ्गला इति । हृदयदेशे एकाधिकशतसङ्ख्याका नाड्यः सन्ति । तत्र मध्ये एका नाडी तस्या नाड्योर्दक्षिणवामभागयोः पृथक् पञ्चाशं नाड्यः सन्ति । तत्र दक्षिणा दक्षिणभागस्थाः सर्वनाड्यः पिङ्गलाः पिङ्गलाशब्देन प्रकीर्तिताः प्रकर्षेण व्यवहृताः । वेदपारगैरित्यत्रास्यापि सम्बन्धः। अतो रूढ्या तच्छब्दवाच्या इति भावः । एवमग्रेऽपि । वामा वामभागस्थाः सर्वनाड्यः इडाशब्देन प्रकीर्तिताः । अथ मध्यमा मध्यभागस्था नाडी सुषुम्नाशब्देन वेदपारगैः प्रोक्ता । अतो रूढ्या तच्छब्दवाच्येत्यर्थः । ननु पिङ्गलाभिर्देवयानमिडाभिः पितृयानमिति मूलोक्तं कथं पिङ्गलाभिरहानीडाभिः रात्रीरेतीत्यन्यत्रोक्तत्वादित्याशङ्कायां तत्रत्याहोरात्रिशब्दाभ्यां देवयानपितृयाने एव विवक्षितेऽतो न कोऽपि विरोध इत्याशयेन मूलेऽहानीति देवयानस्य रात्रीरिति पितृयानस्य च

विशेषणमुक्तम् । तदयुक्तमिवाभाति । अग्न्यादिरूपदेवयानस्य धूमादिरूपपितृयानस्य चाहोरात्रिरूप-कालभेदासम्भवादित्यतस्तत्प्रमाणेनैव घटयति ॥ देवयानस्येति । देवयानस्य पितृयानस्येति षष्ठ्यो-स्तादात्म्यरूपः सम्बन्धोऽर्थः । एवं च देवयानात्मकमार्गस्थाः पितृयानात्मकमार्गस्था इत्यर्थः। मार्गतयोच्यमानानामग्न्यादीनां धूमादीनां चाभिमानिन इति यावत् । जडानां प्राप्यत्वाभावदर्श-नायेदमुक्तम् । एवं च नात्राहोरात्रिरूपकालभेदोऽभिमतः किन्तु तच्छब्दवाच्यत्वं तत्र । तत्र चेयं स्मृतिरेव मानमतो न कोऽपि दोष इति भावः । अत्र देवयानाख्यमार्गस्थाः पितृयानाख्यमार्गस्था इति पाठो युक्त इति भाति । ननु शतायुषेत्यत्र यदि शतसंवत्सररूपमायुर्विवक्षितं तर्हि तपूर्ता-वेवोत्क्रान्त्यादिकमत्रोक्तं स्यान्न च तद्युज्यते । प्रारब्धकर्मावसाने ततः पूर्वमप्युक्रान्तिसम्भवादित्य तोऽत्राभिमतं शतायुशब्दार्थं प्रमाणेनैव दर्शयति ॥ शतायुरिति । शतायुः कालिकं परमावृतिश्चेत्येतैः शब्दैर्मरणमेव क्वचिदुच्यत इत्यर्थः । मरणस्य शतायुशब्दवाच्यत्वे प्रायः शतसंवत्सरस्यान्ते जायमानत्वं, कालिक शब्दाभिधेयत्वेयमसम्बन्धित्वं, पर शब्दवाच्यत्वे द्विपरार्धावसाने नियमेन जायमानत्वम् आवृति शब्दवाच्यत्वे स्वकालैज्ञानप्रतिबन्धकत्वं निमित्तमिति द्रष्टव्यम् । पारमिति पाठे पार शब्दोऽवसानवाचीति प्रसिद्धमेव । पदानां व्यवहितत्वादनूद्यान्वयं दर्शयन्वचनभेदाद्देवयानमहानि पितृयानं रात्रीरिति कथं सामानाधिकरण्यमित्यतस्तदुपपादयति ॥ पिङ्गलाभिरिति । अहः संज्ञं रात्रिसंज्ञमित्येकवचनप्रयोगाभ्यामुभयत्रैकवचनस्य बहुवचनादेश इति सूचयति । ननु पितृयानं देवयानं ब्रह्मयानमिति त्रिधेति मार्गत्रयवचनात्परिशेषेण सुषुम्नाया ब्रह्मयानमेतीति वक्तव्ये विषुवत्तामिति किमुच्यत इत्यतो विषुवत्ताशब्देन ब्रह्मयानमेव विवक्षितमिति प्रमाणेनैवाह ॥ विषुवत्ता ब्रह्म-यानमिति । तस्य तत्र योगं दर्शयति ॥ विशेषेणेति । अनेन विशिष्टं सुखं विषुस्तदस्यास्ति दातृतयेति विषुवत् । विषुवदेव विषुवत्ता । स्वार्थे तल् । वीत्युपसर्गयोगात्सकारस्य षकार इत्युक्तं भवति । एवं देवयानमेतीति वक्तव्ये पिङ्गलामेतीति पितृयानमेतीति वक्तव्ये इडामेतीति क्वचिदुच्यतेत्यादि विरोध इत्याशङ्क्य तत्रापि योगेन पिङ्गलेडाशब्दाभ्यां देवयानपितृयाने एव विवक्षितेऽतो न विरोध इति प्रमाणेनैवाह ॥ पिङ्गलेत्यादिना । पिङ्गलाख्येत्यस्यार्थः प्रमाणान्तरेण द्रष्टव्यः । तथा च पिङ्गाख्यं सुखं लाति ददातीति निर्वचनमेवानेन सूचितमिति ज्ञातव्यम् । अन्नदानादित्यनेनेडाऽन्नमस्य दातृ-तयाऽस्तीतीडा मतुपो लोप इत्युक्तं भवति । पितॄणामित्यत्र बुद्ध्या विविक्तं यानमित्येतदनुवर्तते ॥ ततश्चायं देवयानमिति श्लोकार्थः ॥ पिङ्गलाभिर्दक्षिणपार्श्वस्थनाडीभिः । शतायुषा मरणेनोत्क्रान्त्येति यावत् । अहान्यहसंज्ञं देवयानमेति । इडाभिर्वामपार्श्वस्थनाडीभिः शतायुषा उत्क्रान्तिरूपमरणेन रात्रीः रात्रिसंज्ञां पितॄणां यानमेति । सुषुम्नया मध्यगतया ब्रह्मनाड्या शतायुषा विषुवत्तां विशिष्ट-सुखदत्वाद्विषुवत्ताख्यं ब्रह्मयानमेतीति । अत्र देवयानब्रह्मयानेऽपुनरावृत्तिलोकमार्गावान्तरभेदरूप इति ध्येयम् ॥ २७ ॥

तद्विश्वनाभिं त्वभिपद्य विष्णोरणीयसा विरजेनात्मनैकम् ।
नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमन्ते ॥ २८ ॥

तात्पर्यम्— अशेषजगदाधारः शिंशुमारो हरिः परः । सर्वे ब्रह्मविदो नत्वा तं यान्ति परमं पदमि'ति ब्रह्माण्डे ॥ तद्विष्णोर्विश्वाधारं रूपं प्रतिपद्य यत्र कल्पायुषस्तं महर्लोकमुपैति । 'मन्वन्तरायुषः स्वर्ग्या महर्लोके तु काल्पिकाः । आब्रह्मणो जनाद्यास्तु महर्लोकेऽपि ये वरा'इति ब्राह्मे ॥ २८ ॥

प्रकाशिका— एवं शिंशुमारपर्यन्तमागतानां ज्ञानिनां गम्यं यद्बहिस्त्रिलोक्याः पवनान्तरात्मेत्यत्रोक्तं तदेव स्मारयति ॥ तदिति । अत्र विश्वनाभि शब्दार्थाद्यप्रतीतेः श्लोकतात्पर्यं प्रमाणेनैव दर्शयति ॥ अशेषेति । अनेन विश्वशब्दोऽशेषजगदर्थो नाभिस्त्वाधारार्थ इत्युक्तं भवति । एक शब्दार्थः परः सर्वोत्तम इति । विश्वनाभिरित्यस्यार्थः ॥ अशेषेति । विष्णोः सदित्यस्य परामर्शं दर्शयति ॥ शिंशुमारो हरिरिति । ब्रह्मविदां नमस्कृतत्वे इत्यस्य तात्पर्यम् । सर्वे ब्रह्मविदो नत्वेति । चतुर्थपादतात्पर्यम् ॥ याति परमं पदमिति । महरादिलोकमित्यर्थः । तदिति नपुंसकलिङ्गेन परामृश्यं किमिति न प्रतीयतेऽतस्तद्दर्शयन् श्लोकं स्वयं व्याचष्टे ॥ तद्विष्णोरिति । विष्णोस्तद्रूपमित्युक्त्या शिंशुमारं चक्रमिति पूर्वोक्त चक्र शब्दस्य रूपार्थकत्वमतस्तत्परामर्शोऽयमिति सूचयति । यदित्यस्यार्थः यत्रेति । तस्यान्वयाय तमित्यध्याहृतम् । महर्लोकमित्युपलक्षणम् । जनादिकमपि ग्राह्यम् । कल्पायुष इत्युक्त्या कथं महरादिलोकलाभ इत्यतस्तत्र प्रमाणमाह ॥ मन्वन्तरायुष इति । स्वर्ग्याः स्वर्गे भवाः । मन्वन्तरायुषो मन्वन्तरमेकमनुभुक्तिकालपरिमितमायुर्येषां ते तथा । अन्यस्य मनोः प्राप्तौ स्वर्गे विद्यमानानां पूर्वेषां देवादीनां प्रायो नाशात् । इदं तु वक्ष्यमाणतुशब्दव्यावृत्त्यर्थप्रदर्शनार्थमेवोक्तमिति ध्येयम् । महर्लोके विद्यमाना इति शेषः । काल्पिका अत्र कल्प शब्देन ब्रह्मणो दिनं ग्राह्यम् । तथा च ब्रह्मादिनपरिमितायुष इत्यर्थः । जनाद्या जनादिलोकस्थाः । आब्रह्मणः ब्रह्म शब्देन तत्प्रलयो लक्ष्यते । तथा च ब्रह्मप्रलयपर्यन्तायुष इत्यर्थः । अनेन कल्पायुष इत्येतद्द्वेधा व्याख्यातमिति ज्ञातव्यम् । महर्लोके तु काल्पिक इत्यस्यापवादमाह ॥ महर्लोकेऽपीति । महर्लोके विद्यमानेष्वपि ये वरा भृग्वाद्यास्तेऽपि आब्रह्मणो ब्रह्मप्रलयपर्यन्तायुष इत्यर्थः ॥ ततश्चायं श्लोकार्थः ॥ ज्ञानिसङ्घो ब्रह्मविदां ब्रह्मविद्भिर्नमस्कृतं विश्वनाभिं जगदाधारं विष्णोरेकं मुख्यं केवलमिति यावत् तच्छिंशुमाररूपं तु भक्त्याद्यतिशयेनाभिपद्य प्राप्य विरजेन विगतरागादिदोषेणाणीयसा सूक्ष्मतरेणात्मना लिङ्गदेहेन यद्यत्र महरादिलोके कल्पायुषो विबुधा देवा रमन्ते तं लोकमुपैतीति । ज्ञानिनो द्विविधाः । अपक्वसाधनाः पक्वसाधनाश्चेति । तत्र पक्वसाधनाः

पिङ्गलानाड्युत्क्रान्ताः । तेऽपि त्रिविधाः । अपक्वसाधनाः अपक्वतरसाधना अपक्वतमसाधनश्चेति । तत्राद्यास्तपोलोकमुपयान्ति । द्वितीया जनोलोकम् । तृतीया महर्लोकम् । अपक्वा येन ते यान्ति वायुं वा हरिमेव वा । स्थानमात्राश्रितास्त इति पूर्वमुक्तत्वात् । पक्वसाधनास्तु ब्रह्मनाड्युत्क्रान्तास्तेऽपि द्विविधाः । प्रतीकालम्बना अप्रतीकालम्बनाश्चेति । तत्राद्याः सत्यलोकमुपयान्ति । द्वितीया वैकुण्ठलोकमिति विवेकः । तत्रापक्वतमसाधनानपेक्ष्य कल्पायुष इत्यस्याद्यं व्याख्यानं द्वितीयं तदितरेषामिति द्रष्टव्यं ॥ २८ ॥

अथो अनन्तस्य मुखानलेन दन्दह्यमानं स निरीक्ष्य विश्वम् ।
निर्याति सिद्धेश्वरजुष्टधिष्ण्यं यद्द्वैपरार्ध्यं तदु पारमेष्ठ्यम् ॥ २९ ॥

प्रकाशिका— इदानीं सान्तानिकलोकेषु विहरतां ज्ञानिनां ब्रह्मणा सह मुक्तिं वक्तुं सान्तानिकलोकेभ्यो निर्गमने हेतुं वदन् सत्यलोकप्राप्तिं तावदाह ॥ अथोऽनन्तस्येति । अथो स्थितिकालसमाप्त्यनन्तरं स ज्ञानिसङ्घोऽनन्तस्य शेषान्तर्गतसङ्कर्षणस्य मुखानलेन मुखनिर्गताग्निना दन्दह्यमानं पुनः पुनरतिशयेन च दह्यमानं विश्वं निरीक्ष्य । महाप्रलयं प्राप्तमवलोक्येति यावत् । यत्सिद्धेश्वरैर्जुष्टानि धिष्ण्यानि विमानानि यस्मिंस्तथा । यच्च द्वैपरार्ध्यम् । द्वयोः परार्धयोः सम्बन्धि तत्पारमेष्ठ्यं परमेष्ठिना ब्रह्मणाऽधिष्ठितं सत्याख्यं स्थानं प्रति निर्याति महरादेर्निर्गत्य यातीत्यर्थः । उ इत्यनेन तस्योत्कृष्टत्वमुक्तम् ॥ २९ ॥

न यत्र शोको न जरा न मृत्युर्नार्तिर्न चोद्वेग ऋते कुतश्चित् ।
यच्चित्ततोदः क्रिययाऽनिदंविदां दुरन्तदुःखप्रभवानुदर्शनात् ॥ ३० ॥

तात्पर्यम्— ऋते सत्यलोके । अनिदंविदाम् अब्रह्मविदाम् । दुरन्तदुःखं च प्रभवश्च । 'सर्वदुःखविहीना ये मुक्ताः प्रायस्तु तादृशाः । अमुक्तास्तु जनाद्येषु विशेषेण तु सत्यगा' इति वाराहे ॥ विष्णोर्लोकं तदैवैके यान्ति कालान्तरे परे । आज्ञयैव हरेः केचिदपूर्तैः केचिदञ्जसा । विहृत्यैवान्यलोकेषु मुच्यन्ते ब्रह्मणा सहे'ति वामने ॥ २९, ३० ॥

प्रकाशिका— तदेवाह ॥ न यत्रेति । अत्र ऋत इत्येतदनूद्य तस्य विनेत्यर्थेऽन्वयाद्यभावाद्विवक्षितार्थमाह ॥ ऋते सत्यलोक इति । ऋतशब्दस्य सत्यशब्दपर्यायत्वादिति भावः । अनिदं विदामित्येतदनूद्येदं शब्दपरामर्शं दर्शयन्व्याचष्टे ॥ अब्रह्मविदामिति । तथा चातिसामीप्याद्ब्रह्मेदं शब्देनोच्यते परामृश्यते । तद्विदो न भवन्तीत्यनिदंविदस्तेषामित्यर्थः । दुरन्तदुःखप्रभवानुदर्शनादित्यत्र दुरन्तदुःखस्य प्रभव इति षष्ठीतत्पुरुषाश्रयणे दुःखोत्पत्तिदर्शनस्यैव

चित्ततोदहेतुत्वं प्राप्नोति । न दुःखदर्शनस्यातोऽत्र द्वन्द्व एव विवक्षित इत्याह ॥ दुरन्तदुःखं चेति । ननु सर्वात्मना शोकराहित्यं मुक्तानामसाधारणं प्रसिद्धम् । तत्कथं सत्यलोकस्थानाममुक्तानामुक्तमित्यत आह ॥ सर्वेति । जनाद्येषु लोकेषु स्थिता अमुक्ताः प्रायस्तु तादृशाः । सर्वदुःखविहीना एव । सत्यगाः सत्यलोकस्था अमुक्तास्तु विशेषेण जनादिलोकस्थामुक्तापेक्षया विशेषेण तादृशा इति सम्बन्धः । तथा च मूले न यत्रेत्यादिना यच्छोकराहित्यं सत्यलोकस्थानामुक्तं तन्न सर्वात्मना किन्तु जनादिलोकस्थितान्मुक्तानपेक्ष्यैवेत्युक्तं भवति ॥ ततश्चायं मूलयोजना । यत्र ऋते सत्यलोके । आधिर्मनोव्यथा यत्रानिदं विदामब्रह्मज्ञानिनां क्रियया काम्यनिषिद्धादिरूपया दुःखस्य प्रभवस्य नानायोनिषु जननस्य चानुदर्शनाद्वारं वारं दर्शनात् । यश्चित्ततोदो मनःखेदविशेषः सोऽपि नास्ति । तत्पारमेष्ठ्यमिति पूर्वेणान्वय इति । पवनान्तरात्मेत्यादावप्रतीकालम्बनानां विष्णुलोकप्राप्तिरुक्ता । साऽपि किं तेषां सर्वेषामप्युत्क्रान्त्यनन्तरमेव भवतीति जिज्ञासायां तत्र विशेषं दर्शयितुं पुराणवाक्यं पठति ॥ विष्णोर्लोकमिति । तदैवोत्क्रान्त्यनन्तरमेव । एके अत्यन्तं हरिप्रीतिविषया अप्रतीकालम्बनाः । परेऽतादृशा अप्रतीकालम्बनाः । एतेऽपि द्विविधाः । अञ्जसा साधनपूर्तिमन्तस्तदभाववन्तश्चेति । तत्राद्यानां कालान्तरे विष्णुलोकगमने निमित्तमाह ॥ आज्ञयैवेति । एतेऽस्मिन्काले मल्लोकमायान्त्विति हरेराज्ञयैवेत्यर्थः । न तु साधनपूर्त्यभावेनेत्येवकारार्थः । द्वितीयानामपि तदाह ॥ अञ्जसापूर्तेरिति । कालान्तरे यान्ति चेत्तावत्पर्यन्तं ते कुत्र वसन्तीत्यपेक्षायामुक्तम् ॥ विहृत्यैवेति । परेऽन्यलोकेष्वेव विहृत्य कालान्तरे यान्तीति सम्बन्धः । न चाप्रतीकालम्बनेषु अयं विभागः कुतो व्याख्येय इति शङ्क्यम् । तदितरेषां प्रतीकालम्बनानां महरादिलोकगतानां वा प्रलयात्पूर्वं विष्णुलोकप्राप्तेः शास्त्रविरुद्धत्वात् । अत्राप्येवमुक्तम् । कार्यब्रह्मप्राप्तानां प्रतिकालम्बनानां परब्रह्मप्राप्त्यभावे ब्रह्मविदाप्नोति परमिति श्रुतिविरोध इत्याशङ्कायां सामीप्यात्तु तद्व्यपदेश इति सूत्रेण समाहितायां कदेति प्रश्ने कार्यात्यये तदध्यक्षेण सहेति सूत्रेण प्रलयकाल इत्युत्तरमुक्तम् । तेन ज्ञायते न प्रलयात्पूर्वं तेषां विष्णुलोकप्राप्तिरस्तीति शास्त्राभिप्राय इति । एवं यदा सत्यलोकगतानां प्रलयात्पूर्वं विष्णुलोकाप्राप्तिस्तदा का प्रत्याशा महरादिलोकगतानां तदा तत्प्राप्ताविति । अत उक्तं युक्तमित्यवधेयम् । कालान्तर इत्यस्य प्रलयकाल इत्यर्थत्वे तु मुच्यन्ते ब्रह्मणा सहेत्यनेन पुनरुक्तिरिति ध्येयम् । तर्हि तेषामन्येषां वा ज्ञानिनां कदा प्रकृतिबन्धापगमरूपा मुक्तिरित्यपेक्षायामुच्यते ॥ ब्रह्मणा सहेति । महत्तत्त्वाभिमानिना ब्रह्मणा सहेत्यर्थः । अनेन वक्ष्यमाणा ब्रह्मणा सह मुक्तिरपि प्रमापितेति ज्ञातव्यम् । एतदर्थमेवास्य वाक्यस्यात्रोदाहरणं कृतम् । अन्यथा पवनान्तरात्मेत्येतद्व्याख्यावसर एव तत्कार्यमिति ॥ ३० ॥

ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनाऽपोऽनलमूर्धि च त्वरन् ।
ज्योतिर्मयो वायुमुपेत्य काले वाय्वात्मना खं बृहदात्मलिङ्गम् ॥ ३१ ॥

तात्पर्यम्— ब्रह्मणा सह विशेषं पृथिवीम् । तेनात्मना पृथिव्यात्मना । ज्योतिर्मय अग्निप्रधानः । आकाशवत्सर्वगतश्च नित्य इति । परमात्मसदृशं किञ्चित् । 'ज्ञानिनः प्रलये सर्वे ब्रह्मणा सह पार्थिवम् । परमात्मानमाविश्य वारिस्थं तत्समन्विताः । अग्निस्थं तद्युताश्चैव तेन नीताश्च वायुगम् । नभोगतं तेन नीता मनःस्थं तद्युतास्तथा । ततो बुद्धिस्थमीशेशं ततोऽहङ्कारगं हरिम् । ततो विज्ञाननामानं महत्तत्त्वगतं हरिम् । तत आनन्दनामानमव्यक्तस्थं जनार्दनम् । प्राप्य नावृत्तिमायान्ति शान्ति(ती)भूता निरामयाः ॥ येषां पदान्तरापेक्षा वाय्वादीनां महात्मनाम् । आवृत्य ते पुनर्यान्ति ज्ञानिनोऽपि निरामयाः । अनावृत्तिमसंमूढाः परानन्दैकभागिन' इति ब्रह्मतर्के ॥ 'भूम्यब्गमन्ननामानं प्राणमग्न्यादिसंस्थितम् । मानसं मन आदिस्थं विज्ञानं महति स्थितम् । आनन्दमव्यक्तगतं क्रमशो यान्ति देवताः । ब्रह्माद्याः केचिदेवात्र तदन्ये क्रमशोऽपरानि'ति बृहत्तन्त्रे ॥ ३१ ॥

प्रकाशिका— इदानीं सत्यलोके विष्णुलोके च स्थितानां ज्ञानिनां महत्तत्त्वाभिमानिना ब्रह्मणा सह मुक्तिं वक्तुं पृथिव्यादि गुणत्रयान्तानां तत्वानां सृष्टिक्रमवैपरीत्येन लयं तदभिमानिनां स्वोत्तमेषु देहलयं च सूचयन् ज्ञानिसङ्घस्य क्रमेण पृथिव्यादि प्राप्तिं तावदाह ॥ ततो विशेषमित्यादिना । अत्र ज्ञानिसङ्घः स्वयमेव गच्छतीति प्रतीयते । तद्वक्ष्यमाणप्रमाणविरुद्धम् । अतोऽत्रापेक्षितं पूरयति ॥ ब्रह्मणा सहेति । अत्र ब्रह्म पदं तदितरदेवोपलक्षकम् । ततश्च ब्रह्मादिदेवैः सहेत्यर्थः ॥ अयमत्र सम्प्रदायः ॥ सङ्कर्षणमुखाग्निना चतुर्दशभुवनानां नाशे तल्लोकपालानां ब्रह्मादिदेवानां देहान्नृसिंहो नाशयति । ब्रह्म चर्मशिरः पट्टी दिक्कूलोर्ध्वाङ्गभूषणः । द्वादशार्कशिरोदामा रुद्रशीर्षैकनूपुर इत्यादि वचनात् । ततो ब्रह्मादयः सर्वेऽपि देवाः लिङ्गशरीरैरेव ब्रह्माण्डबहिःस्थितान् स्वांशिनः प्रतियान्तीति ॥ अत उपलक्षणतया व्याख्यानं युक्तमिति ध्येयम् । विशेषं शब्दमनूद्य तस्यानेकार्थत्वात्प्रकृते विवक्षितमर्थं दर्शयति ॥ विशेषं पृथिवीति । शब्दादीनां पञ्चानामप्यत्र सत्वात्पृथिवी विशेषशब्दवाच्येत्यन्यत्रोक्तत्वादिति भावः । अत्र पृथिवीशब्देन शतकोटियोजनपरिमितो ब्रह्माण्डकटाह एवोच्यत इत्येके । अन्ये तु पञ्चाशत्कोटियोजनपरिमित एव ब्रह्माण्डकटाहः स च स्वान्तर्गतभुवनैः सह सङ्कर्षणमुखाग्निनैव दग्धस्तस्य दार्ढ्याय लेपितो यः पञ्चाशत्कोटियोजनपरिमितो भाग उर्वरितः स एव पृथिवी शब्दवाच्यः । सूक्ष्मत्वाद्ब्रह्मणोऽण्डं द्विगुणेति तृतीये वक्ष्यमाणत्वादित्याहुः । तेनात्मनेत्यत्र परामर्शविषयस्यात्मनः प्रागनुक्तत्वात्किं परामृश्यत

इत्यतस्तदनूद्य व्याचष्टे ॥ तेनेति । पृथिव्यात्मना पृथिव्यन्तर्यामिणेत्यर्थः । अत्र पृथिव्यादि भूतवाचकशब्दैस्तत्तद्भूतान्तर्नियामको हरिरेव मुख्यवाच्यतया विवक्षितः । तथा च विशेषशब्देनैव पृथिव्यन्तर्याम्यपि तच्छब्दवाच्यतया प्रकृत इति तस्य तेनेति परामर्शो युक्त इति भावः । ज्योतिर्मय इत्येतदनूद्य ज्योतिःस्वरूप इति प्रतीतिवारणाय व्याचष्टे ॥ ज्योतिर्मय इति । तथा च ज्योतिरग्निभूतान्तर्यामी विष्णुः प्रधानो वायुः प्रापको यस्य स ज्योतिर्मय इति मूलार्थ इति भावः । खं बृहदात्मलिङ्गमित्यत्र खशब्दवाच्यस्य भूताकाशस्यात्मलिङ्गत्वमुच्यते । तन्न । धूमादिवद्व्याप्तिबलेन जीवगमकत्वादिरूपं विवक्षितम् । असंभवात् अतस्तद्व्याचष्टे ॥ आकाशवदिति । परमात्मसदृशं परमात्मनो दृष्टान्तरूपमित्यर्थः । तथा च मूले आत्मशब्दः परमात्मपरो लिङ्गशब्दश्च दृष्टान्ततया ज्ञापकमात्रपर इति भावः । कस्मिन्विषये आकाशस्य दृष्टान्तत्वमित्याशङ्कायां तद्दर्शयितुमुक्तार्थे आकाशवदिति श्रुतिरुदाहृतेति ज्ञातव्यम् । ननु भूताकाशस्यासर्वगतत्वादनित्यवाच्च कथं सर्वगतत्वेन नित्यत्वेन च परमात्मसादृश्यमित्यत उक्तम् ॥ किञ्चिदिति । तथा च कतिपयसर्वगतत्वेन कतिपयकालसम्बन्धत्वेन च सादृश्यमभिप्रेत्य भूताकाशः परमात्मसर्वगतत्वे नित्यत्वे च बुद्ध्यारोहार्थं न दृष्टान्ततयैवोपात्तः श्रुत्यादाविति भावः । अप्रतिपत्तिविप्रतिपत्तिनिरासाय ततो विशेषमित्यारभ्य नेह विषज्जतेऽङ्गेत्यन्तं सार्धश्लोकचतुष्टयं प्रमाणेनैव व्याख्याति ॥ ज्ञानिनः प्रलय इत्यादिना ॥ सर्व इति । महरादि वैकुण्ठान्तलोकस्थाः सर्व इत्यर्थः । पार्थिवं पृथिव्यन्तर्गतम् । अनेन विशेषमित्येतद्विवृतम् । तत्समन्विता वारिस्थमित्यनेन तेनात्मनाप इत्येतद्व्याख्यातम् । तद्युतास्तेन वारिस्थेन युताः । अग्निस्थमित्यनेन तेनात्मनानिलमूर्ध्निचेत्यतद्विवृतम् । तेनाग्निस्थेन वायुगं नीताश्चेत्यनेन ज्योतिर्मयो वायुरित्येतदुक्तार्थम् । तेन वायुस्थेन नभोगतं नीता इत्यनेन वाय्वात्मना खमित्येतद्विवृतम् । तद्युतास्तेन नभोगतेन युता मनस्थमित्यनेन स भगवाननादिर्मनोमयमित्येतद्विवृतम् । तद्युता इत्येतद्वक्ष्यमाणेष्वपि सम्बध्यते । पूर्वं पूर्वातत्वस्थेन युता इत्यर्थः । बुद्धिस्थमित्यनेन मत्या सहेत्यनुवादलब्धस्य मतिमित्यस्य तात्पर्यमुक्तम् । अत्र नभोगतेन बुद्धिस्थं नीतास्तत्तद्युता मनःस्थमिति व्याख्येयम् । स्ववचनेन व्याख्यावसरे मतिस्थेन तेनेति बुद्धिस्थस्य मनःस्थापेक्षया पूर्वमुक्तत्वात् । अहङ्कारगं हरिमित्यनेन विकार्यमिति व्याख्यातम् । ततो विज्ञाननामानमित्यनेन विज्ञानतत्त्वमित्येतदुक्तार्थम् । तत आनन्दनामानमित्यनेनानन्दमित्येतद्विवृतम् । नावृत्तिमायान्तीत्यनेन नेह विषज्जतेऽङ्ग इत्येतदुक्तार्थम् । प्रायेण नावृत्तिमुपैति योगीति यत्पूर्वश्लोके प्रायेणेत्युक्तम् तद्व्याख्यानं येषां पदान्तरापेक्षेत्यादि । वाय्वादीनामित्यादिपदेन भारतीरुद्रउमानां ग्रहणम् । पदान्तरापेक्षा ब्रह्मसरस्वतीशेष वारुणीनां पदापेक्षेत्यर्थः । ननु तैत्तरीयोपनिषद्यस्माल्लोकात्प्रेत्यैतमन्नमयमात्मानमुपसङ्क्रामतीत्यादिनाऽन्नमयादि पञ्चरूप भगवत्प्राप्तिर्ज्ञानिनां फलत्वेनोक्ता । अत्र तु पृथिव्यादि तत्त्वस्थभगवत्प्राप्तिस्तथोच्यते । ततो विरोध इत्यतोऽत्रापि तत्प्राप्तिरुक्तैवेति प्रमाणेन

दर्शयति ।। भूम्यबामिति । अन्ननामानमन्नमयनामानम् । एवमग्रेऽपि मयटामध्याहारः । अग्न्यादीत्यत्रादि पदेन वाय्वादि बुध्यन्तस्थानां ग्रहणम् । मानसं मनोमयम् । मन आदीत्यत्रादि पदेनाहङ्कारतत्त्वस्य ग्रहणम् । ब्रह्माद्याः केचिदेवेत्यस्यायमर्थः । न साक्षादव्यक्तगतानन्दमयप्राप्तिः सर्वदेवानां किन्तु ब्रह्मसरस्वतीवायुभारतीनामेव । इतरेषां तु स्वोत्तमप्रवेशद्वारा महत्तत्त्वगतं ब्रह्माणं प्राप्तानन्तद्वारैवेति । केचिदेवेत्येवकारव्यावृत्यर्थं दर्शयति ।। अन्ये क्रमशः परानिति । परान्प्राणमयादीनित्यर्थः ।। अयं भावः ।। भूम्यवभिमानिनो देवाः प्राणमयमेव साक्षाद्यान्ति । अग्निवाय्वाद्यभिमानिनस्तु मनोमयमेव । मन आद्यभिमानिनस्तु विज्ञानमयमेव न साक्षादानन्दमयं कोऽपीति । पञ्चमात्राणामिन्द्रियाणां च लयप्रतिपादनपरस्य घ्राणेन गन्धमिति श्लोकस्य मुक्तभोगपरत्वमप्यस्तीति भावेन तत्रप्रमाणमाह ।। पञ्चेन्द्रियैरिति । अखिलान्कर्मेन्द्रियविषयांश्चेत्यर्थः । तथा च मूले चशब्देनैते ग्राह्या इति भावः । मानसान्सङ्कल्पमात्रसिद्धान् । भूतसूक्ष्मेन्द्रियसन्निकर्षादित्येतत् भूतानां सूक्ष्मेन्द्रियाणां च परस्परसम्बन्धादित्यन्यथाप्रतीतिवारणाय व्याचष्टे ।। भूतसूक्ष्मेन्द्रियैश्चेति । सन्निकर्षादित्यस्य तात्पर्यम् ।। सहेति । तथा सन्निकर्षं प्राप्येति ल्यब्लोपनिमित्ता पञ्चमीति भावः । स इति न प्रकृतज्ञानिसङ्घपरामर्शः किं त्वाकाशगततया प्रकृतस्य विष्णोरेवेत्याशयेनाह ।। अनादिरिति । असावित्यस्यार्थः ।। आकाशग इति । अनादिशब्दगतार्थतया सनातनशब्दार्थमाह ।। नादवत्वादिति । नद शब्द इत्यस्माद्भावे ल्युटि कृते उपधावृद्धावनादेशे तृतीयेऽतिशय इति सूत्रादतिशयार्थे दकारस्य तकारे च नातनमिति भवति । नातनेन शब्देन सहितः सनातन इति निर्वचनमभिप्रेत्य तात्पर्यमात्रमिदमुक्तमिति ध्येयम् । तथा च तस्मिन्समये वेदरूपशब्दैरतिशयेन स्तुत्य इति भावः । अत्र प्रमाणमाह ।। नादेनेति । महता महासमन्वयवतेत्यतिशयप्रदर्शनम् । तेन तत्कालीनेन नादेन पदसमन्वयेन स्तुतिरूपवेदेन । सहित इति शेषः । विकार्य शब्दमहङ्कारतत्त्वपरतया व्याचष्टे ।। विविधेति । तादृशंचाहकङ्कारतत्त्वमेवेति भावः । देवमयमित्येतद्देवात्मकमिति प्रतीतिवारणाय व्याचष्टे ।। देवमयमिति । देवाः प्रधाना यस्मात्सदेवप्रधानस्तमित्यर्थः । मनःस्थितस्य देवप्राधान्यप्रदत्वे प्रमाणमाह ।। मनःस्थित इति ।। अनुगत लोकान्तर्गतः सन् लोका यथा देवैः प्रेर्याः स्युस्तथा करोतीत्यर्थः । भूतसूक्ष्मेन्द्रियेत्यत्र भूतादिशब्दविवक्षितार्थमाह ।। भूतेति । भूतसूक्ष्माणि शब्दादीनि । जीवाश्चेत्यनन्तरं भूतसूक्ष्मशब्दवाच्या इति शेषः । तथा च भूतानि पञ्च भूतानि भूतसूक्ष्माणि शब्दादीनि जीवाश्चेति भूतशब्दस्यावृत्त्या योजनोक्तेति ज्ञातव्यम् । अत्र प्रमाणमाह ।। पञ्चेति । विष्णुरित्यनन्तरं मतिस्थमुपगम्येति शेषः । स भूतसूक्ष्मेत्यत्र प्रकृतज्ञानिसङ्घपरामर्शोऽपि न दोषः । सनातनोऽसौ भगवाननादिरित्यस्य कर्मविविशेषणत्वेन कर्तृविशेषणत्वाभावादित्यभिप्रेत्य यत्तच्छब्दाध्याहारेण योजयति ।। योऽसाविति । ननु पूर्वयोजनायां स इति तच्छब्देन ज्ञानिसङ्घं परित्यज्याकाशगतविष्णोरेव परामर्शः किमर्थ इत्यतस्तत्प्रयोजनमाह ।। विपर्ययश्चेति । विपर्ययः

कर्तृव्यत्यासः ।। तस्यैवेति । अत्र ज्ञानिसङ्घमादाय भगवानेव गच्छतीति भगवतः स्वातन्त्रप्रदर्शनार्थं कर्तृतया प्रकृतज्ञानिसङ्घं परित्यज्याकाशगो भगवान् परामृष्ट इत्यर्थः । मत्या सह तेन यातीत्यत्र तेन मत्येति सामानाधिकरण्यं भिन्नलिङ्गयोरनुपपन्नमतश्चशब्दाध्याहारेण योजयति ।। मतिस्थेनेति । ज्ञानिसङ्घ इति शेषः । गुणसंन्निरोधमित्येतदप्रतीत्या व्याचष्टे ।। गुणसन्निरोधमिति । गुणानां सम्यक् निरोधोऽपगमो यस्य स तथोक्तस्तम् । तस्य तात्पर्यम् ।। निर्गुणमिति । गुणत्रयस्वीकारशून्यमित्यर्थः। अनिरुद्धादयो हि सृष्ट्याद्यर्थं गुणत्रयस्वीकारवन्तोऽयं तु न तादृश इति भावः । वासुदेवे इति सप्तम्यन्तस्यान्वयाप्रतीतेरुत्तरार्धेनान्वयं दर्शयति ।। वासुदेवमेतां गतिं गत इति । गतिं सायुज्यरूपां मुक्तिम् । अत्र प्रमाणमाह ।। वासुदेवाश्रिता इति । भेददृष्ट्या पञ्चभेदज्ञानेनाभिमानेन स्वस्वयोग्य-ज्ञानेन च मुक्तबन्धनाः सन्तो वासुदेवाश्रिता एते आवृत्तिं नैव यान्तीति सम्बन्धः । पृथक् भोगान् बाह्यभोगान् । ननु कथं तर्हि सायुज्यं तेषामित्यतः सायुज्य शब्दार्थमुपपादयति ।। स्वरूपं चेति । चशब्दोऽप्यर्थः । यद्यपि तेषां स्वरूपं भगवतः पृथक् तथाऽपि आविष्टग्रहवत्तदन्तस्थानां तत्स्वरूपाद्बाह्यभोगो युक्तो भवेदित्यर्थः । अनेन सयुजां भावः सायुज्यमिति व्युत्पत्त्या योग एव सायुज्यं न तादात्म्यमिति सूचितमिति ज्ञातव्यम् ।। ततश्च ततो विशेषं प्रतिपद्येत्यादि सार्धश्लोकचतुष्टयस्येयमक्षरयोजना ।। महरादि वैकुण्ठान्तलोकस्थः सर्वोऽपि ज्ञानिसङ्घो ब्रह्मादिदेवैः सह विशेषं विशेषनामानं पृथिव्यन्तर्गतमन्नमयमनिरुद्धं प्रतिपद्य निर्भयः प्रलयकालकृतभयरहित-स्तेनात्मना पृथिव्यन्तर्यामिणा सहाऽन्नामकमन्नमयमेव प्रतिपद्यते । तेनात्मनाऽबन्तर्गतेनान्नमयेन सहानलमूर्ध्नि अनलानामग्नीनां श्रेष्ठेऽग्नौ तन्नामके प्राणमये प्रद्युम्ने प्रतिपद्य त्वरन् मार्गत्वात्त्वरमाणो ज्योतिर्मयो ज्योतिरग्न्यन्तर्गतो विष्णुः मयः प्रधानः वायुं प्रति गमने यस्य स तथा । वायुं वायुशब्दवाच्यं वाय्वन्तर्गतं प्राणमयमेवोपेत्य काले तत्त्वनाशयोग्यकाले । इदमुक्तवक्ष्यमाणशेषतया योज्यम् । वाय्वात्मना वाय्वन्तर्गतेन प्राणमयमनोमयेन सहात्मलिङ्गमात्मनो हरेर्व्याप्तत्वे नित्यत्वे चोनदृष्टान्ततया ज्ञापकम् । बृहदितरभूतापेक्षया महत् । खं ख शब्दवाच्यं प्राणमयमेव । उपैतीति शेषः ।। ३१ ।।

घ्राणेन गन्धं रसनेन वै रसं रूपन्तु दृष्ट्या स्पर्शं त्वचैव ।
श्रोत्रेण चोपेत्य नभोगुणंतत्प्रायेण नावृत्तिमुपैति योगी ।। ३२ ।।

तात्पर्यम्— 'पञ्चेन्द्रियैर्ये विषया एष्टव्याः सर्वतो वराः । मानसांश्चाखिलान्प्राप्य मुक्तौ मोदन्ति देवताः । तथोद्रिक्तनिजानन्दा नित्यानन्दा असंवृता' इति षाड्गुण्ये ।। ३२ ।।

प्रकाशिका— इदानीं तामसाहङ्कारकार्याणां भूतसूक्ष्माणां तैजसाहङ्कारकार्याणामिन्द्रियाणां च लयं दर्शयन्मुच्यमानस्य ज्ञानिसङ्घस्य तत्काले दिव्यविषयभोगोऽप्यस्तीत्याह ।। घ्राणेन गन्धमिति ।

लयकथनपक्षे वाक्यद्वयमेतत् । तथाहि योगी पृथिव्यनन्तरं गन्धमबनन्तरं रसमग्न्यनन्तरं रूपं वाय्वनन्तरं स्पर्शनमाकाशानन्तरं नभोगुणशब्दं क्रमेणोपैति । काल इत्यस्य सर्वत्रानुवर्तमानत्वात् । एवं तामसाहङ्कारकार्यनाशानन्तरं तैजसाहङ्कारकार्येण घ्राणेन रसनेन दृष्ट्या चक्षुषा त्वचा श्रोत्रेण । चशब्दात्कर्मेन्द्रियपञ्चकेन सह घ्राणादिनामकैः । घ्राण्याद्यन्तर्गतहरिमूर्तिभिः सहेति यावत् । तन्मत्या सहेति वक्ष्यमाणं तैजसाहङ्कारकार्ये बुद्धितत्त्वस्थप्राणमयमुपैति । उपेत्य च प्रायेणावृत्तिं नोपैति । वाय्वादिव्यावृत्त्यर्थं प्रायेणेत्युक्तम् । भोगपक्षे तु घ्राणादीन्द्रियैर्गन्धादीन्विषयानुपेत्यानुभूय प्रायेणावृत्तिं नोपैतीति यथास्थितमेव व्याख्येयम् । अत्र प्रागुक्तनिर्भयत्वोपपादनाय मार्गमध्ये पुनरावृत्तिशून्यभोगोक्तिरिति ज्ञानिलयपरतया योजना भूतसूक्ष्मेन्द्रियसन्निकर्षादित्युभयत्रानुवादात्सूचितेति ज्ञातव्या ॥ ३२ ॥

स भूतसूक्ष्मेन्द्रियसन्निकर्षात् सनातनोऽसौ भगवाननादिः ।
मनोमयं देवमयं विकार्यं संसाद्य मत्या सह तेन याति ॥ ३३ ॥

तात्पर्यम्— भूतसूक्ष्मेन्द्रियैश्च सह अनादिर्भगवानाकाशगो मनोमयं याति । नादवत्त्वात्सनातनः । 'नादेन तेन महता सनातन इति स्मृत' इति मोक्षधर्मे ॥ विविधकार्ययुक्तं विकार्यम् । देवमयं देवप्रधानम् । 'मनःस्थितो हरिर्नित्यं सर्वदेवेषु संस्थितः । देवप्रधानकाँल्लोकान्करोत्यनुगतः सदे'ति वाराहे ॥ भूतसूक्ष्माणि पञ्चभूतानि जीवाश्च । 'पञ्चभूतैश्च शब्दाद्यैरिन्द्रियैर्जीवराशिभिः । युक्त आकाशगो विष्णुर्मनःस्थमुपगच्छती'ति वामने । योऽसावनादिर्मनोमयस्तमिति वा । विपर्ययश्चेत्तस्यैव गन्तृत्वमिति ज्ञापयितुम् । मतिस्थेन तेन मनःस्थेन च सह विज्ञानतत्वं याति ॥ ३३ ॥

प्रकाशिका— तस्य पुनर्गन्तव्यमाह ॥ स भूतसूक्ष्मेति । स बुद्धिस्थितो ज्ञानिसङ्घो भूतसूक्ष्मेन्द्रियसन्निकर्षात् भूतानि पृथिव्यादीनि भूतसूक्ष्माणि गन्धादीनि तत्त्वाभिमानिजीवाश्चेन्द्रियाणि च तेषां सन्निकर्षं प्राप्य । तत्तदन्तर्गतभगवत्सामीप्यं प्राप्येति यावत् । योऽसौ सनातनो नादनं वेदात्मकः शब्दस्तेन सहितः पदसमन्वयेन । तत्स्तुत्ये इति यावत् । अनादिर्भगवान् वैकारिकाहङ्कारकार्यमनस्तत्त्वस्थस्तं देवमयं वैकारिकाहङ्कारकार्यदेवा मयाः प्रधाना यस्मात्तम् । देवप्राधान्यप्रदमिति यावत् । मनोमयं मनोमयनामानं सङ्कर्षणं याति । अथवा । असावाकाशादिबुद्ध्यन्ततत्त्वस्थितोऽनादिर्भगवान् भूतादिसंन्निकर्षं प्राप्य मनोमयं यातीति योज्यम् । अत्र पूर्वप्रकृतं ज्ञानिसङ्घं परित्यज्य भगवतः परामर्शस्तस्यैव स्वातन्त्र्येण गन्तृत्वमिति सूचनायेति ध्येयम् । अनन्तरं मत्या बुद्धिस्थेन तेन मनःस्थेन च सह विकार्यं विविधकार्ययुक्तं मूलाहङ्कारान्तस्थहरिं संसाद्य ॥३३॥

विज्ञानतत्वं गुणसन्निरोधं तेनात्मनात्मानमुपैति शान्तिम् ।
आनन्दमानन्दमयोऽवसाने सर्वात्मके ब्रह्मणि वासुदेवे ।। ३४ ।।

प्रकाशिका— तेनाहङ्कारस्थेन विज्ञानतत्त्वं महत्तत्त्वगतं विज्ञानमयनामानं गुणसन्निरोधं गुणानां सत्त्वादीनां सम्यक् निरोधोऽपगमो यस्मात्स तथा निर्गुणं वासुदेवमुपैति । तेनात्मना महत्तत्त्वान्तर्यामिणा शान्तमव्यक्तसंज्ञकं गुणत्रयगतमानन्दमानन्दमयनामानमात्मानं नारायणमुपैति । आनन्दमयः पूर्णानन्दोऽव्यक्तगतो नारायणो ब्रह्मादिज्ञानिसङ्घमादायावसाने द्विपरार्धावसाने सर्वात्मकं सर्वेषामात्मनां भक्तजीवानां कं स्वरूपसुखं यस्मात्तम् । मुक्तिप्रदमिति यावत् । गुणसन्निरोधं निर्गुणं चतुर्व्यूहगतं वासुदेवमुपैति । अयमेव हि मुक्तिप्रदः । यथाहुः ।। वासुदेवनामा बभूव निजमुक्तिपदप्रदातेति ।। विज्ञानतत्त्वस्थतयोक्तो बिज्ञानमयनामा वासुदेवस्तु पञ्चव्यूहगत इति ध्येयम् । पूर्वं भोगरूपमुक्तेरपुनरावृत्तिरुक्ता । इदानीं दुःखनिवृत्तिरूपमुक्तेरपि तामाह ।। सर्वात्मके ब्रह्मणीति । सर्वात्मके ब्रह्मणि परिपूर्णे वासुदेवे ।। ३४ ।।

एतां गतिं भागवतो गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग ।
एते सृती ते नृप वेदगीते त्वयाभिपृष्टेऽथ सनातने च ।।
ये द्वे पुरा ब्रह्मण आह पृष्टः आराधितो भगवान्वासुदेवः ।। ३५ ।।

तात्पर्यम्— गुणसंनिरोधं निर्गुणं वासुदेवम् ।। एतां गतिं गतो न विषज्जते । 'वासुदेवाश्रिता देवा ब्रह्माद्या मुक्तबन्धनाः । भेददृष्ट्याभिमानेन चावृत्तिं नैव यान्ति ते । भुञ्जते तु पृथग्भोगान्नानन्दं तत्स्वरूपकम् । स्वरूपं च पृथक्तेषामाविष्टग्रहवद्भवेदि'ति ब्रह्माण्डे ।
।। ३४, ३५ ।।

प्रकाशिका— एतां पूर्वोक्तां गतिं सायुज्यादिरूपां स्थितिं यो भागवतो गतः प्राप्तः स पुनरिह संसारे न विषज्जते वै न पुनरावर्तत इत्याशयः । अत्र पृथिव्याद्यव्यक्तान्तानां तत्त्वानां स्वस्वकारणेषु लयः । तदभिमानिनां देवानां तु स्वोत्तमप्रवेशद्वारा महत्तत्त्वगतब्रह्माणं प्रविष्टानां तज्जनके वासुदेवे प्रवेशः । इतरेषां ज्ञानिनां तूक्ततत्त्वाभिमानिनो द्वारमात्राणीति ज्ञातव्यम् । एवमुक्तं मार्गद्वयं वेदप्रतिपाद्यत्वाद्धरिं सम्प्रदाय गतत्वाच्च नाश्रद्धेयमिति सूचयन् अपृष्टं कस्मादुक्तमित्याशङ्कां च परिहरन्नुपसंहरति ।। एते सृती इति । पुनरावृत्त्य पुनरावृत्तिमार्गावित्यर्थः । वेदगीते द्वे सृती अशृण्वमित्यादि वेदप्रतिपाद्ये त्वयाऽभिपृष्ट इति यच्छ्रोतव्यं ब्रूहि । यद्वा । विपर्ययमिति प्रश्नाभ्यामर्थादुक्तमार्गयोरपि पृष्टत्वादित्याशयः ।। सनातने प्रतिकल्पभाविन्यौ । यो भगवान्वासुदेवो

ब्रह्मणे आह । ये च सनातनेऽत एव वेदगीते त्वयाऽभिपृष्टे च ते सृती एते पूर्वोक्त इत्यन्वयः । रात्रीरीडाभिः पितॄणामित्यादिनापुनरावृत्तिमार्गस्याप्युक्तत्वादिति भावः ॥ ३५ ॥

नह्यतोऽन्यः शिवः पन्थाः विश्रुतः संसृताविह ।
वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥ ३६ ॥

तात्पर्यम्— यद्भगवानाह । अतो भागवताख्याद्ग्रन्थाच्छिवः पन्था न ॥ ३६ ॥

भगवान्ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया ।
तद्धि ह्यपश्यत्कूटस्थे रतिरात्मन्यतो भवेत् ॥ ३७ ॥

तात्पर्यम्— तद्भावतं पुराणमपश्यत् । 'नित्यज्ञानेन सिद्धं च पुनः पुनरवेक्षते । लीलयैव हरिर्देवो दुष्टानां मोहनाय चे'ति ब्रह्मतर्के (पाद्मे) ॥ ३७ ॥

भगवान्सर्वभूतेषु लक्षितश्चात्मना हरिः ।
दृश्यैर्बुध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ॥ ३८ ॥

तात्पर्यम्— लक्षितश्चास्मिन्पुराणे बुद्ध्यादीनां पारवश्यदर्शनादन्यो नियन्ताऽस्तीति । 'समाधावसमाधौ च निःस्वतन्त्रस्य देहिनः । अन्यो नियन्ता भगवान्वासुदेवः परः प्रभुरि'ति ब्रह्मतर्के ॥ ३८ ॥

प्रकाशिका— तदहं तेऽभिधास्यामीत्यत्र यस्याभिधानं प्रतिज्ञातं यच्चाध्यायद्वयरूपेण किञ्चिदुक्तं तदेव भागवतमुत्तरत्रापि वक्तुं तत्र श्रद्धातिशयोत्पादनाय त्रिभिः श्लोकैः स्तौति ॥ न ह्यतोऽन्य इति । अत्रात इति परामर्शविषयं दर्शयन् उत्तरश्लोकोक्तं भगवद्द्रष्टृत्वमत्र शिवत्वे हेतुतयान्वेतीत्याशयेनाह ॥ यद्भगवानाहेति । भागवताख्यादित्यनेनेदं भागवतं नाम पुराणमिति पूर्वं भागवतं प्रस्तुतं तदत इत्यनेन परामृश्यत इति सूचयति । अन्यः शिव इत्यादि पुल्लिङ्गोपपादनाय ग्रन्थादित्युक्तम् । यदित्यध्याहारमत इत्यस्यावृत्तिं चाभिप्रेत्य योजयति ॥ यद्भगवानाहेति । यद्यस्माद्भगवान् व्यासोऽपश्यदाह । अतस्तस्माद्भगवताऽऽप्ततमेन व्यासेन कृपया । प्रणीतत्वादिति यावत् । अतो भागवताख्यग्रन्थादन्यः शिवः पन्था न किं त्वयमेवेति योजनेत्यर्थः । तदध्यपश्यदित्यत्र तच्छब्दमनूद्य तत्परामर्शविषयं दर्शयति ॥ तद्भागवतमिति । अत्र नपुंसकलिङ्गोपपादनाय पुराणमित्युक्तम् । अपश्यदित्यस्याहेति तात्पर्यं पूर्वमेवोक्तमतोत्र तन्न व्याख्यातम् । वेदमूलकत्वाच्च न भागवतादन्यः शिवः पन्था इत्याशयेनोक्तम् । ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्येति । तत्र भगवतो ज्ञानं विचारसाध्यमिति प्रतीयते ।

अतस्तां प्रमाणेन निराकरोति ॥ नित्यज्ञानेनेति । लक्षणप्रमाणाभ्यां हरिज्ञानजनकत्वाच्च न भागवतादन्यः शिवः पन्था इत्याशयेनोक्तम् ॥ भगवान्सर्वभूतेष्विति । अस्यार्थस्यात्र स्फुटमप्रतीतेरपेक्षितमध्याहृत्य योजयति ॥ लक्षितश्चास्मिन्पुराण इति । बुध्यादिभिरनुमापकैर्लक्षितोऽन्यनियन्ताऽस्तीति प्रतिपादित इति मूलोक्तमनुमानप्रकारं दर्शयति ॥ बुद्ध्यादीनामिति । आदिपदेन सुखदुःखादिकं बुद्ध्याद्यभावादिकं च ग्राह्यम् । तथा च विमताश्चेतना अन्येन बुध्यादिनियन्त्रा युक्ताः स्वतः कस्यचिदर्थस्य ज्ञानेऽज्ञाने सुखे दुःखे तत्परिहारे चासामर्थ्यात् । यो यत्करणे स्वतोऽसमर्थः स तत्करणेऽन्यनियन्तृयुक्तः । यथा सम्प्रतिपन्न इत्यनुमानमत्राभिप्रेतमिति भावः । उक्तहेतोरसिद्धिपरिहाराय मूले दृश्यैरित्युक्तम् । तद्व्याख्यातुं पारवश्यदर्शनादित्युक्तम् । तथा च स्वावशतया साक्षिसिद्धेरिति तदर्थ उक्तो भवतीति ज्ञातव्यम् । आगममूलकत्वान्नात्रोपाध्यादिशङ्केत्याशयेनात्रागमसम्मतिमाह ॥ समाधाविति । समाधौ हर्यादिविषये मनोयोजने । असमाधौ तदकरणे । उपलक्षणमेतत् । सुखदुःखादौ च ॥ निःस्वतन्त्र्यस्येति । अत्र स्वतन्त्रशब्दो भावप्रधानः । तथा च निर्गतस्वातन्त्रस्येत्यर्थः । स्वतोऽसमर्थस्येति यावत् । परः प्रभुरित्यनन्तरम् अस्तीत्यनुमीयत इति शेषः । सर्वभूतेष्वित्यस्यार्थः ॥ देहिन इति । जात्येकवचनमेतत् ॥ ततश्चायं श्लोकत्रयार्थः ॥ अत उच्यमानतया बुद्धिसन्निहिताद्भागवताख्याद्ग्रन्थात् । अन्यः शिवो मोक्षप्रदः पन्था मार्गो न विश्रुतो हि । विशेषेण मनुष्यमात्रासाधारण्येन श्रुत्यादावुदितो नेति प्रसिद्धमित्यर्थः । नन्वस्ति भारतादिग्रन्थसन्दर्भोऽतः कथमेवमुक्तमित्यत उक्तम् ॥ संसृताविहेति । इह भारते वर्षे इह कलियुगे संसृतौ वर्तमानानां मनुष्याणामिति शेषः । तथा च भारतादिकं नाल्पायुषादिमतां मनुष्याणां मोक्षदानायास्मिन्युगे समर्थमिति भावः । अत एव विश्रुत इत्युक्तम् ॥ कुत इत्यतोऽत्र हेतुमाह ॥ वासुदेव इति । भक्तियोगो भक्तिलक्षणो ज्ञानोपायः । परमाप्तेन भगवदवतारेण व्यासेन प्रणीतत्त्वाद्वेदमूलकत्वाच्च नातोऽन्यः शिवः पन्था इत्याशयेनाह ॥ भगवानिति । भगवान्व्यासो ब्रह्म वेदं कात्स्न्र्येन सामस्त्येन त्रिस्त्रिवारं मनीषया नित्यया बुद्ध्याऽन्वीक्ष्योपक्रमाद्यनुसारेण लीलयैव विचार्य ॥ तद्भागवतं पुराणमितरपुराणापक्षेयाऽधि अधिकमपश्यदाह कृतवानित्यर्थः । कथं भूतं तत् । यतो भागवतात् श्रद्धया श्रुतात् । कूठस्थे निर्विकारे आत्मनि परमात्मनि रतिर्भवेत् । परमात्मविषयकदर्शनादिजनितं सुखं यतो भवेदित्यर्थः । इदमपि भागवतस्यैव शिवत्वे हेत्वन्तरमिति ज्ञातव्यम् । लक्षणप्रमाणाभ्यां हरिप्रतिपादकत्वाच्च नातोऽन्यः शिवः पन्था इत्याशयेनाह ॥ भगवान्सर्वभूतेष्विति । भगवान्हरिरात्म ना स्वस्वरूप भूतेन व्यासेन । सर्वभूतेषु सर्वदेहेषु । दृश्यैः स्वावशतया साक्षिसिद्धैर्बुद्ध्यादिभिरनुमापकौर्लिंगैर्द्रष्टाऽन्यो नियन्ताऽस्तीत्यस्मिन्पुराणे लक्षितः प्रतिपादितः । लक्षणैर्जगज्जन्मादिकर्तृत्वादिरूपैर्लक्षितश्चातोऽप्ययमेव शिवः पन्था इति सम्बन्ध इति ॥ ३८ ॥

तस्मात्सर्वात्मना राजन्हरिः सर्वत्र सर्वदा ।
श्रोतव्यो कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम् ॥ ३९ ॥

तात्पर्यम्— यस्माद्भगवतैष एवोक्तस्तस्मात्स एव श्रोतव्यादिः ॥ ३९ ॥ इति द्वितीयतात्पर्ये द्वितीयोऽध्यायः ॥ २ ॥

प्रकाशिका— भगवत एव श्रोतव्यादित्वं हेत्वन्तरेणोपपादयति ॥ तस्मादिति । अत्र तस्मादिति पूर्वोक्तस्य कस्य हेतोः परामर्श इति न प्रतीयतेऽतस्तं दर्शयन् योजयति ॥ यस्मादिति । भगवता व्यासेन एष एव हरिरेवोक्तः । भागवत इति शेषः । तथा च व्यवहितपूर्वश्लोकोक्तमेव तस्मादित्यनेन परामृश्यत इति दर्शितं भवति ॥ तस्मात्स एवेति । यदि हरिर्न श्रोतव्यादिरूपस्तर्हि परमाप्ततमो व्यासस्तं भागवते न वदेदित्याशयः ॥ सर्वात्मनेति । सर्वप्रकारणेत्यर्थः ॥ ३९ ॥

पिबन्ति ये भगवत आत्मनः सतां
कथामृतं श्रवणपुटेषु सम्भृतम् ।
पुनन्ति ते विषयविदूषिताशयं
व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥ ४० ॥

॥ इति श्रीमद्भागवते द्वितीयस्कन्धे द्वितीयोऽध्यायः ॥

प्रकाशिका— इति हरिश्रवणस्येत्थंभावं दर्शयन् फलमाह ॥ पिबन्तीति । आत्मन आदानादिकर्तुः सतां सकाशाच्छ्रवणपुटेषु सम्भृतं सम्यक् पूरितं सद्भ्यः श्रद्धया श्रुतमिति यावत् । विषयविदूषिताशयं विषयैर्विशेषेण मलिनीकृतमन्तःकरणम् । पुनन्ति शोधयन्ति ॥ ४० ॥ इति श्रीभागवतटिप्पण्यां द्वितीयोऽध्यायः ॥ २-२ ॥

अथ तृतीयोऽध्यायः

श्रीशुक उवाच—

एवमेतन्निगदितं पृष्टवान्यद्भवान्मम ।
नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणाम् ॥ १ ॥

प्रकाशिका— शुको ब्रूहि यद्वा विपर्ययमिति प्रश्नोत्तरं वक्तुं यच्छ्रोतव्यमिति प्रश्नोत्तरकथनं तावदुपसंहरति ॥ एवमेतदिति । भवान्मम मां यत्पृष्टवानिति सामान्यत उक्तमेव विशदयति ॥

नृणामिति । मनुष्येषु मध्ये ये मनीषिणस्तेषामपि मध्ये ये म्रियमाणास्तेषां नृणां यत्कर्तव्यं भवान्पृष्टवान् एतदेतस्योत्तरमेव पूर्वोक्तप्रकारेण गदितं मया कथितमित्यर्थः ॥ १ ॥

ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिम् ।
इन्द्रमिन्द्रियकामस्तु प्रजाकामः प्रजापतीन् ॥ २ ॥

प्रकाशिका— इदानीं ब्रूहि । यद्वा विपर्ययमिति यन्मुमुक्षुणा मोक्षविरोधित्याज्यं तुच्छफलकं श्रोतव्यादिकं राज्ञा पृष्टं तद्दर्शयति ॥ ब्रह्मवर्चसकामस्त्वित्यादिना । ब्रह्मवर्चसकामो वेदाध्ययनादिजनितवर्चोविशेषकामः । ब्रह्मणस्पतिं वेदपतिं वायुं यजेत । तत्तन्त्रोक्तद्रव्यैरिति शेषः । इदं च वक्ष्यमाणं सर्वत्र सम्बध्यते । इन्द्रियकामश्चक्षुरादीन्द्रियपाटवकामः । प्रजाकामः पुत्रकामः प्रजापतीन्दक्षादीन् ॥ २ ॥

देवीं मायान्तु श्रीकामस्तेजस्कामो विभावसुम् ।
वसुकामो वसून्रुद्रान्वीर्यकामस्तु वीर्यदान् ॥ ३ ॥

प्रकाशिका— देवीं मायां लक्ष्मीम् । तेजस्कामः शरीरकान्तिकामः । विभावसुमग्निम् । वसुकामो धनकामः । वीर्यकामः पराक्रमकामः वीर्यदान् रुद्रान् । यजेतेत्यन्वयः ॥ ३ ॥

अन्नाद्यकामस्त्वदितिं स्वर्गकामोऽदितेः सुतान् ।
विश्वान्देवान्राष्ट्रकामः साध्यान्संसाधको विशाम् ॥ ४ ॥

प्रकाशिका— अन्नाद्यं भोज्यं भक्ष्यं च । अदितेः सुतान् आदित्यान् । विशां देशस्थप्रजानां संसाधाकः स्वाधीनतामिच्छन् ॥ ४ ॥

आयुष्कामोऽश्विनौ देवौ पुष्टिकाम इलां यजेत् ।
प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥ ५ ॥

प्रकाशिका— इलां भूमिम् । प्रतिष्ठाकामः स्वस्थानादप्रच्युतिकामः । रोदसी द्यावापृथिव्यौ । लोकमातरौ लोकस्य मातापितरौ । पृथिवी माता द्यौः पिता ॥ ५ ॥

रूपाभिकामो गन्धर्वान् स्त्रीकामोऽप्सर उर्वशीम् ।
आधिपत्यकामः सर्वेषां यजेत परमेष्ठिनम् ॥ ६ ॥

प्रकाशिका— रूपाभिकामः सौन्दर्यकामः । अप्सरउर्वशी । अप्सराश्चासावुर्वशीचेत्यप्सर उर्वशी ताम् । परमेष्ठिनं चतुर्मुखम् ॥ ६ ॥

यज्ञं यजेद्यशस्कामः कोशकामः प्रचेतसम् ।
विद्याकामस्तु गिरिशं दाम्पत्यार्थ उमां सतीम् ॥ ७ ॥

प्रकाशिका— यज्ञं यज्ञाभिमानिनमिन्द्रसूनुम् । कोशकामः कोशो वसुसञ्चयो निधिर्वा तत्कामः प्रचेतसं वरुणम् । गिरिशं दक्षिणामूर्तिधरम् । दापत्यार्थमखण्डितदाम्पत्याय ॥ ७ ॥

धर्मार्थमुत्तमश्लोकं तन्तुं तन्वन्पितॄन्यजेत् ।
रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान् ॥ ८ ॥

प्रकाशिका— धर्मार्थम् इष्टापूर्तादिप्रवृत्तधर्मलब्ध्यर्थम् । उत्तमश्लोकं धर्मविषयेय उत्तमैः श्लोक्यते तं यमधर्मम् । तन्तुं सन्तानाभिवृद्धिं तन्वन् कुर्वन्निति यावत् । पुण्यजनान् यक्षान् मणिभद्रादीन् । ओजो बलं तत्कामः ॥ ८ ॥

राज्यकामो मनून्देवान्निर्ऋतिन्त्वभिचरन्यजेत् ।
ग्रामकामः यजेत्सोममकामः पुरुषं पुमान् ॥ ९ ॥

प्रकाशिका— अभिचरन् शत्रुमरणमिच्छन् । निर्ऋतिं कोणदिक्पतिम् । सोमं चन्द्रम् ॥ अकाम इति । अत्र नञोऽन्यार्थत्वं विरुद्धार्थत्वं च विवक्षितम् । तथा चोक्तान्यमोक्षविरोधिसर्वजयादिकाम इत्यर्थः । पुरुषं ब्रह्माणं रुद्रं वा । न च प्रागुक्तोत्तमश्लोकशब्दोऽयं पुरुष शब्दश्चाकामो धर्मकामोवेति प्रमाणानुसारेण विष्णुपरावेव किं न स्यातामिति वाच्यम् । काम्यान्यदेवतायजनपरप्रकरणविरोधात् । प्रमाणेऽकामधर्मशब्दयोरन्यार्थत्वस्य वक्ष्यमाणत्वेन तस्यैतदुभयपरत्वाभावात् ॥ ९ ॥

अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥ १० ॥

तात्पर्यम्— अकामो धर्मकामो वा मोक्षकामोऽपि यो भवेत् । अथवा सर्वकामो यः स विष्णुं पुरुषं यजेदि'ति स्कान्दे ॥ १० ॥

प्रकाशिका— एवं ब्रुहि यद्वा विपर्ययमिति प्रश्नोत्तरतया तुच्छप्रातिस्विकफलप्रदान्ययजनं हेयताप्रदर्शनायोक्त्वेदानीमुक्तानुक्तसर्वपुरुषार्थप्रदत्वाद्धरिरेव सर्वैः प्रेक्षावद्भिर्यष्टव्य इत्याह ॥ अकामः

सर्वकामो वेति । अत्र परं पुरुषमित्युक्तः पुरुषः क इति न ज्ञायतेऽतः समाख्यास्मृत्यैव व्याख्याति ।। अकाम इति । अकामः अः परमात्मा तन्मात्रकाम एकान्तभक्तो धर्मकामो निवृत्तधर्मानुष्ठानकामः सर्वकाम उक्तानुक्तसर्वकामः । पुरुषमित्यनूद्य विष्णुमिति व्याख्यातम् । अत एव मूले परमित्युक्तम् । एवं च मूले धर्मकामोऽप्युपलक्ष्यः । अकामादिपदान्यपि स्मृतिव्याख्यानरीत्यैव व्याख्येयानि । तीव्रेणानन्यसाधारणेन भक्तियोगेन भक्तिलक्षणज्ञानोपायेन ।। १० ।।

एतावानेव यजतामिह निःश्रेयसोदयः ।
भगवत्यचलो भावो यद्भागवतसङ्गतः ।। ११ ।।

प्रकाशिका— अन्यदेवतायाजिनामपि त्रैविद्यानां मोक्षयोग्यत्वे भागवतसङ्गत्या तत्त्यागेन परमपुरुषं यजतां मोक्षो भवतीत्याशयेनाह ।। एतावानेवेति । इह कर्मभूमौ यजतां त्रैविद्यानां भागवतसङ्गतो भगवद्भक्तोदितहरिकथारूपात्सङ्गाद्भगवत्यचलो भावो भक्तिर्भवतीति यदेतावानेव निःश्रेयसस्य परमपुरुषार्थस्योदयो लाभोऽन्यत्तु सर्वं तुच्छमित्यर्थः ।। ११ ।।

ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्र-
मात्मप्रसाद उभयत्र गुणेष्वसङ्गः ।
कैवल्यसम्भृतपथस्त्वथ भक्तियोगः
को निर्वृतो हरिकथासु रतिं न कुर्यात् ।। १२ ।।

प्रकाशिका— उक्तरूपभागवतसङ्गस्याचलभावजनकत्वं परम्परयेति दर्शयन् भागवतसङ्ग पद-सूचितां हरिकथारतिं स्तौति ।। ज्ञानमिति । यद्यासु कथासु श्रुतासु सतीषु ज्ञानं भवति । कथं भूतम् । आ सर्वतः प्रतिनिवृत्तमुपरतं गुणोर्मिणां सत्त्वादिगुणा एवोर्मयस्तरङ्गास्तेषां च चक्रं समूहो यस्मात्तत् । अनन्तरमात्मप्रसादो मनसो नैर्मल्यं भवति । अनन्तरमुभयत्रेह परत्र स्वर्गादौ विद्यमानेषु गुणेषु विषयेष्वसङ्गः स्नेहराहित्यलक्षणवैराग्यं भवति । अथानन्तरं भक्तिलक्षणो योगो जायते । कथं-भूतः । कैवल्याय मोक्षाय सम्भृतः सम्पादितः पन्था अपरोक्षज्ञानलक्षणो मार्गो येन स तथोक्तः । निर्वृतो हरिकथाश्रवणसुखज्ञः । विषयेष्वनिवृत्त इति वा । तासु हरिकथासु ।। १२ ।।

शौनक उवाच—

इत्यभिव्याहृतं राजा निशम्य भरतर्षभः ।
किमन्यत्पृष्टवान्भूयो वैयासकिमृषिङ्कविम् ।। १३ ।।

प्रकाशिका— वैयासकिं व्यासपुत्रम् । ऋषिं ब्रह्मज्ञानिनम् । कविं शब्दब्रह्मज्ञम् ॥ १३ ॥

एतच्छुश्रूषतां विद्वन्सूत नोऽर्हसि भाषितुम् ।
कथा हरिगुणोदाराः सतां स्युः सदसि ध्रुवम् ॥ १४ ॥

प्रकाशिका— शुश्रूषतां श्रोतुमिच्छतां हरिगुणैरुदारा उत्कृष्टाः । सदसि सभायाम् । ध्रुवं नियमेन ॥ १४ ॥

स वै भागवतो राजा पाण्डवेयो महारथः ।
बालः क्रीडनकैः क्रीडन्कृष्णक्रीडां य आददे ॥ १५ ॥

प्रकाशिका— उभयोरेकस्यासत्वे नियमभङ्गः स्यादित्याशङ्कायां नेत्याह ॥ स वा इति । अत्र हेतुमाह ॥ बाल इति । क्रीडनकैः क्रीडासाधनैर्व्यापारैः । कृष्णक्रीडां कृष्णपूजादिरूपां क्रीडामाददे स्वीकृतवान् ॥ १५ ॥

वैयासकिश्च भगवान्वासुदेवपरायणः ।
उरुगायगुणोदाराः सतां स्युर्हि समागमे ॥ १६ ॥

प्रकाशिका— अस्तूभयोः सत्वं ततः किमित्यत आह ॥ उरुगायेति । उरुभिर्ब्रह्मादिभिर्गीयत इत्युरुगायः । अनेन सत्सभायां हरिकथाया नियतत्वमुपपादितमिति ज्ञातव्यम् । कथमन्यथा तस्योरुगायेति नाम स्यादिति । कथा इत्यत्राप्यनुवर्तते ॥ १६ ॥

आयुर्हरति वै पुंसाम् उद्यन्नस्तञ्च यन्नसौ ।
तस्यर्ते यः क्षणो नीतः उत्तमश्लोकवार्तया ॥ १७ ॥

तात्पर्यम्— तस्यायुषः उत्तमश्लोकवार्तया ऋते यः क्षणः स नीत एव वृथा ॥ १७ ॥ इति द्वितीयतात्पर्ये तृतीयोऽध्यायः ॥ ३ ॥

प्रकाशिका— वृथैव क्षीयमाणमायुर्हरिकथया सफलं कुर्वित्याशयेनाह ॥ आयुर्हरतीत्यादि श्लोकत्रयेण । अत्र तस्येति तच्छब्देन सूर्यः प्रकृतः परामृश्यत इति प्रतीतिवारणाय व्याचष्टे ॥ तस्येति । सूर्यस्य क्षणरूपैकदेशाभावेन ग्रहणासम्भवात् । आयुषोऽपि प्रकृतत्वादिति भावः । अपेक्षिताध्याहारेण मूलं योजयति ॥ उत्तमश्लोकेति । ननूत्तमश्लोकवार्तयाऽपि यः क्षणो नीयते सोऽपि नीत एव भवति । नष्टस्यापुनरावृत्तेरित्यतस्तस्य तात्पर्यमाह ॥ वृथेति । वृथात्वान्नीत एवेत्युक्तमिति

भावः ॥ ततश्चायं श्लोकार्थः ॥ असौ सूर्य उद्यन् उद्गच्छन् अस्तमदर्शनं च यन् गच्छन् तस्यायुषोयः क्षणः कालविशेष उत्तमश्लोकवार्तया ऋते विना भवति । स नीत एव वृथैव गत इत्यर्थः ॥ १७ ॥

तरवः किन्न जीवन्ति भस्त्राः किं न श्वसन्त्युत ।
न खादन्ति न मेहन्ति किं ग्रामपशवोऽपरे ॥ १८ ॥

प्रकाशिका— ननु जीवनमेव तेषामायुषः फलं भविष्यतीत्यत आह ॥ तरव इति । ननु तेषां श्वासो नास्तीत्यत उक्तम् ॥ भस्त्रा इति । अयः सन्तपनार्थाश्चर्मकोशा इत्यर्थः । ननु तासामाहारादिकं नास्तीत्यत आह ॥ न खादन्तीति । नाश्नन्तीत्यर्थः । मेहनं रेतोमूत्राद्युत्सर्जनम् । ग्राम्या ग्रामे भवाः । अपर इत्युक्त्या एतेऽपि नराकाराः पशव इति सूचितम् ॥ १८ ॥

श्वविड्वराहोष्ट्रखरैः स तुल्यः पुरुषः पशुः ।
न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ॥ १९ ॥

प्रकाशिका— तदेव स्पष्टमाह ॥ श्वविड्वराहेति । श्वा असारमेयो विड्वराहोऽमेध्यसूकरः । पुरुषः पशुः पुरुषाकारः पशुः । कश्मलविषयासक्तत्वाच्छ्वाविड्वराहसाम्यम् । कण्टकवद्दुःख-विषयासक्तत्वादुष्ट्रसाम्यम् । कुटुम्बभारवाहित्वात्खरेण साम्यमिति द्रष्टव्यम् ॥ १९ ॥

बिले बतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्य ।
जिह्वाऽसती दार्दुरिकेव सूत न चेत्प्रगायत्युरुगायगाथाम् ॥ २० ॥

प्रकाशिका— तस्याङ्गानि च व्यर्थानीत्याह ॥ बिल इति पञ्चभिः । बतेति खेदे । शृण्वतः शृणुतः । बिले । पर्वतस्येति शेषः । उरुगायगाथां न चोपगायति नैवोपगायति यासौ जिह्वाऽसति दुष्टा । केव । दार्दुरिकेव दर्दुरो भेकस्तदीयजिह्वेव ॥ २० ॥

भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम् ।
शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्काञ्चनकङ्कणौ वा ॥ २१ ॥

प्रकाशिका— पट्टेन वस्त्रोष्णीषेण किरीटेन वा जुष्टं युक्तमप्युत्तमाङ्गं शिरो यदि न नमेत्तर्हि परं केवलं भार एव । शावो मृतकस्तत्करतुल्यौ । लसती काञ्चनकङ्कणे ययोस्तौ । अप्यर्थे वा शब्दः ॥ २१ ॥

बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये ।
पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ॥ २२ ॥

प्रकाशिका— बर्हायिते मयूरपिञ्छनेत्रतुल्ये निष्फल इत्यर्थः । लिङ्गानि प्रतिमा निरीक्षतो । द्रुमवद्वृक्षवज्जन्म भजत इति तथा । क्षेत्राणि पुण्यस्थानानि । क्षेत्रं पुरे गृहे देहे केदारे योनिभार्ययोः । पुण्यस्थाने समूहे च घृतमाज्यम्बुसर्पिषोरिति ॥ २२ ॥

जीवच्छवो भागवताङ्घ्रिरेणुं न जातु मर्त्योऽभिलषेत यस्तु ।
श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसच्छवो यस्तु न वेद गन्धम् ॥ २३ ॥

प्रकाशिका— भागवतस्य भगवद्भक्तजनस्याङ्घ्रिरेणुं नाभिलषेत न कांक्षेत जीवञ्छवो जीवन्मृतः। श्री विष्णुपद्याः श्रीविष्णुपादलग्रायाः । गन्धं न वेद अवघ्राय नाभिनन्देदित्यर्थः । श्वसन् शवः श्वासकृतकुणपतुल्यः ।

तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः ।
न विक्रियेताथ मुखे विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥ २४ ॥

प्रकाशिका— अश्मसारं अश्मवत्सारो बलं काठिण्यं यस्य तत् । अयोधनं वा । गृह्यमाणैः कथारूपेण श्रूयमाणैर्विक्रियेत द्रवीभावात्मकं विकारं प्राप्नोति । विकारसाध्यानाह ॥ अथेति । अथ द्रवीभावरूपविकारानन्तरं गात्ररुहेषु रोमेषु हर्ष उद्गमः । भक्तानां भवतीति शेषः । तथा च मुख-विकासादिरूपं साध्यं यथा स्यात्तथा न विक्रियेत चेदित्यर्थः ॥ २४ ॥

अथाभिधेह्यङ्ग मनोऽनुकूलं प्रभाषसे भागवतप्रधानः ।
यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधु पृष्टः ॥ २५ ॥

इति श्रीमद्भागवते द्वितीयस्कन्धे तृतीयोऽध्यायः ॥

प्रकाशिका— यस्मादेवं हरिकथाश्रवणाभावे आयुष्यादिकं व्यर्थमथ तस्माद्धरिकथाभिधाने मदन्यः किं न स्यादित्यत उक्तम् ॥ मन इति । मनोनुकूलं मनसः प्रियं यथा भवति तथा प्रभाषसे । हेत्वन्तरमाह ॥ भागवतेति । आत्मविद्यायां परमात्मविद्यायां विशारदः कुशलः । साधु पृष्टः सन् ॥ २५ ॥ इति श्रीभागवतटिप्पण्यां तृतीयोऽध्यायः ॥ २-३ ॥

अथ चतुर्थोऽध्यायः

वैयासकेरिति वचस्तत्वनिश्चयमात्मनः ।
उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् ॥ १ ॥

प्रकाशिका— राजः प्रश्नं कथयितुं तस्यातिशयिताधिकारज्ञापनाय शुकोपदेशसञ्जात-विज्ञानविरक्ती तावदाह ॥ वैय्यासकेरिति द्वाभ्याम् । आत्मनः परमात्मनस्तत्त्वस्य निश्चयो येन तत्तथा । उपधार्य हृदि निधाय । औत्तरेय उत्तराया अपत्त्यम् । सतीं रागादिदोषविधुराम् ॥ १ ॥

आत्मजायासुतागारपशुद्रविणबन्धुषु ।
राज्ये चाविकले नित्यनिरूढां ममतां जहौ ॥ २ ॥

तात्पर्यम्— अन्येषां नित्यं निरूढा । तदा विशेषतो जहौ ॥ २ ॥

प्रकाशिका— आत्मा देहः । आगारं गृहम् । स्वाम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ तथा सुहृत् । सप्तैतानि समस्तानि लोकेऽस्मिन् राज्यमुच्यत इति मनुवचनात् । अविकले सप्तकलापूर्णे । नन्वपरोक्षज्ञानिनश्चरमदेहवतो राज्ञो ममताया असंभावितत्वात्कथं तस्या नित्यनिरूढत्वोक्तिरित्यत आह ॥ अन्येषामिति । न परीक्षित्सम्बन्धिनी ममताऽत्रोच्यते । किं त्वन्येषां हरिस्वातन्त्र्याज्ञानिनां नित्यनिरूढा उन्मूलयितुमशक्या ममतेति ममतास्वरूपमेवातो नोक्तदोष इत्यर्थः । तर्हि कथं जहाविति राज्ञस्तत्त्यागोक्तिरित्यत आह ॥ तदेति । तथा च या ममताऽन्येषां देहादौ नित्यनिरूढातां पूर्वं त्यक्तामपि प्रारब्धकर्मवशादीषदनुवर्तमानां तदा विशेषतो निःशेषतो जहौ त्यक्तवानित्यर्थः ॥२॥

पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमा ।
कृष्णानुभावश्रवणे श्रद्दधानो महायशाः ॥ ३ ॥

प्रकाशिका— किमन्यत्पृष्टवानिति प्रश्नं परिहरति ॥ पप्रच्छेति ॥ ३ ॥

संस्थां विज्ञाय सन्यस्य कर्म त्रैवर्गिकश्च यत् ।
वासुदेवे भगवति स्वात्मभावं दृढं गतः ॥ ४ ॥

तात्पर्यम्— 'आप्तेः सर्वगुणानां य आत्मनामतया हरिम् । उपास्ते नित्यशो विद्वानाप्त-कामस्तदा भवेदि'ति वामने ॥ ४ ॥

प्रकाशिका— संस्थां मरणम् । त्रैवर्गिकं धर्मार्थकामसाधनं यत्कर्म तत्सन्न्यस्य । अत्रात्मभावमित्येतत्स्वात्मत्वमित्यन्यथाप्रतीतिवारणाय प्रमाणेनैव व्याचष्टे ॥ आप्तेरिति । यो विद्वान् हरिं सर्वगुणानामाप्तेः सर्वगुणपूर्णत्वान्निमित्तादात्मनामतयाऽऽत्मशब्दवाच्यत्वेन नित्यश उपास्ते । स तदाप्तकाम आत्मस्वरूपभूतपरमानन्दो भवेदित्यर्थः । अनेनात्मभावं गत इत्येतदावृत्त्या योजनीयमिति सूचयति । दृढमित्यस्य तात्पर्यम् । नित्यश इति । ततश्चायमर्थः ॥ वासुदेवे भगवति विषये आत्मभावमात्मेति भावनां गुणपूर्णत्वेनात्मशब्दवाच्यत्वोपासनां दृढं यथा स्यात्तथा । नित्यश इति यावत् । गतः प्राप्तः कुर्वन् आत्मभावं स्वस्वभावभूतमानन्दं गतः प्राप्तः सन् पप्रच्छेति सम्बन्ध इति ॥ ४ ॥

राजोवाच—

समीचीनं वचो ब्रह्मन्सर्वज्ञस्य तवानघ ।
तमो विशीर्यते मह्यं हरेः कथयतः कथाः ॥ ५ ॥

प्रकाशिका— स्वाभीष्टं पृष्टं शुकवचनं स्तौति ॥ समीचीनमिति । अत्र हेतुमाह ॥ तमो विशीर्यत इति । तमोऽज्ञानं विशीर्यते नश्यति । मह्यं मम तव कथयतः सतोऽतः समीचीनम् ॥ ५ ॥

भूय एव विवित्सामि भगवानात्ममायया ।
यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ।
यथा गोपायति विभुः यथा संयच्छते पुनः ॥ ६ ॥

प्रकाशिका— विवत्सामि वेदितुमिच्छामि । आत्ममायया स्वेच्छया स्वाधीनप्रकृत्या च । यथा केन प्रकारेण दुर्विभाव्यमन्यैरुत्पादयितुमशक्यम् ॥ गोपायति रक्षति । संयच्छते संहरते । तं प्रकारं भूयो विवत्सामीत्यन्वयः ॥ ६ ॥

यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् ।
आत्मानं क्रीडयन्क्रीडन्करोति विकरोति च ॥ ७ ॥

प्रकाशिका— यां यां शक्तिमिति । सत्त्वाद्यभिमानिभूतासु श्रीभूदुर्गासु शक्यत्वाच्छक्तिशब्दवाच्यासु मध्ये कां कां शक्तिमाश्रित्य सृजते गोपायति संयच्छत इत्यन्वयः । शक्त्याश्रयेणेन सर्जनादिकरणे अस्वातन्त्र्यप्रसङ्ग इत्यत उक्तम् ॥ पुरुशक्तिरिति । अनन्तशक्तिरित्यर्थः । तथा च लीलयैव शक्त्याश्रयणमिति भावः ॥ प्रश्नान्तरं करोति ॥ आत्मानमिति । यथेत्यनुवर्तते । तथा च

स्वयमवतारैः क्रीडन् यथा करोति । आत्मानं जीवसङ्घं संसारे क्रीडयन् । यथा विकरोति विविधं करोति तदपि विवत्सामीत्यर्थः ॥ ७ ॥

नूनं भगवतो ब्रह्मन्हरेरद्भुतकर्मणः ।
दुर्विभाव्यमिवाभाति कविभिश्च विचेष्टितम् ॥ ८ ॥

प्रकाशिका— नन्वतिसुगमे हरिचेष्टिते किमर्थं त्वदीयः प्रश्न इत्यत आह ॥ नूनमिति । हरेर्विचेष्टितं कविभिर्ज्ञातमपि दुर्विभाव्यमिव सम्यक् ज्ञातुमशक्यमिवाभाति । साकल्येन तस्याज्ञानादतः प्रश्नो युज्यत इति भावः ॥ अज्ञैर्दुर्विभाव्यमिति किं वक्तव्यमिति कैमुत्यार्थम् । च शब्दोऽप्यर्थः ॥८॥

यथा गुणांस्तु प्रकृतेर्युगपत्क्रमशोऽपि वा ।
विभर्ति भूरिशस्त्वेकः कुर्वन्कर्माणि जन्मभिः ॥ ९ ॥

प्रकाशिका— पुनः पृच्छति ॥ यथेति । एको हरिर्जन्मभिः स्वावतारैस्तु भूरिशोऽतिशयेन भूरीणि सृष्ट्यादिकर्माणि कुर्वन् प्रकृतेर्गुणान्सत्त्वादीन्यथा कथं विभर्ति कारणतया स्वीकरोति । किं युगपदेव क्रमश एव वा । युगपत्क्रमशोऽपि वेति प्रश्नार्थः ॥ ९ ॥

विचिकित्सितमेतन्मे ब्रवीतु भगवान्यथा ।
शब्दब्रह्मणि निष्णातः परस्मिंश्च भवान् खलु ॥ १० ॥

प्रकाशिका— विचिकित्सितं सन्दिग्धम् । यथा यथावत् ॥ निष्णातो नितरां स्नातो विचारेणोभयविषयकनिश्चयवानित्यर्थः ॥ १० ॥

सूत उवाच—

इत्युपामन्त्रितो राज्ञा गुणानुकथने विभोः ।
हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥ ११ ॥

प्रकाशिका— परीक्षित्पृष्टः शुकः किं चकारेति शौनकस्य हार्दामाशङ्कां सूतः परिहरति ॥ इतीति । उपामन्त्रितः प्रार्थितः ॥ हृषीकेशं वागादीन्द्रियप्रेरकम् । अनेन प्रतिवचनोपक्रमे तत्स्मरणमावश्यकमिति सूचयति । प्रचक्रमे देवतागुरुनमस्कारादिरूपमुपक्रमं कृतवानित्यर्थः ॥ ११ ॥

श्रीशुक उवाच—

नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया ।
गृहीतशक्तित्रितयाय देहिनामन्तर्ध्रुवायाऽनुपलभ्यवर्त्मने ॥ १२ ॥

तात्पर्यम्— गृहीतशक्तित्रितयावेति । 'इच्छाज्ञानं क्रिया चेति नित्याः शक्तय ईशितुः । स्वरूपभूता अपि तु भेदवद्व्यावहारिका' इति प्रकाशसंहितावचनान्नित्यगृहीतशक्तित्वमेव ॥१२॥

प्रकाशिका— एतदेवाह ॥ नमः परस्मा इत्यादित्रयोदशभिः श्लोकैः । परस्मै पुरुषाय सर्वोत्तमपुरुषाय । कुतः सर्वोत्तमत्वम् । भूयसे पूर्णगुणाय । भूयस्त्वं कुतो ज्ञेयमित्यत उक्तम् ॥ सदिति । सतः सत्यस्य जगतः, उद्भव उत्पत्तिः, स्थानम् स्थितिर्निरोधो लयस्तेषु निमित्त भूतायां लीला तया । गृहीतं शक्तीनां त्रितयं येन स तथोक्तस्तस्मै । अत्र रज आदिकं शक्तित्रितयं तद्ग्रहणं च कादाचित्कमिति प्रतीतिवारणाय तदुपादाय प्रमाणेनैव व्याचष्टे ॥ गृहीतशक्तीति । नित्या इत्यनेन कादाचित्कग्रहणं व्यावर्तयति । नित्यत्वमुपपादयितुमुक्तम् ॥ स्वरूपभूता इति । अपि तथाऽपि । तु विशेषबलात् । व्यावहारिका व्यवहारविषया भवन्तीत्यर्थः । नित्यगृहीतशक्तित्वमेवेत्यनन्तरं विवक्षितमिति शेषः । अनेन मूले गृहीतेत्यतः प्राक् नित्यमित्यध्याहार्यमिति सूचयति । तथा च नित्यं सर्वदा गृहीतं ज्ञानेच्छाक्रियाख्यानां शक्तीनां त्रितयं येनेत्येवं मूलं व्याख्येयमित्युक्तं भवति । एवं लीलयैव नित्यगृहीतोक्तशक्तिभिर्जगज्जन्मादिकर्तृत्वात्तस्य गुणपूर्णत्वमनुमेयमिति भावः । उद्भवादिना स्वप्रयोजनं नास्तीति सूचनाय लीलयेत्युक्तम् । नन्वेवंविधः परः पुरुषः कुलालवत्कस्माद्देहिभिर्न दृश्यत इत्यत उक्तम् ॥ अनुपलभ्यवर्त्मन इति । देहिनां देहिभिर्दुर्विज्ञेयमार्गायेत्यर्थः । तदीयो मार्गोऽपि दुर्ज्ञेयः किमु स इति सूचयितुमेवमुक्तम् । किं दूरस्थत्वादनुपलभ्यवर्त्मेत्याह ॥ देहि-नामन्तर्ध्रुवाय स्थितायेति । तथा च समीपस्थोऽपि न दृश्यतेऽव्यक्तस्वभावत्वादित्युक्तं भवति ॥१२॥

भूयो नमः सद्वृजिनच्छिदेऽसतामसम्भवायाऽखिलसत्वमूर्तये ।
पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे ॥ १३ ॥

तात्पर्यम्— अखिलसत्वमूर्तये । पूर्णसाधुभावस्वरूपाय । निःशेषगुणपूर्णत्वात्सत्व इत्येव तं विदुरिति महासंहितायाम् ॥ १३ ॥

प्रकाशिका—भक्तिपूर्वकं पुनः पुनर्भगवन्नमनमेव विशेषतस्तत्प्रीतिजनकमित्याशयेन पुनः पुनर्न-मति ॥ भूय इति । अत्राखिलसत्त्वमूर्तय इत्येतदखिलं समग्रसत्त्वं सत्त्वगुणो मूर्तिर्देहो यस्येति व्याख्याननिरासायानूद्य सप्रमाणकं व्याचष्टे ॥ अखिलसत्त्वेति । साधुभावाः शुभधर्माः ।

अखिलेत्यस्यार्थः ॥ पूर्णेति । सत्त्वमित्यस्यार्थः ॥ साधुभावेति । मूर्तय इत्यस्य ॥ स्वरूपायेति । पूर्णत्वादेवेति सम्बन्धः । यद्यपि प्रमाणेऽखिलापरपर्यायनिःशेषत्वस्यापि सत्त्वशब्दार्थान्तर्गततयोक्तत्वेन मूलेऽखिलेति व्यर्थः । तथाऽपि पृथग्विशेषणसमवधान इति न्यायेन मूले सत्त्व शब्देन गुणापरपर्यायस्य साधुभावमात्रस्य ग्रहणमिति मन्तव्यम् ॥ ततश्चायं श्लोकार्थः ॥ भूयो नमः पुनरपि नम इत्यर्थः । सज्जनानामनिष्टनिवर्तकत्वादयमेव नम्य इत्याशयेनोक्तम् ॥ सद्वृजिनच्छिद इति । सतां वृजिनं दुःखं पापं वा तन्नाशकायेत्यर्थः । ननु पापप्रेरकाणामसुराणां सत्वे पुनः पापोदयः स्यादत आह ॥ असतामसम्भवायेति । असतामसुराणामसम्भवायानुद्भवकराय निर्मूलनकरायेत्यर्थः । एतत्करणेऽस्य सामर्थ्यमस्तीति भावेनाह ॥ अखिलेति । पूर्णसाधुभावस्वरूपायेत्यर्थः । न केवलमनिष्टनिवर्तकतयाऽयं नम्यः । किन्तु परमपुरुषार्थरूपसायुज्यप्रदत्वाच्चेत्याशयेनाह ॥ पुंसामिति । पुनः शब्दः समुच्चयार्थः । परमहंसो भगवान् तत्सम्बन्धिन्याश्रमे व्यवस्थितानां विष्णुमुद्दिश्यैव क्रियमाणास्वाश्रमधर्मवतामिति यावत् । अनुमृग्यं योग्यतानुसारेण विचार्य यत्स्वस्वरूपं तद्दाशुषे दात्रे स्वसायुज्यप्रदायेत्यर्थ इति ॥ १३ ॥

नमो नमस्तेस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनाम् ।
निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः ॥ १४ ॥

प्रकाशिका— नन्वेतादृशं पुरुषार्थं हरिः सर्वेषां कस्मान्न प्रयच्छतीत्याशङ्कां परिहरन् पुनर्नमति ॥ नम इति । स्वचित्तसंस्थं सम्बोध्याह ॥ ते तुभ्यमिति । पञ्चरात्रोक्तविधिना हरिमर्चयन्तः सात्वतास्तेषां ऋषभाय श्रेष्ठाय । तिलकायेति यावत् । कुत्सितः पञ्चरात्रागमासंमतो योगो मोक्षोपायो येषामस्तीति कुयोगिनस्तेषां विदूरा काष्ठा गतिः यस्य स विदूरकाष्ठस्तस्मै । स्वप्रणीतपञ्चरात्रागमविद्वेषितत्वात्स्वाधिष्ठितदिङ्मात्रज्ञानमपि तेषां न प्रयच्छतीत्याशयः । लीलयेत्यनेन यदुद्भवादिना स्वप्रयोजनं नास्तीति सूचितं तत्कुत इत्यपेक्षायामाह ॥ निरस्तेति । निरस्तौ साम्यातिशयौ येन तन्निरस्तसाम्यातिशयं तेन । राधसा संसिद्ध्या । सर्वाभीष्टेनेति यावत् । स्वधामनि स्वस्वरूपे स्वाश्रये वा ब्रह्मणि देशतः कालतो गुणतश्च पूर्णे रंस्यते रममाणाय । अनेनावाप्तसमस्तकामतया स्वरमणत्वादिति हेतुरुक्त इति ज्ञातव्यम् । नम इत्येतत्प्रति विशेषणमनुसन्धेयमिति दर्शयितुमत्र नमसां बहुत्वम् ॥ १४ ॥

यत्कीर्तनं यच्छ्रवणं यदीक्षणं यद्वन्दनं यत्स्मरणं यदर्हणम् ।
लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः ॥ १५ ॥

प्रकाशिका— ननु सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृता इति वचनात् कथं सात्वतामपि शुद्धधर्मानुष्ठानसंभव इत्याशङ्कां परिहरन् पुनर्नमिति ॥ यत्कीर्तनमिति । लोकस्य सज्जनस्य कल्मषं कर्मानुष्ठानकाले प्राप्तं तत्कीर्तनादीनां कल्मषापहत्वे हेतुमाह ॥ सुभद्रेति । सुभद्रमतिमङ्गलं श्रवो यशो यस्य स सुभद्रश्रवास्तस्मै । मङ्गलयशस्कस्य कीर्तनादिकं पापपरिहारकमिति प्रसिद्धमेवेति भावः। अत्रोत्तरत्र च नमसो द्वित्वे पूर्ववत्प्रयोजनं ज्ञेयम् ॥ १५ ॥

विचक्षणा यच्चरणोपसादनात्सङ्गं व्युदस्योभयतोऽन्तरात्मनः ।
विन्दन्ति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः ॥ १६ ॥

प्रकाशिका— एवं हरिकीर्तनादिना शुद्धं कर्म कुर्वतां किं फलमित्याशङ्कां परिहरन् पुनर्नमति ॥ विचक्षणा इति । विचक्षणा विवेकिनो यच्चरणयोरुपसादनाद्यस्य चरणयोरुपसादनादुपसत्तेः । भजनादिति यावत् । अन्तरात्मनोऽन्तःकरणस्योभयत इहामुत्र विषयेषु सङ्गं स्नेहं व्युदस्य निरस्य गतक्लमाः प्रयासरहिता ब्रह्मगतिं ब्रह्मज्ञानतया ब्रह्मरूपां गतिं गम्यं च विन्दति लभन्ते । हीत्यत्र प्रमाणप्रसिद्धिं दर्शयति ॥ १६ ॥

तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः ।
क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ॥ १७ ॥

प्रकाशिका— कर्मकरणे इत्थं भावं दर्शयन् पुनर्नमति ॥ तपस्विन इति । मनस्विनो मनोयोगयुक्ताः । सुमङ्गलाः सदाचाराः क्षेमं कर्मफलं ज्ञानादिकं यदर्पणं यस्मिन् समर्पणम् । नाहं कर्ता हरिः कर्तेत्याद्यनुसन्धानरूपम् । सुभद्रश्रवस इत्यस्यावृत्तिः तद्यशः श्रवणादेरावश्यकत्वज्ञापनाय । ॥ १७ ॥

किरातहूणान्ध्रपुलिन्दपुल्कसा आभीरकङ्का यवनाश्शकादयः ।
येऽन्ये च पापा यदपाश्रयाश्रयाच्छुध्यन्ति तस्मै प्रभविष्णवे नमः ॥ १८ ॥

प्रकाशिका— यद्धरिकीर्तनादिकं शुद्धिकरमिंत्युक्तं तत्कैमुत्येनोपपादयति ॥ किरातेति । किरातादयः पापजातयः जातिविवेकाभिधायक ग्रन्थादवगन्तव्याः । अन्ये पापाः । ब्रह्महत्यादिकर्मभिः पापाः । यस्मादन्य आश्रयो येषां नास्ति ते यदपाश्रया भागवताः विप्रादयस्तेषामाश्रयात्सेवारूपात् शुद्धयन्ति निष्पापा भवन्तीत्यर्थः । एवं च यदा भागवतानां सेवायाः शुद्धिप्रदत्वं तदा किं वाच्यं भगवत्कीर्तनादिरूपायास्तत्सेवाया इति भावः । भागवतानामिव भगवतोऽपि

माहात्म्यं नान्यायत्तं किन्तु तस्य स्वभाव एवेत्याह ॥ प्रभविष्णव इति । प्रकर्षेणोक्तमाहात्म्यवत्वेन भवितुं शीलमस्यास्तीति प्रभविष्णुस्तस्मा इत्यर्थः ॥ १८ ॥

स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः ।
गतव्यलीकैरजशङ्करादिभिर्वितर्क्यलिङ्गो भगवान्प्रसीदताम् ॥ १९ ॥

तात्पर्यम्— वेदानुसारिवशगः स्वेच्छया तु हरिर्यतः । अतः स्वतन्त्रमप्याहुः प्राज्ञा वेदमयेति हे'त्यध्यात्मे ॥ १९ ॥ इति द्वितीयतात्पर्ये चतुर्थोऽध्यायः ॥ ४ ॥

प्रकाशिका— एवं नतिरूपमङ्गलं कृत्वेदानीं तत्साध्यं भगवत्प्रसादं प्रार्थयते ॥ स एष इत्यादिभिश्चतुर्भिः । य एवंविधमहिमावत्वेन वेदादिप्रसिद्धो यश्च पूर्वं नमस्कृतः स एष आत्मा परमात्मा भगवान् प्रसीदतामिति सम्बन्धः । कुतोऽस्य प्रीतिः प्रार्थनीयेत्याशङ्कायामुक्तम् ॥ आत्मवतां देहिनामाधिक्येनेश्वर इति । भक्तवत्सलत्वाच्च तस्यैव प्रीतिराशास्येत्याशयेनाह ॥ त्रयीमयो धर्ममयस्तपोमय इति । अत्र वेदविद्यात्मकतयोच्यत इति प्रतीतिनिरासायोपलक्षणतया त्रयीमय इत्येतत्प्रमाणेनैव व्याचष्टे ॥ वेदानुसारीति । तु शब्दोऽवधारणे । स्वतन्त्रमित्यनुवादात्स्वतन्त्र इति लभ्यते । ततश्च स्वतन्त्रोऽपि हरिर्यतः स्वेच्छयैव भक्तेषु वात्सल्येनैव वेदानुसारिपुरुषवशगोऽतः प्राज्ञाः स्वतन्त्रमप्येनं हरिं हे वेदमयेत्याहुः सम्बोधयन्तीत्यर्थः । अनेन मूले त्रयीशब्दस्तदनुसारिलक्षकः । प्राधान्यार्थो मयट् । ततश्चात्र त्रय्यनुसारिप्रधानकस्तद्वशग इति यावदिति योजनां सूचयति । एवमेव धर्ममयस्तपोमयशब्दौ धर्मिवशगस्ततपस्विवशग इति व्याख्येयौ न्यायसाम्यादिति भावः । ननु ब्रह्मादयोऽप्यधीश्वरतया तत्तच्छास्त्रेषु कथ्यन्तेऽतः कथमयमेवाधीश्वर इत्यत उक्तम् ॥ अजे शङ्करादिभिर्वितर्क्यं विचार्यं लिङ्गं स्वरूपं यस्येति । तथा च तच्छास्त्रमप्रमाणमिति भावः । विष्णुवन्मोहनार्थमेव ब्रह्मादयो विचारयन्तीति किं न स्यादित्यत उक्तम् ॥ गतव्यलीकैरिति । निष्कपटैरित्यर्थः ॥ १९ ॥

श्रियःपतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः ।
पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान्सतां पतिः ॥ २० ॥

प्रकाशिका— अधिकृतत्वाचास्यैव प्रीतिराशास्येत्याशयेनैतद्ग्रन्थप्रतिपाद्यविशेषणविशिष्टस्य प्रीतिं प्रार्थयते ॥ श्रियः पतिरिति । अनेन सर्ववाग्देवताया रमाया अपि प्रीतिः प्रार्थितेति ज्ञातव्यम् । अत्र हि रुक्मिणी सत्यभामापतित्वोक्त्या श्रीर्यत्र रूपिण्युरुगाय पादयोरित्यादिना च मूलरूपेऽपि उत्तरत्र श्रीधरापतित्वं दक्षाध्वरादिपालकत्वोक्त्या यज्ञपतित्वं तापसादि मनुरूपेण प्रजापति-

त्वमनिरुद्धादिरूपेण श्रीपदोपलक्षितसकलतत्त्वपतित्वम् । वचनव्यापारस्य बुद्धिसाध्यत्वाद्धियां स्वपदेनोपादानम् । यज्ञोपेन्द्रादिरूपेण लोकपतित्वम् । कृष्णरूपेणान्धकवृष्ण्यादिपतित्वगतित्वे । दत्तकपिलव्यासादिरूपेण साक्षात्कृष्णरूपेण च सतां पतित्वं चोक्तमिति ज्ञातव्यम् । अन्धकादयो यादवप्रभेदाः । गतिश्च सर्वापत्सुरक्षकः ॥ २० ॥

यदङ्घ्र्यभिध्यानसमाधिधौतया धियाऽनुपश्यन्ति हि तत्वमात्मनः ।
वदन्ति चैतत्कवयो यथारुचि स मे मुकुन्दो भगवान्प्रसीदताम् ॥ २१ ॥

प्रकाशिका— विन्दन्ति हि ब्रह्मगतिमित्यत्र कर्मसाध्यतयोक्तं स्वयोग्यं ज्ञानं परोक्षमपरोक्षं चाभिप्रेतम् । तत्र च कर्म न साक्षाज्जनकम् । कृतेऽपि कर्मणि तयोरदर्शनात् । अतोऽत्र यदवान्तरकारणं तद्दर्शयन् पुनः प्रीतिं प्रार्थयते ॥ यदङ्घ्रीति । यस्यांघ्र्योश्चरणयोरभिध्यानं प्रत्याहारादिरूपप्रयत्नेन सन्ततचिन्तनं, समाधिरप्रयत्नेन चिन्तनं ताभ्यां धौतया विशुद्धया धियान्तःकरणविशेषेणात्मनःपरमात्मनस्तत्त्वं स्वयोग्यं पश्यन्ति । दृष्ट्वैतत्परमात्मतत्त्वं यथारुचि श्रोतॄणां रुच्यनुसारेण वदन्त्युपदिशन्ति च । स मुकुन्दो मोक्षप्रदः प्रसीदताम् । अनेनापरोक्षज्ञाने उक्तरूपा समाधिरवान्तरकारणं स्वयोग्यगुणकस्य हरेः परोक्षज्ञाने च दृष्टपरमात्मस्वरूपाणामुपदेश एवेत्युक्तं भवति । ये परमात्मतत्त्वं पश्यन्ति तेषामपि पूर्वमन्येषां दृष्टतत्त्वानामुपदेशसम्भवात् । मुकुन्द इत्यनेन परमसाध्यप्रदर्शकेन ब्रह्मगतिमित्यत्र यद्ब्रह्मरूपां गतिमिति व्याख्यानं तदपि विवृतमिति ज्ञातव्यम् ॥२१॥

प्रचोदिता येन पुरा सरस्वती वितन्वताऽजस्य सतीं स्थितिं हृदि ।
स्वलक्षणा प्रादुरभूत्किलाऽस्यतः स मे ऋषीणामृषभः प्रसीदताम् ॥ २२ ॥

प्रकाशिका— इदानीं स्वगुरुभूतस्य व्यासरूपस्य भगवतः प्रीतिं प्रार्थयते ॥ प्रचोदितेति । पुराऽऽदिसृष्टावजस्योत्पत्तिशून्यस्य सृष्टिकर्तृर्नारायणस्य हृद्यन्तःकरणे सतीं विद्यमानां वेदवाचां स्थितिं शिक्षाद्युक्तस्वरवर्णक्रमादि रूपां कालादिबलेनोत्सन्नामिति शेषः । वितन्वता विस्तारं कुर्वता । यत्स्वरवर्णाद्युपेतो वेद आदिसृष्टौ नारायणान्तःकरणे स्थितः तत्स्वरवर्णक्रमाद्युपेततयैव वेदमुद्धर्तृकामेनेति यावत् । येन व्यासेन प्रचोदिता प्रेरिता सरस्वती वेदवाणी स्वलक्षणा स्वानि लक्षणानि यस्याः सा । आस्यतो यस्य मुखात् । प्रादुरभूद्व्यक्ताऽभूत् । किलेति श्रुत्यादिसंवादमत्र दर्शयति । स ऋषीणां ज्ञानिनां ऋषभः श्रेष्ठो व्यासो मे प्रसीदतामित्यर्थः । प्रचोदितेत्यनेनास्य वेदोद्धरणमितरेषामिव न प्रणिधानादिरूपप्रयत्नसाध्यमिति सूचयति ॥ २२ ॥

भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पुरुषः ।
भुङ्क्ते गुणान्षोडशषोडशात्मकः सोऽलङ्कृषीष्ट भगवान्वचांसि मे ॥ २३ ॥

प्रकाशिका— इदानीं स्ववचसां साहित्यशास्त्रप्रसिद्धालङ्कारप्रदत्वेन देहान्तर्गतं सर्वेन्द्रियप्रेरकं हरिं प्रार्थयते ॥ भूतैरिति । यो विभुर्विष्णुर्महद्भिर्भूतैः पृथिव्यादिभिः पुरः शरीराणि निर्मायामूषु पूर्षु शेत इति यत् अत एव पुरुषः पुरुषनामा सन् षोडशात्मकः पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, मनो बुद्धिरहङ्कारश्चित्तं चेतनेति पञ्च मनांस्येकः साक्षीत्येवं षोडशेन्द्रियव्यापी च सन् षोडशगुणान् षोडशसंख्याकान् तत्तदिन्द्रियविषयान् भुङ्क्ते शब्दादीन् भुङ्क्ते चेतरान्प्रेरयतीत्यर्थः । स विष्णुर्मे वचांस्यलङ्कृपीष्ट साहित्यशास्त्रप्रसिद्धालं कारयुक्तानि करोतु । तादृशान्येव हि वचांसि श्रोतॄणा-माल्हादजनकानीत्यत इदं प्रार्थितमिति ज्ञातव्यम् ॥ २३ ॥

नमस्तस्मै भगवते वासुदेवाय वेधसे ।
पपुर्ज्ञानमयं सौम्याः यन्मुखाम्बुरुहासवम् ॥ २४ ॥

प्रकाशिका— इदानीं भक्त्यतिशयेन श्रीकृष्णं नमति ॥ नम इति । सौम्या ज्ञानरूपसोमार्हाः उद्धवादयो ज्ञानमयं ज्ञानरूपं यस्य कृष्णस्य मुखाम्बुरुहे वक्त्रकमले विद्यमानमासवं मकरन्दम् । वासुदेवाय वसुदेवकुमाराय । वेधसे भक्ताभीष्टकर्त्रे ॥ २४ ॥

एतदेवात्मभू राजन्नारदायेति पृच्छते ।
वेदगर्भोऽभ्यधात्सर्वं यदाह हरिरात्मनः ॥ २५ ॥

॥ इति श्रीमद्भागवते द्वितीयस्कन्धे चतुर्थोऽध्यायः ॥

प्रकाशिका— इदानीं राज्ञा कृतस्य प्रश्नस्योत्तरतया ब्रह्मनारदसंवादं प्रस्तौति ॥ एतदेवेति । आत्मनः परमात्मनो भवतीत्यात्मभूः परमात्मपुत्रः अनादित एव वेदा गर्भे उदरे यस्य स वेदगर्भो ब्रह्मा हरिरात्मनः स्वस्य साक्षात् स्वयमेव न परं परयेत्यर्थः । यत्पुराणमाह तदेतदेव भागवतमेव इति त्वत्प्रश्नप्रकारेण पृच्छते नारदायाभ्यधात् । तथा च तत्त्वत्प्रश्नस्याप्युत्तरं भविष्यतीति भावः । अर्थव्यत्यासो नास्तीति सूचयितुमेव शब्दः ॥ २५ ॥ इति श्रीभागवततात्पर्यटिप्पण्यां चतुर्थोऽध्यायः ॥ २-४ ॥

अथ पञ्चमोऽध्यायः

नारद उवाच—

देवदेव नमस्तेस्तु भूतभावनपूर्वज ।
तद्विजानीहि यज्ज्ञानमात्मतत्वनिदर्शनम् ॥ १ ॥

तात्पर्यम्— विजानीहि विज्ञापय। 'व्यत्ययोऽभेदस्वातन्त्र्यकरणेष्वि'ति वचनात्॥ १॥

प्रकाशिका— नारदो ब्रह्माणं प्रवचनाय नतिपूर्वकं प्रार्थयते॥ देवदेवेति। अत्र नारदेन स्वस्य ब्रह्माभेदाभिप्रायेण विजानीहीत्युच्यत इति भाति। अतोऽत्र विजानीहीत्येतदनूद्य प्रकृतसङ्गततया व्याख्याति॥ विजानीहीति। नन्वेवं विज्ञापयेत्येव वक्तव्ये विजानीहीति व्यत्ययेन वचनं किमर्थमित्यतोऽत्र प्रयोजनं महाव्याकरणसूत्रेणैव दर्शयति॥ व्यत्यय इति। सुप् तिप् विकर्णलिङ्गपुरुषादिव्यत्ययोऽभेदकरणस्वातन्त्र्येषु विवक्षितेषु व्याख्यातव्य इति सूत्रार्थः। तत्र हि रूपाणां तद्गुणक्रियादीनां च हरिणा परस्परं चाभेदे वक्तुः स्वातन्त्र्ये करणत्वे च विवक्षिते सुप् तिङादीनां व्यत्ययो भवति। प्रकृतेच ब्रह्मनारदान्तर्यामिणोरभेदो वक्तुर्ब्रह्मणः प्रयोजककर्तृत्वरूपं स्वातन्त्र्यं नारदचित्ताभिमानितया करणत्वं चाभिप्रेतम्। अत एतत्त्रितयज्ञापनाय व्यत्ययेनोक्तिरिति भावः। नन्वेवं प्रयोजककर्तरि कर्तृशब्दप्रयोगः किमर्थमित्यतस्तत्प्रयोजनं महाव्याकरणसूत्रेण दर्शयति॥ व्यत्यय इति। व्यत्ययो व्यत्यासेन कर्तृनिर्देशो वक्तुः श्रोत्रपेक्षया भेदप्रयोजककर्तृत्वरूपं स्वातन्त्र्यं करणत्वं चैतेषु विवक्षितेषु भवतीत्यर्थः। प्रकृते च ब्रह्मणस्त्रयमप्यस्ति। तस्य विज्ञातृनारदापेक्षया भिन्नत्वात्। प्रयोजककर्तृत्वरूपस्वातन्त्र्यवत्वात्। नारदचित्ताभिमानितया करणत्वाच्चेति भावः॥ ततश्चायं श्लोकार्थः॥ हे भूतभावन। अत एव सर्वेषां पूर्वज। यदात्मतत्त्वं परमात्मस्वरूपं नितरामतिशयेन दर्शयति प्रतिपादयति। तज्ज्ञायतेऽनेनेति ज्ञानं ज्ञानसाधनं पुराणं विजानीहि विज्ञापय। त्वमेव मच्चित्तं प्रेरयित्वा तत्पुराणमहं यथा सम्यक् जानीयास्तथा कुर्वित्यर्थः॥ १॥

यद्रूपं यदधिष्ठानं यतः सृष्टमिदं विभो।
यत्संस्थं यत्परं यच्च तत्तत्वं वद तत्वतः॥ २॥

तात्पर्यम्— तद्वशत्वादिदं रूपं हरेर्नैव स्वरूपत' इति मानससंहितायाम्। 'अधिष्ठानमिति प्रोक्तं मूलाधारं विचक्षणैः। यत्स्थितं दृश्यते वस्तु संस्थानं तदुदीरितम्। उभयं हरिरेवास्य जगतो मुनिपुङ्गवे'ति वामने॥ 'हरिः परोऽस्य जगतो ह्यव्यक्तादेश्च कृत्स्नशः। अतस्तत्परमेवेदं वदन्ति मुनयोऽमला' इति सात्वतसंहितायाम्। 'यदधीना यस्य सत्ता तत्तदित्येव भण्यते। विद्यमाने विभेदेऽपि मिथोनित्यं स्वरूपत' इति भविष्यत्पर्वणि॥ २॥

प्रकाशिका— नारदः सामान्यतः स्वावगतं भगवन्माहात्म्यमनुवदन् विशेषतो वदेति प्रार्थयते॥ यद्रूपमिति। अत्र यद्रूपमित्येतद्यत्स्वरूपमिति प्रतीतिवारणाय प्रमाणेनैव व्याचष्टे॥ तद्वशत्वादिति। इदं जगद्रूपं रूपमित्युच्यत इत्यर्थः॥ स्वरूपत इति। मत्स्यादिस्ववम् रूपत्वेनेत्यर्थः। यदधिष्ठानं यत्संस्थमित्यनयोर्यदधिष्ठानं यस्य यस्मिन्संस्थितमित्यर्थकत्वात्पौनरुक्त्यमित्याशङ्कायां प्रमाणेनैव

तयोरर्थभेदं दर्शयति ॥ अधिष्ठानमितीति ॥ मूलाधारमिति । साक्षादाधारस्याधारमित्यर्थः । गृहे पीठे तिष्ठतीत्यत्र गृहमिवेति भावः । यत्स्थितं यस्मिन्साक्षात्स्थितं सम्यक् स्थीयते वस्तु यस्मिंस्तत्स्थानं पीठवदिति भावः । नन्वेवं यत्संस्थमित्यत्र यच्छब्देन मूलाधारभूतभगवदितरस्यैव ग्रहणप्राप्तौ प्राय-पाठविरोध इत्यत आह ॥ उभयं हरिरेवेति । रूपभेदेनेति भावः । यत्परमित्येतद्यस्मात्परमिति प्रतीतिवारणाय प्रमाणेनैव व्याचष्टे ॥ हरिः पर इति । अत एवेति सम्बन्धः । बहुव्रीह्यभि-प्रायादेवेत्यर्थः । अनेन यः परो यस्य तद्यत्परमिति मूलं व्याख्यातमिति मन्तव्यम् । यच्चेत्येतद-प्यभेदप्रतीतिवारणाय प्रमाणेनैव व्याचष्टे ॥ यदधीनेति ॥ ततश्चायं मूलार्थः ॥ इदं विश्वं यद्रूपं यस्य हरे रूपमिव रूपं तद्वशत्वात् । योधिष्ठानो गृहवन्मूलाधारो यस्य तद्यदधिष्ठानम् । यस्मिन्पीठ इव सम्यक् साक्षात्तिष्ठतीति यत्संस्थम् । यः परो यस्य तद्यत्परम् । यच्च यदधीनं च तस्य हरेस्तत्त्वं त्वदपेक्षयोत्तमत्त्वादिरूपं माहात्म्यं तत्त्वतो यथावद्वदेति ॥ २ ॥

सर्वं ह्येतद्भवान् वेद भूतभव्यभवत्प्रभुः ।
करामलकवद्विश्वं विज्ञानावसितं तव ॥ ३ ॥

प्रकाशिका— मम वक्तव्यांशे तव तत्त्वज्ञानमस्ति । अतो न जानामीति न वाच्यमित्याशयेनाह ॥ सर्वं ह्येतदिति । एतन्मां प्रति वक्तव्यम् । भवान्वेद । कुत इत्यतोऽत्र कैमुत्यं हेतुमाह । हि यस्माद्भूतं जातं भव्यं जनिष्यमाणं भवज्जायमानं तेषां त्वं प्रभुर्यतोऽतस्तव विशिष्टज्ञानेन विश्वं सर्वशास्त्रं वेद्यं परमपरं च तत्त्वं करामलकवत् अवसितं निश्चितं तस्मात्सर्वमेतन्मम वक्तव्यं भवान्वे-देति किं वाच्यमिति ॥ ३ ॥

यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः ।
एकः सृजसि भूतानि भूतैरेवात्ममायया ॥ ४ ॥

तात्पर्यम्— तदधिकं ज्ञातुं पूर्वपक्षं दर्शयति । एकः सृजसीत्यादिना ॥ ४ ॥

प्रकाशिका— एवं जगदाधारं हरिं पृष्ट्वा इदानीं तवैव ज्ञानादिप्रदं कथयेति प्रार्थयते ॥ यद्विज्ञान इति । यस्माद्विज्ञानं, यस्य य आधारो, यस्य यदात्मको यत्स्वामिकश्च त्वं तत्तत्त्वं वदेति पूर्वेणान्वयः । एकः सृजसीत्यादिना ब्रह्मण एव सर्वोत्तमत्त्वं स्वोक्तविरुद्धं नारदः कथं वदतीत्य-तस्तस्याभिप्रायमाह ॥ तदधिकमिति । तस्माद्‌ब्रह्मणोऽधिकं ब्रह्ममुखादेव ज्ञातुं पूर्वपक्षं ब्रह्मण एवेश्वरत्वं दर्शयति । हिरण्यगर्भः समवर्तताग्र इत्यादि श्रुतितात्पर्यापरिज्ञानप्राप्तमुपपादयतीत्यर्थः । तथा च पूर्वपक्षस्थितेन नारदेन तथोक्तत्वान्न विरोध इत्याशयः ॥ ततश्चायं मूलार्थः ॥ त्वमेक

एवासहाय एव स्वयं स्वतन्त्र आत्ममायया स्वेच्छया स्वाधीनप्रकृत्या वा । भूतानि चराचराणि भूतैः पञ्चमहाभूतैः सृजसि ॥ ४ ॥

आत्मन्भावयसे तानि न पराग्भावसेः स्वयम् ।
आत्मशक्तिमवष्टभ्य सूत्रनाभिरिवाक्लमः ॥ ५ ॥

प्रकाशिका— सृष्ट्वा तानि चराचराण्यात्मन् आत्मनि । स्वाश्रितानीति यावत् । भावयसे पालयसि । पराक् त्वत्तो बहिर्न भावयसे । क इव । आत्मशक्तिं स्वसामर्थ्यमाश्रित्य श्रमरहित ऊर्णनाभिर्यथा तथेति ॥ ५ ॥

नाहं वेद परं त्वस्मान्नावरं न समं विभो ।
नामरूपगुणैर्भाव्यं सदसत्किञ्चिदन्यतः ॥ ६ ॥

प्रकाशिका— एवं ब्रह्मण एव सृष्ट्यादिकारणत्वमुपपाद्य तदन्यस्य कारणत्वं दूषयति ॥ नाहमिति । नामरूपगुणैर्मनुष्यतिर्यगादिनाम्ना द्विचतुष्पत्वादिरूपेण शुक्लकृष्णादिगुणैः । तद्विशिष्ट-तयेति यावत् । सदसत् स्थूलं सूक्ष्मं किञ्चित्सर्वं जगद्यस्मादन्यतोऽन्यस्माद्भाव्यमुत्पाद्यं तदन्यद्भ-स्त्वस्माद्भवतः परमुत्तमं न वेदावरं नीचं न वेद समं सदृशं न वेद । तथा च जगदुत्पादकं त्वदन्यत्त्वदुत्तमं त्वत्समं त्वदवरं वा नास्ति प्रमाणाभावादित्याशयः ॥ ६ ॥

स भवानचरद् घोरं यत्तपः सुसमाहितः ।
तेन खेदयसे नस्त्वं परां शङ्कां च यच्छसि ॥ ७ ॥

प्रकाशिका— तर्ह्येवं ज्ञानवतस्तव प्रश्नः किमर्थस्तन्मूलभूतसंशयाभावादित्यतः संशयबीजमपि दर्शयति ॥ स भवानिति । एवं विधोऽपि भवानित्यर्थः । तपोचरदिति यत्तेन नोऽस्मान्खेदयसे त्वय्यनलं बुद्धिं प्रापयसि परां परविषयाम् । त्वदितरकर्तृसद्भावविषयामिति यावत् । शङ्कां च यच्छसि प्रयच्छसि । पराशङ्कामिति पाठे परस्मिन् त्वदपेक्षयोत्तमविषये आशङ्कामित्यर्थः ॥ ७ ॥

एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर ।
विजानीहि यथैवेदमहं बुध्येऽनुशासितः ॥ ८ ॥

तात्पर्यम्— ‘त्वदधीना यतः सत्ता अवरस्यापि केशव । अतः स्वरूपतः सम्यक्सति भेदेऽपि तद्भवानि’ति मात्स्ये ॥ ८ ॥

प्रकाशिका— सर्वज्ञसकलेश्वरेत्युक्तार्थस्थिरीकरणायोक्तम् । अनुशासितः शिक्षितः सन् । बुद्ध्ये बुद्ध्येयम् । तथा विजानीहि विशेषेण ज्ञापयेत्यर्थः । ननु वेदादिषु ब्रह्मा विष्णुरेवेत्युच्यतेऽतः कथमयं पूर्वपक्ष इत्यतस्तद्वचनानामर्थं प्रमाणेनैव दर्शयति ॥ कुतोऽयं पूर्वपक्ष इत्यतस्तदुपपादनाय प्रमाणमाह ॥ त्वदधीनेति । तदप्यवरमपीत्यपिशब्दसम्बन्धः । भवानित्युच्यते । वैदिकैरिति शेषः । एकः सृजसीत्यादिना नारदेन ब्रह्माणं प्रति त्वमेवेश्वर इत्युक्तं सकलेश्वरेति सम्बोधितत्त्वात् । सिद्धान्ते च जीवेश्वराभेदवचनस्यैतत्प्रमाणबलेन तदधीनसत्ताकत्वमेवार्थतया वर्णनीयम् । न च नारदेनात्र तथोक्तम् । नाहं वेद परं त्वस्मादित्युक्तत्वात् । अविज्ञाय परं मत्त इति वक्ष्यमाणत्वाच्च । अतोऽयं पूर्वपक्ष एवेति ज्ञायत इति भावः ॥ ८ ॥

ब्रह्मोवाच—

सम्यक्कारुणिकस्येदं वत्स ते विचिकित्सितम् ।
यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ॥ ९ ॥

प्रकाशिका— नारदप्रश्नं परिहरिष्यन्नादौ तत्प्रश्नं स्तौति ॥ सम्यगिति । विचिकित्सितं सन्देहः । तन्मूलप्रश्न इति यावत् । सम्यक् समीचीनः । अत्र हेतुर्यद्यतः परधर्मे भगवद्वीर्यदर्शने प्रकाशे चोदितः प्रेरितोऽस्मीति । कारुणिकस्येत्यनेन लोकोपकारायैवेदं तव प्रश्नकरणमिति सूचयति ॥ ९ ॥

नानृतं बत तच्चापि यथा मां प्रब्रवीषि भोः ।
अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ॥ १० ॥

तात्पर्यम्— नानृतमित्याक्षेपः ॥ १० ॥

प्रकाशिका— नानृतं बतेति सिद्धान्तवाक्यस्य यत्त्वयोक्तमेकः सृजसीत्यादि तन्नानृतं किन्तु सत्यमेवेति नारदोक्तस्तुतिपरत्वं प्रतीयते । न च तद्युक्तम् । उक्तवक्ष्यमाणविरोधात् । अतस्तस्याभिप्रायमाह ॥ नानृतमिति । आक्षेपो निराकरणं न स्तुतिरित्यर्थः । काकाऽनृतं न किम् अनृतमेवेति योजनीयमिति भावः ॥ ततश्चायं मूलार्थः ॥ त्वमेकः सृजसीत्यादि यथा यन्मां ब्रवीषि तदनृतं न किमनृतमेव । बतेत्यास्वादने । यच्च मत्तः परमाधिकमविज्ञाय नाहं वेद परं त्वस्मादिति मामात्थ तच्चानृतं न किं तदप्यनृतमेव । कुत इत्यत उक्तम् ॥ अपीति । अपिर्गर्हायाम् । गर्हितत्वादित्यर्थः । एतदपि कुत इत्यत आह ॥ एतावत्वमिति । यतो म एतावत्वं तदधीनमाहात्म्यवत्वं हि श्रुत्यादिप्रसिद्धं तस्मादतीवगर्हितमिति ॥ १० ॥

येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम् ।
यथार्कोऽग्निर्यथा सोमो यथार्क्षग्रहतारकाः ॥ ११ ॥

प्रकाशिका— एतदेव स्पष्टयति ॥ येनेति । येन हरिणा स्वरोचिषा स्वप्रकाशेन रोचितं प्रकाशितं रोचयामि प्रकाशयामि । ऋक्षाण्यश्विन्यादीनि ग्रहा मङ्गलादय आदित्यचन्द्रयोः पृथगुक्तत्वात् । तारका इतरनक्षत्राणि ॥ ११ ॥

नमस्तस्मै भगवते वासुदेवाय धीमहि ।
यन्मायया दुर्जयया मां वदन्ति जगद्गुरुम् ॥ १२ ॥

तात्पर्यम्— 'मुख्या माया हरेः शक्तिरमुख्या प्रकृतिर्मता । अथामुख्यतमा चैव माया दीना प्रकीर्तिता' ॥ १२, १३ ॥

प्रकाशिका— दुर्मतश्रवणजनितपापपरिहाराय वासुदेवद्वादशाक्षरविद्यां विष्णुगायत्रीं च स्मरन्नमति ॥ नम इति । अनेन हरिमाहात्म्यं वक्तुमादौ नमनरूपं मङ्गलं कृतमित्यपि ज्ञातव्यम् । नन्वेवं चेत्तव कर्तृत्वप्रवादो लोके किं निबन्धन इत्यत आह ॥ यन्माययेति । मोहिताः सन्त इति शेषः । जगद्गुरुं जगज्जनकम् । अत्रानिर्वाच्याऽविद्यैव माया शब्दवाच्येत्यन्यथाप्रतीतिवारणाय प्रमाणेनैवात्र विवक्षितां मायां दर्शयति ॥ मुख्या मायेति । प्रकृतिश्चेतना । दीना दुःखिता । स्वगुणाच्छादिकारूपा । तथा चात्र त्रिविधाऽपि ग्राह्येति भावः दुर्जयया हरिभजनवर्जितैर्जेतुमशक्यया ॥ १२ ॥

विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया ।
विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ॥ १३ ॥

प्रकाशिका— दीनां मायामभिप्रेत्याह ॥ विलज्जमानयेति । यस्य हरेरीक्षापथे कृपाकटाक्षमार्गे । तद्विषय इति यावत् । हरिर्यमुद्धरिष्यामीति कृपाकटाक्षेणेक्षिते तस्मिन्पुरुषे स्थातुं विलज्जमानयैव तस्मिन्स्वकार्यमकुर्वन्त्येति यावत् । अमुया स्वगुणाच्छादिकरूपया मोहिता अत एव ममाहमिति दुर्धियो दुरभिमानयुक्ता विकत्थन्ते । सर्वप्रमाणविरुद्धं ममैव सर्वोत्तमत्वकथनं कुर्वन्ति ये एवं कथयन्ति ते न हरेः कृपाकटाक्षविषया इति भावः । तं धीमहीत्यन्वयः ॥ १३ ॥

द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ।
वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तात्वतः ॥ १४ ॥

तात्पर्यम्— परः अधिकः । परः अधिकः । 'तद्वदेव स्थितं यत्तु तात्त्विकं तत्प्रचक्षत' इति कौर्मे ॥ १४ ॥

प्रकाशिका— ननु भवतो भगवदधीनत्वेन तदुत्तमत्वतत्समत्वयोरसम्भवेऽपि साङ्ख्याद्युक्तरीत्या प्रकृतिकर्मादिकमेव भगवदुत्तमं तत्समं वा स्यादित्यत आह ॥ द्रव्यमिति । अत्र पर शब्दस्यान्यार्थत्वेऽन्य इति पदं व्यर्थमतस्तदनूद्य व्याचष्टे ॥ परोऽधिक इति । अप्रतीत्या तात्वत शब्दं प्रमाणेनैव व्याचष्टे ॥ तद्वदेवेति ॥ ततश्चायं श्लोकार्थः ॥ द्रव्यं प्रकृतिः कर्मेष्टानिष्टप्रापकं कालो वसन्तादिः स्वभावस्तत्तद्वस्तुस्वभावो जीवो देवदत्तादिः । जीवाद्भवन्ति भूतानीत्यादिश्रुतेः । उक्तादन्यश्चार्थः शिवशक्त्यादिरूपो वासुदेवात्परोऽधिको नैव । तात्वतश्च तद्वदेव स्थितश्च तत्समश्च नैव । प्रकृत्यादीनामचेतनत्वेनास्वातन्त्र्यात् । जीवस्यापि हिताहिताकरणादिना तथात्वस्यानुभवसिद्धत्वात् । शिवादीनामप्यस्वतन्त्रतया श्रुत्यादिसिद्धत्वादिति भावः ॥ १४ ॥

नारायणपरा वेदा देवा नारायणाङ्गजाः ।
नारायणपरा लोका नारायणपरा मखाः ॥ १५ ॥

तात्पर्यम्— वेदप्रतिपाद्येषु स पर इत्यादि । 'गम्येज्यज्ञेयवाच्येषु याज्येषु च परो हरिः । तपसा युज्यमानानां सर्वलोकेभ्य एव चे'ति वाराहे ॥ १५,१६ ॥

प्रकाशिका— नन्वेवं हिरण्यगर्भः समवर्तताग्र इत्यादि श्रुतिविरोधः । तत्र भवदादीनामेव सर्वोत्तमत्वकथनादित्यत आह ॥ नारायणपरा वेदा इति । तर्हि वेदाद्देवाद्यसिद्धिरिति शङ्कापरिहारायास्य तात्पर्यमाह ॥ वेदप्रतिपाद्येष्विति । स परो मुख्यः । तथा च नारायणे महातात्पर्यसिद्धिरितरत्रावान्तरतात्पर्यमतो न तदसिद्धिरिति भावः । आदिपदेनेज्येषु योज्येषु तपसा पूज्यमानेषु ज्ञेयेषु गम्येषु स पर इत्यस्य ग्रहणम् । इत्यादि व्याख्यानमत्राभिमतमिति शेषः । अत्र प्रमाणमाह ॥ गम्येज्येति । हरिरेव पर इत्यन्वयः ॥ ततश्चायं श्लोकार्थः ॥ वेदा हिरण्यगर्भ इत्याद्या नारायण एव परः प्रतिपाद्येषु मुख्यो येषां ते तथोक्ताः । तथा चोदाहृता वेदा मुख्यतो नारायणमेव प्रतिपादयन्ति । अमुख्यवृत्त्येतरानतो न तद्विरोधो नापि देवाद्यसिद्धिरिति भावः । एतदेवोपपादयति ॥ देवा सति । देवा वेदप्रतिपाद्या नारायणाङ्गेभ्यो जाताः श्रूयन्तेऽतोऽमुख्या इति शेषः । वेदप्रतिपाद्या भूरादयस्त्रिलोका अपि नारायणपरा नारायणापेक्षयाऽमुख्याः । यतस्तेऽपि नारायणाङ्गजाः । उक्तसमन्वयसिद्ध्ये वेदप्रतिपाद्यं यज्ञादिकमप्यमुख्यमित्युपपादयति । मखा यज्ञा अपि नारायणपरा नारायण एवेज्येषु परो येषां ते तथोक्ताः ॥ १५ ॥

नारायणपरो योगो नारायणपरं तपः ।
नारायणपरं ज्ञानं नारायणपरा गतिः ॥ १६ ॥

प्रकाशिका— योगोऽष्टाङ्गोपेतो नारायण एव योज्येषु परो यस्य स तथा । एवं तपो नारायण एव परः स्वपूज्येषूत्तमो यस्य तत्तथा । ज्ञानं नारायण एव परं मुख्यं ज्ञेयं यस्य तत्तथा । गतिर्गम्यं नारायण एव परो मुख्यो यस्याः सा तथा । अनेन मखादिगत्यन्तप्रतिपादकवेदस्य नारायण एव समन्वयप्रकारो दर्शित इति ध्येयम् ॥ १६ ॥

तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः ।
सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः ॥ १७ ॥

प्रकाशिका— ननु भवतः कर्तृत्वाभावे ब्रह्मैव कर्तेति पौराणिकीप्रसिद्धिः कथमित्यत आह ॥ तस्यापीति । अवाप्तसमस्तकामतया स्वप्रयोजनशून्यस्यापीत्यर्थः । द्रष्टुः । कार्यकारणादेरिति शेषः । ईशस्य तत्तद्वस्तुप्रेरकस्याथाऽपि निर्विकारस्याखिलात्मनोऽखिलान्तर्यामिणः । तृतीयार्थे षष्ठी । तेन सृज्यमेव स्रष्टुं योग्यतामापादितमेव । सर्जनोन्मुखीकृतमेवेति यावत् । तेन सृष्टोऽहमीक्षया कृपाकटाक्षेणाभिचोदितः प्रेरित एव सन्सृजामि । कार्यकारणादिकं सृष्ट्वा तत्प्रविश्य स्वयमविकार एव तत्परिणामादिशक्तिं प्रेरयित्वा यत्सृज्यं करोति तदेव तेनान्तर्बहिश्च प्रेरितः सन् अहं करोम्यतः पुराणेषु मम कर्तृताप्रसिद्धिरिति भावः ॥ १७ ॥

सत्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः ।
स्थितिसर्गनिरोधेषु गृहीता मायया विभोः ॥ १८ ॥

तात्पर्यम्— युगपत्क्रमशोऽपि वेत्यस्य परिहारः 'सत्वं रजस्तम' इति । 'नित्यं गृहीताः सत्वाद्याः स्थित्यादिषु विशेषतः । युगपत्क्रमशश्चैव गृह्णाति भगवान्स्वयमि'ति ब्रह्मवैवर्ते ॥१८ ॥

प्रकाशिका— एवं नारदेनाक्षिप्तं स्वकर्तृत्वं प्रतिषिध्य भगवत एव कर्तृत्वमुपपादितम् । इदानीं सत्त्वंरजस्तम इत्यादिना प्रकृतासङ्गतं किमुच्यत इत्याशङ्कायां तस्य सङ्गतिमाह ॥ युगपत्क्रमशोऽपीति । न चायं प्रश्नो राज्ञैव कृतो न नारदेनेति वाच्यम् । नारदायेति पृच्छत इत्यत्र राजकृतप्रश्नप्रकारेणैव नारदेनापि प्रश्नः कृत इति सूचितत्वात् । तथा च युगपत्क्रमशोऽपि वेत्यस्य प्रश्नस्य परिहारो यथा स्यात्तथा प्रागुक्तं भगवतः कर्तृत्वं विशदयतीत्यर्थः । प्रश्नपरिहारप्रकारं

प्रमाणेनैव दर्शयति ॥ नित्यं गृहीता इति । यद्यपि नित्यं गृहीतास्तथाऽपीत्यर्थः । स्थित्यादिषु स्थित्याद्यर्थं विशेषतः स्वस्वकार्यकरणक्षमत्वेन । स्वयमेवेति ब्रह्मरुद्रयो रजस्तमसोर्ग्रहणं व्यावर्तयति । इदानीं युगपत्केषाञ्चित्सृष्टिसमय एव केषाञ्चित्स्थितेरन्येषां लयम्य च दर्शनात् । आदिसृष्टिं महाप्रलयम् । तदन्तरां स्थितिं चापेक्ष्य क्रमश इत्यभिप्रेत्य युगपत्क्रमशश्चेत्युक्तम् । ततश्च निर्गुणस्य सत्त्वादिगुणकृतविकारशून्यस्य सत्त्वादिग्रहणेऽपि जीववन्न तत्कृतविकारोऽस्यास्तीति दर्शयितुमिदमुक्तम् । तृतीया षष्ठ्यर्थे । निर्गुणेन विभुनेत्यर्थः । मायया स्वेच्छया नित्यं गृहीता अपि स्थितिसर्गनिरोधार्थं विशेषतो युगपत्क्रमशश्च गृहीता इत्यध्याहारेण मूलं योज्यमिति भावः ॥ १८ ॥

कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः ।
बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥ १९ ॥

तात्पर्यम्— 'ज्ञानेन्द्रियैश्च मनसा सत्वं बध्नाति पूरुषम् । रजः कर्मेन्द्रियैर्नित्यं शरीरेण तमस्तथा ॥ आन्तरं यत्तु कर्तृत्वं तत्सत्वेनाभिमन्यते । रजसा त्वभिमन्येत करणैः कर्मकारणैः ॥ शारीरं वेदनाद्यं तु तमसा ह्यभिमन्यते । अकर्ता करणैर्हीनः शरीरेण विवर्जितः ॥ नित्यज्ञातस्वरूपोऽसौ गुणैरेवाभिमन्यते । एवं जीवः परेणैव प्रेरितः संसृतिं व्रजेत् । न परः संसृतिं कापि स्वातन्त्र्याधिकत्वतः॥ एवं जीवपरौ भिन्नौ किमन्यच्छ्रोतुमिच्छसी'ति पाद्मे ॥ मायिनं ज्ञानिनं स्वतः ॥१९॥

प्रकाशिका— नन्वीश्वर एव सत्त्वादिगुणरूपोपाधिभिर्जीवभावमापद्यते । तयोर्भेदे मानाभावादतः कथं निर्गुणस्येत्याद्युक्तमित्याशङ्कायामीश्वरस्य जीवाद्भेदं साधयितुं तावद्गुणैर्जीवबन्धकत्वरूपं माहात्म्यमाह ॥ कार्यकारणेति । इमं श्लोकमप्रतीतेः प्रमाणेनैव व्याचष्टे ॥ ज्ञानेन्द्रियैरिति । अनेन ज्ञानशब्देन मनःसहितानि ज्ञानेन्द्रियाणि ग्राह्याणि क्रियाशब्देन कर्मेन्द्रियाणि द्रव्यशब्देन शरीरमित्युक्तं भवति ॥ बध्नातीति । कर्तृत्वाभिमानवन्तं करोतीत्यर्थः । कस्मिन्विषये बध्नातीत्यपेक्षायां मूले कार्यकारणकर्तृत्व इत्युक्तं तद्व्याख्याति ॥ आन्तरमिति । अत्र सत्त्वादयः स्थूला एव विवक्षिताः सूक्ष्माणां मोचकत्वेन बन्धकत्त्वाभावात् । आन्तरं मनोगतसुखानुभवलक्षणक्रियासम्बन्धिकर्तृत्वं सुखभोक्तृत्वरूपमभिमन्यते । तत्र मदीयत्वाभिमानं करोतीत्यर्थः । अनेन कारणकर्तृत्व इत्येतदुक्तार्थं भवति । कारणैर्ज्ञानेन्द्रियैर्विषयसाक्षात्कारद्वारा यत्सुखभोक्तृत्वरूपं कर्तृत्वं तद्विषय इति व्याख्यानस्य सूचनात् । कारणकर्तृत्व इत्येतदेव रजःकृतबन्धविषयप्रदर्शनपरतयाऽपि व्याचष्टे ॥ रजसेति । कारणेन्द्रियैः । क्रियाकर्तृत्व इति शेषः । अभिमन्येताभिमन्यते । तथा च करणैः कर्मेन्द्रियैः करणैर्यद्वचनादिरूपबाह्योन्द्रियक्रियाकर्तृत्वं तद्विषय इति मूलं योजितमिति ज्ञातव्यम् । द्वन्द्वान्ते श्रूयमाणं कर्तृत्वपदं कार्यपदेनापि सम्बध्यते इत्यभिप्रेत्य कार्यकर्तृत्व

इत्येतद्व्याचष्टे ॥ शारीरमिति । कार्यपरव्याख्यानं शारीरमिति ॥ वेदनाद्यमिति । अनेन तज्जनितदु:खं लक्ष्यते । अत्र वेदना नाम वातधातुविक्रियादिजनिता उदरादिशूला । आदिपदेन पित्तादिधातुविक्रियाजनितं शिरोभ्रमणादिकं ग्राह्यम् । तथा च कार्यसम्बन्धिवेदनाजनितं दु:खं तत्कर्तृत्वे तद्भोक्तृत्वविषय इति मूलं योजितमिति ज्ञातव्यम् । नन्वयं त्रिविधोऽपि बन्धो जीवस्य गुणकृतः कुतोऽङ्गीकार्यः । तत्स्वभाव एव किं न स्यादित्यत आह ॥ अकर्तेति । अकर्ता स्वभावत उक्तस्वरूपेण कर्ता नेत्यर्थः । करणैर्जडेन्द्रियैः । शरीरेण जडेनेति शेषः । अनेन नित्यदा मुक्तमित्येतदुक्ततात्पर्यम् । तर्हि तत्स्वरूपं कीदृशमित्यत आह ॥ नित्येति । इदमुपलक्षणम् । नित्यक्रियास्वरूपोऽभिमानमन्तरेण कर्ता ज्ञानात्मकदेहेन्द्रियादियुक्त इत्यपि ग्राह्यम् । अनेन मायिनं पुरुषमित्येतदुक्ततात्पर्यमिति ज्ञातव्यम् । यत एतादृशोऽतो गुणैरेवाभिमन्यत इत्यर्थः । ननु गुणानामचेतनानां कथं स्वातन्त्र्येण बन्धकत्वमित्यत आह ॥ एवमिति । प्रेरित एवेत्यन्वयः । परमात्मनोऽपि बन्धोऽस्ति किं, नेत्याह ॥ नेति । क्वापि देशे काले । स्वातन्त्र्यमेव कुत इत्यत आह ॥ अधिकत्वतःसर्वोत्तमत्वादिति । अनेन सर्वेषां मम चेश्वर इत्येतस्य तात्पर्यमुक्तमिति ध्येयम् । परमसाध्यं दर्शयन्नुपसंहरति ॥ एवमिति । बद्धत्वबन्धकत्वरूपविरुद्धधर्माधिकरणत्वेनेत्यर्थः । मायिनमित्येतन्नित्यज्ञानस्वरूप इति प्रमाणेन व्याख्यातम् । तत्तेन कथं लब्धमित्यतस्तदनूद्य व्याख्याति ॥ मायिनमिति । माया वयुनं ज्ञानमिति ज्ञाननामसु पाठादित्याशयः ॥ स्वत इति । जडशरीरेन्द्रियादिकं विनेत्यर्थः । तथा चैतादृशस्यापि ज्ञानित्वं यत्तत्स्वरूपभूतज्ञानेनैवेति सिद्ध्यतीति भावः ॥ १९ ॥

स एष भगवाँल्लिङ्गैस्त्रिभिरेतैरधोक्षजः ।
स्वलक्षितगतिर्ब्रह्मन्सर्वेषां मम चेश्वरः ॥ २० ॥

तात्पर्यम्— लिङ्गैर्ज्ञापकैः । त्रिगुणैः । एतैर्लिङ्गैः । स्वप्रसादाज्जीवेन लक्षितगतिः । 'स्वप्रसादादिमं जीवः पश्येत्तेन स्वलक्षित' इति षाड्गुण्ये ॥ २० ॥

प्रकाशिका— एवमीश्वरस्य गुणैर्जीवबन्धकत्वमुक्त्वा इदानीं भेददार्ढ्याय तैरेव तन्मोचकत्वमपि वदन्परमसाध्यं दर्शयति ॥ स एष इति । अत्र लिङ्गैरनुमापकैरित्याद्यन्यथाप्रतीतिवारणाय तद्व्याचष्टे ॥ लिङ्गैर्ज्ञापकैरिति । त्रिभिरेतैरित्यनेन परामृश्यं दर्शयति ॥ त्रिगुणैरिति । ज्ञापकत्वमुपपादयन् स्वलक्षितगतिरित्येतत् सुष्ठु अलक्षितस्वरूप इत्यन्यथाव्याख्यानिरासाय व्याचष्टे ॥ एतैर्लिङ्गैरिति । जीवेनेति योग्यताबललब्धमुक्तम् । लक्षितगतिर्दृष्ट स्वरूपः । एते च सत्त्वादयः सूक्ष्मा एव विवक्षिताः । तेषामेव मोचकत्वस्य श्रुत्यादिसिद्धत्वात् । अत्र प्रमाणमाह ॥ स्वप्रसादादिति । यत

इति शेषः । स्वलक्षित इत्युच्यते । भगवानितिशेषः । ततश्चायं श्लोकद्वयर्थः ॥ पुरुषमिति जातावेकवचनम् । गुणाः सत्त्वाद्याः हरिप्रेरिता इति शेषः । कार्यकारणकर्तृत्वे उक्तरीत्या कार्यकर्तृत्वे कारणकर्तृत्वे च विषये नित्यदा मुक्तं स्वतो जडेन्द्रियरहितम् । मायिनं नित्यदा ज्ञानवन्तं पुरुषं चिद्रूपदेहवन्तं जीवजातं बध्नन्ति । अभिमानेनेति शेषः । अत्रायं विवेकः । सत्त्वगुणो ज्ञानपदोदितज्ञानेन्द्रियाण्याश्रित्य करणैर्ज्ञानेन्द्रियैर्यत्कर्तृत्वं तत्तद्विषयसाक्षात्कारजन्यसुखभोक्तृत्वरूपं तस्मिन्विषये बध्नाति । मदीयमित्यभिमानं जनयतीत्यर्थः । रजोगुणः क्रियापदोदितकर्मेन्द्रियाण्याश्रित्य कारणैः कर्मेन्द्रियैर्यद्वचनादिरूपबाह्यक्रियाकर्तृत्वं तद्विषये बध्नाति । तमोगुणोऽपि द्रव्यपदोदितशरीरमाश्रित्य कार्यकर्तृत्वे शारीरवेदनादिजन्यदुःखभोक्तृत्वरूपे तद्विषये बध्नातीति । स येन स्वरोचिषेत्यादिना मत्स्वामितयोक्त एषो जीवबन्धकतयोक्तो भगवान् एतैर्बन्धकतया पूर्वमुक्तैस्त्रिभिः सूक्ष्मैः सत्त्वादिगुणैर्लिङ्गैः सूक्ष्मरूपेण स्वज्ञापकैरधःकृताक्षजोऽपि जीवप्रयत्नाद्दृष्टुमयोग्योऽपीति यावत् । स्वेन स्वप्रसादेन जीवेन लक्षिता दृष्टा गतिः स्वरूपं यस्य सः । भवतीति शेषः । अत्राप्ययं विवेकः । जीवमोचनाय हरिणा प्रेरितः सूक्ष्मसत्त्वगुणो ज्ञानेन्द्रियषट्कमाश्रित्य हरिविषयकश्रवणादिरूपज्ञानजनको भवति सूक्ष्मो रजोगुणः कर्मेन्द्रियाण्याश्रित्य हरिप्रीत्यर्थानि कर्माणि कारयन् अन्तःकरणशुद्धिद्वारा हरिज्ञानजनको भवति । सूक्ष्मतमोगुणोऽपि शरीरमाश्रित्य हरिप्रीतिजनकोपवासादितपोजनितवेदानादिकमुत्पादयन् हरिज्ञानसाधको भवतीति । यत एवं बन्धको मोचकश्चातो भगवान्सर्वजीवेभ्यो भिन्नस्तेषामीश्वरश्च । स्वस्य सर्वान्तर्भावेऽपि नारदस्य शङ्कापरिहाराय मम चेति विशिष्योक्तमिति ॥ २० ॥

कालं कर्म स्वभावञ्च मायेशो मायया स्वया ।
आत्मन्यदृच्छया प्राप्तं विबुभूषुरुपाददे ॥ २१ ॥

तात्पर्यम्— स्वया मायया स्वशक्त्या । 'यत्रान्यहेत्वभावः स्यादीश्वरेच्छादिना विना । तदिच्छा हि यदृच्छा स्यादतस्तत्र यदृच्छये'ति ब्रह्मतर्के । 'कालकर्मस्वभावादि नित्ययेशेच्छया सदा । प्राप्तमेव विशेषेण सृष्ट्यादावुन्नयत्यज' इति च ॥ विबुभूषुः बहुधा बुभूषुः । 'ईशो बह्वीः पुरः सृष्ट्वा तत्रैव बहुरूपताम् । तत्तन्नियामकतया प्राप्तुं कालाद्युपाददं' इति च ॥ २१ ॥

प्रकाशिका— एवमीश्वरस्य सगुणजीवापेक्षया भिन्नत्वान्निर्गुणत्वं युक्तमित्युपपाद्येदानीं तस्मात्सृष्टिं वक्तुम्, ननु भगवान्सृष्टौ कालकर्मादिरूपं कारणान्तरमपेक्षते न वा । आद्ये स्वातन्त्र्यहानिः । द्वितीये कालकर्मादीनां सृष्टिकारणप्रतिपादकश्रुत्यादिविरोध इत्याशङ्कां तावदपाकरोति ॥ कालमिति । अत्र माययेत्यनिर्वाच्याविद्ययेत्यन्यथाप्रतीतिवारणायान्वयं दर्शयन्व्याचष्टे ॥

स्वयेति । स्वशक्त्येत्यनेनं स्वयेत्येतत् स्वीययेति व्याख्यातमिति द्रष्टव्यम् । यदृच्छयेत्येतदकस्मादिति प्रतीतिवारणाय प्रमाणेनैव व्याचष्टे ॥ यत्रान्येति । ईश्वरेच्छादिनेत्यत्रादि पदेन तज्ज्ञानादेर्ग्रहणम् । यत्र कार्येऽन्यहेत्वभावः । दृष्टकारणाभावः । तत्र कार्ये यदृच्छयेदं जातमिति प्रयुज्यत इत्यर्थः । कुतो यस्मात्तदिच्छादृष्टकारणाभावेऽपि जायमानकार्यविषयकेश्वरेच्छा यदृच्छा शब्दवाच्या हि प्रमाण-प्रसिद्धा । अत इत्यर्थः । आत्मनि यदृच्छया प्राप्तं कालादिकमुपादद इत्यनेन पूर्वं कालादिकं नास्तीति प्रतीयतेऽतः प्रमाणेनैव तदभिप्रायमाह ॥ कालेति । आदिपदेन प्रकृतेर्ग्रहणम् । अनेन मूले चशब्दार्थो दर्शितः । यदृच्छयेत्यस्य व्याख्यानम् ॥ ईशेच्छयेति । स्वयेत्यस्य स्वरूपभूत-येत्यर्थकस्यात्रापि सम्बन्धमभिप्रेत्य नित्ययेत्युक्तम् । विशेषेण सृष्ट्यादावुन्मुखतयोन्नेयति प्रेरय-तीत्यर्थः । पालनादावपि कालकर्माद्युपादानवचनस्यायमेवाभिप्राय इति सूचयितुं सृष्ट्यादावित्युक्तम् । पूर्वं कालादिनियामकतया भगवतो विद्यमानतयोपादनायाज इत्युक्तम् । विबुभूषुरित्यत्र विशब्दस्य निषेधार्थत्वप्रतीतिनिवारणाय व्याचष्टे ॥ विभुभूषुरिति । बहुधेत्यनेन विशब्दो विविधार्थ इत्युक्तं भवति । तथा च विविधरूपतया भवितुमिच्छुरिति मूलार्थ इत्याशयः । ननु यदि भगवान् भवितु-मिच्छति तर्हि किं महदादिसृष्ट्यर्थं कालादिग्रहणेन मत्स्यादिवद्वहुरेव बहुधा भवनसम्भवादि-त्याशङ्कायां नात्र मत्स्यादिवद्बहिधा भवनं विवक्षितं किन्तु तत्तत्कार्यनियामकतयान्तर्या-मिरूपेणैवेत्यभिप्रेत्यात्र समाख्यामाह ॥ ईश इति । पुरो ब्रह्मादिशरीराणि तत्रैव शरीरेष्वेव न बहिरित्यर्थः ॥ ततश्चायं श्लोकार्थः ॥ मायेशो वासुदेवो विबुभूषुरुक्तरीत्या विविधभवनेच्छुः । अनादित एवात्मन् आत्मन्यात्माधारतया यदृच्छया केवलेश्वरेच्छया प्राप्तमेव कालं सृष्टिकालं कर्म जीवानां नानाविधमदृष्टं स्वभावं तत्तत्कारणस्वभावम् । च शब्दात्प्रकृतिम् । स्वमायया स्वशक्त्या । विशेषत उपाददे । तेषु प्रविश्य सृष्ट्यर्थं प्रेरयामासेत्यर्थः । तथा च श्रुत्यादिप्रसिद्धानि अनादित एव स्वाधारतया स्थितानि यानि कालादिकारणानि तानि स्वेच्छयैवोपादाय सृष्टावुन्मुखीचकारातो न कालाद्युपादानेऽपि स्वातन्त्र्यहानिरिति भावः ॥ २१ ॥

कालाद्गुणव्यतिकरात्परिणामस्वभावतः ।
कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ॥ २२ ॥

तात्पर्यम्— प्रकृतेः परिणामस्वभावतः । 'गुणकालस्वभावेभ्य ईशेनाधिष्ठितत्वतः । जग-दादि महत्तत्त्वमभूत्तस्येच्छया हरेरि'ति षाड्गुण्ये ॥ २२ ॥

प्रकाशिका— इदानीं तस्मान्महत्तत्त्वसृष्टिमाह ॥ कालादिति । अत्र परिणामस्वभाव इत्येतद्बहुव्रीहितया कालस्य कर्मणो वा विशेषणमिति भाति । न च तद्युज्यते । तटस्थतया

तयोर्निमित्ततास्वभावत्वादतः कर्मधारयोऽयमित्याशयेन प्रकृतेरित्यध्याहृत्य योजयति ।। प्रकृतेरिति । परिणामरूपस्वभावादित्यर्थः । इदमुपलक्षणम् । कालस्य कर्मणश्च तटस्थतया निमित्ततास्वभावादित्यपि द्रष्टव्यम् । पुरुषाधिष्ठितादित्येतद्धेतुगर्भम् स तु कालादित्यादौ सर्वत्र सम्बध्यत इत्याशयेन तत्र प्रमाणमाह ।। गुणकालेति । गुणेत्यनेन गुणव्यतिकरादित्युक्तगुणग्रहणम् । अत्र कर्मापि ग्राह्यम् । अधिष्ठत्वतो नियामकतयाऽन्तराश्रितत्वादित्यर्थः । जगदादि जगत्कारणम् । न केवलमुपादाननिमित्तान्तर्नियामकतयैव हरेः कारणत्वं किन्तु कुलालादिवद्बहिः स्थितस्य कर्तृतयाऽपीत्याशयेनोक्तम् ।। तस्य हरेरिच्छयेति ।। ततश्चायं श्लोकार्थः ।। गुणव्यतिकाराद्गुणानां सत्त्वादीनां व्यतिकरो वैषम्यं तस्मात् । तृतीये वक्ष्यमाणरीत्या वैषम्यावस्थापन्नगुणेभ्य इति यावत् । प्रकृतेः परिणामस्वभावात्कालादेर्निमित्ततास्वभावाच्च कर्मणश्चतुर्मुखजनकादृष्टात् । महतो महत्तत्त्वस्य जन्म जननम् । नन्वचेतनस्य कालादेः स्वतः प्रवृत्त्यनुपपत्तेः कथं जनकत्वमित्यत उक्तम् ।। पुरुषेति । कालादीनां चतुर्णामपीदं विशेषणम् । कालादिस्वभावस्यापि पृथक् कारणत्वं गुणकालस्वभावेभ्य इति प्रमाणानुसारेणोक्तमिति मन्तव्यमिति ।। २२ ।।

महतस्तु विकुर्वाणाद्रजस्सत्वोपबृंहितात् ।
तमः प्राधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः ।। २३ ।।

तात्पर्यम्— 'भूतानि द्रव्यनामानि ज्ञानं ज्ञानेन्द्रियाण्यपि । क्रियां कर्मेन्द्रियाण्याहुस्तन्मूलत्वादहं त्रिधे'ति गारुडे ।। २३ ।।

प्रकाशिका— अहङ्करोति कथं महतस्त्वित्यत्र तु शब्दसूचितमहत्त्वे विशेषं दर्शयति ।। रजःसत्त्वोपबृंहितादिति । सत्त्वोपबृंहितरजःपूर्णादित्यर्थः । एतच्च स्पष्टयिष्य तृतीये इत्याचार्यः । तमःप्रधानस्त्वित्यत्र तुशब्दो महत्तत्त्वमपेक्ष्यैव तमःप्रधानत्वं नेतरापेक्षयेति विशेषं दर्शयितुमत्र तमसः प्राधान्यं नाम कदाचित्सत्वकार्यप्रतिरोधकत्वमेव न समानाधिकरणसत्त्वापेक्षयाऽऽधिक्यं वक्ष्यमाणविरोधात् । महत्तत्त्वे त्वितोऽधिकतमःसत्वेऽपि तस्य कदाऽपि सत्त्वकार्याप्रतिरोधकत्वात् । तन्न तमःप्रधानमित्युच्यत इति द्रष्टव्यम् । तमःप्रधानकत्वमुक्तरूपेणौपचारिकमेव न मुख्यम् । तथात्वेऽहङ्कारस्य सत्त्वादिकार्यज्ञानकर्मेन्द्रियाद्यात्मकत्वासम्भवादित्याशयेनाह ।। द्रव्येति । एतदर्थमेव रजःसत्त्वोपबृंहितादिति । एतदुपादाने महत्तत्त्वे विशेषणम् । अत्र विवक्षितान्द्रव्यादिपदार्थान्प्रमाणेनैव दर्शयति ।। भूतानीति । भूतानि पञ्चभूतानि ज्ञानं ज्ञाननामानि क्रिया क्रियानामानि । नन्वेवं मूलेऽहङ्कारस्य कथं द्रव्याद्यात्मकत्वोक्तिरित्यतस्तदुपपादयति ।। तन्मूलत्वादिति । तेषां त्रयाणामुपादानत्वादहङ्कारस्त्रिधा त्रिप्रकारात्मक उच्यत इत्यर्थः ।। २३ ।।

सोऽहङ्कार इति प्रोक्ता विकुर्वन्समभूत्त्रिधा ।
वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ।
द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभोः ॥ २४ ॥

तात्पर्यम्— विशिष्टकार्यशक्तित्वाद्देवा वैकारिकाः स्मृताः ॥ अतिजाज्वल्यमानत्वात्तैजसानीन्द्रियाण्यपि । तामसानि तु भूतानि यतस्तावन्न तूभयमि'ति पाद्मे । ज्ञानेन्द्रियाणां देवानां ज्ञानशक्तिरुदीरिता । क्रिया कर्मेन्द्रियाणां च भूतानां द्रव्यशक्तिते'ति स्कान्दे । 'द्रव्यं तु द्रवणप्राप्यं द्वयोर्विवदमानयोः । पूर्वं वेगाभिसम्बन्धादाकाशस्तु प्रदेशत' इति प्रकाशसंहितायाम् ॥ २४ ॥

प्रकाशिका— कौसौपदार्थ इति तत्राह सोऽहंकार इति तद्विभागमाह ॥ विकुर्वन्निति । इति त्रिधा समभूदित्यन्वयः । अहङ्कारप्रभेदेषु वैकारिकादिशब्दाः कथं प्रवर्तन्त इत्यपेक्षायां तत्प्रदर्शनाय तत्कार्याणां देवादीनां वैकारिकादि शब्दवाच्यत्वं तावत्प्रमाणेनैवोपपादयति ॥ विशिष्टेति । विशिष्टं कार्यं ज्ञानकर्मरूपं तज्जनकशक्तिमत्वादित्यर्थः । देवा दशेन्द्रियाभिमानिनः । वैकारिका वैकारिकशब्दवाच्याः । तैजसानि तैजसशब्दवाच्यानि । अपि शब्दोऽनुक्तप्राणबुद्धिसङ्ग्रहार्थः । तामसानि तामस शब्दवाच्यानि । तुशब्द इतरापेक्षया विशेषेण तामसद्योतनार्थः ॥ उभयमिति । विशिष्टकार्यशक्तित्वमतिजाज्वल्यमानत्वं चेत्युभयं भूतानां तावन्न तु नैवेत्यनेनाल्पमस्तीति सूचयति । अत इति शेषः । एवं च कार्याणां देवादीनां वाचका वैकारिकादि शब्दास्तत्कारणेष्वहङ्कारप्रभेदेषूपचारेणैव प्रवर्तन्त इत्याशयः । वैकारिकादीनां त्रयाणां व्युत्क्रमेण लक्षणान्याह ॥ यद्भिदेति । यदित्यव्ययं यस्येत्यर्थः । वस्तुस्वरूपप्राधान्यक्रमेणोद्देशः । बन्धकत्वप्राधान्यक्रमेण लक्षणोक्तिरिति ज्ञातव्यम् । अत्र वैकारिकादीनां त्रयाणां यथाक्रममेव लक्षणत्वेनोच्यत्रयं न इति प्रतीतिवारणाय का शक्तिः कस्य लक्षणमिति जिज्ञासायां प्रमाणेनैव तद्दर्शयति ॥ ज्ञानेन्द्रियाणामिति । देवानां चेति शेषः । ज्ञानशक्तिर्ज्ञानजनकत्वशक्तिः । क्रिया क्रियाजनकत्वशक्तिः । चशब्दो देवादीनां चेत्यस्यानुकर्षणार्थः । अनेन ज्ञानेषु ज्ञानेन्द्रियेषु तद्देवेषु च विद्यमाना शक्तिर्यस्मात्सा ज्ञानशक्तिः । क्रियासु कर्मेन्द्रियेषु तद्देवेषु च विद्यमानशक्तिर्यस्मात्सा क्रियाशक्तिर्द्रव्येषु भूतेषु तद्देवेषु च विद्यमाना शक्तिर्यस्मात्सा द्रव्यशक्तिरिति मूले जनकतासम्बन्धेन शक्तित्रयं वैकारिकादीनां लक्षणमुक्तं भवतीति ज्ञातव्यम् । तथा च जगद्बन्धकतया प्रभोर्यस्य वैकारिकादिभेदेन विभक्तस्य इति शक्तित्रयस्यापादकत्वं भिदा भेदकम् । लक्षणमिति यावत् । सौऽहङ्कार इति प्रोक्त इत्यन्वयो द्रष्टव्यः ॥ ज्ञानशक्तिरित्यादिवन्न द्रव्यशक्तिरित्येतद्व्याख्यातुं शक्यम् । द्रव्यपदेन पूर्वं भूतानामेवोक्तत्वेन भूतानां

भूतजनकशक्त्यसम्भवात् । अतोऽत्र विवक्षितां द्रव्यशक्तिं प्रमाणेनैव दर्शयति ॥ द्रव्यं त्विति । द्रवणेन धावनेन प्राप्यं प्राप्तुं योग्यम् । अहमेवेदं पूर्वं प्राप्नुयामिति पूर्वप्राप्तिविषये विवदमानयोर्मध्ये यत्कुड्यादिकं वेगादिसम्बन्धाद्वेगवत्त्वेन पूर्वमेकस्य द्रवणेन प्राप्यं तत्कुड्यादिकं द्रव्यमित्युच्युत इत्यर्थः । तथा च द्रवणप्राप्तियोग्यत्वमेव द्रव्यगता शक्तिरित्युक्तं भवति । नन्विदं ब्रह्माण्डान्तर्गतेषु पृथिवीजलतेजोवाय्वाकाशविशेषेषु सम्भवति । तेषां द्रवणेन प्राप्तिदर्शनात् । ब्रह्माण्डबाह्येषु भूतेषु कथम् । तत्राकस्यापि द्रवणाभावेन तत्प्राप्यत्वासम्भवादिति चेत् । सत्यम् । द्रवणे सति प्राप्तियोग्यतायास्तत्रापि सत्त्वात् । अत एव द्रवणप्राप्तिमित्युक्तम् । नन्वव्याकृताकाशमपि क्वचिद्द्रव्यशक्तिमत्तयोच्यते । तत्रेदं न सम्भवति । तस्यापरिच्छिन्नतया द्रवणप्राप्ययोग्यताया अप्यभावादित्यत आह ॥ आकाशस्त्विति । तुशब्दो भूताकाशव्यावृत्त्यर्थः । प्रदेशतः प्रदेशमपेक्ष्य । द्रवणप्राप्य इति शेषः । अतस्तत्रापि द्रव्यशक्तिवचनमुपपन्नमिति भावः ॥ २४ ॥

तामसादपि भूतादेर्विकुर्वाणादभून्नभः ।
तस्य मात्रागुणः शब्दो लिङ्गं यद्द्रष्टृदृश्ययोः ॥ २५ ॥

तात्पर्यम्— 'पञ्चेन्द्रियाभिमेयत्वान्मात्रा गुण इतीरित' इति मात्स्ये । 'शब्देनैव परो द्रष्टा ज्ञायते जगदेव चे'ति विष्णुसंहितायाम् ॥ २५ ॥

प्रकाशिका— तत्र तावत्तामसाहङ्काराद्भूतोत्पत्तिप्रकारमाह ॥ तामसादपीति । भूतादेर्भूतानाम् । मूलकारणादिति हेतुगर्भविशेषणम् । अपिशब्दस्य शब्द इत्यनेन सम्बन्धः । तथा च शब्दोऽप्यभूदित्यर्थः ॥ कथंभूतः शब्दः । तस्याकाशस्य मात्रागुणाः । अत्रासाधारण्येन विवक्षितं मात्रागुणशब्दार्थं प्रमाणेनैव दर्शयति ॥ पञ्चेति । पञ्चेन्द्रियाभिमेयगुणत्वादित्यर्थः । ततश्च मात्रा शब्दः कर्मव्युत्पत्त्या मेयार्थः । पञ्चेन्द्रियेति योग्यतया लभ्यते । मेयेत्यनन्तरं गुणेति पूरणीयमिति भावः । त्वगादिवेद्येषु स्पर्शादिगुणेषु मूलकारणतया शब्दस्यानुस्यूतत्वेन स्पर्शाद्यभेदे त्वगादिवेद्यत्वस्यापि सम्भवात्पञ्चेन्द्रियाभिमेयत्वं तस्योपपन्नमिति ध्येयम् । यद्वा । त्वगिन्द्रियादिवेद्यत्वं स्पर्शादीनां मात्राशब्दवाच्यत्वे निमित्तं दर्शयितुं पञ्चेन्द्रियाभिमेयत्वादित्युक्तमिति ज्ञेयम् । शब्दस्य द्रष्टृदृश्यलिङ्गत्वं मूले उक्तम् । तत्र को द्रष्टा किं दृश्यं किञ्च तल्लिङ्गत्वमित्यतस्तत्सर्वं प्रमाणेनैव दर्शयति ॥ शब्देनैवेति । पर उत्तमो द्रष्टा भगवानित्यर्थः । दृश्यशब्दार्थकथनम् ॥ जगदिति । ज्ञायत एवेति सम्बन्धः । अनेन परापरतत्वज्ञापकत्वमेवात्र लिङ्गत्वमित्युक्तं भवति । तत्राकाशगुणस्य ध्वन्यात्मकशब्दस्य वर्णव्यञ्जकतयैव ज्ञापकत्वं न वर्णवत्प्रतिपादकत्वरूपमिति ध्येयम् । तथा च द्रष्टृदृश्ययोर्लिङ्गं शब्द इति योज्यम् । अत्र तामसाहङ्काराद्गुणस्य शब्दस्य पूर्वमुत्पत्तिः । पश्चात्तेन गुणिन आकाशस्योत्पत्तिरेवमग्रे गुणानामुत्पत्तिः पूर्वं, पश्चाद्गुणिन इति द्रष्टव्यम् ॥ २५ ॥

नभसोऽथ विकुर्वाणादभूत्स्पर्शगुणोऽनिलः ।
परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलम् ॥ २६ ॥

तात्पर्यम्— 'सर्वचेष्टयितृत्वात्तुप्राणोऽभिभवशक्तितः। ओजस्त्वनभिभाव्यत्वात्सहश्च स्वेच्छया कृतेः । बलं विधारकत्वाच्च विधृतिर्वायुरुच्यत' इति भारते ॥ २६ ॥

प्रकाशिका— परान्वयादिति । परस्य पूर्वकालीनस्याकाशस्योपादानतयाऽन्वयादनुगमाद्वायुस्तद्गुणभूतशब्दवां श्चेत्यर्थः । एवमग्रेऽपि व्याख्येयम् ॥ वायोरौत्पत्तिकगुणानाह ॥ प्राण इति । अत्र प्राणो देहधारणमोजःसहोबलानीन्द्रियमनःशरीराणां पटवानि तेषां हेतुरिति व्याख्यानमसदिति भावेन प्रमाणेनैव प्राणादिशब्दान्व्याचष्टे ॥ सर्वेति । अनेन प्रकर्षेणानयति चेष्टयतीति निर्वचनं सूचयति । प्राणशब्दार्थः ॥ सर्वेति । अभिभवो वैरिपराभवस्तज्जनकशक्तिरूपत्वादित्यर्थः । अनभिभाव्यत्वात् शत्रुभिः पराभावयितुमशक्यत्वात् ॥ स्वेच्छयेति । स्वेच्छया कृतिस्वरूपत्वाद्बल शब्दवाच्य इत्यर्थः । अत एव दुर्बलस्य स्वेच्छया करणमसम्भावितमिति भावः । विधारकत्वादित्यनेन मूले उपलक्षणया विधृतिरित्यपि ग्राह्यमिति सूचयति । अत्र भूतं भूताभिमानी चेति न्यायेन मुख्यवायोरप्यनिल शब्देन विवक्षितत्वात्तदभिप्रायेण ते गुणा उक्ताः । तथा चानिलो मुख्यवायुः प्राण ओजः सहोबलरूपश्चेति मूलं व्याख्येयमिति भावः ॥ २६ ॥

वायोरपि विकुर्वाणात्कालकर्मस्वभावतः ।
उदपद्यत तेजो वै रूपवत्स्पर्शशब्दवत् ॥ २७ ॥

तेजसस्तु विकुर्वाणादासीदम्भो रसात्मकम् ।
रूपवत्स्पर्शवच्चाम्भो घोषवच्च तदन्वयात् ॥ २८ ॥

विशेषस्तु विकुर्वाणादम्भसो गन्धवानभूत् ।
परान्वयाद्रसस्पर्शरूपशब्दगुणान्वितः ॥ २९ ॥

वैकारिकान्मनो जज्ञे देवा वैकारिका दश ।
दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रकाः ॥ ३० ॥

तात्पर्यम्— अनाद्यनन्तोऽपि हरिर्वैकारिकगणेष्वजः । अवतीर्णः पदाङ्गुष्ठमध्यास्ते विश्वभुग्विभुः । पाददेवस्तु यज्ञोऽन्यस्तं प्रविश्य हरिः स्वयम् । सर्वं विधारयन्देहे वर्ततेऽनन्तशक्तिधृगि'ति वह्निपुराणे ॥ ३० ॥

प्रकाशिका— घोषवच्छब्दवत् । तदन्वयात्पूर्वपूर्वकारणानामन्वयादनुगमादित्यर्थः । सर्वे गुणाः पृथिव्यां विशिष्यन्त इति विशेषः पृथिवी ॥ वैकारिकान् दश देवान्निर्दिशति ॥ दिगिति । दिक् शब्दवाच्या देवाः श्रोत्राभिमानिनः । वात शब्दवाच्यः प्राणस्त्वगभिमानी । अर्कः सूर्यश्च चक्षुरभिमानी । प्रचेता वरुणो जिह्वाभिमानी । अश्विनौ घ्राणाभिमानिनौ । वह्निर्वागभिमानी । इन्द्रो हस्ताभिमानी । उपेन्द्रो वामनः पादाभिमानी । मित्रः पाय्वभिमानी । को दक्षो मेढ्राभिमानी । इति वक्ष्यमाणदशेन्द्रियाभिमानिनो देवा एवात्र कथ्यन्ते । तत्रोपेन्द्रस्य विष्णुत्वात्कथमिन्द्रियाभिमानिषु गणितमित्यतः तदभिप्रायं प्रमाणेनैव दर्शयति ॥ अनाद्यनन्तोऽपीति । वैकारिकगुणेषु वैकारिकाहंकारकार्यदेहवदिन्द्रियाभिमानि देवगणेषु विश्वभुक् सर्वपालकः । ननु तर्हीन्द्रसूनोर्यज्ञनाम्नः पाददेवतात्वप्रसिद्धिविरोध इत्यत आह ॥ पाददेव इति । अन्यो भगवदपेक्षया यज्ञो रुद्रच्छिन्नयज्ञाभिमानी । तर्ह्युपेन्द्रस्य किं कृत्यं येन सोऽत्र गणेऽवतीर्ण इत्यत आह ॥ तं प्रविश्येति ॥

॥ २७, २८, २९, ३० ॥

तैजसात्तु विकुर्वाणादिन्द्रियाणि दशाभवन् ।
ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणस्तु तैजसः ॥ ३१ ॥

श्रोत्रत्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्राङ्घ्रिपायवः ।
य एतेऽसङ्गताभावा भूतेन्द्रियमनोगुणाः ।
यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम ॥ ३२ ॥

मूले ज्ञानशक्तिर्बुद्धिः क्रियादिशक्तिः प्राण इति विवेकः । तैजसौ तैजसाहङ्कारकार्यौ ॥ इन्द्रियाणां विशेषनामान्याह ॥ श्रोत्रेमिति । दोः पाणिः । मेढ्रो गुह्येन्द्रियम् । क्रमश्च न विवक्षितः ॥ एवं बाह्यतत्त्वसृष्टिमुक्त्वा तेभ्यो ब्रह्माण्डसृष्टिप्रकारमाह ॥ य एत इति । गुणाः शब्दाद्याः सत्त्वाद्याश्च । इदमुपलक्षणम् । महदहङ्कारप्राणबुद्धयोऽपि ग्राह्याः । भावाः पदार्थाः । असङ्गताः परस्परमसंश्लिष्टाः । यदायतनस्य ब्रह्माण्डस्य निर्माणे जनने न शेकुः शक्तिमन्तो नासन् ॥ ३१,३२ ॥

तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः ।
सदसत्वमुपादाय नो भयं ससृजुर्ह्यदः ॥ ३३ ॥

तात्पर्यम्— सदसत्वं व्यक्ताव्यक्तत्वम् । नः भयम् । अदो ब्रह्माण्डम् । ब्रह्माण्डं हि वदन्तीति जीवानां भयकारणम् । तत्र हि संसृतिः । 'आकाशवायूत्वव्यक्ताावितरेऽण्डे प्रकाशिताः । तथात्वाद्बाह्यभूतानामण्डस्यानां च सा गतिरि'ति मात्म्ये ॥ ३३ ॥

प्रकाशिका— तदा भगवतश्चेष्टकरूपेण स्वप्रविष्टस्य हरेः शक्त्या चोदिताः प्रेरिताः सन्तोऽन्योन्यं संहत्य संश्लिष्य सदसत्त्वम् । धर्मिप्रधानो निर्देशः । सदसदुपादायोपादानीकृत्य नो भयमदो ब्रह्माण्डं ससृजुरित्यन्वयः । अत्र सदसत्वं प्रतियोगितयोपादाय नोभयमिति । तदुभयवैलक्षण्यरूपमनिर्वाच्यत्वं ब्रह्माण्डस्योच्यत इति प्रतीतिनिरासास सदसत्वमित्येतदनूद्य व्याचष्टे ॥ सदसत्वमिति । सदेर्गत्यर्थस्य कर्मणि क्विपि कृते सच्छब्दस्य व्यक्तत्वमर्थः इति भावः । नोभयमित्यत्र पदच्छेदं दर्शयति ॥ नः भयमिति । तथा च न उभयमिति पदच्छेदो न विवक्षितः । येनोक्तार्थाप्रतीतिः स्यादिति भावः । अदःशब्दार्थमाह ॥ अद इति । तर्हि ब्रह्माण्डस्य कथं भयत्वमित्यत आह ॥ ब्रह्माण्डं हीति । तथा च भय शब्दो भयकारणपर इति भावः । कुत इत्यत आह ॥ तत्र हीति । संसृतिश्च भयहेतुरिति प्रसिद्धमेवेति भावः । सदसच्छब्दौ व्यक्ताव्यक्तपरावित्युक्तम् । तत्र ब्रह्माण्डोपादानेषु पञ्चभूतेषु व्यक्ताव्यक्तत्वं कथमित्याकांक्षायां प्रमाणेनैव तद्विविच्य दर्शयति ॥ आकाशवायू इति । इतरेऽग्न्याद्यास्त्रयः । प्रकाशिता व्यक्ताः । कुत इत्यत उक्तम् ॥ तथात्वादिति । उक्तरीत्या व्यक्ताव्यक्तत्वादित्यर्थः ॥ सा गतिरिति । व्यक्ताव्यक्तत्वादिरूपा स्थितिरित्यर्थः ॥ ननु महाभारततात्पर्यनिर्णयादौ सुषाव सैवाण्डमधोक्षजस्य शुष्मं हिरण्यात्मकमम्बुमध्य इत्यादिना ब्रह्माण्डस्य विष्णुवीर्यात्मकतयोक्तत्वेनात्र पञ्चभूतोपादानकत्वोक्तौ तद्विरोधः स्यादिति चेन्न । सदसदुपादाय विष्णुवीर्यात्मना परिणाम्यादः ससृजुरिति व्याख्यानात् ॥ ३३ ॥

वर्षपूगसहस्रान्ते तदण्डमुदकेशयम् ।
कालकर्मस्वभावस्थो(ऽ)जीवो(ऽ)जीवमजीजनत् ॥ ३४ ॥

तात्पर्यम्— कालकर्मस्वभावस्थ अजीवः परमेश्वरः । अजीवः स्वात्मानमजीजनत् । तदण्डं यथा स्वात्मानं प्रसूते तथा चकार । 'यः प्राणधारणं प्राणप्रसादात्कुरुतेऽनिशम् । स जीव इति सन्दिष्टस्तदन्योऽजीव उच्यते । यत्प्रसादात्स तु प्राणः कुरुते स्वस्य धारणमि'ति वायुप्रोक्ते ॥ 'कालकर्मस्वभावस्थो वासुदेवः परः पुमान् । अकरोदण्डमुद्बुद्धमात्मप्रसवकारणमि'ति ब्रह्माण्डे ॥ जीव इति वा । 'प्राणं धारयते यस्मात्स जीवः परमेश्वरः । अजीवोऽपि महातेजास्त्वथवा जीवयञ्जगदि'ति स्कान्दे ॥ ३४ ॥

प्रकाशिका— ब्रह्माण्डान्तर्हरेर्विराड्रूपेण व्यक्तिं वक्तुं तत्र तद्देहावस्थानाय ब्रह्माण्डबृंहणप्रकारं तावदाह ॥ वर्षपूगेति । अत्र कश्चन जीवः कञ्चनजीवमजीजनदित्यन्यथाप्रतीतिवारणायोभयत्राकारप्रश्लेषेण छेदं प्रदर्श्य व्याख्याति ॥ कालेति । जीव इत्येव पदच्छेदे इदं विशेषणमनुपपन्नं स्यादिति बाधकप्रदर्शनायास्योदाहरणम् । ननु तदण्डमुदकेशयमित्येतदसङ्गतं भातीत्यतस्तत्सङ्गत्यर्थ-

मपेक्षितमध्याहृत्य तस्य सङ्गतिं दर्शयन्नेव श्लोकतात्पर्यमाह ॥ तदण्डमिति । प्रसूयते वक्ष्यमाण-स्वप्रादुर्भावपरिमितावकाशवद्यथा स्यात् । अत्र यथा प्रसूयतेत्यध्याहारः । अजीवमित्यस्यार्थप्रदर्शनम् ॥ स्वात्मानमिति । अजीजनदित्यस्य तात्पर्यकथनम् ॥ चकारेति । भगवत्यजीवशब्दं प्रमाणेनैव व्याख्याति ॥ यः प्राणेति । प्राणप्रसादान्मुख्यप्राणप्रसादात् । तदन्यो मुख्यप्राणप्रसादात्प्राणधारण-कर्ता । एतादृशो मुख्यप्राणोऽपि भवतीत्यत आह ॥ यत्प्रसादादिति । तथा च पराधीन-प्राणधारणकर्ताऽजीव इति भावः । तुशब्दस्तस्य रुद्राद्युत्तमत्वरूपविशेषद्योतकः । पूर्वोक्तश्लोकतात्पर्ये प्रमाणसंवादं दर्शयति ॥ कालेति । आत्मप्रसवकारणं वक्ष्यमाणे स्वात्मदेहपरिमितावकाशवद्यथा स्यात्तथोद्बुद्धं बृंहितमकरोदित्यन्वयः । जीव इति पदछेदेऽपि न दोषः । जीवशब्देन प्रसिद्ध-जीवभिन्नस्य भगवत एव विवक्षितत्वादित्याशयेनाह ॥ जीव इति वेति । छेद इति शेषः । भगवति जीवशब्दस्य द्वेधा वृत्तिं प्रमाणेन दर्शयति ॥ प्राणमिति । प्राणं मुख्यम् । अजीवोऽपि जीवभिन्नोऽपि ॥ ततश्चायं श्लोकार्थः ॥ कालाद्युद्बोधकतया कालादिस्थोऽजीवः प्रसिद्धजीवविलक्षणः परमात्मा उदकेशयमावरणजलमध्ये स्थितं तदण्डं वर्षपूगसहस्रान्ते यथा जीवः स्वात्मानं प्रसूयते स्वदेहपरिमितावकाशवद्यथा स्यात्तथाऽजीजनदकरोत् । परमात्माऽण्डान्तःस्थं जलादिरूपं कश्मलं विनाश्य वक्ष्यमाणस्वरूपदेहावस्थानायाण्डं बृंहितमकरोदित्याशय इति ॥ ३४ ॥

स एष पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः ।
सहस्रोर्वङ्घ्रिबाह्वक्षिः सहस्राननशीर्षवान् ॥ ३५ ॥

तात्पर्यम्— 'अण्डे जातौ पुमांसौ द्वौ हरिर्ब्रह्मा तथैव च । अनादिस्तु हरिस्तत्र ब्रह्मा सादिरुदाहृत' इति च ॥ ३५ ॥

प्रकाशिका— एवं ब्रह्माण्डबृंहणमुक्त्वेदानीं तत्र पुरुषरूपेण भगवतः प्रादुर्भावमाह ॥ स एष इति । सः यो महत्तत्त्वादिब्रह्माण्डान्तपदार्थजनकः परमेश्वरोऽण्डं निर्भिद्योक्तरीत्या बृंहयित्वा तस्मादण्डादभिव्याप्य पुरुषः पुरुषनामा सन्निर्गतो नितरां प्रकाशितः । प्रादुर्भूत इति यावत् । अत्रैष इति कर्त्रन्तरोक्त्या एषो मन्मूलरूपो मल्लक्षणपुरुषस्तस्मात्तदभिव्याप्य निर्गत उत्पन्न इत्यपि व्याख्येयमित्याशयेनात्र प्रमाणमाह ॥ अण्ड इति । अण्ड इति सप्तमीनिर्देशेन तस्मादित्युक्तरीत्या ल्यब्लोपनिमित्ता पञ्चमीति सूचयति । तथाचशब्दौ परस्परसमुच्चये । अनादिरेवेत्येवशब्दसंबन्धः । तुशब्दो हरेः प्रादुर्भावरूपजनिलक्षणविशेषद्योतकः । पूर्वोक्तजीवत्वोपपादनायास्य पुरुषसूक्तोक्तं माहात्म्यं वक्तुं तावत् सहस्रशीर्षेत्यर्धर्चोक्तं माहात्म्यमाह ॥ सहस्रेति । ऊर्वादिग्रहणेन सूक्ते शीर्षादि पदानि तदुपलक्षकानीति सूचयति ॥ ३५ ॥

यस्येहावयवैर्लोकान् कल्पयन्ति मनीषिणः ।
ऊर्वादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः ॥ ३६ ॥

तात्पर्यम्— 'हरेरवयवैर्लोकाः सृष्टा इति विकल्पनम् । साक्षात्सत्यमतोऽन्यस्माद्व्यवहारिकमुच्यत' इति मात्स्ये ॥ ३६ ॥

प्रकाशिका— नाभ्या आसीदन्तरिक्षमिति ऋगुक्तमाहात्म्यमाह ॥ यस्येति । अत्र यच्छब्देन पूर्वप्रकृतयोरुभयोः पुरुषयोर्ग्रहणे तयोर्लोककल्पकावयवत्वं समकक्षमिति प्रतीयते । कल्पयन्तीत्यनेनोक्तं कल्पनं च भ्रम इति । अत एतदुभयप्रतीतिनिरासाय प्रमाणेनैव श्लोकतात्पर्यमाह ॥ हरेरिति ॥ साक्षात्सृष्टा इति विकल्पनं ज्ञानं सत्यमबाध्यं न भ्रम इत्यर्थः । अन्यस्माद्विरिञ्चावयवसमूहाद्यल्लोककल्पनमुच्यते तद्व्यावहारिकं व्यवहारमात्रसिद्धं सत्यं न मुख्यमित्यर्थः । अत्र हरेरवयवैरिति तृतीयया हर्यवयवानां स्रष्टृत्वमुच्यते । तत्तु हर्यवयवेषु मुख्यं न विरिञ्चावयवेषु तेषां लोकोपादानत्वेन च तत्सृष्टृत्वाभावादतस्तत्र तृतीयाऽमुख्येति भावः । तथा च यस्य परमपुरुषस्यावयवैरिह ब्रह्माण्डे लोकान्मनीषिणो ज्ञानिनः कल्पयन्ति । साक्षात्स्रष्टा इति जानन्ति । स निर्गत इति पूर्वेणान्वय इति योजना द्रष्टव्या । विरिञ्चपक्षे तु यस्य विरिञ्चस्यावयवैर्लोकान्कल्पयन्त्यवयवा एव लोकाकारतया परिणता भवन्तीति जानन्तीति व्याख्येयम् । लोकानां चतुर्दशत्वविवक्षायां तत्कल्पनाप्रकारमाह ॥ ऊर्वादिभिरिति । ऊर्वादिभिः पादतलान्तैरवयवैरतलादि पातालान्तान् अधो विद्यमानान् सत्यलोकान्कल्पयन्तीति । जघनादिभिर्मूर्धान्तैरवयवैरूर्ध्वं विद्यमानान् पृथिव्यादि सत्यान्तान् सप्तलोकान्कल्पयन्तीत्यन्वयः ॥ ३६ ॥

पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ।
ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रो व्यजायत ॥ ३७ ॥

तात्पर्यम्— 'ब्राह्मणो मुखमित्येव मुखाज्जातत्वहेतुतः । यथावदत् श्रुतौ तद्वज्जीवो ब्रह्मेति वाग्भवेदि'ति ब्राह्मे ॥ ३७ ॥ इति द्वितीयतात्पर्ये पञ्चमोध्यायः ॥ ५ ॥

प्रकाशिका— इदानीं ब्राह्मणोऽस्य मुखमासीदिति ऋगुक्तं तदङ्गेभ्यो ब्राह्मणादि जातिजन्माह ॥ पुरुषस्येति । अत्र जनकस्य मुखादेर्जन्येन ब्राह्मणादिनाऽभेदप्रतीतिं वारणाय तदुक्तेरभिप्रायं प्रमाणेनैवाह ॥ ब्राह्मण इति । वाग्भवेत् ब्रह्मजातत्व हेतुत इति शेषः । तथा च सप्तसु प्रथमेति सूत्रान्मुखमित्यादि प्रथमा पञ्चम्यर्थे व्याख्येय इति भावः ॥ ३७ ॥

भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ।
हृदा स्वर्लोक उरसा महर्लोको महात्मनः ॥ ३८ ॥

प्रकाशिका— ऊर्वादिभिरित्यत्र सामान्यत उक्तं चतुर्दशलोकसृष्टिं प्रपञ्चयति ॥ भूर्लोक इति भूरित्यव्ययं भूमेर्नामान्तरम् । भूर्लोकः पद्भ्यां जात इति कल्पितो ज्ञात इत्यर्थः । एवमग्रेऽपि । भुवरित्यन्तरिक्षलोकः । इदमप्यव्ययम् । जघनपादयोः सामीप्यात् जघनादिभिरित्यनेनाविरोधः । कटेरप्यूरुसामीप्यादूर्वादिभिरित्यनेनाविरोधः । उपसंहरति ॥ इति लोकमय इति । लोकनिर्मितेत्यर्थः। यद्वा ऊर्वादिभिरिति चतुर्दशलोकविवक्षया लोककल्पनामुक्त्वेदानीं पक्षे सप्तलोकविवक्षायां लोककल्पनां दर्शयति ॥ भूर्लोक इत्यादिना । अस्मिन्पक्षेऽतलादीनां भूलोक एवान्तर्भाव इति भावः। यच्छब्देन पादतलमारभ्योरूपर्यन्तं ग्राह्यम् । अतो न कोऽपि विरोधः । प्रकारान्तरेणापि सप्तलोककल्पनामाह ॥ तत्कट्यामित्यादिना । अस्मिन्पक्षे भूम्यादीनामतललोक एवान्तर्भाव इति ज्ञातव्यम् । ऊरुलक्षणकेन कटिशब्देन जघनादिशीर्षान्तं ग्राह्यम् । अनेन ऋचि तथा लोकानकल्पयन्निति यत्सामान्यतो लोककल्पनमुक्तं तत्प्रपञ्चितमिति ज्ञातव्यम् ॥ ३८ ॥

ग्रीवायां जनलोकश्च तपोलोकोऽस्य नेत्रयोः ।
मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः ॥ ३९ ॥

तत्कट्यामतलं क्लृप्तमूरुभ्यां वितलं विभोः ।
जानुभ्यां सुतलं क्लृप्तं जङ्घाभ्यान्तु तलातलम् ॥ ४० ॥

महातलन्तु गुल्फाभ्यां प्रपदाभ्यां रसातलम् ।
पातालं पादतलतः इति लोकमयः पुमान् ॥ ४१ ॥

भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकस्तु नाभितः ।
स्वर्लोकः कल्पितो मूर्ध्नि इति वा लोककल्पना ॥ ४२ ॥

इति श्रीमद्भागवते द्वितीयस्कन्धे पञ्चमोऽध्यायः ॥

प्रकाशिका— इदानीं त्रिलोकविवक्षायां ऋगुक्तं लोककल्पनं दर्शयति ॥ भूर्लोक इति । अस्मिन्नपि पक्षेऽतलादीनां भुव्यन्तर्भावः । महरादीनां स्वर्लोक इति ज्ञेयम् ॥३९,४०,४१,४२॥ इति श्रीमद्भागवत तात्पर्य टिप्पण्यां द्वितीयस्कन्धे पञ्चमोऽध्यायः ॥ २-५ ॥

अथ षष्ठोऽध्यायः

ब्रह्मोवाच—

वाचो वह्ने मुखं क्षेत्रं छन्दसां सप्तधातवः ।
हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च ॥ १ ॥

प्रकाशिका— इदानीं चक्षोःसूर्योऽजायत मुखादिन्द्रश्चाग्निश्च दिशःश्रोत्रादित्यादिना तदङ्गेभ्यो यदिन्द्रियदेवतादि जननं संक्षेपेणोक्तं तदुपलक्षणमित्यभिप्रेत्येन्द्रियदेवतादिजनकाङ्गत्वरूपं सूत्रोक्तं माहात्म्यं दर्शयति ॥ वाच इत्यादिना । वाचो वागिन्द्रियस्य वन्हेस्तदभिमानिनो देवस्य वक्तव्यस्य च पुरुषस्य मुखं क्षेत्रमुत्पत्तिस्थानमाश्रयश्च । गायत्र्युष्णिक् अनुष्टुप् बृहती: पङ्क्तीः त्रिष्टुप् जगती संज्ञानां छन्दसामस्य पुरुषस्य त्वक्चर्ममांसरुधिरमेदोमज्जास्थ्याख्याः सप्त धातवः क्षेत्रम् । एवं सर्वत्र क्षेत्रमित्यस्य सर्वत्रानुवृत्तिः । हव्यं देवानामन्नम् । कव्यं पितॄणाम् अमृतम् । तदुभयोः शेषं मनुष्याणाम् । तेषामन्नानां सर्वरसस्य मधुरादेः षड्विधस्य । चकाराद्रसनेन्द्रियस्य तदभिमानिनो वरुणस्य च पुरुषस्य जिव्हा क्षेत्रम् । एवं सर्वत्रानुक्तमुन्नेयम् ॥ १ ॥

सर्वासूनाश्च वायोश्च तन्नासे परमायने ।
अश्विनोरोषधीनाश्च घ्राणो गन्धस्य चैव हि ॥ २ ॥

प्रकाशिका— सर्वासूनां मरुतां मुख्यवायोश्च तस्य पुरुषस्य नासे नासापुटे परमायने उत्तमक्षेत्रे । अश्विनोर्घ्राणाभिमानिनोः ओषधीनां व्रीह्यादीनां पुरुषस्य घ्राणो घ्राणेन्द्रियम् । गन्धस्य सुरभ्यादिरूपस्य । च शब्दाद्घ्राणेन्द्रियस्य च । पुंशक्तिमत्वाद्घ्राण इति पुल्लिङ्गः ॥ २ ॥

रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी ।
कर्णौ दिशाश्च तीर्थानां श्रोत्रमाकाशशब्दयोः ॥ ३ ॥

तात्पर्यम्— तीर्थानां शास्त्राणाम् ॥ ३ ॥

प्रकाशिका— चक्षुरिन्द्रियस्य तद्विषयाणां रूपाणां तेजसां विषयप्रकाशकानां जयोतिषां पुरुषस्य चक्षुश्चक्षुरिन्द्रियम् । दिवो द्युलोकस्य चक्षुरभिमानिनः सूर्यस्याक्षिणी चक्षुर्गोलके क्षेत्रम् । कर्णौ क्षेत्रगोलके दिशां श्रोत्राभिमानिदिग्देवतानाम् । तीर्थानामित्येतद्भागीरथ्यादि तीर्थानामिति प्रतीतिवारणाय यथावद्व्याचष्टे ॥ तीर्थानां शास्त्राणामिति । अन्यथा नाड्यो नदनदीनां चेत्यनेन पौनरुक्त्यप्रसङ्ग इति भावः । श्रोत्रं पुरुषस्य श्रोत्रेन्द्रियम् । आकाशशब्दयोरित्यत्र श्रोत्रेन्द्रियमपि ग्राह्यम् ॥ ३ ॥

तद्गात्रं वस्तुसाराणां सौभाग्यस्य च भाजनम् ।
त्वगस्य स्पर्शवायोश्च सर्वमेधस्य चैव हि ॥ ४ ॥

प्रकाशिका— वस्तुसाराणां वस्तुश्रेष्ठानां तस्य हरेर्गात्रं शरीरं भाजनं क्षेत्रम् । अस्य पुरुषस्य त्वगिन्द्रियं स्पर्शवायोः स्पर्शेन सहितो वायुस्त्वगिन्द्रियाभिमानी देवस्तस्य सर्वमेधस्य सर्वयज्ञस्य । च शब्दात्त्वगिन्द्रियस्य । हि शब्देनात्र सर्वत्र वैदिकीप्रसिद्धिः प्रमाणमिति सूचयति । त्वगेवेति सम्बन्धः । तेनोपलक्षणतया सर्वत्रेतरकारणाभावं सूचयति ॥ ४ ॥

रोमाण्युद्भिजजातीनां यैर्वा यज्ञस्तु सम्भृतः ।
केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युताम् ॥ ५ ॥

तात्पर्यम्— याज्ञिका रोममूलस्था रोमान्तस्थास्तु तत्परे । उद्भिदो वासुदेवस्य लिङ्गगास्तु जरायुजा इति पाद्मे । हरेः श्मश्वाश्रया विद्युच्छिला लोहा नखाश्रया' इत्याग्नेये ॥ ५ ॥

प्रकाशिका— रोमाणीत्यत्र वा इत्यनेन सूचितं व्यवस्थितविकल्पं प्रमाणेनैव दर्शयति ॥ याज्ञिका इति । यज्ञोपयुक्ता उद्भिजो वृक्षा इत्यन्वयः । लिङ्गगा इत्यनेन पुंसः शिश्न इति वक्ष्यमाणमूले इदमप्युपलक्ष्यमिति सूचयति । तथा चोद्भिजजातीनां वृक्षाणां मध्ये यैर्यज्ञः संभूतः संपादितः । यजमानैरिति शेषः । तेषामेव पलाशादीनामस्य रोमाणि रोममूलानि क्षेत्रम् । यैरयज्ञो यज्ञेतरकार्यविशेषः संभृतस्तेषां रोमाणि तदग्राणि क्षेत्रमिति मूलं योज्यमिति भावः । मूले तुशब्द उक्तार्थावधारणपरः । केशश्मश्रुनखानीत्यत्र यथाक्रमं सम्बन्धे विद्युदतिरिच्यतेऽतो यथायोग्यसम्बन्ध इत्याशयेनात्र प्रमाणमाह ॥ हरेरिति ॥ तथा चायमर्थः ॥ अस्य हरेः केशा अग्राणां क्षेत्रम् । पूर्वमीशस्य केशान्विदुरम्बुवाहानित्युक्तत्वात् । श्मश्रूणि विद्युतां शिलालोहानां नखानि क्षेत्रमिति ॥५॥

बाहवो लोकपालानां प्रायशः क्षेमकर्मणाम् ।
विक्रमो भूर्भुवःस्वश्च क्षेमस्य शरणस्य च ॥ ६ ॥

प्रकाशिका— क्षेमकर्मणां लोकक्षेमकर्मणाम् । अत्र प्रायःशब्दव्यावर्त्याप्रतीतेराह ॥ ब्राह्मणेति । सत्यादिलोकपालेषु ब्रह्माग्नी ब्राह्मणौ कुबेरौ वैश्यो निर्ऋति शूद्र एतेषां बाहुजत्वं परिहर्तुं प्रायश इत्युक्तमित्यर्थः । तथा चैतान्विना ये इन्द्रादयो लोकपालाः क्षत्रियास्तेषां बाहवः क्षेत्रमिति भावः । भूर्भुवःस्वश्च पृथिव्यन्तरिक्षस्वर्गाणां विक्रमः पादविक्षेप आस्पदमाश्रय इत्यन्वयः । भूरादि शब्दानामव्ययत्वात् षष्ट्याऽलुक् । क्षेमस्य प्राप्तरक्षणस्य । शरणस्येतद्भयाद्रक्षणस्येति व्याख्यानेऽल्पार्थता

स्यादतो मोक्षस्येति व्याख्येयमित्याशयेन शरण शब्दस्य मोक्षवाचकत्वे प्रमाणमाह ॥ मोक्ष इति । प्रमाणान्तरसंवादाच्चायमेवार्थ इत्याशयेन मोक्षस्य हरिचरण आस्पदमित्यत्र प्रमाणमाह ॥ भेज इति । नन्विदमयुक्तम् । सायुज्यभाजां देवानां पादमूले मुक्त्यभावादतोऽत्र विवक्षितानधिकारिणो दर्शयितुं देवादीनामधिकारिणां मुक्तस्थानभेदं प्रमाणेनैव दर्शयति ॥ स्वोत्पत्त्यङ्गोष्विति । स्वेषामुत्पत्तिर्येषु तेषु विष्णोरङ्गेष्वित्यर्थः । देवानां तत्त्वाभिमानिनाम् । अन्येषामप्रतीकालम्बनानाम् । पादमूलतः पादमूलं वैकुण्ठमहरादिमाश्रित्य मुक्तिः स्वरूपानन्दानुभवरूपा । तु शब्दोऽप्रतीकालम्बनत्वादिरूपाधिकारिविशेषद्योतकः । चक्षोः सूर्योऽजायतेत्यादि वेदे निर्दिष्टेषु विष्णोः स्वोत्पत्त्यङ्गेषु यथा वचस्तद्वेदवचनमनतिक्रम्य देवानां मुक्तिर्विहितेत्यन्वयः । तथा च येषामविकारिणां पादमूले मुक्तिस्तदभिप्रायेणेदं वचनमिति भावः ॥ ६ ॥

सर्वकामवरस्यापि हरेश्चरण आस्पदम् ।
अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः ॥ ७ ॥

तात्पर्यम्— ब्राह्मणवैश्यादीन्वर्जयितुं प्रायश इति । 'मोक्षः शान्तिश्च शरणं निर्वाणं चाभिधीयत' इति ब्राह्मे । 'भेजे खगेन्द्रध्वजपादमूलमि'ति च । स्वोत्पत्त्यङ्गेषु देवानामन्येषां पादमूलतः । मुक्तिस्तु विहिता विष्णोर्निर्दिष्टेषु यथावच' इत्यध्र्यात्मे ॥ ६ ॥

प्रकाशिका— मूले सर्वकामवरस्यापीत्यत्र सर्वेषां कामानां वरस्य वरणस्य लाभस्येति यावदिति व्याख्या द्रष्टव्या । वीर्यस्य रेतसः सर्गस्य सृष्टेः पर्जन्यस्य जलाभिमानिनो देवस्य प्रजापतेः सर्गाभिमानिनो दक्षस्य ॥ ७ ॥

पुंसः शिश्न उपस्थस्तु प्रजात्यानन्दनिर्वृतेः ।
पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद ॥ ८ ॥

प्रकाशिका— पुंसः परमपुरुषस्य शिश्नो गुह्येन्द्रियगोलकम् । उपस्थो गुह्येन्द्रियम् । तु शब्द उक्तावधारणार्थः । प्रजात्यानन्दः सन्तानार्थं सम्भोगस्तेन निर्वृत्तिस्तापहानिस्तस्याः पायुरिन्द्रियम् । पुरिमोक्षस्य मलविसर्जनस्य ॥ ८ ॥

हिंसाया निऋतेर्मृत्योर्निरयस्य गुदः स्मृतः ।
पराभूतेरधर्मस्य तमसश्चापि पश्चिमः ॥ ९ ॥

प्रकाशिका— गुदः पाय्विन्द्रियाधिष्ठानमपानद्वारम् । पराभूतेः पराजयस्य । अलक्ष्म्या च । तमसोऽज्ञानस्य पश्चिमः पृष्ठभागः ॥ ९ ॥

नाड्यो नदनदीनान्तु गोत्राणामस्थिसंहतिः ।
अव्यक्तरससिन्धूनां भूतानां निधनस्य च ।
उदरं विदितं पुंसो हृदयं मनसः पदम् ॥ १० ॥

प्रकाशिका— तु शब्दो नदीष्ववान्तरलक्षणद्योतनार्थः । गोत्राणां पर्वतानामस्थ्नां संहतिः समूहः । अव्यक्तं प्रबानम् । रसो मधुरादिः । सिन्धवः समुद्राः । भूतानि पृथिव्यादीनि । प्राणिनो वा । निधनं प्रलयः । एतेषां पुंस उदरं पदं स्थानं विदितम् । ज्ञानिभिरिति शेषः । पुंसो हृदयं मनसः पदम् ॥ १० ॥

धर्मस्य मम तुभ्यश्च कुमाराणां भवस्य च ।
विज्ञानस्य च तत्वस्य परस्यात्मा परायणम् ॥ ११ ॥

तात्पर्यम्— 'कुमारब्रह्मरुद्राद्या हरेर्मध्यात्समुद्गता' इति वामने । आत्मेति मध्यदेहश्च सर्वदेहोऽपि वा भवेत् । मनोबुद्धिरहङ्कारश्चित्तं जीवश्च कथ्यते । अथवा स्वयमेवेति वायुर्ब्रह्मापि वा भवेत् । मुख्यतो ब्रह्म परममात्मशब्देन भण्यत' इति नाममहोदधौ । 'देहेन्द्रियादिभेदेन निर्भेदोऽपि हरिः स्वयम् । भण्यते केवलैश्वर्यादनाद्यानन्दचिद्घन' इति गारुडे ।

प्रकाशिका— धर्मस्य सुकृतस्य तदभिमानिनो धर्माख्य देवस्य । तुभ्यं तव कुमाराणां सनकादीनां चतुर्णाम् । भवस्य रुद्रस्य ॥ विज्ञानस्य तत्त्वस्य तदभिमानिन्याः सरस्वत्याश्च परस्य हरेरात्मा नारायणं क्षेत्रम् । आत्म शब्दो मध्यदेहपर इत्याशयेनात्र प्रमाणसंवादमाह ॥ कुमारेति । आद्य पदेन धर्मनारदादीनां ग्रहणम् । आत्म शब्दस्य मध्यदेहवाचित्वेऽभिधानमप्याह ॥ आत्मेति । वाचो वन्हेर्मुखं क्षेत्रमित्यारभ्य परस्यात्मा परायणमित्यन्तेन ग्रन्थेन देहेन्द्रियादेः पृथग्व्यवहारेण भेदमाशङ्क्याचिन्त्यैश्वर्यवशाद्भेदाभावेऽपि तथा व्यवहार इति प्रमाणेनैव दर्शयति ॥ देहेन्द्रिय इति । आदि पदेनावयवादेर्ग्रहणम् ॥ ११ ॥

अहं भवान् भवश्चैव य इमे मुनयोऽग्रजाः ।
सुरासुरनरा नागाः खगा मृगसरीसृपाः ॥ १२ ॥

गन्धर्वाप्सरसो यक्षाः रक्षोभूतगणोरगाः ।
पशवः पितरः सिद्धाः विद्याध्राश्चारणाद्रुमाः ॥ १३ ॥

प्रकाशिका— एवं चक्षोः सूर्योऽजायतेत्यादिकमुपलक्षणमित्यभिप्रेत्य भगवदङ्गेभ्य इन्द्रियादि-सृष्टिमुक्त्वेदानीं पुरुष एवेदं सर्वमित्यर्धर्चोक्तं माहात्म्यं सर्व शब्दार्थविवरणपूर्वकं दर्शयति ॥ अहं भवानिति । अग्रजा मुनयः सनकादयः ॥ १२, १३ ॥

अन्ये च विविधा जीवा जलस्थलनभौकसः ।
ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः ॥ १४ ॥

प्रकाशिका— जलं च स्थलं च नभश्चौकांस्यावासस्थानानि येषां ते जलस्थलनभौकसः । इति संधिश्छान्दसः । न भातीति व्युत्पत्त्या यौगिको न शब्दोऽयमन्य एवाकारान्त आकाशवाची-त्याचार्याः ॥ १४ ॥

सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत् ।
तेनेदमावृतं विश्वं वितस्तिमधितिष्ठता ॥ १५ ॥

तात्पर्यम्— 'सर्वं पुरुष एवेति भण्यते भेदवज्जगत् । तदधीनं तु सत्तादि यतो ह्यस्य सदा भवेदि'ति ब्रह्मतर्के । 'वितस्तिमात्रं हृदयमास्थाय व्याप्नुते जगदि'ति गारुडे ॥ १५ ॥

प्रकाशिका— इदं पूर्वोक्तं सर्वभूतमतीतं भविष्यत् ऋगुक्तमुपलक्षणमित्याशयेनाह ॥ भवद्वर्तमानं चेति । अत्रेदं सर्वं पुरुष एवेति सर्वस्य पुरुषाभेद उच्यत इति भाति । अतस्तदुक्तेरभिप्रायं प्रमाणेनैव दर्शयति ॥ अभेदवदिति । अत्र भिद्यत इति व्युत्पत्त्या भेद शब्दो भिन्नपरः । तथा चाभिन्नव-दित्यर्थः । यथा केनचिदभिन्नं वस्तु तद्व्यतिरेकेणेदं नास्तीत्युच्यते तथेति भावः । सत्तादीत्यत्रादि पदेन प्रतीतिप्रवृत्त्योर्ग्रहणम् । हीत्यनेनात्र यदधीना यस्य सत्ता तत्तदित्येव भण्यत इत्यादि प्रमाणप्रसिद्धिं दर्शयति । सदेत्यनेन यत्सर्वदा यदधीनसत्तादिकं तद्व्यतिरेकेण नास्तीत्युच्यत इति लोके दर्शनादयमुपचार इति सूचयति । स भूमिं विश्वतो वृत्वेत्यर्धर्चोक्तं माहात्म्यमाह ॥ तेनेदमिति । अत्र क्रमव्यत्यासो नाशङ्क्यः । यथास्थितक्रमस्य मूले वेद एव स्थित्योपवेदादौ तदभावात् । यथाहुः ॥ अन्यथात्वं च तत्र स्यादावापोद्वापतस्त्वृचामिति । अतो मूले वेदादिगतक्रमानुसारेणायं ग्रन्थः प्रवृत्त इति प्रतिभाति । अत एवात्र परित्यक्तऋगुक्तमाहात्म्यं दर्शयितुं स्वधिष्ण्यमित्यादि वक्ष्यति । अत्र वितस्ति शब्देन किमधिष्ठानतयोच्यत इति न भातीत्यतः प्रमाणेनैवार्धर्चतात्पर्यं दर्शयति ॥ वितस्तिमात्रमिति । तथा च मूले दशाङ्गुलमित्यस्यार्थः ॥ वितस्तिमिति । अतीत्यस्याधीति । भूमिमित्यस्योपलक्षणतया विश्वमिति । तथा चायं मन्त्रार्थः सूचितः । स पुरुषो दशाङ्गुलवितस्तिमात्रपरिमितं लोकानां हृदयमति आधिक्येन वृत्वाऽऽस्थाय भूमिं तदुपलक्षितं

जगद्विश्वतः सर्वतः स्वल्पमपि प्रदेशमविहायातिष्ठद्व्याप्तवानिति । आदौ सर्वप्राणिहृदयमाविश्य बहिरपि व्याप्तवानित्याशयः ॥ १५ ॥

स्वधिष्ण्यं प्रतपन्प्राणो बहिश्च प्रतपत्यसौ ।
एवं विराजं प्रतपंस्तपत्यन्तर्बहिः पुमान् ॥ १६ ॥

तात्पर्यम्— पश्यन् स्वधिष्ण्यं देहं स बहिष्ठान्विषयानपि । एवमण्डान्तरं पश्यन्बहिः सर्वं च पश्यती'ति वामने ॥ १६ ॥

प्रकाशिका— अत्र देहान्तर्बहिश्च व्याप्तेः प्रयोजनं वक्तुं प्रवृत्ता या त्यक्ता ऋक् तदुक्तं माहात्म्य माह ॥ स्वधिष्ण्यमिति । तत्र ऋगुक्तानुसारेण प्राण इत्युक्तम् । अत्र स्वधिष्ण्य प्रतपन् शब्द योर्विवक्षितमर्थं दर्शयन् श्लोकव्याख्यानरूपं प्रमाणमुदाहरति ॥ पश्यन्निति । ततश्चायं श्लोकार्थः ॥ प्राणः प्रकृष्टचेष्टकोऽसौ पुमान्पुरुषा यथा स्वधिष्ण्यं देहं प्रतपन् पश्यन् बहिर्देहाद्बहिरपि तपति विषयान्पश्यति । एवं विराजं ब्रह्माण्डमन्तः प्रतपन् बहिरपि विद्यमानान्पदार्थान्प्रतपति पश्यतीति ॥ १६ ॥

सोमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् ।
महिमैष ततो ब्रह्मन्पुरुषस्य दुरत्ययः ॥ १७ ॥

तात्पर्यम्— अव्यक्तमात्मनोऽन्नं च महदादि विनाशि च । यदतीतः परो विष्णुः स एवातो विमोक्षद' इति नारदीये ॥ १७ ॥

प्रकाशिका— उतामृतत्वस्येशान इत्यर्धोक्तं मुक्तेशानत्वरूपं माहात्म्यं दर्शयति ॥ सोऽमृतस्येति । स पुरुषोऽमृतत्वस्येति वैदिकं पदं भवितृ प्रधानमित्यभिप्रेत्यामृतस्येत्यनूद्याभयस्येति व्याख्यातम् । जननादिभयरहितस्य मुक्तसमुदायस्येत्यर्थः । ईशः प्रेरक इति ईशानपदार्थः । अत्र हेतुकथनात्स यदन्नेत्यादिकं प्रवृत्तमित्यभिप्रेत्यान्नेनेति पदं तृतीया द्वितीयार्थे विवक्षितेत्याशयेनान्नमित्यनूद्य मर्त्यं मरणशीलमिति व्याख्यातम् । अत्र किं मर्त्यकथनं चास्य मुक्तेशानत्वे हेतुत्वमित्यतः प्रमाणेनैव तद्दर्शयति ॥ अव्यक्तमिति । अनेनान्नशब्दार्थतयाऽव्यक्तमपि मूले ग्राह्यमिति सूचयति । अव्यक्तं प्रकृतिरात्मनो हरेरन्नम् । भोग्यमिति शेषः । मर्त्य शब्दार्थकथनम् ॥ विनाशीति । महदादिकं चान्नं मर्त्यं विनाशि । अनेनाद्यं ह्यन्नमुच्यते । तत्राव्यक्तस्यान्नशब्दप्रवृत्तिनिमित्तमद्यत्वं भोग्यत्वरूपं महदादौ तु विनाश्यत्वमेवेत्युक्तं भवति । पूर्वोक्तस्य सर्वस्यान्नत्ववचनं तस्य भगवदधीनत्वोपपादनाय अत्राव्यक्तमहदादि शब्दैस्तद्बद्धाश्चेतना अपि

ग्राह्याः। यद्यस्मादतीतोऽतिक्रान्तः । तदधिपतिरिति यावत् ।। तथा चायमर्थः ।। यद्बन्धकमव्यक्तादितत्त्वं यच्चेतनबद्धयं ब्रह्मादिचेतनजातम् । तदुभयाधिपत्यं यत्पूर्वोक्तं तदेव । यद्यस्मादन्नमतिरोहतीति हेतुतयाऽनूद्यामृतत्वस्योतामृतत्वस्याभयस्य जन्मादिभयरहितस्य मुक्तसमूहस्यापीशान ईश इति मुक्ताधिपत्यं श्रुतौ विधीयत इत्युक्तं भवति । यदि मुक्ताः स्वाधीना न स्युस्तर्हि बन्धकबद्धयेशः प्रेक्षावांस्तान् बन्धान्न मोचयेदित्याशय इति ।। एतावानस्य महिमेत्यर्धचोक्तं माहात्म्यं दर्शयति ।। महिमैष इति । ततस्तस्मादव्यक्तादीनां तदपेक्षया नीचत्वात्पुरुषस्यैषः पूर्वोक्तमहिमा दुरत्ययः केनाप्यत्येतुमशक्यः । अपार इति यावत् । अनेनास्य पुरुषस्य महिमैतावान्पूर्वोक्तः । न केवलमेतावान्किंत्वतः पूर्वोक्तादपि महिम्नो जायान् । अधिकमहिमोपेतोऽयं पुरुषोऽतोऽस्य महिमा दुरत्यय इति योजनां सूचयति ।। १७ ।।

पादोऽस्य सर्वाभूतानि पुंसः स्थितिविदो विदुः ।
अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु ।। १८ ।।

तात्पर्यम्— 'स्वरूपांशो विभिन्नांश इति द्वेधांश इष्यते । अनन्तासनवैकुण्ठपद्मनाभाः स्वयं हरिः । जीवा इमे विभिन्नांशा धर्माधर्मादिसंयुता' इति वामने ।। १८ ।।

प्रकाशिका— पादोऽस्येत्यर्धचोक्तं माहात्म्यं दर्शयितुं पूर्वपादोक्तमर्थमनुवदति ।। पादोऽस्येति । अत्र पाद शब्दोंऽशपरः । तथा चामृतपादत्रयवद्विश्वभूतानामप्यंशत्वमुच्यत इति प्रतीतिनिरासाय श्लोकं प्रमाणेनैव व्याचष्टे ।। स्वरूपांश इति । स्वरूपांशान्दर्शयति ।। अनन्तासनं इति । अनेनामृत शब्दवाच्यानन्तासनस्थोऽनन्तासनामाऽमृत शब्दाभिधेयः । क्षेम पदवाच्यवैकुण्ठस्थो वैकुण्ठनामा क्षेम पदवाच्यः । अभयः पदवाच्यश्च श्वेतद्वीपस्थः पद्मनाभ नामाऽभय पदवाच्य इति क्रमेणामृतक्षेमाभयशब्दा व्याख्याता इति द्रष्टव्यम् । अमृतादि शब्दानामनन्तासनादिवाचकत्वे निमित्तं प्रमाणान्तरेण ज्ञातव्यम् । स्वयं हरिः हरिस्वरूपभूता इत्यर्थः । विभिन्नांशत्वे हेतुमाह ।। धर्माधर्मादीति । यत इति शेषः । स्थितिविदमित्येतद्भूतानां भिन्नांशत्वे प्रमाणप्रदर्शनपरमित्याशयेन व्याचष्टे ।। सर्वस्येति । यथावद्विभिन्नांशत्वे रूपां स्थितिं जानन्त इत्यर्थः । त्रिपादस्यामृतं दिवीत्युत्तरपादोक्तमाहात्म्यं दर्शयति ।। अमृतमिति । अत्र कस्त्रिमूर्धा तन्मूर्धसु निहितमनन्तासनादिकं चेद्दिवीति तेषां द्युस्थितत्वोक्तिविरोध इत्याशङ्कां प्रमाणेनैव परिहरति ।। त्रिमूर्धेति । रूपान्तरेणेति शेषः । अनेनामृतादि शब्दत्रयं द्युत्रयवाचकमिति सूचयति । द्युत्रयं दर्शयति ।। अनन्तासनेति । नारायणः पद्मनाभः । अनन्तासनादीनि पुराणीत्यर्थः । तु विशेषेण । द्यु शब्दवाच्यानीति शेषः । कुतो द्यु शब्दवाच्यत्वमेतेषामित्यत आह ।। बहुलक्षेति । तथा च लोकत्रयविवक्षायां परतो

लक्षयोजनात्सर्वं द्यौरिति वचनात् । यदा लक्षयोजनोच्छ्रितान्तरिक्षोपरितनानां लोकानां द्यु शब्द-वाच्यत्वं तदा बहुलक्षोच्छ्रितानामेषां तदस्तीति किं वाच्यमिति भावः । त्रिपादस्यामृतमित्यस्य तात्पर्यम् ॥ स इति । अनेनामृतं क्षेममभयमिति पदत्रयं अनन्तासनादि पुरस्थितानन्ता-सनादिनामकहरिपरमपि भवतीति सूचयति ॥ ततश्चायं श्लोकार्थः ॥ अस्य पुंसः पुरुषस्य सर्वभूतानि ब्रह्मादयः सर्वे जीवाः पादो विभिन्नांशाः । कुत इत्यतो प्रमाणमाह ॥ स्थितीति । सर्वस्य । जीवसमुदायस्येति शेषः । स्थितिं भिन्नांशत्वादिरूपं स्वरूपं विदन्तीति तथा इति विदुरित्यर्थः । तथा च सर्वज्ञानां प्रत्यक्षमेवात्र मानमिति भावः ॥ अमृतं क्षेममभयमेतन्नामकमनन्तासनादि लोकत्रयं त्रयो मूर्धानो यस्य स त्रिमूर्धा हरेरवतारविशेषस्तस्य मूर्धस्वद्यापि धृतम् । तेषु लोकेषु यदमृतादि पदवाच्यं हरिस्वरूपांशभूतमनन्तासनादि मूर्तित्रयं तदप्यधायीति । अनेन दिवि द्यु शब्दवाच्येऽ-नन्तासनादि लोकत्रयेस्य पुंसोऽमृतं स्वरूपभूमं त्रिपादं शत्रयं तिष्ठतीति वेदयोजनां सूचयति ॥१८॥

पादास्त्रयो बहिस्त्वासन्नप्रजानां य आश्रयाः ।
अन्तस्त्रिलोक्यास्त्वपरो गृहमेधैर्बृहद्व्रतः ॥ १९ ॥

प्रकाशिका— त्रिपादूर्ध्व इत्यर्धेचोक्तं माहात्म्यं दर्शयति ॥ पादास्त्रय इति । तु शब्दोऽ-वधारणार्थः । अत्र बहिरित्यस्यावधिर्न प्रतीयते । त्रिलोक्या अवधित्वेऽपि उक्तपादत्रयस्य सृती विचक्रमे इत्यादिना त्रिलोकान्तर्गतत्वेऽपि वेदादिस्थितत्वस्य वक्ष्यमाणत्वेनावधारणानुपपत्तिः । अप्रजानामित्यस्यान्तस्त्रिलोक्यात्स्वपर इत्यस्य च विवक्षितोऽर्थो न प्रतीयतेऽतः श्लोकं प्रमाणेनैव व्याचष्टे ॥ अनन्तासनेति । नारायणपुरं श्वेतद्वीपाख्यम् । धामानि व्यक्त्यावासस्थानानि । तेषु च विष्णोस्त्रीणि धामानि स्वरूपाणि । तिष्ठन्तीति शेषः । तथा च पादत्रयव्यक्तिस्थानानां त्रिलोक्या बहिरेव स्थितत्वात्तद्गते पादत्रये बहिरेव स्थितत्ववचनमौपचारिकमिति भावः । यद्यपि श्वेतद्वीपानन्तासनयोर्न त्रिलोकाद्बहिःस्थितत्वं तथाऽपि स्वर्गलोकत्वेन साङ्कल्पिकस्वर्गविवक्षायां तदुपरितनत्वं स्वर्गसमाने श्वेतद्वीपे बहुलक्षयोजनोच्छ्रितेऽनन्तासने चोपपद्यत इति ध्येयम् । अनन्तासनादि लोकेषु पुरुषस्य व्यक्त्यावासे प्रयोजनं वक्तुम् अप्रजानामित्युक्तम् । तत्राप्रजा शब्देन विवक्षितान्दर्शयति ॥ देवा इति । तेषामप्रजात्वमुपपादयितुमुक्तम् ॥ अदायादास्तु पुत्राणामिति । अत एव तेषां न पुत्रादायमुपयन्तीति श्रुतेरिति भावः । तु शब्दोऽवधारणे । तेन प्रजाभावं व्यावर्तयति । देवानां तत्प्राप्तत्वमुपपादयितुमुद्रिक्तज्ञानचक्षुषो नारायणपर इति विशेषणद्वयम् । आमुवन्तीति संसारदशायां पूजाद्यर्थं मुक्तौ तु सायुज्यार्थमिति ज्ञातव्यम् । तथा चोक्तं पादत्रयं देवानामेव संसारदशायामिज्यमन्ते प्राप्यं चेत्युक्तं भवति । अत एव लोकत्रयान्तर्गतभगवदंशानां गृहस्थादी-ज्यत्वमन्ते तत्प्राप्यत्वं च वक्ष्यति । अनेन त्रिपात्पुरुषस्वरुपभूतस्त्रिविधोंऽश ऊर्ध्वस्त्रिलोक्युपरित-नानन्तासनादि लोकगतः सन् उदैद्व्यक्तोऽभूदित्याद्यपादयोजना सूचितेति ज्ञातव्यं ॥ पुरुषस्य

त्रिलोक्यन्तर्गतान् परान्स्वरूपभूतांशान्दर्शयितुं प्रवृत्तस्य पादोऽस्येति द्वितीयपादस्यार्थं दर्शयितुं मूलेऽन्तस्त्रिलोक्या इत्युक्तम् । तत्र श्रौतपुनःशब्दार्थकथनायापर इत्युक्तम् । तद्व्याख्याति ॥ स एवेति । इहेत्यस्य श्रौतपदस्यार्थः ॥ अन्तस्त्रिलोक्या इति तत्रापि स्थानविशेषानाह ॥ शक्रेति । इन्द्रलोकादधःस्थितवैश्वानरलोकगत इत्यर्थः । अत एवाह ॥ यज्ञपुमान्नामेति । एतच्च मूले तु शब्देन सूचितमिति ज्ञातव्यम् । तस्य प्रयोजनं वक्तुं मुक्तस्य गृहमेधैरित्यस्यार्थमाह ॥ गृहिणामिति । पद्यत इति पदमाश्रयः । यतीनामित्यादौ ज्ञानमित्यस्यानुवृत्तिः । तथा च मूले गृहमेधैरित्येतदुपलक्षणतयोक्तमिति भावः । अत एव मन्त्रे इहेति मूले चान्तस्त्रिलोक्या इति सामान्यत एवोक्तस्थानान्युक्तानि । ततश्च गृहमेधैर्गृहस्थाश्रमोचितयज्ञवद्भिर्बृहत्पूर्णम् । सांगमिति यावत् । यथा स्यात्तथा हुत इष्ट आश्रितश्च वर्तत इति मूलं योज्यमिति भावः ॥ ततश्चायं मन्त्रार्थः ॥ अस्य पुरुषस्य पुनः पादोऽपरः पादः । समुदायापेक्षायामेकवचनम् । इह त्रिलोक्या अन्त इह शक्रलोकसमीपस्थे वैश्वानरलोके गृहिभिः पूज्यः प्राप्यश्चाभवदिति तथा इह लोके यतिभिः तथा इहमेरुमध्ये वानप्रस्थैः तथा इह आदित्समण्डले ब्रह्मचारिभिः पूज्यः प्राप्यश्च अभवदिति ॥ १९ ॥

सृती विचक्रमे विष्वक्साशनानशने उभे ।
यदविद्या च विद्या च पुरुषस्तूभयाश्रयः ॥ २० ॥

तात्पर्यम्— सर्वस्य यथावत्स्थितिविदः । 'त्रिमूर्धा सन् हरिर्धत्ते द्युत्रयं मूर्धभिस्त्रिभिः । अनन्तासनवैकुण्ठनारायणपुराणि तु । बहुलक्षोच्छ्रितेष्वेषु स वसत्यमृतो हरिरि'ति मात्स्ये । 'अनन्तासनवैकुण्ठनारायणपुराणि तु । त्रीणि धामानि वै विष्णोस्त्रिलोकाद्बहिरेव च । अदायादास्तु पुत्राणामुद्रिक्तज्ञानचक्षुषः । नारायणपरा देवा एवं तान्याप्नुवन्ति' च ॥ 'स एवान्यस्वरूपेण शक्रलोकसमीपगः । इज्यो यज्ञपुमान्नाम ज्ञानिनां गृहिणां पदम् । यतीनां ध्रुवलोकस्थो वनिनां मेरुमध्यगः । आदित्यमण्डलस्यस्तु ज्ञानिनां ब्रह्मचारिणामि'ति ब्रह्माण्डे । 'त्रिपात्स एव भगवान्सर्वप्राणिषु संस्थितः । निरन्नेषु च विद्वत्सु त्रिदेशेष्वितरेषु चे'त्यध्यात्मे । 'तस्माद्धरेरण्डमभूदण्डादपि चतुर्मुखः । स विराण्नामकस्तस्मादधिको हरिरेव तु ॥ २० ॥

प्रकाशिका— एवं पुरुषस्यानन्तासनादिस्थानेषु देवादिप्राप्यत्वमुक्त्वेदानीं तत्साधनीभूतज्ञानकर्माधिकारिषु देवादिषु स्थित्वा पुरुषः स्वयमेव तत्कारयतीति वक्तुं प्रवृत्तस्य ततो विष्वङ्व्यक्रामदित्यर्धर्चस्यार्थकथनाय मूले सृतीति श्लोकः प्रवृत्तः । तत्र विष्वक्साशनानशने उभयाश्रय इति पदत्रयतात्पर्यं प्रमाणेनैव दर्शयति ॥ त्रिपादिति । अनेन विविधं सुष्टु अश्नत्यनन्तासनादिस्थानानि गच्छतीति विष्वक् इति विष्वक् पदार्थः सूचित इति ज्ञातव्यम् । एवकारेणात्र विष्वक् शब्देन क्षेत्रज्ञो

विवक्षित इति व्याख्यानं प्रमाणविरुद्धमिति सूचयति । उभयाश्रय पदतात्पर्यप्रदर्शनम् सर्वप्राणिषु स्थित इति । तु शब्दार्थं दर्शयितुं समित्युक्तम् । कारयितृतयेत्यर्थः । तथा चोभयाश्रयपदस्य बहुव्रीहित्वमिति भावः । साशनाशन शब्दार्थं दर्शयन् सर्वप्राणिष्वित्युक्तमेव विवृणोति ॥ निरन्ने-ष्विति । अनशन शब्दे बहुव्रीहीत्वज्ञापनाय निरन्नेत्युक्तम् । अतिप्रसङ्गपरिहाराय तद्विशेष्यमुक्तम् ॥ त्रिदशेष्विति । इतरेष्विति साशन शब्दार्थप्रदर्शनम् । तत्राप्यतिप्रसङ्गवारणाय विद्वत्स्विति तद्विशेष-णमुक्तम् । तथा च देवतातिरिक्ता ज्ञानिनो ऋष्यादय एव साशनानशन शब्दवाच्या इत्युक्तं भवति ॥ ततश्चायं श्लोकार्थः ॥ विविधरूपैः सुष्वनन्तासनादिस्थानानि अश्नतीति विष्वक् त्रिपात्स पुरुषो यद्येऽविद्या हरिपूजारूपं कर्मविद्या तत्ज्ञानं चेच्युभे सृती ऊर्ध्वलोकगमनमार्गभूते । पुनः कथं भूते । साशनानशने तदुभयसंबन्धिन्यौ तत्तुकारयितृतया उभयाश्रयः साशनानशनरूपोभयविद्याऽ-धिकारिगतः सन् स्वयमेव विचक्रमे विशेषेण कारितवानित्यर्थ इति । अनेन ततस्तदर्थम् । उक्तलोकप्राप्त्यर्थमिति यावत् । विविधं सुष्वश्नति गच्छतीति विष्वङ् त्रिपात् स पुरुषः । अत्र पूजार्थस्याप्यश्नतेर्नुमुलोपाभावश्छान्दसः । अभि सर्वतो विद्यमाने साशनानशने तत्संबन्धिन्यावुभे विद्याकर्मरूपे सृती व्युत्क्रामत्तदधिकारिषु देवेषु प्रेरकतया स्थित्वा स्वयमेव कारयामासेति मन्त्रयोजनां सूचयति ॥ २० ॥

तस्मादण्डाद्विराड जज्ञे भूतेन्द्रियगुणाश्रयः ।
तद्द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवाश्रयम् ॥ २१ ॥

तात्पर्यम्— 'अण्डाज्जातस्य तस्यान्यद्रूपं पञ्चादभूद्धरेः । यदोभयात्मको यज्ञे ब्रह्मा लोक-पितामहः । तदैव सोऽतिरिक्तोऽभूच्छर्वपूर्वपराज्जनात् ॥ २१ ॥

प्रकाशिका— तस्माद्विराडजायतेत्युत्तरमन्त्रोक्तं माहात्म्यं दर्शयितुं तस्मादण्डादित्यादिकं मूले प्रवृत्तम् । तदप्रतिपत्तिविप्रतिपत्तिनिरासाय प्रमाणेनैव व्याख्याति ॥ तस्माद्धरेरिति । अनेन मूले तस्मादित्यस्य हरिपरामर्शकत्वमण्डाद्विराट् जज्ञ इत्यनुवादादण्डं जज्ञ इति विधिरध्याहर्तव्य इति सूचयति । अपि पदं जज्ञ इत्यस्यानुकर्षणार्थम् । चतुर्मुख इति पदं रूढ्या ब्रह्मपरं न तु योगेन पाद्मपरम् । विराण्णामक इत्यनेन विराडित्युक्तार्थम् । विराजोऽधिपूरुष इत्यनेन पुरुषस्य त्रिराधिक्यमुक्तम् । तदुपपादकं हेतुं वक्तुं मूले भूतेन्द्रियगुणाश्रय इत्युक्तम् । भूताद्यात्मकदेह-वानित्यर्थः । तथा च विराट् भूतेन्द्रियात्मदेहवान् यतोऽतो विराजोऽधिकः पुरुष इति शेषमभिप्रेत्य भूतेन्द्रियेत्यस्य श्रौतं साध्यं दर्शयति ॥ तस्मादिति । विराज इत्यर्थः । तु इत्यनेन हरेर्भूताद्यात्मकदे-हवत्त्वाभावरूपं विशेषं सूचयति । तस्माद्धरेरण्डाज्जातो विराट् अन्येन रूपेण भूताद्यात्मकपद्मद्याश्रयः सन् जज्ञे । इत्यस्यैव मूलस्यार्थान्तरमभिप्रेत्याह ॥ अण्डाज्जातस्येति । स जातोऽत्यरिच्यत इत्यर्ध-

चार्थं सदृष्टान्तमुपपादयितुं द्रव्यमत्यगादिति मूलं तत्तात्पर्यमाह ॥ यदोभयात्मक इति । अनेन मूले उभयात्मके ब्रह्मेति कर्तृपदमध्याहार्यमिति सूचयति ॥ पितामह इति । तस्य श्रैष्ठ्योपपादनाय । तदैव न तु कालविलम्बेनेत्यर्थः । अतिरक्तोऽतिक्रान्तः । श्रेष्ठ इति यावत् । शर्वेत्यनेन मूले द्रव्य पदं विश्व पदं च न जडमात्रपरमिति सूचयति । पुरः पश्चादिति श्रौतपदद्वयतात्पर्यकथनाय पूर्वापरादित्युक्तम् । अत्र पूर्व पदं तन्त्रेणोपात्तम् । तथा च शर्वः पूर्वो यस्य स शर्वः शर्वपूर्वश्चासौ पूर्वापरश्च तस्मादित्यर्थः ॥ ततश्चायं श्लोकार्थः ॥ तस्मादुक्तमाहात्म्योपेताद्धरेरण्डं जज्ञे । अण्डादण्डमभिव्याप्य विराण्णामको ब्रह्मा जज्ञे । अण्डाज्जातो विराट् अन्येन रूपेण भूतेन्द्रियगुणाश्रयः पञ्चभूतैकादशेन्द्रियसत्त्वादिगुणात्मपद्माश्रितः सन् जज्ञे । तस्माद्ब्रह्मणोऽप्राकृतदिव्यविग्रहः पुरुषोऽधिक इति श्रुत्यनुसारेण पूरणीयम् । तत्र हेतुतया यतो विराट् भूतेन्द्रियगुणात्मकदेहाश्रितः । तद्बद्ध इति यावत् । अत इत्यपि योज्यम् । स उभयात्मको ब्रह्माऽऽश्रयं स्वाश्रयं तद्द्रव्यं तद्ब्रह्माण्डं पद्मं वा । श्रुतौ भूमि पदमुपलक्षणमित्यभिप्रेत्य विश्वमित्युक्तम् । भूम्यादि सर्वलोकमित्यर्थः । तदभिमानिनः शर्वादिदेवांश्च गोभिर्ज्ञानरश्मिभिरत्यगादुत्कृष्टोऽभूत् । अत्र दृष्टान्तः । आश्रयं स्वाश्रयमन्तरिक्षं तदभिमानिनं च गोभिः स्वरश्मिभिः सूर्य इवेति । अनेन तस्माद्धरेर्विशेषेण राजत इति विराडण्डम् अजायत । अण्डादण्डमभिव्याप्य विराट् विराण्णामकब्रह्माऽजायत । तस्मात्पुरुषाद्विराट् अन्येन रूपेणाजायत । अयं विराट् यतो भूतेन्द्रियगुणवद्धेतोरस्माद्विराजोऽधि अधिकः पुरुषोऽप्राकृतदेहवत्त्वात् । स उभयात्मको ब्रह्मा यदा जातस्तदैव पश्चाज्जायमानं भूमिपदोपलक्षितं विश्वं पुनः पूर्वजातं ब्रह्माण्डं पद्मं तदभिमानिनश्चात्यरिच्यातिक्रान्तवानिति मन्त्रयोजनां सूचयति । अत्र ब्रह्माण्डोत्पत्तिकथनं पुर इत्यनेन वक्ष्यमाणपूर्वजातवस्तुप्रदर्शनायेति मन्तव्यम् । ब्रह्मा विष्णोस्त्रीणि रूपाणि पशून् कृत्वा त्रीन् लोकानयजदिति कुत्रचिदुक्तस्य तात्पर्यमाह ॥ त्रिलोकेति । तथा च तत्र त्रिलोक शब्देन तत्स्थानगोविष्णुरिज्यतया विष्णुप्रतिमाभूतं लोकत्रयमेव पशुतया विवक्षितं न तु विष्णुस्वरूपभूतरूपाणि । अतो न कोऽपि दोष इति भावः ॥ २१ ॥

यदाऽस्य नाभ्यान्नलिनादहमासं महात्मनः ।
नाविन्दं यज्ञसम्भारान् पुरुषावयवानृते ॥ २२ ॥

प्रकाशिका— ब्रह्मा पुरुषावयवैर्यज्ञसाधनानि संपाद्य यज्ञेन पुरुषमजयदिति मूलवेदादावुक्तस्यार्थस्य सङ्ग्रहाय । यदास्यनाभ्यामासीदित्यादि मूलं प्रवृत्तम् । ततश्चायं मूलार्थः ॥ अस्य विराटकल्पप्रलयजलशायिनः पुरुषस्य नाभौ भवं नाभ्यां तस्मात् । नाविन्दमित्यतः पूर्वं तदेति शेषः। यज्ञसंभारान् यज्ञानां साधनानि नाविन्दन्न लब्धवान् । अनेन पुरुषावयवानां यज्ञसम्भारकारणत्वमुक्तम् ॥ २२ ॥

तेषु यज्ञाश्च पशवः सवनस्पतयः कुशाः ।
इदश्च देवयजनं कालश्चोरुगुणान्वितः ।। २३ ।।

प्रकाशिका— तान्यज्ञसंभारान्दर्शयंस्तान्निगमयति ।। तेष्वित्यादिना संभृतामयेत्यन्तेन । तेषु यज्ञसंभारेषु मध्ये यज्ञाद्याः समर्पणान्ता एते प्रधानभूताः संभारा मया संभृताः संपादिता इत्यन्वयः । यज्ञाः प्रयाजाद्याः । पशवोऽजादयः । वनस्पतयोऽश्वत्थादयः ।। देवयजनं यागभूमिः । इदं चेति वचनाद्यज्ञार्हस्थाने उपविष्टः कथयतीति गम्यते । कालो वसन्तादिः । आत्मनः स्वस्य गुणा धर्मादयस्तदन्वितः ।। २३ ।।

वसून्योषधयः स्नेहा रसलोहमृदो जलम् ।
ऋचो यजूंषि सामानि चातुर्होत्रञ्च सत्तम ।। २४ ।।

प्रकाशिका— वसूनि धनानि । ओषधयो व्रीह्यादयः । स्नेहा आज्यादयः । रसा मधुराद्याः क्षीरगुडादयो वा । लोहोऽयःप्रभृतयः । मृद इष्टिकादि साधनभूताः । जलं गङ्गादिसम्बन्धि ।। २४ ।।

नामधेयानि मन्त्राश्च दक्षिणाश्च व्रतानि च ।
देवतानुक्रमः कल्पः सङ्कल्पः सूत्रमेव च ।। २५ ।।

गतयो मतयः श्रद्धा प्रायश्चित्तं समर्पणम् ।
पुरुषावयवैरेतैः सम्भाराः सम्भृता मया ।। २६ ।।

प्रकाशिका— चतुर्भिर्होतृपोतृ उद्गातृप्रतिहर्तृसंज्ञकैः ऋत्विग्भिः क्रियमाणं कर्म चातुर्होत्रम् । नामधेयानि ज्योतिष्टोम इत्यादीनि । इन्द्र इत्यादीनि वा । ऋगादीनामुक्तत्वादत्र मन्त्र शब्देन बीजात्मका मालात्मकाश्च मन्त्रा ग्राह्याः । त्रिंशद्वर्णादर्वाग्विद्यमाना बीजात्मकास्ततोऽधिकवर्णा मालात्मकाः । व्रतानि ब्रह्मचर्यादीनि ।। देवतानामिन्द्रादि शब्दवाच्यानामनुक्रमस्तारतम्यम् । पौर्वापर्येण निर्देशो वा । कल्पः प्रयोगविधिप्रतिपादकाश्वलायनादि सूत्रात्मकग्रन्थः । सङ्कल्पोऽनेनाहं यक्ष्य इति मनोवाग्भ्यामित्यनुसन्धानकीर्तनलक्षणः । सूत्रं विविधमीमांसाः । देवतातारतम्यांगत्वेन हर्यनुसन्धानपूर्वककर्मस्वरूपज्ञानस्यापि यज्ञाङ्गत्वात् । एव शब्दस्य पुरुषावयवैरित्यनेन सम्बन्धः । गतयः स्वर्गादिफलानि । मतयो देवताध्यानादिरूपाः । श्रद्धाऽत्रोक्तं सत्यम् । अस्मान्मम प्रयोजनमस्तीत्येवं रूपास्तिक्यबुद्धिः । प्रायश्चित्तं यज्ञादिरूपकर्मणोऽन्तरालावाप्तावान्तरायपरिहारकत्वेन यथोक्तफलसाधनतापादकं कर्म । समर्मणं नाहं कर्ता हरिः कर्तेत्याद्यनुसन्धानपूर्वकं हरिप्रीतिप्रार्थनम् ।।

अत्रोक्तयज्ञसंभारसंपादकाः पुरुषावयवविशेषा मूलवेदाद्युक्ता विस्तरभयान्न प्रदर्शिता इति ध्येयम् । तत्र सूत्र शब्देन विवक्षितमर्थं दर्शयति ॥ सूत्रं मीमांसेति । अत्र मीमांसेति साधारणोक्त्या मीमांसा त्रिविधा । तत्र ब्राह्मी दैवी च कामीत्युक्ता त्रिविधाऽपि मीमांसा ग्राह्या ॥ २६ ॥

इति सम्भृतसम्भारः पुरुषावयवैरहम् ।
तमेव पुरुषं यज्ञं तेनैवायजमीश्वरम् ॥ २७ ॥

तात्पर्यम्— त्रिलोकस्थानगं विष्णुमयजच्च समाहितः । तद्रूपभूतांस्त्रींल्लोकान् पशून्कृत्वा महामना' इति गारुडे ॥ २३-२७ ॥ सूत्रं मीमांसासूत्रम् ॥ २६ ॥

प्रकाशिका— यज्ञं यज्ञनामकपुरुषम् । तेनैव प्रेरित इति शेषः । ईश्वरं ममेत्येतत्तस्य यष्टव्यत्वोपपादकम् ॥ २७ ॥

ततस्ते भ्रातर इमे प्रजानां पतयो नव ।
अयजन्व्यक्तमव्यक्तं पुरुषं सुसमाहिताः ॥ २८ ॥

प्रकाशिका— तेन देवा अयजन्त साध्या ऋषयश्च ये इत्येतदुपलक्षणमित्यभिप्रेत्येतदर्थमाह ॥ ततस्त इति श्लोकद्वयेन । भ्रातरो मरीच्यादयः । सनकादिव्यावृत्त्यर्थं प्रजानां पतय इत्युक्तम् ॥ व्यक्तं भक्तानुकंपया प्रत्यक्षीभूतम् । अव्यक्तं स्वभावतः । समाहिताश्चित्तैकाग्र्योपेताः । यथा वस्तु तथा ज्ञानिनो वा ॥ २८ ॥

ततश्च मनवः काल ईजिरे ऋषयोऽपरे ।
पितरो विबुधा दैत्याः मनुष्याः क्रतुभिर्विभुम् ॥ २९ ॥

प्रकाशिका— काले वसन्तादिरूपे । स्वस्वकाल इति वा । अपरे मरीच्यादिव्यतिरिक्ताः । पितरोऽर्यमादयः । विबुधा इन्द्रादयः । दैत्याः प्रल्हादादयः । मनुष्याः प्रियव्रतप्रभृतयः । क्रतुभिर्यज्ञैः । ॥ २९ ॥

नारायणे भगवति तदिदं विश्वमाहितम् ।
गृहीतमायोरुगुणे सर्गादावगुणे स्वतः ॥ ३० ॥

तात्पर्यम्— यस्मात्तमेवायजंस्तस्मादिदं तस्मिन्नाहितम् । 'नित्यं गृहीताः सत्वाद्या जीववज्जडवन्न तु । मिथ्यामानात्स्वरूपत्वात्स्वातन्त्र्याद्धहरिेव त्वि'ति ब्रह्मतर्के ॥ ३० ॥

प्रकाशिका— नारायणे भगवतीत्युत्तरश्लोकस्य पूर्वेण सङ्गत्यप्रतीतेस्तां दर्शयति ॥ यस्मात्तमेवेति । अनेन मूले तच्छब्दस्तस्मात्तस्मिन्नित्यावृत्त्या योजनीय इति सूचयति । तदपेक्षया यस्मादिति पूरितम् । तथा च जगत्पूज्या अस्मदादयोऽपि यस्मात्तं पुरुषमेवायजंस्तस्मादस्मदादिपूज्यतया तस्यैव सर्वोत्तमत्वादिदं महदादिकं विश्वं तस्मिन्पुरुषशब्दाभिधेये नारायणे आहितमाश्रितम् । तदधीनमिति यावत् । तथा च सर्वं पुरुष एवेदं सर्वमित्यत्र यद्विश्वस्य पुरुषाधीनत्वमुक्तं तत्रास्मदादिभिर्हीज्यत्वरूपं हेतुं सविस्तरमुक्त्वा तदेव पुनर्निगमयति ॥ नारायण इति । इत्यस्य श्लोकस्य सङ्गतिर्व्यक्तेति भावः । नारायणस्य पुरुष शब्दाभिधेयत्वं दर्शयितुं भगवतीत्युक्तम् । अनेन पुरवः षाः षड्गुणा यस्येति निर्वचनं सूचयति ॥ ननु विश्वं रजः प्रभृतिभिः प्रकृतिर्गुणैः सृष्ट्यादिकं प्राप्नोतीति श्रुत्यादावुच्यतेऽतस्तदधीनमेवेदं स्यादित्यत उक्तम् ॥ गृहीतमायोरुगुण इति । अत्र सर्गादौ सर्गाद्यर्थम् । गृहीतमायोरुगुण इत्युक्त्या पूर्वं न तद्ग्रहणमिति भाति । तथात्वे भगवदगृहीतानां तेषामवस्थानासंभवेनादित्वोक्तिविरोधः । किञ्च भगवतो गुणग्रहणं जीववच्चेद्बन्द्धत्वं स्याज्जडवच्चेद्विकारित्वम् । स्वतो गुण इत्युक्तिविरुद्धं चातः कथमेतदित्याशङ्कायां प्रमाणेनैव परिहरति ॥ नित्यं गृहीता इति । आद्यस्तु शब्दोऽवधाराणार्थः । अन्त्यो विशेषार्थः । तथा च यद्यपि सत्त्वाद्या नित्त्यं गृहीतास्तथाऽपि सर्गाद्यर्थं तु विशेषेण कार्योन्मुखतयोपगृह्यन्तेऽतः सर्गाद्यर्थं गृहीता इत्युच्यन्त इति भाव उक्तो भवति । द्वितीयशङ्कां परिहर्तुमुक्तं जीववदित्यादि जीवानां यथा मिथ्याभिमानादस्वकीयेषु स्वकीयत्वभ्रमात्ज्ञानेन्द्रियैश्च मनसेत्यादिनोक्तरीत्या । तदापातकतयेति यावत् । सत्वादि ग्रहणम् तथा जडवत् जडानां स्वरूपत्वात् विकारित्वात् तदापादकतया इति यावत् यथा तद्ग्रहणं तथा नैवेत्यर्थः । किं त्वित्यतस्तृतीयशङ्कां परिहर्तुमगुण इत्यस्य तात्पर्यं दर्शयति ॥ बहिरेवेति ॥ उक्ताभिमानविकारानापादकतयैवेत्यर्थः । कुत इत्यत उक्तम् ॥ स्वातन्त्र्यादिति । तत्सत्तादेर्भगवदधीनत्वेन तेषां तद्बन्धनाद्यापादनाक्षमत्वादिति भावः । तथा च सर्गादौ सर्गस्थितिसंहारार्थं गृहीता मायायाः प्रकृतेरुरव उत्कृष्टकार्योन्मुखगुणा रज आद्या येन तस्मिन्स्वतः स्वभावतो गुणे गुणकृताभिमानविकाररहिते नारायण इति मूलयोजना द्रष्टव्या ॥ ३० ॥

सृजामि तन्नियुक्तोऽहं हरे हरति तद्वशः ।
विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥ ३१ ॥

प्रकाशिका— ननु नारायणस्यैव रजः प्रभृतिगुणग्राहकत्वे ब्रह्मा रजसा सृजति हरस्तमसा संहरति इति वैदिकी प्रसिद्धिः कथमित्यत आह ॥ सृजामीति । तेन मन्निविष्टेन ब्रह्मनाम्ना नारायणेन नियुक्तः प्रेरितस्तस्य स्वनिविष्टस्य हरे रूपस्य नारायणस्य वश आधीनः । प्रेरित इति यावत् ।

पुरुषरूपेण विष्णुरूपेण तिस्रः शक्यत्वाच्छक्तिशब्दवाच्या गुणत्रयाभिमानिनी श्री भू दुर्गा धरतीति त्रिशक्तिधृक् । नारायण एव ब्रह्मादि नामकमूर्तित्रयेण लक्ष्मीमूर्तित्रयाभिमन्यमानगुणत्रयं धृत्वा सृष्ट्यादिकं करोति । अहं च हरश्च तत्प्रेरणयैव रजस्तमोभ्यां सृष्टिसंहारकर्तारोऽतो गुणग्राहकत्वोक्तिस्तस्मिन्नेव मुख्याऽऽवयोस्त्वमुख्यत एवातो न विरोध इति भावः ॥ ३१ ॥

इति तेऽभिहितं तात यथेदमनुपृच्छसि ।
नान्यद्भगवतः किञ्चिद्भाव्यं सदसदात्मकम् ॥ ३२ ॥

तात्पर्यम्— 'सदिति व्यक्तमुद्दिष्टमसदव्यक्तमुच्यते । गम्यागम्यस्वरूपत्वात्तत्सत्तादिर्हयेर्यतः। अतस्तस्मादन्यदेव ह्यनन्यदिति भण्यत' इति च ॥ ३२ ॥

प्रकाशिका— यद्रूपं यदधिष्ठानमित्यादि प्रश्नप्रतिवचनमुपसंहरति ॥ इतीति । इदं यद्रूपमित्यादिनोक्तमिति शब्दपरामृष्टमेव संक्षेपतो दर्शयति ॥ नान्यदिति । अत्र सदसदात्मकं विश्वं भगवतोऽन्यन्नेत्युक्त्याऽभेद एवोक्त इति प्रतीयते । सदसदात्मकत्वं चैकस्य विरुद्धमतः प्रमाणेनैवास्य तात्पर्यं दर्शयति ॥ सदिति । उक्तार्थे सदसच्छब्दौ निर्वक्ति ॥ गम्येति । अनेन गत्यर्थस्य सदेः कर्मणि क्विपि सदिति रूपमित्युक्तं भवति । तथा च व्यक्ताव्यक्तात्मकमिदं भाव्यमुत्पाद्यं किञ्चिन्मदादिकं विश्वं भगवतोऽन्यत्तदधीनसत्तामत्तादिमन्न किन्तु तदधीन सत्तादिकमेवेत्यादि प्रमेयं तत्प्रश्नानुसारेण तुभ्यमभिहितमिति मूलं योज्यमिति भावः ॥ ३२ ॥

न भारतीमेङ्ग मृषोपलक्ष्यते
न कर्हिचिन्मे मनसो मृषा गतिः ।
न मे हृषीकाणि पतन्त्यसत्पथे
यन्मे हृदौत्कण्ठ्यवता धृतो हरिः ॥ ३३ ॥

प्रकाशिका— एवं पुरुषसूक्ताद्युक्तमाहात्म्य वन्तं भगवन्तं नारदप्रश्नोत्तरतयाऽभिधायोपसंहृतम् । इदानीं पुनस्तमेव साकल्येन वर्णयति । नारदस्य मनसि विद्यमानं चोद्यं परिहर्तुं साकल्येन तद्वर्णनं केनापि कर्तुं न शक्यते । साकल्येन तस्य केनापि ज्ञातुमेवाशक्यत्वादित्युत्तरं वक्तुं सर्वदेवाद्युत्तमस्य मम वायोश्च तावत्साकल्येन तज्ज्ञाने शक्तिर्नास्तीत्याह ॥ न भारतीति श्लोकद्वयेन । म इत्येतद्वायोरित्यस्याप्युपलक्षकम् । तं भगवन्तं नाध्यगच्छम् । अधीति विशेषणान्मद्योग्यतापेक्षयाऽऽधिक्येन नाज्ञासिषमित्यर्थः । इदमुपलक्षणम् । वायुरपि नाधिगच्छतीति ग्राह्यम् । ननु साकल्येन तदज्ञानं नाशक्तिनिबन्धनं किं त्विन्द्रियजयादि तदज्ञानसामग्र्यभावनिबन्धनमेवेत्यतः सा सर्वाऽप्यस्तीति

वक्ष्यन् तावदिन्द्रियजय आवयोः स्वभावसिद्ध इत्याहाद्येन । भारती वागिन्द्रियम् । अङ्ग हे नारद । मृषाऽविद्यमानार्थकवाक्यप्रयोगरूपे व्यर्थवाक्यप्रयोगरूपे वा विषये । प्रवर्तमाना नोपलक्ष्यन्ते । मयाऽन्येन वा न दृश्यत इत्यर्थः । मृषाऽविद्यमाने व्यर्थे वाऽर्थे । हृषीकाणि वाङ्मनसेतरेन्द्रियाणि । कुतो युवयोरिन्द्रियजय औत्पत्तिक इत्यतोऽत्र कारणमाह । यतो यस्मान्मे आवाभ्याम् । औत्कण्ठ्यं भक्त्युद्रेकस्तद्युक्तेन हृदा मनसा । हरिर्धृतो ध्यातस्तस्मादिति ॥ ३३ ॥

सोऽहं समाम्नायमयस्तपोमयः
प्रजापतीनामभिवन्दितः पतिः ।
आस्थाय योगं निपुणं समाहित-
स्तन्नाध्यगच्छं यत आत्मसम्भवः ॥ ३४ ॥

प्रकाशिका— एवमिन्द्रियजयरूपं ज्ञानसाधनमावयोरस्तीत्यभिधाय श्रवणादित्रयमपि तत्साधनमस्तीत्याह ॥ सोऽहमिति । अत्राऽपि वायुरुपलक्ष्यः । स्वाभाविकेन्द्रियजयवानहं सम्यक् प्रचुरवेदोऽनन्तवेदज्ञानवानित्यर्थः । प्रचुरतपः संपन्नः प्रजापतीनां मरीच्यादीनाम् । तृतीयार्थे षष्ठी । अनेन वेदसंप्रदायप्रवर्तकावावामिति सूचयति । निपुणं यथा स्यात्तथा समाहित एकाग्रचित्तः सन् । योगं ध्यानलक्षणमुपायमास्थाय कृत्वाऽपि । यत आत्मसंभव इत्यनेन तदसम्बन्धित्वात्तदज्ञानमिति शङ्काऽपि न कार्यमिति सूचितम् । तथा च साकल्येन तदज्ञानमावयोरशक्तिनिबन्धनमेवेति भावः । ॥३४॥

नतोऽस्म्यहं तच्चरणं समीयुषां
भवच्छिदं स्वस्त्ययनं सुमङ्गलम् ।
यः स्वात्ममायाविभवं स्वयं गतो
नाहं नभस्वांस्तमथापरे कुतः ॥ ३५ ॥

तात्पर्यम्— 'सर्वजीवनिकायेषु ब्रह्मवायू हरेर्विदौ । न चान्यस्तादृशो वेत्ता यावद्वेत्ति हरिः स्वयम् । तावत्तावपि नो विष्णुं जानीतो लोकवन्दिताविति' ब्रह्माण्डे ॥ ३५ ॥

प्रकाशिका— एवं स्वस्य वायोश्च साकल्येन भगवत्ज्ञानेऽसामर्थ्यमुपपाद्येतरेषां कैमुत्येनैव तत्सिद्धमिति दर्शयन् इतरागम्यत्वरूपविशेषणविशिष्टतयैव भगवन्नमनरूपं मङ्गलमन्तेऽप्याचरति ॥ नतोऽस्मीति । समीयुषां शरणागतानां भवच्छिदं संसारनिवर्तकं स्वस्त्ययनं मङ्गलावहं सुमङ्गलं परममङ्गलरूपम् । नन्वेवमितराविदितं माहात्म्यं भगवतो नास्त्येव प्रमाणाभावादित्यत आह ॥ य

इति । स्वात्ममायायाः स्वस्वरूपभूतमहिम्नो विभवं विस्तारम् । साकल्यमिति यावत् । स्वयं स्वयमेव गतो जानाति । अनेनेश्वरप्रत्यक्षमेव तत्सद्भावे प्रमाणमित्युक्तं भवति । अपरे सरस्वत्याद्यास्तं भगवन्तमथ कात्स्न्येन जानीयुरिति कुतः प्रत्याशेत्यर्थः । मङ्गलानन्तरारंभप्रश्नकात्स्न्येष्व-थोऽथेत्यमरः । य इति यच्छब्दस्य तच्चरणमिति पूर्वेणान्वयः । अत्र कैमुत्योक्त्या इतरजीवापेक्षया ब्रह्मवाय्वोर्भगवज्ज्ञानाधिक्यं भगवत एव साकल्येन स्वज्ञानित्वं चोक्तम् । कुत इत्यतः अत्र पुराणान्तरसंवादमाह ॥ सर्वजीवेति । अनेन कैमुत्यसूचितमाधिक्यं दर्शितम् । स्वयमित्ये-तत्सावधारणमिति ज्ञापयितुं न चान्य इति । हरेरित्यनुवर्तते । नाहमित्यादेस्तात्पर्यमाह ॥ यावदिति । लोकवन्दितावित्यनेन प्रजापतीनामभिवन्दित इत्येतत्प्रमापितमिति ज्ञातव्यम् ॥ ३५ ॥

नाहं न यूयं बत तद्गतिं विदुः
न वामदेवः किमुतापरे सुराः ।
यन्मायया मोहितबुद्धयस्त्विदं
विनिर्मितं स्वात्मसमं विचक्ष्महे ॥ ३६ ॥

प्रकाशिका— एतदेवाज्ञाने कारणप्रदर्शनेन प्रपञ्चयति ॥ नाहमिति । वामदेवः शिवः । कुतो न विदुरित्यतोऽत्र हेतुमाह ॥ यन्माययेति । यस्य बन्धकशक्त्येत्यर्थः । अत्र ब्रह्मवायो-र्मायामोहितबुद्धित्वमेकादशतात्पर्ये वक्ष्यमाणरीत्या द्रष्टव्यम् । येनेदं विश्वं निर्मितं तद्गतिं तस्यस्थिति-मित्यन्वयः । किं सर्वथैव न विदुरित्यत उक्तम् ॥ स्वात्मसममिति । स्वयोग्यतानुसारं यथा स्यात्तथैव तद्गतिं विचक्ष्महे विद्मो नाधिकमित्यर्थः ॥ ३६ ॥

यस्यावतारकर्माणि गायन्ति ह्यस्मदादयः ।
न यं विदन्ति तत्वेन तस्मै भगवते नमः ॥ ३७ ॥

प्रकाशिका— ननु मूलरूपं साकल्येन ज्ञातुं वर्णयितुं वाऽशक्यं चेत्तद्विहाय तदवतारांस्त-त्कर्माणि च साकल्येन वर्णयेति नारदमानसशङ्कां ज्ञात्वा हरेरवतारांस्तत्कर्माणि च वक्तुं साकल्येन वर्णनं तत्राप्यशक्तमित्यभिप्रेत्य साकल्येनाविज्ञेयत्वरूपविशेषेण विशिष्टतया भगवन्नमनरूपं मङ्गल-मादावाचरति ॥ यस्येति । गायन्ति । योग्यतानुसारेणैवेति शेषः । यं विचित्रकर्मकर्त्रवतारवन्तम् । तत्त्वेन साकल्येन ॥ ३७ ॥

स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः ।
आत्मात्मन्यात्मनात्मानं स संयच्छति पाति च ॥ ३८ ॥

तात्पर्यम्— **'स्वयमेव स्वरूपाणि मत्स्यकूर्मादिकान्यजः । स्वात्मन्येवेच्छया सृष्ट्वा तैर्देवादीन्प्रपात्यसौ ॥ संयच्छत्यसुरान्विष्णुः कल्पे कल्पे जगत्प्रभुः । तिरोहितं स्वरूपं च प्रकाशयति शाश्वत' इति भागवततन्त्रे ॥ ३८ ॥**

प्रकाशिका— अवतारकर्माणि संक्षेपतस्तावद्दर्शयति ॥ स एष इति । अत्रात्मानमित्यस्य सृजतीत्यनेनैव संयच्छति पाति चेति क्रियाद्वयेनापि सम्बन्धः प्रतीयते । आत्मादि शब्दानां च विवक्षितार्थो न प्रतीयतेऽतः प्रमाणान्तरेणैवेमं श्लोकं व्याचष्टे ॥ स्वयमेवेति । आत्मेत्यस्यार्थः ॥ स्वयमेवेति । आत्म शब्दस्य स्वयमेवेत्यर्थकत्वम् । अथवा स्वयमेवेति पूर्वोदाहृतप्रमाणसिद्धम् । आत्मानमित्यस्यार्थः ॥ स्वरूपाणीत्यादि । स्वाभिन्नानीत्यर्थः । आत्मनीत्यस्य स्वात्मनीति । एवेत्यनेनाधारान्तरव्यवच्छेदः । आत्मनेत्यस्य तात्पर्यम् ॥ इच्छयेति । पातीत्यत्र देवादीनिति शेषः पूरणीय इत्याशयेनाह ॥ देवादीनिति । संयच्छतीत्यत्रासुरानिति शेष इत्याशयेनाह ॥ असुरानिति । कल्पे कल्पे प्रतिकल्पम् । अयं कल्पो दैनन्दिनः । पातीत्यस्यार्थान्तरमभिप्रेत्य व्यासाद्यवतारकर्माण्याह ॥ तिरोहितमिति । शाश्वतः । कुसमयेभ्यस्तिरोहितमाच्छादितं स्वस्य स्वरूपं स्वातन्त्र्येण सर्वकर्तृत्वादिकं शाश्वतो ब्रह्ममीमांसादिशास्त्रेभ्यः प्रकाशयति ॥ ततश्चायं श्लोकार्थः ॥ स पुरुषसूक्ताद्युक्तमाहात्म्योपेतः । एषः साकल्येन वर्णयितुमशक्यतयोक्तः पुरुषः पद्मनाभः कल्पकल्पे प्रतिब्रह्मदिवसम् । अजो देहोत्पत्तिशून्य आत्मा स्वयमेवात्मनि स्वात्माधारतयैवात्मना स्वेच्छयाऽऽत्मानं स्वाभिन्नमेव मत्स्यादिकं रूपं सृजति व्यक्तं करोति । तैरसुरान्संयच्छति संहरति सुरादीन्पाति । तिरोहितमात्मानं स्वस्वरूपं व्यासादिरूपैः पाति प्रकाशयति चेति ॥ ३८ ॥

विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितम् ।
सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् ॥ ३९ ॥

प्रकाशिका— व्यासादिरूपैः कीदृशं भगवत्स्वरूपं प्रकाशितं किं तज्ज्ञानेन फलमित्यतः आह ॥ विशुद्धमिति । अत्रऋतं सत्यादि शब्दानामेकार्थत्वप्रतीतिनिरासायार्थभेदं प्रमाणेनैवाह ॥ ऋतमिति । तदात्मना पूर्वावगतस्वरूपेणैव ज्ञप्तेर्ज्ञायमानत्वात् । ऋगताविति धातोर्ऋतं ज्ञातं तदात्मनेति योग्यतया सम्बध्यते । तथा च पूर्वं यथा ज्ञातं तथैव सर्वदा ज्ञायतेऽतो ऋत शब्दस्य शश्वदेकप्रकारत्वमर्थ इति भावः । साधुत्वतो गुणपूर्णत्वतः । परन्तत्वमिति सम्बन्धः । सम्यगवस्थितमित्येतदर्थतोऽनूद्य व्याख्याति ॥ सम्यक् संस्थमिति । अदूष्यत्वात् । अपवित्रस्पर्शादिनेति शेषः । दोषोज्झितत्त्वतः स्वतो निर्दोषत्वात्परं तत्त्वमेतदुक्तरूपम् । एतादृशमेवं विधं यो वेद स विमुच्यते । दग्धबीजायित जडान्तःकरणो भवतीत्यर्थः । अनेन विन्दन्ति मुनय इत्यादिकमुक्तार्थम् ॥ ततश्चायं

श्लोकार्थः ॥ विशुद्धं स्वतो निर्दोषम् । केवलं स्वसमरहितम् । ज्ञानमखिलज्ञप्तिरूपम् । प्रत्यक् सर्वान्तस्थं सम्यगवस्थितम् । अपवित्रस्पर्शेऽपीति शेषः । तथा च परतोऽपि दोषित्वं नास्तीति भावः। सत्यं साधु । गुणपूर्णं देशतोऽपरिच्छिन्नम् । अनाद्यनन्तकालतोऽपि परिच्छेदशून्यम् । निर्गुणं सत्त्वादि गुणाबद्धम् । नित्यं देहतोऽपि नित्यम् । अथवा । नित्यं सर्वदाऽस्य पूर्वोत्तरेण वा सम्बन्धः। अद्वयं स्वगतभेदशून्यम् ॥ ३९ ॥

ऋतं विन्दन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः ।
यदा तदैवासत्तर्कैस्तिरोधीयेत विप्लुतम् ॥ ४० ॥

तात्पर्यम्— 'ऋतं तदात्मना ज्ञप्तेः सत्यं साधुत्वतः परम् । सम्यक्संस्थमदूष्यत्वाच्छुद्धं दोषोज्झितत्वतः केवलं तादृशाभावात्प्रत्यगन्तरवस्थितेः । एतदेतादृशं तत्त्वं यो वेद स विमुच्यत' इति ब्रह्मतर्के ॥ ३९, ४० ॥

प्रकाशिका— ऋतं परिणामी भगवत्स्वरूपम् । मुनयः प्रशातात्मेन्द्रियाशयाः । आशयो मनः प्रकर्षेण शान्ता विषयेष्वलं बुद्धिं प्राप्ताः । देहेन्द्रियमनसो येषां ते तथा सन्तः । यदा विदन्ति व्यासादिकृतसच्छास्त्रश्रवणमननादिनाऽपरोक्षतो जानन्ति । तदैवासत्तर्कैरसच्छास्त्रोदिततर्काभासैर्विप्लुतं मिथ्याज्ञानपरंपराजनकतया दूषितं जडान्तःकरणं तिरोधीयेत दग्धबीजवद्भवतीति ॥ ४० ॥

आद्योवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च ।
द्रव्यं विकारो गुण इन्द्रियाणि विराड् स्वराट्स्थास्नु चरिष्णु भूम्नः ॥ ४१ ॥

तात्पर्यम्— 'यः शेते प्रलये विष्णुः शून्यनामा महाकृतिः । स तु नारायणो नाम नराणामयनत्वतः । रूपं द्वितीयं भवति दीपाद्दीपान्तरं यथा । सिसृक्षोस्तस्य पुरुष इत्याहुस्तद्विदो जनाः । स रमाया द्वितीये तु रूपे प्रकृतिसंज्ञिते । वीर्यमाधत्त पुरुषो महांस्तस्मादजायत । योऽसौ हिरण्यगर्भाख्यः पुरुषः सोऽपि भण्यते । श्रद्धेत्युक्ता तु तत्पत्नी साऽपि प्रकृतिरुच्यते । प्रलयेत्वशरीरौ तौ विभागेन व्यवस्थितौ । शरीरं प्राप्य पुरुषात्संयोगं तौ प्रचक्रतुः । ततः पुनर्महत्तत्त्वं प्रजातं जगदङ्कुरम् । स्वस्यैव पुत्रतां यातमहङ्कारस्ततोऽजनी'ति व्योमसंहितायाम् । पुरुषस्तस्यैवाद्योऽवतारः । कालादयो रूपवत् । अस्व रूपमपि प्रियत्वात् । 'पुरुषाद्या हरेरूपं ब्रह्माद्यास्तत्प्रियाः स्मृताः । स्वरूपभूता नैवैते तत्सन्निधियुता अपी'ति पाद्मे । 'कालो वस्तुस्वभावश्च प्रकृतिः प्राण एव च । मनश्च पञ्चभूतानि विकारास्त्रिगुणा अपि । न स्वरूपं हरेरेतत्तथाप्येषु हरिः स्थित' इति पाद्मे । सत्प्राणः । 'सदिति प्राण' इति श्रुतेः । 'द्रव्यं तु

पञ्चभूतानि विकारोऽण्डमुदाहृतम् । विराजं गरुडं प्राहुः स्वराडिन्द्र उदाहृत' इति षाड्गुण्ये । सर्वं तु रूपवद्विष्णोर्विशेषेण विभूतिमत् । अतिप्रियत्वान्नैवैतत्स्वरूपमपि भण्यत' इति स्कान्दे । 'स्वतो महत्वं तु महोविशेषप्राप्तिशक्तिता । विभूतिर्लक्षणोन्नाहो लक्ष्मीशब्देन भण्यत' इति ब्रह्मतर्के । 'प्रधानत्वेन सर्वस्मान्मत्स्यकूर्मादयो हरेः । अवताराः श्रुतौ ख्याताः स एवैते ततः स्मृताः । न स्वरूपं तु ब्रह्माद्याः स्मृता मायाविभूतयः । स्वेच्छयैषां विशिष्टत्वं कुरुते तत्तथा स्मृत' इति व्योमसंहितायाम् ॥ 'यज्ञशब्दोदितौ द्वौ तु देवौ लोकपुरस्कृतौ । एको नारायणस्तत्र रुद्र च्छिन्नस्तथापरः । स तु यज्ञाभिमानी स्यात्तत्पतिः केशवः स्मृत' इति पाद्मे ॥ ४१ ॥ इति द्वितीयतात्पर्ये षष्ठोऽध्यायः ॥ ६ ॥

प्रकाशिका— अथ विस्तरतोऽवतारान्दर्शयिष्यन्प्रथमावतारं तावद्दर्शयति ॥ आद्य इति । अत्र परस्येत्यस्योक्तविशुद्धस्वरूपादन्यस्य मायावच्छिन्नस्येत्यर्थः प्रतीयते । पुरुष पदेन च पुन्नामको ब्रह्मा । एतदुभयं प्रमाणविरुद्धमित्याशयेन पर पुरुष शब्दौ सम्यग्व्याख्यातुं तावत्प्रमाणमुदाहरति ॥ यः शेत इति । प्रलये सर्वकार्यद्रव्यविनाशकाले । अत एव शून्यनामा । तर्हि निराकारत्वप्रसङ्ग इत्यत उक्तम् ॥ महाकृतिरिति । अपरिच्छिन्नशरीरः । नन्वेवमेको नारायण आसीदिति श्रुतिविरोध इत्यत आह ॥ स त्विति । स एव । नर शब्दश्चेतनपरः । सर्वचेतनानां प्रलये तदुदरगतत्वान्नराणामयनत्वत इत्युपपन्नम् । अनेन पर शब्दार्थो दर्शित इति ज्ञातव्यम् । आद्योऽवतारः पुरुष इत्यस्यार्थं दर्शयति ॥ द्वितीयमिति । तदेवाद्यपदेनात्र विवक्षितमिति भावः । अवतार शब्दं व्याख्याति ॥ दीपादिति । अभिमानिदेवतापेक्षयैतत् । जडस्य भिन्नाभिन्नत्वेन प्रकृतेः दृष्टान्तताऽयोगात् । अनेन मूलरूपादत्यन्तभिन्नस्यांशस्यातिरेक एवावतार शब्दार्थोनदेहसम्बन्धेन जनिरित्युक्तं भवति । तस्य शून्यनामकस्य सकाशाद्विदो ज्ञानिनस्तद्वितीयं रूपं पुरुष इत्याहुः । अनेन पुरुष शब्दार्थो ज्ञानिवचनसंमतिप्रदर्शनेनोपपादितः । परमसाङ्ख्योक्तप्रकृतिपतित्व, महदादितत्त्वस्रष्टृत्वरूपपुरुषलक्षणवत्त्वाच्चास्य पुरुषनामेत्याशयेनाह ॥ स रमाया इति । मूलगतावतार शब्दव्यावृत्त्यर्थं पुरुष शब्दाभिधेयमन्यं दर्शयति ॥ योऽसाविति । ननु तस्मिन्साङ्ख्योक्तप्रकृतिपतित्वमहदादितत्त्वस्रष्टृत्वरुपपुरुषलक्षणाभावे कथं तस्य पुरुष शब्दाभिधेयत्वप्रसक्तिरित्यतस्तदप्यस्तीति दर्शयति ॥ श्रद्धेत्यादिना । पुनः स्थूलात्मना । तथा चायं पुरुष शब्दाभिधेयो यद्यपि भवति तथाऽपि पुरुषादेहसम्बन्धेन जन्मोक्त्याऽवतार इत्युक्त्यैवास्य व्यावृत्तिर्मूले दर्शितेति भावः । एवं प्रमाणमुदाहृत्याद्योवतारः पुरुषः परस्येत्येतत् स्ववचनेनापि व्याचष्टे ॥ पुरुष इति । तस्य विशुद्धस्य शून्यनामकस्य नारायणस्यैवेत्यर्थः । एवकारो मायावच्छिन्नव्यावृत्त्यर्थः तथाच परस्येत्येतदुत्तमस्येति व्याख्येयमितिभावः । अण्डान्तर्गतपुरुषमावृत्यर्थमाद्य इत्युक्तम् । पुन्नामक ब्रह्मव्यावृत्यर्थम् । अवतार इति ।

पुरुष एवेदं सर्वमित्यादिवचनात् । कालादीनामप्यवतारत्वप्रतीतिमुत्तरवाक्येनान्वयप्रदर्श नेनैवापाकरोति ॥ कालादय इति । रूपवत्स्वरूपवत् । अवतारवदिति यावत् । उच्यन्त इति शेषः । ननु स्वरूपत्वमेव कालादीनां किं न स्यादित्यत उक्त ॥ अस्वरूपमिति । स्वरूपभिन्नं प्रमितम् । यत इति शेषः । ननु तर्हि स्वरूपभिन्ने स्वरूपत्वोक्तिः किं निमित्तेत्यपेक्षायां तदनूद्य तन्निमित्तं दर्शयति ॥ अस्वरूपमपीति । परमात्मस्वरूपत्वाभावेऽपि कालादयो रूपवदिच्युन्ते । परमात्मप्रियत्वादित्यर्थः । राजप्रियेऽमात्ये राज शब्दप्रयोगदर्शनादिति भावः । अत्र प्रमाणमाह ॥ पुरुषाद्या इति । ब्रह्माद्याः कालाद्यभिमानिनः । स्वरूपत्वोक्तौ निमित्तान्तरमाह ॥ तत्सन्निधीति । तत्सन्निधियुताश्च यतोऽतः । स्वरूपवदुच्यन्त इति शेषः । कालादीनां न हरि स्वरूपत्वं तु तत्सन्निधियुतत्वमेवेत्यत्र प्रमाणान्तरमाह ॥ काल इति । वस्तुस्वभाव इत्यनेन स्वभावपदं व्याख्यातम् । असच्छब्दार्थप्रदर्शनम् ॥ प्रकृतिरिति । सच्छब्दार्थः ॥ प्राण एवेति । च शब्द इन्द्रियाणां समुच्चायकः । द्रव्य शब्दार्थः ॥ पञ्चभूतानीति । विकारोऽण्डम् । गुण इत्यस्यार्थः ॥ त्रिगुण इति । उदाहृतप्रमाणे प्राणस्य सच्छब्दवाच्यत्ववचनात् । श्रुतिसंमत्या सच्छब्दं प्राणपरतया व्याख्याति ॥ सदिति । ननु सदसच्छब्दौ मूर्तामूर्तपञ्चभूतपरावन्यत्र व्याख्यातौ । तथैवात्र कुतो न व्याख्यातावविति चेत् । तथात्वे द्रव्य पदेन पुनरुक्तिप्रसङ्ग इत्याशयेन द्रव्यादि पदार्थान्प्रमाणेनैव दर्शयति ॥ द्रव्यं त्विति ॥ गरुडमिति । वि शब्दवाच्यपक्षिराजत्वादिति भावः । इन्द्र इति । स्व शब्दोऽपि स्वः शब्दवत्स्वर्गवाचकोऽस्तीति भावः । ननु विभूत्यादिमतोऽद्भूतार्णवस्य प्राचुर्येणावतारत्ववचनात्स्वरूपांशत्वमेवास्त्वित्याशङ्कायां तत्र प्राचुर्येण स्वरूपत्ववचने निमित्तान्तरं प्रमाणेनैव दर्शयति ॥ सर्वमिति । तु शब्दो हेतुसूचनार्थः । स च प्रियत्वादिरूपः । रूपवदुच्यत इति शेषः । विभूतिमद्विभूत्यादिमत् । विशेषेण प्राचुर्येण रूपवदित्युच्यते । कुत एतदित्यत उक्तम् ॥ नैवेतदिति । एतदपि स्वरूपं नैवेति श्रुत्यादौ भण्यत यत इत्यर्थः । महत्वादित्यादौ महाविभूति श्री शब्दार्थान्प्रमाणेनैव दर्शयति ॥ स्वतो महत्वमिति । स्वतो महत्वं न वरादिप्राप्तमिति तु शब्दार्थः । उन्नाह उत्कर्षः । लक्ष्मी शब्दस्य श्री शब्दपर्यायत्वान्नासङ्गतिः । प्राधान्यतो यानित्यत्र मत्स्यादीनामवतारत्वे प्राधान्यत इति हेतुरुक्तस्तमुपपादयन् कालादिषु मध्ये विभूत्यादिमन्तः के इत्यपेक्षायां तानपि दर्शयन्प्रमाणमुदाहरति ॥ प्रधानत्वेनेति । श्रुतौ ख्याता इत्यनेन ऋषयो वेदद्रष्टार आमनन्तीति व्याख्येयमिति सूचयति । न तु नैव स्वरूपमिति कुत इत्यतोऽत्र स्मार्ते हेतुमाह ॥ मायेति । यत इति शेषः । स्मृतिगतमायाविभूतिपदमनूद्य व्याचष्टे ॥ स्वेच्छयेति । विशिष्टत्वं स्वजात्याधिक्यं तत्तस्मात् । अनेन मायया इशेच्छया विशिष्टभूतिर्भवनं येषामिति विग्रहो दर्शित इति ज्ञातव्यम् । अहं भवो यज्ञ इत्यत्र यज्ञ शब्देन रूचिसूनुः प्रतीयते । तस्य च भगवदवतारत्वेन प्रमाणसिद्धस्य विभूतिरूपेषु गणनं

बाधितमतोऽत्र विवक्षितं यज्ञ शब्दार्थं दर्शयितुं यज्ञ शब्दाभिधेयं प्रमाणेनैवाह ॥ यज्ञ शब्देति । तु शब्दोऽवधारणे । तत्र तयोर्मध्ये । केशवस्त्विति सम्बन्धः । सर्वेषां यज्ञानामभिमानी । अत एव यदा रुद्रेण दक्षाध्वरो ध्वंसितस्तदाऽयं यज्ञनामा देव एव छिन्न इति दर्शयितुं रुद्रच्छिन्न इत्युक्तम् । नन्वेवं यज्ञ शब्दोदितयोः किं साम्य नेत्याह ॥ तत्पतिरिति । केशवो ब्रह्मरुद्रप्रवर्तक इति कैमुत्येन तत्पतित्वोपपादनायोक्तम् । जातो रूचेरजनयदित्युत्तराध्यायगतश्लोकस्थ यज्ञ शब्दतात्पर्यमनेनाप्युपपादयितुमस्य प्रमाणस्यान्ते निवेश इति ज्ञेयम् । ततश्च कालः स्वभाव इत्यादेरयमर्थः ॥ ननु कथं पुरुषादेरेवतारत्वं प्रमाणान्तरेषु कालादेरपि भगवदवतारत्वकथनादित्याशङ्कापरिहाराय कालादीनां भगवत्स्वरूपत्वप्रतिपादकवचनानि गौणार्थानीति वक्तुं कालादिकं तावदनुवदति ॥ काल इत्यादि । अत्र कालादि शब्दैस्तदभिमानिनोऽपि ग्राह्याः । स्थास्नु स्थावरम् । चरिष्णुं जङ्गमम् । भूम्न इत्यनेन कालादिषु तत्सन्निधिं सूचयति ॥ ४१ ॥

अहं भवो यज्ञ इमे प्रजेशाः दक्षादयो ये भवदादयश्च ।
स्वर्लोकपालाः खगलोकपालाः नृलोकपालास्तललोकपालाः ॥ ४२ ॥

प्रकाशिका— कालाभिमानित्वेन ब्रह्मण उक्तत्वेऽपि रूपान्तरविवक्षयाऽहमित्युक्तिः । भवः शिवो भवदादयः परमहंसाः स्वर्लोकपाला इन्द्रादयः खगलोकपाला अरुणादयो नृलोकपालाः प्रियव्रतादयस्तललोकपाला बल्यादयः ॥ ४२ ॥

गन्धर्वविद्याधरचारणेशाः ये यक्षरक्षोरगनागनाथाः ।
ये वा ऋषीणाम् ऋषभाः पितॄणां दैत्येन्द्रसिद्धेश्वरदानवेन्द्राः ॥ ४३ ॥

प्रकाशिका— गन्धर्वेशा विश्वावस्वादयो विद्याधरेशाश्चित्रकेत्वादयश्चारणेशाः पुष्पदन्तादयः । रक्षोरगेति सन्धिश्छान्दसः । यक्षनाथाः कुबेरादयो रक्षनाथा निर्ऋत्यादय उरुगनाथा वासुकादयो नागनाथा अनन्तादयो ऋषीणामृषभा वसिष्ठादयः पितॄणामृषभा अग्निष्वात्तादयो दैत्येन्द्रा प्रह्लादादयः सिद्धेश्वराः सनकादयो दानवेन्द्रा वृषपर्वादयः ॥ ४३ ॥

अन्ये च ये प्रेतपिशाचभूतकूष्माण्डयादोमृगपश्वधीशाः ।
यत्किञ्च लोके भगवन्महस्वदोजः सहस्वद्बलवत्क्षमावत् ।
ह्री श्री विभूत्यात्मवदद्भुतार्णं तत्तत्परं रूपवदस्वरूपम् ॥ ४४ ॥

प्रकाशिका— प्रेतेशो यमः पिशाचेशा घण्टाकर्णादयो भूतेशा भैरवादयः कूष्माण्डेशा भृङ्ग्यादयो यादसां जलचराणामीशास्तिमिङ्गलादयो मृगाणामीशाः सिंहादयः पशूनामीशा

नन्दिकेश्वरादयः । भगवदैश्वर्यादि षड्गुणवत् । महस्ववत्स्वोत्तमवत् । ओजस्ववदवष्टम्भकशक्तिमत् । सहस्ववत्सहनवत् । बलवच्छरीरशक्तिमत् । क्षमावत्क्रोधसमुत्थितवत् ॥ ४४ ॥

प्राधान्यतो नानृषय आमनन्ति लीलावतारान्पुरुषस्य भूम्नः ।
आपीयतां कर्मकषायशोषाननुक्रमिष्ये त इमान्सुपेशलान् ॥ ४५ ॥

इति श्रीमद्भागवते द्वितीयस्कन्धे षष्ठोऽध्यायः ॥

प्रकाशिका— ह्रीमल्लज्जायोग्यलज्जावत् । श्रीमल्लक्षणोन्नाहवत् । विभूतिमद्विशेषप्राप्तिशक्तिमत् । आत्मवन्मनोजयवत् । अद्भुतार्णवमाश्चर्यसमुद्रम् । परं विशिष्टम् । सर्वं नारायणस्यस्वरूपं पुरुषादिवत्स्वरूपं न भवति तथाऽपि रूपवत्स्वरूपवत् । सर्वरूपवदामनन्तीति वक्ष्यमाणेन सम्बन्धः । तत्प्रियत्वात्तत्सन्निधियुतत्वाच्च । विभूत्यादिमदतिप्रियत्वाद्रूपवदतिशयेन रूपवदामनन्ति । मत्स्यादीनामवतारत्वे युक्तिं वदंस्तेषामनुक्रमेण कथनं प्रतिजानीते ॥ प्राधान्यत इति । सर्वोत्तमत्वेनेत्यर्थः । ऋषयो वेदद्रष्टारः ॥ आपीयतां तत्कथामृतं त्वयाऽपीयतामभिगम्यताम् । यद्वा । सुबन्तोऽयम् । कर्णपुटेन पिबतां पुरुषाणां कर्मकषायो देहारंभककर्मकषाय इव नानाविधौपधरसकाथ इव तस्य शोषो यैस्ते तथोक्तास्तान् । अत एव सुपेशलान्मधुरान् । श्रवणसुखप्रदानिति यावत् । ते तुभ्यमनुक्रमिष्येऽनुक्रमेण वर्णयिष्य इति ॥ ४५ ॥ इति श्रीभागवतटिप्पण्यां षष्ठोऽध्यायः ॥ २-६ ॥

अथ सप्तमोऽध्यायः

ब्रह्मोवाच—

यत्रोद्गतः क्षितितलोद्धरणाय बिभ्रत् क्रौडीं तनुं सकलयज्ञमयीमनन्तः ।
अन्तर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार ॥ १ ॥

प्रकाशिका— तत्र प्रथमतो वराहकल्पमनुसृत्य वराहावतारं तत्कर्म चाह ॥ यत्रेति । अनन्तो यत्र यदा क्रौडीं क्रोडस्य वाराहस्य विद्यमानम् । सकलयज्ञमयीं यज्ञोपकरणकुशादिजननीं तनुं बिभ्रत् । क्षितितलोद्धरणायोद्धृतो जलादूर्ध्वङ्गतः । हन हिंसागत्योः । तदोपगतं तं प्रसिद्धम् । ददार । दृ विदारण इति धातोः । विदारितवानित्यर्थः ॥ १ ॥

जातोरुचेरजनयत्सुयशाः सुयज्ञः आकूतिसूनुरमरानथ दक्षिणायाम् ।
लोकत्रयस्य महती महरद्य आर्तिं स्वायम्भुवेन मनुना हरिरित्यनूक्तः ॥ २ ॥

तात्पर्यम्— **'क्रियाभिमानाद्यज्ञोऽसाविन्द्रसूनुः प्रकीर्तितः। यज्ञेशत्वात्स्वयं विष्णुर्यज्ञो रुचिसुतः स्मृत' इति पाद्मे। हरिरिति ज्ञात्वेशावास्यमित्यादिनाऽनूक्तः। 'त्रयी श्रुतिर्नित्यवाक्च वेदोऽनुवचनं तथे'ति ह्यभिधानम्॥ २॥**

प्रकाशिका— यज्ञावतारं तत्कर्म चाह॥ जात इति। अत्र सुयज्ञ इत्येतत् सु शब्दव्यावृत्यमन्यं यज्ञं प्रमाणेनैव दर्शयन्व्याचष्टे॥ क्रियाभिमानादिति। इन्द्रसूनौ यज्ञ शब्दप्रवृत्तिनिमित्तं क्रियारूप-यज्ञाभिमानित्वम्। भगवति तु तदीशत्वमेवेत्यर्थः। स्वयं साक्षाद्विष्णुस्तथा चेन्द्रसूनोर्यज्ञस्य व्यावृत्त्यर्थं मूले सु शब्द इति भावः। हरिरिति शब्देनानु पश्चादुक्त इति व्याख्यानमसत्। स्वायं-भुववचने ईशावास्यमित्यादिरूपे हरि शब्दप्रयोगाभावादतोऽत्रापेक्षितमध्याहृत्य सम्यग्व्याचष्टे॥ हरिरितीति। तथा च ज्ञात्वेत्यध्याहारः। अनुक्त इति चैकं पदमिति भावः। अनुक्तपदार्थान्त-र्गतानुवचनं दर्शयन्नुक्तपदं व्याख्याति॥ ईशावस्यमिति। अनेनानूक्त इत्यत्र प्रकृतेस्तन्त्रन्याये-नोपसर्गप्रत्ययाभ्यां सम्बन्धः। तथा चानुवचनेशावास्यमित्यादिना वेदेनोक्तःस्तुत इति लभ्यत इति व्याख्यानं सूचयति। अनुवचनशब्दस्य वेदवाचकत्वेऽभिधानमाह॥ त्रयीति॥ ततश्चायं श्लोकार्थः॥ सु पूज्यं यशो यस्य सः सुयशा अनन्तो रुचेः प्रजापतेः सकाशाच्छोभना यज्ञा यस्मादिति यज्ञेशत्वेन स यज्ञनामा सन् आकूत्यां रुचिभार्यायां जातः प्रादुर्भूतोऽभूत्। अथेन्द्रपदं प्राप्य दक्षिणायां रमावतारायां स्वभार्यायां तुषिताख्यानमरानजीजनद्धरिरिति ज्ञात्वा स्वायंभुववचनेनेशावास्यमित्यादि वेदेनोक्तः स्तुत इति॥ २॥

जज्ञे च कर्दमगृहे द्विजदेवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे।
ऊचे य आत्मशमलं गुणसङ्गपङ्कमस्मिन्विधूय कपिलः स्वगतिं प्रपेदे॥ ३॥

प्रकाशिका— कपिलावतारमाह॥ जज्ञ इति। अनन्त पदमत्राप्यनुपञ्जनीयम्। अनन्तः। हे द्विज नारद। कर्दमगृहे कर्दमप्रजापतिपत्न्यां नाम्ना देवहूत्यां नवभिः स्त्रीभिर्भगिनीभिः समं सह कपिलनामा जज्ञ इत्यन्वयः। तत्कर्माह॥ स्वमात्र इत्यादिना। स्वमात्रे देवहूत्यै आत्मगतिं परमसाङ्ख्यशास्त्ररूपां स्वात्मविद्यामूचे उपदिष्टवान्। यश्चास्मिन्नधिकारिजने विद्यमानं गुणसङ्गपङ्कं शब्दादि विषयसम्बन्धप्राप्तपङ्कस्थानीयमात्मशमलं मनोदोषं परमसाङ्ख्यशास्त्रोपदेशादिना विधूय प्रक्षाल्य स्वगतिं स्वसाक्षात्कारं प्रपेदे प्राप्तवान्। तत्साक्षात्कारविषयो जात इत्यर्थः। स कपिलो जज्ञ इत्यन्वयः॥ ३॥

अत्रेरपत्यमभिकाङ्क्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान्स दत्तः।
यत्पादपङ्कजपरागपवित्रदेहायोगर्धिमापुरमयीं यदुहैहयाद्याः॥ ४॥

तात्पर्यम्— अमयीं विष्णुप्रधानाम् ॥ ४ ॥

प्रकाशिका—दत्तात्रेयावतारमाह ॥ अत्रेरिति । अत्रामयीमित्येतदप्रतीतेरनूद्य व्याचष्टे ॥ अमयीमिति । विष्णुप्रधानां विष्णुसेवोपयुक्ताम् । अकारस्य विष्णुवाचकत्वान्मयटश्च प्राधान्याद्यर्थत्वादिति भावः ॥ ततश्चायं श्लोकार्थः ॥ हरिसममपत्यमभिकांक्ष्यत इच्छतोऽत्रेर्मुनेस्तपसा तुष्टो भगवान् मया तुभ्यमहं पुत्रतया दत्त इति यद्यस्मादाह तस्मात्स अत्रिपुत्रो नाम्ना दत्त इति प्रसिद्धः । भक्तेभ्यो योगैश्वर्यदानं तत्कर्म चाह ॥ यत्पादेति । यस्य दत्तस्य पादपङ्कजपरागेन शिरसा धृतेन पवित्रा देहा येषां ते तथा । योगर्द्धिम् अणिमादि योगसमृद्धिम् । यदुर्ययातिपुत्रो हैहयः कार्तवीर्यार्जुनः ॥ ४ ॥

तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात्सुतपसस्तपतः सनोभूत् ।
प्राक्कल्पसम्प्लवविनष्टमिहात्मतत्त्वं सम्यग्जगाद मुनयो यदचक्षतात्मन् ॥ ५ ॥

तात्पर्यम्— मे तपतः सतः । सः नः अर्थे । सनात्पूर्वम् । 'ब्रह्मणस्तपतः पूर्वं विष्णुर्जात उरुक्रमः । सर्वलोकहितार्थाय येन रूपं प्रकाशितम् । यश्च पाति सदा लोकानजितो जयतां वरः । तस्माद्रुद्रः समुत्पन्नः सर्वसंहारकृद्विभुः । एते त्रिपुरुषाः प्रोक्ताः सृष्टिस्थित्यन्तकारिणः । निमित्तमात्रं तौ देवौ विष्णुः सर्वस्य कारणमि'ति स्कान्दे ॥ ५ ॥

प्रकाशिका— विष्ण्ववतारं तत्कर्म चाह ॥ तप्तमिति । अत्र सनादादौ सनोभूदिति व्याहतं भातीत्यतः श्लोकं समग्व्याख्याति ॥ मे तपत इति । अनेन तपत इत्यस्य सनादित्यनेनान्वयेन भ्रान्तिं वारयति । मे तपतः सकाशादित्यर्थप्रतीति वारणाय सत इत्युक्तम् । सन इति नैकपदं किन्तु सः नः इति पदद्वयम् । अतो नोक्तव्याहतिरित्याशयेनाह ॥ सः नः इति । तादर्थ्येचेयं षष्ठीत्याशयेनार्थ इत्युक्तम् । तेन पदद्वयकरणेनानन्वयशङ्का परास्ता । आदावित्यस्यान्वयं दर्शयति ॥ सनात्पूर्वमिति । अयमवतारः क इति न प्रतीयतेऽतः प्रमाणेनैव तद्दर्शयन्नुक्तार्थं दृढीकरोति ॥ ब्रह्मण इति । विष्णुर्जातो विष्णुनामा जात इत्यर्थः । उरुक्रमो मूलरूपी । सनोर्थ इत्यस्य तात्पर्यम् ॥ सर्वलोकेति । आत्मतत्त्वं जगादेत्यस्यार्थः ॥ येन रूपं स्वरूपं प्रकाशतमिति । मूलोक्तमस्य कर्मोपलक्षणमित्याशयेनाह ॥ यश्च पातीत्यादि । त्रयाणां साम्यशङ्कामपाकरोति ॥ निमित्तेति ॥ ततश्चायं श्लोकार्थः ॥ आदौ मया विविधलाकसिसृक्षया तपस्तप्तं कृतम् । तदा मे मम तपतस्तपः कुर्वतः सतः सुतपसः पूज्यतपसः सनादादौ सनोत्पत्तेः पूर्वं नोऽस्माकमर्थे स विष्णुनामकोऽभूत् । अनन्तरं प्राक् कल्पसंप्लवः प्रलयस्तेन विनष्टं तिरोहितमिहाधिकारिजने । आत्मतत्त्वं परमात्मस्वरूपं सम्यक् जगादोपदिदेश । उपदेशानन्तरं यदात्मतत्त्वं मुनय आत्मन् स्वहृदेऽचक्षत । तज्जगादेत्यन्वय इति ॥५॥

धर्मस्य दक्षदुहितर्यजनि स्वमूर्त्या नारायणो नर इति स्वतपः प्रभावः ।
दृष्टात्मनो भगवतो नियमावलोपं देव्यस्त्वनङ्गपृतना घटितुं न शेकुः ॥ ६ ॥

तात्पर्यम्— 'नरो नारायणश्चैव हरिः कृष्णस्तथैव च । चत्वारो धर्मतनया हरिरेव त्रयो मतः । अनन्तो नरनामाऽत्र तस्मिंस्तु नरनामवान् । विशेषेण स्वयं विष्णुर्निवसत्यम्बुजेक्षणः । तस्माच्चतुर्धा धर्मस्य जातो विष्णुरितीरित' इति षाड्गुण्ये ॥ ६ ॥

प्रकाशिका— नरनारायणावतारं तत्कर्म चाह ॥ धर्मस्येति । अत्र नरस्यापि भगवदवतारत्वं प्रतीयते । नरनारायणयोर्द्वयोर्धर्मपुत्रत्वं चातः प्रमाणेनैव श्लोकतात्पर्यं दर्शयति ॥ नरो नारायण इति । द्वितीयश्च शब्द इति शब्दार्थकः । हरिरेवेत्यत्र न नर इवाविष्टा इत्येवकारार्थः । अनन्तः शेषः । नरस्य शेषत्वे धर्मगृहे हरिश्चतुर्धा जात इति ग्रन्थान्तरविरोधं परिहर्तुमाह ॥ तस्मिंस्त्विति । तु शब्दोऽवधारणे । अम्बुजेक्षण इत्यनेन तत्राविष्टस्य हरेर्नराकारत्वं सूचयति । प्रथमार्धगताद्यैवकार-स्यानन्त एवेति सम्बन्धः । तत्रत्यद्वितीयैवकारस्य तस्मादेवेति सम्बन्धः । धर्मस्य गृह इति शेषः । सकाशादिति वा । तथा च मूले हरिकृष्णावप्युपलक्षणया ग्राह्याविति भावः ॥ ततश्चायं श्लोकार्थः ॥ धर्मस्य सकाशाद्दक्षदुहितरि दक्षकन्यायां मूर्तिसंज्ञायां धर्मपत्न्यां स्वमूर्त्या स्वरूपभूतदेहेन नारायणो नरो हरिः कृष्ण इति नाम्नाऽजनि । कीदृशः । लोकशिक्षार्थं स्वतपसः प्रभावः प्रतापो यस्मिन्स स्वतपः। लोकशिक्षार्थं तपःकुर्वाणौ नरनारायणौ बदर्यां सहैव तिष्ठत इति तयोरेव स्व पदेन ग्रहणम् । स्वतपःप्रभाव इत्युक्तमेव विवृणोति ॥ दृष्टात्मन इति । नित्यमपरोक्षीकृतनिजस्वरूपस्येत्यर्थः । अनेन कदाचिद्धर्यपरोक्षज्ञानिनोऽपि नियमावलोपः केनापि कर्तुं न शक्यते किमु सदाऽपरोक्षज्ञानिनोऽस्येति सूचयति । हेत्वन्तरमाह ॥ भगवत इति । नियमावलोपं तप आदेर्भङ्गम् । देव्यस्तु देवस्त्रियोऽपि । कथं भूताः । अनङ्गस्य कामस्य पृतना इव पृतनाः सेनास्थानीया घटितं कर्तुं न शेकुः । शक्ता न जाता इत्यर्थः ॥ ६ ॥

कामं दहन्ति कृतिनो ननु रोषदृष्ट्या रोषं दहन्तमुतते न दहन्त्यसह्यम् ।
सोऽयं यदन्तरमलं निविशन्बिभेति कामः कथं नु पुनरस्य मनः श्रयेत ॥ ७ ॥

प्रकाशिका— अनेनार्थात्कामजय उक्तः । स तु न युक्तः । दृष्टात्मनां जितकामानां शङ्करादीनां मनसि पुनः पार्वत्यादिकामनादर्शनादित्यतस्तद्वैलक्षण्यं दर्शयन् अस्य मनसि पुनः कामोदयो नास्तीत्याह ॥ काममिति । कृतिनस्तपस्विनो रुद्रादयः । रोषपूर्वकदृष्ट्या कामं दहन्ति ननु प्रसिद्धमेतत् । अनेन रोषं दहन्तीत्येतदुपपादितमिति ज्ञातव्यम् । रोषदाहे रोषदृष्टेरसम्भवात् । उत

शब्दोऽप्यर्थः । तेऽपि रोषं न दहन्ति । अनेन क्रोधयुतां रुद्रादीनां मनोऽतः सदोषमिति सूचयति । ननु रोषस्य स्वानपकारित्वात्ते नं दहन्तीत्यत उक्तम् ॥ दहन्तमत एवासह्यमिति । सदोषतया प्रसिद्धोऽयं रुद्रस्य मनसि विद्यमानो रोषो यदन्तो यस्य नारायणस्यान्तो मनो निविशन्प्रवेष्टुं यत्नं कुर्वन् बिभेति । कुतः । यत इमममलं प्रकृतिसम्बन्धादिमलशून्यम् । अस्य नारायणस्य मनः प्रकृति-सम्बन्धशून्यं कथं श्रयेत न कथमपि । नु वितर्के । तथा च तर्क एवात्र प्रमाणमिति सूचयति । स चैवं रूपो रुद्रादीनां मनसि पुनः कामोदयो युक्तः । तन्मनसः कामाभावोऽपि क्रोधलक्षणकार्योन्ने-यप्रकृतिसम्बन्धादिरूपदोषयुक्तत्वात् । नारायणमनसि न तद्वत् प्रकृतिसम्बन्धादिदोषोन्नायकं क्रोधादिकमस्ति । अतस्तत्सर्वथा निर्दोषमिति निश्चीयते । एवं च निर्दोषतया निश्चितस्तत्रानादितो जितः कामः पुनरुत्तरत्रापि कथं स्यादिति ॥ ७ ॥

विद्धः सपत्न्युदितपत्रिभिरन्ति राज्ञो बालोऽपि सन्नपगतस्तपसे वनाय ।
तस्मा अदाद्ध्रुवगतिं गृणते प्रसन्नो दिव्याः स्तुवन्ति मुनयो यदुपर्यधस्तात् ॥८॥

तात्पर्यम्— 'अवतारो महाविष्णोर्वासुदेव इतीरितः । यो ध्रुवाय निजं प्रादात्स्थानमन्या-नधिष्ठितमि'ति प्रकाशसंहितायाम् ॥ ८ ॥

प्रकाशिका— विद्ध इति श्लोके उच्यमानोऽवतारः क इति न प्रतीयतेऽतस्तं प्रमाणेनैव दर्शयति ॥ अवतार इति ॥ ध्रुवतपसा प्रसन्नो हरिर्येन विग्रहविशेषेण तस्मै वरं दत्तवान् सोऽयमवतारो वासुदेव इति शास्त्रे प्रतिपादित इत्यर्थः । अत एव तस्मै नारदेन वासुदेवद्वादशाक्षरविद्योपदिष्टेति वक्ष्यमाणमुपपन्नमिति ध्येयम् । निजमित्येतदेव विवृणोति ॥ अन्यानधिष्ठितमिति । तथा च ध्रुवगमनात्पूर्वं स्वयमेव तत्राधिपतितया स्थित इति भावः ॥ ततश्चायं श्लोकार्थः ॥ मातुः सपत्न्या सुरूच्या उदितानि वाक्यान्येव पत्रिणो बाणास्तै राज्ञ उत्तानपादोऽति समीपे विद्धः सन् ध्रुवस्तपसे तपस्तप्तुमुपगतः पुरान्निर्गतः । वनाय वनमुद्दिश्य ध्रुवगतिमचलस्थानम् । वैकुण्ठादिव्यावृत्त्यर्थमाह ॥ दिव्या इति । उपरिस्थिता दिविभवा देवा । अधस्तात्स्थिता मुनयः । सप्तर्षयः । यद्यां स्तुवन्ति । तमिति शेष इति ॥ ८ ॥

यद्वेन मुत्पथगतं द्विजवाक्यवज्रनिष्पिष्टपौरुषभगं निरये पतन्तम् ।
त्रात्वार्थितो जगति पुत्रपदश्च लेभे दुग्धा वसूनि वसुधा सकलानि येन ॥ ९ ॥

तात्पर्यम्— 'पृथुर्नाम महाराजस्तत्र विष्णुः स्वयं प्रभुः । पृथुनामा चतुर्बाहुः प्रविष्टस्तेन चार्थित' इति महासंहितायाम् ॥ ९ ॥

प्रकाशिका— यद्वेनमिति श्लोके वेनपुत्रः पृथुर्भगवदवतार इति प्रतीयते तत्तु प्रमाणविरुद्धम् । अत आवेशाभिप्रायकमिदं व्याख्येयमिति प्रमाणेनैव दर्शयति ॥ पृथुर्नामेति तेने चेति । तेन पृथुना पूर्वजन्मन्यर्थितो वेनमरणानन्तरम् ऋषिभिश्चेति चार्थः ॥ तथा चायं मूलार्थः ॥ यद्यदोत्पथगतं मामेव यजध्वम् । मत्तोऽन्यो देवता नास्तीत्यद्वैतमार्गवर्तिनमत एव द्विजवाक्यलक्षणेन वज्रेण निष्पिष्टौ विनाशितौ पौरुषं पराक्रमो भग ऐश्वर्यं च तौ यस्य तम् । निरये पतन्तम् । निरयपाताभिमुखं च ज्ञात्वाऽर्थितः । ऋषिभिरिति शेषः । पृथुना पूर्वजन्मनि तदा पुत्रपदं वेनपुत्रस्य पृथोः शरीररूपं स्थानं लेभे । तत्राविष्ट इत्यर्थः । वेनपुत्रस्य पदं पृथुरिति नाम च लेभ इति च शब्दार्थः । तत्कर्म चाह ॥ दुग्धेति । वसुधा भूमिर्येन पृथ्वाविष्टेन पृथुनाम्ना विष्णुना दुग्धा । सकलानि वसून्यमृतादि द्रव्याणि दुग्धानि । वसुधां निमित्तीकृत्य पृथुनाम्ना विष्णुना सकलानि द्रव्याणि दुग्धानीत्यर्थ इति ॥ ९ ॥

नाभेरसावृषभ आस सुदेविसूनुः यो वै चचार समदृग् हृदि योगचर्याम् ।
यत्पारमहंस्यमृषयः पदमामनन्ति स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः ॥ १० ॥

तात्पर्यम्— यद्रूपं परमहंसप्राप्य पदमामनन्ति ॥ १० ॥

प्रकाशिका— ऋषभावतारमाह ॥ नाभेरिति । अत्र यत्पारमहंस्य पदमित्येतत्प्रत्ययार्थं दर्शयन्व्याचष्टे ॥ यद्रूपमिति । यस्य रूपमित्यर्थः । परमहंसप्राप्यं परमहंसधर्मम् । ज्ञातुमिति शेषः । तथा च मूले यदित्यव्ययं षष्ठ्यर्थे । पदमित्यनूद्य रूपमिति व्याख्यातमिति ज्ञेयम् ॥ ततश्चायं श्लोकार्थः ॥ असौ नारायणः । नाभेः राज्ञः सकाशात् सुदेविसुनूर्ऋषभ आसेत्यन्वयः । नाभिपत्न्या मेरुदेव्याः । सुदेवीति नामान्तरम् । तत्कर्माह ॥ यो वा इति । सर्वेषां हृदि समं स्वात्मानं पश्यतीति समदृक् योगचर्यां परमहंसधर्मं चचार । लोकशिक्षार्थमिति शेषः । यद्यस्य पदं रूपं पारमहंस्यं परमहंसधर्मज्ञापनाय । परमहंसैः प्राप्यमामनन्तीत्यर्थः । यश्च स्वस्थः स्वस्मिन्नेव स्थितः प्रशान्त-करणः प्रकृष्टसुखात्मकेन्द्रियः अत एव परिमुक्तसङ्गो बाह्य सुखापेक्षारहितः स ऋषभ इति यच्छब्दान्वयः ॥ १० ॥

सत्रे ममास भगवान्हयशीर्ष एषः साक्षात्सयज्ञपुरुषस्तपनीयवर्णः ।
छन्दोमयो मखमयोऽखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ॥११॥

तात्पर्यम्— 'छन्दांसि च मखाश्चैव देवा लोकाश्च सर्वशः । सर्वे विष्णौ स्थिता यस्मादतः सर्वमयो ह्यसावि'ति महासंहितायाम् ॥ ११ ॥

प्रकाशिका— हयग्रीवावतारं तत्कर्म चाह ॥ सत्रे इति । अत्र छन्दोमय इत्यादिना वेदादि तादात्म्यं प्रतीयतेऽतस्तदभिप्रायं प्रमाणेनैव दर्शयति ॥ छन्दांसि चेति । अत एवेति सम्बन्धः । सर्वमयः छन्दादिसर्वमय इत्युच्यत इत्यर्थः । हि शब्दस्तत्प्रमाणप्रसिद्धिद्योतकः ॥ ततश्चायं श्लोकार्थः ॥ वेदादिप्रसिद्ध एषो यज्ञपुरुषो यज्ञभोक्ता पुरुषः सत्रे आसेत्यस्योपपादकमेतत् । भगवान्नारायणः साक्षात्स्वयमेव मम सत्रेति मया क्रियमाणे यज्ञे हयशीर्षो हयग्रीवनामाऽऽस । तपनीयं सुवर्णं तद्वर्णो यस्य स तपनीयवर्णः । छन्दाद्याधारोऽखिलपदमखिललोकपरम् । तथा चाखिललोकदेवताधार इत्यर्थः । वेदानां तद्विधेयानां यज्ञानां तदिज्यानां देवतानां तत्प्राप्यानां लोकानां च सत्तादिप्रद इति भावः । अस्य हयग्रीवस्य श्वसतः श्वासं कुर्वतो नस्तो नासापुटादुशतीरुशत्योऽपौरुषेयत्वेन शुद्धा वाचो वेदादिलक्षणा बभूवुः । निर्गता इति ॥ ११ ॥

मत्स्यो युगान्तसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः ।
विस्रंसितानुरुभये सलिले मुखान्मआदाय तत्र विजहार ह वेदमार्गान् ॥ १२ ॥

तात्पर्यम्— क्षोणीमयनौकाश्रयत्वात्क्षोणीमयः ॥ १२ ॥

प्रकाशिका— मत्स्यावतारं तत्कर्म चाह ॥ मत्स्य इति । मत्स्यावतारद्वयकर्मात्र कथ्यते । स भगवान्मे मुखाद्विस्रंसितान्निर्गतान्वेदमार्गान्वेदप्रभेदान् । सर्वानपि वेदानिति यावत् । उरुभयं यस्मात्त स्मात्तस्मिन्सलिले वेदापहर्ता हयग्रीवनामकेन दैत्यन । आच्छादितानीति शेषः । आदाय तं हत्वा पुनः समादाय तत्र सलिले विजहारेत्याद्यमत्स्यावतारकृत्यम् । युगान्तसमये चाक्षुषमन्वान्तरसमाप्ति-समये मनुना भाविमनुवैवस्वतेन सत्यव्रतनाम्ना राज्ञा मत्स्य उपलब्धो दृष्टः । क्षोणीमयत्वं तस्मिन् घटयति ॥ क्षोणीमयेति । तथा च क्षोणी शब्देन भूम्यात्मिका नौरेवात्र विवक्षितेति भावः । तदा-श्रयत्वात् । क्षोणीमय इत्युच्यत इति शेषः । अत एव निखिलजीवनिकायानां केतुराश्रय उरुभये सलिले मन्वंतरप्रलयजले विजहारेति द्वितीयमत्स्यावतारकर्मेति ज्ञेयम् । हेत्यत्र प्रमाणप्रसिद्धिं दर्शयति ॥ १२ ॥

क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्धयआदिदेवः ।
पृष्टेन कच्छपवपुर्विदधार गोत्रं निद्रेक्षणोऽद्रिपरिवर्तकषाणकण्डुः ॥ १३ ॥

प्रकाशिका— कूर्मावतारं तत्कर्म चाह ॥ क्षीरोदधाविति । आदिदेवो नारायणोऽमृतलब्धयेऽ-मरदानवयूथपानां क्षीरोदधिमुन्मथ्नतां सतां क्षीराब्धौ मज्जन्तं गोत्रं मन्दरपर्वतम् । कच्छपवपुः कूर्माकारशरीरो भूत्वा पृष्टेन विदधार । यथाऽद्रिर्न पुनर्मज्जति तथा दधारेति वि शब्दार्थः ।

तज्जातिस्वभावमाह ॥ निद्रेक्षण इति । निद्रयेषन्मीलितनेत्रः । निद्राहेतुमाह ॥ अद्रीति । मन्दराद्रेः परिवर्तः पृष्टे परिभ्रमणं स एव कषः कषाणं घर्षणं तेनाणति गच्छतीत्यणः कषाणा कण्डूर्यस्य स तथोक्तः ॥ १३ ॥

त्रैविष्टपोरुभयहारिनृसिंहरूपं कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रम् ।
दैत्येन्द्रमाशुगदयाभिपतन्तमारा दूरौ निपात्य विददार नखैः स्फुरन्तम् ॥ १४ ॥

प्रकाशिका— नृसिंहावतारं तत्कर्म चाह ॥ त्रैविष्टपेति । आदिदेवः । त्रैविष्टपानां देवानां यदुरुभयं तद्धरति संहरतीति त्रैविष्टपोर्भयहारिनृसिंहरूपं कृत्वा प्रकटीकृत्य । कथं भूतम् । भ्रमन्तीभिर्भ्रूकुटीभिर्दंष्ट्राभ्यां च करालं भयङ्करं वक्त्रं यस्य स तथा । दैत्येन्द्रं हिरण्यकशिपुम् । आरात्समीपे स्फुरन्तम् ॥ १४ ॥

अन्तः सरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरम्बुजहस्त आर्तः ।
आहेदमादिपुरुषाखिललोकनाथतीर्थश्रवः श्रवणमङ्गलनामधेय ॥ १५ ॥

प्रकाशिका—हर्यवतारं तत्कर्म चाह ॥ अन्तःसरसीति । अत्र हरिरिति मूलरूपी हरिः प्रतीयते । तदसङ्गतम् । अवतारगणनप्रस्तावात् । अतोऽत्र हरि शब्दवाच्यं गजेन्द्रमोचकमवतारं प्रमाणेनैव दर्शयति ॥ हरिरिति । मनुर्मनुत्वेनावतीर्णो हरिर्हरिर्नामा वै प्रसिद्धश्चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तापसः । हरिरित्याहुतो येन गजेन्द्रो मोचितो ग्रहादिति वक्ष्माणत्वात् । ननु तर्हि तस्य तापसनाम कथमित्यत उक्तं तपसि क्रियमाणे स एव तापसनामा जातो बभूवेति । तथा च हरिनामकस्य चतुर्थमनोस्तापस इति तपः करणे निमित्तं नामान्तरमिति भावः । तत्कर्माह ॥ गजेन्द्रमिति ॥ ततश्चायं श्लोकार्थः ॥ यदा यूथपतिर्गजेन्द्रः सरस्यन्तर्ग्राहेण नक्रेण पदे गृहीत आर्तः सन्नम्बुजहस्तः शुण्डयाऽम्बुजं गृहीत्वा तीर्थं पवित्रं श्रवः कीर्तिर्यस्य स तीर्थश्रवस्तस्य सम्बुद्धिः । हे तीर्थश्रवः श्रवणमात्रेण मङ्गलप्रदं नारायणादि नामधेयम् । यस्य इतीदमाह ॥ १५ ॥

स्मृत्वा हरिस्तमरणार्यिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः ।
चक्रेण नक्रवदनं विनिपाटच तस्माद्धस्ते प्रगृह्य भगवान्कृपयोज्जहार ॥ १६ ॥

तात्पर्यम्— 'हरिस्तापसनामाऽसौ जातस्तपसि वै मनुः । गजेन्द्रं मोचयामास ससर्ज च जगद्विभुरि'ति मात्स्ये ॥ १६ ॥

प्रकाशिका— तदा हरिर्हरिनामा तापसो मनुस्तमरणार्थिनं शरणार्थिनं स्मृत्वा तदनुग्रहोन्मुखो भूत्वा । नित्यज्ञानस्य भगवतः संस्कारजन्यज्ञानरूपस्मरणासम्भवात् । कुतो स्मरेतीशावास्यवाक्य-

व्याख्यावसरे भगवत्पादैरेवमेव स्मरण शब्दस्य व्याख्याततत्वाच्चोक्तं व्याख्यानं युक्तमिति ध्येयम् । नन्वल्पेनैव स्तोत्रेण कथमनुग्रहोन्मुखो जात इत्यत उक्तम् ।। अप्रमेय इति । साकल्येन केनाऽपि प्रमापितुमेवाशक्यो दूरे स्तोतुमिति भावः । भुजपदेन स्कन्धो लक्ष्यः । विनिपात्य स्थित्वा तस्माद्ग्रहाद्धस्ते शुण्डयाम् । उज्जहरोद्धृतवानिति ।। १६ ।।

ज्यायान्गुणैरवरजोऽप्यदितेः सुतानां लोकान्विचक्रम इमान्यदथोऽधियज्ञः ।
क्ष्मा वामनेन जगृहे त्रिपदच्छलेन याञ्चामृते पथिचरन्प्रभुभिर्न चाल्यः ।। १७ ।।

प्रकाशिका— वामनावतारं तत्कर्म चाह द्वाभ्याम् ।। ज्यायानिति । अधियज्ञो यजमानऋत्विगादिसर्वदेहनियामको हरिः । अधियज्ञोऽहमेवात्र देह इति । देहस्था विष्णुरूपाणि अधियज्ञ इतीरित इतिं वचनात् । तथा चाधिगतो यज्ञमिति प्रादिसमासो वाऽधिष्ठितो यज्ञोऽनेनेति बहुव्रीहिर्वा समासो नाव्ययीभाव इति ज्ञातव्यम् । बलेर्भूदाने हेतुगर्भविशेषणमिदम् । गुणे ज्यायानपि अदितेः सुतानामिन्द्रादि देवतानामवरजः कनीयानभूत् । गुणैर्ज्यायस्त्वमुपपादयति यद्यस्मादिमांल्लो-कान्विचक्रमे पादन्यासैराक्रान्तवान् अथो तस्माद्गुणैर्ज्यायानित्यन्वयः । ननु लोकान्कुतो विचक्रम इत्यतो हेतुमाह ।। क्ष्मामिति । यद्यस्माद्बलेः सकाशात्क्ष्मां भूमिं वामनेन ह्रस्वेन रूपेण त्रिपदछलेन मह्यं मत्पादत्रयपरिमितां भूमिं देहीति त्रिपादभूमियाञ्चा व्याजेन जग्रहे गृहीतवान् । अथो तस्माद्विचक्रम इत्यन्वयः । नन्वीश्वरः स्वयं कथं दुर्बल इव याचितवानित्यत आह । याञ्चां विना पथि धर्ममार्गे विचरन्वर्तमानो न चाल्य ऐश्वर्यान्न भ्रंशनीय इति यदथो तस्मात्त्रिपदछलेन जगृह इत्यन्वयः ।। १७ ।।

नार्थोबलेरयमुरुक्रमपादशौचम्भः शिवं धृतवतो विबुधाधिपत्यम् ।
यो वै प्रतिश्रुतमृतेऽपि च शीर्षमाणामात्मन्यमङ्गमनसा हरयेभिमेने ।। १८ ।।

तात्पर्यम्— 'ऐन्द्रं पदं नान्तरीयं फलं तु हरितोषणम् । जगद्दातुर्बलेर्यस्मादानन्दोद्रिक्तता भवेदि'ति ब्रह्मतर्के । शीर्षाख्यं मानम् ।। १८ ।।

प्रकाशिका— ननु तर्हि याञ्चयाऽपि चालनमनुचितमित्याशङ्क्येतोऽप्यधिकं फलं दास्यामी-त्याशयेन याचितवानित्याह ।। नार्थ इति । अत्र विबुधाधिपत्यं भाविमन्वन्तरे ऐन्दं पदं अर्थः फलं न भवतीति ऐन्द्रपदस्य सर्वथा फलत्वं निषिध्यते इति याति अतः प्रमाणेनैव तदभिप्रायं दर्शयति । ऐन्द्रपदमिति । नान्तरीयमानुषङ्गिकम् । फलं तु मुख्यं फलम् । ननु हरितोषणस्य कथं मुख्यफलत्व-मित्यत आह ।। यस्मादिति । हरितोषणादित्यर्थः । मुक्ताविति शेषः । शीर्षमाणमित्येतदप्रतीत्या

व्याख्याति ॥ शीर्षाख्यमिति । मानं मेयम् । कर्मणि ल्युट् । परिमेयमित्यर्थः ॥ ततश्चायं श्लोकार्थः ॥ हे अङ्ग नारद । यः प्रतिश्रुतपदत्रयमृतेऽपि विनाऽपि । आत्मन्यं स्वसम्बन्धिशीर्षमाणं च शीर्षाख्यं मानं परिमेयं च मनसा मनःपूर्वकं हरये वामनरूपायाभिमेने भक्त्या समर्पितवान् । तस्योरुक्रमो वामनः । तस्य पादशौचं पादप्रक्षालनरूपमत एव शिवमम्भो धृतवतो बलेर्यद्विबुधाधिपत्यं भाविमन्वन्तरे ऐन्द्रपदं हरिणा दत्तम् । अयमर्थो न मुख्यं फलम् । किंत्वानुषङ्गिकं फलम् । मुख्यफलं मुक्तावानन्दाभिवृद्धिकरं हरितोषणमेव । वै प्रमाणप्रसिद्धमेतत् । तथा च वामनस्य याञ्चया बलेर्भूप्रतिग्रहस्तदनुग्रहायैव न तदैश्वर्यनाशायेत्युक्तं भवति ॥ १८ ॥

तुभ्यञ्च नारदभृशं भगवान्विवृद्धभावेन साधु परितुष्ट उवाच योगम् ।
ज्ञानञ्च भागवतमात्मसुतत्वदीपं यद्वासुदेवशरणा विदुरञ्जसैव ॥ १९ ॥

तात्पर्यम्— ऐतरेयो हरिः प्राह नारदाय स्वकां तनुम् । यत्प्रापुर्वैष्णवा नान्ये यद्दते न सुखं परमि'ति ब्राह्मे ॥ १९ ॥

प्रकाशिका— तुभ्यमिति श्लोके नारदाय योगोपदेष्टा कथ्यते । सोऽवतारः क इति न प्रतीयतेऽतः प्रमाणेनैव श्लोकतात्पर्यं दर्शयति ॥ ऐतरेय इति । महिदास इत्यर्थः । आत्मसुतत्त्वदीपमित्यस्य तात्पर्यम् ॥ स्वकां तनुमिति । यद्वासुदेवशरणा एव विदुरित्यस्य तात्पर्यम् ॥ यत्प्रापुर्वैष्णवा नान्य इति । साधु परितुष्ट इत्यस्य तात्पर्यम् ॥ यद्दत इति ॥ ततश्चायं मूलार्थः ॥ महिदासावतारं तत्कर्मचाह ॥ तुभ्यमिति । च शब्दादस्मदादिभ्योऽपीति । साधु परितुष्टः परमसुखजनकस्वात्मोपदेशानुकूलप्रीतियुक्तः । भगवान्महिदासो योगं कर्मयोगम् । भागवतमित्येतदेव स्पष्टयति ॥ आत्मेति । यत्ज्ञानादिकं वासुदेवशरणा वैष्णवा एव विदुः प्रापुरिति ॥ १९ ॥

चक्रञ्च दिक्ष्वविहतं दशसु स्वतेजो मन्वन्तरेषु मनुवंशधरो बिभर्ति ।
दुष्टेषु राजसु दमं विदधत्स्वकीर्तिं सत्ये निविष्ट उशतीं प्रथयंश्चरित्रैः ॥ २० ॥

तात्पर्यम्— 'मन्वन्तरेषु भगवान् चक्रवर्तिषु संस्थितः । चतुर्भुजो जुगोपैतद्दुष्टराजन्यनाशकः । राजराजेश्वरेत्याहुर्मुनयश्चक्रवर्तिनम् । वीर्यदं परमात्मानं शङ्खचक्रगदाधरमि'ति सत्यसंहितायाम् ॥ २० ॥

प्रकाशिका— चक्रं चेति श्लोकोक्तोऽवतारः क इति न प्रतीयते । मनुवंशधर इत्युक्त्या मनुवंशोत्पन्नराजाभेदश्च प्रतीयतेऽतः प्रमाणेनैव श्लोकं व्याख्याति ॥ मन्वन्तरेष्विति । चक्रवर्तिषु

मनुवंशोत्पन्नेषु चक्रवर्तित्वादिप्रदतया स्थितः । अनेन चक्रेत्यादेरर्थ उक्त इति ज्ञातव्यम् । दुष्टेष्वित्यादेस्तात्पर्यम् । दुष्टराजन्येति । तन्नामाह ॥ राजराजेति । गदेत्यनन्तरमभयमिति शेषः । अत एवाह ॥ जुगोपेति । अनेन चक्रं चेत्यस्यार्थान्तरमुक्तमिति ज्ञातव्यम् ॥ ततश्चायं श्लोकार्थः ॥ राजराजेश्वराख्यमवतारं तत्कर्म चाह ॥ चक्रमिति । स्वस्य तेजो यस्मिंस्तत्तेजश्चक्रं सुदर्शनम् । च शब्दाच्छङ्खगदाभयानि च बिभर्ति । अनेन चतुर्भुज इति सूचयति । कथं भूतं चक्रम् । दशसु दिक्ष्वविहतं सर्वत्राप्रतिहतमित्यर्थः । मन्वन्तरेषु चतुर्दशसु मनूनां स्वायम्भुवादीनां वंशा येषां ते मनुवंशाः । मनुवंशोत्पन्नाश्चक्रवर्तिनस्तेषु स्थित्वा वीर्यादिप्रदानेन तानुद्धरतीति धरः । दशसु दिक्ष्ववहितं स्वतेजः स्वामर्थ्ययुक्तं चक्र माज्ञारूपं च बिभर्ति । पुनः कथं भूतमुभयविधं चक्रम् । दुष्टेषु राजसु दमं दण्डं विदधत् । किं कुर्वन् । सत्ये सत्यवचने । उपलक्षणमेतत् । सर्वेषु सद्धर्मेषु निविष्टोऽभिनिविष्टः । उशतीं निर्मलां स्वकीर्तिं चरित्रैः कर्मभिः प्रथयन्विस्तारयन् बिभर्तीति ॥२०॥

धन्वन्तरिश्च भगवान्स्वयमास देवो नाम्ना नृणां पुरुरुजां रुज आशु हन्ति ।
यज्ञे च भागममृतायुरवाप चाद्धा आयुश्च वेदमनुशास्त्यवतीर्य लोके ॥ २१ ॥

प्रकाशिका— धन्वन्तर्यवतारं तत्कर्म चाह ॥ धन्वन्तरिश्चेति । देवो भगवान्नारायणः स्वयं स्वयमेव विशेषावेशामन्तरेणैव धन्वन्तरिश्चासावतीर्णः । अवतीर्य पुरुरुजां बहुरोगाणां नृणां रुजो रोगान्नाम्ना स्वनाममन्त्रेण हन्ति । न केवलमैहिकं रोगं नाशं करोति किं त्वमृतायुश्च । अमृतं मरणरहितमायुर्मोक्षो यस्मात् । अज्ञानादिनाशनद्वारा मोक्षप्रदश्चेत्यर्थः । अद्धा यज्ञभागं चावाप । लोके आयुश्च वेदमायुर्विषयं वेदं वैद्यशास्त्रं चानुशास्ति प्रवर्तयति ॥ २१ ॥

क्षत्रं क्षयाय विधिनोपहृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्तिलिप्सु ।
उद्धत्यसाववनिकण्टकमुग्रवीर्यस्त्रिःसप्तकृत्वउरुधारपरश्वधेन ॥ २२ ॥

प्रकाशिका— परशुरामावतारं तत्कर्म चाह ॥ क्षत्रमिति । उग्रं तीक्ष्णं वीर्यं यस्य स उग्रवीर्यो महात्मा पूज्यस्वरूपो भार्गवः । उर्वी निशिता धारा यस्य स उरुधारः स चासौ परश्वधः परशुविशेषः। तेनावनिकण्टकमत एव नरकार्तिलिप्सु नरकदुःखप्राप्तिसंभवनाविषयमुझ्झितपथं त्यक्तसन्मार्गं ब्रह्मध्रुक् ब्राह्मणद्रोही । अत एव विधिना दैवेन क्षयाय मृत्यवे य उपहृतं समर्पितं क्षत्रं क्षत्रियकुलं त्रिसप्तकृत्व एकविंशतिवारमुद्धन्त्युन्मूलयति ॥ २२ ॥

कृत्स्नप्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे ।
तिष्ठन्वनं सदयितानुज आविवेश यस्मिन्विरुध्य दशकन्धर आर्तिमार्च्छत् ॥२३॥

तात्पर्यम्— प्राणादिकलेशः ॥ २३ ॥

प्रकाशिका— रामावतारं तद्विक्रमं च श्लोकत्रयेणाह ॥ कृत्स्नप्रसादेति । अत्र कलेश इत्येतच्चन्द्रं इत्यन्यथाप्रतीतेर्व्याचष्टे ॥ प्राणादीति । आदि पदेन श्रद्धाकाशादेर्ग्रहणम् । तथा च स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुमित्यादि षट्प्रश्नोपनिषदुक्तप्राणादिषोडशकलातदभिमानदेवतेश इति व्याख्यातं भवति । दूरे सुहृदित्येतदन्यथाप्रतीत्या व्याख्याति ॥ दूरस्था इति । सुहृद्भार्या यस्येत्यन्यपदार्थं दर्शयति ॥ भगवतो रामस्येति । तथा चालुक् समासोऽयमिति भावः । सुशोष पदमप्रतीत्या सप्रमाणकं व्याचष्टे ॥ सुशोषोऽग्निरिति । विनेष्यतीत्यनूद्य प्रकृतसङ्गतत्वेन व्याचष्टे ॥ विनेष्यतीति । तथा च विनेत्यनन्तरं शमिति पूरणीयमिति भावः (केचित्) । दारहर्तुरित्येतद्रावणस्येत्यन्यथाप्रतीति वारणाय व्याचष्टे ॥ दारहर्तुरिति । तथा च हर्तृ पदं आहर्तृपरमिति भावः । धनुषो विस्फूर्जितैर्विनेष्यतीति न युक्तम् । रावणस्य ग्रन्थान्तरे रामशरेणैव नष्टत्वस्य कथितत्वादत-स्तदभिप्रायं प्रमाणेनैव दर्शयति ॥ धनुविस्फूर्जितैरिति । नष्ट इव नष्टो नष्टधैर्य इत्यर्थः । सानुबन्ध इत्यनेनासुभिः सहेत्यादेस्तात्पर्यमुक्तम्यित्यवधेयम् ॥ ततश्चायं श्लोकार्थः ॥ दशकन्धरो रावणो यस्मिन्विरुध्यार्तिं मरणरूपामार्च्छत्प्राप । सकलेशः प्राणश्रद्धादिकलातदभिमानिसत्तादिप्रदः । अनेन रामशरीरं षोडशकलात्मकं नेति सूचयति । ब्रह्मादिदेवेषु कृत्स्नः पूर्णः प्रसादो यःत्तेन सुमुखो विकसितवदनः कलया स्वरूपांशेन । गुरोर्दशरथस्य निदेशे नियोगे तिष्ठन् सदयितानुजः सीताल-क्ष्मणाभ्यां सहितो रामो वनमाविवेशेत्यन्वयः ॥ २३ ॥

यस्मा अदादुदधिरूढभयाङ्गवेपो मार्गं सपद्यरिपुरं हरवद्दिधक्षोः ।
दूरेसुहृन्मथितरोषसुशोषदृष्ट्या तातप्यमानमकरोरगनक्रचक्रः ॥ २४ ॥

तात्पर्यम्— दूरस्था सुहृद्यस्य भगवतः स दूरेसुहृत् । सुशोषोऽग्निः। 'अग्निः सुशोषः कक्षघ्न-स्तिमिरारिर्हिरण्यद' इति ह्यभिधाने ॥ २४ ॥

प्रकाशिका— यस्मै रामायोदधिर्मार्गं ददौ सपदि शीघ्रम् । हरवद्धरो यथा त्रिपुरं दिधक्षुस्त-द्वदरिपुरं लङ्कां दिधक्षोर्दग्धुमिच्छोः । षष्ठी चतुर्थ्यर्थे । यद्वा पञ्चमीयम् । दिधक्षो रामाद्रूढं प्राप्तं यद्भयं तेनाङ्गवेपः कम्पो यस्येत्युदधिविशेषणम् । अत्र हेतुभूतं विशेषणान्तरमाह ॥ दूर इति । दूरे स्थिता सुहृत्सीता यस्य स दूरसुहृद्रामस्तस्य मथितो ज्वलितो रोष एव सुशोषोऽग्निस्तेन युक्त्या दृष्ट्या तातप्यमानान्यत्यन्तं तप्यमानानि मकराणामुरगाणां नक्राणां चक्राणि समूहो यस्मिन्सः । यस्मादिति यच्छब्दस्य तस्य दारहर्तुरित्युत्तरेणान्वयः ॥ २४ ॥

वक्षस्थलस्पर्शरुग्णमहेन्द्रवाहदन्तैर्विलम्बितककुब्जयरूढहासः ।
सद्योऽसुभिः सह विनेष्यति दारहर्तुर्विस्फूर्जितैर्धनुष उच्चरितैः ससैन्यः ॥ २५ ॥

तात्पर्यम्— विनेष्यति विनाशम् एष्यति । दारहर्तुः भगवतः ॥ 'धनुर्विस्फूर्जितैर्नष्टो रावणः पूर्वमेव तु । पुनः शरै राममुक्तैः सानुबन्धो विनश्यती'ति स्कान्दे ॥ २५ ॥

प्रकाशिका— युद्धे रावणस्य वक्षस्थलस्य स्पर्शेन सङ्घट्टेन रुग्णा भग्ना महेन्द्रवाहस्यैरावतस्य दन्तास्तैर्विलंघितो विलम्बं प्रापयितः ककुभां दिशां यो जयस्तेन रूढ उत्पन्नो हासोऽट्टहासो यस्य सः। ससैन्यो रावणस्तस्य दारहर्तुर्दारान्सीतामाहर्तू रामस्य धनुष उच्चारितैर्निर्गतैर्विस्फूर्जितैर्ध्वनिविशेषैर्विनेष्यति धैर्यविनाशमेष्यति पश्चाद्विस्फूर्जितैः प्रकाशमानैः । शरैरिति शेषः । असुभिः प्राणैः सह विनाशं मृत्युमेष्यतीति ॥ २५ ॥

भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलयासितकृष्णकेशः ।
जातः करिष्यति जनानुपलक्ष्यमार्गः कर्माणि चात्ममहिमोपनिबन्धनानि ॥२६॥

तात्पर्यम्— 'राम एको ह्यनन्तांशस्तत्र रामाभिधो हरिः । शुक्लकेशात्मकस्तिष्ठन्रमयामास वै जगदि'ति ब्राह्मे । 'विष्णोर्नान्येन कर्माणि परेषां तन्निबन्धनमि'ति मात्स्ये । 'सहस्रधनुषस्तूर्ध्वं द्युशब्देनापि भण्यत' इति तन्त्रमालायाम् । इतरथा विष्णुर्न चेत् । स्वमहिमनिबन्धनत्वेन न भाव्यम् । दिव्यमिव स्तुत्यमिव । तदपेक्षया । अन्येषां स्तुत्यमेव यत्तस्य तच्च दिव्यमिव । 'अन्यथाज्ञानहेतुर्या वाक् सा जल्पिः प्रकीर्तिते'ति तन्त्रमालायाम् ॥ 'यत्तु सर्वात्मनाऽज्ञानं निशा स परिकीर्तिते'ति कौर्मे । कलपदं च आयतं च । 'सप्तस्वरसमाहारो मूर्च्छनेति प्रकीर्तिते'ति गान्धर्वे । विद्वेषिणोऽप्युदासीना भक्ता अपि न संशयः । हरेर्हि सदनं यान्ति व्यक्तं भक्तैस्तु गम्यते । आरभ्य तम आमुक्तेः कृष्णस्य सदनं यतः । अव्यक्तहरिलोकत्वादन्येषामन्यलोकते'ति बृहत्संहितायाम् ॥ 'रामभीमार्जुनादीनि विष्णोर्नामानि सर्वशः । रमणाभयवर्णाद्याः शब्दवृत्तेर्हि हेतवः । हरिर्हि तत्र तत्रस्थो रमणादीन्करोत्यजः । अतस्तस्यैव नामानि व्याजादन्यगतानि तु । व्यवहारप्रवृत्त्यर्थं दुष्टानां मोहनाय चे'ति स्कान्दे ॥ २६-३५ ॥

प्रकाशिका— कृष्णावतारं तत्कर्म चाह ॥ भूमेरित्यादि श्लोकदशकेन । अत्र सितकृष्णकेशो जात इत्युक्त्या कृष्णवद्रामस्यापि साक्षादवतारत्वं प्रतीयतेऽतोऽस्य तात्पर्यं प्रमाणेनैव दर्शयति ॥ राम एक इति । एको भार्गवराभ्यामन्यो रामो बलरामोऽनन्तांशः शेषावतारः । हीति तत्र प्रमाणप्रसिद्धिं दर्शयति । हरे रामाभिधत्वे निरुक्तिं दर्शयति ॥ रमयामासेति । अनेन रमयतीति राम इति निरुक्तिं

सूचयति । तथा च शेषावतारे बलरामे शुक्लकेशात्मकस्य रामनाम्नो हरेर्विशेषेण सन्निधानात्तस्यैव कृष्णेन सहगणनं न शेषावतारस्य बलरामस्येति भावः । ननु सर्वेषामपि कर्माणि स्वात्ममहिमोपनिबन्धनान्यतः कथमिदं कृष्णेऽसाधारणमित्यतोऽस्य तात्पर्यं प्रमाणेनैव दर्शयति ।। विष्णोरिति । तन्निबन्धनं विष्णुनिमित्तकम् । कर्मेति शेषः । तथा चात्ममहिमामात्रोपनिबन्धनानीति मूलं व्याख्येयमिति भावः । दिविस्पृशोरित्यर्जुनयोः स्वर्गलोकस्पर्श इत्युच्यत इति प्रतीयतेऽतोत्र विवक्षितं द्यु शब्दार्थं प्रमाणेनैवाह ।। सहस्रधनुष इति । ऊर्ध्वं तु ऊर्ध्वप्रदेशस्तु । न केवलमन्तरिक्ष शब्देन किन्तु द्यु शब्देनापीत्यर्थः । इतरथेत्यत्र कस्य व्यतिरेक इति न प्रतीयतेऽत आह ।। इतरथा विष्णुन चेदिति । कृष्णो विष्णुर्न चेदित्यर्थः । ननु समुद्रपानादिकं कर्मेतरेषामशक्यं विष्णुत्वाभावेऽप्यगस्त्यादीनां दृश्यतेऽतो नेदमप्यसाधारणमित्याशङ्कापरिहाराय न भाव्यमित्यस्य तात्पर्यमाह ।। स्वमहिमेति । स्वमहिममात्रनिमित्तत्वेन न भाव्यमित्यर्थः । अगस्त्यादीनां तु तत्कर्म विष्णुमहिमोपनिबन्धनं न स्वात्ममहिममात्रोपनिबन्धनमिति भावः । एतत्प्रमापयितुमेव प्राक् परेषां तन्निबन्धनमिति प्रमाणशेषोदाहरणं कृतम् । दिव्यमिवेत्येतदनूद्य दीव्यतेरनेकार्थत्वादत्र विवक्षितं दिव्य शब्दार्थं प्रदर्शयति ।। दिव्यमिवेति । ननु कृष्णकृतकर्मजातमखिलैः स्तुत्यमेव । इव शब्देन वस्तुतो न स्तुत्यमिति प्रतीयतेऽतः कथमिदमित्यतोऽस्याभिप्रायमाह ।। तदपेक्षयेति । कृष्णापेक्षयेत्यर्थः । एतदेव विव्रणोति ।। अन्येषामिति । च शब्दोऽप्यर्थस्तस्येत्यनेन सम्बन्ध्यते । अन्येषां ब्रह्मादीनां वस्तुतः स्तुत्यमेव । यत्कृष्णकर्तृकं कर्मजातं तत्तस्यापि कृष्णस्यापि स्तुत्यमिव न वस्तुतस्तस्य स्तुत्यमित्यर्थः। फलापेक्षयोत्कर्षप्रतिपादकशब्दप्रयोगविषयत्वं हि स्तुत्यत्वम् । कृष्णकृतं कर्मजातं च मदीयं कर्मानन्यसाध्यं लोकविलक्षणमिति ब्रह्मादिभिरिव कृष्णेनाप्युत्कृष्टतया प्रतिपाद्यत एव । अत उत्कर्षप्रतिपादकशब्दविषयकत्वसाम्यादेव तस्यापि स्तुत्यमिवेत्युक्तं न वस्तुतस्तस्य स्तुत्यम् । ब्रह्मादिभिरिव कृष्णेन फलापेक्षया तादृश शब्दप्रयोगस्याकारणादित्यभिप्राय इति भावः । जल्प्यावृतमित्यत्र जल्पि शब्दार्थं प्रमाणेनैव दर्शयति ।। अन्यथेति । तथा च दुःशास्त्रमेव जल्पि शब्दवाच्यमिति भावः । निशिशयानमित्यत्र निट् शब्दस्यात्रोपयुक्तमर्थं प्रमाणेनैव दर्शयति ।। यस्त्विति ।। सर्वात्मनेति । केनापि प्रकारेणेत्यर्थः । इदं च सम्यग्ज्ञानविरुद्धतयाऽज्ञान शब्दवाच्येऽन्यथाज्ञानेऽतिव्याप्तिवारणाय तत्राविद्यमानस्य प्रकारस्य भानेनाज्ञान इव सर्वात्मना ज्ञानविरोधित्वाभावादिति ज्ञेयम् । तु शब्दस्तस्यानादित्वादिविशेषद्योतकः । निशा शब्दस्य निट् शब्दपर्यायत्वान्नासङ्गतिः । कलदायतमूर्च्छि तेनेत्यत्र तत्पुरुषत्वादिति प्रतीतिवारणाय कर्मधारयोऽयमित्याशयेनाह ।। कलपदं चेति । चेत्यनन्तरं तदित्यध्याहार्यम् । आयतं चेत्यनन्तरं मूर्छितं चेत्यपि पूरणीयम् । बहुलग्रहणात्तु विशेषणानामेव समासः । तत्र मूर्छितमित्यस्य प्रकृतोपयुक्तमर्थं प्रमाणेनाह ।। सप्तस्वरेति । समाहारः सम्मेलनम् । तथा च मूर्छितमित्यस्य सप्तस्वरसमाहारयुक्तमित्यर्थ उक्तो भवतीति ज्ञातव्यम् । ननु ये

च प्रलम्बखरेत्यादिनोक्तानां सर्वेषां तदीयनिलयं यस्यास्तीति हरिलोकप्राप्तिः फलतयोच्यते । सा च भक्तानामेव युक्ता न द्वेषिणामुदासीनानां वाऽतः कथमेतदित्यतोऽस्याभिप्रायं प्रमाणेनैव दर्शयति ॥ विद्वेषिणोऽपीति । ननु भक्तगम्यस्य वैकुण्ठादेरेव हरिसदनत्वं प्रसिद्धं न विद्वेष्यादिगम्यस्य तम आदेरित्यत उक्तम् ॥ आरभ्येति । अतस्त्रिविधा अपि हरेः सदनं यान्तीति । युक्तमिति शेषः । नन्वेवं भक्तैर्हरिलोको गम्यतेऽभक्तैरन्यो लोक इति ग्रन्थान्तरविरोध इत्यतस्तदभिप्रायमाह । व्यक्तं भक्तैस्तु गम्यते अव्यक्तहरिलोकत्वादन्येषा- मन्यलोकतेति पादत्रयेण । व्यक्तं वैकुण्ठादिगतं भगवद्रूपम् । भक्तैर्गम्यत इत्युक्त इति शेषः । अव्यक्तेति । अव्यक्त एव हरिर्यत्र तमसि नरके वा तिष्ठति तद्गन्तृत्वादित्यर्थः । अन्येषां द्वेषिणामुदासीनानां चान्यलोकताऽन्यलोकगन्तृतावचनम् । उपपद्यत इति शेषः । बलपार्थभीमव्याजाव्हयेनेत्यस्य बलो भीमः पार्थ इत्यादयो व्याजाव्हयाः कपटनामानि यस्येति व्याख्याननिरासाय प्रमाणेनैव तात्पर्यमाह ॥ रामेति । तत्रादि पदेन प्रद्युम्नमुचकुन्दग्रहणम् । विष्णोस्तन्नामत्वे निमित्तानि दर्शयति ॥ रमणेति । अनेन रमतेऽसाविति योगेन रमणकर्तृत्वं राम शब्दप्रवृत्तौ भीर्भयं मा नास्ति यस्मिन्नसाविति योगेन भयरहितत्वं भीम शब्दप्रवृत्तौ वर्णो रूपविशेषस्तद्वत्त्वं रूढ्याऽर्जुन शब्दप्रवृत्तौ निमित्तामित्युक्तं भवति । आद्य शब्देन प्रकृष्टद्युतिमत्त्वादिकं प्रद्युम्नादि शब्दप्रवृत्तिनिमित्तं ग्राह्यम् । ननु तर्हि कथं बलादीनां तन्नामवत्त्व-प्रसिद्धिरित्यतोऽव्यक्ताधिकरणन्यायेनेत्याशयेनाह ॥ हरिर्हीति । स्वाधीनतया शरीररूपके तत्र तत्र बलभीमादौ स्थितः सन्स्वयं रमणादीन् करोतीति रमणकर्तृत्वाद्युक्तप्रवृत्तिनिमित्तवान् भवति । हि यस्मादतस्तत्परममुख्यवृत्त्या तस्यैव नामानि व्याजात्तच्छरीररूपकत्वलक्षणात्तन्निमित्तादन्यगता-न्यन्यत्र प्रसिद्धानि भगवतैव । कृतानीति शेषः । करणे प्रयोजनद्वयमाह ॥ व्यवहारप्रवृत्त्यर्थमिति । तथा च बलपार्थभीमेषु व्याजेनोक्तनिमित्तेन प्रवर्तिता आव्हया यस्येति मूलं व्याख्येमिति भावः । आदि शब्देन मूले बलादि शब्दाः प्रद्युम्नाद्युपलक्षका इति सूचयति ॥ तथा च श्लोकदशकार्थः ॥ सुरेतरेऽसुरांशभूता राजानस्तेषां वरूथैः सैन्यैर्विमर्दितायाः भारेण पीडितायाः क्लेशव्ययाय दुःखनाशाय सितकृष्णकेशौ यस्य स भगवान् कलया शुक्लकेशरूपांशेन शेषांशे रामे जात आविष्टः कृष्णकेशरूपांशेन साक्षादेव जातः प्रादुर्भूतः सन् । अत्र रामकृष्णयोः शुक्लकृष्णकेशरूपांशत्वकथनं भूभारहरणं भगवतोऽतितुच्छं कर्म यत्तत्केशाभ्यामेव कृतमिति ज्ञापनाय रामकृष्णयोः शुक्लकृष्ण-रूपोपपादनाय चेति ज्ञातव्यम् । कथं भूतः कृष्णः । परमेश्वरतया जनैरुपलक्ष्यो द्रष्टुमशक्यो मार्गो यस्य स तथा । तर्हीश्वरत्वं तस्य साधुभिः कथं ज्ञातव्यमित्यतोऽर्थापत्त्येत्याह । आत्ममहिमा स्वसामर्थ्यं तदेवोपनिबन्धनं निमित्तं येषां तानि कर्माणि करिष्यति । तथा च स्वमहिममात्रनिमित्त-ककर्मकर्तृत्वान्यथाऽनुपपत्त्या कृष्णस्येश्वरत्वं ज्ञातव्यम् । अन्यकर्मस्वीश्वरसामर्थ्यनिमित्तकत्वस्यापि सत्वेन स्वम हिममात्रोपनिबन्धेन कर्मकर्तृत्वस्येश्वरत्वाव्यभिचारादिति भावः ॥ २६ ॥

तोकेन जीवहरणं यदुलपिकायास्त्रैमासिकस्य च पदा शकटोपवृत्तः ।
यद्रङ्गतान्तरगतेन दिवि स्पृशोर्वा उन्मूलनन्त्वितरथार्जुनयोर्न भाव्यम् ॥ २७ ॥

प्रकाशिका— उक्तार्थापत्तिमेव प्रपञ्चयति ॥ तोकेनेति श्लोकद्वयेन । तोकेनातिबालकेन ऊन् प्राणान् लुंपतीत्युलूपिका बालप्राणहारिणी पूतना तस्याः स्तनपानेन जीवहरणं यत्कर्म त्रयोमासवयोलक्षणा निवृत्ता यस्य स तथा तस्य कृष्णस्य पदा पादेन शकटस्तन्नामकोऽसुरोपवृत्तो नाशित इति यत् । यश्च रङ्गता जानुभ्यां गच्छताऽन्तरं गतेन मध्ये गमनेन दिवि सहस्रधनुषोऽप्यूर्ध्वदेशे स्पृशोः स्पृशतोः । अत्युच्चयोरिति यावत् । अर्जुनयोर्वृक्षविशेषयोरुन्मूलनं तत्सर्वं कर्म इतरथा कृष्णस्य विष्णुत्वं विना न भाव्यम् । स्वात्ममहिममात्रोपनिबन्धनत्वेन न भाव्यम् । भवति तथा तस्मात्स विष्णुरिति निर्णीयत इत्यर्थः । एवमग्रेऽपि योजना द्रष्टव्या ॥ २७ ॥

यद्वै व्रजे व्रजपशून् विषतोयपीतान् गोपांस्तु जीवयदनुग्रहदृष्टिवृष्ट्या ।
तच्छुद्धयेऽतिविषवीर्यविलोलजिह्वमुच्चाटयिष्यदुरगं विहरद् ह्रदिन्याम् ॥ २८ ॥

प्रकाशिका— विषमिश्रं जलं विषतोऽयं तस्य पीतं पानं येषां तानुज्जीवयदजीवयेत् । अनुग्रहपूर्व कदृष्टिरूपवृष्ट्या । तच्छुद्धये यमुना ह्रदजलशुद्धये । अतिविषवीर्येण विलोला चञ्चला जिव्हा यस्य तमुरगं कालियाख्यं नागम् । उच्चाटयिष्यन् उच्चाटनयुक्तं करिष्यन् ह्रदिन्यां यमुनानद्यां व्यहरद्विहरणं कृतवानिति । यत्कर्मजातं तदितरथा न भाव्यमित्यन्वयः ॥ २८ ॥

तत्कर्म दिव्यमिव यन्निशि निःशयानं दावाग्निनाशुविपिने परिदह्यमाने ।
उन्नेष्यति व्रजमितोऽवसितान्तकालं नेत्रे पिधाय्य सबलोऽनधिगम्य वीर्यः ॥ २९ ॥

प्रकाशिका— निशि निःशयानमिति कालियोच्चाटनानन्तरं यमुनातीरे रात्र्यां शयानम् । विपिने वने । परितः समन्ताद्दह्यमाने सति । इतो दावाग्नेः । अवसितान्तकालं लोकैर्निश्चितमरणकालं व्रजं गो गोकुलम् । उन्नेष्यत्युद्धरिष्यति । किं कृत्वा । नेत्रे पिधाय्य पिहिते कारयित्वा । इदं मुञ्जाटव्यां दावाग्न्युद्धरणविषयमिति बोध्यम् । अन्यथा निशि निःशयानमित्यनेन विरोधप्रसङ्गात् । ननु नेत्रपिधानं कस्मात्कारितमित्यत उक्तम् । अन्यैरधिगन्तुं द्रष्टुमयोग्यं वीर्यं यस्येति । एवं स्थानद्वये दावाग्नेर्व्रजोद्धरणादिरूपं यत्कर्म तत्तस्यापि दिव्यमिव स्तुत्यमिव । मदीयं कर्म कर्तुं केनाप्यशक्यमत एवात्युत्तमिति ब्रह्मादिभिरिव कृष्णेनाप्युत्कृष्टतया प्रतिपाद्यमानत्वसाम्यात् । इयांस्तु विशेषः । कृष्णेन क्रियमाणं कर्मोत्कर्षप्रतिपादनस्य न स्तुतित्वम् । इतरवत्फलापेक्षया करणाभावादत इवेत्युक्तम् । इतरैरुक्तरूपेण क्रियमाणकर्मोत्कर्षप्रतिपादनस्य स्तुतित्वमेव । फलापेक्षासत्वात् । फलापेक्षयोत्कर्षप्रतिपादकशब्दस्यैव स्तुतिलक्षणत्वादिति ॥ २९ ॥

गृह्णीत यद्यदुपबद्धुममुष्य माता शुल्बं सुतस्य न तु तत्तदमुष्य माति ।
यज्जृम्भतोऽस्य वदने भुवनानि गोपी संवीक्ष्य शङ्कितमनाः प्रतिबोधितस्य ॥ ३० ॥

प्रकाशिका— अमुष्य कृष्णस्य माता यशोदा सुतस्य सुतमुपबद्धुं शुल्बं दाम गृण्हीतागृहीत् । तदा तद्दामामुष्य सुतस्य न माति न पूर्यत इति यद्गोपी यशोदा प्रतिबोधितस्य निद्राया उत्थापितस्यात एव जृंभत आलस्यपरिहारायैव मुखव्यादानं कुर्वतोऽस्य कृष्णस्य वदने चतुर्दशभुवनानि सम्यग्वीक्ष्य शङ्कितमना भीतमना अभूदिति च यत् यत्कर्म तस्यापि दिव्यमेवेति सम्बन्धः । एवमग्रेऽपि दिव्यमिवेत्यनेन सम्बन्धो बोद्धव्यः ॥ ३० ॥

नन्दश्च मोक्ष्यति भयाद्वरुणस्य पाशाद्गोपान्बिलेषु पिहितान्मयसूनुना च ।
जल्प्यावृतं निशि शयानमतिश्रमेण लोके विकुण्ठ उपधास्यति गोकुलं स्म ॥ ३१ ॥

प्रकाशिका— वरुणस्य पाशाज्जाताद्भयात् । मयसूनुना व्योमनामकेन । जल्प्याऽन्यथाज्ञान-जनककुशास्त्रेणावृतं तज्जनितविपर्ययसंशयाभ्यां तिरोहितं सम्यग्ज्ञानं निशि अनाद्यविद्यायां तन्निमित्तके संसारेऽतिभ्रमणेऽपि विविधदुःखानुभवेन नितरां शयानं मोक्षसाधनानुष्ठानेन जागरणशून्यं गोकुलं गोकुलस्थजनम् । स्मेत्याश्चर्ये । विकुण्ठेलोके उपधास्यति इति यत्तदपीति सर्वत्र योज्यम् । ॥ ३१ ॥

गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेऽभिवर्षति पशून्कृपया रिरक्षुः ।
धर्तोच्छिलीन्ध्रमिव सप्तदिनानि सप्तवर्षो महीध्रमनघैककरे सलीलम् ॥ ३२ ॥

प्रकाशिका— मखे स्वात्मोद्देशेन कर्तव्ये यज्ञे देवेन्द्रवज्रविप्लवाय गोष्ठनाशाय । रिरक्षुरि-रक्षिषुर्महीध्रं गोवर्धनसंज्ञं महीधरं सलीलं यथा स्यात्तथा धर्ता धरिष्यति । उच्छिलिन्ध्रमिव उद्गतं छत्राकमिव । सप्त वर्षाणि वयो यस्य स सप्तवर्षः । हे अनघ निर्दुष्टेति नारदं प्रति संबोधनम् ॥३२॥

क्रीडन्वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदायतमूर्च्छितेन ।
उद्दीपितस्मररुजां व्रजसद्वधूनां हर्तुर्हरिष्यति शिरो धनदानुगस्य ॥ ३३ ॥

प्रकाशिका— निशाकरस्य रश्मिभिर्गौर्यं धवलायां निशि रात्रौ रासक्रीडाभिमुखः कृष्णो वने क्रीडन्सन् कलानि मञ्जुलानि पदानि यस्मिंस्तत् कलपदं तच्चायतं दीर्घं च तन्मूर्च्छितं च सप्तस्वर-समाहारयुतं च तेन । गीतेनेति शेषः । उद्दीपित उत्कृष्टतया ज्वलितः स्मराख्यो रुग्रागो यासां ता उद्दीपितस्मररुजस्तासां व्रजसद्वधूनां व्रजगतानां वधूनां स्त्रीणां हर्तुर्नेतुर्धनदानुगस्य कुबेरभृत्यस्य शङ्खचूडाख्यस्य शिरो हरिष्यति ॥ ३३ ॥

ये च प्रलम्बखरदर्दुरकेश्यरिष्ट मल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः ।
अन्येऽपि शाल्वकपिबल्वलदन्तवक्र सप्तोक्षशंबरविडूरथ रुग्मिमुख्याः ॥ ३४ ॥

प्रकाशिका— ये च प्रलम्बादयस्ते सर्वे हरिणा कृष्णेनादर्शनं मरणनिमित्ताः प्राप्ताः सन्तस्तदीयं निलयं यास्यन्तीत्युत्तरेणान्वयः । खरो धेनुकः । दर्दुर इव दुर्दरो बकः । इभः कुवलयापीडः । करिर्विवदः । कुजो नरकः ॥ ३४ ॥

ये वा मृधे समितिशालिन आत्तचापाः काम्भोजमत्स्यकुरुसृञ्जयकैकयार्णाः ।
यास्यन्त्यदर्शनमिताबलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीयम् ॥ ३५ ॥

प्रकाशिका— मृधे कुरुपाण्डवयुद्धे समितौ सङ्ग्रामे । शालन्ते श्लाघ्यन्ते ते समितिशालिनः । ननु प्रलम्बखरकपिबल्वलरुग्मिप्रमुखा बलभद्रेण निहताः । कांभोजादयश्च भीमार्जुनद्रोणादिभिः । शम्बरः प्रद्युम्नेन । यवनो मुचकुन्देन । न तु हरिणाऽतः कथमेतदित्यत उक्तम् । बलपार्थभीमव्याजाव्हयेनेति । अत्र बलादि शब्दैः प्रद्युम्नादयोऽप्युपलक्ष्याः । तथा च बलपार्थभीमादिषु व्याजात्तेषां स्वशरीररूपत्वव्याजान्निमित्तात्तेषु स्वेनैव सङ्केतिता आव्हया नामानि यस्य स तथोक्तस्तेनेत्यर्थः । हरिरेव बलादिषु स्थितो मुख्यतस्तत्तन्नामा तान् जघानातो युक्तमुक्तमिति भावः । अत्र ये च प्रलम्बेत्यादिना द्वेष्युदासीनभक्तानां त्रयाणामुक्तत्वात् । तदपि निलयमित्यनेन तमो नरकं वैकुण्ठादिकं चेति त्रयमपि तत्तद्योग्यं हर्यावासस्थानं ग्राह्यम् । इयांस्तु विशेषः । वैकुण्ठादेर्व्यक्तस्थानत्वात्तदीयनिलयत्वप्रसिद्धिस्तथा नरकतमसोरव्यक्तहरिस्थानत्वादिति ॥ ३५ ॥

कालेन मीलितदृशामवमृश्य नृणां स्तोकायुषां स्वनिगमो बत दूरपारः ।
आविर्हितस्त्वनुयुगं स हि सत्यवत्यां वेदद्रुमं विटपशो विभजिष्यति स्म ॥३६॥

तात्पर्यम्— तृतीये सप्तमे चैव षोडशे पञ्चविंशके । अष्टाविंशे युगे कृष्णः सत्यवत्यामजायत । व्यासाचार्यस्तु पूर्वेषु चरमे स्वयमेव तु । विव्यास वेदांश्चक्रे च भारतं वेदसंमितमि’ति च ॥ ३६ ॥

प्रकाशिका— व्यासावतारं तत्कर्म चाह ॥ कालेनेति । अत्रानुयुगमित्यस्य प्रतियुगमित्यन्यथाप्रतीतिवारणाय प्रमाणेनैव तात्पर्यं दर्शयति ॥ तृतीय इति । युगे महायुगान्तर्गरद्वापरे । तथा च वैवस्वतमनोस्तृतीयादि पञ्चमहायुगान्तर्गतद्वापरेषु कृष्णो व्यासः सत्यवत्यामजायतेत्यभिप्रेत्यैवानुयुगमित्युक्तम् । न तु प्रतियुगमित्यभिप्राय इति भावः । पूर्वेषु तृतीयसप्तमषोडशपञ्चविंशकमहायु-

गान्तर्गतद्वापरेषु । व्यासानां वेदविस्तारकर्तॄणामन्येषां स्वयमाचार्यः । तु शब्दोऽवधारणे । चरमेऽष्टाविंशमहान्तर्गतद्वापरेति पूर्वे व्यासापेक्षया विशेषेण विव्यास विस्तृतवान् । वेदः सम्यक् मित उपबृंहितो येन तद्वेदसम्मितम् । इतिहासपुराणाभ्यां वेदं समुपबृंहयेदिति वचनात् । अथवा । वेदसम्मितं वेदसंवादि । न तु वेदसदृशमित्यर्थः । भारतस्य वेदोत्तमत्वात् ।। ततश्चायं श्लोकार्थः ।। कालेन द्वापरयुगमहिम्ना मीलितोत्सादिता दृक् तत्त्वज्ञानं येषां तेषां मीलितदृशां स्तोकमल्पमायुर्येषां तेषां स्वनिगमः स्वविषयको वेदराशिः । बत अहो । दूरे पारं यस्येति दुर्गमं चरमावधिरित्यवमृश्य स हरिः सत्यवत्यामनुयुगं तृतीयादि पञ्चसु महायुगेषु सत्यवत्यामाविर्हित आविर्भूतः सन् वेदलक्षणद्रुमं विटपशः शाखोपशाखाभेदेन विभजिष्यतीति । बुद्धावतारात्पूर्वं व्यासावतारकथनं दुर्जनमोहकशास्त्रप्रणयनविषये व्यासस्य बुद्धसाम्यं दर्शयितुमिति ज्ञातव्यम् ।। ३६ ।।

देवद्विषां निगमवर्त्मनि विष्ठितानां पूर्भिर्मयेन विहिताभिरदृश्यमूर्तिः ।
लोकान्घ्नतां मतिविमोहमतिप्रलोभं वेषं विधाय यदभाषत औपधर्म्यम् ।। ३७ ।।

प्रकाशिका— बुद्धावतारं तत्कर्म चाह ।। देवद्विषामिति । अदृश्यमूर्तिर्हरिर्मयेन विहिताभी रचिताभिः पूर्भिः पुरीभिर्लोकान् घ्नतां हन्तॄणां रुद्रेण हतानामिति पूरणीयम् । देवद्विषांमसुराणां पुनः विप्रजन्मलब्ध्वा निगमवर्त्मनि वेदविहितानुष्ठाने विष्ठितानां विशेषेण स्थिराणामिति विमोहं बुद्धिभ्रंशकरमतिप्रलोभयत्यन्तं वञ्चकं वेषं बालवेषं विधाय धृत्वा यदौपधर्म्यमुपधर्माणां पाषण्डधर्माणां प्रतिपादकं शास्त्रं तदभाषत धर्माभासप्रतिपादकसूत्रभाष्यादिकं कृतवानित्यर्थः । ननु वेदमार्गे स्थिरैरयं वञ्चक इति कथं न ज्ञातमित्यत उक्तम् ।। अदृश्यमूर्तिरिति । अज्ञेयस्वरूप इत्यर्थः ।। ३७ ।।

यर्ह्यालयेष्वपि सतां न कथा हरेः स्युः पाषण्डिनो द्विजजनाः वृषला नृदेवाः ।
स्वाहा स्वधा वषडिति स्म गिरो न यत्र शास्ता भविष्यति कलेर्भगवान्युगान्ते ।। ३८ ।।

प्रकाशिका— कल्क्यावतारमाह ।। यर्हीति । यर्हि यदा सतामालयेषु गृहेष्वपि हरेः कथा न स्युर्वृपलाः शूद्रादयो नृदेवा राजानो यत्र यस्मिन्काले तस्मिन्युगान्ते भगवान् कलेः शास्ता कात्कारकर्ता । अनेन कल्कि शब्दार्थो दर्शितः । कलेः कात्कारत एव कल्कीत्यन्यत्रोक्तत्वात् । तथा च कल्कि शब्दवाच्यरूपवान् भविष्यतीति भावः ।। ३८ ।।

सर्गे तु योऽहमृषयो नव ये प्रजेशाः स्थानेऽथ धर्ममखमन्वमरावनीशाः ।
अन्ते त्वधर्महरमन्युवशासुराद्याः मायाविभूतय इमाः पुरुशक्तिभाजः ।। ३९ ।।

तात्पर्यम्— 'हरीच्छया विभूतिर्या ब्रह्मादीनां सदा भवेत् । इच्छया वा बहुविधस्तेषु विष्णुः स्वयं स्थितः । अतो मायाविभूतित्वं तेषां मत्स्यादिकाः स्वयमि'त्यध्यात्मे ॥ ३९ ॥

प्रकाशिका— सृष्ट्यादिकर्मभेदेन हरेर्विभूतिरूपस्थानान्याह ॥ सर्गे त्विति । तु शब्दौ सर्गान्तयोः सर्वसम्बन्धित्वरूपविशेषप्रदर्शनाय । सर्गे सृष्ट्यर्थम् । योऽहं जगदुत्पादकतया प्रसिद्धः । ये च मरीच्यादयो ऋषयः । ये च कर्दमाद्या नव प्रजापतयः । ते सर्वे पुरुशक्तिभाजः पूर्णशक्तिमन्तो हरेर्मायाविभूतयः । अथ सृष्ट्यनन्तरं स्थाने स्थित्यर्थं धर्मश्च मखा यज्ञाश्च मनवश्चामराश्चावनीशाश्च ते मायाविभूतयः । अन्ते संहारार्थम् । अधर्मश्च हरो रुद्रश्च मन्युवशाः क्रोधवशाश्च ते चासुराद्याश्च ते मायाविभूतय इति सम्बन्धः । सृष्ट्यादिषु ब्रह्मादीनां निमित्ततोपादानं हरेर्नाशक्ततया किन्तु तेषां स्व्यात्याद्यर्थमेवेति दर्शयितुं पुरुशक्तिभाज इत्युक्तम् । अत्र मायाविभूतय इत्येतन्मायाकल्पितविभूतय इति प्रतीतिनिरासाय प्रमाणेन द्वेधा व्याचष्टे ॥ हरीच्छयेति । विभूतिरैश्वर्यम् । अनेन मायया हरीच्छया विभूतिरैश्वर्यं येषां ते मायाविभूतय इति व्याख्यातं भवति । प्रकारान्तरेणापि व्याख्याति ॥ इच्छयेति । यदिति वर्तते । अनेन मायया हरीच्छया हरेर्विविधा भूतिर्भवनं येषु ते मायाविभूतय इति व्याख्यातमिति ज्ञातव्यम् । मायाविभूतित्वं मायाविभूति शब्दवाच्यत्वम् । तेषां ब्रह्मादीनाम् । ननु मत्स्यादीनामपि क्वचिन्मायाविभूतित्वमुच्यते । तत्र कथं व्याख्यानमित्यपेक्षायामाह ॥ मत्स्यादय इति । स्वयमित्यनेन मायया स्वेच्छया विभूतयो विविधभवनरूपा इति व्याख्येयमिति सूचयति ॥ ३९ ॥

विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि ।
चस्कम्भ यः स्वरभसा स्खलितं त्रिपृष्ठं यन्मां निशाम्य सदनादुरुकम्पमानम् ॥ ४० ॥

प्रकाशिका— इदं मया संक्षेपेणोक्तं विस्तरेण वक्तुं न कोऽपि समर्थ इत्याशयेनात्र विष्णोर्नु कमिति मन्त्रं प्रमाणयन् अर्थतस्तमनुवदति ॥ विष्णोरिति । योऽपि कविरिहभूम्यां पार्थिवानां रजांसि विममे गणितवान्सोऽपि कवीनां मध्ये कतमो नु साकल्येन विष्णोर्वीर्यगणनां कर्तुमर्हति । न कोऽपि । कथं भूतस्य । विष्णुस्त्रिपृष्टं सत्यलोकं चस्कम्भ स्तम्भितवान् । किमिति चस्कम्भ । यद्यस्मात्स्वरभसा स्वपादवेगेन स्खलितं चलितम् । रम्भ शब्दो रंहस् शब्दपर्यायः सकारान्तो रभसेन स्खलितमिति वा । निमित्तान्तरमाह । सदनान्निमित्तादुर्वधिकं कम्पमानं मां निशाम्य निरीक्ष्येति । लोकरूपसदनचलनेन ममापि चलनं निरीक्ष्येत्यर्थः । अनेनोत्तरं सधस्थमित्यस्यार्थानुवादः कृत इति ज्ञातव्यम् ॥ ततश्चायं मन्त्रार्थः ॥ विष्णोर्वीर्याणि नु साकल्येन कं कः प्रवोचं प्रवोचेन्न कोऽपि । यः पार्थिवानि रजांसि विममे गणितवान्सोऽपि न प्रवोचमित्यन्वयः । योविष्णुस्त्रेधा विचक्रमाणस्त्रिविक्रमं कुर्वन् उत्तरमुपरितनं सत्यलोकं चस्कम्भ यत्स्तम्भितवान् । कथं भूतम् । सधस्थं सहस्य सधादेशः तिष्ठतीति स्थः । तत्रस्थेन ब्रह्मणा सहितमिति ॥ ४० ॥

**नान्तं विदाम्यहममी मुनयः प्रजेशा मायाबलस्य पुरुषस्य कुतो परे ये ।
गायन्गुणान्दशशतानन आदिदेवः शेषोऽधुनाऽपि समवस्यति नास्य पारम् ॥ ४१ ॥**

तात्पर्यम्— विदुर्नान्तम् । अनन्तत्वात् ॥ ४१ ॥

प्रकाशिका— अनन्तत्वं कैमुत्येनोपपादयति ॥ नान्तमिति । अत्रामी मुनय इत्यादौ क्रियापदाभावात्क्रियापदमध्याहृत्यान्वयं दर्शयति ॥ विदुरिति । विद्यमानमप्यन्तं न विदुरित्यन्यथाप्रतीतिवारणायाभिप्रायमाह ॥ अनन्तत्त्वादिति । अन्यथा पूर्वोत्तरविरोध इति भावः । मूले पुरुषस्य हरेर्मायावलस्येच्छासामर्थ्यस्यान्तामित्यन्वयः । ननु चतुर्मुखब्रह्मापेक्षया सहस्रवदनस्य शेषस्य ज्ञानाधिक्येन तस्य हरिपारज्ञानं भविष्यतीति मन्दाशयमनुसृत्याह ॥ गायन्निति । इतरगानव्यावृत्त्यर्थमादिदेव इति । न समवस्यति न निश्चिनोति ॥ ४१ ॥

**येषां स एव भगवान्दययेदनन्तः सर्वात्मनाश्रितपदो यदि निर्व्यलीकम् ।
ते वै विदन्त्यतितरन्ति च देवमायां नैषां ममाहमिति धीः श्वसृगालभक्ष्ये ॥ ४२ ॥**

तात्पर्यम्— देवमायां विदन्ति । संसारमतितरन्ति च ॥ ४२ ॥

प्रकाशिका— यदि न केऽपि विदन्ति कथं तर्हि अधिकारिणां मुक्तिरित्यतस्तत्प्रसादादेवेत्याह ॥ येषामिति ॥ अत्र चशब्दादतितरन्तीत्यत्रापि देवमायामित्येतदेव कर्मतयाऽन्वेतीति प्रतीतिवारणायान्यत्कर्माध्याहृत्यान्वयं दर्शयति ॥ देवमायामिति ॥ ततश्चायं मूलार्थः ॥ अनन्तः स भगवानेव येषां दययेद्दयां कुर्यात् । ते देवस्य क्रीडादिगुणस्य तस्य मायां माहात्म्यं विदन्ति जानन्ति । अतितरन्ति च संसारम् । ननु तत्साधनमन्तरेण दययेच्चेत्तस्य वैषम्याद्यापात इत्यत उक्तम् । ते यदि निर्व्यलीकं निष्कपटं सर्वात्मना सर्वप्रकारेण । मनोवाक्कायकर्मभिरिति यावत् । आश्रितपद आश्रितचरणाः । तर्ह्येव दययेन्दित्यन्वयः । चरणाश्रयणेऽपीत्थं भावमाह ॥ नैषामिति । येषामधिकारिणां श्वसृगालभक्षणयोग्ये देहे ममाहमिति धीर्नास्ति येषां तेषां दययेदित्यन्वयः । अत्रानन्त इत्यनेनाघटितघटकशक्तिसम्पत्त्याऽव्यक्तस्वभावोऽपि व्यक्तो भवतीत्युपपादितमिति ज्ञातव्यम् ॥४२॥

**वेदाहमङ्ग परमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यवर्यः ।
पत्नी मनोः स च मनुः तदपत्यभूताः प्राचीनबर्हिर्ऋभुरङ्ग उत ध्रुवश्च ॥ ४३ ॥**

प्रकाशिका—हरिप्रसादेन तन्माहात्म्यज्ञानिनः क इत्यतस्तानुदाहरति ॥ वेदाहमिति श्लोकत्रयेण । योगमायां स्वरूपसामर्थ्यम् । सनकादीनन्तर्भाव्ये यूयमिति बहुवचनम् । दैत्यवर्यः प्रह्लादः । मनुः, स्वायम्भुवः । तस्य पत्नी शतरूपा तदात्मजाः पुत्रपौत्राश्च । अङ्गो वेनस्य पिता ॥ ४३ ॥

**इक्ष्वाकुरैलमुचुकुन्दविदेहगाधिरध्वम्बरीषसगरागयनाहुषाद्याः ।
मान्धात्रलर्कशतधन्वनरन्तिदेवदेवव्रता बलिरमूर्तरयो दिलीपः ॥ ४४ ॥**

प्रकाशिका— ऐल इलायाः पुत्रः पुरूरवाः । नाहुषो ययातिः । रन्तिदेवान्तैः सहितो देवव्रतः ॥ ४४ ॥

**सौभर्युदङ्कशिबिदेवलपिप्पलादाः सारस्वतोद्धवपराशरभूरिषेणाः ।
येन्ये विभीषणहनूमदुपेन्द्रदत्तपार्थार्ष्टिषेण विदुरश्रुतदेवमुख्याः ॥ ४५ ॥**

प्रकाशिका— उपेन्द्रदत्तयोर्ज्ञानिषु गणनं दुष्टजनमोहाय । यद्वा । उप समीपे इन्द्रो विष्णुर्यस्य स उपेन्द्रो ब्रह्मा तेन दत्तः शुकः । तस्य ब्रह्मरातनामकत्वात् ॥ ४५ ॥

**ते वै विदन्त्यतितरन्ति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः ।
यद्यद्भुतक्रमपरायणशीलशिक्षाः तिर्यग्जना अपि किमु श्रुतधारणा ये ॥ ४६ ॥**

तात्पर्यम्— तत्परायणास्तच्छीलास्तच्छिक्षाश्च ॥ ४६ ॥

प्रकाशिका— अत्र कैमुत्यन्यायमाह ॥ त इति । पापजीवाः पापयोनिमाप्ता जीवाः । तर्हि किमिति सर्वे मुक्ता नाभूवन्नित्यत आह ॥ यद्यदभुतेति । अत्र विवक्षितयोजनां दर्शयति ॥ तत्परायणा इति । अद्भुताः क्रमाः पदन्यासा यस्य हरेः स तथोक्तः । तदाश्रयास्तद्विषयकस्वभावास्तद्विषयकशिक्षावन्तश्चेत्यर्थः । अत्रापि कैमुत्यन्यायमाह ॥ तिर्यगिति । जरितर्यादयोऽपि । श्रुते भगवद्रूपे धारणा ध्यानविशेषो येषां ते श्रुतधारणाः ॥ ४६ ॥

**शश्वत्प्रशान्तमभयं प्रतिबोधमात्रं शुद्ध समं सदमतः परमात्मतत्वम् ।
शद्बो न यत्र पुरुकारकवान्क्रियार्थो माया परैत्यभिमुखे च विलज्जमाना ॥ ४७ ॥**

तात्पर्यम्— 'अव्यक्ताद्यनहंमानादात्मतत्त्वं हरिः स्मृतः । अशब्दश्चाप्रसिद्धत्वाच्छान्तः पूर्णसुखत्वत' इति ब्रह्मतर्के ॥ ४७ ॥

प्रकाशिका— अद्भुतक्रमः किं लक्षणक इत्यपेक्षायामाह ॥ शश्वदिति । अत्र प्रशान्तमिति निर्व्यापारत्वमात्मतत्त्वमित्यात्मनो ज्ञातृजीवस्य तत्त्वं स्वरूपमित्यभेदः शब्दो यत्र कारकवान् प्रतिपादको नेत्यशब्दत्वमुच्यत इत्यादि प्रतीतिवारणाय प्रमाणेनैव प्रशान्तमित्यादेरर्थं दर्शयति ॥ अव्यक्तादीति । जीवानामिवाव्यक्ताद्यात्मके शरीरेऽविद्यमानाहंमानाभावादित्यर्थः । तथा चात्मनि

स्वाधीनतया शरीररूपकेऽव्यक्तादौ तत्त्वमनारोपितं रूपं यत्तदात्मतत्त्वमिति व्याख्यानं सूचयति । अप्रसिद्धत्वादेव अ शब्दो न तु सर्वथाऽवाच्यत्वात् ॥ ततश्चायमर्थः ॥ यच्छश्वत्सर्वदैकप्रकारम् । प्रशान्तं प्रकृष्टपूर्णसुखम् । प्रतिबोधमात्रं जडामिश्रज्ञानरूपम् । शुद्धं रागादिदोषदूरं सर्वत्रैकप्रकारं सता कार्येण सहितमसत्कारणं सदसत् तस्मात्परं विलक्षणं शब्दो वेदादिरूपो यत्र येन पुरु साकल्येन कारकवान् कर्मकारकवान् । तत्प्रतिपादको नेत्यर्थः । कथं भूतः शब्दक्रियार्थो धात्वादिलब्धार्थः । पदसमन्वयेन प्रवर्तमानोऽपीत्यर्थः । हरिः स्वयं मायाधीनश्चेत्तदुपासकाः कथं संसारं तरन्तीत्यत आह ॥ मायेति । मायाबन्धकप्रकृतिः । पैरैत्यपसरत्यभिमुखे तदनुग्रहदृष्टिविषये भक्ते । स्थातुमिति शेषः । विलज्जमानेव विलज्जमाना । अनेन हरिकृपादृष्टिविषयो भक्तोऽपि न मायाधीनः किमु हरिरित्युक्तं भवति ॥ ४७ ॥

तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं विशोकम् ।
सम्यङ् निशाम्य यतयो यमलोकहेतुं जहुः सुधामिव निपानखनित्रमिन्द्रः ॥४८॥

प्रकाशिका— एवमद्भुतक्रमलक्षणान्युक्त्वेदानीं ज्ञानिनः संसारत्यागरूपं तरणं दृष्टान्तमुखेनोपपादयति ॥ तद्वै पदमिति । यतयः श्रवणादिप्रयत्नवन्तोऽजस्रं सुखं नित्यसुखमत एव विशोकं यद्ब्रह्मेति विदुः पूर्वज्ञानिनः । अनेनाद्भुतक्रमस्य ब्रह्मत्वं ज्ञानिप्रत्यक्षसिद्धमिति दर्शितम् । तेन तत्स्थाब्रह्मात्मकत्वात्कथं तद्ध्यानं मोक्षसाधनमिति शङ्का निरस्तेति ज्ञेयम् । तत्परमस्य पुंसो भगवतः पदं स्वरूपं सम्यक् स्वयोग्यतानुसारेण निशाम्यापरोक्षीकृत्य यमलोकहेतुं संसारं जहुस्त्यजन्ति । वै प्रसिद्धमेतत् । यथेन्द्रः सुधाममृतं निशाम्य निपीयतेऽस्मिन्निति निपानं कूपादि तस्य खनित्रं खननसाधनं कुद्दलादिकं त्यजति तथैवेति ॥ ४८ ॥

स श्रेयसामपि विभुर्भगवान्यतोऽस्य भावस्वभावविहितस्य सतः प्रसिद्धः ।
देहे स्वधातुविगमे तु विशीर्यमाणे व्योमेव तत्र पुरुषो न विशीर्यतेऽजः ॥ ४९ ॥

तात्पर्यम्— भावस्वभावो भक्तिस्वभावः । तेन निर्मितस्य सत्पुरुषस्य प्रसिद्धः । 'भावो भक्तिः प्रणामश्च प्रावण्यमपि चादर' इत्यभिधानात् ॥ ४९ ॥

प्रकाशिका— ज्ञानिनां मोक्षेतरपुरुषार्थमपि भगवानेव ददातीत्याह ॥ स श्रेयसामिति । स ज्ञानिभिरपरोक्षीकृतो भगवान् श्रेयसां ज्ञानिकाम्यानामपि विभुर्दाता न केवलं येषां स एव भगवानित्यत्रोक्तमोक्षस्य । तत्र हेतुमाह ॥ यत इति । अत्र भावस्वभाव इत्येतद्विवक्षितार्थाप्रतित्या व्याख्याति ॥ भावस्वभाव इति । भावस्वभाव इत्ययं भावप्रधानो बहुव्रीहिरिति दर्शयन्विहितस्येत्य-

स्यार्थमाह ॥ तथेति । तथा भावस्यभावत्वेन सत इत्यस्य विद्यमानस्येत्यर्थकत्वभ्रमवारणायाह ॥ सत्पुरुषस्येति । कर्तरि षष्ठी । सत्पुरुषेण ज्ञात इत्यर्थः । भाव शब्दस्य भक्तिवाचकत्वेऽभिधानं दर्शयति ॥ भाव इति ॥ तथा चायमर्थः ॥ यतो भावो भक्तिः स्वभावो यस्य स भावस्वभावस्तत्त्वेन विहितस्य निर्मितस्य स्वाभाविकभक्तिमत्तयोत्पन्नस्यात एव सतः सत्पुरुषस्यास्य भगवद्दयापात्रस्य । एतादृशेन प्रसिद्धोऽपरोक्षतो ज्ञातोऽतः श्रेयसां विभुरित्यन्वयः । यदिहि कामादिर्निमित्तकभक्तिमता ज्ञातः स्यात्तदा कामितमेकमेव पुरुषार्थं दद्यात् । आजन्मसिद्धस्वाभाविकभक्त्यादिमता ज्ञातस्तु कथमेकमेव पुरुषार्थं दद्यात् । किन्तु समस्तमपि ददातीति । ननु देहेन सह नष्टस्य जीवस्य कथमामुष्मिकं पुरुषार्थं भगवानन्ददातीत्यत आह ॥ देह इति । स्वारम्भकाणां धातूनां भूतानां विगमे विश्लेषे सति देहे विशीर्यमाणे विलीयमाने सति तत्र देहे विद्यमानः पुरुषो जीवो न विशीर्यते । कुतः। यतोऽजो देहत्वस्वरूपलाभलक्षणोत्पत्तिशून्यः । ननु देहनाशे कथं तदन्तर्गतस्यानाश इत्यतोऽत्र दृष्टान्तमाह ॥ व्योमे वेति । यद्वा । ननु जीववद्भगवतोऽपि देहस्थत्वाद्देहनाशेन नष्टस्य कथमामुष्मिकपुरुषार्थप्रदत्वमित्यत आह ॥ देह इति । अत्र पुरुषो भगवान् । शिष्टं पूर्ववत् ॥ ४९ ॥

सोऽयं तेऽभिहितस्तात भगवान्विश्वभावनः ।
समासेन हरेर्नान्यदन्यस्मात्सदसच्च यत् ॥ ५० ॥

तात्पर्यम्— 'सत्तादिर्यत्स्वतो विष्णोस्तस्मादन्यः स सर्वतः । यत्सत्तादिरतोऽन्यस्य नान्यत्वं भेदिनोऽपि त्वि'ति ब्रह्माण्डे ॥ ५० ॥

प्रकाशिका— देवदेव नमस्तुभ्यमित्यारभ्य प्रश्नप्रतिवचनाभ्यामुक्तार्थमुपसंहरति ॥ सोऽयमिति । समासेन संक्षेपेण उक्तेषु प्रमेयेष्विदं सर्वथा न विस्मर्तव्यमिति भावेनोक्तमेव पुनः स्मारयति ॥ हरेरिति । अत्र जगतोऽन्यस्माद्धरेर्यत्सदसदात्मकं कार्यकारणात्मकं जगत्तदन्यन्नेति हरेर्जगदन्यत्वं जगतश्च हर्यनन्यत्वं परस्परं विरुद्धं कथमुच्यत इति शङ्कापरिहारायात्र विवक्षितमन्य शब्दार्थं प्रमाणेनैव दर्शयति ॥ सत्तादिरिति । आदि पदेन प्रतीतिप्रवृत्त्यादेर्ग्रहणम् । स्वतः स्वत एव न जगद्वदन्यस्मादित्यर्थः । अन्य इत्युच्यत इति शेषः । अतो विष्णोरन्यस्य जगतः सत्तादिर्यद्यस्मात् । अतो विष्णोर्भवतीति शेषः । अतो भेदिनोऽपि विष्णुप्रतियोगिकभेदवतोऽपि । अनन्यत्वं जगद्विष्णोरन्यन्नेति । अन्यत्वप्रतिषेधश्चोच्यत इति योजना । अन्य शब्दप्रयोगे निमित्तं हि अन्यानधीनसत्तादिमत्वं तथा लोके दर्शनात् । तच्च विष्णावस्त्यतो विष्णुरन्य शब्दोक्तः । जगति च तन्नास्ति हर्यधीनसत्तादिमत्वात् । अतो जगद्धरेरन्यन्नेत्युच्यत इति न कोऽपि विरोध इति भावः ॥ ५० ॥

इदं भागवतं नाम यन्मे भगवतोदितम् ।
सङ्ग्रहोऽयं विभूतीनां तदेतद्विपुलीकुरु ॥ ५१ ॥

प्रकाशिका— एवं नारदाय हरेर्माहात्म्यं साक्षादवतारान्विभूतिरूपाणि चोपदिश्येदं भगवत्सम्प्रदायागतमतोऽतीवश्रद्धेयमिति दर्शयन् तस्योत्तरत्र कर्तव्यं निरूपयति ॥ इदमिति । यन्मे भगवतोदितं तदिदं भागवतं नाम प्रसिद्धं तुभ्यं मे मयोदितम् । उदितस्य भागवतनामवत्त्वं कुत इत्यत आह ॥ सङ्ग्रहोऽयमिति । विविधा हरेर्विभूतिर्भवनं येषु ते ब्रह्माद्या विविधा च सा भूतिर्भवनमिति वराहादयश्च विभूतयस्तासाम् । उपलक्षणमेतत् । माहात्म्यानामित्यपि ग्राह्यम् । अयं पूर्वोक्तः सङ्ग्रहः क्रोडीकारो यतोऽत इदं भगवत्सम्बन्धित्वाद्भागवतं नामेत्यर्थः । तदेतन्मयोक्तं विपुलीकुरु । व्यासं प्रत्युक्त्वा तेनैतदर्थप्रतिपादकं पुराणं कारयित्वा लोके विस्तृतं कुर्वित्यर्थः ॥ ५१ ॥

यथा हरौ भगवति नृणां भक्तिर्भविष्यति ।
सर्वात्मन्यखिलाधार इति सङ्कल्प्य वर्णय ॥ ५२ ॥

प्रकाशिका— व्यासं प्रति कथनप्रकारं दर्शयति ॥ यथेति । यथा येन वर्णितेन वर्णनेन वा नृणां हरौ भक्तिः प्रेमातिशयो भविष्यति तथा तादृशं हरिमाहात्म्यं भक्तिरसोपेतं वर्णनं च सङ्कल्प्य बुद्धिस्थं कृत्वा वर्णय । तादृशं पुराणं कुरु । इति वर्णय व्यासं प्रति विज्ञापयेति योज्यम् । अत्र सर्वात्मनि सर्वस्वामिन्यखिलाचारे भगवतीति विशेषणत्रयं हराविति विशेष्यं च तस्मिन् प्रेमातिशयरूपभक्तेः कर्तव्यत्वोपपादनाय ॥ ५२ ॥

नृजन्मनि न तुष्येत किम्फलं यमनश्वरे ।
कृष्णे यद्यपवर्गेशे भक्तिः स्यान्नानपायिनी ॥ ५३ ॥

तात्पर्यम्— 'आक्षिप्यते किमित्येतद्यतोऽल्पफलता भवेत् । वस्तुनो यस्य चाल्पत्वं पुंसो वा नेति चोच्यत' इति प्रकाशसंहितायाम् ॥ ५३ ॥ इति द्वितीयतात्पर्ये सप्तमोऽध्यायः ॥ ७ ॥

प्रकाशिका— ननु किं भक्त्या प्रयोजनं येन तदुत्पत्तिप्रकारं सङ्कल्प्य वर्णयेति विज्ञापनीयमित्यत आह ॥ नृजन्मनीति । किं फलं न किमपि । यमनश्वरे यमेन नाशं गच्छति । अपवर्गेश इत्यनेनापवर्गे भक्तिः प्रयोजनमिति दर्शयति ॥ अनपायिनीति । अनपायिनी नित्या । अत्र किं फलमित्याक्षेपो बाधितः । विषयभोगादिरूपफलस्य सत्वादित्यत आक्षेपोक्तेरभिप्रायं प्रमाणेनैव दर्शयति ॥ आक्षिप्यत इति । यतो यस्य साधनस्याल्प फलता एतत्साधनं किमित्याक्षिप्यते । अनेन किं

स्यादित्युत्तरश्लोकगतसाधनाक्षेपाभिप्राय उक्त ज्ञातव्यम् । यस्य च वस्तुनोऽल्पत्वं तदपि किमित्याक्षिप्यते । यस्य वा पुंसोऽल्पत्वं सोऽपि किमित्याक्षिप्यते । एतदुक्तसाधनादित्रयं नेति चोच्यते । न केवलं किं शब्देनाक्षिप्यते । किन्तु नञापि इत्यर्थः । अनेन मूले न तुष्येत नृजन्मन्यलम्बुद्धिं नाप्नुयात् । कुत इत्यत उक्तम् ॥ किं फलमिति । नृजन्मन इति शेषः । भोगादिरूपवस्तुजातस्य कलत्वेऽपि तस्याल्पत्वादाक्षेपः । यस्तुष्येत स किं कुत्सितम् । न । अविद्यमानश्चेति योजना सूचिता ॥ ५३ ॥

किं स्याद्वर्णाश्रमाचारैः किं दानैः किं तपःश्रुतैः ।
सर्वाघघ्नोत्तमश्लोके न चेद्भक्तिरधोक्षजे ॥ ५४ ॥

प्रकाशिका— ननु वर्णाश्रमाचारादिभिरेवापवर्गसंभवे किं भक्त्येत्यत आह ॥ किं स्यादिति । भक्त्यजनकैरेतैर्जायमानं फलं किं न किमपि । यच्च जायते फलं तदल्पमतो युक्त आक्षेप इति भावः ॥ ५४ ॥

मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः ।
शृण्वतः श्रद्धया नित्यं माययात्मा न मुह्यति ॥ ५५ ॥

॥ इति श्रीमद्भागवते द्वितीयस्कन्धे सप्तमोऽध्यायः ॥

प्रकाशिका— उक्तकथां कथयतः शृण्वतोऽनुमोदतश्च फलमाह ॥ मायामिति । मायां पूर्वोक्तं माहात्म्यं मायया बन्धकशक्त्य कैवल्यादिरूपयाऽऽत्मा मनो न मुह्यति । अहङ्कारममकाराभ्यां न भ्रमतीत्यर्थः ॥ ५५ ॥ इति श्रीभागवतटिप्पण्यां सप्तमोऽध्यायः ॥ २-७ ॥

अथ अष्टमोऽध्यायः

राजोवाच—

ब्रह्मणा चोदितो ब्रह्मन्गुणाख्यानेऽगुणस्य च ।
यस्मै यस्मै यथा प्राह नारदो देवदर्शनः ॥ १ ॥

प्रकाशिका— विपुलीकुर्वित्युक्तं विपुलीकरणं राजा पृच्छति सार्धश्लोकेन । अगुणस्य सत्त्वादिगुणशून्यस्य । देव वद्दर्शनं यस्य स देवदर्शनः ॥ १ ॥

एतद्वेदितुमिच्छामि तत्वं वेदविदां वर ।
हरेरद्भुतवीर्यस्य कथा लोकसुमङ्गलाः ॥ २ ॥

प्रकाशिका— तत्त्वं यथा स्यात्तथा । हरिकथाप्रस्तावायान्यांश्चार्थान्प्रष्टुं तावत्स्वस्य हरिकथा-साध्यप्रयोजनं दर्शयंस्ताः प्रथयस्वेति प्रार्थयते ॥ हरेरिति ॥ २ ॥

प्रथयस्व महाभाग यथाऽहमखिलात्मनि ।
कृष्णे निवेश्य निःसङ्गं मनस्त्यक्ष्ये कलेवरम् ॥ ३ ॥

प्रकाशिका— व्यासोपदिष्टभागवतोक्ता हरिकथाः प्रथयस्व विस्तारेण कथयस्व । यतो लोकानां सुष्ठु मङ्गलं याभ्यस्ता भग एव भागो महान् भागो यस्य हे महाभाग ॥ ३ ॥

शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितम् ।
कालेनानतिदीर्घेण भगवान्विशते हृदि ॥ ४ ॥

प्रकाशिका— हरिकथाश्रवणादिनाऽन्येषामपि कलं दर्शयति ॥ शृण्वत इति ॥ ४ ॥

प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहम् ।
धुनोति शमलं कृष्णः सलिलस्थं यथा शरत् ॥ ५ ॥

प्रकाशिका— भावसरोरुहं हृदयकमलम् ॥ ५ ॥

धौतात्मा पुरुषः कृष्णपादमूलं न मुञ्चति ।
मुक्तसर्वपरिक्लेशः पान्थः स्वशरणं यथा ॥ ६ ॥

प्रकाशिका— पान्थः पथिकः । प्रवासादागत इति यावत् । स्वशरणं स्वगृहं यथा न मुञ्चति तद्वत् ॥ ६ ॥

यदधातुमतो ब्रह्मन्देहारम्भोऽस्य धातुभिः ।
यदृच्छया हेतुना वा भवन्तो जानते यथा ॥ ७ ॥

प्रकाशिका— एवं हरिकथाश्रवणस्य पुरुषार्थहेतुत्वमुपपाद्य सन्दिग्धार्थान्पृच्छति ॥ यदधातुमत इत्यादिना । अधातुमतः । अत्र पृथिव्यादयो धातु शब्दवाच्यास्तद्विकारी देहो धातुमानित्युच्यते ।

जीवस्तु नित्यचिद्रूपो न धातुमान् । अतो धातुमद्भिन्नस्यास्य जीवस्य धातुभिः पृथिव्यादिभिर्देहारम्भः । देहोत्पत्तिरिति यावत् । तत्किं यदृच्छया केवलेश्वरेच्छयोतान्येनाप्यनादिना हेतुना । भवन्तस्तदेतद्यथा यथावज्जानते । अतस्तद्वद इति शेषः । ईश्वरेच्छयातिरिक्तं स्वतश्चिद्रूपस्य जीवस्य देहसम्बन्धापादकं प्रधानं कारणं किञ्चिदस्ति न वेति प्रश्नाशयः ॥ ७ ॥

आसीद्यदुदरात्पद्मं लोकसंस्थानलक्षणम् ।
यावानयं वै पुरुषः इयत्तावयवैः पृथक् ।
तावानसाविति प्रोक्तस्तथावयववानिव ॥ ८ ॥

प्रकाशिका— एवं जीवविषयकं प्रश्नं कृत्वेश्वरविषयेऽपि पृच्छति ॥ आसीदिति । लोकानां संस्थानं विक्रिया तदेवलक्षणं स्वरूपं यस्य तत्पद्मं यस्योदरादासीत् । असात्रीश्वरः पृथक् प्रत्येकमियत्तायुक्तैः स्वपरिमितैरवयवैरयं प्रसिद्धो लौकिकः पुरुषो यावन् यत्संस्थानविशेषवान् ॥ तावान् तादृशसंस्थानविशेषवान् । तथाऽवयववानिति प्रोक्तः । अतो जीववदीश्वरस्यापि देहित्वेन त्वयोक्तत्वादीश्वरस्य को विशेष इति प्रश्नाशयः । विशेषोऽपि त्वयैवोक्त इति दर्शयितुमासीद्यदुदरात्पद्ममित्युक्तम् । अतः प्रश्नमूलभूतः संशय इति भावः ॥ ८ ॥

अजः सृजति भूतानि भूतात्मा यदनुग्रहात् ।
ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः ॥ ९ ॥

प्रकाशिका— विशेषान्तरमपि पूर्वोक्तमनुवदति ॥ अजः सृजतीति । भूतात्मा स्वसृष्टकार्यव्यापी । आद्विष्णोर्जातत्वादजो ब्रह्मा । यस्येश्वरस्यानुग्रहात् । तया चैवमादि विशेषः । ईश्वरस्यापि जीववद्देहित्वे कथमुपपद्यत इति भावः । ईश्वरस्य जीववच्छिरः- कराद्युपेतदेहवत्त्वेऽपि न जीवसाम्यं तच्छरीरस्याप्राकृतत्वादिति यत्रोत्तरत्र निरूपणं भविष्यति तदेवास्योत्तरमिति ज्ञातव्यम् ॥ ९ ॥

स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः ।
मुक्त्वात्ममायां मायेशः शेते सर्वगुणाश्रयः ॥ १० ॥

प्रकाशिका— पुनः प्रश्नान्तरं करोति ॥ ददृश एते इत्यादिना । येनानुगृह्णता येन च प्रकारेण तस्य रूपं ददृशे स चापि पुरुषो यत्र यस्मिन् लोके शेते तं पुरुषं तं प्रकारं तल्लोकं चोदाहर्तुमर्हसीत्युत्तरेणान्वयः । चापि शब्दौ परस्पर समुच्चये । विश्वस्य स्थित्युद्भवाप्यया यस्मात्स तथोक्तः ॥ मायेशो लक्ष्मीशः । आत्ममामयाऽऽत्मनो बन्धकशक्तिं मुक्त्वा । तत्रत्यान् जीवान् बन्धवर्जितान् कृत्वेति यावत् । सर्वेषां गुणानां ज्ञानानन्दादीनां तद्रूपाणां मुक्तानां वाऽऽश्रयः ॥ १० ॥

पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः ।
लोकैरमुष्यावयवाः सपालैरिति शुश्रुमः ॥ ११ ॥

तात्पर्यम्— निजावयवेभ्यः सृष्टाः । बाह्यावयवा लोकैः कल्प्यन्ते ॥ ११ ॥

प्रकाशिका— प्रश्नान्तरमाह ॥ पुरुषावयवैरिति । लोका इत्युपलक्षणम् । ब्रह्माण्डान्तर्गताध्यात्मिकादिकं सर्वं ग्राह्यम् । पुरुषस्य ब्रह्मगतस्य वैराजस्यावयवैः पूर्वकल्पिता यस्य देहावयवैरित्यादिना पूर्वं कल्पितत्वेनोक्ताः सर्वं ब्रह्माण्डान्तर्गतं पदार्थजातं वैराजावयवेभ्यो जातमिति त्वया पूर्वमुक्तं तद्यथाऽऽसीत्तथोदाहर्तुमर्हसीति वक्ष्यमाणेनान्वयः ॥ किं तद्वचनेनेत्यत आह ॥ लोकश्चेति । लोकादिभिरित्यर्थः । अमुष्य वैराजस्य पातालमेतस्येत्यादिना कल्पिता धारणाविषयतयोक्ताः । सम्यग्वचनाभावे उक्तधारणाऽनुपपन्नाऽतस्तद्वचनमावश्यकमिति भावः । यत्र यथा श्रूयतेऽन्योन्याश्रयत्वाशङ्कापरिहाराय पूर्वोक्तं स्मारयति ॥ निजावयवेभ्य इति । स्वरूपभूतावयवेभ्य इत्यर्थः । तथा च यस्यावयवैरित्यत्र स्वरूपभूतावयवैरित्यर्थो विवक्षित इति भावः । बाह्यावयवाः । ब्रह्माण्डरूपप्रतिमावयवाः । लोकैः पातालादि सत्यान्तैः कल्प्यन्ते लोकात्मकतया पातालमेतस्येत्यादिना धारणाविषयतया निरूप्यन्तेऽतो न कोऽपि दोष इति भावः ॥ ११ ॥

यावान्कल्पो विकल्पो वा यथा कालोऽनुमीयते ।
भूतभव्यभवच्छब्द आयुर्मानश्च यत्कृतम् ॥ १२ ॥

प्रकाशिका— पुनरप्यज्ञातान् बहून् अर्तान्पृच्छति ॥ यावानित्यादिना । यावान्यावत्परिमितः कल्पो ब्राह्मकल्पो द्विपरार्धाख्यः । विकल्पो दैनन्दिनो मन्वादिकालो वा ॥ भूतो भव्यो भवन्निति शब्दो यस्मिन्स भूतभव्यभवच्छब्दोऽतीतानागतवर्तमान शब्दवाच्य इत्यर्थः । यथा यथावदनुमीयते ज्ञायते कथं च आयुषो मानं प्रमाणे च येन कालेन कृतम् ॥ १२ ॥

कालस्यानुगतिर्या तु लक्ष्यतेऽण्वी महत्यपि ।
यावतीः कर्मगतयो यादृशीर्द्विजसत्तम ॥ १३ ॥

प्रकाशिका— अण्वी परमाणुलक्षणा महती परममहती कालस्यानुगतिः प्रवृत्तिः साऽपि वा कथं लक्ष्यते ज्ञायते ॥ १३ ॥

यस्मिन्कर्मसमावापो यथा येनोपगृह्यते ।
गुणानां गुणिनां चैव परिमाणं सुविस्तरम् ॥ १४ ॥

तात्पर्यम्— जीवे कर्मसमावापः । परमेश्वरेण गृह्यते । गुणिनां महदादिजीवानां सामर्थ्ये परिमाणम् । देवासुरेभ्यो मघवानित्यादि ॥ १२, १४ ॥

प्रकाशिका— कर्मगतयः कर्मप्राप्यस्थानानि यावतीर्यावत्य कति संख्याकानि । यादृशीर्यादृश्यः कीदृशानि । यस्मिन्कस्मिन्कर्मणां सम्यगावापः संग्रहः कर्मसङ्ग्रहकर्ता क इत्यर्थः । तत्कर्म येन केन स्वामिना यथा कथमुपगृह्यते । एतत्प्रश्नद्वयस्योत्तरत्र कुत्रोक्तमिति न प्रतीयतेऽतस्तदुत्तरस्थानं दर्शयति ॥ जीव इति । एवं च जीव ईश्वरसेवारूपं कर्म करोति तदीश्वरः स्वपूजात्वेन गृह्णातीति यत्राग्रे भविष्यति तदेवास्य प्रश्नद्वयस्योत्तरस्थानमिति भावः ॥ गुणानां महदादिकार्याणां परिमाणं तृतीयादौ कथ्यत इति स्पष्टम् । गुणिनस्तु के किं विषयं परिमाणं कुत्र च तदुक्तमित्यत आह ॥ गुणिनामिति । महदादिजीवानां महत्तत्त्वाद्यभिमानिब्रह्मादि जीवानां सामर्थ्यविषयं परिमाणं परिमितिः । देवासुरेभ्यो मघवन्नित्यादि यथा स्यात्तथा । कथ्यत इति शेषः ॥ १४ ॥

भूपातालककुब्व्योम ग्रहनक्षत्रभूभृताम् ।
सरित्समुद्रद्वीपानां सम्भवश्चैतदोकसाम् ॥ १५ ॥

प्रकाशिका— भूपातालादीनां च परिमाणम् ॥ १५ ॥

प्रमाणमण्डकोशस्य बाह्याभ्यन्तरवस्तुनः ।
महताञ्चानुचरितं वर्णाश्रमविनिर्णयम् ॥ १६ ॥

प्रकाशिका— एतानि भूम्यादीन्योकांसि येषां प्राणिनां तेषां संभवसुत्पत्तिं च । यच्छब्दस्य सर्वत्रानुषङ्गः । बाह्याभ्यन्तरे वर्तमानस्य वस्तुनो हरेःप्रमाणं परिमाणम् । सत एव पदार्थस्येत्यादिना वक्ष्यमाणम् ॥ १६ ॥

अवतारानुचरितं यदाश्चर्यतमं हरेः ।
युगानि युगमानञ्च धर्मो यश्च युगे युगे ॥ १७ ॥

प्रकाशिका— महतां मरीचिकर्दमादीनाम् । वर्णानामाश्रमाणां च विशेषतो निर्णयम् । आश्चर्यतमम् । अन्येषामिति शेषः ॥ युगानि कति ॥ १७ ॥

नृणां साधारणो धर्मः सविशेषश्च यादृशः ।
श्रेणीनां राजर्षीणाञ्च धर्मः कृच्छ्रेषु जीवताम् ॥ १८ ॥

तात्पर्यम्— श्रेणीनामङ्गरक्षकाणां युद्धेषूच्यते ॥ १८ ॥

प्रकाशिका— साधारणो धर्मः । सर्ववर्णाश्रमाणामिति शेषः । सविशेषो विशेषेण सहितः । ब्राह्मणादीनां यत्यादीनां च साधारणो धर्मश्च यादृशः कीदृश इत्यर्थः ॥ श्रेणीनां धर्मः पृच्छ्यते । तत्र के श्रेणयः कुत्र च केषां धर्म उक्त इत्यत आह ॥ श्रेणीनामिति । अङ्गरक्षकाः श्रेणी शब्दवाच्यास्तेषां धर्मः । युद्धेषूत्तरत्र कथ्यमानेषूच्यते तदेवास्योत्तरमिति भावः । राजर्षीणां प्रियव्रतादीनाम् । कृच्छ्रेष्वापत्सु जीवतां च धर्मो यः क इत्यर्थः ॥ १८ ॥

तत्वानां परिसङ्ख्यानं लक्षणं हेतुलक्षणम् ।
पुरुषाराधनविधिं योगस्याऽध्यात्मिकस्य च ॥ १९ ॥

तात्पर्यम्— हेतुलक्षणं ब्रह्मलक्षणम् ॥ १९ ॥

प्रकाशिका— तत्त्वानां प्रकृत्यादीनां परिसङ्ख्यानं गणनं तेषां लक्षणं स्वरूपम् । हेतुलक्षण-मित्यप्रतीत्या व्याचष्टे ॥ हेतुलक्षणमिति । पुरुषस्य विष्णोः पूजाप्रकार आध्यात्मिकस्य परमात्मसम्बन्धिनो योगस्य ध्यानादिरूपस्य ॥ १९ ॥

योगेश्वरैश्वर्यगतिं लिङ्गभङ्गश्च योगिनाम् ।
वेदोपवेदधर्माणामितिहासपुराणयोः ॥ २० ॥

तात्पर्यम्— योगतो लिङ्गभङ्गः पूर्वोक्तः । पानेन ते देवेत्यादि पश्चात् ॥ २० ॥

प्रकाशिका— योगेश्वराणामैश्वर्यगतिमणिमाद्यष्टैश्वर्यप्राप्तिं लिङ्गभङ्गमिति । ननु योगिनां लिङ्गभङ्गश्चरमशरीरत्यागः । स्थिरं सुखं चासनमित्यादिना पूर्वमेवोक्तः । अन्तोव्यर्थोऽयं प्रश्न इत्यत आह ॥ योगत इति । अयमाशयः । द्विधा योगिनः । यमादि योगाभ्यासप्रधानाः । भक्तिपूर्व-कश्रवणाद्यभ्यासप्रधानाश्चेति । तत्राद्यानामेव योगतः स्थिरं सुखं चासनमित्यादिनोक्ताद्योगाल्लिङ्ग-भङ्गश्चरमदेहत्यागः पूर्वोक्तो न तु द्वितीयानामतोऽयं प्रश्नो द्वितीययोगिलिङ्गभङ्गविषयः । तदुत्तरं च यानेन तदेव कथासुधाया इत्यादिरूपं पश्चादुत्तरत्रैव भविष्यति अतो न कोऽपि दोष इति । वेदा ऋगादयः । उपवेदा आयुर्वेदादयः । धर्मा धर्मशास्त्राणि । तेषामितिहासपुराणयोश्च ॥ २० ॥

सम्भवः सर्वभूतानां विक्रमः प्रतिसङ्क्रमः ।
इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः ॥ २१ ॥

प्रकाशिका— सम्भवः । यथा सम्भव उद्धार उत्पत्तिश्च । विक्रमो विशिष्टक्रमः स्थितिः प्रतिसङ्क्रमः संहारः इष्टस्य यागादेः पूर्तस्य वापीकूपतटकादिदेवताऽऽयतनानि च । अन्नप्रदानमारामः पूर्तमित्यभिधीयत इति वचनात् । वापीकूपादेः । काम्यानां कारीर्यादीनां त्रिवर्गस्य धर्मार्थकामलक्षणस्यानुशायिनां कर्मानुसारेण गर्भवासिनाम् ॥ २१ ॥

यो वानुशयिनां सर्गः पाखण्डस्य च सम्भवः ।
आत्मनो बन्धमोक्षौ च व्यवस्थानं स्वरूपतः ॥ २२ ॥

प्रकाशिका— आत्मनो जीवस्य बन्धमोक्षो बन्धध्वंसः स्वरूपतो व्यवस्थानं स्वरूपानन्दानुभवेन स्थितिः ॥ २२ ॥

यथात्मतन्त्रो भगवान्विक्रीडत्यात्ममायया ।
विसृज्य च यथा मायामुदास्ते साक्षिवद्विभुः ॥ २३ ॥

तात्पर्यम्— द्वेधा वावात्ममाया तद्रूपा तद्वशा चेति । तद्वशया संसारयति । स्वरूपया विमोचयत्युदास्ते तद्वशां विमुक्तस्य इतरयैनं रमयत्येष आत्मे(त्मै)ष आनन्द' इति सौकारायणश्रुतिः ॥ २३ ॥

प्रकाशिका— यथात्मतन्त्रो भगवानिति श्लोके आत्ममाययेत्युच्यमानां मायामनिर्वाच्यविद्येति प्रतितिवारणाय श्रुत्यैव दर्शयति ॥ द्वेधेति । तद्रूपा तदिच्छारूपा । तद्वशा प्रकृत्यादिरूपा । संसारयति । जीवमिति शेषः । विमुक्तस्थो मुक्तजीवे नियामकतया विद्यमानः परमात्मा तद्वशां तद्वशेति निर्दिष्टां स्ववशां बन्धकप्रकृत्यादिरूपामुदास्ते । तस्या बन्धनकरणत्वं तत्र न ददातीत्यर्थः । इतरया स्वेच्छारूपया । एनं मुक्तजीवम् ॥ ततश्चायं श्लोकार्थः ॥ आत्मतन्त्रः स्वतन्त्र आत्ममायया स्वात्मभूतयेच्छारूपया स्वाधीनया प्रकृत्यादिरूपमायया जीवम् । बद्ध्वेति शेषः । विशेषेण क्रीडति । जीवं संसारयतीति यावत् । मायां प्रकृत्यादिरूपां स्ववशामात्ममायया स्वस्वरूपभूतेच्छया विसृज्य विमुच्योदास्ते तस्या बन्धनकरणत्वं पुनर्न प्रयच्छति । तत्कृतलेपाभावं वक्तुं साक्षिपुरुषवदित्युक्तम् । आत्ममायया स्वरूपेच्छया विक्रीडति । मुक्तजीवस्थस्तं विशेषेण क्रीडयति रमयतीति ॥ २३ ॥

सर्वमेतच्च भगवान् पृच्छतो मेऽनुपूर्वशः ।
तत्वतोऽर्हस्युदाहर्तुं प्रपन्नाय महामुने ॥ २४ ॥

प्रकाशिका— प्रश्नराशिमुपसंहरति ॥ सर्वमिति । च शब्दादन्यदपृष्टं च ॥ २४ ॥

अत्र प्रमाणं हि भवान्परमेष्ठी यथात्मभूः ।
अपरे ह्यनुतिष्ठन्ति पूर्वेषां पूर्वजैः कृतम् ॥ २५ ॥

तात्पर्यम्— यस्मादनुतिष्ठन्ति तस्मात्परमेष्ठी प्रमाणम् ॥ २५ ॥

प्रकाशिका— महामुनीनामपि बृहस्पत्यादीनामिव विप्रलम्भकत्वं संभावितं तदपि त्वयि नास्तीत्याह ॥ अत्र प्रमाणमिति । अत्र पृष्टेष्वर्थेषु भवान् प्रमाणमाप्तो न विप्रलम्भकः । कुतः । हि यस्मादत्रान्यत्र चार्थेष्वात्मभूः परमात्मपुत्रः । अत्र परमेष्ठी प्रमाणमाप्ततमः । तथात्वेऽपि कुतो यथा परेमेष्ठी अत्र प्रमाणं तथा भवान्नारदव्यासद्वारागतपरमेष्ठिसम्प्रदायवत्कृत्वात्तवेति भावः । नन्वेवमुत्तरार्धं वैय्यर्थ्यमित्याशङ्कायां परमेष्ठिनः सर्वशास्त्रार्थेष्वाप्तत्वसमर्थनाय तदुपयोग इत्याशयेन तद्योजनां दर्शयति ॥ यस्मादिति । अनेन हि शब्दार्थो दर्शितः । पूर्वेषां मरीच्यादीनां पूर्वजैर्ब्रह्मादिभिः कृतं शास्त्रार्थमपरेऽन्येऽपि ऋषयोऽनुतिष्ठन्ति तस्मात्परमेष्ठी प्रमाणम् । न हि परमेष्ठिन आप्तत्वाभावे सर्वेषां शिष्टानामविगानेन तदुक्तानुष्ठानं सम्भवति । अतो यथा परमेष्ठी अत्र प्रमाणं तथा तत्सम्प्रदायवक्ता भवानप्यत्र प्रमाणमिति पूर्वोक्तं युक्तमिति भावः ॥ २५ ॥

न मेऽसवः परायन्ति ब्रह्मन्ननशनादमी ।
पिबतोऽच्युतपीयूषं त्वद्वाक्याब्धि विनिःसृतम् ॥ २६ ॥

प्रकाशिका— अनश्नतस्तव मन आदीन्द्रियदौर्बल्यादस्मदुक्तावधारणमशक्यमित्यत आह ॥ न मेऽसव इति । असव इन्द्रियाणि न परायन्ति नापगच्छन्ति न व्याकुलीभवन्तीत्यर्थः । अशनादप्यतिबलहेतुपीयूषपानादित्याह ॥ पिबत इति । अच्युतकथापीयूषम् ॥ २६ ॥

सूत उवाच—

स उपामन्त्रितो राज्ञा कथायामिति सत्पतेः ।
ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि ॥ २७ ॥

तात्पर्यम्— 'बालोऽपि स गुरुत्वेन मुनिभ्यो ब्रह्मणा यतः । दत्तोऽतो ब्रह्मरातेति नाम वैयासकेरभूदि'ति ब्राह्मे ॥ २७ ॥

प्रकाशिका— उपामन्त्रितः पृष्टः । सतां ब्रह्मादीनां पतेर्हरेर्ब्रह्मरातः शुको विष्णुरातेन परीक्षिता । अत्र शुकस्य ब्रह्मरातनामवत्त्वं केन निमित्तेनेत्यतस्तत्र निमित्तं प्रमाणेनैव दर्शयति ॥ बालोऽपीति । सः शुको गुरुत्वेन गुरुत्वाभिप्रायेण दत्तः । रा दान इति धातोरिति भावः ।

वैय्यासकैर्व्यासपुत्रस्य । विष्णुना कृष्णरूपेण रातो दत्त इति परीक्षितो विष्णुरात इति नाम प्रसिद्धमिति नात्र निमित्तमुक्तम् ॥ २७ ॥

आह भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते ॥ २८ ॥

तात्पर्यम्— **'यत्र ब्रह्मान्तरोत्पत्तिः ब्रह्मकल्पः स ईरित' इति च ॥ २८ ॥ इति द्वितीयतात्पर्ये अष्टमोऽध्यायः ॥ ८ ॥**

प्रकाशिका— ब्रह्मसम्मितं वेदसंवादि वेदसमानमिति वा । ब्रह्मण आप्तत्वं प्रकारान्तरेणापि साधयति ॥ ब्रह्मण इति । तथा च ब्रह्मा पूर्वं पृष्टेष्वर्थेष्वाप्तस्तद्विषये परमाप्ततमेन भगवतोपदिष्टत्वादिति साधनं सूचितमिति ज्ञातव्यम् । अत्र ब्रह्मकल्प शब्दस्य विवक्षितमर्थं प्रमाणेनैव दर्शयति ॥ यत्रेति । यस्मिन्काल इत्यर्थः । ब्रह्मान्तरोत्पत्तिः पूर्वब्रह्मप्रलयानन्तरमन्यस्य ब्रह्मण उत्पत्तिरित्यर्थः । तथा च ब्रह्मकल्पे ब्रह्मान्तरोत्पत्तिसमये उपागते प्राप्ते सत्यादिसृष्ट्युपक्रमकाल इति यावत् । तथा च पुन्नामकब्रह्मणे वासुदेवेन प्रोक्तमेव चतुर्मुखाय पद्मनाभेनोपदिष्टमित्याशयान्न कश्चित्क्षुद्रोपद्रवः ॥ २८ ॥

यद्यत्परीक्षिदृषभः पाण्डूनामनुपृच्छति ।
आनुपूर्व्येण तत्सर्वमाख्यातुमुपचक्रमे ॥ २९ ॥

॥ इति श्रीमद्भागवते द्वितीयस्कन्धे अष्टमोऽध्यायः ॥

प्रकाशिका— ननु राज्ञा पृष्टस्योत्तरमनुक्त्वा भागवतपुराणकथनमसङ्गतमित्यत आह ॥ यद्यदिति । पाण्डूनामृषभः श्रेष्ठः । आनुपूर्वेण क्रमेण । प्रस्तावक्रम एवात्र विवक्षितो न प्रश्नक्रमः । तत्सर्वं तस्य सर्वस्योत्तरम् । उपचक्रमे । भागवतमिति शेषः । भागवताख्यानेनैव प्रश्नानामुत्तरं दातुं भागवतपुराणमारब्धमतो नासङ्गतिरिति भावः ॥ २९ ॥ इति श्रीभागवतटिप्पण्यामष्टमोऽध्यायः ॥

॥ २-८ ॥

अथ नवमोऽध्यायः

श्रीशुक उवाच—

आत्ममायामृते राजन्परस्यानुभवात्मनः ।
न घटेतार्थसम्बन्धः स्वप्ने द्रष्टुरिवाञ्जसा ॥ १ ॥

तात्पर्यम्— परस्य अर्थव्यतिरिक्तस्य । यदधातुमत इत्यस्य ह्युत्तरम् ॥ 'अशरीरस्य जीवस्य शरीरोत्पत्तिकारणम् । ईश्वरेच्छा प्राथमिका तां विना न हि किञ्चन ॥ द्वितीया प्रकृतिः प्रोक्ता तद्रूपा हि गुणास्त्रयः । तेषां सम्पातजो भावो ममाहमिति या मतिः । देहात्परस्य देहित्वमहं-भावमृते कुतः । यथारजस्तमोभावैर्विना स्वप्नो न जायते । निद्रा कामाद्यभावेन तद्वद्देहः क्व तान्विना । तस्मात्प्रकृत्यैव पुमान्मानुषादिविकारया । मानुषादिरिवाभाति नित्यचैतन्यरूपवान्
॥ १, २ ॥

प्रकाशिका— तत्रादौ यदधातुमत इत्यस्योत्तरं वक्ति ॥ आत्ममायामिति । अत्र परस्ये-त्येतत्परमात्मन इति प्रतीतिवारणाय व्याचष्टे ॥ परस्येति । अत्रार्थ शब्देन धातुमच्छब्देनोक्तं शरीरं ग्राह्यम् । तद्व्यतिरिक्तस्याधातुमतो जीवस्येत्यर्थः । ननु पर शब्दोऽयं कुतो जीवपरः परमात्मपर एव किं न स्यादित्यत आह ॥ यदधातुमत इति । हि यस्मादयं श्लोको यदधातुमत इति जीवविषय-कप्रश्नस्योत्तरदानाय प्रवृत्तस्तस्मात्परस्येत्येतत् जीवविषयमेवेति वक्तव्यम् । अन्यथा प्रश्नोत्त-रयोर्वैयधिकरण्यप्रसङ्गादिति भावः । अप्रतिपत्तिविप्रतिपत्तिनिरासाय श्लोकत्रयं प्रमाणेनैव व्याचष्टे ॥ अशरीरस्येति । अशरीरस्येत्यनेन परस्येति व्याख्यातम् । आत्ममायामृतेऽर्थसम्बन्धो न घटेतेत्यस्य तात्पर्यम् ॥ शरीरोत्पत्तीति । अनेनार्थ शब्दः शरीरपर आत्ममायाशब्द ईश्वरेच्छापर इत्युक्तं भवति । प्राथमिकी प्रधाना कुत इत्यत आह ॥ तां विनेति । हि यस्मात्तामीश्वरेच्छां विना किञ्चन किमपि कार्यं न । जायत इति शेषः । आत्ममायामृत इत्यस्यार्थान्तरमाह ॥ द्वितीयेति । तद्वन्न प्रधाना । तदधीनेति यावत् । प्रकृतेः शरीरकारणत्वमुपपादयितुमाह ॥ तद्रूपा इति । प्रकृत्यभिन्ना इत्यर्थः । इदं च वक्ष्यमाणरीत्या सत्त्वादिगुणानां देहकारणत्वे तदभिन्नायाः प्रकृतेरपि देहकारणत्वमुपपन्नमिति प्रदर्शनाय ममाहमिति या मतिः सः भावस्तल्लक्षणः कार्यविशेषः । ये त्रयः सत्त्वादयो गुणास्तेषां संपातजः सन्निपातजः संश्लेषज इति योजना । अनेन रममाणो गुणेष्वस्य ममाहमिति मन्यत इत्येतदुक्तार्थम् । इदानीं प्रकृतेः शरीरकारणत्वं तदभिन्नगुणकार्याहंमतिद्वारैवेत्याशयेन गुणका-र्याहंमतेः शरीरकारणत्वं दर्शयति ॥ देहात्परस्येति । देहभिन्नस्येत्यर्थः । स्वप्ने द्रष्टुरिवांजसेति मूलोक्तं दृष्टान्तं विवृण्वन् दार्ष्टान्तिकं दर्शयति ॥ यथेति । रजस्तमोभावै राजसतामसपदार्थैः । इदमुप-लक्षणम् । सात्विकोऽपि भावो ग्राह्यः । स्वप्नः स्वाप्नपदार्थः । कुत इत्यत आह ॥ निद्रेति । अत्र निद्राशब्दो बाह्येन्द्रियमनोव्यापारोपरमपरः । स्वप्ने मनस उपरमाभावात् । सा निद्रा तामसो भावः । तस्याः स्वाप्नार्थकारणत्वमनुभवसिद्धम् । कामो राजसो भावः । तस्य च स्वाप्नार्थकारणत्वं काम्यकर्मकर्तॄणामनुभवसिद्धम् । स्वकामानुसारेणैव स्वप्नार्थदृष्टत्वात् । आदिपदेन सात्विकादि-पदार्थानुभवजनिता वासनाः सात्विकादिभेदेन त्रिविधकर्मजन्यान्यदृष्टानि च ग्राह्याणि ।

तान्प्रकृतिगुणान् । क न कापि जायत इत्यर्थः । इयांस्तु विशेषः । प्रकृतिगुणसंपातेन ममाहमिति मतौ जातायां तथा विहितनिषिद्धकरणजनितपुण्यपापद्वारा देहलाभः । स्वप्ने तूक्तरीत्येति । प्रकृतेर्देहकारणत्वमुपपाद्योपसंहरति ॥ तस्मादिति । प्रकृत्यैव स्वाभिन्नगुणसंपातद्वारेति शेषः । मानुषादीत्यनेन बहुरूप इवाभाति मायया बहुरूपयेत्येतदुक्तार्थम् । नित्यचैतन्यरूपवानित्यनेनानुभवात्मन इत्येतद्विवृतम् । नन्वेवंविधस्य कदा मुक्तिरित्यत आह ॥ यदा स्वरूपमिति । स्वस्य रूपं कालप्रकृतिविकारवर्जितम् । कालविकारो बाल्यादिः । प्रकृतिविकारो मानुषादिस्ताभ्यां वर्जितं जानाति । वेदान्तश्रवणादिनेति शेषः । अनेन यर्हि चायमिति श्लोको व्याख्यातः ॥ ततश्चायं श्लोकत्रयार्थः ॥ अनुभवात्मनः स्वतो नित्यचिद्रूपस्य स्वत एव परस्य देहभिन्नस्य जीवस्य देहादिरूपार्थसम्बन्धः । आत्मनः परमात्मनो मायामिच्छां तथा तदधीनां मायां सत्त्वादिगुणरूपां प्रकृतिं च ऋते विना न घटेत । यथा स्वप्ने स्वप्नावस्थायां द्रष्टुर्जीवस्यांजसा तत्त्वतोऽर्थसम्बन्धः स्वाप्ने देहाद्यर्थसम्बन्ध आत्ममायां भगवदिच्छां भगवदधीनां त्रिगुणां प्रकृतिं च ऋते न घटेत तथैवेति योजना । अनेन स्वतोऽशरीरस्य जीवस्य शरीरसम्बन्ध ईश्वरेच्छैव प्रधानहेतुस्तदतिरिक्तं प्रकृत्यादिकं भगवदधीनं न प्रधानमित्युत्तरमुक्तं भवति ॥ १ ॥

बहुरूप इवाभाति मायया बहुरूपया ।
रममाणो गुणेष्वस्या ममाहमिति मन्यते ॥ २ ॥

प्रकाशिका— ननु स्वतो शरीरस्य जीवस्य प्रकृतिगुणैः कथं नानाविधदेहारम्भ इत्यत आह ॥ बहुरूप इवेति । बहुरूपया देवदानवमानवादिशरीरतया विकृतया मायया प्रकृत्यया बहुरूप इव बहुशरीरवानिवाभाति । स्वभावतोऽशरीत्वद्योतनायेव शब्दः । ननु मायाया बहुशरीरतया विकृतत्वेऽपि जीवस्य तच्छरीरवत्त्वं कुत इत्यत आह ॥ रममाण इति । अस्याः प्रकृतेर्गुणेषु कार्येषु देहेषु रममाणो विहितनिषिद्धकर्मकुर्वाणो यत इति । ननु प्राकृतदेहेषूक्तरूपं रममाणमेवास्य कस्मादित्यत आह ॥ यतो ममाहमिति । मन्यत इति । ननु तत्र ममाहमिति मतिरपि किं निमित्तेत्यत आह ॥ अस्याः प्रकृतेर्गुणेषु सत्त्वादिषु मिलितेषु सत्स्विति । तथा चेश्वरेच्छयाऽनादितः स्वसम्बन्धबहुप्रकृतिकार्येषु नानाविधदेहेषु प्रकृतिगुणानां सत्त्वादिगुणानां संपातेन जातायां ममाहमिति मत्यां विहितनिषिद्धादिकर्मकुर्वाणः पुनर्बहुरूपया मायया बहुरूप इवाभातीति हेतुहेतुमद्भावो द्रष्टव्यः ॥२॥

यर्हि चायं महित्वे स्वे परस्मिन्कालमाययोः ।
रमते गतसंमोहस्त्यक्त्वोदास्ते तदोभयम् ॥ ३ ॥

तात्पर्यम्— यदा स्वरूपं जानाति कालप्रकृतिवर्जितम् । वासुदेवप्रसादेन तदा मुक्तो भवत्यसावि'ति भविष्यत्पुराणे ॥ ३ ॥

प्रकाशिका— नन्वेवं बन्धस्य जीवस्वभावत्वाभावे केन साधनेनायमिदमस्वभाविकं रूपं हित्वा स्वस्वरूपेणैवावस्थितो भविष्यतीत्यत आह ॥ यर्हीति । अयं जीवो यर्हि यदा कालमाययोः परस्मिन्काले प्रकृतिविकारशून्ये स्वे स्वीयमहित्वे ज्ञानानन्दाद्यात्मके स्वस्वरूपे विषये रमते वासुदेवप्रसादेन ज्ञानवान् भवति तदा कालप्रकृतिविकारशरीरं त्यक्त्वोदास्ते पुनस्तन्न भजते यतो गतसंमोहस्तदापादकाहंममाभिमानवर्जितः । न केवलमेमतावत् । किन्तु स्वे महित्वे रमते चेति ॥ ३ ॥

आत्मतत्वविशुध्यर्थं यदाह भगवानृतम् ।
ब्रह्मणेऽदर्शयद्रूपमव्यलीकव्रतादृतः ॥ ४ ॥

तात्पर्यम्— यतो भगवदुक्तं प्रमाणमतस्तदुक्तं पुराणं त्वत्प्रश्नानामुत्तरत्वेन वक्ष्ये ॥ ४ ॥

प्रकाशिका— ननूक्तरीत्या जीवः स्वात्मस्वरूपं केन साधनेन जानाति । भागवतश्रवणादिनेति चेत् । तत्प्रामाण्ये विश्वासाभावात् । मत्कृतानामन्येषामपि प्रश्नानां किमुत्तरमिति राज्ञो मानसशङ्कां परिहरति ॥ आत्मतत्त्वेति । इदं वाक्यं साकांक्षमतोऽपेक्षितमध्याहृत्य योजयति ॥ यत इति । अनेन यदिति यच्छब्दो हेत्वर्थतयाऽपि व्याख्यातः । भगवानाहेत्यस्यार्थः ॥ भगवदुक्तमिति । ऋतमित्यस्यार्थः ॥ प्रमाणमिति । यतो भगवदुक्तमतः प्रमाणं यतस्तत्प्रमाणमतस्तदुक्तं पुराणं त्वत्प्रश्नानामुत्तरत्वेन वक्ष्य इत्यर्थः । अनेनात्मनो जीवस्येश्वरस्य वा यत्तत्त्वमनारोपितं रूपं ज्ञानानन्दादिस्वरूपत्वं तस्य विशुद्धिर्देहादिविविक्तत्वादिना निश्चयस्तदर्थं यद्भागवतं पुराणं भगवान् भगवदवतारो व्यासस्तस्याप्ततमत्वोपपादनायैतदाह तदृतं प्रमाणं यद्यतः प्रमाणमतस्तदुक्तं पुराणमेव त्वत्प्रश्नानामन्येषामप्युत्तरत्वेन वक्ष्य इत्यध्याहृतेनैकवाक्यतामापाद्य मूलं योज्यमित्युक्तं भवति । प्रथमं तावत्पाद्मकल्पं वक्तुं ददृशे येन तद्रूपमिति प्रश्नं प्रतिवक्ति ॥ ब्रह्मण इति । स आदिदेव इत्येतदत्राप्यन्वेति । अव्यलीकेनात्यन्तं भगवत्प्रियेण व्रतेन तपसाऽऽदृतो भक्तिविषयीकृतः सन् रूपम् । निजमिति शेषः ॥ ४ ॥

स आदिदेवो भजतां परो गुरुः स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत ।
तान्नाध्यगच्छद्दृशमत्र सम्मतां प्रपञ्चनिर्माणविधिर्यया भवेत् ॥ ५ ॥

प्रकाशिका— एतदेव विवृणोति ॥ स इति । स्वधिष्ण्यं नाभिपद्मकर्णिकास्थानमैक्षताचिन्तयत् । अत्र प्रपञ्चनिर्माणे संमतामव्यभिचारिणीं विधिः प्रकारो यो यादृशे सः ॥ ५ ॥

सञ्चिन्तयन्व्यक्षरमेकदाम्भस्युपाशृणोद्द्विर्गदितं वचो विभुः ।
स्पर्शेषु यच्छोडशमेकविंशं निष्किञ्चनानां नृप यद्धनं विदुः ॥ ६ ॥

प्रकाशिका— कथं नु सृष्टिविषया दृष्टिर्मम स्यादिति चिन्तयन् ब्रह्मा द्वेऽक्षरे यस्मिंस्तद्व्यक्षरं वचः पदम् । तेऽक्षरे दर्शयति ॥ स्पर्शेष्विति । कादयो मावसानाः स्पर्शास्तेषु यत् षोडशं 'त' कारो यच्चैकविंशं 'प'कारः । तद्व्यक्षरस्य वचसो निर्देशार्थं तद्वाक्यं दर्शयति ॥ निष्किञ्चनानामिति । त्यक्तधनानां परमहंसानाम् । हे नृप । यद्धनं विदुर्येन ते तपोधना इति लोके व्याख्याताः । तद्वाचकं वच इत्यन्वयः । पुनः कथं भूतम् । द्विर्गदितम् । तप तपेति लोण्मध्यमपुरुषैकवचनरूपतया द्विवार-मुच्चारितं विधावादरसूचनाय वीप्सयोच्चारितमित्यर्थः ॥ ६ ॥

निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः ।
स्वधिष्ण्यमास्थाय विमृश्य तद्धितं तपस्युपादिष्ट इवादधे मनः ॥ ७ ॥

प्रकाशिका— ब्रह्मा तद्व्यक्षरं वचो निशम्य श्रुत्वा वक्तृदिदृक्षया तद्वचो येनोक्तं तद्दर्शनेच्छया तत्र तासु दिक्षु । स्वधिष्ण्यं कमलकर्णिकालक्षणं पुनरधिष्ठाय । अनेन स्वस्थानं परित्यज्य कमलनाल-नाडीरन्वेषणाय गतस्तत्रादृष्ट्वा पुनः स्वस्थानमास्थित इति सूचयति । तत्तप आत्मनः स्वस्येहितं हितसाधनं विमृश्य विचार्य तपसि तपः कर्तुम् । क इव । उपदिष्ट इव । केनचित्प्रत्यक्षं नियुक्त इव ॥ ७ ॥

दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेन्द्रियः ।
अतप्यत स्माखिललोकतापनं तपस्तपीयांस्तपतां समाहितः ॥ ८ ॥

तात्पर्यम्— तपो ब्रह्म । 'तपसोऽध्यजायते'ति श्रुतेः । अखिललोकप्रकाशनं यत् तदालो-चयामास । तपतां तपीयानित्यनेनात्युत्तमोत्तमत्वमुक्तं भवति । 'महान्महीयसामादिं ब्रूयादत्यु-त्तमोत्तमम् । यत्राधिकं वदेत्किञ्चिज्ज्ञेयोऽर्थस्तत्र चाधिक' इति व्यासनिरुक्ते ॥ 'तपोरूपं परं ब्रह्म ब्रह्माऽचिन्तयदञ्जसे'ति षाड्गुण्ये ॥ ८ ॥

प्रकाशिका— तपत पेत्यस्य वचसोऽर्थोऽमोघं दर्शनं यस्येत्यर्थः । जितो वशीकृतोऽनिलो वायुरात्मा मनश्च येन स तथा । विजितान्युभयेन्द्रियाणि ज्ञानकर्मसाधनानि येन सः । अत्र तपोऽ-तप्यतेति तपविषयकं तपःकरणं प्रतीयतेऽतस्तद्धटयितुं तप इत्येतद्व्याख्याति ॥ तपो ब्रह्मेति । तपः शब्दस्य ब्रह्मवाचकत्वे श्रौतप्रयोगं दर्शयति ॥ तपस इति । अभितः समन्तात् । अधि आधिक्येने-द्धाद्दीप्तात्तपसः प्रकाशरूपात् ब्रह्मणो ऋतं कर्म सत्यं सत्यवचनं जगद्वाऽजायतेति श्रुत्यर्थः । अखिललोकतापनमित्येतदखिललोकसन्तापकरमित्यन्यथाप्रतीतिवारणाय व्याचष्टे ॥ अखिलेति । न केवलं स्वयं प्रकाशरूपं सर्वलोकप्रकाशकं चेत्यर्थः । अतप्यतेत्यस्य सन्तापोऽभूदित्यन्यथाप्रतीतिवार-

णायार्थमाह ॥ आलोचयामासेति । तपः शब्दोक्तस्य ब्रह्मणः कर्मत्वप्रदर्शनाय तदित्युक्तम् । आलोचने कालविशेषप्रदर्शनाय तदेतध्याहृतम् । व्यक्षरवचःश्रवणानन्तरमेवेत्यर्थः । ननु तपतां तपःकुर्वतां मध्येऽतिशयेन तपस्वी तपीयानिति निर्धारणेनैवोत्तमत्वस्य लाभे पुनस्तद्वाचकस्येयसुनोर्वैय्यर्थ्यमित्यतस्तदभिप्रायमाह ॥ तपतामिति । उत्तमोत्तमत्वमुत्तमानां रुद्रादीनामप्युत्तमत्वमित्यर्थः । अत्युत्तमोत्तमत्वमिति पाठे तपस्वि शब्देनैवेतरेभ्य उत्तमत्वमुक्तम् । निर्धारणेनाप्युत्तमत्वं ईयसुना च ततोऽप्युत्तमत्वमपि द्रष्टव्यम् । अत्र प्रमाणमाह ॥ महानिति । महीयसामादिमहान् महीयसामित्यादि शब्दरूपमित्यर्थः । अत्रापि महच्छब्द उत्तमवाची ईयसुनाऽत्युत्तमत्वं निर्धारणेन च तदुत्तमत्वमुक्तमिति ज्ञातव्यम् । अत्रादि पदेन प्रकृतोदाहरणादिकं ग्राह्यम् । कुत इत्यतः सामान्यतो वैदिकशब्दन्यायं दर्शयति ॥ यच्चेति । यत्किञ्चिच्छब्दरूपमधिकम् । आकांक्षादप्यधिकं वदेत् । वेदे वा वैदिकेऽपि वेति शेषः । तत्रार्थश्चाधिको ज्ञेय इत्यर्थः । तपः शब्दस्य ब्रह्मवाचकत्वेऽप्यत्र तेन तद्ग्रहणं कुत इत्यतः स्मेत्यनेन सूचितां स्मृतिसमाख्यां दर्शयति ॥ तपोरूपमिति ॥ ८ ॥

तस्मै स्वलोकं भगवान्सभाजितः सन्दर्शयामास परं न यत्पदम् ।
व्यपेत संक्लेशविमोहसाध्वसं सन्दृष्टवद्भिर्विबुधैरभिष्टुतम् ॥ ९ ॥

तात्पर्यम्— यत् यतः । 'यत्तदित्यादयः शब्दाः पञ्चम्यन्ताः प्रकीर्तिता' इति च ॥ ९ ॥

प्रकाशिका— स चापि यत्र पुरुष इति प्रश्नं परिहर्तुमाह ॥ तस्मा इति । तस्मै ब्रह्मणे । स्वलोकं श्वेतद्वीपम् । सभाजितः पूजितः । अत्र यत्पदं स्थानं परमुत्तमं नेत्यन्यथाप्रतीतिवारणाय यच्छब्दस्य विवक्षितमर्थं दर्शयति ॥ यद्यत इति । अत्र प्रमाणमाह ॥ यत्तदित्यादय इति । तथा च यस्मात्परमुत्तमपदमन्यन्नेत्यर्थः । कुत इत्यतो यत्र न वर्तत यत्र रज इत्यादिनोक्तं हेतुमाह ॥ मायातीतत्वादिति । अप्राकृतत्वादित्यर्थः । तमेवलोकमनुवर्णयति पञ्चभिः । अविद्यास्मितरागद्वेषादिनिवेशाः संक्लेशाः । मोढ्यं विमोहः । भयं साध्वसं व्यपेताः क्लेशादयो यस्मात्स तथा तम् । संदृष्टवद्भिः । समीचीनं दृष्टं दर्शनमपरोक्षज्ञानं येषां ते तथा तैः । अभितः समन्तात् । मुख्यतश्च स्तुतम् ॥ ९ ॥

न वर्तते यत्र रजस्तमस्तयोः सत्वञ्च मिश्रं न च कालविक्रमः ।
न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः ॥ १० ॥

तात्पर्यम्— मायातीतत्वात् ॥ १० ॥

प्रकाशिका— संक्लेशाद्यभावे कारणमाह ॥ नेति । यत्र लोके । सत्त्वशब्दस्य साधुत्ववाचित्वमप्यस्ति । तदत्र न विवक्षितमिति दर्शयितुं तयो रजस्तमसोर्मिश्रं सहचरितमिति सत्त्वविशेषणमुक्तम् । रजस्तमःप्रभृतीनामवृत्तिर्नाम बन्धकतया व्यापाराभावः । कालविक्रमः कालसामर्थ्यकृतो भावविकारः । माया प्रकृतिः । अपरे महदादयो न वर्तन्त इति किमु वक्तव्यम् । हरेरनुव्रता यत्र वर्तन्ते । असुराः साधवः सन्ति ॥ १० ॥

श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः ।
सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः ॥ ११ ॥

प्रकाशिका— श्यामाश्च तेऽवदाता निर्मलाश्च । शतपत्रं पद्मम् । पिशङ्गं पीतम् । सुष्ठु रुक् प्रभा येषां ते सुरुचः । सुष्ठुपेशः सौन्दर्यं येषां ते सुपेशसः । उन्मिषन्मणिप्रवेकनिष्काभरणा उन्मिषन्तश्चक्षुष्मन्तो मणिप्रवेका रत्नश्रेष्ठा येषु ते तथा ते च निष्कहेमनिर्मिता हाराभरणा येषां ते तथा । हरेरनुव्रता यत्रेति ॥ ११ ॥

प्रवालवैदूर्यमृणालवर्चसां परिस्फुरत्कुण्डलमौलिमालिनाम् ।
भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानावलिभिर्महात्मनाम् ।
विद्योतमानप्रमदोत्तमाभिः स विद्युदभ्रावलिभिर्यथा नभः ॥ १२ ॥

प्रकाशिका— यो लोक एवं विधानां महात्मनां लसद्विमानावलिभिः परितो विराजितो केचित्प्रवालवर्चस इत्यादि । परिस्फुरन्त्यश्च ताः परिस्फुरत्कुण्डलमौलि- मालाश्चेति कर्मधारयं विधाय पश्चादिनिरुत्पाद्यः । मौल्यः किरीटानि ॥ विद्योतमानाः प्रमदोत्तमा यासु विमानावलिषु तास्तथोक्तास्ताभिः । यद्वा । विद्योतमानाभिः प्रमदोत्तमाभिः । भ्राजिष्णुभिरिति व्यधिकरणत्वेन योजना । प्रमदोत्तमा विद्युतो विमानावलयोऽभ्रावलयः ॥ १२ ॥

श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः ।
प्रेङ्खश्रिताः याः कुसुमाकरानुगैर्विगीयमाना प्रियकर्म गायती ॥ १३ ॥

तात्पर्यम्— प्रेङ्खश्रिताः याः विभूतयः ।

प्रकाशिका— रूपिणी प्रत्यक्षा । मानं पूजाम् । बहुधा स्थिताभिर्विभूतिभिः स्वमूर्तिभिः । प्रेंखस्थिताया इत्यस्य षष्ठयन्तत्वेनान्वयाभावमालोच्यात्र विवक्षितां छेदं दर्शयति ॥ प्रेंखस्थिताः या

इति । नन्वेवमप्यनन्वय इत्यतोऽन्वयं सूचयति ॥ विभूतय इति । अनेन यच्छब्दस्य विभूतिपरामर्शकत्वकथनेन याः प्रेंखं दोलामाश्रिता अतस्ताभिर्विभूतिभिः सहेत्यन्वय उक्तो भवति । कुसुमाकरो वसन्तस्तस्यानुगा भृङ्गकोकिलादयस्तैर्विविधं गीयमाना यत्प्रियस्य भर्तृः कर्म गायती ॥ १३ ॥

दर्दर्श तत्राखिलसात्वतां पतिं श्रियःपतिं यज्ञपतिं जगत्पतिम् ।
सुनन्दनन्दप्रबलार्हणादिभिः स्वपार्षदमुख्यैः परिसेवितं विभुम् ॥ १४ ॥

तात्पर्यम्— 'सत्वं तु शोभनत्वं स्यात्तद्युक्ताः सात्वतामता' इत्यध्यात्मे । 'मुक्तैः स्वपार्षदैः पूर्वैर्ब्रह्माद्यैश्चैव संयुतम् । ब्रह्मा ददर्श तपसा भगवन्तं हरिं प्रभुमि'ति गारुडे ॥ १४ ॥

प्रकाशिका— तत्र लोके । अनेन स च यत्रेत्यस्य परिहारो जात इत्यवधेयम् । सात्वतानां यादवानां पतिमित्यन्यथाप्रतीतिवारणायात्र विवक्षितं सात्वच्छब्दार्थं प्रमाणेनैव दर्शयति ॥ सत्त्वं त्विति । सात्वच्छब्दस्य सात्वत शब्दपर्यायत्वान्न प्रकृतासङ्गतिरिति भावः । तथा च सत्त्वं शोभनत्त्वं मुक्तत्वं तद्वन्तः सात्वतस्तेषामिति मूलार्थः । मुक्तात्ममायामित्यस्यानुवादोऽयम् । नन्वेवं मुक्तपतित्वं सात्वतां पतिमित्यस्यार्थश्चेत्सुनन्दनन्दाद्यमुक्तसेव्यत्वत्कथनमनु- पपन्नमित्यतोऽत्र विवक्षितान् पार्पदादीन् दर्शयितुं प्रमाणान्तरसंवादमाह ॥ मुक्तैरिति । मुक्तैरेवेति सम्बन्धः । मूलगतादिशब्दार्थः ॥ ब्रह्माद्यैश्चेति ॥ १४ ॥

भृत्यप्रसादाभिमुखं दृगासवैः प्रसन्नहासारुणलोहचनाननम् ।
किरीटिनं कुण्डलिनं चतुर्भुजं पीतांशुकं वक्षसि लक्षितं श्रिया ॥ १५ ॥

प्रकाशिका— अत्रापि मुक्तैरित्यनुवर्तनीयम् । दृग्स्त्रीस्यात् दर्शने बुद्धौनेत्रे द्रष्टरि च त्रिष्वति दृगासवैर्दृष्टयोऽमृतानीव तैः । भृत्यप्रसादाभिमुखं भृत्यानां प्रसादेऽभिमुखत्वेन प्रतीयमानम् । प्रसन्नहासारुणलोचनं यस्य स तथा ॥ वक्षसि स्थितायाः श्रिया लक्षणभूतया लक्षितमितरव्यावृत्ततया ज्ञातम् ॥ १५ ॥

अध्यर्हणीयासनमास्थितं विभुं वृतं चतुष्षोडशपञ्चशक्तिभिः ।
युक्तं भगैः स्वैरितरत्रचाध्रुवैः स्व एव धामन्रममाणमीश्वरम् ॥ १६ ॥

तात्पर्यम्— इच्छाद्या मोचिकाद्याश्च अणिमाद्याश्च शक्तयः । प्रदिष्टा वासुदेवाद्या दामोदरपरास्तथा । अङ्गानि विमलाद्यास्तु प्रह्वाद्यात्मादिका मताः । एवं षोडशभिश्चैव पञ्चभिश्च हरिः स्वयम् । चतुर्भिश्च वृतो नित्यं तत्स्वरूपाश्च शक्तय' इति भागवततन्त्रे ॥ १६ ॥

प्रकाशिका— अभ्यर्हणीयं आधिक्येन सर्वैः पूज्यम् । आसनमनन्तात्मकं योगपीठम् । चतुःषोडशपञ्चशक्तिभिर्वृतमित्यस्य चतस्रः प्रकृतिपुरुषमहदहङ्काररूपाः । षोडशैकादशेन्द्रियमहाभूताख्याः । पञ्च तन्मात्रारूपाः याः शक्तयस्ताभिर्वृतमिति व्याख्यानं प्रमाणविरुद्धमित्याशयेन प्रमाणान्तरेणात्र विवक्षिताः शक्तीर्दर्शयति ।। इच्छाद्या इति । इच्छाज्ञानंक्रियासत्यमिति प्रमाणोक्ता इच्छाद्याश्चतुःशक्तयः । मोचकाश्चैव सूक्ष्मा च तथा सूक्ष्मामृतापि च । ज्ञानामृता ध्यायनी च व्यापिनी व्योमरूपिणी । अनन्ता चैव संप्रोक्ता मोचकाद्याश्च शक्तय इति प्रमाणोक्ता अष्टौ मोचकाद्याः । अणिमा लघिमा चेत्यादि प्रमाणप्रसिद्धाश्चाष्टौ । एवं षोडश शक्तयः । प्रकारान्तरेणापि षोडश शक्तीराह ।। प्रदिष्टा इति । वासुदेवाद्याश्चतस्रः प्रसिद्धाः । दामोदरपरा इत्यत्र केशवमारभ्येति शेषः । पञ्च शक्तीः प्रकारद्वयेनाह ।। अङ्गानि विमलाद्यास्त्विति । कृद्धोल्कादीनि पञ्चाङ्गानि वा विमलोत्कर्षिणी ज्ञाना क्रिया योगाख्या वा पञ्च शक्तयः । तु शब्दः पञ्च तन्मात्राणां पञ्च शक्तित्वव्ययच्छेदार्थः । पुनः प्रकारद्वयेन चतुःशक्तीर्दर्शयति ।। प्रव्ही सत्येशानुग्रहाख्याश्चेति प्रव्ह्याद्याः । आत्माऽन्तरात्मपरमात्मज्ञानात्मनश्चेत्यात्मादिकाश्चेति द्वन्द्वः । शक्तयो मता इत्यर्थः । एवमेवेत्येवकारान्वयः । स्वयं स्वेच्छया । उक्ताः शक्तयो नावरणमात्ररूपाः किन्तु हरिरेवेत्याह ।। तत्स्वरूपा इति ।। मूले स्वैः स्वरूपभूतैर्भर्गैरैश्वर्यादिषड्गुणैरितरत्र पुरुषान्तरेष्वध्रुवैरनित्यैः । स्वैरित्यस्य व्यावृत्त्यप्रदर्शनायेदम् । स्वधामन्येव स्वरूप एव । अत एवेश्वरम् । ब्रह्मा ददर्शेति पूर्वेणान्वयः ।। १६ ।।

तद्दर्शनाह्लादपरिप्लुतान्तरो हृष्यत्तनुः प्रेमभराश्रुलोचनः ।
ननाम पादाम्बुजमस्य विश्वसृक् यत्पारमहंस्येन पथाधिगम्यते ।। १७ ।।

प्रकाशिका— तस्य हरेर्दर्शनेन जनितेनाल्हादेन परिप्लुतमार्द्रीभूतमान्तरमन्तःकरणं यस्य स तथा। हृष्यती रोमाञ्चिता तनुर्यस्य स तथा प्रेमभरेण भक्त्युद्रेकेण जातैरम्बुभिः पूर्णानि लोचनानि यस्य स तथा ।। १७ ।।

तं प्रीयमाणं समुपस्थितं कविं प्रजाविसर्गे निजशासनार्हणम् ।
बभाष ईषत्स्मितशोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन् ।। १८ ।।

प्रकाशिका— विश्वसृक् ब्रह्मा । यत्पदाम्बुजं पारमहंस्येन परमहंससम्बन्धिना । पथा ज्ञानमार्गेण तं ब्रह्माणं प्रीयमाणं हृष्यन्तं प्रजाविसर्गे तल्लक्षणकार्ये निजशासनार्हणं स्वनियोगार्हम् । प्रजाविसर्गे समुपस्थितमिति चान्वयः ।। १८ ।।

भगवानुवाच—

त्वयाहं तोषितः सम्यग्वेदगर्भसिसृक्षया ।
चिरं भृतेन तपसा दुस्तोषः कूटयोगिनाम् ॥ १९ ॥

प्रकाशिका— ईषत्स्मितेन शोचिर्दीप्तिः शोभा यस्यास्तया गिरा । प्रीतमनस्कत्वं दर्शयितुं करे स्पृशन्नित्युक्तम् । नाहं तपोमात्रेण तुष्यामि किन्तु त्वादृशानामधिकारिणामेवेति भावेन आह ॥ दुस्तोष इति । तोषयितुमशक्य इत्यर्थः ॥ १९ ॥

वरं वरय भद्रन्ते वरेशं माभिवाञ्छितम् ।
सर्वश्रेयःपरिश्रामः पुंसां मद्दर्शनावधिः ॥ २० ॥

प्रकाशिका— मां मां सर्वेषां श्रेयसां फलानां परिश्रमः साधनायासो मम दर्शनावधिर्यस्य स तथा । मद्दर्शने सर्वपुरुषार्थप्राप्तिर्भवतीति भावः ॥ २० ॥

मनीषितानुभावोऽयं मम लोकावलोकनम् ।
यदुपश्रुत्य रहसि चकर्थ परमं तपः ॥ २१ ॥

तात्पर्यम्— मनीषितं तपः ॥ २१ ॥

प्रकाशिका— एतच्च मद्दिष्टतपःसामर्थ्येनैव त्वया प्राप्तमित्याह ॥ मनीषितेति । अत्र मनीषित-शब्दस्य प्रकृतसङ्गतमर्थं दर्शयति ॥ मनीषितं तप इति ॥ ततश्चायं मूलार्थः ॥ यन्मे मम लोकाव-लोकनमसौ द्व्यक्षरवचो रहस्युपश्रुत्य त्वं यत्परमं तपश्चकर्थ । तस्य मनीषितस्य मद्दिष्टस्य तपसो अनुभवमहिमेति ॥ २१ ॥

प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते ।
तपो मे हृदयं साक्षादात्माहं तपसोऽनघ ॥ २२ ॥

तात्पर्यम्— कर्मविमोहिते इदंकार्यमित्यजानति । हृदयं प्रियम् । 'प्रियं हृदयमुद्रिक्तं कान्तमित्यभिधीयत' इत्यभिधानात् । 'तपः प्रियं सदा विष्णोस्तपसैवाप्यते हरिः । स्वयं च तपसैवेदं बिभर्ति ज्ञानमेव हि । तपः शब्दाभिधं प्रोक्तं ज्ञानरूपो हरिर्यतः । ज्ञानवीर्यो ज्ञानबलो ज्ञानानन्द उदाहृत' इति बृहत्संहितायाम् ॥ २२ ॥

प्रकाशिका— यत्तपश्चकर्थ तदपि न स्वबुद्धयेत्याह ।। प्रत्यादिष्टमिति । अत्र कर्मणि विमोहिते भ्रान्ते सतीत्यन्यथाप्रतीतिवारणाय कर्मविमोहित शब्दयोः प्रकृतसङ्गतमर्थं दर्शयति ।। कर्मविमोहित इति । तथा च क्रियत इति व्युत्पत्त्या कर्म शब्दः कार्यपरः । मुह वैचित्य इति धातोः । मोहितशब्दो ज्ञानरहितपर इति भावः । एवं चैवं मूलयोजना । तदपि त्वां प्रति मयैवादिष्टम् । कदा तत्र तदा सृष्ट्यारम्भे त्वयि कर्मणि कार्यविषये विमोहिते इत्थमिदं कार्यमिति ज्ञानरहिते सतीति । तपस एव स्वमनीषितत्वं कुत इत्यतस्तदुपपादयति ।। तपो मे हृदयमिति सार्धश्लोकेन । प्रकृतसङ्गतं हृदयं शब्दस्यार्थं दर्शयति ।। हृदयमिति । कुत इत्यत आह ।। प्रियमिति । एवं हृदयशब्दार्थं सप्रमाणमुक्त्वेदानीं सार्धश्लोकार्थं प्रमाणेन दर्शयति ।। तपः प्रियमियमिति । म इत्यस्यार्थः ।। विष्णुरिति । तपोहृदयमिति प्रतिज्ञांशव्याख्यानं तपः प्रियमिति । साक्षादित्यस्यार्थः ।। सदेति । कुतः इत्यत प्रवृत्तस्यात्माऽहं तपस इति हेतुवाक्यस्य तात्पर्यमाह ।। तपसैवेति । अधिकारिभिर्यत इति शेषः । अनेनाप्यतेत्यात्मशब्दास्यार्थो दर्शित इति ध्येयम् । अत्रैव हेत्वन्तरकथनाय प्रवृत्तस्य सृजामीत्यादेस्तात्पर्यमाह ।। स्वयं चेति । बिभर्तीत्युपलक्षणम् । सृजति संहरतीत्यपि ग्राह्यम् । तथा च मोक्षहेतुत्वात्सृष्ट्यादिहेतुत्वाच्च तपो विष्णोः सदा प्रियमित्युक्तं भवति । ननु सृष्ट्यादिकारणत्वेनोच्यमानं तपो न सन्तापात्मकं भगवति तदसंभवात् । अन्यदीयस्य तपसो ग्रहणे तपो मे वीर्यमिति वक्ष्यमाणविरोधादित्यतोऽत्र विवक्षितं तपः शब्दार्थं दर्शयति ।। ज्ञानमेवेति । न सन्ताप इत्यवधारणार्थः । हि शब्दो यस्य ज्ञानमयं तप इति श्रौतप्रसिद्धिद्योतकः । ननु जडशरीरेन्द्रियादिरहितस्य हरेर्ज्ञानमपि कथमित्यत उक्तम् ।। ज्ञानरूप इति । अतस्तपसा सृष्ट्यादिकं तस्योपपन्नमिति शेषः । अनेनात्माऽहं तपस इत्येतस्य तपसो ज्ञानस्याहमात्मा स्वरूपमिति प्रकारान्तरेण तात्पर्यमुक्तमिति ध्येयम् । ननु श्रुत्यादौ भगवद्वीर्यबलानन्दानामपि सृष्ट्यादिकारणत्वमुच्यतेऽतस्तपसैवेति कथमवधारणं युक्तमित्यत आह ।। ज्ञानवीर्य इति । वीर्यशब्दः पराक्रमपरः । बलं तत्साधनभूता शक्तिः । अनेन वीर्यं मे तप इत्येतदुक्तार्थमिति ज्ञातव्यम् ।। ततश्चायं सार्धश्लोकार्थः ।। हे अनघ । आलस्यादिदोषरहितं तपः । ज्ञानं साक्षात्सर्वदा मे हृदयं प्रियम् । कुत इत्यत उक्तं तपसो ज्ञानस्य सकाशादहमात्माऽऽप्यो यत इति ।। २२ ।।

सृजामि तपसैवेदं ग्रसामि तपसा पुनः ।
बिभर्मि तपसा विश्वं वीर्यं मे दुस्तरं तपः ।। २३ ।।

प्रकाशिका— हेत्वन्तरमप्याह ।। सृजामीति । ग्रसामि संहरामि बिभर्मि पालयामि । इदं विश्वमिति सम्बन्धः । ननु वीर्यादीनामपि सृष्ट्यादिहेतुत्वमन्यत्रोक्तमतः कथं तपसैवोच्यत इत्यत

उक्तम् ॥ वीर्यं मे तप इति । वीर्यादयोऽपि ज्ञानरूपा एवातो न कोऽपि विरोध इति भावः । इतरज्ञानवैलक्षण्यदर्शनाय दुस्तरमित्युक्तम् । तर्तुमशक्यं दुस्तरम् । अपारमित्यर्थ इति ॥ २३ ॥

ब्रह्मोवाच—

भगवन्सर्वभूतानामध्यक्षोऽवस्थितो गुहाम् ।
वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितम् ॥ २४ ॥

प्रकाशिका— अध्यक्षो द्रष्टा । गुहां गुहायाम् । अवस्थितः सन् सर्वभूतानां सर्वप्राणिनां चिकीर्षितं हि यस्माद्वेद तस्मान्मच्चिकीर्षितमपि वेत्थैव भवान् । यद्यपीति शेषः ॥ २४ ॥

अथापि नाथमानाय नाथनाथाय नाथितम् ।
परावरे यथा रूपे जानीयां ते त्वरूपिणः ॥ २५ ॥

प्रकाशिका— नाथमानाय याचमानाय । हे नाथ । नाथायाशंसाय प्रयच्छ नाथितं याचितम् । नाथृ नाधृ याच्ञोपतापैश्वर्याशीष्विति धातुव्याख्यानात् । नाथितमेवाह ॥ परावरे इति । अरूपिणः प्राकृतरूपरहितस्य ते तव ज्ञानविज्ञानविषयभूतं परं स्वतन्त्रं परमात्मस्वरूपम् । अपरं तदधीनं जीवजडात्मकमिति द्वे परावरे रूपे । यथा येन प्रकारेण पररूपस्य स्वातन्त्र्यमपररूपस्य चास्वातन्त्र्यं येन प्रकारेण जानीयामित्यर्थः । तथा तद्विषयमिति वक्ष्यमाणेनान्वयः ॥ २५ ॥

यथात्ममायायोगेन नानाशक्त्युपबृंहितः ।
विलुम्पन् विसृजन् गृह्णन् बिभ्रदात्मानमात्मना ॥ २६ ॥

प्रकाशिका— अन्यदपि नाथितमाह ॥ यथेति । यथोर्णनाभिः कीटविशेष ऊर्णामूर्णते सृजति । विभर्त्यूर्णां मण्डलमध्ये क्रीडति । अन्त आत्मन्येव विलुम्पति च । तथाऽमोघसङ्कल्पः सत्यवाञ्छितो नानाशक्त्युपबृंहितस्तत्तत्कार्यानुकूलशक्तिपरिपूर्णस्त्वमात्ममायायोगेन स्वरूपेच्छालक्षणोपायेन स्वाधीनप्रकृतिलक्षणोपायेन वा जगत्सृजन् आत्मना स्वयमेवात्मानमवतारं गृह्णन् बिभ्रन् पालयन् विलुम्पश्च क्रीडसि । यथा तथा च तद्विषयां मनीषां बुद्धिं मयि धेहि ॥ २६ ॥

क्रीडस्यमोघसङ्कल्प ऊर्णनाभिर्यथोर्णुते ।
तथा तद्विषयां धेहि मनीषां मयि माधव ॥ २७ ॥

प्रकाशिका— अत्र नानाशक्त्युपबृंहितोऽमोघसङ्कल्प इति विशेषणद्वयं हरेरूर्णनाभिवैलक्षण्यमप्यस्तीति द्योतयितुम् । तथा चोर्णनाभिः स्वसृष्टोर्णामध्य एव तदुपजीव्यतिष्ठति । तव तु

तद्विलक्षणत्वात्स्वसृष्टं जगतोऽन्यत्र सत्वं तदनुपजीवनं च संभावितं तदपि जानीयामित्याशयः। माधवेति सम्बोधनेन सृष्ट्यादिव्यापारे रमाया अप्युपयोगोऽस्तीति दर्शयति ॥ २७ ॥

भगवच्छिक्षितमहं करवाणि ह्यतन्द्रितः।
नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात् ॥ २८ ॥

प्रकाशिका— तत्किं सृष्टिकरणेऽलसः सन् एतादृशीमनीषां प्रार्थयसे नेत्याह ॥ भगवच्छिक्षितमिति। भगवता त्वया शिक्षितमनुशिष्टमतन्द्रितोऽनलसः सन् करवाणि करिष्यामि। तर्हि किमनया मनीषयेत्यत आह ॥ नेहमान इति। यदनुग्रहात् यश्चासावनुग्रहश्च तस्मान्मनीषादानरूपात्त्वदनुग्रहात्प्रजासर्गमहिमानः कुर्वन्नहं न बद्ध्येयम्। अहङ्कारादिभिर्बद्धो न भवेयमतस्तमनुग्रहं कुर्विति भावः ॥ २८ ॥

यावत्सखा सख्युरिवेशते कृतः प्रजाविसर्गे विभजामि भोजनम्।
अविक्लवस्ते परिकर्मणि स्थितो मा मे समुन्नद्धमदोऽजमानिनः ॥ २९ ॥

प्रकाशिका— इदानीं त्वत्सन्मानादिना मम मदोद्भवो माभूदिति प्रार्थयते ॥ यावदिति। भो ईश। ते त्वया लौकिकस्य सख्युः सखेवाहं कृतः करस्पर्शादिना सन्मानितः सन् प्रजाविसर्गरूपे तव परिकर्मणि सेवायां स्थितोऽविक्लवोऽव्याकुलो यावज्जनं विभजामि। उत्तममध्यमादिभेदेन सृजामि। तेषां भोजनं भोगं विभजामि विभज्य ददामि तावत्। ममैतद्व्यापारसमाप्तिपर्यन्तम्। अजमानिन आत भगवतो जातोऽहमित्यभिमानवतो मे समुत्पन्नो मदो माभूत्। प्रभुसन्मानेनैश्वर्येणाभिजात्या च मदोत्पत्तिर्लौकिकानां भवति। सा तद्वतोऽपि मम न स्यादित्यर्थः। समुन्नद्धमद इति पाठे समुन्नद्ध उत्कृष्टो मदो माभूदित्यर्थः ॥ २९ ॥

भगवानुवाच—

ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम्।
सरहस्यं तदङ्गं च गृहाण गादितं मया ॥ ३० ॥

तात्पर्यम्— 'येन येन यथा ज्ञात्वा नियतं मुक्तिराप्यते। तद्विज्ञानमिति प्रोक्तं ज्ञानं साधारणं स्मृतमि'ति वामने ॥ ३० ॥

प्रकाशिका— परावरे इति प्रार्थितवरे तावत्परस्वरूपविषयज्ञानविज्ञानदानप्रकारं वक्तुमाह ॥ ज्ञानमिति। अत्र ज्ञानविज्ञानशब्दयोर्ज्ञानं शास्त्रजन्यं विज्ञानमनुभव इति व्याख्यानमप्रामाणिकमिति

भावेन तयोरर्थं प्रमाणेनैव दर्शयति ।। येन येनेति । येन येनाधिकारिणा यथा यावद्गुणादिविशिष्टत्वेन नियतं यथा स्यात्तथा । साधारणं सर्वाधिकारि साधारणम् । मूले परम गुह्यं गोप्यं सरहस्यमुपनिषत्संवादसहितं तदङ्गं तस्य ज्ञानस्याप्याङ्गं साधनम् ।। ३० ।।

यावानहं यथा भावो यद्रूपगुणकर्मकः ।
तथैव तत्वविज्ञानमस्तु ते मदनुग्रहात् ।। ३१ ।।

प्रकाशिका— तत्रादौ ब्रह्म मुक्तिसाधनं विज्ञानं दर्शयन् तद्ददातीत्याह ।। यावानहमिति । यावान्यादृशपरिणामो यथा भावो यादृशसत्तावान् अन्यथाधीनसत्तापेतो यद्रूपगुणकर्मको यादृशावतारो यादृग्गुणो यादृशकर्म च । सर्ववेदप्रतिपाद्य इति शेषः । तथैव । एव शब्दः कात्स्न्यार्थे । तस्य सर्वस्यापीत्यर्थः ।। ३१ ।।

अहमेवासमग्रे च नान्यद्यत्सदसत्परम् ।
पश्चादहं त्वमेतच्च योऽवशिष्येत सोऽस्म्यहम् ।। ३२ ।।

तात्पर्यम्— परं स्वतन्त्रं न । विष्णोरधीनं प्राक् सृष्टेस्तथैव च लयादनु । अस्य सत्वप्रवृत्त्यादि विशेषेणाधिगम्यते । स्वातन्त्र्यं स्थितिकाले तु कयश्चिद्बुद्धिमोहतः । प्रतीयमानमपि तु तस्मान्नैवेति गम्यते । जनिष्वेऽहं उचिष्येऽहमिति न ह्यभिसन्धितः । अतो जीवनमप्येतद्ध्वेदीशामिसंहितम् । अतः स्वरूपभेदेऽपि ह्यात्मैवेदमिति श्रुतिः । वदत्यस्येष तन्त्रत्वाद्यथाऽ शक्तस्त्वसन्निति । विद्यन्ते हि तदा जीवाः कालकर्मादिकं तथा । कान्यथा हि पुनः सृष्टिः पूर्वकर्मानुसारिणी'ति ब्रह्मतर्के । त्वमेतच्च परं न भवेत् । स्वतन्त्रं न ।। ३२ ।।

प्रकाशिका— इदानीं पररूपस्य स्वातन्त्र्यमपररूपस्यास्वातन्त्र्यं च येन प्रकारेण जानीयामिति प्रार्थितवरदानाय परापररूपयोः स्वातन्त्र्यास्वातन्त्र्ये उपपादयन् ज्ञानं ददातीत्याह ।। अहमेवेति त्रिभिः । अत्र परशब्दस्य भिन्नार्थत्वेऽन्यदिति व्यर्थमतो व्याचष्टे ।। परं स्वतन्त्रमिति । यत्सदसत्तन्नासीदित्यन्वयभ्रमवारणाय नञोऽन्वयं दर्शयति ।। नेति । तथा च नञः स्वतन्त्रवाचकेन परशब्देनैवान्वय इति भावः । अप्रतिपत्तिविप्रतिपत्तिनिरासाय श्लोकतात्पर्यं प्रमाणेनैव दर्शयति ।। विष्णोरिति । विष्णोरधीनम् । प्राक् सृष्टेरित्यनेनाहमेवासमग्र इत्येतदुक्ततात्पर्यम् । तथैव लयादन्वित्यनेन पश्चाद्योऽवशिष्येत सोऽस्म्यहमित्येतदुक्तार्थम् । अस्य सृष्टेः पूर्वं लयादनु पश्चाच्चाविद्यमानस्य जीवजडात्मकस्य वस्तुनः सत्त्वप्रवृत्त्यादिसत्ताप्रवृत्तिप्रतीतयो विशेषेण स्थितिकालापेक्षयाऽन्यस्य स्वातन्त्र्याप्रतीतिरूपेण विष्णोरेवाधीनमधिगम्यते । श्रुत्यादिनेति शेषः । इदं च हेतोः

पक्षधर्मतोपपादनाय । अनेन भगवान् स्थितिकालेऽप्यस्य सत्वादिप्रदः पूर्वोत्तरकालयोस्तत्स्वाभाव्यत्वात् । यत्पूर्वोत्तरकालयोर्यत्स्वभावं तत्तन्मध्यकालेऽपि तत्स्वभावं यथा संमतमिति सामान्यव्याप्तिमूलकमनुमानं सूचितमिति ज्ञातव्यम् । नन्विदं बाधितविषयं स्थितिकाले जीवानामेव स्वातन्त्र्यस्यानुभवसिद्धत्वादित्याशङ्कायामनुभव एव भ्रमोऽज्ञानमूलकत्वात्प्रमाणबाधितत्वाच्चेत्याह ॥ स्वातन्त्र्यमिति । जीवानामिति शेषः । तु शब्दोऽवधारणे । अनेन जीवा न स्थितिकाले स्वतन्त्राः पूर्वोत्तरकालयोरतथात्वादित्यनुमानबाधः स्वातन्त्र्यप्रतीतेरुक्त इति ज्ञातव्यम् । कथञ्चिदित्युक्तमेवाह ॥ बुद्धिमोहत इति । बुद्धिर्मनोविशेषस्तद्गताज्ञानादित्यर्थः । अहं जनिष्येऽहं लयिष्ये इति प्रतीयमानमपीत्यन्वयः । तु शब्दः प्रतीतेः पौनःपुण्यरूपविशेषार्थः । तस्मादुक्तानुमानविरुद्धात् । जीवानां प्रतीयमानस्वातन्त्र्याभावे हेत्वन्तरमप्याह ॥ न हीति । हि यस्मादस्य सत्वप्रवृत्त्याद्यभिसन्धितः स्वेच्छतो न भवति । अतः प्रतीयमानमपि स्वातन्त्र्य नेत्यन्वयः । तर्हि कस्येच्छतो भवतीत्याशङ्कां परिहरन् उपसंहरति ॥ अत इति । जीवानां स्वातन्त्र्याभावादित्यर्थः । अपि शब्दाल्लयसत्वप्रवृत्त्यादेर्ग्रहणम् । एतज्जीवसम्बन्धित्वेन प्रतीयमानम् । ईशाभिसन्धितमीशेच्छया विषयीकृतम् । तथा चेश्वरस्यैवेति निर्बाधेनोक्तानुमानेन स्वातन्त्र्यसिद्धिरिति भावः । ननु यदुक्तमस्य सत्वादिप्राक् सृष्टेर्लयादनु च विष्णोरधीनमिति तदेवासिद्धमित्याशङ्कायां तत्रात्मैवेदमग्र आसीदिति श्रुतिं प्रमाणयति ॥ अत इति । अत इत्यस्यैव विवरणम् ॥ अस्येशतन्त्रत्वादिति । वदति । परमात्मातिरिक्तवत्स्वभावमवधारणेनेति शेषः । नन्वन्यस्याभाववचनात्कथं तस्येशतन्त्रत्वसिद्धिरित्यत उक्तं स्वरूपाणां जीवजडस्वरूपाणां भेदेऽपि परमात्मातिरिक्तानां सत्वेऽपीति । हि शब्दस्तत्र प्रमाणप्रसिद्धिद्योतकः । तच्चानुपदमेव वक्ष्यते । तथा च तदाऽऽत्मातिरिक्तस्य जीवादेर्विद्यमानस्याप्यभाववचनं तदधीनत्वमेवगौणीवृत्त्या गमयतीति भावः । नन्वेवं श्रुतौ गौणप्रयोगे किं प्रयोजनमित्यतो रूढोपचारोऽयमित्याशयेन लौकिकं प्रयोगं दर्शयति ॥ यदशक्त इति । यद्यस्माल्लोकात् लोकोऽशक्तोऽन्याधीनः पुमान् असन्नित्युच्यते तस्मात् । न तत्र प्रयोजनापेक्षेति शेषः। ननु श्रुतेर्मुख्यार्थ एव किं न स्यादित्यतस्तत्र प्रमाणबाधं दर्शयति ॥ विद्यन्ते हीति । हि शब्दो यस्मादित्यर्थे । अतो युक्तमुपचारकल्पनमिति शेषः । आदिपदेन प्रकृत्यादेर्ग्रहणम् । सृष्टिः । जीवानामिति शेषः । नन्वहं तच्च योऽवशिष्येत सोऽस्मीति जीवाभेदः प्रतीयतेऽतस्त्वमेतदित्यनयोरन्वयं दर्शयति ॥ त्वमिति । एतज्जीवजातमित्यर्थः । अन्वयेन सिद्धमर्थं दर्शयति ॥ स्वतन्त्रं नेति ॥ ततश्चायं श्लोकार्थः ॥ स्थितिकाले जीवानामेव स्वातन्त्र्यदर्शनात्कथं भगवतः स्वातन्त्र्यामिति हि येन प्रकारेण जानीयामिति प्रश्नाशयः । तस्येदमुत्तरम् । च शब्दो यस्मादित्यर्थे । यस्मादग्रे सृष्टेः पूर्वम् अहं य एव यद्विध एवासं तदाऽन्येषां स्वातन्त्रस्याप्रतीत्याऽहमेव स्वतन्त्र इति

श्रुत्यादिना निर्णेतुं शक्य आसमित्यर्थः । पश्चाल्लयादनु यो यद्विधोऽवशिष्येत तदाऽप्यन्यस्वातन्त्र्याप्रतीत्या स्वतन्त्र इति निर्णेतुं शक्येत तस्मात्स्थितिकालेऽपि अहं स तथाविधोऽस्मि । स्वतन्त्रोऽस्मीति यावत् । तथा च पूर्वोत्तरकालयोरन्यसत्तादिप्रदत्वरूपस्वातन्त्र्योपेतत्वात् । स्थितिकालेऽपि तथाविध एवास्मीत्यनुमेयम् । तद्विरोधादन्येषां तदा स्वातन्त्र्यप्रतीतिर्भ्रम इति भावः । नन्वात्मैवेदमग्र आसीदित्यादि श्रुत्याऽन्यस्याभाव एवोच्यते । न तस्य भगवदधीनत्वमतः कथमुक्तहेतुसिद्धिरित्यतः श्रौतावधारणार्थं दर्शयति ॥ नान्यदिति । अन्यद्यत्सत् कालकर्मादिकमसदव्यक्तं त्वमेतच्च जीवजातम् । विद्यमानमपीति शेषः । परं स्वतन्त्रं नेत्युच्यते । श्रुत्यादाविति शेषः । ईश्वराधीनत्वादेव विद्यमानमप्यन्यद्गौण्या वृत्त्या नेत्युच्यतेऽतो नासिद्धिरिति भाव इति ॥ ३२ ॥

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथा भासो यथा तमः ॥ ३३ ॥

तात्पर्यम्— अर्थवदिव प्रतीयते । न च परमात्मन्यर्थवत्प्रतीयते । अर्थं प्रयोजनमृते । न हि जीवप्रकृतिभ्यामीश्वरस्यार्थः । 'मुख्यतो विष्णुशक्तिर्हि मायाशब्देन गम्यते । उपचारतस्तु प्रकृतिर्जीवश्चैव हि भण्यत' इति च । यथाऽऽभासो जीवः । 'सर्वं परे स्थितमपि नैव तत्रेति भण्यते । यतो हरेर्न जीवन जीवनं न हरौ ततः । जीवः प्रकृतिरप्यत्र यतो नैव हि बन्धकृत् । कर्म चाफलदातृत्वात्कालश्चापरिणामनात् । यथा छत्रधरावास्तु रथस्था अपि सर्वशः । रथिनो नैव भण्यन्ते एवं हरिगता अपि ॥ ३३ ॥

प्रकाशिका— ऋतेऽर्थमिति श्लोके प्रतीयेत न प्रतीयेतेति वचनं व्याहतमिवाभाति । आपादानस्यात्राविवक्षितत्वाल्लिङ् प्रयोगश्च व्यर्थ इत्यतोऽस्य तात्पर्यमाह ॥ अर्थवदिवेति । तथा च प्रतीयतेत्यत्रार्थवदिति शेषः । लिङ् च लडर्थे । ऋतेऽर्थमित्यस्य तात्पर्यकथनमिवशब्देनेति ज्ञातव्यम् । तथा चार्थवत्त्वप्रतीतिर्भ्रम इति प्रथमपादे प्रतिज्ञातमिति भावः । अत्र हेतुकथनाय प्रवृत्तस्य द्वितीयपादार्थमाह ॥ न चेति । एवं च चशब्दस्य नञाऽन्वयः । आत्मशब्दः परमात्मपरः । अर्थवदिति शेषः । लिङ् च लडर्थ इत्युक्तं भवति । प्रतीयते । वेदादाविति शेषः । ननु वक्ष्यमाणमायाया निर्विषयत्वात्कथमर्थवदित्यादिवचनमित्यतोऽर्थशब्दस्यार्थं वदन्नन्वयं दर्शयति ॥ अर्थमिति । तथा च वेदादावर्थवत्त्वस्यानुक्तत्वात्तत्प्रतीति र्भ्रान्तिरिति भावः । नन्वनुक्तिर्न बाधिकेत्यतो युक्तिबाधकमाह ॥ न हीति । ईश्वरस्येति हेतुगर्भम् । जीवप्रकृतिभ्यामित्यनेन माया शब्दो जीवप्रकृतिपर इति सूचितम् । तत्र प्रमाणं दर्शयति ॥ मुख्यत इति । तु शब्दस्यात्र सम्बन्धः । परममुख्यवृत्त्येत्यर्थः । विष्णुशक्तिरेवेत्येवकारान्वयः । उपचारत उक्तापेक्षयाऽमुख्यवृत्त्येत्यर्थः । हि

शब्दौ भणनयोः प्रसिद्धिद्योतकौ । नन्वेवमत्र माया शब्दस्य जीवप्रकृतिवाचकत्वे माया शब्दार्थं शृङ्गिग्राहकया प्रदर्शनाय प्रवृत्तस्य चतुर्थपादस्यासङ्गतिः । तत्र जीवप्रकृत्योरनभिधानादित्यत आह ।। यथाभास इति । यथाभास इति वाक्ये जीव आभासशब्देन वाच्य इत्यर्थः । इदमुपलक्षणम् । यथा तम इत्यत्र तमः शब्देन प्रकृतिर्वाच्येत्यपि ग्राह्यम् ।। ततश्चायं श्लोकार्थः ।। उपचारेऽन्यदपि निमित्तं दर्शयन्नपररूपमुपदिशतीत्याह ।। ऋतेऽर्थमिति । यद्वत्स्वात्मनि परमात्मनि स्थितमपि तत्र स्वसाध्यप्रयोजनाकरणान्नेत्युच्यते । तद्वत्स्वात्मनः परमात्मन्यपि प्रकृत्यादिकृतस्य देहादिरूप-प्रयोजनस्य कुवाद्युत्प्रेक्षितयुक्त्यादिभिः प्रतीयमानत्वादित्यत उक्तम् ।। ऋतेऽर्थमिति । प्रयोजना-भावेऽपि प्रयोजनवत्प्रतीयते । युक्त्यादीनामाभासत्वेन सा प्रतीतिर्भ्रान्तिरिति भावः । कुत इत्यत आह ।। न प्रतीयेतेति । यतो वेदादौ परमात्मनि प्रकृत्यादिकमर्थवदिति कुत्रापि न प्रतिपाद्यत इत्यर्थः। तथात्वे तस्येश्वरत्वहानिरित्यपि द्रष्टव्यम् । इन्द्रजालं मायाशब्देनोच्यत इति प्रतीतिवारणाय मायाशब्दवाच्यं शृङ्गिग्राहिकया दर्शयति ।। यथेति चतुर्थपादेन । आभासः प्रतिबिम्बभूतो जीवस्तमःप्रकृतिकालकर्मादिजडमात्रोपलक्षकमेतत् । तथा च छत्रधराद्या रथस्था अपि रथिनो नोच्यन्ते तथा जीवप्रकृतिकर्मकालादिकं परमात्मनि स्थितमपि जीवेन जीवनाभावात् प्रकृत्या बन्धाभावात् कर्मणा फलाभावात् कालतः परिणामाभावात् आकाशादिनाऽवकाशदानाद्यभावाच्च तत्र नेत्युच्यत इति भाव इति ।। ३३ ।।

यथा महान्ति भूतानि भूतेषूच्चावचेषु च ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ।। ३४ ।।

तात्पर्यम्— 'यथा महान्ति भूतानि शरीरेषु बहिस्तथा । एवं हरिश्च भूतेषु बहिश्च व्याप्तिहेतुतः । तस्मात्तत्स्थो न तत्स्थश्च प्रोच्यते हरिरीश्वर' इति च ।। ३४ ।।

प्रकाशिका— ननु यथा हरौ स्थितमपि प्रकृत्यादिकं हर्यधीनत्वादेव तत्र नेत्युच्यते तथा भूतादिस्थितस्यापि हरेर्न च भूतस्य इत्यादि निषेधवचने किं भूताधीनत्वमेव निमित्तमपीत्याशङ्कायां तत्र निमित्तान्तरं सदृष्टान्तमाह ।। यथेति । यथा महान्ति भूतान्युच्चावचेषु भूतेषु स्वकार्यशरीरेषु प्रविष्टानि । ततो बहिरपि तदभावकालेऽपि सद्भावादप्रविष्टानि च । तथाऽहमप्यनन्तदेशकालव्यापी तेषु भूतेषु प्रकृत्यादिषु च प्रविष्टस्तेभ्यो बहिरपि तदभावकालेऽपि स्थितत्वात्तेषु न प्रविष्टश्च । तस्मात्तेषु स्थितोऽपि तेषु न स्थित इति निषेधवचनोपपत्तिरिति भावः । श्लोकद्वयार्थं प्रमाणेन दृढयति ।। सर्वं परे स्थितमपीति । अनेनात्मनि स्थितमपि तत्र नेत्युच्यते स्वसाध्यप्रयोजनाकरणादि-त्यध्याहारेण मूलयोजनां सूचयति । अस्य किं प्रयोजनं यदकरणं हरावित्यतोऽभिप्रेतहेत्वर्थं

विशदयन्नुक्तं विविच्य दर्शयति ॥ यतो हरोरित्यादिना । जीवस्ततः स्वेन हरेर्जीवनाभावाद्धरौ नेत्युच्यत इत्यर्थः । अत्र हरौ । हि शब्दः प्रमाणप्रसिद्धिद्योतकः । बन्धकृद्बन्धकर्त्रीम् । ततो हरौ नेत्युच्यत इति प्रतिज्ञा पूरणीया । एवमग्रेऽपि प्रतिज्ञाभागोऽध्याहार्यः । उपलक्षणमेतत् । आकाशादिकमप्यवकाशप्रदत्वाभावात्तत्र नेत्युच्यत इत्यपि द्रष्टव्यम् । अत्र मूलेऽभिप्रेतं दृष्टान्तं दर्शयति ॥ यथेति । तु शब्दो रथे स्वकार्यकरणादिति हेतुद्योतकः । छत्रधराद्याः स्वकार्यं रथिन्येव कुर्वन्ति न रथ इति ज्ञातव्यम् । निगमयति ॥ एवमिति । हरिगता अपि हरिस्थिता इति । नोच्यन्त इति शेषः । शरीरेष्वित्यनेन भूतेष्वित्येतदुक्तार्थम् । प्रविष्टानीति शेषः । अप्रविष्टानीत्यस्यार्थः ॥ बहिस्तथेति । तथा तेषु न तेष्वहमित्यस्यार्थकथनम् । एवमिति । भूतेषु प्रकृत्यादिषु च । प्रविष्ट इति शेषः । बहिश्चाप्रविष्टश्च कुत इत्यत उक्तम् ॥ व्याप्तिहेतुत इति । सर्वत्रव्याप्तिरूपाद्धेतोरित्यर्थः ॥ तस्मादिति । सर्वस्यान्तर्बहिश्च सत्वादेवेत्यर्थः । प्रोच्यते श्रुत्यादाविति शेषः । अनेन तेषु न तेष्वित्येतत्प्रोच्यते इत्यध्याहारेण प्रकारान्तरेणापि व्याख्यातमिति ज्ञातव्यम् । ईश्वर इत्यनेन यज्जीवप्रकृत्यादीनां हरौ स्वकार्यकारित्वमुक्तं तदुपपादितमिति ज्ञातव्यम् ॥ ३४ ॥

एतावदेव जिज्ञास्यं तत्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ॥ ३५ ॥

तात्पर्यम्— अन्यभावाभावकाले देशे च तद्विद्यमानाविद्यमानशक्तिमांश्चेत्यन्वयव्यतिरकौ ।
॥ ३५ ॥

प्रकाशिका— एवमन्यभावाभावतोर्देशकालयोः स्वसत्ताया एव प्रकारत्वमुक्त्वेदानीं स्वशक्त्यादेरपि तथात्वं तदङ्गं चेत्युक्त साधनं चोपदिशतीत्याह ॥ एतावदेवेति । अत्रान्वयव्यतिरेक शब्दयोः प्रकृते विवक्षितमर्थं दर्शयति ॥ अन्येति । अन्यस्य स्वव्यतिरिक्तस्य भावाभावौ यस्मिन्स तथा स चासौ कालश्च तस्मिन् । देश इत्यत्राप्यन्यभावाभावेति पूरणीयम् । अनेनान्वयव्यतिरेकाभ्यामित्यस्य सदा सर्वत्रेत्येताभ्यां सम्बन्ध इत्युक्तं भवति । तस्मिन्स्वव्यतिरिक्ते विषये विद्यमाना तत्राविद्यमाना तदतिरिक्तविषया शक्तिः । उपलक्षणमेतत् । ज्ञानादिकं च तद्वानित्यर्थः । अन्यान्वयवतोस्तद्व्यतिरेकवतोश्च देशकालयोः सर्वविषयकशक्त्यादिमानित्युक्तं भवति । अनेनान्वयव्यतिरेकाभ्यामित्येतत्प्रकारान्तरेण व्याख्यातमिति ज्ञातव्यम् । च शब्दः पूर्वोपदिष्टसमुच्चायकः ॥ ततश्चायं श्लोकार्थः ॥ आत्मनः परमात्मनस्तत्त्वमसाधारणं धर्मं शक्त्यादिकं जिज्ञासुनैतावज्जिज्ञास्यं विचार्यमेव । एतज्जिज्ञासा परमात्मज्ञाने मुख्यं साधनमित्यर्थः । एतावदित्युक्तमेव दर्शयति ॥ अन्वयेति । अन्यभावाभावाभ्यां सहिते सदाकाले सर्वत्र देशे च यच्छक्तिज्ञानादिकमन्वयव्यतिरेकाभ्यामन्य-

विषयकत्वतदतिरिक्तविषयकत्वाभ्यां सहितं स्यात् । सर्वविषयकं स्यादिति यावत् । तदेवात्मतत्त्वमेतावदिति ॥ ३५ ॥

एतन्मतं ममातिष्ठ परमेण समाधिना ।
भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ॥ ३६ ॥

प्रकाशिका— नेहमान इति प्रार्थितवरं ददातीत्याह ॥ एतन्मतमिति । आतिष्ठ सम्यगनुतिष्ठ । समाधिना चित्तैकाग्र्येण । कल्पेषु विकल्पा विविधाः सृष्टयस्तेषु विमुह्यति अहङ्कारादिबन्धं यास्यति ॥ ३६ ॥

शुक उवाच—

सम्प्रदर्श्यैवमजनो जनानां परमेष्ठिनः ।
पश्यतस्तस्य तद्रूपमात्मनो न्यरुणद्धरिः ॥ ३७ ॥

प्रकाशिका— अजनो जननरहितः । इतरजनविलक्षणो वा हरिः । जनानां रुद्रादीनां परमेष्ठिनः परमे आधिपत्ये स्थितस्य ब्रह्मणो न्यरुणदन्तर्हितवान् ॥ ३७ ॥

अन्तर्हितेन्द्रियार्थाय हरयेऽवहिताञ्जलिः ।
सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत् ॥ ३८ ॥

तात्पर्यम्— 'सर्वस्यापि प्रधानत्वात्स सर्वमय ईर्यत' इति च ॥ ३८ ॥

प्रकाशिका— अन्तर्हित इन्द्रियार्थ इन्द्रियविषयभूतं रूपं येन तस्मै । अवहिताञ्जलिः बद्धाञ्जलिः सन् । सर्वभूतमय इत्यत्र मयटस्तादात्म्यार्थत्वप्रतीतिवारणायार्थं प्रमाणेनैवाह ॥ सर्वस्यापीति । स ब्रह्मा । तथा च सर्वप्रधान इति मूलं व्याख्येयमिति भावः ॥ ३८ ॥

प्रजापतिर्धर्मपतिरेकदा नियमान्यमान् ।
भद्रं प्रजानामन्विच्छन्नातिष्ठत्स्वार्थकाम्यया ॥ ३९ ॥

प्रकाशिका— सृष्ट्यनन्तरं पूर्वोक्तो नारदसंवादः प्रवृत्त इत्याह ॥ प्रजापतिरिति पञ्चभिः । प्रजानां हितेच्छायां हेतुसूचनाय प्रजापतिरिति विशेषणम् । नियमादिधर्मानुष्ठानोपपादनाय धर्मपतिरिति । नियमान् । तपः सन्तोष आस्तिक्यं दानमीश्वरपूजनम् ॥ सिद्धान्तश्रवणं चैव ह्रीमतिश्च जपो

व्रतम् । एते तु नियमाः प्रोक्ता इति स्मृत्युक्तांस्तप आदीन् । यमान् । अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयाऽऽर्जवम् । क्षमा धृतिर्मिताहारः शौचं चैते यमा दशेति । स्मृत्युक्तानहिंसादीन् । ननु प्रजानां भद्रेच्छयाऽपि किं प्रयोजनमित्यत उक्तम् ॥ स्वार्थकाम्ययेति । स्वस्यार्थे भगवत्प्रीतिस्तत्कामनयेत्यर्थः ॥ ३९ ॥

तं नारदः प्रियतमो रिक्थादानामनुव्रतः ।
शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ॥ ४० ॥

प्रकाशिका— रिक्थं पित्र्यं धनमाददन् इति रिक्थदाः । पुत्रास्तेषां मध्ये प्रियतमः शुश्रूषमाणः सेवमानः ॥ ४० ॥

मायां विविदिषुर्विष्णोः मायेशस्य महामुनिः ।
महाभागवतो राजन् पितरं पर्यतोषयत् ॥ ४१ ॥

तात्पर्यम्— मायां माहात्म्यं विविदिषुः । अन्येषां माहात्म्यपतेः । 'मुख्यतो विष्णुमाहात्म्यं मायाशब्दोदितं भवेत् । प्रधानत्वाच्च मातृत्वान्मेयत्वं चैव तस्य ही'ति च ॥ ४१ ॥

प्रकाशिका— मायां विविदिषुर्ज्ञातुकामः । अत्र माया शब्देनानिर्वचनीयाऽविद्योच्यत इति प्रतीतिवारणाय तद्वाच्यं दर्शयति ॥ मायामिति । नन्वेवं मायेशस्येत्यनुपपन्नम् । मैवम् । तत्रान्य-मायेशस्येत्यन्यशब्दाध्याहारस्य विवक्षितत्वादित्याह ॥ अन्येषामिति । ब्रह्मादीनामित्यर्थः । माया शब्दस्य माहात्म्यवाच्यत्वेऽपि विष्णुमाहात्म्यवाचित्वे विशेषोऽस्तीति प्रमाणेनैवाह ॥ मुख्यत इति । अनेन माया शब्दस्य माहात्म्यवाचित्वमपि प्रमापितमिति ज्ञातव्यम् ॥ प्रधानत्वादिति । अनेन माया शब्दः प्रधानवाचिमयट् शब्दपर्याय इति ज्ञापयति । योगमपि द्वेधा दर्शयति ॥ मातृत्वादिति । अनेन मातीति मीयत इति च मायेति निर्वचनं सूचयति । एव शब्देनानिर्वाच्याविद्यां व्यवच्छिनत्ति ॥४१॥

तुष्टं निशाम्य पितरं लोकानां प्रपितामहम् ।
देवर्षिः परिपप्रच्छ भवान्यन्मानुपृच्छति ॥ ४२ ॥

प्रकाशिका— मूले निशाम्य दृष्ट्वा ज्ञात्वेत्यर्थः ॥ ४२ ॥

तस्मा इदं भागवतं पुराणं दशलक्षणम् ।
प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ॥ ४३ ॥

प्रकाशिका— दशलक्षणानि लक्षणीयार्था विद्यन्ते यस्मिंस्तत् । भगवता स्वस्य प्रोक्तम् । भूतानि प्राणिनः करोतीति भूतकृत् ॥ ४३ ॥

नारदः प्राह मुनये सरस्वत्यास्तटे नृप ।
ध्यायते ब्रह्म परमं व्यासायामिततेजसे ॥ ४४ ॥

तात्पर्यम्— 'हरिर्व्यासादिरूपेण सर्वज्ञोऽपि स्वयं प्रभुः । शृणोति नारदादिभ्यो मोहायैषां प्रसिद्धय' इति पाद्मे ॥ ४४ ॥

प्रकाशिका— नारदस्येति सङ्कल्प्य वर्णयेति स्वपित्राज्ञापालनप्रकारमाह ॥ नारद इति । अत्र मुनयेऽमिततेजस इति विशेषणद्वयेन व्यासस्य नारदाच्छ्रवणं मोहादिकरणायैवेति सूचितमर्थं प्रमाणेन दृढयति ॥ हरिर्व्यासादिरूपेणेति । एषां नारदादीनां प्रसिद्धये च मूले व्यासेन च मह्यमुपदिष्टं तुभ्यं चाहमुपदिशामीति । पितुर्द्वैपायनादहमधीतवान् । तदहं तेऽभिधास्यामीति च पूर्वमेवोक्तत्वादत्र पुनर्नोक्तम् ॥ ४४ ॥

यदुताहं त्वया पृष्टो वैराजात्पुरुषादिदम् ।
यथासीत्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ॥ ४५ ॥

॥ इति श्रीमद्भागवते द्वितीयस्कन्धे नवमोऽध्यायः ॥

तात्पर्यम्— 'विराड्ब्रह्मा समुद्दिष्टस्तद्गतः परमो यतः । अतो वैराजमित्येनमाहुरीशत्वतो विराडि'ति बृहत्संहितायाम् ॥ ४५ ॥ इति द्वितीय तात्पर्ये नवमोऽध्यायः ॥ ९ ॥

प्रकाशिका— पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिता इत्यादिना वैराजात्पुरुषादिदं विश्वं यथाऽऽसीदिति यदहं त्वया पृष्टस्तदुपाख्यास्ये । भागवताख्यानेनैवेति शेषः । अत्र विशेषेण राजत इति विराट् ब्रह्माण्डं तत्सम्बन्धी पुरुषो ब्रह्मा वैराज इति प्रतीतिनिरासाय वैराजशब्दवाच्यं पुरुषं प्रमाणेनैव दर्शयति ॥ विराट् ब्रह्मेति । परो मायाया इति । परमो लक्ष्मीशः । ब्रह्मणि विराट्शब्दः केन निमित्तेनेत्यत उक्तम् ॥ ईशत्वत इति । राज शब्दपर्यायो राट् शब्द ईशत्ववाची । वि शब्दस्तस्य वैशिष्ट्यद्योतक इति भावः ॥ ४५ ॥ इति श्रीभागवतटिप्पण्यां नवमोऽध्यायः ॥ २-९ ॥

अथ दशमोऽध्यायः

श्रीशुक उवाच—

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥ १ ॥

प्रकाशिका— दशलक्षणपुराणं प्राहेत्युक्तम् । तानि दशलक्षणानि दर्शयति ॥ अत्रेति । अत्र भागवते । मन्वन्तराणीशानुकथाश्चेति द्वन्द्वः । इत्येतानि दशलक्षणानि । प्रतिपाद्यन्त इति शेषः॥१॥

दशमस्य विशुध्यर्थं नवानामिह लक्षणम् ।
वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा ॥ २ ॥

प्रकाशिका— नन्वेवमर्थभेदात्पुराणस्यैकवाक्यता न स्यादित्यत आह ॥ दशमस्येति । दशमस्याश्रयस्य विशुद्ध्यर्थं तत्त्वावधारणार्थम् । नवानां सर्गादीनां लक्षणं स्वरूपम् । एकस्यैव प्राधान्यान्नोक्तदोष इति भावः । महात्मानः । एतत्पुराणव्याख्यातारः । नन्वत्रैवं प्रतीयत इत्यत आह ॥ श्रुतेनेति । अंजसा सम्यक् सम्प्रदायपूर्वकम् । अर्थेन श्रुतेन निमित्तेन । सम्प्रदायतः । प्रतिपाद्यश्रवणेनेति यावत् । उपक्रमादिबलाच्चेति चार्थः ॥ २ ॥

भूतमात्रेन्द्रियधियां जन्मसर्ग उदाहृतः ।
ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः ॥ ३ ॥

तात्पर्यम्— महदाद्यण्डपर्यन्तः सर्गोऽण्डे ब्रह्मणस्तु यः । अनुसर्ग इति प्रोक्तः पौरुषश्चेति कथ्यते । पञ्चभूतसमूहेन जातः पुरुष उच्यते । बहुत्वात्तत्र भूतानां तावत्त्वात्तत्त्वमेकजमि'ति व्योमसंहितायाम् ॥ ३ ॥

प्रकाशिका— सर्गादि शब्दानामर्थान् स्वयमेव दर्शयति ॥ भूतमात्रेति । अत्र भूतमात्रेन्द्रियधियामित्युक्त्या सृष्टिक्रमोऽयमिति भाति । विसर्गः पौरुष इत्यस्य नासंकीर्णोऽर्थः प्रतीयते । ब्रह्माण्डबाह्यसृष्टेरपि पुरुषसम्बन्धित्वेन पौरुषत्वसम्भवात् । अतः श्लोकतात्पर्यं प्रमाणेनैव दर्शयति ॥ महदादीति । महदादीति गुणवैषम्य शब्दार्थकथनम् । महदाद्यण्डपर्यन्तो यः सर्गः ससर्गः । सर्ग शब्दवाच्य इति योज्यम् । अण्डे ब्रह्मणो विराण्णामकस्य चतुर्दशभुवनात्मकदेहयोगेन यः सर्गः सोऽनुसर्गो विसर्गापरपर्यायः प्रोक्त इत्यर्थः । शास्त्रान्तरविरोधपरिहारोयाह ॥ पौरुष इति । अनेन

पौरुषः स्मृत इत्येतदुक्तार्थम् । ब्रह्माण्डबाह्यसृष्टिपरिहाराय पौरुष शब्दान्तर्गत पुरुष शब्दविवक्षितमर्थं दर्शयति ॥ पञ्चेति । पञ्चानां भूतानां समूहेन मेलनेन । पञ्चीकरणेनेति यावत् । जातो जातदेहः ब्रह्मा । ब्रह्माण्डबाह्यसृष्टिस्तु न पञ्चीकरणजन्येति भावः । ननूक्ते विराड्देहे कुतः पञ्चभूत-जन्यत्वमित्यत आह ॥ बहुत्वादिति । तत्र विराड्देहभूतानां पृथिव्यादिभूतस्वभावानां काठिण्यादीनां बहुत्वात् । अनेकेषां प्रमाणसिद्धत्वादित्यर्थः । नन्वेवं भूभूधरादिकं पृथिवीजं सरित्समुद्रादि-कमप्जमित्याद्येकभूतजत्वव्यवहारः कथमित्यत आह ॥ तावत्वादिति । तत्त्वं भूभूधरादिस्वरूपं एक-जमित्युच्यते । कुतः । तत्र भूम्यादौ भूतानां पृथिव्यादिभागानां तावत्वाद्बहुत्वादित्यर्थः ॥ ततश्चायं श्लोकार्थः ॥ ब्रह्मणः परब्रह्मणः सकाशाज्जाताद्गुणवैषम्यात्तन्नामकान्महत्तत्वादहङ्कारद्वारा भूत-मात्रेन्द्रियधियां पञ्चभूतानां तन्मात्राणामिन्द्रियाणां बुद्धेश्च । इदमुपलक्षणम् । अण्डस्य चेत्यपि ग्राह्यम् । यज्जन्म स सर्ग उदाहृतः श्रुत्यादावित्यन्वयः । महत्तत्त्वमारभ्याण्डपर्यन्तं या सृष्टिः स सर्ग इति भावः । अण्ड इति शेषः । ब्रह्मण इत्यस्यावृत्तिः । तथा चाण्डे ब्रह्मणो विराण्णामकस्य यः सर्गः स विसर्गः । नन्वेवं शास्त्रान्तरे विसर्गः पौरुष इति वचनात्तद्विरोध इत्यत उक्तम् ॥ पौरुष इति । उक्तरूप एव विसर्गः शास्त्रान्तरे पौरुष शब्देनाप्युक्तोऽतो न कोऽपि विरोध इति ॥ ३ ॥

स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः ।
मन्वन्तराणि सद्धर्मा ऊतयः कर्मवासनाः ॥ ४ ॥

प्रकाशिका— वैकुण्ठस्य भगवतो विजयो दुष्टनिग्रहादिरूपोत्कर्षः । स्थितिः स्थानमित्युच्यते । तस्य वैकुण्ठस्यानुग्रहो भक्तेषु क्रियमाणः प्रसादः पोषणमित्युच्यत इत्यर्थः । तत्तन्मन्वन्तरेषु सतां सज्जनानां धर्मा मन्वन्तराणीत्युच्यन्त इत्यर्थः । जीवगतानि कर्माणि वासनाश्चोतय इत्यच्यन्ते । ऊञ्तन्तुसन्ताने ऊयन्ते सन्तन्यन्ते आभिरिति निर्वचनात् ॥ ४ ॥

अवतारानुचरितं हरेश्चास्यानुवर्तिनाम् ।
पुंसामीशकथा प्रोक्ता नानाख्यानोपबृंहिताः ॥ ५ ॥

प्रकाशिका— हरेर्मत्स्याद्यवताराणामनुचरितमस्य हरेरनुवर्तिनां ब्रह्मादीनां पुंसां नानाख्यानैर्ना-नाविधैरितिहासैरुपबृंहिताः पूर्णाः कथाश्चेशकथाः प्रोक्ता इत्यर्थः ॥ ५ ॥

निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः ।
मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ॥ ६ ॥

तात्पर्यम्— 'अनुप्रविश्य परमं जीवस्य शयनं तु यत् । सहैव शक्तिभिः स्वीयैरिच्छाद्यै-रप्रकाशितैः । सन्निरोध इति प्रोक्तो विमुक्तिर्यत्र मोक्षिणामि'ति नारदीये ॥ ६ ॥

प्रकाशिका— निरोधस्यानुशयनमिति श्लोकं मुक्तिनिरोधयोर्भेदाप्रतीत्या प्रमाणेनैव व्याख्याति ॥ अनुप्रविश्येति । परममित्यनेनास्येति कर्मणि षष्ठीति सूचयति । जीवस्येत्यनेनात्मन इत्येतदुक्तार्थम् । अत्र निरोध शब्दवाच्यं जीवस्य शयनं प्रलयकालीनमेव विवक्षितं न तु दैनन्दिनमिति प्रदर्शनाय मूले सहशक्तिभिरित्युक्तम् । तस्य व्याख्यानम् ॥ सहैवेति । शक्तिभिरिच्छाप्रयत्नक्रियानुकूलशक्तिभिः । दैनन्दिनस्वापव्यावृत्त्यर्थमेवकारः । ननु तदोक्तशक्तीनामपि स्वापः कुत इत्यत आह ॥ स्वीयैः शक्तिसाध्यैरिच्छाद्यैरिच्छाप्रयत्नपरिस्पन्दैरप्रकाशितैर्निर्मितैरिति । शक्तिसाध्यानामिच्छादीनां कार्याणां तदा दर्शनात्तदा शक्तीनां स्वापोऽङ्गीकार्यः । दैनन्दिनस्वापे तु नोक्तशक्तीनां स्वापः । तदा तत्कार्याणामिच्छादीनां दर्शनात्कथमन्यथा यत्कामः स्वापमाप्नोति । तस्यैव तदा व्यवहारं स्वापाद्यनुकूलयत्नं शरीरपरिस्पन्दं च कथं कुर्यादिति भावः ॥ अप्रकाशितैरिति । निरोध शब्दनि-र्वचनलब्धार्थप्रदर्शनं रुधिरावरणे । नितरां रोध इच्छादीनामदर्शनं लय इति । शक्तिभिः सह जीव-स्यानुशयनमिति तु निरोधशब्दस्यार्थिकार्थप्रदर्शनमिति द्रष्टव्यम् । यत्र यस्यामवस्थायां विशेषेण मोक्षणं मोचनं प्रकृतिबन्धस्य सा विमुक्तिर्मुक्त्यपरपर्यायविमुक्ति शब्दवाच्येत्यर्थः ॥ ततश्चायं श्लोकार्थः ॥ आत्मनो मुक्तामुक्तजीवसमूहस्य । अस्येति कर्मणि षष्ठी । प्रकृतं हरिमनुप्रविश्य सह शक्तिभिरिच्छाद्यनुकूलाभिः सह शयनं प्रलयकालीनः स्वापो निरोध शब्दवाच्यः । अन्यथारूपं प्रकृतिबन्धं हित्वा स्वरूपेण चिदानन्दाद्यात्मकदेहेन व्यवस्थितिर्मुक्तिरित्युच्यत इति ॥ ६ ॥

आभासश्च निरोधश्च यतस्तत्त्रयमीयते ।
स आश्रयः परं ब्रह्म परमात्मेति शब्यते ॥ ७ ॥

तात्पर्यम्— 'सृष्टिस्थित्यप्ययाभासा यद्बलाद्यत्र च स्थिताः । तद् ब्रह्म जगदाधारं वासुदेवेति तद्विदुरि'ति भागवततन्त्रे ॥ ७ ॥

प्रकाशिका— आभासश्चेति श्लोकमप्रतिपत्तिविप्रतिनिरासाय प्रमाणेनैव व्याख्याति ॥ सृष्टि-स्थितीति । अनेनाभासनिरोधशब्दाभ्यां सृष्टिस्थिती अप्युपलक्ष्येते इति सूचयति । आभासो ज्ञानम् । यद्बलाद्यत्रेत्यनेन यत इत्येतत् द्वेधा व्याख्यातम् । यस्य बलात्प्रयत्नात् । जगतो भवतीति शेषः । अत एव यत्र यत्रापि स्थितास्तत्प्रयत्नजन्यत्वेन सम्बन्धेन सृष्ट्यादयस्तत्रापि वर्तन्त इत्याशयः । अनेनाश्रय इत्येतज्जगत्सृष्ट्याद्याश्रय इति व्याख्यातं भवति । जगदाधारमिति । आश्रय इत्यस्य व्याख्यानान्तरम् ।

ग्रन्थान्तरविरोधपरिहाराय परमात्मेति । शब्द्यत इति मूलोक्तमुपलक्षणमित्याशयेनाह ।। वासुदेवेति । अत्र सुलोपश्छान्दसः । वासुदेव इत्यपि तद्विधो वदन्ति च ।। ततश्चायं श्लोकार्थः ।। यतो यद्बलाज्जगत आभासो ज्ञानं निरोधो लयः । च शब्दो परस्परसमुच्चये । उपलक्षणमेतत् । सृष्टिः स्थितिश्चेत्यपि ग्राह्यम् । भवतीति शेषः । अत एव तत्त्रयमुपलक्ष्यतया क्रोडीकृतं सृष्टिस्थित्याख्य-वस्त्वत्रेकत्वेन विवक्षितम् । तथा च तत्पूर्वोक्तं त्रयं यतो यत्र कर्तृत्वेन सम्बन्धेनेयते लक्षणतया वेदादिषु प्रतिपाद्यते स आश्रयः । जगत्कर्तृत्वाद्याश्रयत्वाज्जगदाश्रत्वाच्चाश्रय शब्देनोच्यते । तस्य किन्नामेत्यत उक्तं परं ब्रह्म परमात्मा वासुदेव इत्यादिनामभिः शब्द्यतेऽभिधीयत इति ।। ७ ।।

आध्यात्मिको यः पुरुषः सोऽसावेवाधिदैविकः ।
यस्तत्रोभयविच्छेदः स स्मृतो ह्याधिभौतिकः ।। ८ ।।

तात्पर्यम्— आधिभौतिकेन रूपेण हि चक्षुःप्रकाशयोः सम्यक्त्वपरिज्ञानम् ।। ८ ।।

प्रकाशिका— पूर्वोक्त आश्रय शब्दार्थः कथञ्चिद्ब्रह्मादावपि सम्भावितः । अतोऽनतिप्रसक्तं तं वक्तुं प्रकारान्तरेणोक्त्वा साधयितुं जीवानामाध्यात्मिकादिविषयकं सम्यक्त्वेन ज्ञानमन्योन्य-सापेक्षमिति तावदाह ।। आध्यात्मिक इति । अत्राध्यात्मिकं चक्षुरादीन्द्रियमाधिदैविकं प्रकाशादिकं च न स्वत एव ज्ञानकारणं किन्तु स्वस्वाभिमानिप्रेरितमेवेति दर्शयितुं पुरुषग्रहणम् । तदैक्योक्तिस्तु स्थितिप्रदर्शनायेति मन्तव्यम् ।। ततश्चायमर्थः ।। आध्यात्मिकेषु चक्षुरादिषु प्रेरकत्वेन स्थितः पुरुषो जीवः सूर्यादिर्यः सोऽसावेवाधिदैविकोऽधिदेवेषु प्रकाशादिषु प्रेरकतया स्थितः । एवकारो भेदव्यावृत्त्यर्थः । तत्र तस्मिन्प्रेरके सत्युभाभ्यामुक्तरूपाध्यात्मिकाधि- दैविकाभ्यां जायमानो विच्छेदः परिच्छेदः सम्यगनुभवो यस्य । रूपरसादिविषयरूपस्याधिभौतिकस्य स तथा । अनेनाधि-भौतिकस्य रूपादेर्ज्ञानमाध्यात्मिकाधिदैविकतदभिमानिसापेक्षितमिति प्रदर्शितम् । आध्यात्मि-काधिदैविकयोर्ज्ञानमपि आधिभौतिकसापेक्षमितिप्रदर्शनाय यस्तत्रोभयविच्छेद इत्येतदेवार्धं योजनीय-मित्यभिप्रेत्योपलक्षणत्वेनैकस्मिन् उपपादयति ।। आधिभौतिकेनति । रूपेण । सम्यग्ज्ञातेनेति शेषः । रूपेणे युक्त्याऽऽधिभौतिक पदं रूपादिविषयपरमिति सूचितम् । रूपे सम्यक्त्वेन ज्ञाते चक्षुःप्रकाशयोः सम्यङ्निश्चय आनुमानिकोऽनुभवसिद्ध इति दर्शयितुं हि शब्दः । ततश्च तत्र प्रेरके देवे उभयोराध्यात्मिकाधिदैविकयोश्च विच्छेदः सम्यक्त्वेनानुभवो यस्मात्स आधिभौतिक इति योज्यमिति भावः । अत्राप्यभिमानिपुरुषो ग्राह्यः एवं च जीवानामाध्यात्मिकाधिदैविक-योराधिभौतिकस्य च सम्यक्त्वेन निश्चयः परस्परसापेक्ष इत्युक्तम् ।। ८ ।।

एतदेकतमाभावे यदा नोपलभामहे ।
त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥ ९ ॥

तात्पर्यम्— सुप्तावपि यः सर्वं वेत्ति जीवानां स परः । 'स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीती'ति श्रुतेः । सुष्ठ्वाश्रयाणामप्याश्रयः ॥ ९ ॥

प्रकाशिका— इदानीमीश्वरस्य नैवमिति दर्शयंस्तत्साध्यमनतिप्रसक्तमाश्रयशब्दार्थं दर्शयति ॥ एतदिति । एतेषां त्रयाणां मध्ये एकतमस्यान्यतमस्य तदभिमानिप्रेरणायाश्चाभावे यदा यस्यामवस्थायां सुप्त्यादिरूपायां नोपलभामहे किमपि न जानीमः । तत्र तस्यामवस्थायां त्रितयं जीवसम्बध्याध्यात्मिकादित्रितयं तदभिमानश्च य आत्मा जीवान्तर्यामी वेद स स्वाश्रयाश्रय इत्यर्थः । अस्य श्लोकस्यान्यथाप्रतीतिवारणाय तात्पर्यं दर्शयति ॥ सुप्तावपीति । अत्र सुप्ति शब्दो ज्ञानाभावावस्थामात्रपरः । जीवानां सुप्तावपीति सम्बधः । अपि शब्दो जाग्रदाद्यवस्थासमुच्चयार्थः । जीवानां सकाशात्पर इति वा । अनेन स्वाश्रयाश्रय इत्येतदुक्ततात्पर्यम् । सर्वमाध्यात्मिकादिकं जीवानां ज्ञानाभावावस्थायामपीश्वरः सर्वं वेत्तीत्यत्र श्रुतिमाह ॥ स्वप्नेनेति । स्वप्न शब्दः सुप्तिपरः । अभिप्रहत्य संयोज्य । सुप्तानित्युपलक्षणम् । आध्यात्मिकादिकं सर्वमपीत्यपि ग्राह्यम् । अभिचाकशीति सम्यक् पश्यति । स्वाश्रयाश्रय इत्येतदन्योन्याश्रयत्वशङ्कापरिहाराय सम्यग्व्याख्याति ॥ सुष्ठ्विति । आश्रयाणाम् । ब्रह्मादीनामिति शेषः । तथा च ब्रह्मादिजीवानां यत्ज्ञानसाधनमाध्यात्मिकादि तदनपेक्ष्यैव सर्वदा सर्वज्ञत्वाद्ब्रह्मादीनामप्याश्रय इति हेतुहेतुमद्भावेन योजनीयमिति भावः । अनेनाश्रय शब्दोऽसाधारण्येन व्यपदेशा भवन्तीति न्यायेन स्वेतरसर्वाश्रयपरोऽतो न पूर्वोक्तातिप्रसङ्ग इति सूचयति ॥ ९ ॥

पुरुषोण्डं विनिर्भिद्य यदासौ स विनिर्गतः ।
आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः ॥ १० ॥

प्रकाशिका— यदुताहं त्वया पृष्टो वैराजपुरुषादिदम् । यथाऽऽसीत्तदुपाख्यास्य इति प्रतिज्ञातमाह ॥ पुरुष इत्यादिना । सोऽण्डं प्रविष्टो विष्णुर्यदाऽण्डं विनिर्भिद्यस्वशरीरपरिमितावकाशवत्कृत्वा विनिर्गतस्तदा पुरुषनामा सन् । अयनं स्थानमन्विच्छन् यतः स्वयं शुचीः शुद्धा आपो गर्भोदकसंज्ञा अस्राक्षीत्ससर्जेत्यन्वयः । अत्र विनिर्गत इत्यस्य बहिर्गत इत्यन्यथाप्रतीतिवारणायार्थमाह ॥ विनिर्गतः प्रकाशित इति । बहिर्गमनस्यासङ्गतत्वाद्गत्यर्थानां ज्ञानार्थत्वाच्चेति भावः ॥ १० ॥

तास्ववात्सीत्स्वसृष्टासु सहस्रपरिवत्सरान् ।
तेन नारायणो नाम यदापः पुरुषोद्भवाः ॥ ११ ॥

तात्पर्यम्— विनिर्गतः प्रकाशितः । 'अण्डं प्रविष्टो यो विष्णुः सोऽण्डं भित्त्वा प्रकाशितः । सोऽपोऽसृजत्ततो नारा नरो नाशात्परो यत' इति नारायणाध्यात्मे ॥ १०, ११ ॥

प्रकाशिका— अप्सु वासं नारायणनामनिरुक्त्या दृढयति ॥ तेनेति । यद्यस्मात्पुरुषो नरो नाशाभावात् । तदुद्भवा आपो नारास्ता अस्याप्यनन्तेन कारणेन नारायणो नामाऽभूदिति योज्यम् । पुरुषोऽण्डं विनिर्भिद्येति श्लोकद्वयस्योक्त एवार्थ इति निश्चयाय प्रमाणसंवादं दर्शयति ॥ अण्डं प्रविष्ट इति । हित्वा बृंहयित्वा विनिर्गत इत्यस्य व्याख्यानम् ॥ प्रकाशित इति । व्यक्त इत्यर्थः । आपोऽस्राक्षीदित्यस्यार्थः ॥ सोप इति । नारा आप इति शेषः । ततश्चास्यायनमतो नारायणनामेति शेषः । तेन नारायणो नामेत्यर्धस्य व्याख्यानमेतत् ॥ ११ ॥

द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ।
यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया ॥ १२ ॥

प्रकाशिका— ननु प्रकृत्यादिद्रव्यमुपादानकारणं कालकर्मादिकं निमित्तं जीवास्त्वदृष्टद्वारा कर्तारो भविष्यन्ति । अत एतैरेव जगदुत्पत्तौ किमीश्वरेणेति शङ्कामपाकरोति ॥ द्रव्यमिति । यदनुग्रहत एव सन्ति कार्यक्षमा भवन्ति । तथा च तदनुग्राहकतयेश्वरोऽप्यङ्गीकार्य इति भावः ॥ १२ ॥

एको नानात्वमन्विच्छन्योगतल्पात्समुत्थितः ।
वीर्यं हिरण्मयं देवो मायया व्यसृजत्त्रिधा ॥ १३ ॥

तात्पर्यम्— 'तत्तन्नियामकत्वेन बहुत्वं प्राप्तुमीश्वरः । अण्डं स्ववीर्यं तत्स्थः सन् कामादन्तस्त्रिधा व्यधादि'ति च । 'अन्तःस्थितहरेः कामादण्डे ब्रह्मा ततोऽजनि । तत्र देवाश्च सञ्जाताः पुनस्तत्त्वात्मकाः प्रभोरि'ति च ॥ १३ ॥

प्रकाशिका— तास्ववात्सीदित्यप्सु शयनमुक्तम् । ततः किं चकारेत्यत आह ॥ एक इति । अत्रैकस्य पुरुषनामकस्य हरेरधिदैवाद्यनेकात्मकत्वमुच्यत इति भाति । अतः प्रमाणेनैव श्लोकतात्पर्यं दर्शयति ॥ तत्तन्नियात्मकत्वेनेति । तथा च नानात्वमित्यस्य नाधिदैवादित्वमित्यर्थः ॥ किन्तु तत्तन्नियामकत्वेन बहुरूपत्वमिति भावः । माययेत्यस्य तात्पर्यम् ॥ कामादिति । अन्तो ब्रह्माण्डान्तः वीर्यं हिरण्मयमित्येतद्ब्रह्माण्डपरतया प्रमाणेन व्याख्यातम् । तदेव ब्रह्मदेहपरतयाऽपि प्रमाणेन

व्याख्याति ॥ अन्तःस्थितेति । ब्रह्माण्डान्तःस्थितपुरुषनामकहरेरित्यर्थः । अनेन दैव इत्येतदुक्ततात्पर्यम् । वीर्यमित्यस्य तात्पर्यम् ॥ ब्रह्मतनोरिति । यद्यप्यत्र वीर्यं ब्रह्मदेहस्तर्हितस्य पश्चाद्भावित्वेन पूर्वजाताग्न्यादितत्त्वाभिमानिदेवसृष्टिस्ततो वक्ष्यमाणानुपपन्नेत्याह ॥ तत्र देवा इति । तत्त्वात्मकास्तत्त्वाभिमानिनः । पुनश्चेति च शब्दान्वयः । प्रभुरित्यस्य तात्पर्यम् ॥ प्रभोरिति ॥ ततश्चायं श्लोकार्थः ॥ प्रभुर्देवोऽप्सुशयो नारायणः । एको नानात्वमधिदेवादिनियामकतया बहुरूपत्वमन्विच्छन् प्राप्तुमिच्छन् योग एव तल्पं शय्या तस्मात् । हिरण्मयं हिरण्यात्मकं वीर्यं स्ववीर्यात्मकब्रह्माण्डमन्तरेऽधि- देवादिभेदेन मायया स्वेच्छया त्रिधा व्यसृजद्व्यधात् ॥ १३ ॥

अधिदैवमथाध्यात्ममधिभूतमिति प्रभुः ।
पुनस्तत्पौरुषं वीर्यं त्रिधा भिद्यत तच्छृणु ॥ १४ ॥

प्रकाशिका— अण्डान्तरेऽध्यात्मादितया सृष्टं ब्रह्मदेहरूपं हिरण्मयं स्ववीर्यं पुनरधिदैवाधिभेदेन त्रिधा व्यधात् । एतदेव विशदयति ॥ पुनरिति । तत्पौरुषं वीर्यं ब्रह्मदेहः । यथा पुनस्त्रिधाऽभिद्यत पुनरधिदैवादित्रिविधसृष्टिहेतुर्जातस्तत्तं प्रकारं शृण्वित्यर्थः ॥ १४ ॥

अन्तः शरीर आकाशे पुरुषस्य विचेष्टतः ।
ओजः सहो बलं जज्ञे ततः प्राणो महानभूत् ॥ १५ ॥

प्रकाशिका— विराडाख्यब्रह्मशरीरेऽन्तराकाशे विशेषेण स्वातन्त्र्येण चेष्टतः पुरुषस्य तन्नामकहरेः सकाशाद्विविधं चेष्टतः पुरुषस्य ब्रह्मण ओजः पराभवशक्तिः सहः सहनशक्तिः । बलं स्वेच्छाकरणशक्तिः । ततस्तदनन्तरं महान्प्राणो मुख्यप्राण ओज आद्यभिमान्यभूज्जातः ॥ १५ ॥

अनुप्राणन्ति यं प्राणाः प्राणन्तं सर्वजन्तुषु ।
अपानन्तमपानन्ति नरदेवमिवानुगाः ॥ १६ ॥

प्रकाशिका— प्राणस्य महत्त्वं दर्शयति ॥ अनुप्राणन्तीति । प्राणा इन्द्रियदेवाः सूर्यादयः । प्राणन्तं चेष्टां कुर्वन्तम् । अनु पश्चात्प्राणन्ति चेष्टां कुर्वन्ति । अपानन्तं चेष्टां त्यजन्तमनु पश्चादपानन्ति चेष्टां त्यजन्ति । नरदेवं राजानमनुगा भृत्या इव । क्षिपता चालयता निमित्तेन ॥ १६ ॥

प्राणेन क्षिपता क्षुत्तृडन्तरा जायते विभोः ।
पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत ॥ १७ ॥

प्रकाशिका— विभोर्ब्रह्मणो जक्षतो भक्षयितुमिच्छतः प्राक् प्रथमं निरभिद्यत व्यक्तमभवत् ॥१७॥

मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते ।
ततो नानारसो यज्ञे जिह्वया योऽधिगम्यते ॥ १८ ॥

प्रकाशिका— मुखतो मुखे ताल्वधिष्ठानमिन्द्रियं तदभिमानी च जिह्वा ग्राह्यौ । अधिदेवे वरुणश्चात्र ग्राह्यः । ऐतरेय भाष्येऽधिदैवसृष्टेरपि ब्रह्मदेवादुक्तत्वात् । नानारसो विषयः । एवं सर्वत्राधिष्ठानादिचतुष्टयमध्येऽनुक्तमप्यूह्यम् ॥ १८ ॥

विवक्षोर्मुखतो भूम्नो वह्निर्वाग्व्याहृतं तयोः ।
जले वै तस्य सुचिरं निरोधः समजायत ॥ १९ ॥

प्रकाशिका— विवक्षोर्वक्तुमिच्छोर्मुखत एव वह्निः अधिदैवं वह्निनामा वागिन्द्रियं तदभिमानी च वह्नेरंशस्तन्नामा व्याहृतमभिवदनम् । तयोरिन्द्रियतदभिमानिनोः सकाशात् । जले गर्भोदके वर्तमानस्य तस्य ब्रह्मणो वायुनिर्गमनद्वाराभावेन निरोधः श्वासनिरोधः ॥ १९ ॥

नासिके निरभिद्येतां दोधूयति नभस्वति ।
तत्र वायुर्गन्धवहो घ्राणो नसि जिघृक्षतः ॥ २० ॥

प्रकाशिका— कस्मिन्सति नभस्वति प्राणवायौ दोधूयति दोधूयमानेऽत्यर्थं प्रचलति सति । वा इत्यनेनाद्यापि निरोधोऽनुभवसिद्ध इति दर्शयति । तत्र नसि नासिकायाम् । वायुरधिदैवं वायुनामा गन्धं वहति गृह्णातीति गन्धवाहः । अनेन गन्धो विषयो दार्शितः । घ्राण इन्द्रियं तदभिमानी च । जिघृक्षतो घ्रातुमिच्छतः । जात इति शेषः ॥ २० ॥

यदात्मनि निरालोक आत्मानञ्च दिदृक्षतः ।
निर्भिन्ने अक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः ॥ २१ ॥

प्रकाशिका— स ब्रह्मा यदाऽऽत्मनि देहे विषये निरालोकः प्रकाशशून्यः । आसीदिति शेषः । तदाऽऽत्मानम् । च शब्दादन्यच्च । दिदृक्षतो द्रष्टुमिच्छतस्तस्य ब्रह्मणोऽक्षिणी गोलके ज्योतिः सूर्योऽधिदैवं ज्योतिर्नामा चक्षुरिन्द्रियं तदभिमानी च । ताभ्यां गुणस्य रूपस्य ग्रहो ग्रहणम् । अनेन रूपं विषयो दर्शितः ॥ २१ ॥

बोध्यमानस्य ऋषिभिरात्मनस्तज्जिघृक्षतः ।
कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः ॥ २२ ॥

प्रकाशिका— ऋषिभिर्ज्ञानिभिरग्न्यादिदेवैर्बोध्यमानस्य ज्ञाप्यमानस्यात्मनस्तद्विज्ञापनं जिघृक्षतो गृहीतुकामस्य दिशोऽधिदैवं दिङ्नामानो देवाः श्रोत्रमिन्द्रियं तदभिमानी च । ताभ्यां गुणस्य शब्दस्य ग्रहो ग्रहणम् । अनेन शब्दो विषयो दर्शितः ॥ २२ ॥

वस्तुनो मृदुकाठिन्यलघुगुर्वुष्णशीतताम् ।
जिघृक्षतस्त्वङ्निर्भिन्ना तस्यां रोममहीरुहाः
तत्र चान्तर्बहिर्व्याप्तस्त्वचा लब्धगुणावृतः ॥ २३ ॥

प्रकाशिका— वस्तुनो घटादिपदार्थस्य मृदुत्वं काठिण्यं च । द्वन्द्वान्ते श्रूयमाणस्तल् प्रत्ययः प्रत्येकं सम्बध्यते । तथा च लघुतां गुरुतामुष्णतां शीततामित्यर्थः । गुर्वुष्णेति छान्दसप्रयोगः । जीघृक्षतो गृहीतुमिच्छतस्त्वगिन्द्रियाधिष्ठानं चर्म तस्यां त्वचि । रोमाणि रोम शब्दवाच्यं त्वगिन्द्रियं तदभिमानिनश्च त एवाधिदैवं महीरुह शब्दवाच्याः पारिजाताद्या देवाः ॥ जाता इति शेषः । त्वचश्च रोमनामानो वृक्षनामान एव च द्विविधाः पारिजाताद्या बभूवुर्ब्रह्मदेहत इति वचनात् । त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमौषधीः । अंशेन लोमभिरिति तृतीये वक्ष्माणत्वाच्चोक्तं युक्तमिति ध्येयम् । अभिमान्यन्तरं दर्शयंस्त्वगिन्द्रियविषयप्रयोजने सूचयति ॥ तत्रेति । तत्र त्वच्यधिष्ठानभूतायामन्तर्बहिस्त्वचा त्वगिन्द्रियेण लब्ध उपलब्धः स चासौ गुणस्पर्शश्च तेनावृतो युक्तो वातश्च वायुरपि जात इत्यर्थः । अनेन स्पर्शो विषयः । शरीरान्तर्बहिश्च तदुपलब्धिः प्रयोजनमिति सूचितम् ॥ २३ ॥

हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया ।
तयोस्तु बलवानिन्द्र आदानमुभयाश्रयम् ॥ २४ ॥

प्रकाशिका— हस्तावित्यत्र हस्तशब्देनाधिष्ठानम् । बलमिन्द्रियम् । तद्वांस्तदभिमानी । अनेनेन्द्रियस्याप्युत्पत्तिरुक्तेति ज्ञातव्यम् । रुरूहतुर्निर्भिन्नौ । तयोरिति सप्तमी । अभिमानिनोऽधिदैवं तन्नामाह ॥ इन्द्रं इति । आदानमुपादानादिरूपं कर्म । उभयोरिन्द्रियाभिमानीनावाश्रयौ यस्य तथोक्तम् ॥ २४ ॥

गतिं चिकीर्षतः पादौ रुरुहातेऽभिकामतः ।
पद्भ्यां हव्यं स्वयं यज्ञः कर्म यत्क्रियते नृभिः ॥ २५ ॥

प्रकाशिका— गतिं गमनलक्षणं कर्म । पादावधिष्ठानभूतौ । अभिकामतः स्वेच्छया गतिं चिकीर्षत इत्यन्वयः । पद्भ्यामिन्द्रियाभिमानिभ्यां सह । अधिदैवं तन्नामाह ॥ यज्ञ इति । अत्र यज्ञ

शब्देनेन्द्रपुत्रस्तन्नियामको हरिश्च विवक्षितः । अत एवाह ॥ स्वयं साक्षाद्यज्ञ इति । जात इति शेषः। प्रसङ्गाद्यज्ञनामकदेवमाहात्म्यं दर्शयति ॥ हव्यं कर्मेति । हविः सबन्धि हवनादिकर्म यत्क्रियते तत्तत्स्वयं यज्ञाभिमन्यमानं क्रियाभिमानाद्यज्ञोऽसाविति पूर्वमुक्तत्वात् । हरिपक्षे तु यज्ञमुद्दिश्य हव्यं कर्म क्रियते स हरिरेव स्वयं यज्ञ इति योजना ॥ २५ ॥

निरभिद्यत शिश्नो वै प्रजानन्दामृतार्थिनः ।
उपस्थ आसीत्कामानां प्रियं तदुभयाश्रयम् ॥ २६ ॥

प्रकाशिका— शिश्नोऽधिष्ठानं प्रजासन्ततिश्चानदश्च मैथुनजन्यः स एवामृतं तदर्थयितुं शील- मस्येति प्रजानन्दामृतार्थी तस्य उपस्थमिन्द्रियं तदभिमानी च । स एवाधिदैवं मनुनामाऽऽसीदिति ग्राह्यम् । तत्साध्यं दर्शयति ॥ कामानामिति । काम्यानां स्त्रीणां सकाशाद्यत्प्रियं तदभिमानी च सुखं मैथुनजन्यं तदप्यासीदित्यन्वयः ॥ २६ ॥

उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम् ।
ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः ॥ २७ ॥

तात्पर्यम्— 'मलादिकं कदाचित्तु ब्रह्म लोकाभिपत्तये । आत्मनो निर्ममे कामात्सर्वे- षामभवत्ततः । वशित्वात्तस्य दिव्यत्वादिच्छया भवति प्रोरि'ति च ॥ २७ ॥

प्रकाशिका— धातुमलं भुक्तस्यान्नादे रसांश पुरीषसंज्ञम् । उत्सिसृक्षोस्त्यक्तु- मिच्छोर्गुदमधिष्ठानम् । तत्र गुदे पायुस्तन्नामकमिन्द्रियं तदभिमानी च तत इन्द्रियात् । अधिदैव स एव मित्रो मित्रनामा जातः । तत्साध्यं कर्माह ॥ उत्सर्ग इति । ननु ब्रह्मदेहस्य दिव्यत्वात्तत्र कथं मलादिकमित्याशङ्कां प्रमाणेनैव परिहरति ॥ मलादिकमिति । आदि पदेन तद्विसर्जनादिकं ग्राह्यम् । लोकाभिपत्तये लोकानां प्राप्त्यर्थम् । आत्मनः स्वस्य । देह इति शेषः । कामाभिमानीत्युक्त- मुपपादयति । वशित्वादिति । स्वतन्त्रत्वादित्यर्थः । पाय्वादीन्द्रियदेवानधीनत्वादिति यावत् । तस्य ब्रह्मदेहस्य दिव्यत्वात् । स्वभावतोऽसारांशशून्यत्वात् । प्रभोर्ब्रह्मण इच्छयैव भवतीत्यङ्गीकार्यमित्यर्थः। अत्र हि ब्रह्मा इन्द्रियाभिमानिदेवैः स्वस्वव्यापारान् सर्वलोकदेहेषु प्रकाशयितुं स्वदेहे तावत्कारितवानित्युच्यते । अतः स्वदेहे मलाद्यभावेऽपीच्छयैव तात्कालिकं मलं सृष्ट्वा तदुत्सर्जनं कारितवानिति भावः । एवं प्रमाणसिद्धार्थतां दर्शयितुं मूले वै शब्दः ॥ २७ ॥

आसिसृक्षोः पुरः पुर्यां नाभिद्वारमपावृतम् ।
ततोऽपानस्ततो मृत्युः पृथक्त्वमुभयाश्रयम् ॥ २८ ॥

प्रकाशिका— छिद्रोत्पत्तिकथनप्रसङ्गान्नाभिरूपछिद्रस्याप्युत्पत्तिं तत्प्रयोजनं च दर्शयति ॥ आसिसृक्षोरिति । पुरःस्वधिष्ठितादेहात् । पुर्यामन्यस्मिन्देहे आसिसृक्षोर्गन्तुमिच्छोर्नाभिलक्षणं द्वारमपावृतं व्यक्तमभवत् ततो नाभिद्वारादपानोपाननामा मुख्यवायुस्ततोऽपानान्मृत्युर्मृत्युनामकं मुख्यवायोरेव रूपान्तरमधिदैवं जातमित्यर्थः । पृथक्त्वं मरणमुभआश्रयावुभावपानमृत्यू आश्रयौ हेतुभूतौ यस्य स तथोक्तम् । मृत्योर्मारकत्वं प्रसिद्धम् । नाभिदेशस्थापानोऽपि यदा नाभेर्विश्लिष्टा भवति तदा मलोत्सर्जनाधिक्येन मरणं भवतीत्यनुभवसिद्धम् । अत्र ब्रह्मदेहे मरणोत्पत्तिकथनस्य तात्पर्यं मलोत्पत्तिकथनस्येव द्रष्टव्यम् । सर्वलोकाभिपत्तये स्वदेहे इच्छयैव ब्रह्मणा कदाचिन्मरणं निमित्तमतस्तत्सर्वेषामभवदिति न्यायसाम्यात् ॥ २८ ॥

आदित्सोरन्नपानानाम् असृक्कुक्ष्यन्त्रनाडिके ।
नद्यः समुद्राश्च तयोस्तृप्तिः पुष्टिस्तदाश्रये ॥ २९ ॥

प्रकाशिका— अन्नपानानामन्नपानानि । आदित्सोरादातुकामस्य ब्रह्मणोऽसृग्रुधिरमिन्द्रियस्थानीयं कुक्षि रुदिरमधिष्ठानम् । आन्त्र शब्देन क्षुत्पिपासेऽपि ग्राह्ये । तथा चान्त्र शब्दगृहीतं सर्वमिन्द्रियस्थानीयम् । नाड्यो नाड्यधिष्ठानभूताः नद्यः समुद्राश्चात एव नदीसंज्ञाः समुद्रसंज्ञाश्च देवाः । तयोः कुक्षिनाड्योः । आसन्निति शेषः । तदुभयप्रयोजनमाह ॥ तृप्तिरिति । क्षुत्पिपासानिवृत्तिस्तृप्तिः । अन्नरसपरिणतं स्थौल्यं पुष्टिः । तदाश्रये तन्निमित्ते । अत्र नाड्योऽधिष्ठानं रुधिरमध्यात्मं रुधिरनामानो देवाश्च तदाश्रिताः । त एव बहिर्नदीनामानः कुक्षिरधिष्ठानम् । आन्त्रमध्यात्ममान्त्रनामानो देवाश्च तदाश्रितास्त एव बहिः समुद्रनामान एतदुभयसर्गः साध्ये तृप्तिः पुष्टी इति विवेकः । नाड्यश्च निरभिद्यन्त ताभ्यो लोहितमाहृतम् । नद्यस्ततः समभवन्नुदरं निरभिद्य तत्क्षुत्पिपासे ततः स्यातां समुद्रस्ततोऽभवदित्यग्रे वक्ष्यमाणत्वादेवमेव व्याख्येयम् ॥ २९ ॥

निदिध्यासोरात्ममायां हृदयं निरभिद्यत ।
ततो मनश्चन्द्र इति सङ्कल्पः काम एव च ॥ ३० ॥

प्रकाशिका— आत्ममायां विष्णुमाहात्म्यं निदिध्यासोर्नितरां चिन्तयितुमिच्छोर्हृदयमधिष्ठानम् मन इन्द्रियं तन्नामाभिमानी च । स एवाधिदैवं चन्द्र इति प्रसिद्धः । सङ्कल्पः कामः । च शब्दात्क्रोधादयोऽपि वृत्तिविशेषास्त एवेन्द्रियाभिमानिभ्यामेव । जाता इति शेषः ॥ ३० ॥

त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः ।
भूम्यप्तेजोमयाः सप्त प्राणो व्योमाम्बुवायुभिः ॥ ३१ ॥

प्रकाशिका— त्वगाद्याः सप्तधातवः । जाता इति शेषः अध्यात्मं ब्रह्मण उत्पन्नानामुपादानानि दर्शयन्नव्यवधानेन प्रकृतानां सप्तधातूनां तावदुपादानं वक्तुं भूम्यप्तेजोमया इति विशेषणम् । ब्रह्मदेहगतभूम्याद्युपादानका इत्यर्थः । प्राणो मुख्यप्राणदेहरूपो जडप्राणः । व्योमाम्बुवायुभिर्ब्रह्मदेहगतैः । विकृत इति शेषः ॥ ३१ ॥

गुणात्मकानीन्द्रियाणि भूतादिप्रभवा गुणाः ।
मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ॥ ३२ ॥

प्रकाशिका— इन्द्रियाणि श्रोत्रादीनि बाह्येन्द्रियाणि गुणात्मकानि । अत्र गुण शब्देन ब्रह्मदेहानुस्यूतस्तैजसाहाङ्कारांशो ग्राह्यः । तदुपादानकानीत्यर्थः । अथवा गुणाः शब्दादय आकाशादिभूतद्वारा तदुपादानकनीत्यर्थः । तेषां भूतैरुपचयः सृष्टिकाले विधीयत इति वचनात् । गुणाः शब्दादयो विषयाः । पूर्वमुत्पन्नतयोक्ता भूतादिर्ब्रह्मदेहगतस्तामसोऽहङ्कारस्तस्मात्प्रभवो विकारो येषां ते तथा ॥ ३२ ॥

एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया ।
मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतम् ॥ ३३ ॥

तात्पर्यम्— 'स्थूलं भगवतो रूपं ब्रह्मदेह उदाहृतः । तत्तन्त्रत्वाच्च सूक्ष्मं च शङ्खचक्रगदाधरमि'ति चाध्यात्मे ॥ ३३ ॥

प्रकाशिका— सर्वेषामिन्द्रियदेवदेहानां विकारो यस्मात्स ब्रह्मदेहानुस्यूतो वैकारिकोऽहङ्कारस्तद्रूपमित्यर्थः । बुद्धिरिन्द्रियप्रयोजनतयोक्ता या शब्दादिविषया निश्चयरूपा सा विज्ञानं ब्रह्मदेहानुस्यूतं महत्तत्त्वं तत्स्वरूपिणी तदुपादानिकेत्यर्थः ॥ पुरुषावयवैर्लोका इत्यत्र लोकादीनां हरिप्रतिमात्वेनोपासनार्थं या पुरुषावयवैर्जाता सृष्टिः प्रष्टा तामुक्त्वोपसंहरति ॥ एतदिति । अत्र स्थूलरूपमित्यनेन किमुक्तमिति न प्रतीयतेऽतः परमित्यनेन निराकारमुच्यत इति प्रतीयतेऽतः प्रमाणेनैव श्लोकद्वयतात्पर्यं दर्शयति ॥ स्थूलमिति । तथा च मूले रूप शब्दो देहपर इति भावः । ननु पद्मदेहस्य जडत्वात्कथं भगवद्देहत्वमित्याशङ्कायाम् उपचारत एवेत्यभिप्रेत्योपचारबीजं दर्शयति ॥ तत्तन्त्रत्वादिति । चं शब्दोऽवधारणे । न मुख्यवृत्त्येत्यर्थः । सूक्ष्मं रूपं द्वितीयश्लोकोक्तं शङ्खचक्रगदाधरमेव न निराकारमित्यर्थः । निर्विशेषणशब्दस्य निर्धर्मकत्वप्रतीतिनिरासायार्थमाह ॥ निर्विशेषणमिति । निर्विशेषण शब्दस्यातिशयवाचकत्वेऽभियुक्तप्रयोगं प्रमाणयति ॥ अस्येति । विशेषणेऽतिशयने । एतत्काव्यापेक्षयाऽतिशयितं काव्यं कर्तुं न समर्थ इत्यर्थः ॥ ततश्चायं

श्लोकद्वयार्थः ॥ भगवतो वैराजस्य पुरुषस्यैतद्ब्रह्माण्डाख्यं तदन्तर्गतं ब्रह्मशरीरं च रूपमिव रूपं देहतुल्यं तदधीनत्वगुणयोगात् । मया व्याहृतं पातालमेतस्येत्यादिनोक्ताव- धारणार्थम् । त्वया पृष्टमिति शेषः स्थूलत्वमेव दर्शयति ॥ मह्यादिभिरिति । आवृत्तं चेत्यन्वयः । अष्टभिः पञ्चभूताहङ्कारमहत्तत्त्वगुणत्रयाख्यैः ॥ ३३ ॥

अतःपरं सूक्ष्मतममव्यक्तं निर्विशेषणम् ।
अनादिमध्यनिधनं नित्यं वाङ्मनसोः परम् ॥ ३४ ॥

तात्पर्यम्— निर्विशेषणं निरतिशयम् । 'अस्य काव्यस्य कवयो न समर्था विशेषण' इति- वत् ॥ ३४ ॥

प्रकाशिका— ननु तर्हि हरेर्निजं रूपं कीदृशमित्यत आह ॥ अतःपरमिति । अतो जडदेहात्परं भिन्नं चिद्रूपमतो ब्रह्मादिचेतनसमूहात्परमुत्तमभिति वा । एतदुपपादयितुं वक्ष्यमाणविशेषणानि । सूक्ष्मतमम् । स्थूलतमत्वेऽपीति शेषः । निर्गतविशेषणमतिशयनं यस्मात्तत्तथोक्तम् अनादिमध्यनिधन- मादिमध्यावसानशून्यम् । नित्यं सदैकरूपम् । वृद्धिह्रासादिवर्जितमित्यर्थः । परमगोचरमिति ॥३४॥

अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते ।
उभे अपि न गृह्णन्ति मायासृष्टेऽविपश्चितः ॥ ३५ ॥

तात्पर्यम्— मायासृष्टे जगति ये अविपश्चितः ॥ ३५ ॥

प्रकाशिका— रूपद्वयकथनमुपसंहृत्य तस्य विपश्चिदविपश्चित्ज्ञेयत्वाज्ञेयत्वे च दर्शयति ॥ अमूनीति । अत्र मायासृष्ट इति द्वितीयाद्विवचनं भगवद्रूपयोर्विशेषणम् । तेन माययाऽविद्यया कल्पिते न परमार्थे सती इत्यन्यथाप्रतीतिवारणाय मायासृष्ट इत्येतद्व्याचष्टे ॥ मायासृष्ट इति । तथा च सप्तम्यन्तमिदम् । प्रकृतिनिर्मितजगद्वाच्यैवेत्यर्थः । ननु विपश्चितो न गृह्णन्तीति विरुद्धम् । तथात्वे स्वस्याप्यज्ञानत्वप्राप्त्या त्वद्वर्णनायोगात् । अतोऽत्राभिमतं छेदं दर्शयति ॥ य इति । य इत्युक्त्या विपश्चितस्तु गृह्णन्ति हीत्यपि योजनां सूचयति ॥ ३५ ॥

स वाच्यवाचकतया भगवान्ब्रह्मरूपधृक् ।
नामरूपक्रिया धत्ते सकर्माकर्मकः परः ॥ ३६ ॥

तात्पर्यम्— 'नामैव वाचकत्वेन नामरूपक्रिया अपि । वाच्यत्वेन हरिर्देवो नियामयति चैकराडि'ति च । 'कर्तृत्वात्तु सकर्माऽसौ निष्फलत्वादकर्मक' इति च ॥ ३६ ॥

प्रकाशिका— एवं ब्रह्मदेहान्तर्गताद्वैराज्यात्पुरुषात्सृष्टिमभिधाय तस्य स्थितिकर्तृत्वमपि दर्शयितुं नामरूपक्रियानियमनकर्तृत्वं च तावदाह ॥ स वाच्यवाचकतयेति । अत्र नामरूपक्रियावाच्यवाचकतया धत्त इत्युक्त्या रूप क्रिययोरपि वाचकतया धारणं प्रतीयते । अमूर्त्तानां नामादीनां धारणं च कीदृशमित्यतो अस्य तात्पर्यं प्रमाणेनैवाह ॥ नामैवेति । वाचकत्वेन नियामयतीति सम्बन्धः । धत्त इत्यस्यार्थः ॥ नियामयतीति । पर इत्यस्यार्थः ॥ एकराडिति । च शब्दो यस्मादेकराट् स्वतन्त्र इति हेत्वर्थे । सकर्माकर्मक इति व्याहतं किमुच्यत इत्यतोऽस्याभिप्रायं प्रमाणेनैवाह ॥ कर्तृत्वादिति । तु शब्दो विशेषार्थः । तथा च मुख्यतया कर्तृत्वादित्यर्थः । निष्फलत्वात्कर्मसाध्यफलशून्यत्वात् । सकर्माकर्मकश्चोच्यत इति शेषः ॥ ततश्चायं श्लोकार्थः ॥ ब्रह्मरूपधृक् ब्रह्मदेहान्तर्गतः स वैराजः पुरुषः । नामरूपक्रिया वाच्यवाचकतया धत्ते । नामशब्दजातं वाचकत्वेन नामरूपक्रिया वाच्यत्वया धत्ते । नियामयति । अत एव मुख्यकर्तृत्वात्सकर्मा । तत्साध्यफलशून्यत्वादकर्मश्चोच्यते वेदेषु । यतः परः स्वतन्त्र इति ॥ ३६ ॥

प्रजापतीन् मनून् देवानृषीन् पितृगणान् पृथक् ।
सिद्धचारणगन्धर्वान् विद्याध्रासुरगुह्यकान् ॥ ३७ ॥

किन्नराप्सरसो नागान् सर्पान् किम्पुरुषानपि ।
मातृरक्षः पिशाचांश्च प्रेतभूतविनायकान् ॥ ३८ ॥

प्रकाशिका— वाच्यवाचकतया नामरूपक्रिया धत्त इत्युक्तमेव प्रपञ्चयति ॥ प्रजापतीनिति सार्धैस्त्रिभिः । अत्र द्वितीयान्तामन्वयो न प्रतीयतेऽत आह ॥ प्रजापत्यादीन्धत्त इति । तेन धत्त इति पूर्वोक्तक्रियापदमत्राप्यनुवर्तनीयमित्युक्तं भवति । प्रजाप्रतिनित्यादिमूलस्य प्रजापत्यादि शब्दान् वाचकतया ब्रह्मादिदेहान् तत्क्रियाश्च वाच्यतया धत्त इत्यर्थः । पृथक् तत्तदवान्तरभेदेन ॥३७,३८॥

कूष्माण्डाभूतवेतालान् यातुधानान् ग्रहानपि ।
खगान् मृगान् पशून् वृक्षान् गिरीन् नृप सरीसृपान् ॥ ३९ ॥

प्रकाशिका— हे नृप नृपाः प्रियव्रतादय इति वा । सरीसृपाः सर्पादयः ॥ ३९ ॥

द्विविधाश्चतुर्विधाश्चान्ये जलस्थलनभौकसः ।
कुशलाकुशलमिश्राणां कर्मणां गतयस्त्विमाः ॥ ४० ॥

तात्पर्यम्— प्रजापत्यादीन्धत्ते ॥ ३७-४० ॥

प्रकाशिका— प्रत्येकं निर्देष्टुमशक्यत्वात्सामान्यतो निर्दिशति ॥ विविधा इति । द्विविधा इति पाठे स्थावरजङ्गमरूपेण द्विविधा इत्यर्थः । चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जरूपेण जलस्थलनभांस्योकांसि येषां तानपि धत्त इति पूर्वेणान्वयः ॥ अत्रोत्तमाधममध्यमा जातयो निर्दिष्टाः । तासामुत्तमत्वादौ किं कारणमित्यपेक्षायामाह ॥ कुशलेति । कुशलं पुण्यम् । अकुशलं पापम् । मिश्रं पुण्यपापरूपम् । इमाः पूर्वोक्ता जातयः । गतयः फलरूपाः ॥ ४० ॥

सत्वं रजस्तम इति तिस्रः सुरनृनारकाः ।
तत्राप्येकैकशो राजन् भिद्यन्ते गतयस्त्रिधा ॥ ४१ ॥

तात्पर्यम्— तामसास्तामसा दैत्याः प्रधानादेव शत्रवः । तामसाराजसास्तेषामनुगास्तेषु सात्विकाः । अनाख्यातासुराः प्रोक्ता मानुषा दुष्टचारिणः । राजसास्तामसाश्चैव मध्या राजसराजसाः । राजसाः सात्विकास्तत्र मानुषेषूत्तमा गणाः । देवाः पृथगनाख्याताः स्मृताः सात्विकतामसाः । अतात्विकास्तथाख्याताः स्मृताः सात्विकराजसाः । सात्विकाः सात्विकास्तत्र तात्विकाः परिकीर्तिताः । तेषां च सात्विकाः शेषगरुत्मद्रुद्रतत्स्त्रियः । ततोऽपि देवी ब्रह्माणी ब्रह्मा चैव ततः स्वयम् ॥ ४१ ॥

प्रकाशिका— त्रिविधकर्मफलरूपाणामुक्तजातीनां प्रकारान्तरेणापि त्रैविध्यमाह ॥ सत्त्वमिति । अत्र सत्त्वादिशब्दाः सात्त्विकराजसतामसपराः । गतय इत्यत्राप्यन्वयः । तथा च गतयः पुण्यादिफलरूपा जातयः सात्त्विकराजसतामस इति तिस्रस्त्रिविधा इत्यर्थः । तन्निर्दिशति ॥ सुरेति । अत्र सुर शब्देन क्षितिपगन्धर्वऋषिपितरोऽपि ग्राह्याः । नारका असुराः । तथा च सात्त्विका ब्रह्मादयः क्षितिपान्ताः । राजसा नृ शब्दवाच्या मनुष्याः । तामसा असुरा इति विवेकः एवं विभक्तानां पुनरवान्तरविभागमाह ॥ तत्रापीति । अत्रापि सात्त्विकादिष्वपि । विद्यमाना इति शेषः । एकैकशः प्रत्येकम् । गतयः कर्मफलरूपाः सुरादिजातयः । तथा च सात्त्विकास्त्रिविधाः । सात्त्विकसात्त्विकाः सात्त्विकराजसाः सात्त्विकतामसा इति । राजसा अपि त्रिविधाः । राजससात्त्विका राजसराजसा राजसतामसा इति । तामसा अपि त्रिविधाः तामससात्त्विकास्तामसराजसास्तामसतामसा इति । प्रत्येकं सात्त्विकादिरूपा गतयो भिद्यन्त इत्यर्थः । अत्र प्रत्येकं सात्त्विकादिभेदेन भिन्नाः सात्त्विकादयः क इत्यपेक्षायां मूलेऽनुक्तांस्तान्नीचक्रमेण प्रमाणेनैव दर्शयति ॥ तामसस्तामसा इत्यादिना । अनाख्यातासुरा अप्रसिद्धासुराः । दुष्टचारिणो मानुषाः । मनुष्याधमाः । च शब्दस्तुशब्दार्थः । राजसराजसास्तु मध्यमा मध्यममानुषा इत्यन्वयः । राजसाः सात्त्विका राजससात्त्विका देवा इति । अत्र देव शब्देन क्षितिपानारभ्य चिरपितृपर्यन्ता उत्तमजीवा ग्राह्याः

पृथक् प्रत्येकमनाख्याताः । देवत्वेनेति शेषः । तथा ख्याता देवत्वेन ख्याता इत्यर्थः । ते चाजानजा देवाः कर्मदेवाश्च ज्ञेयाः । सात्त्विकाः सात्त्विकाः सात्त्विकसात्त्विकास्ते च विष्वक्सेनं तत्समांश्चारभ्योपरितनाः । तत्रापि सात्त्विकसात्त्विकेष्वपि गतयस्त्रिधा भिद्यन्त इत्यपि मूले योजनामभिप्रेत्य सात्त्विकसात्त्विकोत्तमान्दर्शयति ॥ तेषां चेति । सात्त्विकसात्त्विकानामपि मध्य इत्यर्थः । सात्त्विका अतिशयेन सत्त्वगुणोपेताः । निर्धारणेन तथा लाभात् । ब्रह्माणी सरस्वती ततोऽप्यतिशयेन सात्त्विकी । सात्त्विकेतरा । ततश्च ब्रह्मण्या अपि ब्रह्मा स्वयमेवान्यजीवप्रेरणां विनैवातिशयेन सात्त्विकाः सात्विकतमा इत्यर्थः ॥ ४१ ॥

यदैवैकतमोऽन्याभ्यां स्वभाव उपहन्यते ।
तदैवेदं जगद्धाता भगवान् धर्मरूपधृक् ।
पुष्णाति स्थापयन् विश्वं तिर्यङ्नरसुरात्मभिः ॥ ४२ ॥

तात्पर्यम्— सात्त्विकेषु त्रिषु यदा त्वेकस्य प्रतिबाधनम् । रजस्तमोभ्यां विष्णुर्हि तदा प्रादुर्भवत्यजः । राजसांस्तामसान्हत्वा सात्त्विकान्वर्धयिष्यती'ति स्कान्दे ॥ ४२ ॥

प्रकाशिका— एवं ब्रह्मदेहान्तर्गतात्पुरुषादवान्तरभेदभिन्नस्य जगतः सृष्टिमुक्त्वा स एव मत्स्यादिरूपेण स्थितिं करोतीति वक्तुं यदैवैकतम इति मूलम् । तदेकतमादिशब्दार्थाप्रतीत्या व्याख्याति ॥ सात्त्विकेष्विति । त्रिषु त्रिविधेषु । अनेन मूले एकतम इत्यतः पूर्वमिदमध्याहार्यमिति सूचयति । एकस्यान्यतमस्य तु प्रतिबाधनम् । विशेषेण पीडा । द्वाभ्यामित्यस्यार्थः ॥ रजस्तमोभ्यामिति । अत्र रजः शब्दो राजसतामसपरः । तमः शब्दस्तु त्रिविधतामसपर इत्यवगन्तव्यः । राजसांस्तामसानित्येतदप्येवमेव व्याख्येयम् । हत्वेत्यनेन स्थापयन्नित्येतदुक्ततात्पर्यम् । विष्णुर्मत्स्यादिरूपेणेति शेषः । प्रादुर्भावोपपादनायाज इत्युक्तम् । सात्त्विकान् । त्रिविधानीति शेषः । पुष्णातीत्यस्य तात्पर्यं वर्धयिष्यतीति ततश्चायं श्लोकार्थः । यदा उक्तरीत्या त्रिविधेषु सात्त्विकेषु एकतमः । अन्यतमः सात्विकसात्विकः सात्त्विकराजसः सात्विकतामसो वेत्यर्थः । इदमुपलक्षण । राजससात्त्विकोऽपि ग्राह्यः । योग्यतापरपर्यायेण स्वभाव शब्देन तद्वांस्तात्त्विकानिग्राह्यः । द्वाभ्यां सात्विकराजसत्रिविधतामसाभ्याम् । उपहन्यते बाध्यते । तदैव तस्मिन्नवसर एव धाता नामरूपक्रियादिभेदेन नियमनकर्ता भगवान्विष्णुर्धर्मरूपधृक् धर्मस्वरूपप्रवर्तको धर्मे स्थित्वा धर्मनामा सन्निति वा । विश्वं सर्वमिदं जगत्तिर्यङ्नरसुरात्मभिर्मत्स्यकूर्मवराहरामकृष्णोपेन्द्रादिरूपैः स्थापयन् बाधकान्संहरन्पुष्णाति । भोगैर्ज्ञानभक्त्यादिभिश्च संवर्धयतीति ॥ ४२ ॥

ततः कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः ।
सन्नियच्छति तत्काले घनानीकमिवानिलः ॥ ४३ ॥

तात्पर्यम्— मत्स्यादिरूपी पोषयति नृसिंहो रुद्रसंस्थितः। विलापयेद्विरिञ्चस्थः सृजते विष्णुरव्यय' इति वामने ॥ ४३ ॥

प्रकाशिका— इदानीमन्ते संहर्तृत्वमपि तस्यैवेत्याह ॥ तत इति । अत्र भगवतः कालाग्निरुद्राभेदोच्यत इति भाति । तथा सति तिर्यङ्नरसुरात्मभिरिति पूर्वश्लोकेऽपि प्रसिद्धतिर्यगगादिस्वरूपत्वं यत्सृष्टमिदमात्मन इत्यत्रात्मन इत्यनेन विरिञ्चग्रहणे तदभेदोऽपि भाति । अतो यथावत्प्रमाणेनैव तत्तात्पर्यमाह ॥ मत्स्यादीति । मत्स्यादीनामिव रूपं यस्यास्तीत्यर्थः । अनेन कालो यमः । अग्निः सांवर्तकः । रुदः प्रसिद्धस्तानाप्नोतीति कालाग्निरुद्रात्मा नृसिंह इति मूलव्याख्यानं सूचयति । विरिञ्चस्य इत्यनेन मूले आत्मपदं विरिञ्चस्य भगवत्परं न विरिञ्चपरमिति सूचितम् ॥ ततश्चायमर्थः ॥ ततः स्थित्यनन्तरं कालेऽल्पकाले प्राप्ते सति कालरुद्राग्निषु व्याप्तो नृसिंहआत्मनः विरिञ्चस्थाद्रूपविशेषाद्यदिदं सृष्टं जगत्तत्सन्नियच्छति संहरति । कः किमिव । अनिलो वायुर्धनानीकं मेघपटलमिवेति ॥ ४३ ॥

इत्थम्भावेन कथितो भगवान्भगवत्तमः ।
नेत्थम्भावेन हि परं द्रष्टुमर्हन्ति सूरयः ॥ ४४ ॥

तात्पर्यम्— भगवत्तमः । ना पुरुषः ॥ ४४ ॥

प्रकाशिका— उक्तार्थे श्रुतिं प्रमाणयति ॥ इत्थंभावेनेति । नेत्थंभावेनेत्येतन्न इत्थंभावेति पदच्छेदप्रतीतिवारणायाभिमतं छेदं दर्शयन् व्याख्याति ॥ भगवत्तम इति । तथा च नेति न नञ् किन्तु नृ शब्दस्य प्रथमैकवचनान्तं पुरुषवाचि तस्य च भगवत्तम इति पूर्वेणैवान्वयो नोत्तरवाक्येनेत्युक्तं भवति । एवमन्वयसूचनायैव भगवत्तम इत्यस्यानुवादः । नेत्यस्य नञर्थत्वे सूरयो वेदादौ कथितप्रकारेण द्रष्टुं नार्हन्तीत्यर्थप्राप्त्या योग्यताभाव इति भावः ॥ ततश्चायं श्लोकार्थः ॥ अतिशयेन भगवान् भगवत्तमः । अत एव भगवान् भगवच्छब्दमुख्यवाच्यः । न नारदादिवदमुख्यवृत्त्येति दर्शयितुं भगवत्तम इत्युक्तम् । नाप्रकृतः पुरुष इत्थंभावेन सृष्ट्यादिकर्तृत्वादिना प्रकारेण कथितः । यतो वा इमानि भूतानि जायन्त इत्यादिश्रुतिष्विति शेषः । ननु निर्विशेषण पराणां श्रुतीनां न विशिष्टे तात्पर्यम् । बन्धप्रतिषेधाय निर्विशेषस्यैव दृष्टत्वादित्यत आह ॥ इत्थंभावेनेति । हि यस्मादित्थंभावेन विशिष्टं परं परमात्मानं सूरयो द्रष्टुमर्हन्ति । बन्धप्रतिषेधार्थमिति शेषः । न तु निर्विशेषणम् । तमेवं विद्वानिति वाक्यात् । अत उक्ते विशिष्ट एव श्रुतीनां तात्पर्यमुक्तमिति ॥४४॥

न चास्य जन्मकर्माणि परस्य न विधीयते ।
कर्तृत्वं प्रतिषेधार्थं माययारोपितं हि तत् ॥ ४५ ॥

तात्पर्यम्— जन्मकर्माणि विधीयत इति क्रियाविशेषणम् । 'प्रतिषेधाय बन्धस्य जीवानां परमेशितुः । स्वेच्छयैव तु कर्तृत्वं नित्यारूढं चिदात्मकमि'ति भविष्यत्पुराणे ॥ रूप उपरिभाव इति धातुः । 'सुभद्रां रथमारोप्ये'त्यादिवच्च । 'स्वाभाविकी ज्ञानबलक्रिया चे'ति च ॥ ४६ ॥

प्रकाशिका— नन्वेवं यतो वा इत्यादिवाक्यैर्भगवतः कर्तृत्वं तात्पर्यतः प्रतिपाद्यत इति प्राप्तम् । न च तद्युज्यते । निष्क्रियस्य स्वाभाविककर्तृत्वासंभवात् । अत उक्तवाक्यैर्नेह नानेत्यादिना निषेद्धुमनूद्यत एव । जन्मादिकर्तृत्वं न प्रतिपाद्यत इत्यत आह ॥ न चास्येति । अत्र जन्म कर्माणीत्यस्य केनाप्यन्वयो न प्रतीयतेऽतोऽन्वयं दर्शयति ॥ जन्मकर्माणीति । इत्येतदिति शेषः । नेह नानेत्यादिना प्रतिषेधार्थं कर्तृत्वं माययाऽऽरोपितं कल्पितमित्यन्यथाप्रतीतिवारणाय द्वितीयार्धस्य तात्पर्यं प्रमाणेनैव दर्शयति ॥ प्रतिषेधायेति । अनेन प्रतिषेधार्थमित्यत्र जीवानां बन्धस्येति पूरणीयमिति सूचयति । परस्येत्यस्यार्थः ॥ परमेशितुरिति । माययेत्यस्यार्थः ॥ स्वेच्छयेति । न जीवस्य पराधीनेच्छेत्येवकारार्थः । आरोपितमित्यस्यार्थः ॥ नित्यारूढमिति । नित्येत्याङोऽर्थः । आरूढ आश्रितम् १ तु शब्दः स्वाभाविकत्वरूपविशेषद्योतकः । तदुपपादनाय नित्यारूढं चिदात्मकमिति विशेषणद्वयम् । आरोपितमित्यस्यारूढमिति व्याख्यानम् । अशब्दमित्यतोऽत्र धातुं दर्शयति ॥ रूप उपरीति । धातुर्धातुव्याख्यानम् । च शब्द उक्तप्रमाणसमुच्चयार्थः । उक्तार्थे प्रयोगोऽप्यस्तीत्याह ॥ सुभद्रामिति । कर्तृत्वस्य स्वाभाविकत्वे श्रुतिं चाह ॥ स्वाभाविकीति । परास्यशक्तिर्विविधैव श्रूयत इति पूर्वेणान्वयः । अत्र शक्ति शब्देन करणशक्तिः कर्तृत्वरूपैव विवक्षिताऽतो नासङ्गतिरिति ध्येयम् ॥ ततश्चायं श्लोकार्थः ॥ अस्य जगतो जन्मकर्माणि परस्य सकाशाद्यथा संभवन्ति तथाऽस्य परस्य कर्तृत्वं न विधीयते तात्पर्यतः प्रतिपाद्यत इति न जगज्जन्माद्यनुकूलं परमात्मनः कर्तृत्वं श्रुत्यादौ तात्पर्यतः प्रतिपाद्यत एव नानूद्यत इत्यर्थः । ननु निर्विशेषस्यैव बन्धप्रतिषेधाय ज्ञातव्यत्वात्किमेतत्प्रति- पादनेनेत्यत उक्तम् ॥ प्रतिषेधार्थमिति । जीवानां बन्धस्य प्रतिषेधार्थमित्यर्थः । तथा च न निर्विशेषज्ञानं मोक्षसाधनमिति भावः । ननु निष्क्रिये ब्रह्मणि श्रूयमाणं कर्तृत्वं कल्पितमेव वाच्यम् । अतः कथं तन्मोक्षार्थं प्रतिपाद्यत इत्यत आह ॥ माययेति । स्वेच्छया तत्कर्तृत्व हि यस्मादारोपितं नित्यं स्वस्मिन्स्थापितमतो न कल्पितम् । किन्तु स्वाभाविकमेवेत्यर्थः । निष्क्रित्वादिकं क्लिष्टकारित्वादिना भगवत्पादैरेवान्यत्र व्याख्यातमिति ॥ ४५ ॥

अयं ते ब्रह्मणः कल्पः सविकल्प उदाहृतः ।
विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ॥ ४६ ॥

तात्पर्यम्— अन्यकल्पानां साधारणः । यत्रैव प्राकृतवैकृताः सर्वसर्गाः । अन्यब्रह्मकल्पानां च साधारणः ॥ ४६ ॥ इति द्वितीयस्कन्धतात्पर्ये दशमोऽध्यायः ॥ १० ॥

प्रकाशिका— उक्तमर्थमुपसंहरन् अन्यकल्पानामेतत्कल्पसाधारणत्वं दर्शयति ॥ अयं त्विति । ब्रह्मणः सम्बन्धी कल्पो महाकल्पो विकल्पोऽवान्तरो दैनन्दिनादिरूपस्तत्सहितो विधिः । साधारण इत्येतत्पदार्थम् अर्थमपेक्षितं पूरयन् व्याख्याति । अन्यकल्पानामिति । अन्येषामवान्तरकल्पानामित्यर्थः। साधारणः समानः प्रकारान्तरेणापि व्याख्याति ॥ अन्यब्रह्मकल्पानामन्यमहाकल्पानां च साधारणोऽयं विधिरित्यपि व्याख्येयमित्यर्थः । कुत इत्यत उक्तम् ॥ यत्रैवेति । अत्र हि महाकल्प एवेत्यर्थः । प्राकृतवैकृता इत्यनेन महदादिसृष्टिमत्वेनापि साम्यमुच्यते । तच्चान्यकल्पानां ग्रहणे सम्भवति । महदादिसृष्टिमत्वस्य ब्रह्मकल्पमात्रधर्मत्वादिति भावः । तथा च तत्रैव यद्वयमेव तयैव प्राकृतसर्वसर्गाः प्रसिद्धास्तेषामन्यब्रह्मकल्पानां तात्पर्ययोजना द्रष्टव्या ॥ ततश्चायं मूलार्थः ॥ अयं तु विधिर्ब्रह्माण्डान्तः कथितो विधिः प्रकारविशेषः । स्थावरादिसर्गरूपः साधारणोऽन्येषा-मवान्तरकल्पानां साधारणो यत्र येषु प्राकृता महदादिसर्गा वैकृता ब्रह्माण्डादिसर्गाश्च भवन्ति तेषां ब्रह्मकल्पानां च साधरण इति ॥ ४६ ॥

परिमाणश्च कालस्य कल्पलक्षणविग्रहम् ।
यथा परस्ताद्व्याख्यास्ये पाद्मं कल्पमिमं शृणु ॥ ४७ ॥

प्रकाशिका— श्रोतृमनःसमाधानाय पृष्टेष्वर्थेष्वेव शिष्टमुत्तरस्कन्धे वक्ष्यामीति प्रतिजानीते ॥ परिमाणमिति । परिमाण स्थूलं सूक्ष्मं च लक्षणविग्रहं कल्पादिरूपं विग्रहं विभागं च कालस्य कालनामकस्य भगवतः कल्पादिरूप देहमिति वा पर रूपं विस्तरेण व्याख्यायमानं शृण्वित्यर्थः । ॥ ४७ ॥

शौनक उवाच—

यदाह नो भवान् सूत क्षत्ता भागवतोत्तमः ।
चचार तीर्थानि भुवस्त्यक्त्वा बन्धून्सुदुस्त्यजान् ॥ ४८ ॥

प्रकाशिका— विदुरं प्रति मैत्रेयेणोपदिष्टमेवं परमपरं च तत्त्वं शुकेन राज्ञे तृतीयस्कन्धे कथ्यते इति वक्तुं विदुरमैत्रेयसंवादं प्रस्तावकं शौनकप्रश्नं तावद्दर्शयति ॥ यदाहेति । विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिमित्यादिना क्षत्ता बन्धूंस्त्यक्त्वा भुवः सम्बद्धानि तीर्थानि । अथवा । भुवः क्षेत्राणि चचार । तत्र तीर्थसञ्चरणसमये मैत्रेयादात्मज्ञानं चापेति यद्भवानाह तद्विस्तरतः श्रोतुं पृच्छामीति शेषः ॥ ४८ ॥

कुत्र कौषारवेस्तस्य संवादोऽध्यात्मसम्भवः ।
यद्वा स भगवांस्तस्मै पृष्टस्तत्वमुवाच ह ॥ ४९ ॥

ब्रूहि नस्तदिदं सौम्य विदुरस्य विचेष्टितम् ।
बन्धुत्यागनिमित्तं च यथैवागतवान् पुनः ॥ ५० ॥

प्रकाशिका— तमेव प्रश्नं दर्शयति ॥ कुत्रति । कौषारवेर्मैत्रेयस्य विदुरस्य । अध्यात्ममात्मानं परमात्मानमधिकृत्य वर्तमानस्य ज्ञानस्य संभव उत्पत्तिर्यस्मात्स तथोक्तः । पुनरागतवान् । तत्र च निमित्तं ब्रूहीत्यर्थः । पृष्टः । विदुरमैत्रेयसंवादविषयमिति शेषः ॥ ४९, ५० ॥

सूत उवाच—

राज्ञा परीक्षिता पृष्टो यदवादीन्महामुनिः ।
तद्वोऽभिधास्ये शृणुत राज्ञः प्रश्नानुसारतः ॥ ५१ ॥

प्रकाशिका— तद्विषये यदुत्तरमवादीत् । तदेवोत्तरं वोऽभिधास्ये । विदुरमैत्रेयसंवादं पुरस्कृत्य राज्ञः प्रश्नानुसारतो ये पूर्वं राज्ञा कृताः प्रश्नास्तेषामनुसारेण च यदुत्तरं महामुनिः शुकोऽवदत् । तदपि वो युष्माकमभिधास्य इत्यर्थः । इत्यशेषमङ्गलम् ॥ ५१ ॥. इति श्रीभागवतटिप्पण्यां दशमोऽध्यायः ॥ २-१० ॥

॥ द्वितीयस्कन्धतात्पर्यफक्किकार्थप्रकाशिनी ॥ कृतिर्यदुपतेर्भूयात्प्रीत्यै माधवमध्वयोः ॥
इति श्रीमद्वेदेशपूज्यपादशिष्येण यदुपतिना विरचितायां श्रीमद्भागतटिप्पण्यां
द्वितीयः स्कन्धः समाप्तः ॥ २ ॥

॥ श्रीकृष्णार्पणमस्तु ॥

श्री सत्याभिनवतीर्थविरचिता
दुर्घटभावदीपिका

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

नारायणं पूर्णगुणं वेदव्यासं जगद्गुरुम् ।
नमामि श्रीमदाचार्यं जयतीर्थमुनीन्विदौ ॥ १ ॥
यत्कृपालेशमात्रेण प्राप्ता वैकुण्ठनिर्वृतिः ।
सत्यनाथगुरून्वन्दे पितॄंस्तान्सर्वशो मम ॥ २ ॥
तेषामेव प्रसादेन तत्प्रसादैक लिप्सया ।
श्रीमद्भागवतस्याहं भावं वक्ष्यामि शक्तितः ॥ ३ ॥

परमकारुणिकः श्रीवेदव्यासः प्राणिनां निःश्रेयसाय श्रीनारायणध्यानरूपमङ्गलमनुष्ठेयमिति शिष्य शिक्षार्थं नारायणध्यानरूपमङ्गलमुपनिबध्नाति ॥ जन्मादीति । अत्र यत इत्यादि यच्छब्दश्रवणात् तमित्यध्याहारः । तं नारायणं धीमहि ध्यायेमः । देवतांतरपरित्यागेन नारायणस्यैव ध्यानं कुत इत्यत उक्तम् ॥ परमिति । परं गुणैः पूर्णम् । पॄ पालनपूरणयोरिति धातुव्याख्यानात् । भगवतः परत्वं कुत इत्यत आह ॥ जन्मादीति ॥ अस्य । श्रीब्रह्मरुद्रादेर्जगतः जन्मादि यतो भवति तमित्यन्वयः। एवमुत्तरत्रापि यच्छब्दस्य तच्छब्देनान्वयः । भगवतो जन्मादिकर्तृत्वं कुतः प्रमाणसिद्धमित्यत आह ॥ अन्वयादिति । अन्वीयते सम्यग्ज्ञायते अनेनेति अन्वयः । यता वा इमानि भूतानि जायन्ते इत्यादि श्रुत्यादिसमुदायः तस्मात् ॥ इतरतश्च । श्रीब्रह्मरुद्रादीदं जगत् चेतनजन्यं कार्यत्वात् । पुत्रादिवदिति युक्तितश्च । ननु परमेश्वरस्य सर्वपदार्थज्ञानं विना सर्वपदार्थसृष्टिः कथं युज्यत इत्यत आह ॥ अर्थेष्विति । यः अर्थेषु सर्वपदार्थेषु अभिज्ञः पलपरिमाणादि सर्वधर्मज्ञानवानित्यर्थः । ननु पराधीनत्वे भगवतः सर्वकर्तृत्वमनुपपन्नं स्यादित्यत उक्तम् ॥ स्वराडिति । स्वराट् स्वतन्त्रः । ननु परमेश्वरस्य सार्वज्ञ्यं स्वातन्त्र्यं च कुत इत्यत आह ॥ तेन इति । यः आदिकवये चतुर्मुखाय ब्रह्म वेदं ब्रह्म तत्प्रतिपाद्यं ब्रह्म च हृदा स्नेहेनैव न तु परप्रेरणया तेने उपदिष्टवानित्यर्थः । परप्रेरणां विना स्नेहेनैव आदिचतुर्मुखोपदेष्टृत्वात् सार्वज्ञ्यं स्वातन्त्र्यं च सिद्धमिति भावः । ननु भागवताध्ययनादिनैव भागवतार्थ श्रीनारायणज्ञानसम्भवात् भागवतार्थनारायणज्ञानार्थं श्रीनारायणध्यानरूपमङ्गलं न कार्यमित्यत आह ॥ मुह्यंतीति । यं नारायणं प्रति सूरयो ब्रह्मादयोऽपि मुह्यंति नारायणप्रसादं विना नारायणज्ञानं नाप्नुवंति किम्वन्य इति भावः । प्रयोजनं विना प्रवृत्तेरयोगात् । ईश्वरप्रवृत्तिरपि प्रयोजनसापेक्षेति भ्रमं वारयति ॥ यत्रेति । त्रिसर्गः जीवेश्वरजडानां सर्गः यत्रैव भगवद्विषय एव मृषा

वृथैवेत्यर्थः । ईश्वरस्य सृष्ट्यादौ प्रवृत्तिः परप्रयोजनार्थमेव न स्वप्रयोजनार्थमिति भावः । यत्र त्रिसर्गो मृषेत्येतत् अमृषेति पदच्छेदेन यत्र येन परमेश्वरेण कृतः त्रिसर्गः जीवेश्वरजडसर्गः अमृषा मिथ्या न भवतीति वा व्याख्येया । तेनेश्वरकृता सृष्टिर्मायामयीति भ्रमानवकाशः । जीवेश्वरजडानां सर्ग एकप्रकार एव भवतीति भ्रमं वारयति ॥ तेज इति । विनिमयशब्दः कार्यवाची । एकवचनं च जातौ । यथा तेजसो दीपरूपस्यैकतेजसः विनिमयः बहूनि दीपरूपाणि कार्याणि तथेश्वरसर्गः । यथा वारिणो विनिमयः वारिनिमित्तकप्रतिबिम्बरूपकार्याणि तथा जीवसर्गः । यथा मृदो विनिमयः मृदुपादानकघटादिकार्याणि तथा जडसर्ग इत्यर्थः । त्रिसर्गो मिथ्या न भवतीत्यत्र हेतुमाह ॥ धाम्नेति ॥ स्वेन धाम्ना । स्वकीयशक्त्या ॥ सदा निरस्तकुहकम् । नित्यनिरस्तेन्द्रजालमित्यर्थः । सत्यसृष्टावशक्ता हि मिथ्यासृष्टिं वितन्वते । परमसमर्थ इश्वरः मिथ्यासृष्टिं कुतः कुर्यादिति भावः । नारायणधाम्ना निरस्तकुहकत्वं तथा नारायणस्यापि स्वेन धाम्ना निरस्तकुहकत्वं कालविशेष इति भ्रमं वारयितुमुक्तम् ॥ सदेति ॥ नन्वीश्वरस्य प्रयोजनाभावे सृष्टौ प्रवृत्तिरेव न स्यात् । कारणाभावात् । इत्याशङ्क्य यत्रैवेत्यनेन परप्रयोजनरूपमेकं कारणमुक्तम् । कारणान्तरमाह ॥ सत्यमिति । सच्छब्दः दुःखसंभिन्नत्वरूपदोषाभाववाची । तकारो मुख्यामुख्ययोः सम्प्रत्यय इति न्यायेन निरतिशयानन्दवाची । य शब्दः यातेर्गत्यर्थत्वात् अनुभववाची । ततश्च निर्दुःखनिरतिशयानन्दानुभवरूपमित्यर्थः । ईश्वरस्य सृष्टौ प्रवृत्तिरानन्दोद्रेकाद् इति भावः ॥ १ ॥

भागवतस्यानारम्भणीयत्वशङ्कां परिहर्तुमधिकारिविषयप्रयोजनान्याह ॥ धर्मेति ॥ अत्रैवं योजना । महामुनिकृते । वेदव्यासकृते । अत्र । बुद्धिसंनिहिते । श्रीमद्भागवते । भगवद्विषयज्ञानजनकत्वेन भगवत्ज्ञानाख्यश्रीयुक्ते भागवते ॥ निर्मत्सराणाम् । उत्तमेषु मत्सररहितानाम् ॥ सताम् । तितिक्षाकारुणिकत्वसर्वदेहिसुहृत्वाजातशत्रुत्वशान्तत्वसाधुत्वभूषणत्वावच्छिन्नभावत्वरूपसत्त्वविशिष्टानाम् ॥ प्रोज्झितकैतवः ॥ परमः ईश्वरार्पणेन परमः धर्मः । वेद्यम् । वेद्यः अवान्तरप्रतिपाद्यः ॥ अत्र । श्रीमद्भागवते ॥ तापत्रयोन्मूलनम् । आध्यात्मिकाधिदैविकाधिभौतिकाख्यतापत्रयोन्मूलनम् । शिवदम् । सकलमङ्गलदम् । वास्तवम् । नित्यनिरस्तदोषपूर्णगुणम् । अत्र वा शब्दो वातेर्गत्यर्थस्य कर्मणि क्विपि रूपम् । अतो गतत्ववाची सङ्कोचे कारणाभावात् । नित्यापगतत्ववाची सन् नित्यनिरस्तत्वं बोधयति । असिति शब्दः असु क्षेपण इत्यस्य कर्मणि क्विपि रूपम् । अतो निरसनीयत्वेन दोषवाची । ततश्च वा शब्दस्यासु शब्देन बहुव्रीहौ वासु शब्देन नित्यनिरस्तदोषमित्यर्थो लभ्यते । त शब्द तनु विस्तार इत्यस्य भावे ड प्रत्यये रूपम् । अतो विस्तारवाची । योग्यतया गुणानां सम्बन्धे गुणविस्तारं बोधयति । व शब्दः अन्तर्णीतण्यर्थस्य वृतु वर्तन इत्यस्य कर्तरि ड प्रत्यये रूपम् । ततश्च तवमित्यस्य गुणविस्तारमात्मनि निवर्तयतीत्यर्थो बोध्यः । एवं सति वास् शब्दस्य तव शब्देन

कर्मधारये वास्तवमित्यनेन नित्यनिरस्तदोषपूर्णगुणमित्यर्थो लभ्यते ॥ वस्तु । अप्रतिहतं नित्यम् । अत्र विति शब्दो वातेर्गत्यर्थस्य कर्मणि ड्विव प्रत्यये रूपम् । अतो अपगतत्ववाची । अ शब्दः अज हरण इति धातोः भावे ड प्रत्यये रूपम् । अतः अ शब्देन हरणं प्रहरणं प्रतिहतिरित्यर्थो लभ्यते । एवं सति विति शब्दस्य अ शब्देन बहुव्रीहिसमासे व शब्देनाप्रतिहतमित्यर्थो लभ्यते । तु शब्दः सत्तार्थस्यास्ते कर्तरि तुन्प्रत्यये अकार लोपे रूपम् । सत्ता च सङ्कोचे कारणाभावात्सार्वकालिकी विवक्षिता । अतस्तु शब्देन नित्यमित्यर्थो लभ्यते । ब्रह्मेति शेषः ॥ परं ब्रह्मवेद्यम् । मुख्यवेद्यम् । ननु भगवद्भक्त्यर्थं यथा भगवन्माहात्म्यप्रतिपादनं निवृत्तधर्मप्रतिपादनं च पृथक् कर्तव्यं तथा प्रवृत्त-धर्मार्थकाममोक्षप्रतिपादनमपि पृथक् कर्तव्यम् । तत्कुतो न कृतमित्यत आह ॥ किं वाऽपरैरिति । यतः कारणात् ॥ शुश्रूषुभिः । हरिगुरुसेवापरायणैः ॥ कृतिभिः । निशितबुद्धिभिः ॥ अत्र । अस्मिन्भगवन्माहात्म्यनिवृत्तधर्मप्रतिपादके भागवतेऽभ्यस्यमाने सति ॥ ईश्वरः । नारायणः ॥ हृदि । सम्पूर्णाधिकारिणां हृदये ॥ सद्यः । तत्क्षणात् ॥ अवरुध्यते । भक्तिपाशेन बध्यते । असम्पूर्णा-धिकारिणां हृदये तु सद्यः अल्पकालव्यवधानेनावरुध्यते । अतः कारणात्परैः प्रवृत्तधर्मार्थकाममोक्षैः पृथक् प्रतिपादिते । किं वा । किं प्रयोजनम् । न किमपीति ॥ २ ॥

हे सौम्य सूत ॥ अन्ये । व्यासादन्ये ॥ परावरविदः । परावरतत्त्वज्ञानिनः मुनयः यानि विदुः तानि च । च शब्दोऽनुक्तसमुच्चयार्थः । मुनिज्ञातान्यज्ञातानि च सर्वाणि ॥ विदाम् । ज्ञानिनां श्रेष्ठो भगवान् बादरायणो वेद । यानि भगवत्ज्ञातानि तानि ऋषिभिर्न ज्ञायन्त इति यावत् ॥ तदनुग्रहात् । तस्य सर्वज्ञस्य वेदव्यासस्यानुग्रहात् । तत्त्वतस्तत्सर्वम् । ऋषिभिर्ज्ञातमज्ञातं चेत्येतत्सर्वम् । यथायोग्यं त्वं वेत्येति ॥ ७-८ ॥ इति श्रीभागवतटिप्पण्यां प्रथमाध्यायः ॥ १-१ ॥

द्वैपायनी । वेद व्यासः । विरहकातर इव । प्रव्रजन्तम् । सन्यासाश्रमं गृहीत्वा गच्छन्तम् । अनुपेतम् ॥ देहाद्यभिमानशून्यत्वरूपदेहादिराहित्यविशिष्टम् ॥ अपेतकृत्यम् । लोकव्यापाररहितम् । यं पुत्रेत्याजुहाव । तदा ॥ तन्मयतया । वेदव्यासात्मतयेव । तरवोऽपि ॥ नेदुः । प्रतिध्वनिं चक्रुरिति यावत् । अनेन वेदव्यास ध्वनेरत्युच्चत्वं ज्ञापितं भवति ॥ तं सर्वभूतहृदयम् । सर्वभूतानां हृदि अन्तःकरणे । अहंकारात्मकरुद्रावतारत्वात् । अभिमानित्वेन अयते तिष्ठतीति सर्वभूतहृदयम् ॥ मुनिम् । शुकमानतोऽस्मि ॥ २ ॥

॥ अखिलश्रुतिसारम् । अखिलश्रुतिमुख्यार्थभगवत्प्रतिपादकम् ॥ एकम् । पुराणेषु मुख्यम् ॥ अध्यात्मदीपम् । अध्यात्मप्रमेयप्रकाशकम् । ॥ पुराणगुह्यम् । पुराणेषु गोप्यम् । सर्वश्रवणायोग्यं भागवताख्यं पुराणम् ॥ अन्धम् । अन्धत्वापादकं तमोज्ञानम् । अतितीर्षताम् । अतिशयेन

तर्तुमिच्छताम् ॥ संसारिणाम् । जीवानाम् । करुणया आह । तं मुनीनां गुरुं व्याससूनुं शुकम् ॥ अखिलश्रुतिसारम् । सकलवेदमुख्यप्रतिपाद्यम् ॥ एकम् । समाभ्यधिकशून्यम् । तमोंऽधमतितीर्षताम् ॥ अध्यात्मदीपम् । सर्वाधिकस्वात्मप्रकाशकम् ॥ स्वानुभावम् । स्वरूपभूतमहासामर्थ्ययुक्तम् । नारायणाख्यं ब्रह्म ॥ चोपयामि । शरणं गच्छामीति । एतेन शुकाचार्यनमस्कारशरणगमनयोरिव नारायणशरणगमननमस्कारयोरपि कर्तव्यत्वात् । नारायणं नमस्कृत्येति नारायणनमस्कारमात्रकरण-मनुपपन्नमिति परास्तम् ॥ ३ ॥

सत्तामात्रमित्यस्य सद्भाववाचिनः शब्दाः सर्वे ते सुखवाचका इत्यादि वचनेन सत्तादिवाचिनां सर्वेषां शब्दानामानन्दवाचित्वाभिधानात् । सत्ता आनन्दः तन्मात्रमित्यर्थः । तात्पर्य पैङ्गिश्रुतेरर्थः ॥ अथ कस्मादुच्यते सत्तेति नन्दति नन्दयति चेतीति । सत्तामात्रमित्यनुवादः आनन्दमात्रमिति व्याख्यानम् । सत्ताशब्दस्यानन्दार्थत्वे प्रमाणमाह ॥ तथाचेति । अत्र सत्ताशब्दे तल् प्रत्ययः स्वार्थे । अतः सत्ताशब्दः सद्वाची । ब्रह्म सत्तेति सदिति कस्मादुच्यते । यस्माद् ब्रह्म नन्दति नन्दयति । अथ तस्मात्सदित्युच्यत इति । एतेन सत्ताशब्दस्यानन्दार्थकत्वमुक्त्वा सत्ता शब्दास्यानन्दविशिष्टार्थकत्वे प्रमाणोदाहरणमयुक्तमिति परास्तम् ॥ १२ ॥ इति श्रीभागवतटिप्पण्यां द्वितीयाध्यायः ॥ १-२ ॥

मायागुणैः । प्रकृतिविकारैः । महदादिभिः आत्मनि । आत्मना हरिणा विरचितम् ॥ एतत् । जडरूपं विश्वम् । ॥ अरूपस्य । प्रकृतिविकृतिरूपरहितस्य ॥ चिदात्मनः । केवलज्ञानस्वरूपस्य भगवत आरोपितं रूपम् । उत्पादितप्रतिमारूपमिति यावत् । इदं प्रमेयम् ॥ हि । प्रमाणप्रसिद्धम् । अत्र दृष्टान्तमाह ॥ यथेति । यथा ॥ नभसि । आकाशे । मेघौघाः ॥ आरोपिताः । आकाशाच्छा-दकत्वेन आकाशोपरिस्थिताः । यथा वा ॥ अनिले । वायौ । पार्थिवो रेणुः ॥ आरोपितः वाय्वा-च्छादकत्वेन वायोरुपरिस्थितः । एवं भगवतोंऽडं विश्वमाच्छादकत्वेन स्थितम् । ननु विश्वस्य प्रतिमारूपत्वे कैश्चिद्विश्वस्य साक्षाद्रूपत्वं कथं ज्ञायत इत्यत आह ॥ एवमिति । एवमबु-द्धिभिरित्यन्वयः ॥ एवमबुद्धिभिः । भगवत्साक्षाद्रूपं चिदानन्दात्मकमिति ज्ञानरहितैः । कैश्चित् ॥ द्रष्टरि । सर्वज्ञे भगवति । ॥ दृश्यत्वम् । जडरूपत्वम् ॥ आरोपितम् । कल्पितमिति ॥ ३०-३१ ॥ इति श्रीभागवतटिप्पण्यां तृतीयाध्यायः ॥ १-३ ॥

अत्र मन्यमानस्येत्यनेनोच्यमानं वृद्धिह्रासादिवर्जिततया सर्वदाभूतस्यैव ज्ञानस्य भवनसम्पादन-पटीयस्याचिंत्यया शक्त्या चोपपन्नं द्रष्टव्यम् ॥३१॥ इति श्रीभागवतटिप्पण्यां चतुर्थोध्यायः॥१-४॥

वायसं तीर्थमित्यस्य वयोमात्रानुजीविशास्त्रम् । वय इत्युपलक्षणम् । काकवयोदन्तादिमात्र-प्रतिपादकं शास्त्रमित्यर्थः ॥ १० ॥

मुनयो यद्यपि शुश्रूषमाणेषु च तुल्यदर्शनास्तथापि शुश्रूषमाणेऽल्पभाषिणि मयि कृपां चक्रुरिति ॥ २४ ॥

हे महामुने । अहं यथा मत्या ॥ एतत्सदसत् । कार्यकारणात्मकं जगत् । मयि स्थिते परब्रह्मणि ॥ स्वमायया । स्वस्मिस्थीयतामिति ब्रह्मण इच्छया ॥ कल्पितम् । स्थितमिति पश्ये सा मतिस्तदा ॥ तस्मिन् । परमहंसधर्मे । लब्धरुचेर्मम ॥ प्रियश्रवसि । नारायणे । अस्खलिता जातेति ॥ २७ ॥

एवं नृणां सर्वे ॥ क्रियायोगाः । क्रियालक्षणोपायाः संसृतिहेतवः । त एव क्रियायोगाः ॥ परे । ब्रह्मणि । भगवत्तोषार्थम् कल्पिताः । समर्पिताः । भगवत्तोषमुत्पाद्य भक्तिज्ञानद्वारा आत्मविनाशाय । मोक्षाय । कल्पन्ते । ननु कर्मणां भगवत्तोषणं विना भक्तिज्ञानद्वारा मोक्षसाधनत्वं किं न स्यादित्यत आह । यदत्रेति । यत् । यस्मात्कारणात् ॥ भक्तियोगसमन्वितं ज्ञानम् । परोक्षज्ञानमपरोक्षज्ञानं च तदधीनम् । भगवदधीनम् । इत्येतत् ॥ हि । प्रमाणप्रसिद्धम् । तत्तस्माद्भगवत्परितोषणं कर्म तदेव ॥ अत्र । कर्मभूमौ । साधुभिः क्रियते । अतः कर्मणि भगवत्परितोषणमुत्पाद्यैव मोक्षसाधनानीति ॥ ३४-३५ ॥

केशवो मे ज्ञानमैश्वर्यम् । ज्ञानाख्यं भाग्यम् । स्वस्मिन् भावम् । भक्तिम् । चादादिति ॥ ३९ ॥ इति श्रीभागवतटिप्पण्यां पञ्चमोध्यायः ॥ १-५ ॥

सा माता यद्यपि मम योगक्षेममिच्छति तथापि यतोऽस्वतन्त्राऽतः ॥ कल्पा । समर्था । नासीत् । साऽस्वतन्त्रेत्युक्त्या गृहस्वामिनां स्वातन्त्र्यं प्रतीयतेऽतआह ॥ ईशस्येति । तथा दारुमयी योषा पुरुषस्य वशे तिष्ठति तथा ॥ लोकः । आब्रह्मस्तंबपर्यन्तः सर्वात्मकः ॥ ईशस्य । नारायणस्य । वशे तिष्ठतीत्येतत् हि पमाणप्रसिद्धम् । अतो गृहस्वामिनां किञ्चित्स्वातन्त्र्यमिति ॥ ७ ॥

अहम् ॥ मनःकान्तम् । मनोहरम् । सुखावहं भगवतो यद्रूपमद्राक्षं तत्सहसाऽपश्यन् ॥ कैवल्यात् । प्राप्तान्मोक्षात् । उत्तस्था इव । उत्थित इव दुर्मनाः । दुःखितान्तःकरणः । अभूवमिति ॥ २२ ॥

यद्यप्यहम् ॥ गिराम् । भगवत्कर्तृकां गिराम् । अगोचरो । अविषयः । तथापि विजने एवं पतन्तं मां दययाऽऽहेत्यर्थः ॥ २४ ॥ इति श्रीभागवतटिप्पण्यां षष्ठोऽध्यायः ॥ १-६ ॥

द्रौणिः । अश्वत्थामा अस्य । समीपस्थस्य स्वात्मनः । स्वस्यानाद्यनन्तकाले स्वामिनः श्रीकृष्णस्यैव । विप्रियम् । अथवा स्वभर्तुः । दुर्योधनस्य । विप्रियम् । प्रयोजनाभावात् विप्रियमिव

प्रयोजनाभावसाम्यात् । उपचारेण विप्रियमेतत् । कृष्णासुतानां हननम् भर्तुः । दुर्योधनस्य । प्रियमिति पश्यन् स्वपतां कृष्णासुतानां शिरांस्यपाहरत्स्मेत्यर्थः ॥ १४ ॥

कैवल्य इत्यस्य सर्वोत्तम इत्यर्थः । सर्वोत्तमत्वस्य भगवत्स्वरूपत्वात्कैवल्ये आत्मनीति सामानाधिकरण्यमुपपन्नम् । अर्श आदिभ्योऽच्वा अस्मिन्पक्षे कैवल्य इत्यस्य सर्वोत्तमत्वविशिष्ट इत्यर्थः । एतेन भागवतः सर्वोत्तमत्वविशिष्टत्वात् । केवले आत्मनीति वक्तव्यमिति दूषणं परास्तम् ॥ २३ ॥

हे वीर अर्जुन । कुलपांसनो द्रौणिः भर्तुः दुर्योधनस्य च विप्रियम् । प्रयोजनाभावसाम्याद्विप्रियवत्स्थितम् । शिशूनां हननम् कृतवानित्यर्थः ॥ ३९ ॥ यतः शिशूनां हननम् ॥ भर्तुः। दुर्योधनस्यार्थे ॥ अर्थाय । प्रयोजनाय । भवति ॥ आत्मनः । स्वस्य । चार्थाय न भवति । अतो यः सुप्तान् शिशून्वृथाऽहनत्तस्य द्रौणेर्वधः श्रेयान्स्मृत इति चामर्षितो भीमः तत्र । तस्यामवस्थायाम् । आहेति ॥ ५१ ॥ इति श्रीभागवतटिप्पण्यां सप्तमोऽध्यायः ॥ १-७ ॥

अजातशत्रोरित्यस्य अजाताः शत्रवः शातयितारो यस्य स अजातशत्रुस्तस्येत्यर्थः । एतेन दुर्योधनादि शत्रूणां जातत्वात् । अजातशत्रुत्वं धर्मराजस्यानुपपन्नमिति परास्तम् ॥ ८ ॥

भक्तियोगविधानार्थमित्यस्य भक्तिः माहात्म्यज्ञानपूर्वकसुदृढस्नेहः योगो ध्यानयोगो विधानां विहितकर्म एतेषां विषयमित्यर्थः ॥ २३ ॥

अनादि निधनम् । आदि निधनं शल्यम् ॥ सर्वत्र समं चरतम् । तत्तद्योग्यतानुसारेण सर्वेषु समं यथा भवति तथा चरन्तम् ॥ ईनानम् । संहारकस्य रुद्रस्यापि चेष्टकं परं कालं त्वां मन्ये । ननु प्राणिनामिव परमेश्वरस्य वैषम्यं किं न स्यादित्यत आह ॥ भूतानामिति भूतानामित्यस्यावृत्तिः ॥ यत् । यस्मात्कारणात् ॥ भूतानाम् । प्राणिनाम् ॥ मिथः कलिः । परस्परवैषम्यनिमित्तकं कलहः ॥ भूतानां सकाशात् । भौतिकदेहसम्बन्धात् । भवति । अतः प्राणिनामेव वैषम्यं न त्वीश्वरस्य । भूतसम्बन्धाभावेन वैषम्यनिमित्तकलहाभावात् । अतः समं चरन्तमिति युक्तमिति ॥ ३१ ॥

हृषीकाणामीशितुरिव । इन्द्रियाणां नियामकस्य अन्तः स्थितरूपस्य । तव सांनिध्ये सति यथा सर्वे नामरूपयुक्ता भवन्ति तथा ॥ यर्हि । यदा । भवतो दर्शने तदा ते प्रसिद्धाः पाण्डवा वयं यदुभिः सह नामरूपाभ्यां युक्ता भवेम इति ॥ ४१ ॥ इति श्रीभागवतटिप्पण्यांऽष्टमोऽध्यायः ॥ १-८ ॥

सुराकृतमित्यस्य मद्यकृतपिष्टगुलिकादिकमित्यर्थः ॥ ७ ॥ अतोकवतीति पदभेदं विधवेति विशेषपूरणं च कृत्वा पुत्रशल्या भर्तृशून्या स्त्री यथा बहून्प्राप्नोति । यथा युष्मत्कृते बहून्क्लेशान्प्राप्तेत्यर्थो वक्तव्यः ॥ २० ॥

अत्रैवं योजना । भीष्मस्तदोत्तरायणप्राप्तिसमये गिरमुपसंहृत्य लसत्पीतपटे चतुर्भुजे परः स्थिते आदिपुरुषे नारायणावतारे कृष्णे ॥ अमीलितदृक् । प्रफुल्ललोचनः सन् । विमुक्तसङ्गं मनः ॥ व्यधारयत् । विशेषेण स्थापितवान् । ननु देवतान्तर परित्यागेन मरणकाले नारायणावतारे कृष्णे मनः कुतः स्थापितमित्यत आह ॥ सहस्रणीरिति । यतः अतः कृष्ण इति पदानामध्याहारः । सहस्रशब्दोऽनन्तवाची । ततश्च यतः कारणात् कृष्णः सहस्रणीः अनन्तान्योग्यान् जीवान् मुक्तिं प्रति नयति अत इत्यर्थः । मुक्तिदातृत्वेन कृष्णे मनः स्थापनं युक्तमिति भाव इति ॥ ३७ ॥ इति श्रीभागवतटिप्पण्यां नवमोऽध्यायः ॥ १-९ ॥

प्रणिध्युपात्तामित्यस्य आमात्या मन्त्रिणो दूता अङ्गरक्षकाः पुरोहिताः पुरस्था जनपदस्था इति सप्तप्रणिधिभिः ॥ उपात्ताम् उपादेयत्वेन स्वीकृतमित्यर्थः ॥ ४ ॥

कुरुपुरे ॥ तत्र तत्र । तत्तन्मार्गम् ॥ द्विजेरिताः । द्विजप्रोक्ताः ॥ सत्याः । यथार्थविषयाः ॥ आशिषः । दुष्टान् जहि जहि । साधून्पालय पालय । अस्मान् अनुग्रहाणेत्यादिरूपाशीर्वचः । अश्रूयन्त ता वाचः ॥ निर्गुणस्य । सत्त्वादिगुणकार्याण्डावस्थानरहितस्य । अण्डाद्बहिः स्थितस्येति यावत् ॥ नानुरूपाः । अननुकूला इव ॥ गुणात्मनः । गुणं सत्त्वादिगुणकार्याण्डम् ॥ आप्नोति । तत्रतिष्ठतीति यावत् । तस्य निर्गुणस्य च अनुरूपाश्च अनुकूला एव । एतेन सर्वा आशिषो भगवत्सर्वरूपाणामनुपूला एवात आशिषो निर्गुणस्य नानुरूपा इत्यत्युक्तमिति परास्तम् ॥ २० ॥

शास्तिकृत् । सकलशासनकर्तोम् । ॥ अनामरूपात्मनि । अप्रसिद्धगुणत्वादनाम्नि अप्राकृतरूपत्वादरूपे आत्मनि स्वस्मिन्नाधारे ॥ रूपनामनी । रूपनामात्मकं प्रपञ्चम् ॥ विधित्समानः । स्रष्टुमिच्छन् । स भगवानेव ॥ भूयः । पुनः । सृष्टिकाले ॥ निजवीर्यचोदिताम् । निजवीर्येण प्रेरिताम् ॥ सिसृक्षतीम् । सर्जनेच्छावतीम् ॥ स्वजीवमायाम् । स्वरूपभूतजीवसम्बन्धकेच्छारूपां जीवबन्धकमहालक्ष्मीरूपां जीवबन्धकजडरूपां च प्रकृतिम् । अनुससारेति । ईश्वरेच्छा जडप्रकृत्याः सिसृक्षा नाम सर्जनोन्मुखत्वमिति द्रष्टव्म् ॥ २३ ॥

सात्वत । इत्यस्य सात्त्विकानामनुग्राहक इत्यर्थः । सत्त्वगुणवाचकत्वात्सत्त्वशब्दात्तस्येदमित्यर्थेऽण् प्रत्यये निष्पन्नात्सात्विकवाचिसात्वशब्दात् अनुगृह्णातीत्यर्थे तद्धिता इति बहुवचने ज्ञापिते तत्प्रत्यये सात्वत इति रूप मित्यङ्गीकारात् ॥ २६ ॥

यत् । यस्मात् । यत्प्रजा या भूनिष्ठाः प्रजाश्च ॥ अनुग्रहेक्षितस्मितावलोकम् । अनुग्रह इति सप्तम्याऽलुक् । अनुग्रहार्थं क्षितम् उषितं स्थितमिति यावत् । क्षि निवास गत्योरिति धातुव्या-

ख्यानात् । स्मितं मन्दहासस्तेन युक्तोऽवलोको यस्य । तं स्वपतिं श्रीकृष्णं नित्यं पश्यन्ति । तस्मात् । स्वर्यशसस्तिरस्करी । कुशस्थली द्वारावती तस्या भुवो भूदेव्या भूलोकस्य प्रजानां च पुण्ययशस्करी पुण्यकीर्तुर्भयकरी । अहो बत । आश्चर्यमिति ॥ २८ ॥

कृष्णो यदा ॥ सायम् । सायंकालसमये । पश्चाद्दिशं भेजे । तदा ॥ गविष्ठः एकवचनं बहुवचनार्थे । द्युलोकस्थितसूर्यवाचकगविष्ठशब्देन तत्सम्बन्धिरश्मयो लक्ष्यन्ते । गविष्ठसूर्यसम्बन्धिरश्मयः ॥ गाम् । उदकं गतः सूर्यः । अस्तङ्गत इति यावदिति योजना ॥ ३७ ॥

चलाऽपि यं श्रीर्न जहाति कर्हिचिदित्यस्य यमित्यत्र लिङ्गव्यत्ययमङ्गीकृत्य चला चञ्चलाऽपि श्रीः यं यत् अन्घ्रियुगं कर्हिचित् कदाचिदपि न जहातीत्यर्थो वक्तव्यः ॥ ७० ॥

नन्वीश्वरस्य जीववत्सत्त्वादिगुणयोगाङ्गीकारे किं बाधकमित्यत आहेत्यवतार्य प्रकृतिस्थोऽपि भगवान्सदा आत्मस्थैः । स्वाधारैः तद्गुणैः । प्रकृतिगुणैः न युज्यते । न बध्यते । इति यत् तदेवेशस्य ॥ ईशानम् । ईशत्वम् । तथा चेश्वरः सत्त्वादिगुणैर्बध्यत इत्यङ्गीकारे मे माता वंध्येतिवद्व्याहतिरिति भावः । तत्र दृष्टान्तमाह ॥ यथेति ॥ तदाश्रया । भगवद्विषया बुद्धिः । तद्गुणैर्यथा न युज्यते तथेश्वरस्तद्गुणैर्न युज्यते । प्रकृतिरिति भावः । अत्र दृष्टान्तमाह ॥ यथेति ॥ तदाश्रया । भगवद्विषया बुद्धिः। तद्गुणैर्यथा न युज्यते तथेश्वरस्तद्गुणैर्न युज्यते । प्रकृतिस्थानां ज्ञानिनामपि न प्रकृतिगुणसङ्गः किमीश्वरस्येति यावदिति व्याख्येयम् ॥ ७५ ॥ इति श्री भागवतटिप्पण्यां दशमोऽध्यायः ॥१-१०॥

अत्रेयं योजना । हे द्विज शौनक यथा ॥ कामातुरस्य । कामबाणपीडितस्य ॥ इतरेऽर्थाः । स्त्रीव्यतिरिक्ता धनादिरूपार्थाः ॥ मुदम् । सन्तोषम् । नाधिहरन्ति । यथा वा । क्षुधितस्य । क्षुधापीडितस्य ॥ इतरेऽर्थाः । अन्नव्यतिरिक्ता वनितादि रूपार्थाः । मुदं नाधिहरन्ति । तथा । मुकुन्दमनसः । श्रीकृष्णमनसः । धर्मराजस्य ॥ इतरेऽर्थाः । कृष्णव्यतिरिक्ताः सम्पदादिरूपार्थाः । मुदं नाधिजहुः । ननु सम्पदादीनां सन्तोषहेतुत्वाभावे पुरुषार्थत्वं न स्यादित्यत आह किं त इति । मुकुन्दमनसो मुकुन्दमनसां ते सम्पदादयः अर्थाः पुरुषार्थाः । किम् । किमाक्षेपे । न भवंत्येव । किन्तु कामातुरस्य । कामतुराणां विषयासक्तानां कृष्णान्तःकरणरहितानामिति यावत् । ते सम्पदादयोऽर्थाः पुरुषार्था इति ॥ ६ ॥

तीर्थवित् । धर्मशास्त्रज्ञानवान् । ॥ सः । धर्मराजः ॥ प्रजातीर्थे । सत्प्रजातीर्थम् गङ्गातीर्थमिव सर्वकुलपवित्रीकरणात् । प्रजातीर्थं तस्मिन् । सप्तमीतादर्थ्ये । उत्पन्नस्य गङ्गातीर्थ समानस्य पौत्रस्याभ्युदयार्थमिति यावत् । विप्रेभ्यः स्वन्नं च प्रादादित्यर्थः ॥ १४ ॥ इति श्रीभागवतटिप्पण्यामेकादशोऽध्यायः ॥ १-११ ॥

प्रत्यजग्मुरित्यस्य धृतराष्ट्रादय आगतान् प्राणान्प्रति । मुख्यप्राणस्वरूपप्राणापानव्यानोदानसमानाख्यपञ्चप्राणान्प्रति । तन्निमित्तीकृत्येति यावत् । तन्व इव । शरीराणीव । प्रहर्षेणोत्थिताः सन्तः ॥ प्रत्यजग्मुः । आभिमुख्येन वेगेन जग्मुरित्यर्थः । एतेन तत्प्राणे प्रपन्न उदतिष्ठदित्यादि श्रुत्या मुख्यप्राणस्यैकस्यैव शरीरोत्थितिहेतुत्वस्य समर्थितत्वात्प्राणानिति बहुवचनमनुपपन्नमिति परास्तम् ॥ ५ ॥

॥ विना यदुकुलक्षयमित्यस्य । एष्यन्तमित्यध्याहृत्य एष्यन्तं यदुकुलक्षयं विनेत्यर्थो वक्तव्यः । आचार्यैस्तात्पर्यस्य वेदतुल्यत्वं सूचयितुं यदुकुलक्षयमेष्यदिति लिङ्गव्यत्ययेनोक्तम् ॥ १२ ॥

वाससी इवेत्यस्य । त्वत्स्वीकृत परिधानीयोत्तरीयवस्त्रे इवेत्यर्थो वक्तव्यः ॥ २५ ॥

स्वैरज्ञातगतिरित्येतत् स्वैः स्वकीयैः अज्ञातं स्थलं प्रति गतिर्यस्य स तथा । विविक्तगतिरिति यावत् इति व्याख्येयम् ॥ २८ ॥

पितृव्यौ क गतावित इत्यतद्वाक्यम् । न तु धृतराष्ट्रेण वने स्थीयत इति सिद्धत्वात् । गावल्गणे क नस्तात इति पितृव्यः क गतः सुहृदिति च पितृव्यः क गत इति तात्पर्यज्ञापनार्थं द्विवारं गमनप्रश्नः । गङ्गायां दुःखितोऽपतदिति गङ्गापतनप्रश्नश्चानुपपन्न इति सञ्जयस्य हार्दशङ्कां गर्भस्रावेणैव परिहर्तुं प्रष्टव्यान्तरं पृच्छतीत्यवतार्य ॥ पितृव्यौ । गान्धारीधृतराष्ट्रौ ॥ इतः । इह वने । प्रतिदिनं वन्दनकाले दृश्यमानौ अद्य क कुतः गतौ । अदर्शनामिति शेषः । अदर्शनं गतौ कुतो मया न दृश्यते इति यावत् । इति व्याख्येयम् । तदुक्तमाचार्यैः ॥ क गतावित्यदृष्टापेक्षयेति । तस्यार्थः क गताविति प्रश्नः। अदृष्टापेक्षया । अदर्शनापेक्षयाऽदर्शनविषयक इति । एतेन गमनप्रश्नमात्रस्यादर्शननिमित्तकत्वस्य सिद्धत्वात् । क गताविति गमनप्रश्नोऽदर्शनापेक्षयेत्यनुपपन्नमिति परास्तम् । एतेनैव क गतावित्यस्यापि गमनप्रश्नत्वात् । त्रिरुक्तिस्तात्पर्यार्थेति वक्तव्ये द्विरुक्तिस्तात्पर्यार्थेत्युक्तिरयुक्तेति च दूषणं परास्तम् ॥ ३४ ॥

तमेव भजेति शेषपूरणेन भगवान्नारायणः ॥ मायया । सामर्थ्येन ॥ अन्तः । बहुरूपैर्नियामकतयांतःस्थित्वा रमणं करोति ॥ अनन्तरः । बहुरूपैर्नियामकतया बहिः स्थित्वा रमणं करोति । इत्येतत् ज्ञानिनां भाति । अतो ज्ञानिप्रत्यक्षसिद्धम् । ॥ उरुताम् । उत्कृष्टताम् । पश्यन् तमेव भजेति व्याख्येयम् ॥ ४८ ॥

॥ स आस्ते विगतेक्षण इत्येतत् सह भ्रात्रा गांधार्या च स्वभार्ययेत्यस्यानुवृत्तिं त्वद्गमनकाल इति शेषं चाङ्गीकृत्य ॥ विगतेक्षणः । विगतविषयेक्षणः । धृतराष्ट्रः स्वभार्यया गांधार्या च शब्दात्कुंत्या च

भ्रात्रा विदुरेण च सहत्वद्गमनकाले त्वद्गमनकालपर्यन्तं वन अस्ति । आसीत् । त्वद्गमनानन्तरं विदुरस्य त्वयि प्रवेशो जात इति भाव इति व्याख्येयम् ॥ त्वद्गमनकाले भ्रात्रा विदुरेण सह आस्ते । न तु आस्ते इत्याद्यनुपपन्नम् । वर्तमानकालेऽभावादित्यत आह ॥ आस्तेति । त्वद्गमनकाले भ्रात्रा विदुरेण सह आस्ते । ननु आस्ते एतेन धृतराष्ट्रो गमनकाले भ्रात्रा सह गत इत्यस्यार्थस्य धृतराष्ट्रः सह भ्रात्रा गत इति भागवतेनैव स्पष्टं लाभात् । गमनकाले भात्रा सहेति तात्पर्यं व्यर्थमिति चोद्यं निरस्तम् ॥ ५३ ॥ इति श्रीभागवतटिप्पण्यां द्वादशोऽध्यायः ॥ १-१२ ॥

पितृमात्रोः पुत्रैः सह सुहृदादीनां परस्परं कलहमित्यर्थः । एतेन दम्पतीनामित्यनेनैव पितृमात्रोः परस्परं कलहस्य प्राप्तत्वात् पितृमात्रिति पुनरुक्तमिति दूषणं परास्तम् ॥ ४ ॥

हे तात चिरोपितः पूर्वे चिरोषित इति हेतोरतिपरिचर्यादिदानीम- लब्धमानोऽवज्ञातः किं वेत्यर्थः ॥ ३९ ॥

हे अर्जुन ॥ हि । यस्मात् । ते ॥ रुक् । कान्तिः ॥ अन्यथा । अथ तस्मात् हृदयेन । हृद्गतेन । मनोहरेणेति यावत् ॥ आत्मबन्धुना । विशेषतः स्वात्मबन्धुना । नित्यम् ॥ प्रेष्टतमेन । अत्यन्तप्रियतमेन कृष्णेन रहितोऽसीति हेतोरात्मानम् ॥ शून्यः । मृतः । असि । पुरुषव्यत्ययेनास्मीति मन्यसे ॥ कच्चित् । किमिति ॥ ४४ ॥ इति श्रीभागवतटिप्पण्यां त्रयोदशोऽध्यायः॥१-१३॥

यथा उक्थेन प्राणेन रहितः एषः देहः मृतकः हतप्रभः प्रोच्यते । उपलक्षणमेतत् । दृश्यते च । एतत् ॥ हि । प्रसिद्धम् । यथा ॥ यस्य कृष्णस्य । क्षणवियोगेन ॥ लोकोऽप्रियदर्शनः । मामप्रियं हतप्रभं पश्यतीत्यप्रियदर्शनः । उपलक्षणमेतत् । अप्रियवचनश्च इत्येतद्धि प्रसिद्धमिति । एतेन उक्थेन रहितो मृतक इत्येतत्पुनरुक्तम् । दृष्टान्ते मृतकः प्रोच्यते यथेत्युक्त्वा दार्ष्टान्तिके लोकाह्यप्रियदर्शन इत्यभिधानमसङ्गतमिति परास्तम् ॥ ६ ॥ इति श्रीभागवतटिप्पण्यां चतुर्दशोऽध्यायः ॥ १-१४ ॥

संच्छिन्नो द्वैतसंशयः । भगवतोऽन्यस्मात्प्रवृत्त्यादिकं भवतीति । एककोटिकानवधारणज्ञानं यस्य स तथोक्त इति । एतदेवाभिप्रायेणाचार्यैरुक्ततात्पर्यार्थः ॥ ज्ञानिनामपि । अपरोक्षज्ञानिनामपि । कदाचित्प्रारब्धकर्मणैव ॥ भगवन्तं विना । नारायणं विना ॥ अन्यत्र । अन्यस्मात् ॥ प्रवृत्यादिप्रकाशनम् । प्रवृत्यादि भवतीति ज्ञानम् । स्यात् । सैवद्वैतदृष्टिः । हे देव मे ताम् ॥ द्वैत दृष्टिम् । द्वैतविषयैकैककोटिकसंशयम् ॥ ज्ञानवरासिना । उद्भूतापरोक्षज्ञानवरासिना । छिंधीति ब्राह्मे । यदुक्तं तदेव संच्छिन्नद्वैतसंशयत्वभागवते विवक्षितमिति । एककोटिकसंशयोपपादनं त्वस्मत्स्वामिकृताभिनवामृतग्रन्थे द्रष्टव्यम् । एतच्छ्लोक एव लीनप्रकृतिनैर्गुण्यात् । अलिङ्गत्वादसम्भव इत्यत्र

अलिङ्गत्वादित्यस्य लिङ्गदेहवाचकलिङ्गशब्दस्य सूक्ष्मशरीरमात्रोपलक्षत्वमङ्गीकृत्य लिङ्गदेहव्रीह्यादि-प्रवेशानुकूलदेहरूपसूक्ष्मशरीरराहित्यादित्यर्थो वक्तव्यः। एतदेवाभिप्रेत्याचार्यैरलिङ्गत्वादित्यस्या सूक्ष्मशरीरत्वादित्यर्थ उक्तः । एतेन लिङ्गशब्दस्य लिङ्गदेहवाचकत्वात् अलिङ्गत्वादित्यस्या-लिङ्गशरीरत्वादित्यर्थो वक्तव्यः । असूक्ष्मशरीरत्वादित्यर्थकथनमनुपपन्नमिति दूषणं परास्तम् ॥ ३ ॥

॥ आत्मनोऽनवमगुणैरित्यस्य गुणैर्हरिभक्त्यादिगुणैर्निमित्तैरात्मनोऽनवमं समं पौत्रत्वे योग्य-मित्यर्थः ॥ तात्पर्यार्थः । अनवमित्यनेनोक्तम् ॥ अनवमत्वम् । समत्वम् । स्वपौत्रत्वे योग्यत्वमेव । न तु स्वसमानत्वम् । तस्य बाधितत्वात् । पौत्रे स्वसमत्वस्य बाधितत्वे समत्ववाचकशब्देन स्वपौत्र-त्वयोग्यत्वं ग्राह्यमित्यत्र प्रमाणमाह ॥ इन्द्रादीति । इन्द्राद्युत्तमता । आदि पदेन यमादेर्ग्रहणम् । मनुष्यकुलोत्पन्नेन्द्रयमाद्युत्तमता । स्वके कुलोत्पन्नानामन्येषां नीचानां यत्र निगद्यते तत्रेन्द्रय-माद्युत्तमताया बाधितत्वात् स्वके कुले इन्द्रयमादिकुले उत्पन्नानां सकाशादुत्तमत्वं निगद्यते । यत्रेन्द्र-यमादि समता वा नीचानां निगद्यते तत्रेन्द्रयमादिसमताया बाधितत्वात् । स्वके कुले उत्पन्नैः समता वा उत्पत्यादि योग्यता । आदि शब्देन पुत्रत्वपौत्रत्वादेर्ग्रहणम् । इन्द्रयमादिवत् । प्रजाकर्तृ-कोपास्तियोग्यतेन्द्रयमादि पुत्रत्वपौत्रत्वादियोग्यता वा निगद्यते । प्रकृते च समतावाचकस्या-नवमशब्दस्य पौत्रमिति पौत्रशब्दसमभिव्याहारात् । पौत्रत्वयोग्यत्वमेवार्थो विवक्षित इति ॥ ७ ॥ इति श्रीभागवतटिप्पण्यां पञ्चदशोऽध्यायः ॥ १-१५ ॥

तस्य ॥ नृपःरीक्षिद्राजः ॥ दिग्विजये । दिग्विजयवेलायाम् ॥ कस्य हेतोः । कस्यापराधाद्धेतोः ॥ निजग्राह । निग्रहं कृतवान् । ननु घ्नन्तं गोमिथुनमित्यनेन गोहननरूपापराधस्योक्तत्वात् । कस्य हेतोरिति प्रश्नोऽनुपपन्न इत्यत आह ॥ नृ देवेति । नृदेवचिह्नधृक् शूद्रः कर्मणा शूद्रः । कलिर्गां पदाऽहनत् । इति यः पादकरणगोहननरूपोऽपराधोऽसौ कः । कियान् अल्प एवेत्यर्थः । दिग्वि-जयवेलायामल्पापराधं निमित्तीकृत्य कलिनिग्रहणं महत्वापादकं न भवतीति भावः । एतदेवाभि-प्रेत्याचार्यैः कोऽसावित्याक्षेपः । कलिभिरित्युक्तत्वात् । तस्यार्थः । कोऽसावित्यनेन हननापराधाक्षेप एव क्रियते न तु हननापराधकर्तृप्रश्नः । गोहता कलिरिति निश्चितत्वात् । हन्ता कलिरिति निश्चयः कुत इत्यत आह ॥ कलिमितीति । पदा गोमिथुनं घ्नन्तं कलिमित्युक्तत्वादिति । एतेन यथा कलिमित्युक्तत्वात् गोहननकर्तृप्रश्नोऽनुपपन्नः। तथा कलिभित्युक्तत्वादेव गोहननकर्ताक्षेपोप्यनुपपन्नः। न च यत आक्षेपो नामात्र निन्दा असौ कलिः कः कुत्सित इति अतः कलिमित्युक्तत्वेऽपि कर्ताक्षेप उपपन्न इति वाच्यम् । कलेः कुत्सितत्वस्य सर्वसंमतत्वेन कुत्सितत्वोक्तेः प्रयोजनाभावात् इति परास्तम् । न हननक्रियाक्षेप इत्यङ्गीकारात् । अत एव कलिं प्रविष्टं निजचक्रवर्तित इत्यादिना कलेर्बन्धनहेतुभूतस्वराष्ट्रपवेशादिरूपमहापराधं वक्ष्यति ॥ ५ ॥

हे महाभाग तत्कलिबन्धनं यदि विष्णुकथाश्रयम् नारायणकथाश्रयम् । यर्हि कथ्यताम् । अथ अथवा ॥ तत्कलिबन्धनं वा । यदि ॥ अस्य विष्णोः पदाम्भोजमकरन्दलिहां सतां कथाश्रयं तर्हि कथ्यताम् ॥ ६ ॥

ननु वैष्णवकथाश्रयत्वाभावेऽपि कलिबन्धनं वक्तव्यं किं न स्यादित्यत आह ॥ किमन्यैरिति ॥ यत् यस्मात् असदालापैः आयुषः असद्व्ययः व्यर्थक्षयः तस्मादन्यैः विष्णुवैष्णवकथानाश्रयैः असदालापैः अमङ्गलालापैः किमित्यर्थः । कलिबन्धनस्य विष्णुवैष्णवकथाश्रयत्वाभावे तच्छ्रवणे-नायुषोऽसद्व्ययः स्यादिति भावः ॥ तात्पर्यार्थः । अथत्वेत्यत्राथेति शब्दः पक्षान्तरे वर्तते । वा शब्दो यद्यर्थे । कलिबन्धनव्यतिरिक्तालापानामप्रसक्तत्वात् । किमन्यैरसदालापैरित्यनुपपन्नमित्यतस्तात्पर्या-र्थमाह अन्यथा चेदिति । कलिबन्धनं विष्णुवैष्णवकथाश्रयं न चेत् । तच्छ्रवणेनायुषोऽसद्व्ययः स्यादिति तात्पर्यार्थ इत्यर्थः । एतेन व्याख्येयपदाभावादन्यथा चेदिति व्याख्यानमनुपपन्नमिति परास्तम् । वा शब्दस्य यद्यर्थत्वे प्रमाणमाह ॥ यद्यर्थ इतीति ॥ ७ ॥

येन भूमण्डले स्थितेन कृष्णो न लोकसुखावहैश्चतुर्भिः पादैर्वर्तते । यदा कृष्णो न भूमण्डले स्थीयते तदा नियमेन चतुर्भिः पादैर्वर्तस इति व्याख्येयम् । एतेन धर्मभूदेव्योः संवादकाले धर्मः पादैकेन चरित्रयुक्तत्वेन धर्मस्यैकपादत्वात् चतुर्भिः पादैर्वर्तस इत्युक्तिरनुपपन्नेति परास्तम् ॥ २६ ॥ इति श्रीभागवतटिप्पण्यां षोडशोऽध्यायः ॥ १-१६ ॥

परीक्षिद्राजः मृणालधवलं बिभ्यन्तमत एव मेहन्तं शकृन्मुच्यन्तमित्यर्थः । एतदेवाभिप्रेत्याचार्यैः । बिभ्यन्तमिव मेहन्तमित्युक्तम् । एतेन कलिपीडया भयस्यावर्जनीयत्वात् बिभ्यन्तमिवेति भीतसा-दृश्याभिधानमयुक्तमिति परास्तम् ॥ २ ॥

अथवा ॥ देवमायायाः नारायणेच्छाया गतिः स्थितिः चेतसो वचसश्चाप्यगोचरेति ॥ नूनम् । निश्चितमिति । पुरुषं तं न विजानीम इति त्वद्वाक्यस्याभिप्राय इति निश्चयः । ननु चेतसो वचसश्चागोचरा गतिरीश्वरस्य कथमङ्गीकर्तुं शक्यते । मानाधीनत्वान्मेय सिद्धेः । इत्यत उक्तम् ॥ भूतानामिति । ब्रह्मादिभूतानामेव मायाया गतिरगोचरा । न तु भगवतः । अतो भगवद्गोचरत्वात् । ब्रह्माद्यविदिता देवमायागतिरङ्गीकर्तुं शक्यत इति । यद्यपि ब्रह्मादि देवैर्देवमायागतिः किञ्चित्ज्ञायते तथाप्यल्पत्वादविवक्षया देवमायागतिर्ब्रह्मादिदेवानामगोचरेति वक्तुं शक्यते । तस्य नारायणस्य गोचरत्वेऽपि ॥ भूतानाम् । ब्रह्मादिभूतानाम् । देवमायागतिरगोचरेति ज्ञापयितुं वा पुरुषं तं न विजानीम इत्युक्तमिति । एतेन धर्मेण साकल्येन देवमायागतेरज्ञातत्वात् । तस्य गोचरत्वेऽ-प्यनुपपन्नमिति परास्तम् । तस्येत्यनेन धर्मस्य परामर्शः । देव शब्दोक्तनारायणस्यैव परामर्श इत्यङ्गीकारात् ॥ २२ ॥ इति श्रीभागवतटिप्पण्यां सप्तदशोऽध्यायः ॥ १-१७ ॥

पुनर्भवमित्यस्य अल्पप्रयत्नसाध्याल्पाधिकारिमोक्षमित्यर्थः । एतेन मोक्षापेक्षया भगवत्सङ्गिसङ्गस्याधिकत्वे मोक्षसम्पादनं व्यर्थमिति परास्तम् । अप्रयत्नात् । अल्पप्रयत्नात् । अल्पाधिकारिणां जायमाना या सम्यक् स्वरूपतो व्यक्तिर्जननस्याभावश्च । मुक्तिरिति यावत् । ततोऽल्पाधिकारिणां मुक्तेः सत्सङ्गतिर्वरेति । नन्वल्पाधिकारिणां मुक्तेः सत्संगतिर्वरेत्येतत्कुतः सत्सङ्गतेरल्पाधिकारिणां मुक्तिरेव वरो किं न स्यादित्यत उक्तम् ॥ वृद्धिहेतोरिति । अल्पाधिकारिमुक्तिसुखापेक्षया सत्सङ्गतिजन्यसुखं वृद्धिराधिक्यमस्तीति हेतोरित्यर्थः । नन्वल्पाधिकारिमुक्तेः सत्सङ्गतिर्वरेत्येतत्कुतो मुक्तिमात्रात्सङ्गतिर्वरा किं न स्यादित्यतो वेदमुदितम् ॥ वृद्धिहेतोरिति । सत्सङ्गतिजन्यसुखापेक्षयोत्तमाधिकारिणां मुक्तिसुखे वृद्धिराधिक्यमस्तीति हेतोतियर्थः । सङ्गो भागवतैर्भूयात् अपुनर्भवमात्रतः । यतो विशिष्टमानन्दं मुक्तौ जनयति स्फुटमिति । अस्यार्थः ॥ अपुनर्भवमात्रतः । अल्पमोक्षात् । अल्पाधिकारिणां मुक्तेरिति यावत् । भागवतैः सङ्गो भूयानिति । नन्वल्पाधिकारिणां मुक्तेः सत्सङ्गो भूयानिति कुतो मुक्तिमात्रात्सत्सङ्गो भूयान्किं न स्यादित्यत आह ॥ यत इति । यतः कारणाद्भागवतैः सङ्ग उत्तमाधिकारिणा मुक्तेः सत्सङ्गो भूयानिति कुतः पूर्वं सुखं जनयति । तदपेक्षया मुक्तौ विशिष्टमधिकमानन्दं जनयतीति स्फुटं निश्चितमित्यर्थः । नन्वल्पाधिकारिणां मुक्तेर्भागवतैः सङ्गो भूयानिति कुतः । भागवतैः सङ्गादल्पाधिकारिणां मुक्तेरेव भूयसी किं न स्यादित्यतो वाह ॥ यत इति यतः कारणाद्भागवतैः सङ्ग उत्तमाधिकारिणां संसारावस्थायां मुक्तौ च । सप्तमी पञ्चम्यर्थे । अल्पाधिकारिणां मुक्तेर्विशिष्टमधिकमानन्दं जनयतीति स्फुटमित्यर्थः ॥ १३ ॥

कौशिकीत्यस्य । कुशपाणिरित्यर्थः । वुश शब्दाद्युक्त इत्यर्थे ठक् प्रत्यये कौशिकः पाणिः सोऽस्यास्तीत्यर्थे इन्प्रत्यये कौशिकीरूपमित्यङ्गीकारात् । ता० । वुश एकः पाणिः यस्य स कुपाणिः कौशिकीत्यनेनोच्यत इति ॥ ३६ ॥

अत्र प्रभवोऽपिहीत्यतः परं मत्पुत्रस्तु परीक्षिद्राज्ञा कृताल्पतिरस्कारं निमित्तीकृत्य मरणापादकशापप्रदानरूपमहाप्रतीकारं कृतवानिति शेषः । प्रकारान्तरेण स्वपुत्रस्य पापित्वमुपपादयति ॥ तिरस्कृता इति । लोके ॥ तिरस्कृताः । अवमांनिताः ॥ विप्रलब्धाः । वंचिताः ॥ शप्ताः । क्षिप्ताः ॥ हताः । ताडिताः अपि तद्भक्ताः । तस्य नारायणस्य भक्ताः ॥ प्रभवोऽपि । प्रतीकारे समर्था अपि ॥ अस्य तिरस्कारादिकर्तुर्लोकस्य । तिरस्कारादिकं निमित्तीकृत्य ॥ न प्रतिकुर्वति । प्रतीकारं न कुर्वन्ति । इत्येतत् ॥ हि । प्रसिद्धम् । मत्पुत्रस्तु परीक्षिद्राजकृताल्पतिरस्कारं निमित्तीकृत्य मरणापादकशापप्रदानरूपमहाप्रतीकारं कृतवान् । तत्तेनापि मत्पुत्रेण मरणापादकं महापापं कृतं सम्पादितम् । तन्महापापम् ॥ सर्वात्मा । सर्वस्वामी । भगवान्नारायणः क्षन्तुमर्हतीति पूर्वेणान्वयः ।

एतेन तिरस्कृतेति श्लोकः पूर्वोत्तरश्लोकाभ्यामनन्वित इति दूषणं परास्तम् । मत्पुत्रस्तु परीक्षिद्राजकृताल्पतिरस्कारं निमित्तीकृत्य मरणापादकशापप्रदानरूपमहाप्रतीकारं कृतवानिति वाक्यमध्याहृत्य तस्य वाक्यस्य पापं कृतं तद्भगवानिति पूर्वेणान्वय इत्यंगीकारात् । इत्येवं पूर्वोक्तिप्रकारेण महामुनिः स आङ्गिरसः पुत्रकृतातधेनानुपराप्तः सन् राज्ञा स्वयं साक्षात् ॥ विप्रकृतोऽपि अवमानितोऽपि ॥ तत् । तस्य । राज्ञोऽघं नैवाचिन्तयत् । कुत इत्यत आह ॥ साधव इति ॥ लोके लोकानां मध्ये । ये साधवस्ते परैर्द्वन्द्वेषु ॥ द्वन्द्वैः । सुखदुःखादिद्वन्द्वैः । योजिता अपि प्रायशः परान्न व्यथयन्ति । अन्तर्णीतण्यर्थोऽयम् । न व्यथयन्ति न हृष्यन्ति । अयमप्यन्तर्णीतण्यर्थः । न हर्षयन्ति ॥ अयम् । आङ्गिरसः । अपि साधुः । अतो नैवाधमचिन्तयदिति पूर्वेणान्वयः । एतेन अयमाङ्गिरसो राज्ञाऽघं कृतेनैवाचिन्तयदित्याशङ्कायां साधवः परान्न व्यथयन्ति न हर्षयन्तीत्युत्तरं वक्तव्यम् । न व्यथन्ति न हृष्यन्तीति कथनमनुपपन्नमिति दूषणं परास्तम् । न व्यथन्ति न हृष्यन्तीत्यनयोरन्तर्णीतण्यर्थरूपार्थत्वाङ्गीकारात् । साधवः परान्न व्यथयन्ति न हर्षयन्तीत्यत्र किं निमित्तमित्यत आह ॥ यत इति । गुणाश्रय इत्यतः परं इति साधूनां निश्चय इति शेषः । आत्मागुणाश्रय इत्यत्र आत्मेत्यनन्तरम् अकारप्रश्लेषविशेषाभ्याम् अगुणाश्रयः गुणाश्रय इति पदच्छेदः कर्तव्यः । आत्मा स्वयम् अगुणाश्रयः दुःखापादकपापाश्रयः आत्मा स्वयं गुणाश्रयः सुखापादकगुण्याश्रयः । अस्मत्कृतपापपुण्ये एव दुःखसुखप्रदे । परे तु निमित्तमात्रमिति यावत् । इति निश्चयः साधूनां यतोऽतः परान्न व्यथयन्ति हर्षयन्तीति । एतेन आत्मागुणाश्रय इति निश्चयस्यैव परव्यथाधकरणहेतुत्वात् । यत आत्मागुणाश्रयः । अतो न व्यथयन्ति न हर्षयन्तीत्यनुपपन्नमिति परास्तम् । गुणाश्रय इत्यतः परम् इति साधूनां निश्चय इति शेषस्याङ्गीकृतत्वात् । एतदेवाभिप्रेत्याचार्यैः स्वकृतो गुणः स्वस्यैव यत इत्युक्तम् । स्वकृतो गुण इत्यत्र स्वकृत इत्यनन्तरम् अकारप्रश्लेषविशेषाभ्याम् अगुण इति गुण इति च पदच्छेदः । स्वस्यैवेत्यतः परं दुःखप्रदः सुखप्रद इति साधूनां निश्चय इति शेषः । स्वस्यैवेत्येवकारस्य स्वकृतो गुण इत्यनेन सम्बन्धः । ततश्चेयं योजना । स्वकृतोऽगुण एव पापमेव स्वस्य दुःखप्रदः स्वकृतो गुण एवमेव स्वस्य सुखप्रद इति साधूनां निश्चयो यत इति ॥ ४८, ४९, ५० ॥ इति श्रीभागवतटिप्पण्यामेष्टादशोऽध्यायः ॥ १-१८ ॥

अर्घ्यगृहीतपाणिरित्यस्य अर्घ्यार्थं गृहीतपाणिरिव विज्ञापनार्थं गृहीतपाणिरित्यर्थः । एतेन विज्ञापनार्थं गृहीतपाणिरिति वक्तव्येऽर्घ्यार्थं गृहीतपाणिरित्यनुपपन्नमिति दूषणं परास्तम् ॥ १२ ॥

गर्ह्यकर्म । निंद्यकर्म । राज्ञां कुलम् ॥ ब्राह्मणपादशौचम् । अत्र प्रथमा पञ्चम्यर्थे । ब्राह्मणपादशौचात् । ब्राह्मणपादशौचस्थात्मात् ॥ आरात् । दूरे ॥ विसृष्टम् । त्यक्तमित्यर्थः ॥ १३ ॥ इति श्रीभागवतटिप्पण्यामेकोनविंशोऽध्यायः ॥ १-१९ ॥

अपि अपि च भगवान्कृष्णो मे प्रीतो भगवद्दर्शनादिकमुत्पाद्य प्रीतिकार्यं प्रदर्शितवान् । ननु कृष्णस्य प्रीतिस्त्वय्यस्ति चेत्तर्ह्यस्मद्दर्शनादिकं कृष्णप्रीतिफलं स्यात् । कृष्णप्रीतिरेव कुत इत्यत आह ॥ पाण्डुसुतेति ॥ पाण्डुसुतप्रियः । पाण्डुसुतायुधिष्ठिरादयः प्रिया यस्य स पाण्डुसुतप्रियः । कृष्णः । तद्गोत्रस्य । पाण्डुसुतगोत्रस्य । मे पैतृष्वसेयप्रीत्यर्थम् । पितुर्वसुदेवस्य कुन्ती तस्याः पुत्राः पैतृष्वसेया युधिष्ठिरादयस्तेषां प्रीत्यर्थम् । आप्तबान्धवो जात इति मम प्रीत एव । अतो भवतां दर्शनं कृष्णप्रीतिफलमिति युक्तमेव । एतेन शुकाचार्यप्रशंसावेलायां पाण्डवनिमित्तककृष्णप्रीतिकथन-मसङ्गतमिति दूषणं परास्तम् । पाण्डवनिमित्तकृष्णप्रीतेः शुकाचार्य दर्शनं फलमिति कथनेन शुकाचार्यप्रशंसाया लाभात् ॥ ११ ॥ इति श्रीभागवतटिप्पण्यां विंशोऽध्यायः ॥ १-२० ॥ इति श्रीमद् श्रुतपदवाक्यप्रमाणव्याख्यातॄणामभिनवचन्द्रिकाऽभिनवताण्डवाभिनवगदाऽभिनवामृतादि-बहुग्रन्थकर्तॄणां जगत्पूज्यपादुकानां श्रीसत्यनाथतीर्थश्रीपादानां शिष्येण सत्याभिनवयतिना त्वया भागवतटिप्पणीं कारयिष्यामीति तदीयामोधसंकल्पमात्रमवलंब्य कृतायां श्रीमद्भागवतटिप्पण्यां दुर्घटभावदीपिकायां प्रथमः स्कन्धः समाप्तः ॥ १ ॥ ग्रन्थसङ्ख्या ५०० ॥ श्रीकृष्णार्पणमस्तु ॥

पाङ्गी श्रीनिवासाचार्यविरचितः
भागवते विरोधोद्धारः

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

मुख्यप्राणार्यशिष्येण नरहर्याख्यसूनुना ॥
विद्याधीशाभिधेनाद्यस्कन्धपद्याविरोधिता ।
साधिता श्रीनिवासार्यैर्लिख्यते हरिसिद्धये ॥ १ ॥
श्रीमन्मृगेन्द्रास्यमनन्तवासं वाङ्नारदंघ्रचंकजोत्थनाभिम् ।
सांबागणेशधृगंकसश्रीप्राणेन्दिरोरुं भगवन्तमीडे ॥ २ ॥
श्रीमन्नृसिंहचरणार्पितचित्तयोगाद्दूरिकृताखिलसुसंशयात्मभूत्थम् ।
नत्वा गुरुं च तदनुग्रहतोस्य तुष्टये संसाधयाम्यखिलभागवताविरोधम् ॥ ३ ॥
श्रीभागवतभूयिष्ठान्विरोधाद्रीन्प्रतीयतः ।
स्वदत्तबुद्धिवज्रेण छिनत्तुमाधवोहरिः ॥ ४ ॥

अथ श्रीवेदव्यासप्रणीतश्रीमद्भागवतशास्त्रे प्रतीतविरोधोद्दिधीर्षया श्रीगुरुहृद्गश्रीनृसिंहप्रेरितः श्रीनिवासस्तत्कृपाबलाद्यतते ।

तत्र प्रथमस्कन्धे प्रथमाध्याये प्रथमश्लोकः ॥ अत्र त्रिसर्गो मृषेत्यनेन विश्वमिथ्यात्वं प्रतीयते । विश्वं सत्यमित्यादि श्रुतिभिः विमतं सत्यं प्रमाणदृष्टत्वात् इत्याद्यनुमानैः प्रत्यक्षेण च जगत्सत्यत्वं दृश्यते अतो विरोधोऽत उच्यते ॥ जन्मादीति ॥ यतः । श्रीनारायणात् अस्य विश्वस्य जन्माद्यष्टकम्

उत्पत्तिस्थितिसंहारोनियतिर्ज्ञानमावृत्तिः ।
बन्धो मोक्षश्च पुरुषाद्यस्मात्सहरिरेकराडिति

स्कान्दोक्तेः ॥ अन्वयात् । यतो वा इमानि भूतानि जायन्त इत्यादि श्रुतिसमन्वयात् । इतरतश्च । अहं सर्वस्य प्रभव इति भगवदुक्तयात्मकागमानुगृहीतात् । विश्वं विष्णुकर्तृकं तदितराकार्यत्वे सति कार्यत्वात् इत्यनुमानाच्च भवन्तीति शेषः ॥ यद्वा ॥ अयः शुभावहो विधिरित्यभिधानात् अनुगतः अयः शुभावहविधिर्यस्य तस्मात् ॥ इतरतः । आत्मेतर सर्वभिन्नात् एते उभे अपि यच्छब्दविशेषणे ॥ अन्वयात् । अन्वयशब्दोल्लेख्यनुमानसकाशात् ॥ इतरतः ॥ विलक्षणात् । विष्णुर्जगत्कर्ता स्वतन्त्रचेतनत्वात् अस्मदादिवदिति केवलव्यतिरेक्यनुमानात् ॥ च शब्द एवार्थे । व्यतिरेकव्याप्त्यैवेति यावत् । उत वा । इव चित्रे स्मरे पुमानिति यादवकोशात् । इतरतः । इः आश्चर्यं तत् तरम्

अतिशयितं च तदत्याश्चर्यं तस्मात् । यतोऽस्य जन्मादि । अन्वयात् अनुगतमभूत् अनुज्ञानं यथा तथाऽभूदित्यर्थः ॥ अन्वयात् । क्रमादिति वाऽर्थः । तत्र हेत्वाकाङ्क्षायां सार्वज्ञ्यरूपहेतुगर्भविशेषणेन विशिनष्टि ॥ अर्थेष्विति । यः अर्थेषु सर्वपदार्थेषु विषये साकल्येन ज्ञानवान् । यद्वा अर्थाः पञ्चसङ्ख्याकाः । ज्योतिः शास्त्रेऽभिहितत्वात् इषवो बाणाः यस्येति स कामः तेन न भिद्यते न नश्यतीति अर्थेष्वभित् मुक्तगणः तं जानातीति स तथा । सृष्टिकाले मुक्तामुक्तमध्ये मुक्तान्ज्ञात्वा अमुक्तानेव देहबद्धान्करोतीत्यर्थः । सार्वज्ञ्ये हेतुः । स्वराडिति । स्वतन्त्र इत्यर्थः । धनपतिर्वा । सुतराम् अराट् नियन्तृरहितो वा । परः स्वाहरुद्दाम इति नामचतुष्टयम् । विष्णोर्गुह्यं तु यो वेद स न पापैः प्रलिप्यत इति भागवततात्पर्योक्तेः । स्वेति नाम्ना शोभमानो वा ॥ यद्वा ॥ सुतराम् अरं शीघ्रम् अटति गच्छतीति । अट् गतौ । अलोपो निरुक्तत्वात् । मनसो जवीय इति श्रुतेः । सुखराजो वा । स्वातन्त्र्यशोभितो वा । स्वभक्तशोभाकरो वा । इदं सर्वं चतुर्मुख एवोपपन्नम् तथा प्रसिद्धेरित्याशङ्क्य तस्यापि गुरुत्वेन विशिनष्टि ॥ तेन इति । यश्च । आदिकवये प्रथमज्ञानिने । यद्वा आदौ सर्गे ज्ञानवते ॥ अथवा अः परं ब्रह्म इति श्रुतेः । आदिः कारणं यस्येति आदिः । कविर्ज्ञानी च तस्मै । अथ वा । आदेः स्वकारणादेव कं सुखं वयति प्राप्नोतीति । वी गत्यादौ निरुक्तत्वात् ह्रस्वत्वम् । तस्मै ब्रह्मणे ॥ हृदा । स्नेहेन ॥ ब्रह्म । सर्ववेदजातम् ॥ तेने । विस्तारितवान् । वक्तव्यं ब्रह्म गुरुणा चतुर्वामथापि वेत्युपदेशानुसारेण चतुर्वाग्मुपदिदेशेत्यर्थः ॥ यद्वा ब्रह्मणश्चतुर्मुखत्वेन चतुर्वेदानां युगपद् ग्रहणसामर्थ्यमन्वीक्ष्य सहस्रमुखत्वेप्येकेनैव मुखेन युगपदुपदेश एव विस्तार इति मत्वा तथोपदिदेश । अनेनापि हरेर्ब्रह्मणोऽधिकशक्तिमत्त्वं सूचितम् । वेदाहमेतं पुरुषं महान्तमिति श्रुतौ ब्रह्मोक्त्या तद्विषयज्ञानस्य सिद्धत्वात् । उपदेशस्य नैरर्थक्यमित्याशङ्क्य हृदेत्यस्य तात्पर्यं द्योतयं- स्तत्प्रसादमन्तरेण तस्य दुर्ज्ञेयत्वमाह ॥ मुह्यन्तीति ॥ सूरयोऽपि । ज्ञानिनोऽपि ॥ यं प्रति । यमुद्दिश्येत्यर्थः ॥ मुह्यन्ति । न जानन्ति । यत्प्रसादं विनेति शेषः । यमेवैष वृणुते तेन लभ्य इति श्रुतेः । ननु यं सूरय इति पाठः प्रक्षिप्तः । यत्सूरय इत्युपलम्भात् । न च वैपरीत्येन वक्तुं शक्यम् । मुह्येतरकर्मकत्वेन द्वितीयाया अनन्वितत्वात् । यदित्यस्य तु अव्ययत्वेनाङ्गीकारेण सप्तम्यर्थ- त्वोपपत्तेरिति चेन्न । मुह्यतेरकर्मकत्वादेव द्वितीयाविभक्त्यर्थस्य प्रतीतिसूचितत्वेन तस्योद्दिश्येति ल्यबन्तार्थकत्वात् । प्रति शब्दस्योद्दिश्येत्यर्थकल्पनेऽश्रुतकल्पनप्रसङ्ग इति चेन्न । कृताञ्जलिपुटान्येव प्रधानं तं हरिं प्रतीत्यत्र तादृशार्थस्य श्रुतत्वात् । अनुव्याख्याने ।

ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं शङ्करं नीललोहितम् । इति तापनीयवाक्यस्य ।
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
विष्ण्वाख्यमुक्तमन्यत्र ह्यूर्ध्वरेतं च तत्प्रति ।
विरूपाक्षाख्यमपरं ब्रह्माख्यं तद्व्रते स्थितम् ।

ऋतं सत्यं परं ब्रह्मेत्याद्युद्दिश्य द्वितीया विभक्तिरूर्ध्वरेतादिः प्रथमा रुद्रगोचरेति व्याख्याने प्रतिशब्दस्योद्दिश्येति ल्यबन्तार्थकत्व प्रतीतेः। किंचात्र यच्छब्दचतुष्टये द्वयोरव्ययत्वेन लिङ्गाज्ञानेऽपि एकस्य पुल्लिङ्गत्वेनावशिष्टस्य विमतस्य पुल्लिङ्गत्वौचित्यात् नपुंसकत्वाङ्गीकारे कल्पनागौरवं च। तथा हि। विमतस्य यदिति कल्पनम्। तस्य चाव्ययत्वकल्पनम्। तस्य च सप्तम्यर्थकत्वकल्पनम्। तस्य च विषयार्थकत्वकल्पनमिति। नात्र तथा। विमतस्य यमिति कल्पनम्। तस्य च प्रत्यर्थकत्वकल्पनम्। तस्य चोद्दिश्येत्यर्थकल्पनमिति लाघवात्। अङ्गीकृत्य चेदमुक्तम्। वस्तुतस्तु। उक्तरीत्या प्रामाणिकत्वेन तदसम्भवात्। जीर्णपुस्तककोशेष्वीदृशपाठस्यैवोपलब्धेश्च। किञ्च यद्यस्मिन्ब्रह्मणि सूरयोपि मुह्यंतीत्यङ्गीकारेऽत्र ब्रह्मशब्देन किं वेदो गृह्यते। अथवा परं ब्रह्म। आद्येऽयं वेदोऽस्ति न वेति मोहो वा स्वरवर्णक्रमविषयो मोहो वा। उभयथापि सूरिमोहप्राप्तौ परिशुद्धवेदानुपलम्भप्रसङ्गात्। सूरिमोहकथनेन कैमुत्यादज्ञमोहोंऽगीक्रियते। अथवाऽज्ञमोहाभावः। नाद्यः। वेदस्य निरधिकारित्वप्रसङ्गात्। न द्वितीयः। इति वक्तुरुपहासास्पदत्वापातात्। न हि सुज्ञाऽज्ञातमज्ञो जानातीति युक्तम्। न द्वितीयः। तद् ब्रह्मादिकवये तेन इति विस्तारानुपपत्तेः। कर्तृकर्मणोरेकत्वापत्त्या आत्मानमिति वक्तव्ये ब्रह्मशब्दोक्तेरसङ्गतत्वात्। यो वै वेदांश्च प्राहिणोति तस्मा इति श्रुंतिविरोधाच्च। न चास्मत्पक्षे निरधिकारित्वप्रसङ्गः। जानन्तोऽपि न जानन्ति मेरो रूपं विपश्चित इति वत्साकल्येनाज्ञेयत्वेऽपि एकदेशेन ज्ञेयत्वाङ्गीकारात्। तस्माद्यमेत्येव पाठः साधुः। एवं हेतुपरम्परया भगवतो जगत्स्रष्टृत्वादौ सिद्धे सा सृष्टिः भगवता किं प्रयोजनमुद्दिश्य क्रियते। अथवाऽनुद्दिश्य। नाद्यः। सृष्टेः पूर्वं तत्फलस्योनतया पूर्णत्वानुपपत्तेः। न द्वितीयः। प्रेक्षावत्प्रवृत्त्यनुपपत्तेः। न हि प्रेक्षावन्निष्फले प्रवर्तते। इत्याशङ्क्य स्वभावादेव सृष्ट्यादौ प्रवृत्तिरित्याशयेन द्वितीयपक्षमङ्गीकरोति॥ तेज इति। तेजसो विनिमयः। दीपाद्दीपान्तरोत्पत्तिः। वारिणो विनिमयः। प्रतिबिम्बोत्पत्तिः। मृदो विनिमयः। कुलालकृतघटादिः। यथा तद्वत्॥ त्रिसर्गः ईशजीवजडसर्गः। ईशसर्गोऽवताररूपो दीपाद्दीपान्तरवत्। जीवसर्गः प्रतिबिम्बरूपो। वारिस्थप्रतिबिम्बवत्। जडसर्गः प्रकृतिमुपादानीकृत्य महत्तत्त्वादिरूपो मृद्मुपादानीकृत्य कुलालादिकृतघटादिवदित्यर्थः॥ यत्र भगवति मृषा निरर्थकः। मृषाऽश्रुरित्यत्र मृषाशब्दस्य नैरर्थ्यक्यार्थकत्वदर्शनात्। न च मृषाशब्दो मिथ्यार्थकः अनुपपत्तेः। तथा हि मिथ्यात्वं चाभासात्सम्भवति। शुक्तिरजतादौ तथा दृष्टत्वात्। आभासस्तु न केवलासद्रूपस्य। तथात्वे शशविषाणस्याप्याभासत्वप्रसङ्गात्। किन्तु कुत्रचित्सत्त्वेन वर्तमानस्यैव रजतस्य शुक्तावभासः। न हि शशशृङ्गस्यापि कस्यचित्पुंस आ भासः कदाऽपि केनचिद्दृष्टः। प्रकृते च जगन्मिथ्यात्वसिध्यर्थमाभासोंऽगीकार्यः स्यात्। तथा च तदर्थं यत्र कचिज्जगतः सत्यत्वमप्यवश्यमपेक्षितम्। तद्भवता कोपलब्धम्। यत्र कचिदुपलब्धं ब्रूषे तदा मिथ्यात्वासिद्धिः। यदि च नास्तीति ब्रूषे तदा आभासासम्भवेनापि मिथ्यात्वासिद्धिः। किञ्च

दृष्टान्तानुपपत्तिरपि । तेजोवारिमृदां विनिमय इत्यत्र तेजसि वारिबुद्धिरित्याद्येव विनिमयशब्दार्थोऽङ्गीकृतस्त्वया । तत्र वारिण तटाकादौ सत्यतया वर्तमानत्वेनाभाससम्भवान्मिथ्यात्वसिद्धावपि दार्ष्टान्तिके त्रिसर्गात्मकजगतः क्वापि सत्यताऽनुपलब्ध्या आभासासम्भवेन मिथ्यात्वानुपपत्त्या साम्याभावात् । तर्हि त्रिसर्गसत्यत्ववादिनां भवतामपि दृष्टान्तानुपपत्तिः स्यात् । दृष्टान्तस्य मिथ्यात्वोपपादकत्वेन दार्ष्टान्तिकस्य सत्यत्वाभ्युपगमेन साम्याभावादिति चेन्मैवम् । विनिमयशब्दस्याभासतार्थानङ्गीकारात् । किञ्च तथात्वे सत्यपदानुपपत्तिश्च । यो हि कर्मणा आकृत्या वाचा चानृतत्वशून्यः स एव लोके सत्य इत्यभिधीयते । यत्कृतो यदधिकरणकश्च त्रिसर्गो मिथ्या स्यात् तदा कथं तस्य सत्यत्वम् । न च यत्रेत्यनेनाधिकरणमेवोक्तं न तु कर्म । तत्कथमुच्यते तत्कृत इतीति वाच्यम् । जन्माद्यस्य यत इतीह वाक्यसद्भावात् । किञ्च यदधिकरणकः सर्गः केन कृतः । न स्वत इति शक्यते वक्तुम् । जडस्य स्वतः प्रवृत्तिशून्यत्वात् । न शक्त्या । पुरुषाननुगृहीतस्त्रीभ्य उत्पत्तेः क्वाप्यदर्शनात् । अस्तु तत्सहायोऽन्यः पुरुष इति चेन्न । पुरुषद्वयाङ्गीकारेणापसिद्धान्तात् । तस्मादयमेव कर्तेत्यवश्यमङ्गीकार्यम् । तथा च तत्कृतकर्मासत्यत्वे तस्याप्यसत्यत्वप्राप्तिः । ननु सत्यत्वं स्वरूपलक्षणं जगत्कारणत्वं तु तटस्थमिति नोक्त दोष इति चेन्न । नास्य लक्षणस्य तटस्थत्वम् ।

यत्तत्परंज्योतिरनन्यमव्ययं स्वसंस्थयानित्यनिरस्तकिल्बिषम् ।
ब्रह्माख्यमस्योद्भवनादिहेतुभिः स्वलक्षणैर्लक्षितभावनिर्वृतम्

इति वाक्ये स्वशब्देन स्वरूपलक्षणत्वोक्तेः । नेदमुपपन्नं स्वादिशब्दस्यैवात्राभावादिति चेन्न । मायावादिमतानुयायिव्याख्यानात्पूर्वभाव्यत्यन्तजीर्णपुस्तककोशदर्शननोद्धोपनिश्चयात् । यद्वा । जगत्कारणं माया तदाश्रयं ब्रह्मेति तटस्थलक्षणस्यार्थः स्यात् । ओमिति चेत् धाम्ना स्वत पदा निरस्तकुहकमिति विशेषणमयुक्तं स्यात् । मायेत्यस्य कुहकमित्यपरपर्यायत्वात् । न कुहकाख्या माया किन्तु ब्रह्मोपहितत्वेन जगत्स्रष्ट्री काचन प्रकृत्याख्या स्त्रीति मन्यसे चेत् । सा किं सदातनोत निर्मिता । सदातनत्वेऽद्वैतभङ्गः । न च मायादीनां षण्णामनादित्वाङ्गीकारेण नास्मन्मतभङ्ग इति वाच्यम् । ब्रह्मैवेदमग्र आसीत् । एको नारायण आसीदित्यादि श्रुतिविरोधात् । द्वितीये च स्वयमुत्पन्नाऽथवा स्वतो ब्रह्मणा निर्मिता वा ब्रह्मणापि मायया निर्मिता । नाद्यः । आकारणकार्योत्पत्तिप्रसङ्गात् । न द्वितीयः । स्वरूपलक्षणसिद्धिप्रसङ्गात् । तृतीयेऽपि किं तयैव मायान्तरेण वा । नाद्यः । आत्माश्रयप्रसङ्गात् । द्वितीयेऽनवस्थितेः । किञ्च जगत्कारणत्वस्य स्वरूपत्वे कर्तृत्वापत्त्या निर्धर्मकत्वानुपपत्तिप्रसङ्गभयेन तटस्थत्वमङ्गीक्रियते । तस्य च सत्यत्वे भयस्य तदवस्थत्वात् । तस्यासत्त्वमेवाभिप्रेतम् । तथात्वेऽन्वयादितरतश्चेति विरुद्धं स्यात् । न हि

श्रुतिस्मृत्यनुमानसिद्धस्यासत्त्वं प्रामाणिकैरङ्गीक्रियते । अस्य चायमर्थः । जगत्कारणत्वे श्रुतिस्मृतीनामन्वयात् उपक्रमादितात्पर्यलिङ्गात् । इतरतः । श्रुत्याद्यनुगृहीततर्काच्चेति । अन्वयव्यतिरेकार्थत्वेऽपि प्रमितस्यैव सिद्धिः । अन्यथाऽन्वयव्यतिरेकिणा धूमेनापि वह्नेरप्रमितत्वप्रसङ्गात् । तस्मात्तटस्थलक्षणानुपपत्तेः स्वरूपलक्षणस्यैव सत्त्वेन त्रिसर्गस्य मिथ्यात्वाङ्गीकारे सर्गरूपकर्मणोऽसत्यत्वापातेन सत्येति विशेषणस्यानुपपत्तिः सुस्थैव । किञ्च मृषाशब्दस्य मिथ्यात्वार्थाङ्गीकारेऽर्थेष्विति पदस्यानुपपत्तिः । मायावाद्यनुमते भट्टकृतेऽधिगतार्थगन्तृरूपे प्रमाणलक्षणेऽर्थशब्दस्य यथावस्थितार्थरूपार्थकत्वेनाङ्गीकारात् । अन्यथा शुक्तिरजतज्ञानेऽतिव्याप्तेः । तथाऽर्थप्रतिभासोऽप्यज्ञानामेव न ज्ञानिनामिति चेन्न । अभिज्ञ इति विशेषणानुपपत्तेः । किञ्च प्रतिभासो नाम भ्रान्तिः । अज्ञनिरूपितत्वात् । सा भ्रान्तिः किं ब्रह्मण उतान्यस्य । नाद्यः । यः सर्वज्ञः सर्वविदिति श्रुतिव्याकोपात् । न द्वितीयः । तदभावात् । न चोपाधिसद्भावादन्यः शक्यकल्पनः । गुणत्रयसर्गकाले महदादीनामप्यसृष्टत्वेनान्येषां सुतरामभावात् । स्रष्टैव तदाऽन्यस्तस्यैव भ्रान्तिः । निर्गुणादन्यत्वेन श्रुतिव्याकोपाभावाद्भ्रान्तत्वोपपत्तिरिति चेन्न । यतः स्वसृष्टस्य मायिकस्य स्वमायामोहितैरन्यैर्भ्रान्तिदृष्टत्वेऽपि मायाविना तथा न दृश्यते । तदुक्तम् ।

न च मायाविना माया दृश्यते विश्वमीश्वरः ।
सदा पश्यति तेनेदं न मायेत्यवधार्यताम् ।
अपरोक्षदृशो मिथ्यादर्शनं न क्वचिद्भवेत् ।
सर्वापरोक्षविद्विष्णुर्विश्वदृक् तं न तन्मृषेति ब्रह्माण्डे ।

ननूत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत इति स्मृतेः स्रष्टुरीश्वरस्याप्युत्तमत्वाभावेन सम्भवतु भ्रातिदृष्टृत्वमिति चेन्न । स्वराडित्यनुपपत्तेः । सुतरां राट् नियन्तृरहित इति तदर्थः । स्वप्रकाशार्थकत्वेऽपि स एव दोषः । अपि च भ्रान्तिद्रष्टृत्वाङ्गीकारे ब्रह्मगुरुत्वानुपपत्तिः । ब्रह्मणोऽपि भ्रान्तत्वेन तद्गुरुत्वोपपत्तेरिति चेन्न आदिकवय इत्यस्यानुपपत्तेः । भ्रान्तिद्रष्टृत्वे च मुह्यन्ति सूरय इत्यस्यानुपपत्तिः । न हि ज्ञानिनोऽवान्तरब्रह्मविषये मुह्यन्ति । तथात्वे सूरित्वानुपपत्तिः । सम्मोहविषयं तु मुख्यमेव ब्रह्म । तस्य भ्रान्तिरित्यङ्गीकारे श्रुतिव्याकोपोऽपसिद्धान्तश्च । तस्मान्न मृषाशब्दस्य मिथ्यार्थकत्वमिति सिद्धम् । त्रिसर्गस्य सत्यत्वे पुनर्हेत्वन्तरगर्भितविशेषणमाह ॥ धाम्नेति ॥ तम् ॥ स्वेन ॥ स्वरूपभूतेन ॥ धाम्ना ॥ ज्ञानमहिम्ना ॥ सदा । निरन्तरम् । निरस्तं कुहकम् । इन्द्रजालादि माया येन स तथोक्तस्तम् । लोके चासमर्थ इन्द्रजालादिकं सृजति । न तु समर्थः । विष्णुस्तु नित्यपरिपूर्णशक्तिः किमर्थं तत्कुर्यादिति भावः । तत्र हेतुमाह ॥ सत्यमिति । सत् दुःखाज्ञानगन्धरहितत्वेनोत्तमं तिरानन्दः यं ज्ञानं यस्य तम् ।

सच्छब्द उत्तमं ब्रूयादानन्दतीतिवै वदेत् ।
येति ज्ञानं समुद्दिष्टं पूर्णानन्दद्दशिस्तत

इत्युक्तेः । अत एव ॥ परं सर्वोत्तमम् । भगवन्तम् । धीमहि । ध्यायेम । नन्वत्र प्रतिपाद्यो भगवदभिन्न एव व्यासः । तत्कथं मङ्गलपद्ये तद्ध्यानं प्रतिजज्ञे । स्वस्मादुत्तमस्य हि ध्यानादिरूपमङ्गलं विघ्नविधातादि प्रयोजनं सर्वत्र दृष्टमित्यतो धीमहीति परस्मै पदं प्रायुंक्त । परशिक्षार्थमिदं ध्यानमिति भावः । अन्यथा धीमहे इत्यवक्ष्यत् । न च तादृशप्रयोगस्यासाधुत्वम् । विद्महे धीमहे तथेति तन्त्रसारगायत्रीमन्त्रोद्धारे प्रयोगाभिधानात् । छान्दसप्रयोगस्त्वस्य गायत्र्यर्थकत्वद्योतनायेति ध्येयम् । उक्तं च गारुडे ।

अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः ।
गायत्रीभाष्यरूपोऽसौ वेदार्थपरिबृंहितः ।
पुराणानां साररूपः साक्षाद्भगवतोदितः ।
द्वादशस्कन्धसंयुक्तः शतविच्छेदसंयुतः ।
ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिध

इति । शतविच्छेदसंयुत इत्यस्यार्थः । शतविच्छेदसंयुत इत्यत्र समाने लोप इसित्रेण शत विवि छेदेति स्थिते । शतानि च वि च वि च विवि । इदमव्ययम् । अत्र बहुवचनान्तः शब्दः शतत्रयार्थकः। अपर्यवसितबहुत्वस्य त्रित्वे पर्यवसानमिति न्यायात् । वेति वर्णस्यां तस्थवर्णेषु चतुर्थत्वेन चतुर्थाङ्को लक्ष्यते । स सङ्केतेनास्यास्तीति वि गणनमित्यर्थः । अन्य वि शब्दश्च तादृशः । एवं विवीत्यस्य चतुर्विंशत्सङ्ख्यार्थकत्वं सिध्यति । तस्मात् शत वि वि (३४४) । चतुश्चत्वारिंशदधिकशतत्रयाध्यायवानित्यर्थः । तथाहि । प्रथमस्य विंशतिः (२०) । द्वितीयस्य दश (१०) । तृतीयस्य चतुस्त्रिंशत् (३४) । चतुर्थस्यैकत्रिंशत् (३१) । पञ्चमस्य चतुर्विंशतिः (२४) । षष्ठस्यैकोनविंशतिः (१९) । सप्तमस्य षोडशः (१६) । अष्टमस्य द्वाविंशतिः (२२) । नवमस्यैकविंशतिः (२१) । दशमस्य त्र्यधिकैकशतम् (१०३) । एकादशस्यैकत्रिंशत् (३१) । द्वादशस्य त्रयोदश (१३) । एवं मिलित्वा सर्वेऽध्यायाश्चतुश्चत्वारिंशदुत्तरशतत्रयमिता भवन्तीति बोध्यम् । एतद्ग्रन्थप्रतिपाद्यस्यैव मङ्गले संक्षेपेण प्रतिपादितत्वात्तदर्थेन ब्रह्मसूत्रादीनां समानार्थकत्वे सिद्धे सर्वस्यापि ताद्विध्यं सिध्यतीति बोद्धव्यम् । तथाहि ॥

जन्माद्यस्य यतोऽन्वयात् । यतो भगवतः सकाशात् । आद्यस्य सनत्कुमाराद्यवताराणां मूलभूतस्य पुरुषरूपस्य जन्म प्रादुर्भावः । प्रादुर्भावो हरेर्जनिरित्युक्तेः । यद्वा आत् व्यासात् यस्य जन्म स

शुकः। यतः । यदर्थम् । यत्प्रीत्यर्थमिति यावत् ॥ अन्वयात् । अनुजगाम । परीक्षितं प्रतीति शेषः । इत्यर्थकेन जन्माद्यस्य यत इत्यनेन प्रथमस्कन्धसंक्षिप्तार्थवर्णनम् (१) ॥

जगृहे पौरुषं रूपं भगवान्महदादिभिः । सम्भूतं षोडशकलमादौ लोकसिसृक्षयेत्यादेः । अथवा । तत्राभवद्भगवान्व्यासपुत्र इत्यादेस्तत्र प्रतिपादनात् । प्रकरणात्परीक्षिदिति कर्ता । तसेः सार्वविभक्तिकत्वात् । यतः यं भगवन्तम् अन्वयात् स्थूलसूक्ष्मधारणानुसारेण जानाति स्म । गत्यर्थानां ज्ञानार्थत्वात् । इत्यर्थकेन यतोऽन्वयादित्यनेन द्वितीयस्कन्धार्थः (२) ॥

इतरतश्चार्थेष्वभिज्ञ स्वराट् । वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः । उपधार्य मतिं कृष्णे औत्तरेयः सतिं व्यधादित्युक्तेः । यत इत्यनुवर्तनीयम् । यतः यदाज्ञयेत्यर्थः । इते गमने रत उद्धवः । यद्वा । यतो यत्ज्ञानार्थम् । यस्येति वा । इते गमने । ज्ञाने वा । रतो विदुरः । अथवा इ विचित्रं स्मरे पुमानिति यादवकोशात् । इं विचित्ररूपां सृष्टिं तनोतीति इतो विष्णुस्तस्मिन् रतो ब्रह्मा यतः । अभूदिति शेषः । अथवा । यतो यः अतिविचित्रत्वादितरं वराहरूपं तनोतीति सः । उत वा । इतो यः इते सांख्यज्ञाने रतः कपिलोऽभूत् । इत्यर्थकेनेतरत इत्यनेन तृतीय स्कन्धार्थः (३) ।

यः अर्थेषु अर्थनीयेषु अत्रिदक्षध्रुवपृथुप्रचेतसां कामेषु अभिज्ञः ज्ञानी । इत्यर्थकेनार्थेष्वभिज्ञ इत्यनेन चतुर्थस्कन्धार्थः (४) ॥

स्वान् प्रियव्रतादिभक्तान् राजयतीत्यन्तर्णीतणिच् । यद्वा स्वेन ऋषभरूपेण । अथवा स्वेषु स्वकीयेषु चतुर्दशभुवनेषु नवखण्डेषु सप्तद्वीपेषु च राजते स तथा । इत्यर्थकेन स्वराडित्यनेन पञ्चमस्कन्धार्थः (५) ॥

तेने ब्रह्महृदाय आदिकवये मुह्यन्ति यं सूरयः । आदिकवये दासीसङ्गात्पूर्वज्ञानिनेऽजामिलाय । आदिकवये आशब्दवाच्यो ब्रह्मा आदिः कारणं यस्य स आदिः । आकारस्तु पितामह इत्युक्तेः । ब्रह्मपुत्र इत्यर्थः । स चासौ कश्च स आदिको दक्षप्रजापतिरित्यर्थः । स एव वयति जन्मान्तरं प्राप्नोति स आदि कविः । वी गत्यादौ औणादिकत्वाद्दीर्घाभावः । वय गतौ वा । स प्राचेतसो दक्ष इत्यर्थः। तस्मै । आदिकवये आदौ चित्रकेतुजन्मनि ज्ञानिने वृत्राय । आदिकवये । आदिः कारणभूतो मुख्यप्राणः कविर्ज्ञानी यस्य तस्मै मरुद्गणाय । यः ब्रह्म तपो ज्ञानं वा । ब्रह्म वेदस्तपस्वत्त्वमित्यमरः। हृदा तेने । अहमेवेदमासाग्र इत्याद्युक्तेः । इत्यर्थकेन तेने इत्यादिना षष्ठस्कन्धार्थः (६) ॥

यं नृसिंहावतारमुद्दिश्य ॥ सूरयः । रमाब्रह्मादयोऽपि । मुह्यन्तीव । यद्वा । यं भगवतं प्रापके इति शेषः। धर्मे इत्यर्थः । सूरयः कवयोऽपि मुह्यन्ति । इत्यर्थकेन मुह्यन्तीत्यादिना सप्तमस्कन्धार्थः(७)॥

तकारः कीर्तितश्चोरे मोहे युद्धे च कीर्तित इत्यभिधानात् । अलुक् समासे । ते नक्रगजेन्द्रयुद्धे । स्वायम्भुवमनुभक्षकचोररूपासुरगणे वा । जायतेऽसौ तेजः । वारिणां मध्ये क्षीराब्धिमध्ये । कूर्ममत्स्यरूपेण जायमानो मृद्भूपृथिवीविषये च वामनरूपेण च जायमानो विनिमयः नक्रराक्षसहननरूपा मन्दरोद्धारणरूपा नौकाकर्षणादिरूपा बलिछलनरूपा च क्रीडा यथा यथावस्कृतिप्रकारका । एवमर्थकेन तेज इत्यादिनाऽष्टमस्कन्धार्थः (८) ॥

यत्र त्रिसर्गो मृषा । यत्र यद्विषये त्रिसर्गः ब्रह्मसूर्यसोमवंशः मृषा निष्प्रयोजनः । इत्यर्थकेन यत्रेत्यादिना नवमस्कन्धार्थः (९) ॥

धाम्ना स्वेन सदा निरस्तकुहकम् । बहुशः स्वकीयसामर्थ्येन निरस्ताः कुहकाः पृथ्वीभारभूताः पूतनादयो येन तम् । इत्यर्थकेन सदेत्यादिना दशमस्कन्धार्थः (१०) ॥

सत्यम् । सत्तिं स्वरूपानन्दरूपमुक्तिं यापयति प्रापयतीत्यर्थकेन सत्यमित्यनेनैकादशस्कन्धार्थः (११) ॥

परं कल्यन्ते कल्किरूपेण धर्मपालनात् । दुर्मरणजन्याधोगतितः परीक्षित्पालनात् । सर्पसत्रात्तक्षकपालनात् । ब्राह्मणमन्त्रत इन्द्रपालनात् । मायादर्शनभीतितो मार्कण्डेयपालनात् । पॄ पालनपूरणयोरिति धातुनिष्पन्नपरशब्देन द्वादशस्कन्धार्थः सूचितः (१२) ॥

अथास्यैव पद्यस्य ब्रह्मसूत्रार्थपरता । किञ्च । ॐ इत्यस्य विवरणं सत्यमिति । प्रथमसूत्रस्य परं धीमहीति । ब्रह्म शब्दस्य परार्थकत्वात् । श्रवणं मननं ध्यानं जिज्ञासेत्यभिधीयत इत्युक्त्या धीमहीत्यस्य जिज्ञासार्थकत्वात् । द्वितीयसूत्रस्य जन्माद्यस्य यत इति तृतीयसूत्रस्यार्थेष्वभिज्ञ इति अर्शाद्यच्प्रत्ययेन अर्थवत्सु शास्त्रेषु अभितो मुख्यत्वेन ज्ञेयत्वात् । अत्र व्यभिचारपरिहारार्थं चतुर्थसूत्रस्य अन्वयादिति । तत्रैवासिद्धिपरिहाराय हेतुभूतपञ्चमाधिकरणस्य इतरत इतिं । ईक्षणीयत्वेन वाच्यत्वरूपद्वितीयहेतोरित्यर्थकत्वात् । सर्वकर्तागमोदितः । समन्वयादीक्षतेश्चेत्युक्तेः ।

एवमध्यायपादपीठ भूतसूत्रार्थं प्रदर्श्य समन्वयाध्यायार्थमाह ॥ स्वराडिति । तस्य स्वैः स्ववाचकैः अन्यत्र प्रसिद्धैरुभयत्र प्रसिद्धैरन्यत्रैव प्रसिद्धैर्नामलिङ्गात्मकैः शब्दैर्वाच्यत्वेन राजतेऽसावित्यर्थकत्वात् (१) ।

द्वितीयाध्यायार्थस्तेन इत्यादिना । यत्रेत्यनुकर्षणीयम् । यं परमुद्दिश्य यत्र ब्रह्मणि सूरयः पण्डिताभासाः युक्त्याभासैर्विरुद्धाभासैरन्यार्थश्रुतिभिः । युक्त्याभासोपेतान्यार्थश्रुतिभिश्च । विपरीत-

ज्ञानादिति शेषः । मुह्यन्ति मुख्यार्थं न जानन्ति । तद् ब्रह्म वेदम् । आदिकवये हृदाय तेन अस्य ब्रह्मेत्यनेनापौरुषेयत्वस्य । आदिकवये इत्यनेन श्रोत्रानुकूल्यस्य । हृदायेत्यनेन प्रसङ्गानुकूल्यस्य विप्रलम्भाभावस्य वा । यस्तेने इत्यनेन वक्त्राद्यानुकूल्यस्य सूचनेन महाप्रामाण्यसिद्ध्या निर्दोषत्वेन तदर्थभूतस्य विष्णोरपि निर्दोषत्वप्रदर्शनात् ॥ २ ॥

तृतीयाध्यायार्थस्तेजोवारित्यादिना तेजोवारिमृदां विनिमयः कार्यभूतः । तेजोबन्नात्मको नृदेहो यथा साधनभूतः । एवं त्रयाणां वैराग्यभक्त्युपासनानां सर्ग उत्पत्तिर्यस्पात्सत्रिसर्गो ज्ञानयोगः । यत्र भगवद्विषयेऽमृषा व्यर्थो न भवन्ति किन्तु साधनभूत इत्यर्थप्रदर्शनात् ॥ ३ ॥

चतुर्थाध्यायार्थः धाम्नेत्यादिना । स्वे मनुष्यरूपा भक्ताः इनाः स्वामित्वेन देवरूपभक्ताः । तेभ्यः साद्यते प्राप्यते दीयत इति यावत् । तेन सदा अन्तर्णीतण्यर्थात् । षद्लृ विशरणगत्यवसादनेष्विति धातोः । तादृशेन धाम्ना स्वधामदाननिमित्तेनेति यावत् । निरस्तं कुहकं कर्मबन्धपुनरावर्तनादिदोषजालं येन तमित्यर्थकेन फलप्रदर्शनादिति ॥ ४ ॥

अपि च भारतार्थनिरूपणमप्यनेनैव क्रियते । तदित्थम् । जन्माद्यस्य यतः आद्यश्च सर्वस्रष्टुर्ब्रह्मणश्च आशब्दवाच्यो ब्रह्मा आदिः आवेशनिमित्तेन कारणं यस्य स आदिः सोमः । आकारस्तु पितामह इत्युक्तेः । समाने दीर्घ इति च । आत्मेशब्रह्मसम्भवानित्यत्र तात्पर्योक्तेश्च । तस्यायमाद्यः सोमवंश इत्यर्थः । तस्य वा यतो भगवतः सकाशात् जन्म उत्पत्तिः । इत्यर्थकेन जन्माद्यस्य यत इत्यनेनादिपर्व विवृतम् ॥ १ ॥

यो भगवान् अन्वयात् । वनं गन्तुं पाण्डवाननुजज्ञे । अय गतौ । गत्यर्थानां ज्ञानार्थत्वात् । अनेन सभापर्व ॥ २ ॥

॥ इतरतः । या इतरतः इताः वनं गताः पाण्डवाः रताः यस्मिन्स तथा । अनेनारण्यपर्व ॥ ३ ॥

॥ अर्थेष्वभिज्ञः । अर्थं राज्यरूपपुरुषार्थम् इषन्ति इच्छन्ति तेऽर्थेषवः पाण्डवाः तान्गुप्तरूपानपि अभिजानातीति स तथा अनेन विराटपर्व ॥ ४ ॥

॥ स्वराट् । स्वान्भक्तान्पाण्डवान्युद्धसामग्रीसम्पादनेन राजयतीति स तथा । अत्रान्तर्णीतणिच् । अनेनोद्योगपर्व ॥ ५ ॥

तेने ब्रह्म हृदाय आदिकवये मुह्यन्ति यं सूरयः । यश्चादिकवये पूर्वरूपे ज्ञानिने भीष्माय द्रोणाय कर्णाय च ब्रह्मविद्यां परशुरामरूपेण तेने उपदिदेश । ते भीष्मादयः । ये च हृदाः हृञ् हरणे

दोऽवखण्डने उभाभ्यां डः प्राणहराः शरीरखण्डकाः शल्यद्रौणिकृपकृतवर्मादयः ते सर्वे सूरयोऽपि ज्ञानिनः सन्तोऽपि यं दृष्ट्वा मुह्यन्ति स्म । अनेन भीष्मद्रोणकर्णशल्यसौप्तिकपर्वाणि ॥ ६,७,८,९,२० ॥

॥ तेजोवारिमृदां यथा विनिमयः । तेजसां तन्मयत्वाच्चक्षुषां सम्बन्धिवारीणि अश्रूणि तेषां मृदो मह्याश्च विनिमयो मिश्रीभावः । हतस्त्रीणां धृतराष्ट्रस्य च भुव्यश्रपात इत्यर्थः । यद्वा । तेजसां तेजोमयलोकानां वारिणां तिलोदकानां मृदां क्रिमिविट् भस्मरूपाणां मृत्तिकानां विनिमयः यथायोग्यं विनियोगः यथायत्कृतिप्रकारकः । अनेन स्त्रीपर्व ॥ ११ ॥

यत्र यद्विषये त्रिसर्गः त्रयाणां मोक्षापद्राजधर्माणां सर्गो वाग्विसर्गः । अमृषा सफलः यत्प्रापक इत्यर्थः । अनेन शान्तिपर्व ॥ १२ ॥

धाम्ना स्वेन । यश्च स्वेन स्वकीयेन धाम्ना राज्यस्थयुधिष्ठिरहृदयरूपेण स्थानेन उपलक्षितः । अनेनानुशासनपर्व ॥ १३ ॥

॥ निरस्तकुहकम् । निरस्ताः अश्वमेधनिमित्तेन पराजिताः कुहकाः कपटिनो राजानो येन तम् । यद्वा । निरस्तं कुहकं युद्धे वधनिमितं पापं येन तम् । अनेनाश्वमेधिकपर्व ॥ १४ ॥

॥ सत्यम् । सत् निर्दोषं स्थानं यथायोग्यं यापयति प्रापयति धृतराष्ट्रं यादवान्स्वात्मानं चेति यथाविधम् । अनेन व्यासाश्रममौसलपर्वणी ॥ १५,१६ ॥

परम् । परं पृथ्वीविलक्षणं स्थानम् । गमकमिति शेषः । अनेन महाप्रास्थानिकस्वर्गारोहण-पर्वणीति ॥ १७, १८ ॥

उत च । गायत्र्या अपि भाष्यरूपत्वमस्येति । तच्चेत्थम् ॥ परम् । व्याप्त्यर्थकस्य तदित्यस्य व्याख्यानं परमिति । पूर्णार्थकत्वेन पर्यायरूपत्वात् ॥ १ ॥

॥ जन्माद्यस्य यतोऽन्वयादितरतश्च । सवितुरित्यस्य ॥ २ ॥

॥ धाम्ना स्वेन सदा निरस्तकुहकं सत्यम् । सेव्यत्वार्थकवरेण्यशब्दस्य हेतुभूतनिर्दोषत्व-गुणपूर्णत्वरूपगुणप्रतिपादकम् । धाम्ना स्वेन सदा निरस्तकुहकं सत्यं चेति ॥ ३ ॥

भृञ् भरणे गम्लृ गतावित्येताभ्यां पोषणज्ञानार्थकभर्गशब्दस्य आद्य स्वरादिति । स्वानां भक्तानां रञ्जकत्वेन पोषक इत्यर्थकत्वात् । द्वितीये अर्थेष्वभिज्ञ इति । व्याख्ये गत्यर्थानां ज्ञानार्थकत्वात् ॥ ४ ॥ तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोमृषा । दिवु क्रीडा विजिगीषा व्यावहारस्तुति मोद

मद स्वप्नकान्ति गतिष्विति धातोः क्रीडार्थकस्य देवशब्दस्य तेजोवारीत्यादि । एतत्त्रिसर्गकरणं क्रीडयैव न प्रयोजनार्थमित्यर्थकत्वात् ॥ ५ ॥

मुह्यन्ति यं सूरयः । अन्तर्णीतणिचा स्वप्नार्थकस्य तस्यैव व्याख्यानं मुह्यन्तीति । स्वविषये स्वापरपर्यायमोहप्रापकः स एवेति तात्पर्यार्थकत्वात् ॥ ६ ॥

तेने ब्रह्म हृदाय आदिकवये । न इत्यस्य बहुवचनेन ब्रह्मादिसर्वचेतनार्थकत्वात् । धीशब्दस्य लक्षणया ज्ञानसाधनार्थकत्वात् । तद्बहुवचनस्य वेदादिप्रमाणात्रयार्थकत्वात् । प्रचोदयादित्यस्य प्रेरणरूपोपदेशार्थकत्वात् तृतीय पादार्थस्तेन इत्यादि । मुख्यग्रहणेनामुख्यग्रहणसिद्धेः । ब्रह्मवेद-योर्ग्रहणेनार्थसाम्यादिति ॥ ७, ८, ९, १० ॥

किञ्चास्य वेद समाख्यरूपत्वं च । तच्चेत्थम् । जन्माद्यस्येत्यादि । यतो वा इमानि भूतानि जायन्ते इत्यादि श्रुतिसमाख्यारूपम् । अर्थेष्वभिज्ञ इति यः सर्वज्ञः सर्वविदिति श्रुतेः । स्वराडिति एष सर्वेश्वर एष भूताधिपतिरित्यादि श्रुतेः । तेन इत्यादि यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहेति । अथैनमाहुः सत्यकर्मेति । विश्वं सत्यमित्यादि श्रुतीनाम् । धाम्नेत्यादि । य आत्माऽपहतपाप्मेत्यादि श्रुतेः । सर्वोत्कृष्टज्ञानानन्दार्थकं सत्यमित्येतत् विज्ञान-मानन्दं ब्रह्मेति श्रुतेः ॥ परमिति स परोवरीयानिति श्रुतेः । धीमहीति नारायणोऽसौ परमो विचिन्त्यो मुमुक्षुभिः कर्मपाशादमुष्मादिति श्रुतेः । यद्वा श्रीमद्व्यासो भारतं कृत्वा तेन चित्तप्रसत्तिमलभमानो भागवतं कृतवानिति प्रसिद्धम् । तथा च भागवते श्रीमद्व्यासेन परीक्षितोऽथ राजर्षेर्जन्मकर्माविलापनम् । संस्थां च पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयमिति प्रतिज्ञातत्वादुभयोः प्रमेयान्तराभावेनाविशेषाभावेऽपि कृष्णकथोदयमित्यनेन सद्भावे सिद्धे ग्रन्थाधिकृतत्वं कृष्णस्य सेत्स्यति । भारतेऽपि तदङ्गभूते हरिवंशे कृष्णकथावर्णनेनान्ततस्तदधिकृतत्वसिद्ध्या तद्देवताक-मङ्गलाभावेनात्रायुक्तमिति न शङ्क्यम् । विशिष्टेष्टदेवताकस्यापि विधेयत्वेन स्वरूपत एकत्वेन नाम-मात्रतो भेदेऽपि नारायणनाम्न्यत्र संज्ञाभावेन णकारस्यान्यत्राभावतोऽसाधारण्येन वैशिष्ट्यात्तन्नाम-देवताकं मङ्गलं भारते प्रयुयोज । नारायणं सुरगुरुं जगदेकनाथं भक्तप्रियं सकललोकनमस्कृतं च । त्रैगुण्यवर्जितमजं विभुमाद्यमीशं वन्दे भवघ्नममरासुरसिद्धवन्द्यमिति । अत्र नारायणनाम्न एवार्थरूपाणीमानि । तथाहि । नरः पुरुषरूपो विष्णुः तत्पुत्रो नारो ब्रह्म तस्यायनमाश्रयो नारायणः अत एव सुरगुरुमित्युक्तम् । सुरज्येष्ठत्वात्सुरतिमत्वाद्वा सुरो ब्रह्मा तत्पितरमित्यर्थः । भागवतेऽपि तस्यैवोपपादनं जन्माद्यस्य यतोऽन्वयादितरतश्चेति । यतो नारायणादाद्यस्य ब्रह्मणो जन्म । तदप्यन्वयात्साधारण्यात्प्रकृतिद्वारेत्यर्तः इतरतोऽसाधारण्यान्नाभिपद्मादित्यर्थः । स्वपुत्राश्रय इति

भावः । तथा नरोत्पन्नत्वान्नारं जगत्तदाप्नोतीति नाराः । आप्तेरादिमत्वाद्वेति श्रुतेः । येति ज्ञानं समुद्दिष्टमित्युक्तेर्यं ज्ञानं तद्युक्तो णो निर्वृत्तिश्च स यणः । स चासौ स चेति । णश्च निर्वृत्तिवाचक इत्युक्तेः । अत एव जगदेकनाथमित्युक्तम् । स जगदेको नानाविधजगति व्याप्तोऽपि न स्वगतभेदयुक्त इत्यर्थः । नाथः । आ सर्वथा तिष्ठतीति अत्थं स्थावरं तत्र भवतीति नाथः । ज्ञानसुखीत्यर्थः । स च सचेति । तस्यैवोपपादनमर्थेष्वभिज्ञ इति अर्थेषु सर्व पदार्थेषु स्थित्वाप्यभित् स्वगतभेदशून्य इत्यर्थः ज्ञो ज्ञानरूपश्च । स च स चेति । विष्णो । अकारो वासुदेवः स्यादित्युक्तेः । अ इति ब्रह्मेति श्रुतेश्च । न रमन्ति ते अरास्तथा न भवन्ति ते नाराः भगवद्भक्ताः तेभ्यः अयः शुभावहविधिः णः सुखं यस्मात्स नारायणः । अयः शुभावहो विधिरित्युक्तेः । अत एवोक्तं भक्तप्रियमिति । तस्यैवोपपादनं स्वराडिति । स्वान्भक्तान् रञ्जयति स तथेत्यर्थः । अत्रान्तर्णीतणिच् । नाराय ब्रह्मणे अयति ज्ञापयति स्वात्मानमिति नारायणः अय गतौ । गत्यर्थानां च ज्ञानार्थत्वात् । अत एवोक्तं सकललोकनमस्कृतमिति । कं सुखं लम् ऐश्वर्यं ताभ्यां सहितत्वात्सर्वकौशलयुक्तत्वाद्वा सकलो ऽिग्नस्तस्य लोकः प्रकाशो ज्ञानमिति यावत् । लुक् प्रकाश इति धातोः । तद्विषये नमस्कृतं वन्दितम् । तस्योपपादनं तेने ब्रह्महृदाय आदिकवय इति । ब्रह्म परिपूर्णं स्वात्मानमित्यर्थः । हृदा नमो निमित्तेन । तन्त्रसारे हृदय शब्दस्य नमो वाचकत्वात् । अराः प्रपञ्चवृक्षस्य मूलभूतास्त्रिगुणाः सम्बन्ध्ययनं ज्ञानमरायनम् । नास्त्यस्येति नारायणः । अत एव त्रैगुण्यवर्जितमित्युक्तम् । असार्वत्रिकं यथार्थज्ञानं सात्त्विकम् । संशयितज्ञानं राजसम् । विपरीतज्ञानं तामसम् । एवं गुणत्रयसम्बन्धिज्ञानं त्रैगुण्यं तेन वर्जितम् । तस्यैवोपपादनं मुह्यन्ति यं सूरय इति सूरयः त्रैगुण्यज्ञानवन्तः यः याति प्राप्नोति स्वानन्दमनेनेति । यं ज्ञानानन्दरूपं नारायणम् । ज्ञातुमिति शेषः । मुह्यन्ति विपरीतज्ञानिनो भवन्तीत्यर्थः । सत्त्वादिगुणशून्यत्वेऽपि ज्ञानानन्दादिगुणराहित्येन जानन्तीति भावः । न रतिः सुखमनेनेति अरं जन्म तदयति प्राप्नोतीति अरायनः । स न भवतीति नारायणः । अत एवोक्तमजमिति । जन्मरहितमित्यर्थः । तस्यैवोपपादनं तेजोवारिमृदां विनिमयो यत्रेति । नारायणे तेजोवारिमृदां तेजोबन्नानामविनिमयः कार्यरूपजडशरीराभावः । यथा प्रामाण्योपेत इत्यर्थः । न रमते निर्दुःखं सुखं प्राप्नोतित्यनेनेत्यरं लिङ्गशरीरं तदयनमाश्रयो यस्य सोऽरायनः स न भवतीति नारायणः । अत एवोक्तं विभुमिति । भवत्यस्मात्स्थूलदेह इति भूः लिङ्गशरीरं विगतं भू यस्मात्तं तस्योपपादनम् । यत्रेत्यस्यावृत्त्या यत्र त्रिसर्गो मृषेति । यत्र नारायणे त्रिसर्गः त्रिगुणात्मकानां जीवानां सर्गः देहसंसर्गो यस्मात्स त्रिसर्गो लिङ्गदेहो मृषा अत्यन्तासद्रूप इत्यर्थः । नरो महापुरुषः तदुत्पन्नात्वान्नारो ब्रह्मा तम् अययति जन्म प्रापयति स नारायणः अत एवोक्तमाद्यमिति । आकारस्तु पितामह इत्येकाक्षरात् । आ शब्दवाच्यो ब्रह्मा तस्याप्याद्यः

कारणमित्यर्थः । तस्यैवोपपादनं धाम्ना स्वेन सदेति । स्वे स्वकीया भक्ताः तेषामिनः स्वामी ब्रह्मा स्वेनः तं सादयति जन्म प्रापयतीति स्वेन सत् तेन । षद्‌लृविशरण गत्यवसादनेष्विति धातुः । गत्यर्थं केऽत्रान्तर्णीतणिच् । धाम्ना स्वरूपेण युक्तमिति । इत्थम्भूतलक्षणे तृतीया । तेजः स्वरूपं गेहं च प्राज्ञैर्धामेति गीयत इति शब्दनिर्णयोक्तेः । आ समन्ताद्रतिः सुखं यस्मात्स आरो धर्मः तद्विरुद्धत्वान्नाराः कामादायस्तान् अययति गमयतीति नारायणः। अत एवोक्तमीशमिति । इकारो मदनःप्रोक्त इत्युक्तेः इः कामः तदुपलक्षितक्रोधादयोऽपि । तेषु ईष्टे प्रवर्तनाप्रवर्तनयोः शक्नोतीति स तथा तम् । तदुपपादनं निरस्तकुहकमिति । कुं कुत्सां हन्ति प्राप्नोतीति कुहम् । हन हिंसा गत्योरिति धातोः । तथा विधं कं सुखं येभ्यस्ते कुहकाः कामादयः निरस्ताः विनाशिताः कुहका येन तमित्यर्थः । अरा दोषास्तदयनमाश्रयः संसारः स न भवत्यस्मादिति नारायणः । अत एवोक्तं भवघ्नमिति । संसारनाशकमित्यर्थः । यद्वा । भवं महाकल्याणरूपं मोक्षं हापयति गमयतीति । हनहिंसागत्योरिति धातोः । अत्रान्तर्णीतणिच् । तदुपपादनं सत्यमिति । सत् पुनरावृत्त्यादिदोषशून्य स्थानं यापयति प्रापयतीति स तथा तम् । नयन्ति शिष्यादिषूपदिशन्ति भगवद्रूपमिति नाः देवाः । आ इषत् अरः शापादिदोषा येषामस्तीति आराः प्रह्लादादयोऽसुराः । देवाः शापाभिभूतत्वात्प्रह्लादाद्या विजज्ञिर इत्युक्तेः । आ अतिशयेन यान्ति सिद्धिमिति आयाः सिद्धांश्च तैः नूयते स्तूयते स तथा तम् । णु स्तुतौ औणादित्वादुलोपः निरुक्तत्वाद्वा । णत्वानपगमश्च । अत एवोक्तममरासुरसिद्धवन्द्यमिति । वदि अभिवादन स्तुत्योरिति हि धातुः । तदुपषादनं परमिति । सर्वोत्तममित्यर्थः । सर्वपालकं वा । पॄ पालन पूरण इति धातोः । सर्वपालकस्यैव स्तुत्यत्वादिति भावः । नारायणमिति कर्मणः क्रियासापेक्षत्वाद्वन्द्व इत्युक्तम् । स्तुव इत्यर्थः । वदि अभिवादनस्तुत्योरिति धातोः । नाभिवादनार्थः । ग्रन्थकर्तुर्व्यासस्य वन्द्य नारायणेनाभेदात् । न हि स्वस्यैव स्वयं वन्दतीति कापि दृष्टम् ।

नमस्ते भार्गव श्रीमन् जामदग्र्य तपोधन ।
रामकृष्णौ स्मृतावावां कश्चित्ते श्रवणं गताविति

भागवतोक्त्या दृष्टमिति चेन्न । तत्र वर्णधर्मप्रवर्तनस्यावश्यकत्वप्रदर्शनार्थकत्वात् । न च नारायणं नमस्कृत्येत्यादौ दृष्टमिति वाच्यम् । उदीरयेदित्यनेन विधिवेधनार्थकत्वात् । नापि तस्मै नमो व्रजजनैः सञ्चक्रे ह्यात्मनात्मने । अहो पश्यत शैलोऽसौ रूपी नोऽनुग्रहं व्यधादित्यनेन स्वस्मै स्ववन्दनं दृष्टमिति वाच्यम् ।

सर्वावताराभिन्नोऽपि सर्वशक्तिरपि स्वयम् ।
पूज्यपूजकनीचोच्चं मोहनाय दुरात्मनाम् ।
अखण्डैकरसो विष्णुः दर्शयेत्तत्र तत्र हीति

षाड्गुणोक्त्या तस्य दुरात्ममोहनार्थत्वात् । तर्ह्यत्रापि तथास्त्विति चेन्न । मङ्गल एव तथात्वे कर्तव्यसर्वग्रन्थस्य मोहार्थत्वप्रसक्त्याऽनुपादेयत्वापातात् । वेद इत्यस्यात्मनेपदत्वेऽपि नात्मार्थं स्तवनमिति सूचनाय तत्तात्पर्यमभिहितं धीमहीति । अत्र बहुवचनेनैवात्मशिष्यादिविवक्षया ध्वनितत्वात् । वदतेर्ध्यानार्थकत्वं कुत इति न शङ्कनीयम् । स्ववाक्यस्य छन्दस्तुल्यत्वेन सर्वोपपत्तेरिति द्योतनाय छान्दसप्रयोगः । किञ्चात्र वक्ष्यते । दशमस्य विशुध्यर्थं नवानामिह लक्षणमिति । तदर्थः । इह अत्र सर्गो विसर्गश्चेत्याद्युक्तदशलक्षणवति भागवते दशमस्य दशमावतारस्य कल्किनो विशुद्ध्यर्थं विशेषेण शोधनार्थं नवानां मत्स्यादिबुद्धान्तानामवताराणां लक्षणं स्ववाक्ययाथार्थ्यानिश्चायकं लिङ्गं कथ्यत इति शेषः । अतीतवर्तमानयोः कथितलिङ्गानामनुभवे साधिते आगामिनोऽपि लिङ्गकथनवाक्ये विश्वासार्हतायाः प्रसिद्धेरतीतानां मत्स्यादिकृष्णान्तानां वर्तमानस्य बुद्धस्य चोक्तलिङ्गानुभवेनानागतस्य कल्किनोऽप्युक्तलिङ्गविश्वासजननार्थमिति भावः । एवं भागवतस्य दशावतारप्रतिपादकत्वे सिद्धे मङ्गलेऽपि तत्प्रतिपादनस्यैवोचितत्वात् । तदभावेन विरोधे प्राप्ते तत्परिहाराय तदप्युपपद्यते । यतः मूलरूपादाद्यस्य दशावतारप्रथमस्य जन्म अवतारः प्रादुर्भावो हरेर्जनिरित्युक्तेः । अभूदिति शेषः । यतोऽन्वेति सर्वत्रानुवर्तनीयम् । यतः मत्स्यादनु अनन्तरं कं जन्म कूर्मावतारं यः अयात् प्राप । यः इतरतः । इतरेण स्वविरोधिना हिरण्याक्षेण तः युद्धं यस्य स तथा वराहोऽभूत् । तकारः कीर्तितश्चोरे मोहे युद्धे च कीर्तित इत्येकाक्षरः । यः अर्थेष्वभिज्ञः । अर्थाः विषयाः त एवेषवः तैर्निर्भिद्यत इति अर्थेष्वभित् । कामानां हृद्यसंरोहं भवतस्तु वृणे वरमिति नृहरये वरयाचनात् प्रह्लाद इत्यर्थः । तं जानातीति स तथा । श्रीनृसिंह इत्यर्थः । यद्वा अर्थेषु विषयेप्सुः हिरण्यकशिपुः । दस्यून्पुरं षण्न विजित्य लुंपत इत्यादेः । तेन न भिद्यते न बध्यते स प्रह्लादः तं जानातीति । स्वराट् । स्वः स्वर्लोकम् आरुषा अतिशयेनाटति व्याप्नोतीति । औणादिकोकारलोपः । यद्वा स्वं आत्मज्येष्ठबन्धुं शक्रं राजयति स्वर्गपालकत्वेन शोधयतीति स तथा वामन इत्यर्थः । तेने ब्रह्म हृदाय आदिकवये । यः आदिः स्वकारणं कविर्ज्ञानी च जमदग्निः तदर्थं तन्निमित्तेनेति यावत् । हृदा स्नेहेन । अवश्यकत्वेनेत्यर्थः । ब्रह्म ब्राह्मणजातिमेव तेने विस्तृतवान् । ब्राह्मणविस्तारेणैव क्षत्रक्षयो लक्ष्यते । यद्वा । अब्रह्महृत् । आः इति पदच्छन्दः । यः आः । आद्यर्थे बहुवचनम् । अकरादयः स्वरा इत्यर्थः । स्वरा विंशतिरेकश्चेत्युक्त्या एकविंशतिवारमिति यावत् । अब्रह्महृत् । अब्रह्म ब्रह्मविरोधिक्षत्रं हरतीति तथा सन् । आदिकवये जमदग्नये तेने सप्तमर्षित्वं ददावित्यर्थः । मुह्यन्ति सूरयः । सूरयो वसिष्ठादिज्ञानिनः । यं रामं प्रति मुह्यन्ति । लक्षणया यत्कामितं न जानन्तीत्यर्थः । यौवराज्यविषये तत्कथितस्य मुहूर्तस्य विघ्नाक्रान्तत्वादिति भावः । तेजोवारिमृदां विनिमयो यत्र त्रिसर्गो मृषा । तेजोवारिमृदाम् । अविनियमः न विनिमयः मिश्रीभावः

यस्मिंस्तादृशो देहः यत्र कृष्णे यथा यथार्थः । त्रिसर्गः । त्रिभिः तेजोवारिमृद्भिः सृज्यतेऽसौ त्रिसर्गो देहः यत्र मृषा मायकः ।

मायया मृतकं कृष्णस्तदा सृष्ट्वा प्रकाशयेत् ।
कुतो हि मृतकं तस्य मृत्युभावात्परात्मन

इत्युक्तेः । धाम्ना स्वेन सदा निरस्तकुहकम् । स्वेन निजेन धाम्ना स्वरूपेण । तेजो गृहं स्वरूपं च प्राज्ञैर्धर्मेति गीयत इत्युक्तेः । अवतीर्णमिति शेषः । सदा अनिरस्तं स्वीकृतं कुहकं कपटशास्त्रं येन तम् । यद्वा । स्वेन धाम्ना स्वरूपभूतेन व्यासेन करणेन निरस्ताः कुत्सितं घ्नंति जानन्ति ते कुहकाः जैनाः येन तम् । हन हिंसा गत्योरिति धातुः । गत्यर्थानां ज्ञानार्थता च । सत्यम् । सत् सत्ययुगं प्रशस्तकर्म वा । यापयति । प्रवर्तयति स तथा तम् । प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यत इत्युक्तेः । परम् । कालिकपरत्वोपेतम् । आगामिनमित्यर्थः तं परं लोकविलक्षणं सर्वोत्कृष्टं वा सर्वपालकं वा सर्वगुणपूर्णं वा परमात्मानं नारायणं धीमहीति । अनेन श्रीमद्रामायण सप्तकाण्डार्थोऽपि वर्णितो भवति । स चेत्थम् । अ इति ब्रह्मेति श्रुतेः । यतः यस्मात् । आत् परब्रह्मणः सकाशात् । यस्य रामस्य जन्म अवतारः । अन्वयात् मातापितृतो जनिरूपलोकसाधारण्यात् । इतरतः शुक्रशोणितसम्बन्धवैधुर्यरूपवैलक्षण्यात् । आसीदिति शेषेणान्वयः । पूर्णात्पूर्णमुदच्युत इत्युक्तेः । स रामोऽर्थेष्वभि इति योजना च । अनेन बालकाण्डार्थ उक्तो भवति ॥ १ ॥

अर्थेष्वभिज्ञः । अर्थेषु प्रार्थनीयेषु पित्राज्ञापालनतद्वरप्रदानयथार्थीकरणबन्धुवात्सल्यसुराराधितादिषु । अभिज्ञः सर्वज्ञः । अनेनायोध्याकाण्डार्थः ॥ २ ॥

॥ स्वराडिति । स्वराट् । स्वान् भरद्वाजागस्त्यशबर्यादिस्वभक्तान् । रञ्जयति स्वदर्शनेन तोषयतीति स तथा । अनेनारण्यकाण्डार्थः ॥ ३ ॥

तेने ब्रह्म हृदाय आदिकवये । यो रामः । आदिकवये मुख्यज्ञानिने हनुमते । हृदा स्नेहेन । ब्रह्म गुह्यसन्देशं मुद्रिकायां लिखितं रामेति वर्णद्वयात्मकं वेदरूपं शब्दराशिं वा । तेने व्यस्तारयत् । दत्तवानिति यावत् । अनेन किष्किंधाकाण्डार्थः । ४ ॥ मुह्यन्ति यं सुरयः । यस्येत्यनुकृष्यते । यदीयमित्यर्थः । यं वायुबीजत्वाद्वायुरूपं हनुमंतम् । लोपः समाने इति सूत्रेण पुनः यं यान्तम् । समुद्रमुल्लङ्घतमिति यावत् । दृष्ट्वेति शेषः । सूरयोऽबरस्था इन्द्रादयः । मुह्यन्ति कथमर्णवं तरेत्कथं सीतां पश्येद्रावणतो भयं कथं न स्याल्लङ्कासकाशात्पुना रामं कथं प्राप्नुयादिति सन्देहं प्राप्नुवन्ति । अनेन सुन्दरकाण्डार्थः ॥ ५ ॥

॥ तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा । यत्र रामे रामप्राप्तौ सत्यामिति यावत् । त्रिसर्गः त्रयः सर्गाः जन्मानि यस्य स त्रिसर्गो रावणः । प्राप्तौ पुनर्जन्मभिर्वा त्रिभिर्लोकाय कल्पतामित्युक्तेः । सप्तसु प्रथमेति सूत्रेण सर्वार्था प्रथमा यस्मादिति स्मृत्या च प्रथमा षष्ठ्यर्थे । रावणस्येत्यर्थः । तेजोवारिमृदाम् । तेजसः स्वर्णरूपत्वेन लङ्काख्यदुर्गरूपं विनिमयः कार्यम् । वारिणः समुद्रपरिखारूपं कार्यम् । मृदः त्रिकूटाद्रिरूपं कार्यं यथा यथावत्कल्पितमपि मृषा वृथा । आसीदिति शेषः । रावणजीवनरक्षको न बभूवेति भावः । अनेन युद्धकाण्डार्थः ॥ ६ ॥

॥ धाम्ना स्वेन सदा निरस्तकुहकम् । स्वेन धाम्ना स्वरूपभूतसामर्थ्येन । कुं कुत्सितं शरीरम् । घ्नन्ति प्राप्नुवन्ति । ते कुहकाः । स्वार्थे कः । हन हिंसा गत्योः । नृतिर्यगादय इत्यर्थः । अनिरस्ताः अङ्गीकृताः । कुहका येन तत् स्वाज्ञयाऽऽगतानां मुक्तियोग्यानां कर्माण्यविगणय्य स्वसामर्थ्येन कीटादीनां मोक्षदात्रिति भावः । अनेनोत्तरकाण्डार्थः ॥ ७ ॥

यतः आत् इत्युक्तम् । अतः । तत् सत्यं मूलरूपं पूर्णानन्दज्ञानात्मकम् ।

सच्छब्द उत्तमं ब्रूयादानन्देतीति वै वदेत् ।
येति ज्ञानं समुद्दिष्टं पूर्णानन्द दृशिस्ततः

इति दशमतात्पर्योक्तेः परं ततो मूलरूपात् अन्यत्वेन भासमानं रामाख्यमवताररूपम् । धीमहि । धियः ज्ञानस्योत्युपलक्षणम् । आनन्दस्यापीत्यर्थः । महि महिमा यस्मिंस्तत् । पूर्णमदः पूर्णमिदमिति श्रुतेः । यद्वा । धियः ज्ञानादेर्महः उत्सवः अस्त्यस्मिन्निति । अथवा । धियः भारत्याः इयः लक्ष्म्याश्च महि महिमा यस्मात्तदस्तीति सिद्धानुवादः । ग्रन्थकर्तुर्व्यासस्य प्रतिपाद्यब्रह्मणैक्येन नमानाद्ययोगात् जयाशीर्वचनात्मकमङ्गलेष्वस्यान्यतमत्वाभावान्मङ्गलाभाव इति न वाच्यम् । उत्कर्षवर्णनेनैव तत्सिद्धेः ।

जयेर्जयाभिभवयोराद्येऽर्थे सावकर्मकः ।
उत्कर्षप्राप्तिराद्योऽर्थो द्वितीयेऽर्थे सकर्मक

इत्युक्त्योत्कर्षप्राप्त्यर्थकजयरूपत्वेनान्यतमत्वसिद्धेश्च । अस्य श्लोकस्य पुनरर्थान्तरकल्पनं स्वबुद्धिमांद्यादेवोपरमते ॥ १ ॥

नन्विदं जन्माद्यस्येत्यादिना कृतं पद्यं कथं युक्तम् । तद्धयारप्स्यमान ग्रन्थविघ्नविधातार्थम् । ग्रन्थारम्भणीयता तु प्रामाण्याधीना । प्रामाण्यं चापौरुषेयवाक्यस्याप्तवाक्यत्वेनानुबन्धचतुष्टयत्वेन च

सम्भवति । नान्यथा । तत्कथमत्रैतदुभयमित्याशङ्क्य मङ्गलस्यैतच्छङ्कारूपविघ्नविघातार्थकता सम्पादनार्थमाप्तवाक्यत्वानुबन्धचतुष्टयवत्त्वयोः सद्भावं तदतिशयं च प्रतिपादयन्ग्रन्थ नाम्नोऽप्यन्वर्थकतां सूचयति ॥ धर्म इति ॥ ध्यानादिरूपमङ्गलवत् श्रीशब्दस्य प्रथमप्रयोगस्यापि वक्तृश्रोत्रादीनां श्रीकारकत्वेन मङ्गलरूपत्वादादौ तत्प्रयोगे तच्छब्दवाच्याया रमाया एव प्राधान्यं ज्ञापितं स्यादतः सर्वधारकत्वविशिष्टभगवतो वाचकं धर्मशब्दमादौ प्रयुज्यापि श्रीशब्दमपि प्रयोक्तुकामोऽन्वये तदधिकरणार्थकसप्तम्यंतभागवतशब्दस्यादौ प्रयुक्तत्वेऽपि । आदौ विशेषणं योज्यं विशेष्यं तदनन्तरमिति न्यायात्तद्विशेषणीभूते शब्दे तमेवादौ प्रयुयोज । अनेन धर्मशब्दस्य शब्दत आदौ प्रयोगेपि । अर्थतः श्रीशब्दस्यैवादौ प्रयोगेणेव वक्तृश्रोत्रादीनां श्रीकारकत्वमस्य ग्रन्थस्य सूचितं भवति । अत एव भागवते उवाचेत्यत्र सर्वत्र भगवच्छुकनारदानां श्रीशब्दप्रयोगो दृश्यते । त्रयाणामपि वक्तृश्रोत्रत्वात् । न च वाच्यं भगवत्यन्यवक्तृत्वाभावाच्छ्रोतृत्वाभाव इति । तदभिन्ने व्यासे तत्सिद्धेः । नापि ब्रह्मण्युभयसत्त्वेऽपि कुतः श्रीशब्दाभाव इति शङ्क्यम् । स्थिते पितरि पुत्रेण राजशब्दवन्मर्यादार्थं सर्वप्राज्ञोत्तमत्वेन ब्रह्मणा तदस्वीकारात् । शुकनारदयोस्तु भगवता ब्रह्मणि प्रेमातिशयप्रदर्शनार्थं तत्पुत्रनिमित्तेन तच्छब्दस्य दत्तत्वात् । अत एव परीक्षिति श्रीशब्दाभावो वक्तृत्वाभावादिति बोध्यम् ॥ श्रीमद्भागवते । श्रीः प्रामाण्यातिशयकारणरूपा सम्पद्यस्यास्तीति तथाविधे भागवते इत्यर्थः । भगवदाश्रितत्वेन श्रीशब्दवाच्या लक्ष्मीरपि प्रतिपाद्यत्वेन यस्यास्तीति तदिति वा । भागवतमिति पुराणनाम । तच्च भगवत्प्रणीतत्वाद्भगवत्प्रतिपादकत्वाच्चान्वर्थकम् । वेदं पुराणं निर्गुणविषयकं केचिदाचक्षते । तन्निरासार्थं भागवतामित्युक्तम् ।

ऐश्वर्यस्य समग्रस्यवीर्यस्य यशसः श्रियो ।
ज्ञानविज्ञानयोश्चैवं षण्णां भगमितीर्यत

इत्युक्तेः । पूर्णैश्वर्यादिषड्गुणवतो हरेः प्रतिपादकमित्यर्थः । निर्गुणमप्यत्रोच्यते । तत्कथमिति चेत् । तत्सत्त्वादि त्रिगुणराहित्यान्नत्वैश्वर्यादिगुणाभावादित्यतोऽपि भगवदित्युक्तम् । तस्याप्तवाक्यत्वेन प्रामाण्यप्रदर्शनाय तद्विशिनष्टि ॥ महामुनीति । ननु पूर्वदर्शितस्यादौ विशेषणं योज्यमित्यादिन्यायस्यात्रानुपपत्तिः । विशेषणस्य पूर्वमेव योजनायां श्रीशब्दप्राथम्यानुपपत्तेः उत्तरयोजनायां विशेषणप्राथम्यासिद्धेरिति चेन्मैवम् । न्यायवाक्यस्य संहितविशेषणपरत्वात् । अन्यथा सत्प्रथमायां सत्सप्तम्यां भूधात्वादिषु चासंहितविशेषणस्योत्तरत्र योजनावश्यकत्वात् । संहितस्य च प्रायः पूर्वमेव दृश्यत्वात् । भागवते श्रीमतीत्यादावुत्तरविशेषणासङ्गतिदर्शनाच्च ॥ महामुनिकृते । यद्यद्विचारपूर्वकं प्रणीतं तत्तदेव प्रमाणम् । अन्यथा भट्टस्य कट्यां सरटः प्रविष्ट इत्यविचारवाक्यस्यापि प्रामाण्यप्रसङ्गात् । अतो विचारापरपर्यायमननशीलत्वरूपप्रवृत्तिनिमित्तवन्मुनि

शब्दप्रयोगः । तत्रापि नायं साधारणो मुनिशब्दः किन्तु महत्वेन विशिष्टः । महामुनित्वं तु व्यासस्यैवोचितम् । मुनीनामप्यहं व्यास इति कथनात् ।

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंशसम्भवम् ।

इत्युक्तौ विभूतिमत्सत्त्वं यत् श्रीमत् श्रीपतित्वादिगुणसम्पन्नम् । तन्मम तेजः स्वरूपभूतम् । यत् ऊर्जितं बलादिना स्वजातावधिकं तन्ममांशसम्भवम् ।

अंशस्तु द्विविधः प्रोक्तः स्वरूपो भिन्न एव च ।
मत्स्यादयः स्वरूपांशा भिन्नांशाद्द्रुहिणादय

इति वचनाद्भिन्नांशरूपजीवस्य सम्भवो यस्मिंस्तदित्यर्थसम्भवात् । भगवता व्यासस्याभेदेन श्रीपतित्वादिगुणसम्पन्नत्वात्तस्यैव महामुनित्वेन परमाप्तत्वात्तत्कृतत्वेनास्य महाप्रामाण्यमिति भावः । नन्विदमयुक्तम् । सर्वभागवतप्रणेतृत्वेन व्यासस्यैतत्पद्यप्रणेतृत्वेऽस्मच्छब्दप्रयोगं विहाय पारोक्ष्येण महामुनिकृते इत्युक्तेरिति चेन्मैवम् । विवक्षाभेदात् । तथाहि स्वपाठकालेऽत्र श्रीमदिति पृथक्पदम् । श्रीर्विद्यारूपिणी लक्ष्मीर्भार्यात्वेनास्यासावहं चेति तस्मात् श्रीमल्लक्ष्मीभर्तृत्वयोग्यमत्सकाशादित्यर्थः ॥ महामुनिकृते । अत्र कृते इत्यव्ययः तादर्थ्ये महामुनिर्नारदः तत् कृते तत्प्रार्थनत्सफलीकरणार्थमिति यावत् । यद्वा महामुनिः शुकः तत्कृते तदध्यापनार्थम् । अथवा । मह पूजायामिति धातोर्महच्छब्दस्य महेत्यादेशे महान्पूज्यो मुनिः शुको यस्य स परीक्षिद्राजा तत्कृते तन्मुक्त्यर्थमिति यावत् । उद्भूयमाने इति शेषः । तथा भागवतं भगवत्प्रतिपादकत्वादेव तन्नामके पुराणे इत्यर्थविवक्षा । शुकादीनां पाठकालेतु पूर्वोक्तैव विवक्षेति नायुक्तेति भावः । एवमाप्तवाक्यत्वेनास्य प्रामाण्यमभिधायानेनैवानुबन्धचतुष्टयस्य सङ्क्षेपतः कथनेऽपि मन्द बुद्धेर्बोद्धुमशक्यत्वात्तद्विशदी-कुर्वन्नधिकारिणस्तावदाह ॥ निर्मत्सराणां सतामिति । मत्सरः परोत्कर्षासहनं तद्रहितानाम् । सतां साधुगुणवताम् । निष्पापवत्त्वं पुण्यवत्त्वं चेत्यधिकारिलक्षणं सामान्यतो ज्ञेयम् । नन्वत्र किं ज्ञान्यधिकार्यज्ञानी वा । नाद्यः । तत्साधनभूतस्यास्यानुपयोगात् । नापरः । अस्मिन्प्रवेशानुपपत्तेः । तस्मादुभयोरधिकाराभाव इत्यत्राप्येतदेवोत्तरं निर्मत्सराणां सतामिति । मम सरं ज्ञानं मत्सरम् । सृ गताविति धातोर्गत्यर्थानां ज्ञानार्थत्वात् । निर्निश्चयनिषेधयोरित्युक्तेर्मद्विषयज्ञानरहितानामित्यर्थः । सतां शक्तानाम् । शक्तं सदिति सम्प्रोक्तमशक्तमसदित्युच्यते इत्युक्तेस्तात्पर्ये । विष्णुविषयक-ज्ञानरहिता ग्रन्थप्रवेशसक्ताश्चत्राधिकारिण इत्युक्तं भवति । व्यासोक्तौ युज्यते चैतत् । व्यासविष्ण्वोरभेदात् । अन्यत्र तु । निर्मत्सराणाम् । निर्मात्येतत्पुराणामिति निर्मन् ।

आर्षत्वाच्छान्दसत्वाद्वा । तं निर्मातारम् । सरन्ति । अनुसरन्ति ते निर्मत्सराः स्वगुरूक्तानुसरणशीला इति यावत् । ज्ञानिनामपि स्वगुरुकृतग्रन्थानुसरणशीलत्वान्नोपयोगाभाव इति भावः । अथवा । ब्रह्मान्यस्य सर्वस्य मिथ्यात्ववादिनां मतनिरासाय सतामित्युक्तम् । अनेनोक्ताधिकारिणां न मिथ्यात्वमिति भावः । किञ्च चैतन्यैक्यवादिनामपि मतनिरासाय बहुवचनं ज्ञेयम् । किंवा । अधिकारिणोऽभिमुखीकृत्य श्रीव्यासेनोच्यते । निर्मत्सराणां सतां वो युष्माकम् । अत्र तुशब्दादमुत्र च क्रमात्तापत्रयोन्मूलनं शिवदं च यथा स्यात्तथा विषयद्वयं निरूप्यत इत्यन्वयः । एवमधिकारिण उक्त्वाऽत्र विषयद्वयं दर्शयन् कार्यकारणयोर्मध्ये कारणस्यैव प्राधान्यात्कारणरूपं विषयं तावदाह ॥ धर्म इति । व्यासोक्तिपक्षे । श्रीमत् मत्सकाशात् । महामुनिकृते शुकनारदार्थं भागवते उद्भूयमाने सति मयेति च कर्ता । शुकाद्युक्तिपक्षे तु । श्रीमद्भागवते महामुनिकृते व्यासप्रणीते सति व्यासेनेति कर्ता । अत्र परमः प्रोज्झितकैतवो धर्मो वेद्यं वस्तु वास्तवं च निर्मत्सराणां सतां शिवदं तापत्रयोन्मूलनं च यथास्यात्तथा निरूप्यत इत्यन्वयः । नन्वत्र निरूप्यत इति क्रियापदमध्याहृतम् । अध्याहारस्य निरङ्कुशत्वात् । न निरूप्यत इति किं न स्यादिति न शङ्क्यम् ।

यत्रानवसरोऽन्यत्र पदं तत्र प्रतिष्ठितम् ।
वाक्यं चेति सतां नीतिः सावकाशेन तद्भवेदिति ।

इत्युक्तेः । त्र प्रारिप्सितत्वेन प्रकृते इत्यर्थः । ननु भागवत इत्यनेनैवाधिकरणे बोधिते पुनरत्रेति कथनं व्यर्थमिति चेन्न । देवीभागवतस्य व्यावृत्तये प्रारभ्यमानत्वेन प्रकृतार्थवाचकपदस्यापेक्षणीयत्वात् । तत्र हि तदनुयायिभिस्तत्प्रणेतृत्वाङ्गीकारेण तत्कृतत्वस्य भागवतशब्दवाचयत्वस्य च सिद्धावपि आरप्स्यमानत्वेन प्रकृतत्वाभावात् । एवं भारतादिष्वपि बोद्धव्यम् । तत्रापि हि भगवत्प्रतिपादकत्वेन यौगिकभागवतशब्दवाच्यत्वस्य महामुनिकृतत्वस्य च सिद्ध्या तद्व्यावर्तकस्य प्रकृतत्वार्थकपदस्यापेक्षणीयत्वात् ॥ धर्मः । वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तम इति विष्णुसहस्रनामसु पाठाद्भूत्या धारणाद्धर्म इत्यपीत्युपनिषद्भाष्योक्तयोगेन च धर्मो भगवान् । ननु

वेदे रामायणे चैव पुराणे भारते तथा ।
आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयत

इत्युक्त्या सर्वकालेषु सर्वपुराणगणे आदिभागादौ विष्णोरेव प्रतिपादनादस्यैव को विशेष इत्यतः परम इत्युक्तम् । अन्यत्र सामान्यतः प्रतिपादनेऽपि अत्र सर्वोत्कृष्टत्वरूपविशेषविशिष्टत्वप्रतिपादनादस्ति विशेष इति भावः । परत्वमप्यन्यत्रोक्तमिति चेत्तदपि मिथ्यात्वनिरासं विना पारमार्थिकं न सम्भवतीति मन्वानो विशेषणान्तरमाह ॥ प्रोज्झितकैतव इति निरस्तमिथ्यात्व

इत्यर्थः । स विशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामत इति न्यायेन भगवतो निरस्तमिथ्यात्वं सर्वोत्कृष्टत्वं निरूप्यत इति भावः । अन्यत्र परमत्वोक्तावपि तन्मिथ्यात्वनिरासाभावेना-प्रतिपादितप्रायत्वादत्र तु सद्भावाद्विशेषः । अयमत्र विषयविशेषः । यद्वा । पुरुषार्थो हि द्वेधा । इष्टप्राप्तिरनिष्टपरिहारश्च । एतदुभयप्रदो विषय इति दर्शयितुं विशेषणद्वयम् । तत्पक्षे अत्र परम इत्येकं पदम् । अत्रपा गायन्विलज्यो विचरेदसङ्ग इति स्वभजने निर्लज्जास्तान् अनाथान्वा रमयति सुखयति स तथा । प्रोज्झिताः निरस्ताः कैतवाः दुष्टकृतोपद्रवाः येन स तथा । अथवा । प्रोज्झितकाः निरस्तसुखा एतवः अकरवाच्यभगवद्विषये इतं गतं नष्टमिति यावत् । वं ज्ञानं येषां ते असुराः यस्मात्स इति । अत्र भगवत इष्टप्रापकत्वानिष्टपरिहारकत्वविषयो ज्ञेयः । यद्वा । मायावादिनः स्वतो निर्धर्मकं ब्रह्म तत्र प्रतीयमानधर्माणां मिथ्यात्वं वदन्ति । तन्निरासायाह ॥ धर्म इति । अत्र परमः अत्र पा निलया रमा यस्मिन्स तथा । सप्तसु प्रथमेति सूत्रात्प्रथमा षष्ठ्यर्थे । लक्ष्मीपतेरित्यर्थः । धर्मः लक्ष्मीपतित्वादि धर्मजातम् । प्रोज्झितकैतवः निरस्तमिथ्यात्वो निरूप्यत इति । भगवद्धर्माणां मिथ्यात्वनिरासरूपो विषय उक्तः । अथवा । महाभारते । भगवान्भगवद्धर्मश्च प्रतिपादित एव पुनरत्र वर्णने को विशेष इत्यतोऽपि एतदेव ॥ धर्म इति । अत्र परम इत्यत्र भिन्ने पदे परा अपौरुषेयत्वेनोत्कष्टा वेदरूपप्रमाणं यस्येत्युभयविशेषणम् । रमन्ति सुखं प्राप्नुवन्त्यनेनेति धर्मविशेषणम् । धर्मः वेदविधित्वेनोक्तः । प्रोज्झितकैतवः । अकयप्रविसम्भूमसुरवहा विष्णुवाचका इत्यभिधानात् । प्रो विष्णुस्तेन उज्झितकैतवादधर्माज्जातं दुःखं यस्मिन्स तथा । निर्दुःखरूपमोक्षः । एतद्द्वयमेव निरूप्यत इत्यर्थः । भारते चतुर्विधानामपि पुरुषार्थानां सम्पाद्यत्वेनोक्तत्वादत्र तु अर्थकामयोः परमार्थ विरोधित्वात्तौ विहाय केवलं धर्ममोक्षयोरेव प्रतिपादनादयमेव विशेष इति भावः । अनेनात्र धर्ममोक्षरूपो द्विविध एव पुरुषार्थो विषयः सूचितः । उत वा । पृथक्पदत्वे । अत्र भागवते अत्र भगवति स्थिते इति वा । परमः परा । पृ पालनपूरणयोरिति धातोः । गोपी कुब्जादिषु पूर्णा व्याप्ता लक्ष्मीर्यस्य स तथा । एकपदत्वे तु । अत्रपः गोप्यादिगणः त्रपया च हापिता इति वक्ष्यमाणत्वात् तं रसयतीति तथा । प्रोज्झिताः कैतवाः दुष्टाः पूतनादयो येन स तथा तादृशो धर्मोऽसाधारणः कर्मविशेषो निरूप्यते । भारतेऽष्टादशपर्वस्वपि एतत्प्रतिपादनाभावादस्य विशेषः । अनेन गोप्यादिरतिरूपः पूतनादि दुष्टधातकत्वरूपो विषयः सूचितः । किं वा । अत्र भागवते परमः केवलः धर्मः धर्मशब्देन तदवतारभूतः पूर्वमेव प्रतिपादित्वात्पिष्टपेषणवदिदं स्यादित्यत उक्तम् ॥ प्रोज्झितकैतव इति । कितवो दुर्योधनः तदीयचरितं कैतवं प्रोज्झितं त्यक्तं कैतवं दुर्योधनचरितं यस्मिन्युधिष्ठिरकथानके तत्तथा विधम् । अत्र दुर्योधनकथानकत्यागाद्विशेष इति भावः । अनेन दुर्योधनचरितरहित युधिष्ठिरकथानकरूपो विषयः सूचितः । अत्र केचित् । केवलधर्मशब्देन

वेदविहितत्वात्सात्विको विषयः । अत्र परम इत्यनेन सुफलदर्शनाद्राजसः । प्रोज्झितकैतव इत्यनेनान्योत्सारणाद्दारुणत्वेन तामस इति वदन्ति । तन्न । सतां सत्फलदातृत्वेन दुष्टानां प्रोत्सारकत्वेन सात्विकस्यैव सिद्धेः । अथादौ कारणरूपविषयकथनात्तदपेक्षया कार्यरूपं विषयमाह ॥ वेद्यमिति । अत्र यत्पदाध्याहारेण योजना द्रष्टव्या । अत्र भागवते यद्वस्तु शिवदं मोक्षदं तापत्रयोन्मूलनम् आध्यात्मिकाधिभौतिकाधिदैविकत्रितापनाशनं धर्मादिनाम्ना विषयत्वेनोक्तम् । तस्य वेद्यं कार्यम् । विद कृताविति धातोः । जगदित्यर्थः । वास्तवं यथार्थम् । निरूप्यते । न तस्य मिथ्यात्वम् । सत्यस्यैव सुखदुःखदानहरणयोग्यत्वादिति भावः । अनेन यस्मै सुखदं यस्य तापत्रयोन्मूलनं वस्तूक्तं तज्जगद्वास्तवमित्यपि योजना द्रष्टव्या । नन्वेतज्जीवमुद्दिश्योच्यते । अथवा जडम् । नाद्यः । नित्यत्वेन कार्यत्वानुपपत्तेः । न द्वितीयः सुखाद्यनुभवाभावेन तद्दानाद्यनुपपत्तेरिति चेन्मैवम् । जडदेहसम्बन्धिनो जीवस्यैव कार्यत्वस्य सुखाद्यनुभवस्य युक्तत्वेन विवक्षितत्वात् । यद्वा । मायावादिना विश्वं मिथ्या दृश्यत्वादित्यनुमानसाधितविश्वमिथ्यात्वनिरासायाह ॥ वेद्यमिति । दृश्यत्वस्य चक्षुर्मात्रग्राह्यत्वार्थकत्वे भूपरमाणुव्योमादीनां तदभावेन सत्यत्वप्रसङ्गात्पश्चेन्द्रियविषयत्वाङ्गीकारे मनो ग्राह्यस्य सुखदुःखादेः सत्यत्वापत्तेश्च । ज्ञेयत्वरूपार्थकत्वमेव पराभिमतमिति मत्वा वेद्यमित्युक्तम् । वेद्यं ज्ञेयम् । वस्तु अनन्यात्मरूपं वियदादि वास्तवं सत्यमित्यत्र निरूप्यतो शुक्तिरजतादि व्यावृत्तये वस्त्विति ग्रहणम् । वेद्यमिति तु पराभिमतानुमानस्य व्यभिचारादिप्रदर्शनार्थम् । दृश्यते त्वग्रया बुध्येति श्रुत्या मिथ्यात्वाभाववति ब्रह्मणि दृशत्वहेतोः सत्त्वादित्यादेरित्यर्थः । अस्य सत्यत्वनिरूपणे किं फलमित्यत आह ॥ शिवदमिति । इहमिति शेषः । इदं निरूपणं शिवदम् । शिवं भद्रं शिवा गौरीति कोशात्सर्वकल्याणरूपमोक्षदायकम् । अनेनेष्टप्रापकपुरुषार्थहेतुत्वं सूचितम् ॥ तापत्रयोन्मूलनम् । तापानां त्रयं यस्मिंस्तस्य उन्मूलनं नाशकम् । अनेनानिष्टनाशकत्वरूपपुरुषार्थहेतुत्वं सूचितम् । एतद्द्वयकथनेन प्रयोजनमुक्त भवति । पूर्वत्र जगत्सत्यत्वं विषयः । अत्र दृश्यत्वस्य हेतोराभासत्वसाधनं विषय इति विशेषः । वस्तुशिवदमित्येकं पदं वा । वसत्यस्मिन्भगवानिति वस्तुयोग्यजीवजातम् । यद्यपि भगवान्सर्वत्र व्याप्त्या वर्तते तथापि वासापरपर्यायसंनिधानविशेषेणात्रयोग्यत्वं सूचितम् । तादृशजीवजाताय सुखदमित्यर्थः ॥ तापत्रयोन्मूलनम् । तकारः कीर्तितःचोरे मोहे युद्धे च कीर्तित इत्येकाक्षरकोशात् । तं मोहम् आप्नुवन्ति ते तापाः अयोग्यजीवा असुरादयः तेषां त्रयं सात्विकराजसतामसभेदेन सुखत्रयम् उन्मूलयति उच्चैरधिकं संवृणोति । अनाविर्भवतीति यावत् । मूल संवरण इति धातोः । अनेन योग्यायोग्यजीवानां मोक्षांधतमोरूपं प्रयोजनमुक्तं ज्ञेयम् । वः तु इति भिन्नपदपक्षे तु पूर्वमेव योजना दर्शिता । अथवा । वस्तुशिवदन्तापत्रयोन्मूलनमित्येकं पदम् । अन्तर्णीतण्यर्थात् । वा गति

गन्धनयोरिति धातोर्गत्यर्थानां च ज्ञानार्थकत्वात् । जाग्रदवस्थानियामकत्वेन ज्ञापकत्वात् व शब्दो विश्ववाची । तं स्तौति स वस्तुर्गणपतिः । विनायकोऽथ विश्वस्य ध्यानादैद्रजवक्रतामित्युक्तेः । शिवोः रुद्रः । दं कलत्रे च दातुरीत्युक्तेः । शिवपदसांनिध्याच्च दं रुद्रकलत्रं देवीत्यर्थः । तापोऽस्यास्तीति तापः । अर्श आद्यच् । तापयति भुवनमिति वा तापः सूर्यः । एते चत्वारस्त्रातार इति यत् । यं ज्ञानम् । येति ज्ञानं समुद्दिष्टमिति भागवततात्पर्योक्तेः । तस्य उन्मूलनं निरासः । अयं तृतीयो विषयोऽत्र प्रतिपाद्यत इत्यर्थः । एवं चतॄणां त्रातॄणां निरासे पञ्चमस्य विष्णोरेव त्राणकर्तृत्वं सिध्यतीति भावः । अनेन पञ्चायतननिरासरूपो विषयः । नन्वेतेषां त्राणकर्तृत्वं किं नाङ्गीकर्तव्यमित्यत आह ॥ किं वेति । अपरैः अश्रेष्ठैः । रुद्रादिभिः किं फलं न किमपि । श्रेष्ठत्वाभावादेवेत्यर्थः । एवमेवान्याप्तविषयप्रयोजनाधिकारिष्वपि निष्फलत्वरूपो विशेषो द्रष्टव्यः । एतद्वा शब्देन सूचितम् । विष्ण्वङ्गीकारे किं फलमित्यत आह ॥ ईश्वरः सद्य इति । ईश्वरेभ्यो ब्रह्मशर्वादिदेवेभ्योऽपि वरो यतः । अतस्त ईश्वराख्येति मुनयः सम्प्रचक्षत इत्युक्तेः । ईश्वरः सर्वश्रेष्ठो विष्णुः । सद्यः । सत् मोक्षाख्यं निर्दोषं स्थानं यापयति प्रापयतीति स तथा । या प्रापण इति धातोरन्तर्णीतणिच् । मोक्षदो हरिरेवैक इत्युक्तेः । सर्वश्रेष्ठत्वाद्विष्णोस्त्रातृत्वज्ञाने मोक्षप्राप्तिः फलमिति भावः । तादृशविष्णुज्ञाने क उपाय इत्यत आह ॥ हृद्यवरुध्यत इति । चेदिति शेषः । स हृदि मनसि अवरुध्यते अनवरतं स्थाप्यते चेत्तज्ज्ञानं सुशकम् । ध्यानजज्ञानयोगाद्गम्यमित्युक्तेरिति भावः ॥ अस्त्वेतत्सर्वं तथाप्यनेनास्य पुराणस्य किमायातमित्यत आह ॥ अत्रेति । अत्र भागवते । कृतिभिः श्रवणार्थावधारणवचनव्याख्यापनाध्ययनाध्यापनाभ्यासरूपप्रयत्नैः शुश्रुषुभिः सेवनोत्सुकैः । तद्धरेःहृद्यवरोधनं क्षणात्कालविलम्बमन्तरेण । साध्यत इति शेषः । यद्वा । ईश्वरः परैर्वा ब्रह्मादिभिरिव । उपमायां विकल्पे वेत्यमरः । सद्यः सपदि । अवरुध्यते किं नेत्यर्थः । आक्षेपार्थकस्य किं शब्दस्य विपर्यये पर्यवसानात् । किं तु अत्र इश्वरे हृदि स्नेहेन विषये । हृत्स्नेहे स्वान्तवक्षसोरिति शब्दनिर्णये । तत्क्षणात् तस्मिन्नीश्वरे उद्धर्षो यस्मात् कम्पोथ क्षणउद्धर्ष इत्यमरः । विष्णुभक्तगुरोः सकाशादित्यर्थः । शुश्रूषुभिः श्रवणेच्छुभिः । एतद्भागवतमिति शेषेण सबन्धः । तादृशैः कृतिभिः कुशलैः पुरुषैः । यद्वा । अत्रकृतिभिरित्येकं पदम् । नास्ति त्रोऽन्यस्त्राता यस्येत्यत्रो विष्णुस्तदर्थमेव कृतं कर्मजातं तद्येषामस्तीति तैरवरुध्यते । अनेन तारतम्यं सूचितम् स्यात् । अथवा । अत्र विषयत्वेन प्रतिपादितभगवत्कार्यभूतस्य जगतः सत्यत्वे तस्य तेनाभेदः स्यादित्यत आह ॥ किं वेति । तर्ह्येतद्विषयभूतं जगत्कारणं सत् सत्यरूपं जगत्किम् न । किंत्वीश्वरो जगत्स्वामीत्यर्थः कोऽसावित्यत आह ॥ य इति । य ईश्वरः । अत्र भागवते । अहृदिभगवत्स्नेहविषये वा माहात्म्य ज्ञानपूर्वकस्तु स्नेहो भक्तिरितीर्यत इत्युक्तेः । भक्तिविषये इत्यर्थः । कृतिभिः भागवतविषयेऽभ्यासादिव्यापारैः । भगवत्स्नेहविषये तु पूजादिकर्मभिः करणैः । परैः तत्परैः । शुश्रूषुभिः

सेवनेच्छुभिः पुरुषैः कृतिभिः । क्षणादल्पकालेन । अवरुध्यते स्थिरीक्रियते । स ईश्वर इत्यर्थः । उत वा । पूर्वं रुद्रादीनां जगत्त्रातृत्वेन ज्ञेयत्वनिषेधः कृतः । स कथमित्यत आह ॥ किंवेति । ईश्वरो रुद्रस्तदुपलक्षितदुर्गादिश्च । सत् । सदेव सोम्येदमग्र आसीदिति श्रुतेः । जगत्कारणं किम् न । अत्र रुद्रादिविषये । कृतिभिः । यं कामये तं तमुग्रं कृणोमीति श्रुतेः । जन्मादिकारणैः । एः अस्य । अकारो वासुदेवः स्यादित्येकाक्षरात् । भगवतः । ईः लक्ष्मीः । लक्ष्मीरीकार उच्यत इति च । अस्येति षष्ठ्या तदधीनत्वं बोधितम् । प्रायः सर्वत्र दृष्टत्वात् । न च वाच्यं गोस्वामीत्यत्र दर्शनाभाव इति । नियम्यं विना स्वामित्वानुपपत्त्या तदधीनत्वसिद्धेः । प्रायः शब्ददानाच्च । परा श्रेष्ठा । परैरित्यत्रायं पदश्लेषो बोध्यः । परा । एः । इति । का भगवदधीना लक्ष्मीस्तत्राह ॥ य इति । ययेत्यध्याहार्यम् । यया लक्ष्म्या यः ज्ञानरूपः भगवान् । सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतेः । येति ज्ञानं समुद्दिष्टमिति स्मृतेश्च । हृदि स्ववक्षसि । अवरुध्यते बाहुपाशेनावष्टभ्यते सेत्यर्थः । तत्प्रमेयमत्र भागवते शुश्रूषुभिः श्रवणोत्सुखैः क्षणाल्पकालेन ज्ञायत इति शेषः । किं वा । वेत्यथवा । अपरैः नास्ति परः परमात्मा येषां तैः स्वस्य परब्रह्मभावनयाऽन्यपरब्रह्मानङ्गीकारात् । मायावादिभिरित्यर्थः । नास्तिकैर्वा । तान्विशिनष्टि ॥ अत्र कृतिभिरिति । अत्र भगवद्विषये । कृतम् अलम्भावो येषामस्तीति कृतिनस्तैः । महामुनिकृते महाविचारशीलपुरुषार्थमुक्तो भगवान् । अवरुध्यते अवधार्यते किम् न । अपि त्वीश्वरः सर्वोत्कृष्टः एकवचनेन एक एव । सद्यः सत् इष्टं यापयति प्रापयति स तथा । अथवा । सदभिव्यक्तरूपत्वात्कार्यमित्युच्यते बुधैरिति वचनात् । कार्यं देहादि तद्यापयति गमयति स तथा । अनिष्टनिवारक इत्यर्थः । इत्थम् । हृदि हरत्यज्ञानमिति हृत् ज्ञानं तस्मिन् । विषयसप्तमीयमतस्तृतीयार्थे ।

द्वितीयार्थे तृतीयार्थे पञ्चम्यर्थे च सप्तमी ।
चतुर्थ्यर्थे च विज्ञेया विषयेति

यां विदुरिति महाव्याकरणोक्तेः । तेन ज्ञानेनेत्यर्थः ।

अयं सर्वेष्टदाता मे सर्वानिष्टनिवारकः ।
सर्वोत्कृष्टोऽयमैवेकस्तदीयोऽहं स मे पतिः ।
इति ज्ञानं निश्चितं यत्सादीक्षाभ्यतंरामतेति

परमश्रुतेः । शुश्रूषुभिः सेवनेप्सुभिः । अवरुध्यते तत् श्रीमद्भागवते क्षणात्ज्ञायत इति शेषः । अत्रेति त्रिरुपादानं ग्रन्थकर्तुविषयस्य प्रयोजनस्य चैक्यज्ञापनार्थम् । एवमाप्तवाक्यत्वविषय-प्रयोजनाधिकारिणां महत्वेन सद्भावान्महाप्रामाण्येनारम्भणीयतासिध्या पूर्वपद्येन कृतस्य मङ्गलस्य

युक्तैव सेत्स्यतीति भावः । अत्र सम्बन्धस्तु ग्रन्थविषययोः । प्रतिपाद्यप्रतिपादकत्वरूपसम्बन्धः । ग्रन्थाधिकारिणोः श्राव्यश्रोतृत्वरूपः । ग्रन्थप्रयोजनयोः प्राप्यप्रापकत्वरूपः । अधिकारिविषययोर्ज्ञातृज्ञेयत्वरूपः अधिकारिप्रयोजनयोरपेक्ष्यपेक्षकत्वरूपः । विषयप्रयोजनयोः साध्यसाधनत्वरूपसम्बन्धः । तस्य सम्बन्धान्तरं नान्वेषणीयम् । स्वनिर्वाहकत्वात् । अन्यथाऽनवस्थापत्तेरिति । इत्यलं पल्लवितेन ॥ २ ॥

एवमाद्यपद्येन मङ्गलं द्वितीयपद्येन ग्रन्थप्रामाण्यं चाभिधाय स्वस्य मूलरूपाद्ब्रह्मण एवोपदेशाधिकारात्तद्रूपेण तस्मा एतदुपदिश्य अवताररूपेणायं नियम इति द्योतनाय बालानां लीलाचर्यावद् ब्रह्मशिक्षितान्नारदात्परिक्षार्थं स्वोक्तभागवतमवताररूपेण श्रुत्वा रुद्ररूपशुकाध्यापनाद्गङ्गावत्त्रिदैवतसंसर्गेणास्य महाफलत्वं वर्णयन् । मज्जन्ति मुनयः सर्वेत्वमेकः किं न मज्जसीति गङ्गया पृष्टे । अम्ब त्वद्दर्शनान्मुक्तिर्न जाने स्नानजं फलमिति श्रीनारदेनोत्तरस्य दत्तत्वात्तत्र तत्स्नानाभावसिध्याऽत्र तु परमभागवतोत्तमश्रीनारदावगाहनसिध्या ततोऽप्याधिक्यं च दर्शयन् तच्छ्रवणमननोपदेशेन व्याख्यानादिषु प्रवृत्त्यर्थमधिकारिणः सत्कारपूर्वं नियोजयति ॥ निगमेति ॥ अहो भावुकाः । हे कुशलाः । पुरुषाः ॥ भागवतम् । ऐश्वर्यादि षड्गुणयुतान्मूलरूपान्नारायणाज्जातम् । यद्वा । भासकाः गावः किरणाः वाण्यो वा यस्य स भगुर्विष्णुस्तस्य स्वरूपं भागवतं तन्यते विस्तरेण प्रतिपाद्यते यस्मिंस्तत् । अथवा भगोर्विष्णोरयमवतारो भागवो व्यासस्तेन तन्यते विस्तरतो विरच्यते तद्भागवतम् । तनु विस्तारे ॥ निगमकल्पतरोः । निन्यत् अध इति यावत् । निन्यग्भावनिकामयोरिति यादवः । गमः ऐन्द्रियकं ज्ञानं यस्मात्सनिगमोऽधोक्षजत्वाद्विष्णुः । गम् ऌगताविति धातोर्गत्यर्थानां ज्ञानार्थत्वात् । तस्मादीषन्न्यूनः निगमकल्पः स एव तरुः स्वयं संसारतरणादन्येषाम् अधिकारिणां तारणाच्च तरुशब्दवाच्यः । द्वितीयेंतर्णीतणिच् । तादृशश्चतुर्मुखस्तस्मात् । यद्वा । निगमो वेदस्तस्मादीषन्न्यूनं निगमकल्पं भारतं ब्रह्मसूत्रं वा तेन संसारतरणशीलः । ताच्छील्यार्थादुनस्तथेत्युक्तेः । तस्मात्सकाशात् ॥ गलितम् । कण्ठमाधुर्यमस्यास्तीति गली गायनशीलत्वान्नारदमुनिः । तेन तन्यते व्यासाय विस्तार्यते । ब्रह्मोपदिष्टापेक्षया संवर्ध्यत इति यावत् । ननु गुरुतो यावत् श्रुतैस्यवानुवादः शिष्येभ्यो युक्तस्तत्कथं संवर्धनम् । अत्रोच्यते । त्वमेतद्विपुलीकुर्विति गुर्वाज्ञापालनस्यैव न्याय्यत्वाद्युक्तमेव संवर्धनम् । तथापि संवर्धित ग्रन्थस्य भागवतत्वं न स्यादिति चेन्न । भगवच्चरणनिःसूता गङ्गा सङ्गतानामपां गङ्गात्ववदुपपत्तेः । पूर्वोदकस्य सङ्गतोदकेनैकीभावः प्रसज्येतेति चेन्न । तथा व्यवहारमात्रोपयोगित्वेऽपि वृद्धिदर्शनेनान्ततो भेदस्यैव सिद्धत्वात् । तर्हि संवर्धितग्रन्थस्यान्ततो भेदेन भागवतत्वाभाव एवेति चेत् । भागवतशब्दप्रवृत्तिनिमित्तं तु द्वेधा भगवत्प्रणीतत्वं भगवत्प्रतिपादकत्वं चेति । श्रीमद्व्यासकृतस्याप्यष्टादशसहस्रसंख्योपेत ग्रन्थात्मकस्य

सर्वस्योभयप्रवृत्तिनिमित्तसद्भावान्न तदभावः । अस्तु श्रीमद्व्यासकृतस्य तथात्वं भगवतत्प्रणीतत्वात् । तथापि ब्रह्मनारदाभ्यां संवर्धितग्रन्थस्य तु व्यासप्रणीतत्वाभावान्नोभयप्रवृत्तिनिमित्तसद्भाव इति चेन्न । संवर्धितग्रन्थस्यापि व्यासेनैवानूद्यग्रथितत्वात् । ब्रह्मनारदोक्तवर्णानुपूर्व्यभावेऽपि पौरुषेयग्रन्थेऽर्थानुवादस्यैव विवक्षितत्वाच्च । तस्मान्न कश्चित्क्षुद्रशङ्कावकाशः । अनेन यथा नारायणेन ब्रह्मणे ब्रह्मणा च नारदायोपदिष्टं न तथा श्रीनारदेन व्यासायोपदिष्टमिति सूचितम् । कण्ठमाधुर्यादेव हि नारदात् श्रुतं न गुरुत्वबुध्या । अन्यथांऽगीकारे गन्धर्वादीनामिन्द्राद्युपदेशकत्वप्रसङ्गात् । गुरुत्वे तु न कण्ठस्वरमाधुर्यमुपयुक्तम् । किं तु ज्ञानविशेष एव । न हि तत्त्वबुभुत्सवो गुरुकण्ठमाधुर्यमपेक्षन्ते । श्रीनारायणाभिन्नरूपस्य व्यासशिष्यस्य शिष्यो नारदस्तद्गुरुः कथं स्यात् । अवान्तरभेदेन घटेतेति चेन्न । व्यासावतारेऽपि व्यासशिष्यो यतीश्वर' इत्युक्त्या धन्योपाख्यानान्ते तात्पर्यनिर्णये विंशेऽध्याये नारदस्य तच्छिष्यत्वोक्त्या च व्यासशिष्यशिष्यत्वसिद्धेः । अत एवान्यथाप्रयोगसौष्ठवेऽपि गलितमिति प्रयुक्तम् ॥ रसमालयम् । रसानां भक्तिज्ञानवैराग्यदयावीरशृङ्गारादिरसानां कवितालङ्काराणां माला पङ्क्तिर्यस्मात्स रसमालो विष्णुः । तस्माद्याति निर्गच्छति तत् । यद्वा । रसानामुक्तविधानां मा ज्ञानं तत् । आ साकल्येन लाति स्वीकरोतीति रसमालो व्यासः समानमुत्तरम् । अथवा । रसः सारो वरः श्रेष्ठ इत्यभिधानात् । रसः सर्वजीवश्रेष्ठो ब्रह्मा मा लक्ष्मीश्च ते सुतदारत्वेन लातीति रसमालो विष्णुस्तस्य यं ज्ञानं येनेति तत् । येति ज्ञानं समुद्दिष्टमित्युक्तेः । किं वा । रस शब्द इति धातोः रसः शब्दरूपो वेदः तस्य मा ज्ञानम् । तदनुकूलं ज्ञानमिति यावत् । तस्यालयं स्थानमिति । उत वा । रसा मधुरादिषड्रसाः तैः समाना मार्मिनं येषां ते रसमाः कामादि षट्शत्रवः तेषाम् आसमन्ताल्लयो नाशो येनेति । रस्य रतिरूपस्य विष्णोः सं संनिधानं तस्य आलयं स्थानमिति वा ॥ शुकमुखादमृतद्रवसंयुतम् । अत्र पदच्छेदः । शुकमुखादमृतद्रवसंयुतमिति । षट्सु द्वितीयेति सूत्रात् द्वितीया पञ्चम्यर्थे । उंकारः शङ्करः प्रोक्त इत्यभिधानात् । उना शङ्करेण खाद्यते भक्ष्यते तत् उखादं विषं तदस्यास्तीति उखादः तक्षकः सर्पः । अत्रार्श आद्यच् । तस्मान्मृतं मरणं यस्य स उखादमृतः परीक्षिद्राजा सः द्रवो ज्ञानम् । द्रुगतावित्यस्माद्धातोर्गत्यर्थानां ज्ञानार्थत्वात् । तेन संयुतो येनेति तत्तथा । यद्वा । शु शीघ्रं कं सुखं यस्मात्तत् । शु शब्दस्य वैदिकनैघण्टुके शीघ्रनामसु पाठात् । सद्योहृद्यवरुध्यत इत्युक्तत्वाच्च । उ शब्द एवार्थकः । स मुहुरित्यनेनान्वेतव्यः ॥ खादद्रवसंयुतम् । खैः इन्द्रियैः अद्यन्ते भुज्यन्ते ते खादा विषयाः । तेषां मृतं नाशः द्रवः पलायनं चेति यावत् । अकयप्रविसम्भूमसखहाविष्णुवाचका इत्यभिधानात् । सं शब्दवाच्यो विष्णुः तेन युतो योगः तत्प्राप्तिरिति यावत् । तथा च खादमृतद्रवसहितः संयुतो यस्मात्तत् । मध्यममपदलोप्ययं समासः । अथवा । शुकमुखादम् । ऋतद्रवसंयुतम् । इति पदच्छेदः । शुकः वैयासकिः । मुखः प्रमुखो येषु

तैर्नारदादिभिः । अद्यते आस्वाद्यते तत् । ऋतस्य ज्ञानसाधनरूपस्य सत्यरूपस्य वा वेदस्य द्रवः रसरूपः अर्थः तेन संयुतम् । यद्वा । ऋतस्य ज्ञानरूपस्य विष्णोः द्रवो ज्ञानम् । विष्णुविषयकं ज्ञानमिति यावत् । तेन संयुतम् । किंवा । शुकमुखात् व्यासपुत्राननात् । निर्गतमिति शेषः । अमृतं मोक्षः तत्साधनरूपो द्रवो ज्ञानं तेन संयुतं पुरीतम् । अथवा शो तनूकरण इति धातोः । शुः अश्वबलीकारित्वान्नकः तस्मात् । को ब्रह्मा मुख्यो येषु ते दैवैः अदः अपालितो गजेन्द्रः देङ् पालन इति धातोः ।

एवं गजेन्द्रमुपवर्णित निर्विशेषं ब्रह्मादयो विविधलिङ्गभिदाभिमानाः ।
नैते यदोपससृपुर्निखिलात्मकत्वात्तत्राखिलामखरो हरिवारिसीदित्युक्तेश्च ।

तस्य गजेन्द्रस्य यन्मृतं मरणं तन्निमित्तो द्रवः कृपाद्रवः तेन सहितः संशब्दवाच्यो भगवान् सः युतः योगं प्राप्तो यस्मिंस्तत् । उत वा । कमुखाः ब्रह्मादयो देवाः । कं ब्रह्मेति श्रुतेः । विष्ण्वादयो देवाः । तेषाम् आदाः अशोधकाः । दैप् शोधन इति धातोः । तद्विचारशीला इति यावत् । तादृशाश्च ते मृताश्च । मृतं मरणमेषामस्तीति मृतामर्त्याः । र्श आद्यच् । तेषु द्रवः कृपारसस्तं सम्यक् यातीति कमुखादमृतद्रवसंयुतः तस्य भावः कमुखादमृतद्रवसंयुता यस्मिन्भागवते तत् । रसो वै स इति श्रुतेः । रसो विष्णुः प्रतिपाद्यत्वेनास्त्यस्मिन्निति रसि फलम् । तच्च व्यर्थाभिधायकम् । मल्लाद्य-ग्रवतित्वरूप एकोऽर्थः । रसभरितत्वरूपो द्वितीयः । तथा च प्रथमेनानिष्टनाशके द्वितीयेनेष्टप्राप्तौ च क्षमत्वात् । द्विविधपुरुषार्थसाधनभूतम् ॥ भागवतम् । तन्नामकपुराणम् ॥ काभुवि । के सुखरूपे । अभवि न भवत्यस्मादित्यभूः मोक्षः तद्विषयेऽपि । बत परमादरेण श्रवणादिविद्याभिः सेवत । हृदयगतं यथा भवति तथा कुरुतेति सूचनार्थं पिबतेति प्रयोगः । तदपि न सकृत् अपि तु असकृत् । आवृत्तिरसकृदुपदेशादिति सूत्रात् ॥ ३ ॥ इति श्रीभागवतटिप्पण्यां प्रथमोऽध्यायः ॥ १-१ ॥

॥ स एवेति ॥ कौमारम् । ब्रह्मपुत्रान्यं सनत्कुमाराख्यम् । अन्यथा ।

कुमारो नाम भगवान्स्वयं स्वस्मादजायत ।
दिदेश ब्रह्मणे ब्रह्म ब्रह्मचर्यस्थितो विभुः ।
यस्मात्सनत्कुमारश्चायं ब्रह्मचर्यं प्रपालयत् ।
यः स्थाणोः स्थाणुतां प्रादाद्भगवानव्ययो हरिरिति

ब्राह्मेणविरोधः ॥ ६ ॥

॥ तृतीयमिति ॥ देवर्षित्वम् । महिदासरूपम् । अन्यथा ।

अवतारो तृतीयोऽस्य देवर्षिः प्रथितो भवि ।
महिदासस्त्वैतरेयो यस्तत्रं नारदेऽवदिति

तात्पर्योक्तिविरोधः ॥ ८ ॥

॥ तुर्यमिति ॥ आत्मशमोपेतम् । आत्मनां जीवानाम् उपशब्दगृहीतात् पापादुपावृत्तिः । उपावृत्तिस्तु पापेभ्यो वासः सर्वगुणैः सह । उपवासः स विज्ञेय इत्यत्र पापादुपवृत्तेरुपशब्देन गृह्णात् ॥ शमो । भगवन्निष्ठबुद्धिः । शमो मन्निष्ठबुद्धरित्येकादशोक्तेः । तदुभयम् । उपेतं समीपं प्राप्तं येन तादृशं तपः । अन्यथा । स्वात्मोपशमस्य सदासिद्धत्वेन तपोऽङ्गत्वमयुक्तं स्यात् । तस्माल्लोक-शिक्षणार्थमेव तद्युक्तमिति भावः ॥ ९ ॥

॥ ऋषिभिरिति ॥ पार्थिवम् । पृथुदेहाविष्टम् । अन्यथा । आविवेश पृथु देवः शङ्खचक्री चतुर्भुज इति पाद्मोक्तिविरोधः ॥ १४ ॥

॥ अवातारे इति ॥ षोडशे मे । षोडशसङ्ख्यया मा मितिर्यस्य तस्मिन्नवतारे । निःक्षत्रामित्यत्र सशेषः क्षत्रनाशो वा निःशेषः । नाद्यः । निःक्षत्रामित्यनुपपत्तेः । न द्वितीयः । तदभावेनैव पुनर्धातानुपपत्त्या त्रिःसप्तकृत्वा इत्यस्य वैयर्थ्यप्रसङ्गात् । मैवम् । द्वितीयपक्षस्यैवौचित्यात् । न च तत्रोक्तानुपपत्तिः ।

ततस्तु हतवीरासु क्षत्रियासु पुनः पुनः ।
द्विजैरुत्पादितं क्षत्रं जामदग्न्यो न्यकृन्ततेति

भारताश्वमेधिकपर्वोक्त्या क्षत्रियाणां स्त्रीभिः प्रार्थितब्राह्मणेभ्यः पुनःपुनरुत्पत्तेः सिद्धत्वात् ॥ २०॥

॥ तत इति । राघवात्पूर्वं व्यासावतारकथने जामदग्न्यरघूद्वहौ वासिष्ठयादवौ कृष्णाविति तन्त्रसारोक्तिविरोध इति चेन्न । तृतीयं युगमारभ्य व्यासो बहुषु जज्ञिवानिति कौर्म्योक्तेः ॥ २१ ॥

॥ एकोनविंशे इति बलभद्रस्य श्वेतकेशावेशेनैकोनविंशावतारत्वं न स्वरूपेण । अन्यथा ।

शङ्खचक्रभृदीशेशः श्वेतवर्णो महाभुजः ।
आविष्टः श्वेतकेशात्मो शेषांशं रोहिणीसुतमिति

महावराहोक्तिविरोधः ॥ २३ ॥

॥ तत इति ॥ सम्प्रवृत्ते । समभे समीचीने सुष्टुपूजासुखेषु चेति यावदकोशात् । कैलासं द्वापरस्याभेदात् ॥ प्रवृत्ते । मिश्रिते सतीति यावत् । यद्वा । कलाविति पृथगधिकरणम् । तस्मिन् सम् अभेदेन मिश्रीभावे सति प्रवृत्ते विद्यमाने द्वापरयुगसन्धावित्यर्थः । अन्यथा । कलियुगेऽवतारा-भावकथनं विरुद्धं स्यात् । त्रियुगेति नामाप्यनर्थकं स्यात् ॥ २४ ॥

॥ अथेति । युगसंध्यायाम् । कलियुगान्त्ये भागे कृतयुगप्रवेशेनांशसद्भाव इत्यर्थः । द्वापर-कृतांशरहित एव कलाववतारनिषेध इति भावः ॥ २५ ॥

ऋषय इति ॥ कलाः सर्वे हरेरेव । सर्वे ऋष्यादयो हरेः कला एव भिन्नांशा एवेत्यर्थः । अंशस्तु द्विविधः प्रोक्तः स्वरूपो भिन्न एव चेत्यादेः ॥ २७ ॥

एते इति ॥ एते । मत्स्यादयस्तु ॥ पुंसः । पुरुषत्य हरेः ॥ स्वांशकलाः । स्वरूपभूतावताराः यस्य तेऽवताराः स कस्मादवतीर्ण इत्यत उक्तम् । कृष्ण इति । स मूलरूपी भगवान् स्वयमेव कुत इत्यतो हेतुगर्भविशेषणम् ॥ कृष्ण इति लये सर्वजगत्कर्षकत्वादित्यर्थः ।

यतः कर्षसि देवेश नियमात्सकलं जगत् ।
अतो वदन्ति मुनयः कृष्ण त्वं ब्रह्मवित्तमा

इति कृष्णनामनिरुक्तेः । सकलं स्वांशसहितम् अभेदज्ञानेनानर्थप्राप्तिः स्यात् ।

त्रिविधं जीवसन्धं च परमात्मानमव्ययम् ।
तेषां भेदं च ये सत्यं विदुर्मोहविवर्जिताः ।
ते याति परमं स्थानं विष्णोरेव च पण्डिताः ।
अनाद्यनन्ततमो यान्ति परमात्मविनिन्दकाः ।

मत्स्यादिकलासहितं जगत् ऋष्यादिकं चेति प्रमाणवाक्यार्थः । पूर्णस्य पूर्णमादाय पूर्णमेमाव-शिष्यत इति श्रुतेः । स्वाप्ययादिति सूत्राच्च । मत्स्यादीनामभेदेन स्वस्मिन्नाकर्षकत्वात् । ऋष्यादीनां भेदे नात्मन्याकर्षकत्वाच्च न तस्याप्यन्यरूपमिति भावः ॥ २८ ॥

इदमिति ॥ ब्रह्मसंमितम् । ब्रह्मणा वेदेन संमितं तुल्यम् । उभयोरेकार्थत्वादेव न त्वपौरषेयत्वादि-नेति भावः । अन्यथा न च वेदसमं शास्त्रमित्युक्तिविरोधः ॥ ४० ॥ इति श्रीभागवतटिप्पण्यां तृतीयोऽध्यायः ॥ १-३ ॥

द्वापरे इति । अत्र अष्टाविंशतिमहायुगस्येत्यध्याहार्यम् ॥ तृतीये । महायुगतृतीयांशरूपे ॥ द्वापरे । द्वापराख्ययुगेऽधिकरणे ॥ युगपर्यये । तद्युगपर्यवसाने । समनुप्राप्ते सतीत्यर्थः । अन्यथा । तृतीये युगपर्यये तृतीयमहायुगे इत्यर्थाङ्गीकारे द्वापरेऽथ युगे प्राप्ते त्वष्टाविंशति मे पुनरित्यनेन विरोधः स्यात् ॥ १३ ॥

॥ एवमिति ॥ नातुष्यत् । अलम्बुद्धियुक्तं नासीत् । श्रुत्वा कथां न तुष्यामि हरेरव्यक्तकर्मण इति मात्स्योक्तेः । अन्यथा । सदा सन्तोषरूपिणमित्यनेन विरोधः ॥ २५ ॥

नेति । अप्रसादोऽप्यनलम्बुद्धिरेव । कः प्रसन्नो भवेद्दिव्यां कथां शृण्वन्हरेः परामिति तात्पर्योक्तेः । प्रसादश्च हरेस्तु नः इत्यनेनान्यथा विरोधः ॥ २६ ॥

॥ धृतव्रतेनेति । धृतमेव व्रतं येन तेन । अनेन ममाग्रे धार्यं व्रतं नास्तीति ध्वनितम् । जग्धतृणाः पीतोदका इति वदिदं ज्ञेयम् ॥ निर्व्यलकेन । अविप्रलम्भकेन । मया ॥ हि । यस्मात् ॥ अनुशासनम् । अनूनां मनुष्याणाः शासनं शिक्षणम् । अनु शब्दस्य मनुष्यनामसु पाठात् ॥ गृहीतम् अन्तर्णीतणिचा ग्राहितमित्यर्थः । तस्माच्छन्दांसि गुरवोऽग्रयो मानिताः । सदाश्रेयो निभृतस्य चेदमाननं नाप्राप्तश्रेयो लाभार्थमिति भावः । यदिह्यहं न वर्तेयम् इत्यादि लोकसंग्रहार्थमेवैतत् । अन्यथा । पूर्णत्वेन विरोधः ॥ २७ ॥

अथेति ॥ देह्यः । देहरूपः । स्वार्थेऽण् । अन्यथा । देहदेहिविभागश्च न परे विद्यते क्वचिदिति वचनविरोधः ॥ असम्पन्न इव । व्यासावतारे चिकीर्षितग्रन्थेषु भागवतस्याकृतत्वेन कृत्यपूर्त्यभावात् अकृतकृत्य इवेत्यर्थः ॥ २९ ॥

छन्दोगुर्वादिमाननाद्यभावरूपकारणाभावेऽपि आत्मनो कृतकृत्यसदृशत्वे कारणान्तरं तर्कयति ॥ किं वेति ॥ प्रायेण । अन्यान् संक्षिप्यैतेषामिव बाहुल्येनेत्यर्थः । अन्यथा । यथा भारते तु देवो न तथाऽन्येषु केषुचित् । उच्यते न तथाऽपीशं जानंत्यज्ञा जनार्दनमिति स्वानन्दोक्त्या विरोधः तस्मात्तत्र न समस्तानिरूपणं किन्तु भारते सङ्कोचाभाव एव कारणमिति भावः ॥ ३० ॥

तस्येति । तस्य । व्यासस्य । एवम् । कृत्यावशेषेण ॥ खिन्नम् । अनलम्बुद्धिमन्तम् ।

अतुष्टिरप्रसादश्च खेदोऽतृप्तिस्तथैव च ।
अनलत्वं वदंत्येते पर्यायवाचका

इति ब्राह्मोक्तेः । आत्मानं मन्यमानस्यापि खिद्यतः । खेदयुक्तस्यैव स्थितस्येत्यर्थः । अन्यथा । आत्माऽपहतपाप्मेत्यादिश्रुतिविरोधः ॥ ३१ ॥

तमिति । अप्रत्युत्थाय । प्रत्युत्थानं विना । पूजयामास । सभाजयामास । अन्यथा । गुणज्येष्ठेन गुणकनिष्ठाय प्रत्युत्थानादिके कृते तस्यानिष्टप्राप्तिः स्यादिति प्रसिद्धम् । ननु कृष्णेन नारदाय बहुशोऽभ्युत्थानादिकं कृतमित्युक्तं तत्कथमिति चेन्न । स्वस्य क्षत्रियत्वेन नारदस्य ब्राह्मणत्वेन चावताररूपे क्षात्रधर्मपालनार्थत्वात् । अकारस्याप्रश्लेषे तु प्रपितामहस्य वसिष्ठस्य भ्रातृत्वापेक्षयेति ज्ञेयम् ॥ ३२ ॥ इति श्रीभागवतटिप्पण्यां चतुर्थोऽध्यायः ॥ १-४ ॥

जिज्ञासितमिति ॥ शोचसि । प्रकाशसे ॥ अजस्रेण शोचिषाशोशुचान इति श्रुतेः । अन्यथा । शुक्रं तच्छोकराहित्यादिति वाराहोक्त्यादिविरोधः ॥ ४ ॥

असत्येवेति ॥ न परतिष्यते । अलम्बुधियुङ्नजायते । श्रुत्वा कथां न तुष्यामि हरेरव्यक्तकर्मण इति मात्स्योक्तेः ॥ ५ ॥ इति श्रीभागवतटिप्पण्यां पञ्चमोऽध्यायः ॥ १-५ ॥

निष्पादितमिति ॥ उद्धवात्कृष्णनिर्याणं निशम्य मैत्रेयात्प्राप्तज्ञानेन विदुरेण बोधिते धृतराष्ट्रे वनं गते सति तच्छोकाविष्टं युधिष्ठिरं प्रति नारदोक्तिरियम् । ईश्वरः कृष्णः यद्यपि देवकार्यं निष्पादितं तथाऽपि अवशेषं प्रतीक्षते । अतो यावदिहभूमौ भवेत् तिष्ठेत् । यूयं तावदवेक्षध्वं प्रतीक्षध्वं मा‌ग्र इत्यर्थोपगमे प्रतीक्षत इति लटा अवेक्षध्वमिति लोटा च वर्तमानभविष्यदर्थकथनमयुक्तं स्यात् । पूर्वमेव कृष्णस्य निर्यातत्वेन भूतार्थस्यापेक्षितत्वात् । अतोऽर्थान्तरयोजना ॥ इह भवे । अस्मिन्नवतारे । अवशेषमपि देवकृत्यम् । निर्याणरूपम् । अद्य अधुना निष्पादितम् ॥ यावत् । यदि ईश्वरः प्रतीक्षते । तावत् तर्हि । यूयम् ॥ अवत् । वासुदेववत् ॥ अवेक्षध्वम् । प्रतीक्षां कुरुध्वम् । स एव न प्रतीक्षते तदा भवद्भिरपि न प्रतीक्षा कर्तव्येति भावः । यद्वा । इह भूमौ । यावत् यदि । ईश्वरः कृष्णः । भवेत्तावत् तर्हि । यूयम् । प्रतीक्षत । अवशेषमपि देवकृत्यम् इ विचित्रम् । इ विचित्रे स्मरे पुमानिति यादवः । यथा स्यात्तथा निष्पादितम् अवेक्षध्वम् । तस्मादत्र भवद्भिर्न स्थेयमिति भावः ॥ ५० ॥ इति श्रीभागवतटिप्पण्यां द्वादशोध्यायः ॥ १-१२ ॥ इति श्रीमद्भागवते पाङ्गीश्रीनिवासाचार्यकृते विरोधोद्धारे प्रथमः स्कन्धः समाप्तः ॥ १ ॥

द्वितीयः स्कन्धः

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

इदमिति ॥ द्वापरादौ । द्वापर आदिर्यस्य एतादृशकलिद्वापरयोः सन्धिकाल इत्यर्थः । तत्पुरुषाश्रयणे तु व्यासस्यावतीर्णत्वात्तत्कृताध्ययनमसंगतं स्यात् । अथवा द्वापरं च आदिश्चेति शंखपटवत्समासः । अचिन्त्याव्यक्तीत्यत्रेव द्वापरे वर्तमानकालात्पूर्वे चेत्यर्थः । उतवा । द्वापरादौ

परः सर्वोत्तमो हरिः अदः कर्मफलभोक्ता जीवः निर्णेयत्वेन यत्र तिष्ठत इति शेषः । तयोरन्यः पिप्पलं स्वाद्वत्तीति श्रुतेः । तत्पुराणमधीतवानिति संबन्धः । अस्मिन्पक्षे हे भागवेति संबुद्धिः । भागः जीवब्रह्मविभागः तं वाति जानाति स तथा । वा गति गन्धनयोरिति धातुः । गत्यर्थानां ज्ञानार्थत्वाच्च भेदज्ञेत्यर्थः । अथवा । इदंभागवतेत्येकं पदम् । अस्य विश्वस्य भागः पञ्चमहाभेदात्मकः तं वाति जानातीति पूर्ववत् । अथवा । द्वापरादौ संशयकारणे सतीत्यर्थः । सन्देहद्वापरौ चाथेत्यमरः । अथवा द्वापरात् औति इति पदच्छेदः औ रुद्रे स्वस्य मूलजन्मनीत्यर्थः । द्विविधं पञ्चाशद्वत्सरात्मककालेनार्धीकृतं परं परशब्दवाच्यं आयुर्यस्य स द्वापरो ब्रह्मा तस्मात्सकाशात् । अहमधीतवानिति संबंन्धः । अथवा हे द्वापरेति राज्ञः संबुद्धिः । द्वाभ्यां जडेश्वराभ्यां परं विलक्षणम् । अथवा । द्वौ व्यवहारपरमार्थौ पालयति स तथा । पृ पालनपुरणयोरिति धातोः । कथं भूतं पुराणम् ॥ इदम् अद्भुतज्ञानाधिकरणमित्यर्थः । इ विचित्रे स्मरे पुमानित्यभिधानात् । दं कलत्रदं च बुद्धिदं दाने च दानरीति च । अत एवाध्येयतममित्यर्थः ॥ भागवतम् । भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिष्वित्यमरात् । विष्णोः प्रतिपादकमिदम् । यद्वा ऐश्वर्यस्य समग्रवीर्यस्य । यशसः श्रिय इत्यादेः । यद्वा भानि मेषादिराशीन् गच्छन्ति तथा विधाः सूर्यादयो ग्रहाः प्रयच्छन्ति फलं नृणां सदैव तु शुभाशुभमित्युक्तम् । यद्वा । भं भवनं मोक्षाख्यं गच्छन्ति ते भगाः मुक्तियोग्याः तद्वान्विष्णुस्तस्येदम् । यद्वा भं मयं पञ्चकष्टाख्यं गच्छन्ति ते तमोयोग्याः नियम्यत्वेन तद्वान्विष्णुस्तस्येदम् । अनेन मुक्तियोग्यतमोयोग्यनियामकस्वरूपमहिमा हरेरुक्ता भवति । भवने भः समाख्यातो भोभयेऽपि प्रकीर्तितः । इति वररुचिः । मं शब्देन अश्विन्यादीनि गोगणेशः तेषां नियम्यत्वेन तद्वांस्तस्येदम् । अनेन विष्णोः कालचक्रप्रवर्तकत्वं गणेशाय विघ्नसंहर्तृत्वशक्तिदातृत्वं च सूचितम् । यद्वा इदंभागवेति राज्ञः संबुद्धिः । अग्रे तदिति प्रसिद्धार्थकं पुराणविशेषणम् । विचित्रदंभपर्वतात् गच्छतीति तादृश । वागतिगन्धनयोः । दंभरहितेत्यर्थः । अथवा । कामदंभौ पर्वतवद्दुर्गमत्वेन जानातीति । गत्यर्थानां ज्ञानार्थत्वात् । अथवा इदं भागेति संबोधनम् । अस्य ब्रह्मणः भागो भक्तिरस्यास्तीति । अथवा हे इदं भाक् इति संबुद्धिः । इदं ब्रह्म भजतेऽसावित्यर्थः । तत्पुराणम् ॥ अव गोपितं कुर्वित्यर्थः । अथवा इदंभागो इत्युकारान्त संबोधनम् । इदं ब्रह्म भासयन्ति तादृशौ गावौ नेत्रे यस्य स इदंभागुः तत्संबुद्धिः । ब्रह्मभासकदृष्टे इत्यर्थः । बहुलं छन्दसि । अस्मिन्पक्षे अत इति पदं वासुदेवविस्तारकमित्यर्थकं पुराणविशेषणम् । अथवा इदं पुराणम् । भागवतम् ॥ नाम । अष्टादशसहस्रग्रन्थात्मकमिदं भगवन्नामेत्यर्थः । इत्थं च यत्र यत्र नाममाहात्म्यं तत्र तत्र भागवतमाहात्म्यमित्यवगंतव्यम् । भागवतस्य भगवन्नामत्वात् । अथवा नामपुराणमित्येकं पदम् । नाम्ना पुराणम् । अनेन क का इतरपुराणसदृशं न किन्तु नाम्ना

पुराणं ततोऽपि महद्विलक्षणमिति ध्वन्यते । अथवा पुराणम् । पुराणि ब्रह्मादि चेतनशरीराणि अणति गच्छति प्रविशतीति तादृशं ब्रह्म । यत्रेति शेषः ॥ संमितम् । सम्यक् सर्वोत्तमत्वेन मितं प्रतिपादितं तत् । भागवतमिति संबन्धः । अथवा पुरा सृष्ट्यादौ ब्रह्मसंमितं ब्रह्मणा चतुर्मुखेन सम्यक् उत्तमत्वेन मितं ज्ञानं णं मोक्षसुखम् । यत्रेति शेषः । णश्च निर्वृतिवाचक इत्युक्तेः ॥ ८ ॥ इतिभागवते प्रथमोऽव्यायः ॥ २-१ ॥

अत्रैवेमाः शङ्काः । सूर्यो भगवद्वार्तया यः क्षणो नीतस्तमृते उद्यन्नस्तं च यन् सन् पुंसामायुर्हरतीत्यङ्गीकारे आयुषः सूर्योदयास्ताधीनप्राप्त्या शतायुर्वै पुरुष इति श्रुतेः । योगिनः कालवञ्चका इत्यनेन शतोत्तर युर्वृध्या विरोधा प्रसङ्गः स्यादिति । अतोऽस्य व्याख्यानम् ॥ असौ प्राणे । अधिकरणबलात्स्थित इति लभ्यते । तत्स्थो भगवानित्यर्थः । यः प्राणे तिष्ठन्निति श्रुतेः । प्राणस्थः प्राणनामासाविति श्रुतेश्च । उत् । ऊर्ध्वम् ॥ यन् । गच्छन् ॥ अस्तं नीचैश्च यन् गच्छन् । उच्छ्वासनिःश्वासरूपेण सञ्चरन्सन्नित्यर्थः । पुंसां आयुर्हरति । तस्यायुषो यः ॥ क्षणः अवसरः । उत्तमश्लोकवार्तया ऋते नीतः स क्षणो वैयर्थ्ययुक्तः । अव्ययानामनेकार्थत्वात् । नामैकदेशे नामग्रहणमिति न्यायाच्च । यद्वा पुंसां मध्ये योऽसौ वर उद्यन् उच्छ्वसन् अस्तं यन् निःश्वसंश्च आयुः स्वायुः हरति क्षिणोति । तस्य पुंसः उत्तमश्लोकवार्तयेति । इत्थं भूतलक्षणे तृतीया ॥ उत्तमश्लोकः । हंसरूपी नारायणः । तस्य ॥ वार्तया । कल्पानुसारिप्रवृत्तिः । तया सहितः ॥ क्षणोऽपि । अल्पकालोऽपि ॥ ऋतेः । ज्ञानविषये । ऋगताविति धातोर्गत्यार्थानां ज्ञानार्थत्वात् ॥ नीतो भवति । ज्ञानसाधको भवतीत्यर्थः । न व्यर्थो भवतीति भावः । वै शब्दोऽप्यर्थः । सोऽपि कैमुत्यार्थकः । तथाहि यदा न्यासादिपूर्वके जपे प्रयुक्तोऽल्पकालोऽपि ज्ञानसाधनं भवति तदा सर्वायुस्तथा प्रणीतं चेत् ज्ञानसाधनमिति किमु वक्तव्यमिति । अनेन षट्शताधिकैकविंशति सहस्रश्वासानामेवाहोरात्र-मिवकालपरिगणनया शतवर्षपर्येतमायुःकथनपरायाः श्रुतेः सूर्योदयादिनिमित्तकालगणनया आयुषो नियमाभावान्न विरोध इत्युक्तं भवति । सूर्योदयादिना शतवर्षाधिक्येऽपि योगिनां श्वासगणनया शतवर्षपूर्त्यभावात् । किञ्च भगवतएवायुर्हरणे स्वातन्त्र्येण सूर्यस्य तत्रास्वातन्त्र्यं चोक्तं सिध्यति । यद्वा । उत्तमश्लोकवार्तया ऋते यः क्षणोऽस्ति स तस्य विष्णोः अनीत एव असमर्पित एवेत्यर्थः । यद्वा तस्य विष्णोः श्लोकवार्तया ऋते यः क्षणोऽनीतः न नीतः अपि तु श्लोकवार्तयैव नीतः स पुरुष उत्तम इत्यर्थः ॥ १७ ॥

इति श्रीभागवते तृतीयोऽध्यायः ॥ २-३ ॥

॥ इति श्रीभागवते विरोधोद्धारे पांघरीश्रीनिवासविरचिते द्वितीयः स्कन्धः समाप्तः ॥ २ ॥

श्रीमद् भागवतसूक्तयः

प्रथमः स्कन्धः

१. अहो महीयसी जन्तोः जीविताशा ॥ (१२-२३)

२. इदं भागवतं नाम पुराणं ब्रह्म संमितम् ।
सर्ववेदेतिहासानां सारं सारं समुद्धृतम् ॥ (३-४०)

३. ईशस्य हि वशे लोको योषा दारुमयी यथा ॥ (६-७)

४. अणूनि तात महतां जीवो जीवस्य जीवनम् । (१२-४७)

५. किमन्यैः असदालापैः आयुषो यदसद्व्ययः ॥ (१६-७)

६. तद्वै धनुः त इषवः सरथो हयास्ते
सोऽहं रथी नृपतयो यत आमनन्ति ॥
सर्वं क्षणेन तदभूद सदीशरिक्तम् ।
भस्मन् हुतं कुहकराद्धमिवोप्तमूषे ॥ (१४-२१)

७. न कश्चित् म्रियते तावत् यावदास्त इहान्तकः । (१६-८)

८. नभः पतन्त्यात्मसमं पतत्रिणः तथा समं विष्णुमतिं विपश्चितः । (१८-२३)

९. न वितृप्यन्तिहि दृशः श्रियो धामाङ्गमच्युतम् । (१०-६२)

१०. न दत्तं युक्तमर्थिभ्यः आशया यत् प्रतिश्रुतम् । (१३-४०)

११. न यस्य कश्चिद् दयितोऽस्ति कर्हिचित्
द्वेष्यश्च यस्मिन् विषमामतिर्नृणाम् (८-३२)

१२. बन्धनं द्रविणादानं स्थानान्निर्यापणं तथा
एषहि ब्रह्मबन्धूनां वधो नान्योस्ति दैहिकः ॥ (७-५७)

१३. पिबत भागवतं रसमालयं मुहुरहो रसिकाः भुवि भावुकाः । (१-३)

१४. ब्रूयुः शिष्यस्य स्निग्धस्य गुरवो गुह्यमप्युता । (१-८)

१५. भवद्विधाः भागवताः तीर्थभूताः स्वयं प्रभो ।
तीर्थीकुर्वन्ति तीर्थानि स्वात्मस्थेन गदाभृता । (१२-१०)

१६. भवसिन्धुप्लवो दृष्टो हरिचर्यानुवर्णनम् । (६-८)

१७. मन्ये त्वां विषये वाचां स्नातमन्यत्र छन्दसात् । (४-१२)

१८. मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडम् ।
प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्मवित् (७-३६)

१९. मन्दस्य मन्दप्रज्ञस्य प्रायो मन्दायुषश्चवै ।
निद्रयाह्रियते नक्तं दिवाचाप्यर्थकामभिः ॥ (१६-१०)

२०. यैः कोपितं ब्रह्मकुलं राजन्यैरकृतात्मभिः ।
तत्कुलं प्रदहत्याशु सानुबन्धं शुचार्पितम् ॥ (७-४८)

२१. यमादिभिः योगपथैः कामलोभहतो मुहुः ।
मुकुन्दसेवया यद्वत् तथात्माद्धा न शाम्यति ॥ (६-३९)

२२. राज्ञो हि परमो धर्मः स्वधर्मस्यानुपालनम् । (१७-१५)

२३. स्वप्राणान् यः परप्राणैः प्रपुष्णात्यघृणः खलः ।
तद्वधः तस्य हि श्रेयः यद्दोषात् यात्यधः पुमान् । (७-३७)
स्वानुष्ठितस्य धर्मस्य संसिद्धिः हरितोषणम् । (२-११)

२४. सर्वं कालकृतं मन्ये भवतां च यदप्रियम् ।
स कालो यद्वशो लोको वायोरिव धनावलिः ॥ (९-२१)

२५. साधवः प्रायशो लोके परैः द्वन्द्वेषु योजिताः ।
न व्यथन्ति न हृष्यन्ति यत आत्मा गुणाश्रयः । (१८-५०)

२६. शमो दमः तपः साम्यं तितिक्षोपरतिः श्रुतम् ।
ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो धृतिः स्मृतिः ॥
स्वातन्त्र्य कौशलं कान्तिः सौभगं मार्दवं क्षमा ।
प्रागल्भ्यं प्रश्रयः शीलं सह ओ जो बलं भगः ॥
गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्ति र्मानोऽनहंकृतिः ।
इमे चान्ये च भगवन् चिन्त्या यत्र महागुणाः
प्रार्थ्या महत्वमिच्छद्भिः न च यान्ति स्म कर्हिंचित् (१६- २७-३०)

२७. विपदः सन्तु नः शश्वत् तत्र तत्र जगत्पते
भवतो दर्शनं यत् स्या दपुनर्भवदर्शनम् ॥ (७-२८)

द्वितीयः स्कन्धः

१. अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥ (३-१०)

२. आयुर्हरति वै पुंसां उद्यन्नस्तं च यन्न सौ ।
तस्यर्ते यः क्षणो नीतः उत्तमश्लोक वार्तया ॥
तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्त्युत ।
न खादन्ति न मेहन्ति किं ग्रामपशवोऽपरे ॥

श्वविड्वराहोष्ट्रखरैः स तुल्यः पुरुषः पशुः ।
न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ॥
बिले बतोरुक्रमविक्रमान्ये न शृण्वतः कर्ण पुटे नरस्य ।
जिह्वाऽसती दर्दु रिकेव सूत नचेत् प्रगायत्युरुगाय गाथाम् ॥
भारः पट्टकिरीट जुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम् ।
शावौ करौ नो कुरुतः सपर्यां हरेः लसत्काञ्चनकङ्कणौ वा
बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये ।
पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ॥
जीवच्छवो भागवताङ्घ्रिरेणुं न जातु मर्त्योभिलषेत यस्तु ।
श्रीविष्णुपद्यामनुजस्तुलस्याः श्वसच्छवो यस्तु नवेद गन्धम्
तदश्मसारं हृदयं बतेदं यद् गृह्यमाणैः हरिनामधेयैः
न विक्रियेताथ मुखे विकारो नेत्रे जलं गात्ररुहेषु हर्षः । (३- १७-२४)

३. को निर्वृतो हरिकथासु रतिं न कुर्यात् । (३-१२)

४. किं प्रमत्तस्य बहुभिः परोक्षैर्होयनैरिह ।
परं मुहूर्तं विदितं घटते श्रेयसे यतः । (१-१२)

५. चीराणि किं पथि न सन्ति दिशन्ति भिक्षाम् ।
नो वा ङ्घ्रिपाः परभृतः सरितोप्यशुष्यन् ॥
रुद्धाः गुहाः किमवधूतसुहृन्न कृष्णः ।
कस्माद् भजन्ति कवयो धनदुर्मदान्धान् ॥ (२-५)

६. श्रोतव्यानीह राजेन्द्र नृणां सन्ति सहस्रशः ।
अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनाम् । (१-२)

७. सत्यां क्षितौ किं कशिपोः प्रयासैः ।
बाहौ स्वसिद्धे ह्युपबर्हणैः किम् ॥
सत्यञ्जलौ किं पुरुपर्णपात्रैः
दिग्वस्त्रलाभे सति किं दुकूलैः ॥ (२-४)

८. तपस्विनो दानपराः यशश्विनो मनस्विनः मन्त्रविदः सुमङ्गलाः ।
क्षेमं न विन्दन्ति विना यदर्पणम् । तस्मै सुभद्रश्रवसे नमः ॥ (४-१६)

९. निद्रया ह्रियते नक्तं व्यवायेन नवं वयः
दिवाचार्थेहया राजन् कुटुम्बभरणेन वा ॥
देहापत्यकलत्रादिष्वात्मदैन्येष्वसत्स्वपि
तेषु प्रसक्तो निधनं पश्यन्नपि न पश्यति ॥
तस्माद् भारत सर्वात्मा भगवान् हरिरीश्वरः
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम् ॥ (१- ३-५)

श्रीः

श्रीमद्भागवतश्लोकानुक्रमणिका

प्रथमस्कन्धः

ब, भ

म, य

श्रीः

द्वितीयस्कन्धः

महर्षि श्रीवेदव्यासप्रणीतम्

श्रीमद् भागवतम्

श्री आनन्दतीर्थविरचित श्रीमद् भागवत तात्पर्य निर्णयेन
श्री यदुपत्याचार्यविरचित भागवतप्रकाशिकया च सहितम्

प्रथमं सम्पुटम्
(प्रथमद्वितीयस्कन्धौ)

Edited by
Prof. K.T. Pandurangi
Formerly Prof. of Sanskrit, Bangalore University
Hon.Director Dvaita Vedānta Studies and Research Foundation
Upakulapathi Poornaprajñavidyāpeetha, Bangalore

1997

Published by
Dvaita Vedanta Studies and Research Foundation
No.33/163, 10th Main Road, Jayanagar I Block, Bangalore-11.

Śrīmad Bhāgavatam with Tātparya nirṇaya of Śrī Ānandatīrtha and Prakāśikā of Yadupatyāchārya. Edited by Prof. K.T. Pandurangi and Published by Dvaita Vedānta Studies and Research Foundation No.33/163, 10th B -Main Road, Jayanagar I Block, Bangalore-560 011.

No. of Pages : 576

Price : Rs. 200 (25 Dollars)

Typesett and Printed by **Vāgartha Printonics,** 1-B, 3rd Cross, Girinagar, B'lore-85. Ph.: 627677

PREFACE

Mahābhārata Rāmāyaṇa and Bhāgavata have influenced Indian thought and culture for several millenia. The lessons delivered from the events and the characters described in this trinity still guide the conduct and the behaviour of our country men and women.

The Philosophical and theological import of these great works are brought out by a series of commentaries. Śrī Madhvāchārya has also written a brief commentary viz., Bhāgavata tātparyanirṇaya explaining the crucial philosophical and theological terms.

The glory of Viṣṇu and His incarnations form the central theme of Bhāgavata. All major incarnations of Viṣṇu and the episodes relating to major Bhaktas of Viṣṇu viz. Pralhāda, Dhruva etc are dealt with. Two important theological concepts viz, Bhakti and vairāgya are described through many episodes and events. Śuddha Bhāgavata dharma is the central message.

The commentaries of Śrī Yādavārya, Śri Satyadharma, Śrī Vyāsatatvajña, Śrī Śrīnivāsathīrtha, Śrī Chetty and Śrī Lingeri bring out the theme and the message of Bhāgavata fully. Dvaita Vedānta Foundation has decided to produce critical editions of these commentaries. These will be published in six volumes. The first volume consisting of first and second skandhas with Śrī Yādavārya's commentary is now published.

Prof. K.T. Pandurangi has edited this volume. He was able to procure a rare manuscript of Śrī Yādavārya's commentary from the Library of Śrī Uttaradi Matha. We thank Prof. Pandurangi for his painstaking effort, and Vāgartha Printonics for printing this Volume well.

N. Narasima Rau
Chairman
Dvaita Vedānta Studies and
Research Foundations

INTRODUCTION


Śrīmad Bhāgavatam

Śrīmad Bhāgavatam is a sacred work of multi dimensions. It contains Philosophy, theology, Mvsticism, mythology and a deep analyses of human psychology. Its multidimension nature is neatly summed up in a verse quoted by Śrī Madhvāchārya in his Bhāgavatatātparyanirṇaya.

अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः ।
गायत्रीभाष्यरूपोऽसौ वेदार्थपरिबृंहितः ॥
पुराणानां साररूपः साक्षात् भगवतोदितः ।
द्वादशस्कन्धसंयुक्तः शतविच्छेदसंयुतः ।
ग्रन्थोष्टादशसाहस्रः श्रीमद्भागवताभिधः ।

The Origin of Bhāgavata

According to the tradition it has originated from Nārāyaṇa and is handed down in two lines as under:



In the first line it has been oral upto Śrī Vyāsa and it was composed in the present form by Śrī Vyāsa. The second line probably was oral only. By the time of Vidura the composed form was also available and spread all over Bhāratavarṣa as a Sacred work. It is interesting to note that the two major recepients of Bhāgavata viz., Nārada and Vidura are Śūdras. This indicates that the Bhāgavata message was not confined to traivarṇikas only. It was meant for the moral and the spiritual uplift of the masses.

Bhāgavatamahātmya in Padmapurāṇa records an event of singing Bhāgavatam in the very presence of Nārāyaṇa by the gods and the sages.

एवं ब्रुवाणे सति बादरायणे मध्ये सभायां हरिराविरासीत् ।
प्रह्लादबल्युद्धव फाल्गुनादिभिः वृतः सुरर्षिः तमपूजयच्च ।
प्रह्लादः तालधारी तरलगतितयाचोद्धवः कांस्यधारी
वीणाधारी सुरर्षिः स्वरकुशलतया रागकर्ताऽर्जुनोऽभूत् ।
इन्द्रोऽवादीत् मृदङ्गं जयजयसुकराः कीर्तने ते कुमाराः ।
यत्राग्रे भावबक्ता सरसरचनया व्यासपुत्रो बभूव ।

This is a description of a typical gathering of Bhāgavata Saṁkīrtana. Such gatherings were held all along the centuries, captured the hearts of the masses and ennobled their conduct. Bhāgavata Saṁkīrtanas provided easthetic delight by the music and dances, and created social and moral awarness by the narration of the selfless and noble conduct of the pious personalities.

The Very circumstances under which Bhāgavata was composed bring out that its message is meant for the improvement of the quality of the human conduct.

At the close of Dvāpara age, sage Vedavyāsa found that people were loosing the strength of their conduct and it has to be remedied.

परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा ।
युगधर्मव्यतिकरं प्राप्तं भवि युगे युगे
भौतिकानां च भावानां शक्तिह्रासं च तत्कृतम् ।
अश्रद्धधानान् निस्सत्वान् दुर्मेधान् ह्रसितायुषः ।
सर्ववर्णाश्रमाणां यद्दध्यौ चिरममोघदृक् ॥ (भा. 1-15-16)

Vedavyāsa found that people were loosing their faith in good conduct, they had become weakminded and pervert. Even the material things were loosing their

strength. Therefore, he thought of restoring the order of society at all Verṇa as Āśrama levels and thought of Searching enduring means for the welfare of the society. The way he found was that of revitalising the intelectual tradition of the society. The Vedas were the foundation of the intelectual tradition. Vedic literature was a huge mass of literature He arranged them in four groups and each group into several branches. He composed Mahābhārata and eighteen Purāṇas.

ऋग्यजुः सामाथर्वाख्याः वेदाश्चत्वार उद्धृताः ।
इतिहासपुराणं च पञ्चमो वेद उच्यते । (भा. I-4-19)

Even after composing these and revitalising the intelectual tradition, he was not fully satisfied. He thought his task is not yet complete. He sat on the bank of Sarasvati river and pondered.

नातिप्रसन्नहृदयः सरस्वत्यास्तटे शुचौ ।
वितर्कयन् विविक्तस्थ इदं चोवाच धर्मवित् ।। (भा. I-4-26)

किं वा भागवता धर्माः न प्रायेण निरूपिताः
प्रिया हि परमहंसानां त एवहि अच्युतप्रियाः । (भा. I-4-30)

He found out that the Bhāgavata conduct was not fully explored in Veda or Itihāsa Purāṇa.

At this juncture Nārada arrives at the spot and confirms Śrī Vedavyāsa's idea of the need of the exposition of भागवतधर्म.

तस्यैवं खिन्नमात्मानं मन्यमानस्य खिद्यतः ।
कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतम् । (भा. I-4-31)

यथा धर्मादयो ह्यर्थाः मुनिवर्यानुवर्णिताः ।
न तथा वासुदेवस्य महिमाह्यनुवर्णितः ।। (भा. I-5-9)

The episode of Nārada

In order to explain as to how Bhāgavatadharma lifts the man to the higher level, Nārada narrates his own past life. In my previous birth I was born as a son of a maid servant serving at the houses of learned men. I had the opportunity to serve these learned men in my boyhood. The learned men imparted the sacred knowledge that was directly received from the God. They told me that the very activities that bind the man in samsāra will take him out of it if these are performed in dedication to the

God. It is wellknown that the very items that cause illness help to remove the same if properly used. It is this approach that gave me knowledge and success.

अहं पुराऽतीतभवेऽभूवं दास्यास्तु कस्याश्चन वेदवेदिनाम् ।
निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षताम् ॥ २३ ॥

तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाश्रुणवं मनोहराः ।
ताः श्रद्धया मेऽनुसवं विश्रुण्वतः प्रियश्रवस्याङ्गतदाभवन्मतिः॥ २६ ॥

श्रद्धधानस्य बालस्य दान्तस्यानुचरस्य च
ज्ञानं गुह्यतमं यत्तत्साक्षात् भगवतोदितम् ।
अन्ववोचन् गमिष्यन्तः कृपया दीनवत्सलाः ॥ ३० ॥

आमयोऽयं च भूतानां जायते येन सुव्रत ।
तदेव हि आमयद्रव्यं यत् पुनाति चिकित्सितम् ॥ ३३ ॥

एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः ।
त एवात्मविनाशाय कल्पन्ते कल्पिताः परे ॥ ३४ ॥

इमं स्वधर्मनियमवेत्य मदनुष्ठितम् ।
अदान्मे ज्ञानमैश्वर्यं स्वस्मिन् भावं च केशवः ॥ ३९ ॥

Nārada further informs that his mother loved him deeply. She died bit by the snake, he was left alone, and wandered in the forest. He sat under a pippala tree and pondered over God's glory. He realised that the God regulates the man in all the states viz., dream, deep sleep, waking etc. As he went on meditating he had the vision of the God. He was thrilled by it. The vision disappeared. He went into meditation again to have the vision of the God again. However, the God informed him through the airial voice that he cannot have a full vision now. You will have my vision when you are born as the son of Brahmā. However, you retain the memory of your earlier birth.

एकात्मजा मे जननी योषिन्मूढाच किङ्करी ।
मय्यात्मजेऽनन्यगतौ चक्रे स्नेहानुबन्धनम् ॥ (I-6-6)

एकदा निर्गतां गेहाद् दुहन्तीं निशिगां पथि ।
सर्पोऽदशत् पदा स्पृष्टः कृपणां कालचोदितः ॥ ९ ॥

तस्मिन्निर्जनेऽरण्ये पिप्पलोपस्थ आश्रितः ।
आत्मनात्मानमात्मस्थं यथाश्रुतमचिन्तयम् ॥ ७ ॥

स्वप्नो माया ग्रहः शय्या जाग्रदाभास आत्मनः ।
नामरूपक्रिया वृत्तिः संविच्छास्त्रं परं पदम् ॥ १७ ॥

ध्यायतश्चरणाम्भोजं भावनिर्वृतचेतसः ।
उत्कण्ठाश्रुकलाक्षस्य हृद्यासीन्मे शनैः हरिः ॥ २० ॥

रूपं भगवता यत्तन्मनः कान्तं सुखावहम् ।
अपश्यन् सहसोत्तस्थौ केवल्याद्दुर्मना इव ॥ २२ ॥

दिदृक्षुः तदहं भूयः प्रणिधाय मनो हृदि ।
वीक्ष्यमाणोपि नापश्यमवितृप्त इवातुरः ॥ २३ ॥

एवं यतन्तं विजने मामाहागोचरो गिराम् ।
गम्भीरया श्लक्ष्णया वाचा शुचः प्रशमयन्निव ॥ २४ ॥

हन्तास्मिन् जन्मनि भवान्नमां द्रष्टुमिहार्हति ।
अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनाम् ॥ २५ ॥

सकृद् यद्दर्शितं रूपमेतत्कामायमेऽनघ ।
मत्कामः शनकैः साधु सर्वान् मुञ्चति हृच्छयान् ॥ २६ ॥

मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित् ।
प्रजासर्गनिरोधेपि स्मृतिश्च मदनुग्रहात् ।

In this way Nārada was assured God's full vision in due course. Nārada spent all his life in the नामसंकीर्तन of the God, and listening to his glory in different avataras.

नामान्यनन्तस्य गतत्रपः पठन् गुह्यानि भद्राणि कृतानि च स्मरन् ।
गांपर्यटन् तुष्टमनाः गतस्पृहः कालं परीक्षन्नपटो विमत्सरः ॥ ३० ॥

At the close of the Kalpa, Nārada entered into the breath of Virincha and came out at the commencement of the next Kalpa.

कल्पान्त इदमादाय शयानेऽम्भस्युदन्वतः ।
शिशयिष्णोरनुप्राणं विवेशान्तरहं विभो ॥ ३३ ॥

सहस्रयुगपर्यन्त उत्त्थायेदं सिसृक्षतः ।
मरीचिमिश्रा ऋषयः प्राणेभ्योऽहं च जज्ञिरे ॥ ३४ ॥

The whole of Nārada episode is intended to bring home the point that there was a need to provide a text that created an awareness of devotion to the God, and the performence of duties in dedication to God. It should not be taken in the superficial sense that Śrī Vedavyāsa felt depressed even after arranging the Veda and composing Mahābhārata, and Nārada suggested to him to compose Bhāgavata to overcome his depression. Vedavyāsa very much knew the task of his avatāra and Nārada also knew that Vyāsa was an incarnation of the God and did not require any advice from him to compose Bhāgavata. It is the style of Epics and Purāṇa to introduce a dialogue to explain the need of a task before it is started. This does not mean any inadequacy or ignorance on the part of the great persons who enter into such dialogue. It is only a way of initiating the topic.

The central theme of Bhāgavata

Even before the introduction of the Nārada episode to explain the circumstances of the composition of Bhāgavata Śaunaka asks sūta to narrate the story and the glory of Śrī Kṛṣṇa and his other incarnations. He is already aware of the central theme of Bhāgavata and interested in listenning to it.

सूत जानासि भद्रंते भगवान् सात्त्वतां पतिः ।
देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया ॥ १२ ॥

तन्नः शुश्रूषमाणानामर्हस्यङ्गानुवर्णितुम् ।
यस्यावतारो भूतानां क्षेमाय विजयाय च ॥ १३ ॥ (I-1-12, 13)

आख्याहि हरेर्धीमन्नवतारकथाः शुभाः
लीलां विदधतः स्वैरमीश्वरस्यात्ममायया ।
कृतवान् किल वीर्याणि सह रामेण केशवः
अतिमर्त्यानि भगवान् गूढः कपटमानुषः ॥ २० ॥

Sūta's response to this request of Śaunaka is quite interesting. He offers his salutations to Vedavyāsa describing him as overhelmed with emotions when his son Śuka desired to renounce everything and move into deep forest. When Śuka started moving into the forest Vyāsa bursts out as 'O my son' this was echoed by the trees of the forest also.

यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ।
पुत्रेति तन्मयतया तरवोपि नेदुः तं सर्वभूतहृदयं मुनिमानतोऽस्मि । (I-2-2)

It is also interesting to note that after salutations to Vedavyāsa Suta recites a verse which verbetum agrees with the first verse of Mahābhārata.

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वती व्यासं ततो ग्रन्थमुदीरये ।

It is a benediction offered by Sūta before he commences his discourse. He complements Śaunaka and other sages for their interest in the story of Śrī Kṛṣṇa.

मुनयः साधु पृष्टोऽहं भवद्भिः लोकमङ्गलम् ।
यत्कृतः कृष्णसम्प्रश्नः येनात्माशु प्रसीदति ॥ ५ ॥

वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानं यदहैतुकम् ॥ ७ ॥

He brings home the point that all vedas declare the glory of Vāsudeva, all our activities should be dedicated to him, all our knowledge should cover him only, and he is our final goal.

वासुदेवपरा वेदाः वासुदेवपराः मखाः
वासुदेवपरा योगाः वासुदेवपराः क्रियाः
वासुदेवपरं ज्ञानं वासुदेवपरं तपः ।
वासुदेवपरो धर्मो वासुदेवपरा गतिः । (I-2-29.30)

Proceeding further Sūta describes the incarnations of the God. These are (1) Sanatkumāra (2) Saukara i.e. Varāha (3) Devarśi i.e., Mahidāsa (4) Nara Nārāyaṇa (5) Kapila (6) Atriputra (7) Yajña (8) Nābhi (9) Pṛthu (10) Matsya (11) Kūrma (12) Dhanvantari (13) Mohini (14) Narasimha (15) Vāmana (16) Paraśurāma (17) Vedavyāsa (18) Rāma (19) Balarāma (20) Kṛṣṇa (21) Buddha (22) Kalki.

Among these Nara, Pṛthu and Rāma i.e., Balarāma, are not incarnations. These have only विशेषावेश i.e., special presence of the God. Though a limited number of incarnations are stated here, the God has innumerable incarnations.

अवतारा हि असंख्येयाः हरेः सत्त्वनिधेः द्विजाः ॥ २६ ॥

All incarnations of the God are equal

An important point to be noted here is that all incarnations are equal. These are all स्वांशकलाः, i.e., स्वरूपांश. All these are the same as the incarnation of Kṛṣṇa. Śrī Kṛṣṇa is मूलरूपी पद्मनाभ himself and all other incarnations are also so.

एते स्वांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ॥ २८ ॥

The implication of this statement is explained as एते परमपुरुषस्य स्वांशकलाः स्वरूपांशावताराः न तत्रांशांशिनोर्भेदः । किमुक्तं भवति । कृष्णो भगवान् स्वयंतु भगवान् मूलरूपी भगवान् स्वयमेव । The Avatāras stated here are स्वरूपांश of मूलरूपी पद्मनाभ. कृष्ण also is so. This statement should not be taken to mean that Kṛṣṇa alone is mūlarūpa and all other avatāras are not equal to him. It means that all avatāras are svarūpāmśa of Mūlarūpa, and Kṛṣṇa is also so. This becomes more clear if we take into account the earlier statement.

ऋषयो मनवो देवाः मनुपुत्राः महौजसः
कलाः सर्वे हरेरेव सप्रजापतयः स्मृताः ।

Here kalā means भिन्नांशाः. The ऋषि, मनु etc., stated here are only kalā i.e., भिन्नांश While the avatāras of the God including Kṛṣṇāvatāra are svarūpāmśa. The contrast here as स्वरूपांश and भिन्नांश is not between Kṛṣṇāvatāra and other avatāras but between God's all avatāras and ऋषि, मनु, etc., others. All avatāras are स्वरूपांश while ऋषि, मनु etc., are भिन्नांश.

Narrating the avatāras of the God and especially mentioning Kṛṣṇa, sūta states that to describe the glory of these avatāras and especially that of Śrīkṛṣṇa, Bhāgavata has been composed by Vedavyāsa.

इमं भागवतं नाम पुराणं ब्रह्म संमितम् ।
उत्तमश्लोकचरितं चकार भगवान् मुनिः ॥ (I-3-40)

The meeting of Vedavyāsa and Nārada in this connection is already explained. After Nārada left, Vedavyāsa composes Bhāgavata at his āśrama i.e., Śamyāprāsa situated on the bank of Sarasvati and teaches it to his son Śuka

ब्रह्मनद्याः सरस्वत्याः आश्रमः पश्चिमे तटे ।
शम्याप्रास इति प्रोक्तः ऋषीणां सत्रवर्धनः ॥ २ ॥ (I-7-2)
तस्मिन् ऋष्याश्रमे व्यासो बदरीषण्डमण्डिते
आसीनोप उपस्पृश्य प्रणिदध्यौ मनश्चिरम् ॥ ३ ॥

अपश्यत् पुरुषं पूर्णं मायांच तदपाश्रयाम् ॥ ४ ॥

यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे ।
भक्तिरुत्पद्यते पुंसां शोकमोहभयापहा ॥ ७ ॥

स संहितां भागवतीं कृत्वानुक्रम्य चात्मजम् ।
शुकमध्यापयामास निवृत्तिनिरतं मुनिम् ॥ ८ ॥

Teaching Bhāgavata to Śuka, had a purpose behind it. Vedavyāsa knew that king Parikṣit will meet his death in an unforseen situation and he needs full consolation. Only Bhāgavata could provide him such a consolation. Bhāgavata message had to be delivered to him by no less a person than Śuka. Though Śuka had completely renounced the world, he blessed the depressed by delivering Bhāgavata message to them. Parikṣita was one such person who needed such a favour. To bring the story to this point the narration of the whole story of the Parikṣit and the happenings of the last few days of Mahābhārata war was necessary. This follows from the seventh chapter of Bhāgavata.

सवै निवृत्तिनिरतः सर्वत्रोपक्षेपको मुनिः ।
कस्य वा बृहतीमेतामात्मारामः समभ्यसत् ॥ ९ ॥

आत्मारामाश्च मुनयो निर्ग्रान्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिं इत्थंभूतगुणो हरिः ॥ १० ॥

हरेर्गुणाक्षिप्तमतिर्भगवान् बादरायणिः
अध्यगान्महदाख्यानं नित्यं विष्णु जनप्रियम् ॥ ११ ॥

परीक्षितोऽथराजर्षेः जन्मकर्मविलापनम् ।
संस्थांच पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयाम् ॥ १२ ॥

The episode of Parīkṣit

The episode of Parikṣit begins with his death and also ends with his death. He was born dead but his life was revived by Śrī Kṛṣṇa.

अश्वत्थाम्ना विसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा ।
उत्तराया हतो गर्भः ईशेनोज्जीवितः पुनः । (I-11-1)

Parikṣit's birth as dead has a series of tragic events preceding it. When Duryodhana was finally destroyed by Bhīmasena breaking his thigh, and he was

lying at the battle field Aśvathāmā meets him. Even at that tragic moment Duryodhana asks him to do two favours to him viz., (1) to kill all scions of Pāndavas, (2) To beget a son in Duryodhana's wife to put on the throne. In persuence of this Aśvathāmā proceeds to the Pāndava's camp and kills all the sons of Draupadi. This enrages Draupadi and she breaks in tears. Arjuna consoles her and promises to bring the head of Aśvatthāmā.

भर्तुः प्रियं द्रौणिरिति स्म पश्यन् ।
कृष्णासुतानां स्वपतां शिरां सि ।
अपाहरत् विप्रियमेतदस्य विगर्हयन्ती ॥ १४ ॥

माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्यमाना ।
तदा रुदद्बाष्पकलाकुलाक्षी तां सान्त्वयन्नाह किरीटमाली ॥ १५ ॥

तन्मा शुचस्ते प्रमृजाशु भद्रे ।
यद् ब्रह्मबन्धोः शिर आततायिनः ।
गाण्डीवमुक्तैः विशिखैरुपाहरे ॥ १६ ॥

Accordingly Arjuna pounces upon Aśvatthāmā who starts running. However, he finds that he cannot escape from Arjuna and decides to use his ब्रह्मास्त्र against him. Arjuna is baffled by the sudden outburst of the fire and appeals to Kṛṣṇa to identify it and advise him the proper remedy for it. Kṛṣṇa informs him that Aśvatthāmā has thrown Brahmāstra. He does not know how to withdraw it. Therefore, You also throw the same to counter it. Arjuna does so and finds that the brahmāstras are playing havoc and destroying the entire population like samvartak fire at the time of pralaya. At the suggestion of Kṛṣṇa he withdrawas both. He binds Aśvatthāmā like a beast and drags him towards his camp.

i) अभ्यद्रवत् दंशित उग्रधन्वा कपिध्वजो गुरुपुत्रो रथेन ॥ १७ ॥

ii) यदाऽशरणमात्मानमैक्षत श्रान्तवाहनम् ।
अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः ॥ १९ ॥

अपोपस्पृश्य सलिलं सन्दधेऽस्त्रं समाहितः ।
अजानन्नपि संहारं प्राणकृच्छ्र उपस्थिते ॥ २० ॥

ततः प्रादुष्कृतं तेजः प्रचण्डं सर्वतोदिशम् ।
प्राप तत्तदभिप्रेक्ष्य विष्णुं जिष्णुरुवाचह ॥ २२ ॥

किमिदं स्वित् कुतोवेति देव देव न वेद्म्यहम् ।
सर्वतोमुखमायाति तेजः परमदारुणम् ।। २६ ।।

iii) वेत्त्थेदं द्रोणपुत्रस्य ब्राह्ममस्त्रं प्रदर्शितम् ।
नैवासौ वेद संहारं प्राणबाध उपस्थिते ।। २७ ।।

नह्यस्यान्यतमं किञ्चिदस्त्रं प्रत्यवकर्षणम् ।
जह्यस्त्र तेज उन्नद्धमस्त्रजोह्यस्त्रतेजसा ।। २८ ।।

iv) श्रुत्वा भगवता प्रोक्तं फल्गुनः परवीरहा ।
स्पृष्ट्वापः तं परिक्रम्य ब्राह्मं ब्राह्माय सन्दधे ।। २९ ।।

दृष्ट्वाऽस्त्रतेजस्तु तयोः त्रीन् लोकान् प्रदहन् महत् ।
दह्यमानाः प्रजाः सर्वाः सांवर्तकममंसत् ।। ३१ ।।

प्रजोपप्लवमालक्ष्य लोकव्यतिकरं च तम् ।
मतं च वासुदेवस्य सञ्जहारार्जुनो द्वयम् ।। ३२ ।।

तत आसाद्य तरसा दारुणं गौतमीसुतम् ।
बबन्धामर्षताम्राक्षः पशुं रशनया यथा ।। ३३ ।।

While Aśvatthāmā was being dragged to his camp, Kṛṣṇa tells Arjuna to kill him and not let him out. He has killed sleeping children and you have promised to Draupadi that you will cut his head. By this advice Kṛṣṇa only wanted to know whether Arjuna is swayed by the anger or stands by dharma. On arrival at the camp he presents Aśvatthāma before Draupadi. She pleaded that he should be let off. He is your Guru's son. Let not his mother have tears of grief. Such of the Kṣatriyas who have harmed the Brahmaṇa have not prospered. This line of argument of Draupadi was endorsed by Yudhiṣṭhira also. However, Bhīma retorted that he should be killed since he has mercilessly killed the sleeping children. At this stage Kṛṣṇa intervenes and states that please act in such a way that Draupadi is consoled and Bhīma is also satisfied. Taking this hint from Kṛṣṇa Arjuna removed the gem from the head of Aśvatthāmā and let him off. If a Brahmin is imprisoned, sent out of the place or bribed it is as good as killing him.

i) शिबिराय निनीषन्तं रज्ज्वा बद्ध्वा रिपुं बलात् ।
प्राहार्जुनं प्रकुपितो भगवानम्बुजेक्षणः ।।

मैनं पार्थार्हसि त्रातुं ब्रह्मबन्धुमिमं जहि ।
योऽसावनागसः सुप्तानवधीन्निशि बालकान् ॥

प्रतिश्रुतं च भवता पाञ्चाल्यै शृण्वतो मम ।
आहरिष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा ।
एवं परीक्षिता धर्मं पार्थः कृष्णेन चोदितः
नैच्छद्धन्तुं गुरुसुतं यद्यप्यात्महनं महान् ।

ii) अथोपेत्य स्वशिबिरं गोविन्दप्रियसारथिः ।
न्यवेदयत्तं प्रियायै शोचन्त्या आत्मजान् हतान् ॥

तथाहृतं पशुवत् पाशबद्धम् अवाङ्मुखं कर्मजुगुप्सितेन ।
निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृपया ननाम ॥ ४२ ॥

उवाचासहन्त्यस्य बन्धनानयनं सती ।
मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ॥ ४३ ॥

स एष भगवान् द्रोणः प्रजारूपेण वर्तते ।
तस्यात्मनोऽर्धं पत्न्यास्ते नान्वगाद् वीरसूः कृपी ॥ ४५ ॥

मा रोदीदस्य जननी गौतमी पतिदेवता ।
यथाहं मृतवत्सार्ता रोदिम्यश्रुमुखी मुहुः ॥ ४७ ॥

iii) धर्म्यं न्याय्यं सकरुणं निर्व्यलीकं समं महत् ।
राजा धर्मसुतो राज्ञ्याः प्रत्यनन्दत् वचो द्विजाः ॥ ४९ ॥

iv) तत्राहामर्षितो भीमः तस्य श्रेयान् वधः स्मृतः ।
न भर्तुरात्मनश्चार्थे योऽहन् सुप्तान् शिशून् वृथा ॥ ५१ ॥

v) ब्रह्मबन्धुर्नहन्तव्यः आततायी वधार्हणः ।
मयैवोभयमाम्नातं परिपाह्यनुशासनम् ॥ ५३ ॥

कुरु प्रतिश्रुतं सत्यं यत्तत् सान्त्वयता प्रियाम् ।
प्रियं च भीमसेनस्य पाञ्चाल्यै मह्यमेव च ॥ ५४ ॥

vi) अर्जुनश्च सहसाज्ञाय हरेर्हार्दमयासिना ।
मणिं जहार मूर्धन्यं द्विजस्य सहमूर्धजम् ॥ ५५ ॥

विमुच्य रशनाबद्धं बालहत्या हतप्रभम् ।
तेजसा मणिना हीनं शिबिरान्निरवापयत् ।
बन्धनं द्रविणादानं स्थानान्निर्यापणं तथा ।
एवं हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ॥ ५७ ॥

Mahābhārata Version of Aśvatthāmā's episode

The whole of this episode of Aśvatthāmā described in Bhāgavata though very close to what happened in reality, is not real. It is only the description of a dream of Aśvatthāmā experienced by him a little before the actual event. The actual event is quite different in certain important details. This is made clear in Mahābhārata tātparyanirṇaya.

स्वप्नेहि द्रौपदेयानां वधो दृष्टोऽत्मना निशि ।
अर्जुनेन प्रतिज्ञातं द्रौपद्यै स्ववधं प्रति ।
निबध्यानयनंचैव तेनैव शिबिरं प्रति ।
मुञ्चेति द्रौपदी वाक्यं नेति भीमवचस्तथा ।
कृष्णवाक्यात् मणिं हृत्वा देशनिर्यापणं तथा ।
इत्यादिस्वप्नदृष्टं यत् प्रायः सत्यमभूदिति । (ता.नि.28-190-192)

The Mahābhāratatātparyanirṇaya also mentions the context in which Aśvatthāmā got this dream and also the idea to kill the children of Pāṇḍavas. Aśvatthāmā meets Duryodhana when he was on his death bed and promises that he would destroy all the scions of Pāṇḍavas. On his way to Pāṇḍvas' camp to achieve his objective he sleeps under a Nyagrodha tree. He sees an owl destroying thousands of crows resting on that tree during the night. This gives him an idea to destroy the sons of Pāṇḍvas in the same way at the night when they are asleep. He dreams the consquences of his killing the sons of Pāṇḍavas as narrated above. The events of this dream are described in Bhāgavata. The Mahābhārata tātparyanirṇaya narrates these events as under :

तदैव हार्दिक्य कृपान्वितोऽयात् सुयोधनं द्रोणिरमुं शयानम् ।
प्रभग्नसक्थि श्वसृगालभूतैः सम्भक्ष्यमाणं ददृशे श्वसन्तम् ।
स दुःखशोकाभिहतो विनिन्द्य पार्थान् मया भूप किमत्र कार्यम् ।

इत्याह निष्पाण्डवतां कुरुष्वेत्यमुं व्यधात् पांस्वभिषेकिणं नृपः ।
उच्छिद्य सन्ततिं पाण्डोः कृत्वा स्वक्षेत्रसन्ततिम् ।

तया भूरक्षणहृदा सोऽभिषिक्तः तथेत्यगात् ।
स कृष्णभीमपार्थानां भयादेव पुनर्वनम् ।
कृपसात्त्वतसंयुक्तो विवेश गहनं रथी ।
तस्य चिन्तयतो द्रोणवधं दुर्योधनस्य च ।
नागान्निद्रा निशीथे च ध्वांक्षान्यग्रोधवासिनः ।
हतान् सुबहुसाहस्रा नेकेनातिबलेन तु ।
कौशिकेन निरीक्ष्यैव प्राह तौ कृपसात्त्वतौ ।
निदर्शनेनैतेन प्रेरितः परमात्मना ।
यामि पाण्डुसुतान् हन्तुमित्युक्त्वाऽरुरुहे रथम् । (28-119-125)

Mahābhāratatātparyanirṇaya that informs us that the events described in Bhāgavata are the events dreamt by Aśvatthāmā gives an account of the events as these actually happened.

Aśvatthāmā who got the Suggestion from the act of the owl on the Nyagrodha tree proceeds to the camp of Pāṇḍavas. The elders in the camp had moved to Kauravas Camp at that night. Dṛṣṭadyumna and the children of Pāṇḍavas were only sleeping at the Pāṇḍava's camp. Aśvatthāmā moves in and kills Dṛṣṭadyumna. He kills the children. However, a servant of Dṛṣṭadyumna escapes. He informs Draupadi who was in the Kauravas Camp along with the Pāṇḍavas. She informs Bhīmasena. He quickly follows Aśvatthāmā. Finding himself in a difficult position. Aśvatthāmā employs Brahmāstra. At this stage Kṛṣṇa and Arjuna arrive. Kṛṣṇa instructs Arjuna to counter it by Brahmāstra. The situation was peculiar. No astra was capable of hurting Bhīma while Brahmāstra cannot be in vain. It is for this reason that Kṛṣṇa instructed Arjuna to prevent it. At this juncture Vedavyāsa arrives and stands between the two Brahmāstras. He asks both Arjuna and Aśvatthāmā to withdraw them. Arjuna agrees. However Aśvatthāmā was not able to do so as he had lost his Brahmacharya since he was asked to beget a son in Duryodhana's wife. In view of this difficulty Vedavyāsa asks him to hand over his crest gem to Bhīma and orally withdraw the Brahmāstra. He agrees but withdraws Brahmāstra only with reference to the five Pāṇḍavas. Kṛṣṇa suggests that he should withdraw it with reference to the child in the womb of Uttara also. He does not agree. Then, Kṛṣṇa declares, that he would protect the child. Kṛṣṇa curses him to wander in the forest with the foul smell and wounds all over his body. This version of the actual happennings is fully described in Mahābhārata tātparya nirṇaya following Mahābhārata description.

i) निदर्शनेन ह्येतेन प्रेरितः परमात्मना ।
यामि पाण्डुसुतान् हन्तुमित्युक्त्वा आरुरुहे रथम् ।
निवारितोपि ताभ्यां स प्राद्रवत् शिबिरं प्रति ॥ १२५ ॥

पारवताश्वं स तदा शयानमुपेत्य पद्भ्यां समताडयच्च ।
समक्षिपत् द्रोणिसुतोऽस्य कण्ठे निबध्य मौर्वीं धनुषोप्युरस्थः ।
ममन्थ कृच्छ्रेण विहाय देहं ययौ निजस्थानमसौ च वह्निः ॥ १४१ ॥

सर्वान् सव्यापसव्येन तथान्यान् पाण्डवात्मजान्
ऋत एकं भैमसेनिं काशिराजात्मजात्मजम् ।
तं तदन्तर्हितशर्वः कैलासमनयत् क्षणात् ॥ १४४ ॥

स चेदि पाञ्चालकरूशकाशीनन्यांश्च सर्वान् विनिहत्य वीरः ।
शिशून् स्त्रियश्चैव निहन्तुमुग्रः प्रज्वालयत् तच्छिबिरं समन्तात् ।
जिजीविषूस्तत्र पलायमानान् द्वारि स्थितौ गौतमसात्त्वतौ च ।
निजघ्नतुः पार्षतस्य सूतस्त्वेकः शेषितो दैवयोगात् ॥ १५० ॥

अन्यासक्ते समुत्थाय प्राद्रवत् यत्र पार्षती ।
तस्या अकथयत् सर्वं सा भीमायाह दुःखिता ।
प्राद्रवत् रथमारुह्य स धन्वी गौतमीसुतम् ॥ १५२ ॥

तदन्तरे द्रौणिरपि प्रयातः कृष्णासुतानां मुदितः शिरांसि ।
आदाय हार्दिक्यकृपानुयातो दुर्योधनं सन्निकृष्ट प्रयाणम् ॥ १५३ ॥

ii) तत्रैकलं द्रोणसुतं रथेन यान्तं रथी मारुतिरन्वधावत् ॥ १५५ ॥
आद्रवन्तं पुनर्दृष्ट्वा भीमं द्रोणात्मजो रुषा ।
आवृत्य युध्यन् विजितोऽस्त्रं ब्रह्मशिर आददे ॥ १५६ ॥

एतस्मिन्नन्तरे कृष्णो धर्मजेनार्जुनेन च ।
तत्रागमत्तदस्त्रं च भीमं चाव्यर्थतां नयन् ॥ १५७ ॥

अवध्यो भीमसेनस्तदस्त्रं चामोघमेव यत् ।
विष्णुनैवोभयं यस्मात् क्लृप्तं भीमोऽस्त्रमेव तत् ॥ १५१ ॥

तदस्त्रं प्रज्वलद्दृष्ट्वाऽपाण्डवत्वविधित्सया ।
धरायां द्रौणिना मुक्तं कृष्णेन प्रेरितोऽर्जुनः ।

स्वस्त्यस्तु द्रोणपुत्राय भूतेभ्यो मह्यमेव च ।
इति ब्रुवंस्तदेवास्त्रमस्त्रशान्त्यै व्यसर्जयत् ।। १६३ ।।

तथाप्यस्त्रद्वयं युक्तं भूतानां नाशकृद् ध्रुवम् ।
तस्मान्निवारयन् योगं तयोर्मध्येऽभवत् क्षणात् ।
निस्सीमशक्तिः परमः कृष्णः सत्यवतीसुतः ।

iii) संस्थाप्यास्त्रद्वयं दूरे तावाह पुरुषोत्तमः ।
निवर्त्यतामस्त्रमिति शक्रसूनुः तथाकरोत् ।। १७० ।।

निवर्तनाप्रभुं द्रौणिं वासुदेवोऽभ्यभाषत ।
क्षत्रतेजा ब्रह्मचारी कौमारादपि पाण्डवः ।
निवर्तने ततः शक्तो नायं द्रोणात्मजोपिसन् ।। १७२ ।।

अब्रह्मचर्यादित्युक्ते व्यासो द्रौणिमभाषत ।।
निवर्तनासमर्थस्त्वं देहि नैसर्गिकं मणिम् ।। १७३ ।।

जितः प्रागेव भीमेन भीमायैव महाप्रभम् ।
अपि केवलया वाचा पार्थेभ्योऽस्त्रं निवर्तय ।
इत्युक्तो मूर्धजं रत्नं जरामरणनाशनम्
क्षुत्तृट्श्रमहरं दिव्यं गन्धध्वान्तहरं शुभम् ।। १७५ ।।

उत्कृत्य भीमाय ददौ मुक्ताः पञ्चैव पाण्डवाः ।। १७६ ।।

iv) यादवेशोऽथ गौतम्याः सुतमाहैकसन्ततेः
वाचा निवर्तयास्त्रं त्वमित्युक्ते द्रौणिरब्रवीत् ।। १७ ।।

पक्षपातादिच्छसि त्वं भागिनेयस्य सन्ततिम् ।
तत्रैव पातयाम्यस्त्रमुत्तरागर्भकृन्तने ।। १७९ ।।

दुर्मते पश्य मे वीर्यं यत्ते शक्यं कुरुष्व तत् ।
उज्जीवयाम्यहं गर्भं यततः शक्तितोपि ते ।
सन्ततिर्वर्षसाहस्रं पाण्डवानां भवेद् भुवि ।। १८३ ।।

दुर्गन्धयुक्तः व्रणसञ्चिताङ्गः सदाचरः स्याद्विपिनेषु मन्दः ।
यावद्भुवि स्यादिह पार्थतन्तुः व्यासोपि तं प्राह तथेति देवः ।। १८७ ।।

The differences between Bhāgavata version and Mahābhārata version.

We may note the important differences between the dream version described in Bhāgavata and the actual happenings described in Mahābhārata tātparya nirṇaya.

1) In Mahābhārata Brahmāstra is thrown at Bhīma while in Bhāgavata it is thrown at Arjuna.

2) Both in Mahābhārata and Bhāgavata it is Arjuna who throws Brahmāstra at Aśvatthāmā.

3) In Mahābhārata Vyāsa intervenes and asks both Arjuna and Aśvatthāmā to withdraw Brahmāstra while in Bhāgavata Vyāsa does not figur in this context.

4) In Bhāgavata Arjuna removes the gem from the head of Aśvatthāmā and gives it to Draupadi, while in Mahābhārata Vyāsa asks Aśvatthāmā to hand over the gem to Bhīma and Bhīma gives it to Draupadi.

कृष्णायै तं मणिं दत्त्वा भीमस्तां पर्यसान्त्वयत् ।
विकोपा भीमवाक्यैन राज्ञे सा च मणिं ददौ ॥ १९१ ॥

5) A detailed account of Aśvatthāmā killing the sons of Pāṇḍavas is given in Mahābhārata.

6) The special power of the gem and Kṛṣṇa's curse to Aśvatthāmā to wander in the forest are mentioned in Mahābhārata.

These points are noted on the basis of Mahābhārata tātparyanirṇaya.

Describing the Brahmāstra episode as occurred in the dream, Bhāgavata proceeds to state Uttara's appeal to Kṛṣṇa, and Kṛṣṇa protecting her womb.

१) पाहि पाहि महायोगिन् देव देव जगत्पते ।
अभिद्रवति मामीश शरस्तप्तायसो विभो
कामं दहतु मां नाथ मा मे गर्भो निपात्यताम् । (I-8-12, 13)

अन्तस्थः सर्वभूतानामात्मा योगेश्वरो हरिः ।
स्वमाययाऽवृणोद्गर्भं वैराटयाः कुरुतन्तवे ॥ १७ ॥

२) अश्वत्थाम्ना विसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा
उत्तरायाः हतो गर्भः ईशेनोज्जीवितः पुनः । (I-11-2)

मातुर्गर्भगतो वीरः स तदा भृगुनन्दन ।
ददर्श पुरुषं कश्चिद् दह्यमानोऽस्त्रतेजसा ।

अङ्गुष्ठमात्रममलं स्फुरत् पुरटमौलिनम् ।
श्रीमद्दीर्घचतुर्बाहुं तप्तकाञ्चनकुण्डलम् ।
परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां मुहुः ।
विधमन्तं सन्निकर्षे पर्यैक्षत क इत्यसौ ।
मिषतो दशमासस्य तत्रैवान्तर्द धे हरिः । (II-11-7,9,10)

ततः सर्वगुणोदर्के सानुकूलग्रहोदये
जज्ञे वंशधरः पाण्डोर्भूयः पाण्डुरिवौजसा ।

Kunti's prayer to Śrī Kṛṣṇa

When the Pāṇḍavas were freed from the calamity of Brahmāstra Kunti offers her homage to Kṛṣṇa.

कृष्णाय वासुदेवाय देवकी नन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमोनमः । (१-८-२४)

She recounts the various calamities suffered by Pāṇḍavas and states that Kṛṣṇa protected them on all these occasions.

विषान्महाग्नेः पुरुषाददंशनादसत्सभायाः वनवासकृच्छ्रतः ।
मृधे मृधेऽनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेरभिक्षताः ।। २७ ।।

Kṛṣṇa protected the Pāṇḍavas from Kālkuta poisan, burning in the house of lac, demons like Baka, Hidimba etc., the humiliation at the dice play, living in the forest in exile, the battle field, and finally from Brahmāstra. Kunti prays that let me have more and more difficulties so that she will remember the God more and more.

विपदः सन्तु न शश्वत् तत्र तत्र जगत्पते ।
भवतो दर्शनं यत्स्यादपुनर्भव दर्शनम् ।। २८ ।।

Yudhiṣṭhira meets Bhīṣma

At the request of Kunti Kṛṣṇa postpones his return to Dvārakā. Yudhiṣṭhira feels very much dejected at the happenings of war and later. Kṛṣṇa advises him to meet Bhīṣma. They all go to Bhīṣma, Parvata, Nārada, Bhāradvāja, Renukāsuta etc., sages also gather there. Bhīṣma offers prayers to Kṛṣṇa.

एष वै भगवान् साक्षात् आद्यो नारायणः पुमान् ।
मोहयन् मायया लोकं गूढः वृष्णिषु चरति । (I-9-25)

Yudhiṣṭhira appeals to Bhīṣma to instruct him dharma. Bhīṣma explains the dharma in all its aspects.

युधिष्ठिरस्तदाकर्ण्य शयानं शरपञ्जरे ।
अपृच्छद्विविधान् धर्मान् ऋषीणामनुशृण्वताम् ॥ (I-9-31)

दानधर्मान् राजधर्मान् मोक्षधर्मान् विभागशः
स्त्रीधर्मान् भगवद्धर्मान् समासव्यासयोगतः ॥ ३४ ॥

धर्मार्थकाममोक्षांश्च सहोपायान् यथा मुने ।
नानाख्यानेतिहासेषु वर्णयामास धर्मवित् ॥ ३५ ॥

Describing the above dharmas and offering prayers to Kṛṣṇa Bhīṣma breaths his last.

कृष्णे एवं भगवति मनोवाग् दृष्टिवृत्तिभिः ।
आत्मन्यात्मानमाविश्य सोन्तःश्वास उपारमत् ॥ ५१ ॥

Yudhiṣṭira's benevolent rule over his kingdom

Then, Bhāgavata proceeds to describe the rule of Yudhiṣṭhira in the 10th chapter. Yudhiṣṭhira performs Aśvamedha sacrifice and commences his rule keeping in mind the advice given by Kṛṣṇa and Bhīṣma. The country prospers under his benevolent rule.

कामं ववर्ष पर्जन्यः सर्वकामदुघा मही ।
सिषिचुः स्म व्रजंगावः पयसा अत्यूधसो मुदा ।
नद्यः समुद्राः गिरयः सवनस्पतिवीरुधः ।
फलान्योषधयः सर्वाः काममन्वृतु तस्य वै
नाधयो व्याधयः क्लेशाः दैवभूतात्महेतवः ।
अज्ञातशत्रावभवन् जन्तूनां राज्ञि कर्हिचित् । (I-10-5-7)

Śrī Kṛṣṇa returns to Dvārakā

After Yudhisthira settled down in his kingdom Kṛṣṇa returns to Dvārakā. There is a beautiful description of the send off given to Kṛṣṇa which reflects a very high standard of culture and the good will.

उषित्वा हस्तिनपुरे मासान् कतिपयान् हरिः ।
आमन्त्र्यचाभ्यनुज्ञातः परिष्वज्याभिवाद्य तम् ।
आरुरोह रथं कश्चित् परिष्वक्तोऽभिवादितः । (10-8-9)

मृदङ्गशङ्खभेर्यश्च वीणापणवगोमुखाः ।
धुन्धुर्यानकघण्टाद्याः नेदुर्दुन्दुभयस्तथा ।
प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया ।
ववृषुः कुसुमैः कृष्णे प्रेमव्रीडस्मितेक्षणाः ।
सितातपत्रं जग्राह मुक्तादामविभूषितम् ।
रत्नदण्डं गुडाकेशः प्रियः प्रियतमस्य ह
उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते ।
विकीर्यमाणः कुसुमैः रेजे मधुपतिः पथि । (I-10-16-19)

The women who were watching such a grand send off given to Kṛṣṇa praise him with admiration. While praising him they recount the main events of his life.

Describing his journey, the various countries through which he moved are mentioned. This gives an idea of the ancient geography.

कुरु जाङ्गलपाञ्चालान् शूरसेनान् स यामुनान् ।
ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान् सारस्वतानथ ।
मरुधन्वमतिक्रम्य सौवीराभीरसैन्धवान्
आनर्तान् भार्गवोपगात् श्रान्तवाहो मनाग् विभुः (1-10-35-36)

Though the ancient Indian geography is studied by some scholars gathering the data from Purāṇas, it is not scientifically classified and a consolidated picture is evolved. Bhāgavata and other Purāṇas contain rich material on ancient Indian geography and related other matters. These give a rich picture of Indian Civilisation and Culture. However, proper attention is not paid to this aspect of Purāṇas both by the traditional exponants of Purāṇas and the modern Indologists. This has still remained a field for research as it has rich potential to reveal different aspects of Indian civilisation.

The Description of Dvārakā

Covering the above countries, Kṛṣṇa arrives at Dvāraka. He receives a warm welcome which again reveals the delicacy of Indian Culture.

१) मधुभोजदशार्हार्ह ककुरान्धक वृष्णिभिः ।
आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ।
सर्वर्तुसर्वविभवैः पुण्यवृक्षलताश्रमैः ।

उद्यानोपवनारामै धृतपद्माकरश्रियम् ।
गोपुरद्वारमार्गेषु कृतकौतुकतोरणम् ।
चित्रध्वजपताकाग्रैरन्तःप्रतिहतातपाम् ।
सम्मार्जितमहामार्गरथ्यापणकचत्वराम्
सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः
द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः ।
अलङ्कृतां पूर्णकुम्भैः बलिभिः धूपदीपकैः । (I-10-48-52)

२) निशम्य कृष्णमायान्तं वसुदेवो महामनाः
अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ।
वारणेन्द्रं पुरस्कृत्य ब्राह्मणैः ससुमङ्गलैः
प्रत्युज्जग्मूरथैः हृष्टाः प्रणयागत साध्वसाः
वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः ।
नट नर्तकगन्धर्वाः सूतमागधबन्दिनः
गायन्ति चोत्तमश्लोक चरितान्यद्भुतानि च । (I-10-53-47)

This description reveals the grandure of the life and culture of Indians which is now lost by the westernisation and mechanisation of the life. The delicate easthetic aspect of Indian Social and Cultural life is now devoured by the irritant and provocative vulgar culture.

Dhṛtarāṣṭra and Gāndhārī retire to the forest

After the departure of Kṛṣṇa Vidura who was on a piligrimage returns to Hastinapura. In the course of his piligrimage he received instructions from Maitraya in spiritual matters. Yama himself was born as Vidura due to the curse by Aṇimāndavya. Vidura advises Dhṛtarāṣṭra to retire to the forest. Dhṛtarāṣṭra and Gāndhāri leave for forest. When Yudhiṣṭira finds that Dhṛtarāṣṭra had left to some unknown place he feels depressed. However, Narada who arrives informs Yudhiṣṭira that Dhṛtarāstra has gone to Himalayas and he will die after five days. His wife Gāndhāri also will enter into the same fire. These events are briefly narrated in the twelveth chapter.

Yādavas fight and perish

After sometime, Yudhisṭira finds so many bad omens and entertains fears about Kṛṣṇa's welfare. He starts worrying as to why Arjuna who was sent to Dvāraka to

see Krişņa does not return from Dvāraka even after seven months. Whether the time of the departure of Kṛṣṇa has come?

i) सम्प्रस्थिते द्वारकायां जिष्णौ बन्धुदिदृक्षया ।
ज्ञातुं मायामनुष्यस्य वासुदेवस्यचेष्टितम् ॥

व्यतीताः कतिचिन्मासाः तदातु शतशो नृपः ।
ददर्श घोररूपाणि निमित्तानि भृगूद्वह ।
कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः ।
पापीयसीं नृणां वार्तां क्रोधलोभानृतात्मनाम् ॥

जिम्हप्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदम् ।
पितृमातृ सुहृद्भ्रातृ दम्पतीनां च कल्किताम् । (I-13-1-1 to 4)

ii) गताः सप्ताधुना मासाः भीमसेन तवानुजः ।
नायाति कस्य वा हेतो र्नाहं वेदेदमञ्जसा ॥

अपि देवर्षिणाऽऽदिष्टः स कालः समुपस्थितः ।
यदात्मनोऽङ्गमाक्रीडं भगवानुत्सिसृक्षति । (6-12)

iii) ऊर्वक्षिबाहवो मह्यं स्फुरन्त्यङ्ग पुनःपुनः ।
शिवैषोद्यन्तमरुणमभिरौत्यनलानना ॥

मामङ्ग सारमेयोऽयमभिधा वत्यभीतवत् ।
शस्ताः कुर्वन्ति मां सव्यं दक्षिणं पशवोऽपरे ॥

वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम ।
धूम्राः दिशः परिधयः कम्पते कुः सहाद्रिभिः ॥

असृग् वर्षन्ति जलदाः बीभत्समिव सर्वतः ।
सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि
नद्यो नदाश्च क्षुभिताः सरांसि च मनांसिच ॥
नज्वलत्यग्निराज्येन कालोऽयं किं विधास्यति ।
न पिबन्ति स्तनं वत्साः नदुह्यन्तिच मातरः ॥
देवतानि रुदन्तीव स्विद्यन्तिहि उच्चलन्ति च ॥

मन्य एतैर्महोत्पातैः नूनं भगवतः पदैः
अनन्यपुरुषश्रीभिः हीना भूर्हतसौभगा ।
इति चिन्तयतस्तस्य दृष्टारिष्टेन चेतसा
राज्ञः प्रत्यगमद् ब्रह्मन् यदुपुर्याः कपिध्वजः ॥ (XIII 11-22)

While Yudhiṣṭira was seeing these bad omens and worried about Kṛṣṇa's welfare. Arjuna arrives. He reports the sorrowful happennings of the fighting among Yadavas and Kṛṣṇa's return to Vaikuntha.

राजन् त्वयाभिपृष्टानां सुहृदां नः सुहृत् पुरे
विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः ।
वारुणीं मदिरां पीत्वा मदोन्मथितचेतसाम् ।
अजानतामिवात्मानं चतुःपञ्चावशेषिताः ॥ (I-14, 22,23)

The day Kṛṣṇa returns to Vaikuṇṭa Kali enters the world.

यदा मुकुन्दो भगवानिमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः ।
तदा हरावप्रतिबुद्धचेतसामभद्रहेतुः कलिरन्ववर्तत ॥ (I-15-5)

Yudhiṣṭira retires to the forest

Yudhiṣṭira observes the evil effects of the entry of the Kali and decides to retire to the forest.

युधिष्ठिरस्तत्परिसर्पणं बुधः पुरे च राष्ट्रेच गृहे तथात्मनि ।
विभाव्य लोभानृतजिम्हहिंसनाद्यधर्मचक्रं गमनाय पर्यगात् ॥ ७ ॥

He coronates his grand sone Parikṣit on the throne

स्वराट् पौत्रं विनीतं तमात्मनोऽनवमं गुणैः ।
तोयनीव्याः पतिं भूमेरभ्यषिञ्चद्गजाह्वये ॥ ७ ॥

He puts Vajra on the throne at Mathura, performs Prajāpati iṣti and then proceeds with his brothers to Himalayas.

They go to Narayanāśrama on Gandhamadana giri and give up their body. Draupadi also gives up her body.

King Parikṣit conquers Kāli

Then, Parikṣit rules over the Kingdom. He marries Iravati the daughter of Uttara, obtains Janamejaya etc four sons, performs Aṣvamedha and conquers Kali.

On hearing that Kali has entered his kingdom Parikṣit proceeds on an expedition. He covers the countries of Bhadrāśva Ketumāla etc. and happens to see Dharma and Dharā in a sarrowful condition.

यदा परीक्षित् कुरुजाङ्गले वसन् कलिं प्रविष्टं निजचक्रवर्तितो
निशम्य वार्तामनतिप्रियां ततः शरासनं संयुगरोचिराददे ।।

भद्राश्वं केतु मालं च भारतं चोत्तरान् कुरुन् ।
किम्पुरुषादीनि सर्वाणि विजित्य जगृहे बलिम् ।। (I-16, 11,12)

ii) तस्यैवं वर्तमानस्य पूर्वेषां वृत्तमन्वहम् ।
नातिदूरे किलाश्चर्यं यदासीत्तन्निबोधमे ।।

Parikṣit saw a cow and bull harassed by Kali who appeared in the form of a king. Parikṣit enquires the bull as to who he is and why he is only on one leg. The bull explains

तपः शौचं दया सत्यं इति पादाः कृते कृताः
अधर्मांशैः त्रयोभग्नाः स्मयसङ्गमदैस्तव ।
इदानीं धर्मपादस्ते सत्यं निर्वर्तसे यतः ।
तं जिघृक्षत्यधर्मोऽयमनृतेनैधितः कलिः ।। (I-17 23,24)

इयं च भूर्भगवता न्यासितोरुभरा सती ।
शोचन्त्यश्रुकला साध्वी दुर्भगेवोज्झिताधुना ।। २५ ।।

The bull explained that he is Dharma. His three legs viz. तपः, शौचं, दया are not functioning now due to the growth of the evils viz. स्मय, सङ्ग and मद. The remaining leg viz. सत्य is also being cut by अनृत by Kali. The cow is धरा i.e. the earth, who is in a sorrow full condition. On hearing this Parikṣit asks kali to leave his kingdom. Kali appeals that he may be given some place.

i) न वर्तितव्यं भवता कथञ्चित् क्षेत्रे मदीये त्वमधर्मबन्धुः ।
त्वां वर्तमानं नरदेवदेहेष्वनुप्रवृत्तोऽयमधर्मपूगः ।
लोभोऽनृतं चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दम्भः । (I-17-31)

ii) यत्र क्व वाऽथ वत्स्यामि सार्वभौम तवाज्ञया ।
तन्मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टुमर्हसि ।।

On the request of Kali Parikṣit grants four places for him viz dice, liquor, woman and killing animals, he further extends it to gold. The sources of Kali are stated to be lyings arrogance, lust, passion, and enemity.

अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ ।
द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः ।
पुनश्च याचमानाय जातरूपमदात् प्रभुः ।
ततोऽनृतं मदः कामो रजो वैरं च पञ्चमम् ।
अमूनि पञ्चस्थानानि ह्यधर्मप्रभवः कलिः । (I-17-35,37,38)

King Parikṣit is cursed to death

This Parikṣit who subdued Kali fell into a difficulty. He went deep into the forest following a deer. He became exhausted and thirsty. He went to a nearby aśrama. He found the ascetic in the aśrama sitting closing his eyes. As he did not receive proper welcome at the aśrama he lost his temper and put a dead snake lying nearby at the neck of the ascetic. The ascetic's son arrived and cursed the king that he would die on the seventh day bitten by Takṣaka. This was a turning point in Parikṣit's life.

i) एकदा धनुरुद्यम्य विचरन् मृगयां वने ।
मृगाननुगतः श्रान्तः क्षुधितस्तृषितो भृशम् ।
जलाशयमचक्षाणः प्रविवेश स आश्रमम् ।
ददर्शमुनिमासीनं शान्तं मीलितलोचनम् ।
अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः ।
ब्राह्मणं प्रत्यभूद् ब्रह्मन् मत्सरो मन्युरेव च ॥
स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा ।
विनिर्गच्छन् धनुष्कोट्या निधाय पुरमागमत् । (I-18,24,25,29,30)

ii) तस्य पुत्रोऽति तेजस्वी विहरन् बालकोऽर्भकैः ।
राज्ञाऽघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत्
इतो लङ्घितमर्यादं तक्षकः सप्तमेऽहनि ।
धक्ष्यति स्म कुलाङ्गारं चोदितो मे पितृद्रुहम् ॥ (I-18-32,37)

Parikṣit realised the blunder commited by him and decided to observe प्रायोपवेशन.

अथो विहायेममुमुञ्च लोकं विमृश्य तौ हेयतया पुरस्तात् ।
कृष्णाङ्घ्रिसेवामभिमन्यमानः उपाविशत् प्रायममर्त्यनद्याम् ॥

विहाय सर्वं नरदेवचिन्हं केयूरहाराङ्गदमौलिरत्नान् ।
रत्नाङ्गुलीयान् विमलान् निरस्य पवित्रपाणिर्मुनिवेष आस्ते ।
एवं च तस्मिन्नरदेवदेवे प्रायोपविष्टे दिविदेवसङ्घाः ।
प्रशस्य भूमौ व्यकिरन् प्रसूनैः मुदा मुहुर्दुन्दुभयश्च नेदुः ॥ (I-19-5,18,19)

Śuka teaches Bhāgavata to Parikṣit

At this stage Śuka the son of Vedavyasa arrived at that place. He was surrounded by a group of boys. He was just eight years old. He was an avadhūta.

तत्रागमद् भगवान् व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः ।
अलक्ष्यलिङ्गो निजलाभतुष्टो वृतश्चबालैरवधूतवेषः ॥ (I-20-1)

He was duly welcomed by Parikṣit and the sages present there. Parikṣit appeals to him to impart him that knowledge which is beneficial to a person who is on his death bed and who is not interested either in this world or heaven etc.

पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वदा ।
यच्छ्रोतव्यमथोजप्यं यत्कर्तव्यं नृभिः सदा ।
स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययम् ॥ (I-20-14)

Śuka informs Parīkṣit that he learnt Bhāgavata from his father and listening to it is the best remedy for all worldly ills. King Khatvānga who came to know that very little of is life his left renounced everything in the world and attained Hari. For you seven days of your life only are left. Therefore you concentrate on that which will liberate.

II

इदं भागवतं नाम पुराणं ब्रह्मसंमितम् ।
अधीतवान् द्वापरादौ पितुर्द्वैपायनादहम् ।
खट्वाङ्गो नाम राजर्षिः ज्ञात्वेयत्तामिहायुषः ।
मुहूर्तात् सङ्गमुत्सृज्य गतवानभयं हरिम् ॥
उपकल्पय तत्सर्वं यत्तावत् साम्परायिकम् ॥ (II-1-8, 13,14)

Virāt form of the God

Śuka advises Parīkṣit to concentrate on the Virat form of the God and describes the Virat form in detail.

जितासनोजितश्वासो जितसङ्गो जितेन्द्रियः ।
स्थूले भगवतो रूपे मनः सन्धारयेद्धिया ।। (II-1-23)

१. आण्डकोशे शरीरेऽस्मिन् सप्तावरणसंयुते ।
वैराजः पुरुषो योऽसौ भगवान् धारणाश्रयः।
पातालमेतस्य हि पार्श्वमूलं पठन्ति पार्ष्णिप्रपदे रसातलम् ।
महातलं विश्वसृजः सुगुल्फौ तलातलं वै पुरुषस्य जङ्घे ।

२. इन्द्रादयो बाहव आहुरस्य कर्णौ दिशः श्रोत्रममुष्य शब्दः ।
नासत्यदस्रौ परमस्य नासे घ्राणं च गन्धो मुखमग्निरिद्धः ।

३. नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहाः विश्वतनोर्नृपेन्द्र ।
अन्नं च वीर्यं श्वसितं मातरिश्वा गतिर्वयः कर्म गुणप्रवाहः ।
इयानसावीश्वरविग्रहस्य यः सन्निवेशः कथितो मया ते ।
सन्धार्यतेऽस्मिन् स्थविष्ठे मनः स्वबुद्ध्या न यतोऽस्ति किञ्चित् ।
(II-1-25,26,27,29,33,28)

The concept of the Virat form of God is a unique concept. It envisages the entire universe as the form of the God and brings a kind of Sacredness and sanctity to the whole world. This concept is described in many places in Veda and Itihāsa Purāṇa. In the present description the different lokas, different daities, rivers, trees etc., found on the earth are stated as encompassed by this form. In the sixth chapter of this skandha there is again the description of Virat form. In that description all living beings are described as the form of Virat.

अहं भवान् भवश्चैव य इमे मुनयोऽग्रजाः
सुरासुरनरा नागाः खगाः मृगसरीसृपाः
गन्धर्वाप्सरसो यक्षाः रक्षोभूतगणोरगाः

पशवः पितरः सिद्धाः विद्याध्राश्चारणाद्रुमाः ।
अन्ये च विविधा जीवाः जलस्थलनभौकसः
सर्वं पुरुष एवेदं भूतं भव्यं भवच्चयत् ।। (II-6-12-15)

Some aspects of the Virāt Puruṣa described in पुरुषसूक्त are also stated here. It should be noted here that these details of Virāt Puruṣa should not be taken in the

sense that these are identical with Virāt Puruṣa. It only means that Virāt Puruṣa has pervaded in all these.

While recommending the meditation of Virāt form Śuka also recommends the meditation of प्रादेशमात्र form

केचित् स्वदेहान्तःहृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम् ।
चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्ति ॥ (II-2-9)

The departure of Jñānin from his last body

In the context of describing the meditation on Virāt form and Pradeśamatra form some interesting details regarding jñānin moving out from his last body are given.

नाभ्यां स्थितं हृद्यवरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः ।
ततोऽनुसन्धाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत ।
तस्माद् भ्रुवोरन्तरमुन्नयेत् निरुद्धसप्ताश्वपथोऽनपेक्षः ।
स्थित्वा मुहूर्तार्धमकुण्ठदृष्टिः निर्भिद्य मूर्धन् विसृजेत् परं ततः ॥ (II-2-21, 22)

Jñānin moves his breath from navel to the heart, then, through brahmanādi moves to the chest, the base of the plate, the middle point of the eyebrows. Standing at that point he Sorts out the path from which he has to move and then breaking the centre of the head he moves out.

Those whose bhakti is very ripe directly go to Brahmaloka, those whose bhakti is not very ripe they go to Maharloka etc., and enjoy eight Siddhis.

The yogins go to Vaisvānara path through Archirādi. Those who move out through Pingalā nādi travel by Devayāna, those who move out through Idānādi travel by Pitṛyāna and those who move out through Suṣumnā travel by Viṣuvattā i.e., Brahmayāna.

यदि प्रयास्यथ पारमेष्ठ्यं वैहायसानामुत यद्विहारम् ।
अष्टाधिपत्यं गुणसन्निपाये सहैव गच्छेदूमनसेन्द्रियैश्च ॥

वैश्वानरं याति विहायसा गतः सुषुम्नया ब्रह्मपथेन शोचिषा ।
विधूतकल्कोऽथ हरेरुदस्तात् प्रयाति चक्रं नृप शैंशुमारम् ।
देवयानं पिङ्गलाभिरहान्येति शतायुषा ।
रात्रीरिडाभिः पितृणां विषुवत्तां सुषुम्नया । (II-2-23, 25,27)

Śuka narrates the dialogue between Brahmā and Nārada.

In order to know more about the God Parīkṣit asks Śuka as to how the God creates the world, protects it, and destroys.

भूय एव विवत्सामि भगवानात्ममायया ।
यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ।
यथा गोपयति विभुः यथा संयच्छते पुनः ॥ (II-4-6,7)

Before answering this important question, Śuka, offers detailed prayer to the God.

यत्कीर्तनं यच्छ्रवणं यदीक्षणं यद्वन्दनं यत्स्मरणं यदर्हणम् ।
लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः ॥

तपस्विनो दानपरा यशश्विनो मनस्विनः मन्त्रविदः सुमङ्गलाः ।
क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ।
किरातहूणान्ध्रपुलिन्दपुल्कसाः अभीरकङ्काः यवनाः शकादयः ।
येऽन्ये च पापा यदपाश्रयाश्रयात् शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥
(II-4-15,16,18)

Offering prayers Śuka informs that the chaturmukha brahmā himself taught this Bhāgavata to Nārada and narrates their dialogue.

एतदेवात्मभूः राजन् नारदायेति पृच्छयते ।
वेदगर्भोऽभ्यदात् सर्वं यदाह हरिरात्मनः ॥ (II-4-25)

This verse states the line of Bhagavata teaching as Narayana, Brahmā and Nārada. Nārada appeals to chaturmukha brahmā to teach him as under

यद्रूपं यदधिष्ठानं यतः सृष्टमिदं विभो ।
यत्संस्थं यत्परं यच्च तत्तत्वं वद तत्त्वतः ॥ (II-5, 2)

Brahmā compliments him for asking this question which gives him also an opportunity to bring to his mind the glory of the God.

सम्यक् कारुणिकस्येदं वत्स ते विचिकित्सितम् ।
यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ॥ (II-5 9)

Before, Brahmā proceeds to give the details of the creation he makes two points clear viz.

1) Dravya, Kāla, Karma, Svabhāva etc all are completely under the control of God and he is supreme.

2) God is Kutastha and nitya. No change will take place in him when he creates. He is Kartā, he is not upādāna kāraṇa.

i) द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ।
वासुदेवात् परो ब्रह्मन् न चान्योऽर्थोऽस्ति तत्त्वतः ॥

ii) तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः ।
सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः ॥ (II-4, 14,17)

With this background the central teaching of Bhagavata is poetically put as

नारायणपरा वेदा देवा नारायणाङ्गजाः ।
नारायणपरा लोकाः नारायणपरा मखाः ॥
नारायणपरो योगो नारायणपरं तपः ।
नारायणपरं ज्ञानं नारायणपरागतिः ॥ (II-5 15,16)

To elaborate this central teaching the whole of Bhāgavata is developed. Every event, every story, every discussion, and every prayer in Bhāgavata is to bring home this central teaching.

The process of the creation

Presently a detailed account of the creation is given. The important steps only are noted below.

1. सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः ।
स्थिति सर्गनिरोधेषु गृहीता मायया विभोः ॥ १८ ॥

The God takes the three gunas, satva, rajas and tamas for creation, sustainance and destruction by his free will.

2. कालं कर्म स्वभावं च मायेशो मायया स्वया ।
आत्मन् यदृच्छया प्राप्तं विबुभूषुरुपाददे ॥ २१ ॥

The God takes the time, the adṛṣta of the jivas, sattvika etc svabhāva, and prakṛti that are under his control for creation by his free will.

3. गुणव्यतिकरात् परिणामस्वभावतः
महतः जन्म पुरुषाधिष्ठितात् अभूत ॥ २२ ॥

By the mixup of the guṇas that are of changing nature Mahat tatva which is the body of chaturmukha brahma arose.

4. महतस्तु विकुर्वाणात् रजस्तत्त्वोपबृंहितात्
सोहंकार इति प्रोक्तो विकुर्वन् समभूत् त्रिधा
वैकारिकः तैजसश्च तामस्वश्चेति तद्विधा ॥ 23a, 24 ॥

From Mahat tatava Ahamkara tatva arose. It has three aspects viz. vaikarika, taijasa and tāmasa.

5. i) तामसादपि भूतादेः विकुर्वाणादभून्नभः ।
ii) नभसोऽथ विकुर्वाणादभूत् स्पर्शगुणोऽनिलः
iii) वायोरपि विकुर्वाणात्, उदपद्यत तेजः
iv) तेजसस्तु अम्भो रसात्मकम्
v) अम्भसो गन्धवानभूत् (२६-३०)

From Tāmasa ahamkāra ākāśa, vāyu, tejas, water, prithvi arose

6. i) वैकारिकात् मनोजज्ञे
ii) तेजसात्तु विकुर्वाणादिन्द्रियाणि दशाभवन् (३०, ३१)

From Vaikārika ahamkara Manas arose, from taijasa ahamkāra the ten indriyas arose.

In the course of this description of creation the creation of fourteen lokas, four varṇas is also described. The emergence of chaturmukha brahmā from Anda is stated. The virat brahman performing Puruṣayajña is stated.

Proceeding further chaturmukha brahmā narrates the incarnations of the God. Varāha, yajña, kapila, Datta Ātreya, Nārayaṇa and Nara, Pṛthu, Ṛṣabha, Hayagrīva, Matsya, Kūrma, Narasimha, Vāmana, Mahidāsa, Dhanvantari, Bhārgava, Rāma, Balarāma, Kṛṣṇa, Vedavyāsa, Kali incarnations are described.

The names of devotees of Nārāyana are also mentioned. Prominant among these are: Chaturmukhabrahmā, Śiva, Nārada, Pralhāda, Dhruva, Prāchīnabarhi, Ṛbhu, Anga, Aila, Muchukunda, Ambarīṣa, Mandhāta, Bali, Saubhari, Vibhīṣana, and Vidura. This list of devotees is concluded with an interesting remark-

ते वै विदन्त्यतितरन्ति च देवमायां
स्त्रीशूद्रहूणशबरा अपि पापजीवाः
तिर्यग् जना अपि किमु श्रुतधारणा ये ।

Brahma gets a vision of the Vaikuntha and the God, and receives Bhāgavata from the God.

King Parikṣit again asks Śuka to tell him as to whom Nārada explained Bhāgavata receiving the same from Brahmā. He recounts some of the teaching of Bhāgavata and appeals to instruct him further. Śuka narrates the event of Brahmā seeing viṣṇu loka and describes the glory of that palce.

i) तस्मै स्वलोकं भगवान् सभाजितः
सन्दर्शयामास परं न यत्पदम् ॥

व्यपेत संक्लेश विमोहसाध्वसम् ।
सन्दृष्टवद्भिः विबुधैरभिष्टुतम् ॥

श्यामावदाताः शतपत्रलोचनाः पिशङ्गवक्त्राः सुरुचः सुपेशसः ।
सर्वे चतुर्बाहवः उन्मिषन्मणि प्रवेकनिष्काभरणाः सुवर्चसः ॥

श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधाविभूतिभिः ।
प्रेङ्खश्रिताः याः कुसुमाकंरानुगैः विगीयमाना प्रियकर्म गायती ॥ (II-9, 9,11,13)

ii) ददर्श तत्राखिलसात्त्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिम् ।
किरीटिनं कुण्डलिनं चतुर्भुजं पीतांशुकं वक्षसि लक्षितं श्रिया । (14,16)

The God imparts him the knowledge enshrined in Bhāgavata.

ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् ।
सरहस्यं तदङ्गं च गृहाण गदितं मया ॥ (30)

तं नारदः प्रियतमो रिक्थादानामनुव्रतः ।
शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ॥

तस्मा इदं भागवतं पुराणं दशलक्षणम् ।
प्रोक्तं भगवता प्राह मुनये सरस्वत्याः तटे नृप । (II-9 40,43,44a)

The ten topics of Bhāgavata are as under:

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥

दशमस्य विशुध्यर्थं नवानामिह लक्षणं
वर्णयन्ति महात्मानः श्रुतेनार्थेनचाञ्जसा

The nine topics are briefly explained in the tenth chapter and developed in different sections of Bhāgavata. The tenth topic which is really the central theme purvades the entire Bhāgavata.

Bhāgavata tātparyanirṇaya

It is a brief commentary on Bhāgavata by Śrī Ānandatīrtha. Out of 18,000 verses of Bhāgavata about 1600 verses are commented upon in this commentary. Its purpose is two fold. 1) Bhāgavata is a work of Pancharātra tradition. Good many terms of Pancharātra theology needed explanation and clarification. This is done by quoting the source passeges from Pancharātra literature itself.

2) A few verses and the expressions in Bhāgavata appear to yeild advaita interpretation. Two early commentators viz chitsukha and Puṇyāraṇya had utilised these expressions and the verses to give an advaitic interpretation to the whole of Bhāgavata. This had cut the very roots of Bhakti and the concept of the God as Guṇapūrṇa. The concepts of nirguṇa brahman and bhakti cannot go together. Śri Madhvachārya's Tātparyanirṇaya properly interprets these expressions and the verses.

Another important aspect of Bhāgavata is, it describes mystic experiences in many places. Aparokṣa anubhava and avadhūtāchārya are two significant items. These are described in Samādhi bhāṣā. These aspects are explained in Tātparya nirṇaya.

Bhāgavata also refers to the episodes and the events of other Purānas, particularly, Mahābhārata, Harivamśa and Viṣṇupurāṇa. Some difference among these are reconciled. This is neatly stated in Madhvavijaya as under :

पुराणस्थानपान्थानामभाषात्रयवेदिनाम् ।
भवता सुसखा चक्रे श्री भागवतनिर्णयः ॥ (MV XV-77)

Śrī Madhvachārya is known for Quoting from a large number of source works, particularly from Pancharatra works. Among such source works largest are quoted in Tātparyanirṇaya only. About 224 works are quoted in Tātparya nirṇaya. Pancharātra works generally contain the terms, Samhitā, tantra, Viveka. Rare works of Nirukta, Grammar, Laxicon are also quoted. The Tātparya nirṇaya is a rich treasure of interpretational literature.

The commentaries on Bhāgavata and Bhāgavata tātparya nirṇaya

There are fifteen commentaries on Bhāgavata and Tātparya nirṇaya put together. However, only one commentary viz Padaratnāvali of Śrī Vijayadhvaja tīrtha is on the entire Bhāgavata. Among the other commentaries two commentaries viz Śrī Yadupatyāchārya's Prakāśikā and Śri Satyadharma's commentary put together cover the entire Bhāgavata. Śrī Yadupatyāchārya covers first five skandhas and a portion of seventh skandha while satyadharma covers from sixth to twelve axepting the elevanth. The elevanth is covered by Śrīnivāsa tīrtha's commentary. Durghatabhāva-dīpikā of Śrī Satyābhinava also covers the entire Bhāgavata. However, it is very brief and does not cover all verses. Its main object is to answer certain criticisms against Tātparyanirṇaya.

The commentaries of chetty and Vyāsatatvajña cover VI and VII skandhas respectively. The chalary commentory covers VIII and IX.

Śrī Chalāry, Śrīnivāsa, and Narahari have also written commentaries on Bhāgavata tātparya.

Virodhoddhāra which covers the entire Bhāgavata is not a verse by verse commentary. It points out certain apperant contradictions and reconcile, the same.

Bhāgavata Sāroddhara is a unique work, 365 verses of philosophical and the ethical sygnificance are selected from Bhāgavata and arranged into thirty topics. These verses constitute the heart of Bhāgavata message and give practical guidance for noble life. The compiler of these verses himself was an Avadhūta. He has added a lucid commentary also for these verses.

The following table gives a clear picture of the commentaries on Bhāgavata and Tātparya.

1.	Padaratnāvali of Śrī Vijayadhvaja tīrtha	I to XII
2.	Durghata bhāvadīpikā of Śrī Satyābhinava tīrtha	I to XII
3.	Prakāśikā of Yadupatyāchārya	I to V and VII
4.	The commentary of Śrī Satyadharma tīrtha	VI to X and XII
5.	Sajjana piṭā of Chetty Venkatādri	VI
6.	Mandanandini of Vyāsatatvajña	VII
7.	Mandabodhini of Chalāry Śeṣa	VIII, IX
8.	Padamuktāvali of Lingeri Śrīnivāsāchārya	VIII
9.	Bhāgavathavivaranam of Bidarahalli Śrīnivāsa tīrtha	XI

10. Virodhadhara of Panghri Śrīnivāsachārya — I to XII
11. Tātparya Prakāśa of Śrīnivāsa
12. Tātparya dīpika of Narahari
13. Tātparyaprabodhini of Chalāri
14. Bhāgavata Sāroddhāra of Viṣnutīrtha
15. The commentary by Bhagavanta Rāya — XI, XII

All these commentators are well known and belong to 17th and 18th centuries. Full details about the life and works of these commentators are given in the History of Dvaita literature by Dr. B.N.K. Sharma.

I take this opportunity to thank Sri Guruvenkatacharya. Sri Ramakanta Joshi and Sri Krishna Upadhyaya who have assisted me in different ways for editing this work.

K.T. Pandurangi


ಶ್ರೀಮದ್ ಭಾಗವತಮ್

ಶ್ರೀಮದ್ ಭಾಗವತವು ತತ್ವಜ್ಞಾನ, ಧರ್ಮ, ಅಪರೋಕ್ಷಾನುಭವ, ಇತಿಹಾಸ ಪುರಾಣಗಳಲ್ಲಿಯ ಕಥಾಭಾಗಗಳು, ಭಗವಂತನ ಅವತಾರಗಳ ಕಾರ್ಯಗಳು, ನೀತಿ, ಮಾನವನ ಗುಣದೋಷಗಳ ವಿಶ್ಲೇಷಣೆ ಹೀಗೆ ಅನೇಕ ವಿಷಯಗಳನ್ನು ಒಳಗೊಂಡ ಬಹುಮುಖವಾದ ಗ್ರಂಥವು. ಇದರ ಬಹುಮುಖತೆಯನ್ನು ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ತಮ್ಮ ಭಾಗವತ ತಾತ್ಪರ್ಯನಿರ್ಣಯದಲ್ಲಿ ಸೊಗಸಾಗಿ ವಿವರಿಸಿರುವರು.

ಅರ್ಥೋಽಯಂ ಬ್ರಹ್ಮಸೂತ್ರಾಣಾಂ ಭಾರತಾರ್ಥವಿನಿರ್ಣಯಃ ।
ಗಾಯತ್ರೀಭಾಷ್ಯರೂಪೋಽಸೌ ವೇದಾರ್ಥಪರಿಬೃಂಹಿತಃ ॥
ಪುರಾಣಾನಾಂ ಸಾರರೂಪಃ ಸಾಕ್ಷಾತ್ ಭಗವತೋದಿತಃ ।
ದ್ವಾದಶಸ್ಕಂದಸಂಯುಕ್ತಃ ಶತವಿಚ್ಛೇದಸಂಯುತಃ ।
ಗ್ರಂಥೋಽಷ್ಟಾದಶಸಾಹಸ್ರಃ ಶ್ರೀಮದ್ಭಾಗವತಾಭಿದಃ ।

ಭಾಗವತೋಪದೇಶದ ಆರಂಭ

ಶ್ರೀಮದ್ ಭಾಗವತವು ಶ್ರೀಮನ್ನಾರಾಯಣನಿಂದಲೇ ಉಪದಿಷ್ಟವಾಗಿ ಎರಡು ರೀತಿಯಲ್ಲಿ ಉಪದಿಷ್ಟವಾಗುತ್ತ ಬಂದಿದೆ ಎಂಬುದು ಭಾಗವತದಿಂದಲೇ ತಿಳಿದುಬರುತ್ತದೆ. ಈ ಎರಡು ಉಪದೇಶ ಪರಂಪರೆಗಳು ಹೀಗಿವೆ.



ಇವುಗಳಲ್ಲಿ ಮೊದಲನೆಯ ಉಪದೇಶಪರಂಪರೆಯು ಶ್ರೀವ್ಯಾಸರವರೆಗೆ ಮುಖತಃ ಇದ್ದು ಶ್ರೀವ್ಯಾಸರು ಈಗ ಉಪಲಬ್ಧವಾಗಿರುವ ರೀತಿಯಲ್ಲಿ ಬರೆದಿದ್ದಾರೆ. ಎರಡನೆಯ ಉಪದೇಶ ಪರಂಪರೆಯು ವಿದುರನವರೆಗೆ ಮುಖತಃ ಇದ್ದು ವಿದುರನ ಕಾಲದಲ್ಲಿ ಶ್ರೀವ್ಯಾಸರ ಲಿಖಿತ ಪರಂಪರೆಯು ಲಭ್ಯವಾದುದರಿಂದ ಅದರೊಡನೆ ಒಂದೇ ಪರಂಪರೆಯಾಗಿ ಮುಂದುವರೆದಿದೆ.

ಈ ಎರಡು ಪರಂಪರೆಗಳಲ್ಲಿಯೂ ಭಾಗವತದ ಉಪದೇಶವನ್ನು ಪಡೆದ ಮುಖ್ಯಪಾತ್ರರಾದ ನಾರದ ಮತ್ತು ವಿದುರರು ಶೂದ್ರರಾಗಿರುವುದು ಗಮನಿಸಬೇಕಾದ ವಿಷಯ. ಇದರಿಂದ ಭಾಗವತದ ಉಪದೇಶವು ಮೂರು ವರ್ಣದವರಿಗೆ ಮಾತ್ರ ಮೀಸಲಾಗಿರದೆ ಜನಸಾಮಾನ್ಯಕ್ಕೂ ಲಭ್ಯವಾಗಿದೆ ಎಂಬುದು ತಿಳಿದುಬರುವುದು. ಆದುದರಿಂದ ಇಂದು ಸಮಗ್ರಭಾರತದಲ್ಲಿ ಭಾಗವತದ ಸಂಕೀರ್ತನೆಗಳು ಸಾವಿರಾರು ಕಡೆ ನಡೆಯುತ್ತ ಜನ ಸಾಮಾನ್ಯರಲ್ಲಿ ಧರ್ಮ, ನೀತಿ, ದೈವಭಕ್ತಿಗಳು ಜಾಗೃತವಾಗಿರಲು ಕಾರಣವಾಗಿವೆ.

ಪದ್ಮಪುರಾಣದಲ್ಲಿ ಬಂದ ಭಾಗವತ ಮಾಹಾತ್ಮ್ಯದಲ್ಲಿ ಶ್ರೀಮನ್ನಾರಾಯಣನ ಸಮಕ್ಷಮದಲ್ಲಿಯೇ ದೇವತೆಗಳು ಋಷಿಗಳು ಶ್ರೀಶುಕಾಚಾರ್ಯರ ನಾಯಕತ್ವದಲ್ಲಿ ಭಾಗವತ ಸಂಕೀರ್ತನೆಯನ್ನು ಮಾಡಿದ ಸನ್ನಿವೇಶದ ಸುಂದರವಾದ ವರ್ಣನೆಯಿದೆ–

ಏವಂಬ್ರುವಾಣೇ ಸತಿ ಬಾದರಾಯಣೇ ಮಧ್ಯೇ ಸಭಾಯಾಂ ಹರಿರಾವಿರಾಸೀತ್ ।
ಪ್ರಲ್ಹಾದಬಲ್ಯುದ್ಧವಫಲ್ಗುನಾದಿಭಿಃ ವೃತಃ ಸುರರ್ಷಿಃ ತಮಪೂಜಯಚ್ಚ ।
ಪ್ರಲ್ಹಾದಃ ತಾಲಧಾರೀ ತರಲಗತಿತಯೋದ್ಧವಃ ಕಾಂಸ್ಯಧಾರೀ
ವೀಣಾಧಾರೀ ಸುರರ್ಷಿಃ ಸ್ವರಕುಶಲತಯಾ ರಾಗಕರ್ತಾಽರ್ಜುನೋಽಭೂತ್ ।
ಇಂದ್ರೋಽವಾದೀತ್ ಮೃದಂಗಂಜಯಜಯಸುಕರಾಃ ಕೀರ್ತನೇ ತೇಕುಮಾರಾಃ ।
ಯತ್ರಾಗ್ರೇ ಭಾವವಕ್ತಾ ಸರಸರಚನಯಾ ವ್ಯಾಸಪುತ್ರೋಽಬಭೂವ ॥

ಇದು ಭಾಗವತ ಸಂಕೀರ್ತನೆಗಳು ನಡೆಯುವ ಕ್ರಮದ ಸುಂದರ ವರ್ಣನೆಯಾಗಿದೆ. ಇಂಥ ಸಂಕೀರ್ತನೆಗಳು ಭಾರತದ ಎಲ್ಲ ಭಾಗಗಳಲ್ಲಿಯೂ ಶತಮಾನಗಳಿಂದ ನಡೆಯುತ್ತ ಬಂದಿದ್ದು ಜನಸಾಮಾನ್ಯರ ಮನಸ್ಸನ್ನು ಸೆಳೆದಿವೆ. ಅವರ ನೈತಿಕ ಮಟ್ಟವನ್ನು ಎತ್ತಿಹಿಡಿದಿವೆ. ಈ ಸಂಕೀರ್ತನೆಯಲ್ಲಿಯ ಸಂಗೀತ ಮತ್ತು ನೃತ್ಯಗಳು ಹೃದಯಗಳನ್ನು ಅರಳಿಸುತ್ತ ಬಂದಿವೆ. ಕಥಾಭಾಗಗಳು ಮತ್ತು ಇಲ್ಲಿ ವರ್ಣಿಸಿದ ಭಕ್ತರ ತ್ಯಾಗ ಮತ್ತು ವೈರಾಗ್ಯಗಳು ಜನಸಾಮಾನ್ಯರ ಸಾಮಾಜಿಕ ಮತ್ತು ನೈತಿಕಪ್ರಜ್ಞೆಗಳನ್ನು ಜಾಗೃತಗೊಳಿಸುತ್ತ ಬಂದಿವೆ.

ಭಾಗವತವನ್ನು ರಚಿಸಿದ ಸನ್ನಿವೇಶದಿಂದಲೇ ಭಾಗವತದ ಉಪದೇಶವು ಜನಸಾಮಾನ್ಯರ ನೈತಿಕ ಮಟ್ಟವನ್ನೂ ಮಾನವೀಯತೆಯನ್ನೂ ಹೆಚ್ಚಿಸುವುದೇ ಆಗಿದೆ ಎಂಬುದು ಸ್ಪಷ್ಟವಾಗುತ್ತದೆ.

ದ್ವಾಪರಯುಗದ ಕೊನೆಯ ಕಾಲದಲ್ಲಿ ಶ್ರೀವೇದವ್ಯಾಸರು ಜನಸಾಮಾನ್ಯರಲ್ಲಿ ಧರ್ಮ, ನೀತಿ, ಸದಾಚಾರ ಕುಸಿಯುತ್ತಿದೆ. ಇದನ್ನು ತಡೆಯಲು ಉಪಾಯವನ್ನು ಮಾಡಬೇಕು ಎಂದು ಯೋಚಿಸತೊಡಗಿದರು.

ಪರಾವರಜ್ಞಃ ಸ ಋಷಿಃ ಕಾಲೇನಾವ್ಯಕ್ತರಂಹಸಾ ।
ಯುಗಧರ್ಮವ್ಯತಿಕರಂ ಪ್ರಾಪ್ತಂ ಭುವಿಯುಗೇ ಯುಗೇ ।
ಭೌತಿಕಾನಾಂ ಚ ಭಾವಾನಾಂ ಶಕ್ತಿಹ್ರಾಸಂಚ ತತ್ಕೃತಮ್ ॥

ಅಶ್ರದ್ದಧಾನಾನ್ ನಿಸ್ಸತ್ವಾನ್ ದುರ್ಮೇಧಾನ್ ಹ್ರಸಿತಾಯುಷಃ ।
ಸರ್ವವರ್ಣಾಶ್ರಮಾಣಾಂ ಯದ್ದಧ್ಯೌ ಚರಮಮೋಘದೃಕ್ ॥ (ಭಾ.೧ ೧೫,೧೬)

ಶ್ರೀವೇದವ್ಯಾಸರು ಯುಗಧರ್ಮವು ಬದಲಾದುದನ್ನು ಕಂಡರು. ಜನ ತಮ್ಮ ಶಕ್ತಿಯನ್ನೂ ಬುದ್ಧಿಯನ್ನೂ ಶ್ರದ್ಧೆಯನ್ನೂ ಕಳೆದುಕೊಂಡಿರುವುದನ್ನೂ ಅಲ್ಪಾಯುಷಿಗಳಾಗುತ್ತಿರುವುದನ್ನೂ ಕಂಡರು. ವರ್ಣಾಶ್ರಮಧರ್ಮಗಳು ಕುಸಿಯುತ್ತಿರುವುದನ್ನು ಕಂಡರು. ಜಡಪದಾರ್ಥಗಳೂ ಶಕ್ತಿಹೀನವಾಗುತ್ತಿರುವುದನ್ನು ಕಂಡರು. ಇದನ್ನೆಲ್ಲ ತಡೆಯಲು ದೃಢವಾದ ಉಪಾಯಗಳನ್ನು ರೂಪಿಸಬೇಕೆಂದು ಆಲೋಚಿಸಿದರು. ಜನರ ತಿಳುವಳಿಕೆಯನ್ನು ಹೆಚ್ಚಿಸುವುದೇ ಇದಕ್ಕೆ ತಕ್ಕ ಉಪಾಯವೆಂದು ಯೋಚಿಸಿ ಇಂಥ ತಿಳುವಳಿಕೆಗೆ ಆಕಾರಗಳಾದ ವೇದಗಳನ್ನು ನಾಲ್ಕು ವೇದಗಳನ್ನಾಗಿಯೂ ಒಂದೊಂದರಲ್ಲಿಯೂ ಅನೇಕ ಶಾಖೆಗಳನ್ನಾಗಿಯೂ ವಿಂಗಡಿಸಿದರು. ವಿಸ್ತಾರವಾದ ವೇದವಾಙ್ಮಯವನ್ನು ವ್ಯವಸ್ಥಿತಗೊಳಿಸಿದರು. ಇತಿಹಾಸ-ಪುರಾಣಗಳನ್ನು ರಚಿಸಿದರು.

ಋಗ್ಯಜುಃಸಾಮಾಥರ್ವಾಖ್ಯಾಃ ವೇದಾಶ್ಚತ್ವಾರ ಉದ್ಧೃತಾಃ ।
ಇತಿಹಾಸಪುರಾಣಂ ಚ ಪಂಚಮೋ ವೇದ ಉಚ್ಯತೇ ॥ (ಭಾ.೧ ೪. ೧೯)

ಇಷ್ಟೆಲ್ಲ ರಚಿಸಿದರೂ ಅವರ ಮನಸ್ಸಿಗೆ ಸಮಾಧಾನವಾಗಲಿಲ್ಲ. ತಮ ಅವತಾರಕಾರ್ಯವು ಮುಗಿಯಿತು ಎನಿಸಲಿಲ್ಲ. ಸರಸ್ವತೀ ನದಿಯ ದಂಡೆಯ ಮೇಲೆ ಕುಳಿತು ಆಲೋಚಿಸತೊಡಗಿದರು.

ನಾತಿಪ್ರಸನ್ನಹೃದಯಃ ಸರಸ್ವತ್ಯಾಸ್ತಟೇ ಶುಚೌ ।
ವಿತರ್ಕಯನ್ ವಿವಿಕ್ತಸ್ಥ ಇದಂ ಚೋವಾಚ ಧರ್ಮವಿತ್ ॥ (ಭಾ.೧ ೪.೨೬)

ಕಿಂ ವಾ ಭಾಗವತಾ ಧರ್ಮಾ ನ ಪ್ರಾಯೇಣ ನಿರೂಪಿತಾಃ ।
ಪ್ರಿಯಾಃ ಪರಮಹಂಸಾನಾಂ ತ ಏವಹಿ ಅಚ್ಯುತ ಪ್ರಿಯಾಃ ॥ (ಭಾ.೧ ೪.೩೦)

ವೇದ ಮತ್ತು ಇತಿಹಾಸ ಪುರಾಣಗಳಲ್ಲಿ ಭಾಗವತಧರ್ಮಗಳು ಮತ್ತು ಭಗವಂತನ ಅವತಾರ ಮಹಿಮೆಗಳನ್ನು ಸಂಪೂರ್ಣವಾಗಿ ವಿವರಿಸಿಲ್ಲ ಎಂದುಕೊಂಡರು. ಇದೇ ಹೊತ್ತಿಗೆ ನಾರದರೂ ಅಲ್ಲಿಗೆ ಬಂದು ಭಾಗವತಧರ್ಮವನ್ನು ಇನ್ನೂ ಹೆಚ್ಚು ವಿವರಿಸಬೇಕಾದ ಅಗತ್ಯವಿದೆ ಎಂದು ಹೇಳಿದರು.

ತಸ್ಯೈವಂ ಖಿನ್ನಮಾತ್ಮಾನಂ ಮನ್ಯಮಾನಸ್ಯ ಖಿದ್ಯತಃ ।
ಕೃಷ್ಣಸ್ಯ ನಾರದೋಽಭ್ಯಾಗಾದಾಶ್ರಮಂ ಪ್ರಾಗುದಾಹೃತಮ್ ॥ (೧. ೪.೩೧)

ಯಥಾಧರ್ಮಾದಯೋಹ್ಯರ್ಥಾಃ ಮುನಿವರ್ಯಾನುವರ್ಣಿತಾಃ ।
ನ ತಥಾ ವಾಸುದೇವಸ್ಯ ಮಹಿಮಾ ಹ್ಯವರ್ಣಿತಃ ॥ (೧. ೫.೯)

ಭಾಗವತಧರ್ಮವು ಮನುಷ್ಯನ ಆತ್ಮೋದ್ಧಾರಕ್ಕೆ ಎಷ್ಟು ಸಹಾಯಕ ಎಂಬುದನ್ನು ವಿವರಿಸಲು ನಾರದರು ತಮ್ಮ ಪೂರ್ವಜನ್ಮದ ವೃತ್ತಾಂತವನ್ನು ಹೇಳುವರು.

ನಾರದನ ಜನ್ಮವೃತ್ತಾಂತ

ಹಿಂದಿನ ಜನ್ಮದಲ್ಲಿ ನಾನು ಜ್ಞಾನಿಗಳ ಮನೆಗಳಲ್ಲಿ ಕೆಲಸಮಾಡುವ ಓರ್ವ ದಾಸಿಯ ಮಗನಾಗಿದ್ದೆನು. ಚಿಕ್ಕವನಿರುವಾಗಲೇ ನನಗೆ ಈ ಜ್ಞಾನಿಗಳ ಸಂಪರ್ಕವುಂಟಾಯಿತು. ಇವರು ಭಗವಂತನಿಂದಲೇ ಸಾಕ್ಷಾತ್ತಾಗಿ ಪಡೆದ ಜ್ಞಾನವನ್ನು ನನಗೆ ದಯಪಾಲಿಸಿದರು. ಸಂಸಾರದಲ್ಲಿ ಬಂಧನಕ್ಕೆ ಕಾರಣವಾದ ಕರ್ಮಗಳೇ ಭಗವಂತನಲ್ಲಿ ಸಮರ್ಪಣ ಭಾವದಿಂದ ಮಾಡಿದರೆ ಸಂಸಾರ ಮೋಚಕವೂ ಆಗುವವು. ರೋಗಗಳಿಗೆ ಕಾರಣವಾಗುವ ವಸ್ತುಗಳೇ ಸರಿಯಾಗಿ ಉಪಯೋಗಿಸಿದರೆ ರೋಗಗಳ ಪರಿಹಾರಕ್ಕೂ ಕಾರಣ ಆಗುವವು. ಈ ಜ್ಞಾನಿಗಳ ಉಪದೇಶವು ನನಗೆ ಜ್ಞಾನವನ್ನೂ ಯಶಸ್ಸನ್ನೂ ಒದಗಿಸಿಕೊಟ್ಟಿತು.

ಅಹಂಪುರಾಽತೀತ ಭವೇಽಭೂವಂ ದಾಸ್ಯಾಸ್ತುಕಸ್ಯಾಶ್ಚನ ವೇದವಾದಿನಾಮ್ ।
ನಿರೂಪಿತೋಬಾಲಕ ಏವ ಯೋಗಿನಾಂ ಶುಶ್ರೂಷಣೇ ಪ್ರಾವೃಷಿ ನಿರ್ವಿವಕ್ಷತಾಮ್ ॥ ೨೩ ॥

ತತ್ರಾನ್ವಹಂ ಕೃಷ್ಣಕಥಾಃ ಪ್ರಗಾಯತಾಮನುಗ್ರಹೇಣಾಶೃಣವಂ ಮನೋಹರಾಃ ।
ತಾಃಶ್ರದ್ಧಯಾ ಮೇನುಸವಂ ವಿಶೃಣ್ವತಃ ಪ್ರಿಯಶ್ರವಸ್ಯಾಂಗ ತದಾಭವನ್ಮತಿಃ ॥ ೨೬ ॥

ಶ್ರದ್ಧಧಾನಸ್ಯ ಬಾಲಸ್ಯ ದಾಂತಸ್ಯಾನುಚರಸ್ಯ ಚ ।
ಜ್ಞಾನಂ ಗುಹ್ಯತಮಂ ಯತ್ತತ್ ಸಾಕ್ಷಾತ್ ಭಗವತೋದಿತಮ್ ।
ಅನ್ವವೋಚನ್ ಗಮಿಷ್ಯಂತಃ ಕೃಪಯಾದೀನವತ್ಸಲಾಃ ॥ ೩೦ ॥

ಆಮಯೋಽಯಂಚ ಭೂತಾನಾಂ ಜಾಯತೇ ಯೇನ ಸುವ್ರತ ।
ತದೇವ ಹಿ ಆಮಯದ್ರವ್ಯಂ ಯತ್ ಪುನಾತಿ ಚಿಕಿತ್ಸಿತಮ್ ॥ ೩೩ ॥

ಏವಂ ನೃಣಾಂ ಕ್ರಿಯಾಯೋಗಾಃ ಸರ್ವೇಸಂಸೃತಿಹೇತವಃ ।
ತ ಏವಾತ್ಮವಿನಾಶಾಯ ಕಲ್ಪಂತೇ ಕಲ್ಪಿತಾಃ ಪರೇ ॥ ೩೪ ॥

ಇಮಂ ಸ್ವಧರ್ಮನಿಯಮಮವೇತ್ಯ ಮದನುಷ್ಠಿತಮ್ ।
ಆದಾನ್ಮೇಜ್ಞಾನಮೈಶ್ವರ್ಯಂ ಸ್ವಸ್ಮಿನ್ ಭಾವಂ ಚ ಕೇಶವಃ ॥ ೩೯ ॥

ಮುಂದುವರೆದು ನಾರದನು ತನ್ನ ಜೀವನದ ಮುಂದಿನ ವಿವರಗಳನ್ನು ಹೇಳಿದನು. ನನ್ನ ತಾಯಿಯು ನನ್ನನ್ನು ಬಹಳವಾಗಿ ಪ್ರೀತಿಸುತ್ತಿದ್ದಳು. ಅವಳು ಹಾವು ಕಚ್ಚಿ ತೀರಿಕೊಂಡಳು. ನಾನು ಒಬ್ಬಂಟಿಗನಾಗಿ ಅರಣ್ಯದಲ್ಲೆಲ್ಲ ಸುತ್ತಾಡಿದೆನು. ಒಂದು ಪಿಪ್ಪಲ ಮರದ ಕೆಳಗೆ ಕುಳಿತು ಭಗವಂತನ ಮಹಿಮೆಯನ್ನು ಚಿಂತಿಸಿದೆನು. ಜಾಗೃತ್ ಸ್ವಪ್ನ ಸುಷುಪ್ತಿ ಹೀಗೆ ಎಲ್ಲ ದೆಶೆಯಲ್ಲಿಯೂ ಭಗವಂತನು ಜೀವನ ನಿಯಾಮಕನಾಗಿರುವನು ಎಂಬುದನ್ನು ಮನನ ಮಾಡಿಕೊಂಡೆನು. ನಾನು ಧ್ಯಾನಮಗ್ನನಾಗಿರುವಾಗ ಭಗವಂತನ ರೂಪವನ್ನು ಕಂಡೆನು. ಇದರಿಂದ ನಾನು ಪುಲಕಿತನಾದೆನು. ಕಣ್ಣು ತೆಗೆದುನೋಡಿದಾಗ ಭಗವಂತನು ಮರೆಯಾದನು. ಅವನನ್ನು ಇನ್ನೊಮ್ಮೆ ಕಾಣಲು ಮತ್ತೆ ಧ್ಯಾನಮಗ್ನನಾದೆನು. ಆದರೆ ನಿನಗೆ ಈ ಜನ್ಮದಲ್ಲಿ ಇನ್ನೊಮ್ಮೆ ನನ್ನ ದರ್ಶನವಾಗಲಾರದು. ಮುಂದಿನ ಜನ್ಮಗಳಲ್ಲಿ ಚತುರ್ಮುಖಬ್ರಹ್ಮನ ಮಗನಾಗಿ ನನ್ನ ದರ್ಶನವನ್ನು ಪಡೆಯುವೆ. ಆದರೆ ನಿನಗೆ ಹಿಂದಿನ ಜನ್ಮದ ಸ್ಮರಣೆಯು ಮಾತ್ರ ಉಳಿಯುವುದು ಎಂದು ಭಗವಂತನು ಆಕಾಶವಾಣಿಯಿಂದ ಸೂಚಿಸಿದನು.

ಏಕಾತ್ಮಜಾ ಮೇ ಜನನೀ ಯೋಷಿನ್ಮೂಢಾಚ ಕಿಂಕರೀ ।
ಮಯ್ಯಾತ್ಮಜೇಽನನ್ಯಗತೌ ಚಕ್ರೇ ಸ್ನೇಹಾನುಬಂಧನಮ್ ॥ (೧. ೬.೬)

ಏಕದಾನಿರ್ಗತಾಂ ಗೇಹಾದ್ ದುಹಂತೀಂ ನಿಶಿಗಾಂ ಪಥಿ ।
ಸರ್ಪೋದಶತ್ ಪದಾಸ್ಪೃಷ್ಟಃ ಕೃಪಣಾಂ ಕಾಲಚೋದಿತಃ ॥ ೯ ॥

ತಸ್ಮಿನ್ನಿರ್ಜನೇಽರಣ್ಯೇ ಪಿಪ್ಪಲೋಪಸ್ಥ ಆಶ್ರಿತಃ ।
ಆತ್ಮನಾತ್ಮಾನಮಾತ್ಮಸ್ಥಂ ಯಥಾಶ್ರುತಮಚಿಂತಯಮ್ ॥ ೧೬ ॥

ಸ್ವಪ್ನೋ ಮಾಯಾ ಗ್ರಹಃ ಶಯ್ಯಾ ಜಾಗ್ರದಾಭಾಸ ಆತ್ಮನಃ ।
ನಾಮರೂಪಕ್ರಿಯಾವೃತ್ತಿಃ ಸಂವಿಜ್ಞಾಸ್ತ್ರಂ ಪರಂಪದಮ್ ॥ ೧೭ ॥

ಧ್ಯಾಯತಶ್ಚರಣಾಂಭೋಜಂ ಭಾವನಿರ್ವೃತಚೇತಸಃ ।
ಉತ್ಕಂಠಾಶ್ರುಕಲಾಕ್ಷಸ್ಯ ಹೃದ್ಯಾಸೀನ್ಮೇ ಶನೈಃ ಹರಿಃ ॥ ೨೦ ॥

ರೂಪಂಭಗವತೋ ಯತ್ತನ್ಮನಃ ಕಾಂತಂ ಸುಖಾವಹಮ್ ।
ಅಪಶ್ಯನ್ ಸಹಸೋತ್ತಸ್ಥೌ ಕೈವಲ್ಯಾದ್ದುರ್ಮನಾ ಇವ ॥ ೨೨ ॥

ದಿದೃಕ್ಷುಃ ತದಹಂ ಭೂಯಃ ಪ್ರಣಿಧಾಯ ಮನೋಹೃದಿ ।
ವೀಕ್ಷ್ಯಮಾಣೋಽಪಿ ನಾಪಶ್ಯಮವಿತೃಪ್ತ ಇವಾತುರಃ ॥ ೨೩ ॥

ಏವಂಯತಂತಂ ವಿಜನೇ ಮಾಮಾಹಾಗೋಚರೋ ಗಿರಾಮ್ ।
ಗಂಭೀರಯಾ ಶ್ಲಕ್ಷ್ಣಯಾ ವಾಚಾ ಶುಚಃ ಪ್ರಶಮಯನ್ನಿವ ॥ ೨೪ ॥

ಹಂತಾಸ್ಮಿನ್ ಜನ್ಮನಿ ಭವಾನ್ನಮಾಂ ದ್ರಷ್ಟುಮಿಹಾರ್ಹತಿ ।
ಅವಿಪಕ್ವಕಷಾಯಾಣಾಂ ದುರ್ದರ್ಶೋಽಹಂಕುಯೋಗಿನಾಮ್ ॥ ೨೫ ॥

ಸಕೃದ್ ಯದ್ದರ್ಶಿತಂ ರೂಪಂ ಏತತ್ಕಮಾಯ ಮೇನಘ ।
ಮತ್ಕಾಮಃ ಶನಕೈಃ ಸಾಧುಸರ್ವಾನ್ ಮುಂಚತಿ ಹೃಚ್ಛಯಾನ್ ॥ ೨೬ ॥

ಮತಿರ್ಮಯಿ ನಿಬದ್ಧೇಯಂ ನವಿಪದ್ಯೇತ ಕರ್ಹಿಚಿತ್ ।
ಪ್ರಜಾಸರ್ಗನಿರೋಧೋಽಪಿ ಸ್ಮೃತಿಶ್ಚಮದನುಗ್ರಹಾತ್ ॥

ಪರಮಾತ್ಮನ ಪೂರ್ಣದರ್ಶನವು ಮುಂದಿನ ಜನ್ಮದಲ್ಲಿ ದೊರೆಯುವುದು ಎಂಬ ಆಶ್ವಾಸನೆ ದೊರೆತದ್ದರಿಂದ ನಾರದನು ತನ್ನ ಇಡೀ ಜನ್ಮವನ್ನೆಲ್ಲ ಭಗವಂತನ ನಾಮಸಂಕೀರ್ತನ ಮತ್ತು ಅವನ ಅವತಾರಗಳ ಮಹಿಮೆಯನ್ನು ಕೇಳುವುದರಲ್ಲಿಯೇ ಕಳೆದನು.

ನಾಮಾನ್ಯನಂತಸ್ಯ ಗತತ್ರಪಃ ಪಠನ್
ಗುಹ್ಯಾನಿ ಭದ್ರಾನಿ ಕೃತಾನಿಚ ಸ್ಮರನ್ ।
ಗಾಂ ಪರ್ಯಟನ್ ತುಷ್ಟಮನಾಃಗತಸ್ಪೃಹಃ
ಕಾಲಂ ಪರೀಕ್ಷನ್ನಪಟೋ ವಿಮತ್ಸರಃ ॥ ೩೦ ॥

ಕಲ್ಪದ ಕೊನೆಯ ಕಾಲದಲ್ಲಿ ನಾರದನು ಬ್ರಹ್ಮದೇವರ ಶ್ವಾಸದಲ್ಲಿ ಸೇರಿ ಮುಂದಿನ ಕಲ್ಪದ ಆರಂಭದಲ್ಲಿ ಬ್ರಹ್ಮನ ಮಗನಾಗಿ ಜನಿಸಿದನು.

ಕಲ್ಪಾಂತ ಇದಮಾದಾಯ ಶಯಾನೇಽಂಭಸ್ಯುದನ್ವತಃ ।
ಶಿಶಯಿಷೋರನುಪ್ರಾಣಂ ವಿವೇಶಾಂತರಹಂ ವಿಭೋಃ ॥ ೩೩ ॥

ಸಹಸ್ರಯುಗಪರ್ಯಂತ ಉತ್ಥಾಯೇದಂ ಸಿಸೃಕ್ಷತಃ ।
ಮರೀಚಿಮಿಶ್ರಾ ಋಷಯಃ ಪ್ರಾಣೇಭ್ಯೋಽಹಂಚಜಜ್ಞಿರೇ ॥ ೩೪ ॥

ನಾರದನ ಈ ಜನ್ಮವೃತ್ತಾಂತವನ್ನು ಹೇಳುವ ಉದ್ದೇಶವು ಭಗವಂತನಲ್ಲಿ ಭಕ್ತಿಯನ್ನು ಮಾಡುತ್ತ ಅವನಲ್ಲಿ ಸಮರ್ಪಣಾಭಾವದಿಂದ ವಿಹಿತಕರ್ಮಾನುಷ್ಠಾನ ಮಾಡಬೇಕು ಎಂದು ತಿಳಿಸುವುದೇ ಆಗಿದೆ. ಭಾಗವತಧರ್ಮದ ಮಹತ್ವವನ್ನು ತಿಳಿಸುವುದೇ ಆಗಿದೆ. ವೇದ ವಿಭಾಗ ಮತ್ತು ಇತಿಹಾಸಪುರಾಣಗಳ ರಚನೆ ಮಾಡಿದ ಮೇಲೆ ವೇದವ್ಯಾಸರು ಖಿನ್ನರಾದರು. ಅವರಿಗೆ ನಾರದರು ಭಾಗವತವನ್ನು ಬರೆಯಲು ಹೇಳಿದರು ಎಂಬ ಮೇಲುನೋಟದ ಅರ್ಥದಲ್ಲಿ ಈ ಘಟನೆಯ ತಾತ್ಪರ್ಯವನ್ನು ತೆಗೆದುಕೊಳ್ಳಬಾರದು. ಮಹಾಜ್ಞಾನಿಗಳಾದ ಶ್ರೀವೇದವ್ಯಾಸರು ತಮ್ಮ ಅವತಾರಕಾರ್ಯದಲ್ಲಿ ಮುಖ್ಯವಾದ ಭಾಗವತ ರಚನೆಯ ಅವಶ್ಯಕತೆಯನ್ನು ಸ್ವತಃ ಬಲ್ಲವರಾಗಿದ್ದರು. ನಾರದರೂ ಕೂಡ ವೇದವ್ಯಾಸರು ನಾರಾಯಣನ ಅವತಾರ. ಅವರಿಗೆ ತಮ್ಮ ಅವತಾರ ಕಾರ್ಯವನ್ನು ಮಾಡಲು ಯಾರ ಸೂಚನೆಯೂ ಅಗತ್ಯವಿಲ್ಲ. ಅವರು ಖಿನ್ನರಾಗುವ ಪ್ರಶ್ನೆಯೇ ಇಲ್ಲ ಎಂಬುದನ್ನು ಬಲ್ಲವರಾಗಿದ್ದರು. ಯಾವುದೇ ಒಂದು ವಿಷಯವನ್ನು ಪ್ರಸ್ತಾಪಿಸುವಾಗ ಪುರಾಣದಲ್ಲಿಯ ಪಾತ್ರಗಳಿಂದ ಅದಕ್ಕೆ ಅಗತ್ಯವಾದ ಒಂದು ಸಂವಾದವನ್ನು ಏರ್ಪಡಿಸುವುದು ಪುರಾಣಗಳ ಶೈಲಿಯಾಗಿದೆ. ಇದಕ್ಕನುಗುಣವಾಗಿ ಈ ವ್ಯಾಸ-ನಾರದ ಸಂವಾದವನ್ನು ಇಲ್ಲಿ ಹೆಣೆಯಲಾಗಿದೆ. ಈ ಸಂವಾದಕ್ಕಿಂತ ಮೊದಲು ಭಾಗವತದ ರಚನೆಯ ಅಗತ್ಯ ಶ್ರೀವೇದವ್ಯಾಸರಿಗೆ ತಿಳಿದಿದ್ದಿಲ್ಲವೆಂದೂ ನಾರದರು ತಿಳಿಸಿಕೊಟ್ಟರೆಂದೂ ಇದಕ್ಕೆ ಅರ್ಥ ಮಾಡಬಾರದು.

ಭಾಗವತದ ಮುಖ್ಯವಿಷಯ

ವ್ಯಾಸ-ನಾರದರ ಸಂವಾದದ ಈ ಘಟನೆಯ ನಿರೂಪಣೆಗಿಂತ ಮೊದಲೇ ಶೌನಕರು ಸೂತರನ್ನು ಶ್ರೀಕೃಷ್ಣಾವತಾರದ ಮತ್ತು ಭಗವಂತನ ಇತರ ಅವತಾರಗಳ ಮಹಿಮೆಯನ್ನು ಹೇಳಲು ಪ್ರಾರ್ಥಿಸುತ್ತಾರೆ. ಇದರಿಂದ ಭಾಗವತದ ಮುಖ್ಯವಿಷಯವು ಯಾವುದು ಎಂಬುದು ಈಗಾಗಲೇ ಅವರಿಗೆ ತಿಳಿದಿರುವುದು ಕಂಡುಬರುತ್ತದೆ. ಮುಂದೆ ಬಂದ ಸಂವಾದದ ಘಟನೆ ಇದರ ಹಿನ್ನೆಲೆಯನ್ನು ಹೇಳುತ್ತದೆ.

ಸೂತ ಜಾನಾಸಿ ಭದ್ರಂತೇ ಭಗವಾನ್ ಸಾತ್ವತಾಂ ಪತಿಃ ।
ದೇವಕ್ಯಾಂ ವಸುದೇವಸ್ಯ ಜಾತೋಯಸ್ಯ ಚಿಕೀರ್ಷಯಾ ॥ ೧೨ ॥

ತನ್ನಃಶುಶ್ರೂಷಮಾಣಾನಾಮರ್ಹಸ್ಯಂಗಾನುವರ್ಣಿತುಮ್ ।
ಯಸ್ಯಾವತಾರೋ ಭೂತಾನಾಂ ಕ್ಷೇಮಾಯ ವಿಜಯಾಯಚ ॥ ೧೩ ॥ (೧.೧ ೧೨, ೧೩)

ಅಥಾಖ್ಯಾಹಿ ಹರೇರ್ಧೀಮನ್ನವತಾರಕಥಾಃ ಶುಭಾಃ ।
ಲೀಲಾಂ ವಿದಧತಃ ಸ್ವೈರಮೀಶ್ವರಸ್ಯಾತ್ಮಮಾಯಯಾ ।
ಕೃತವಾನ್ ಕಿಲ ವೀರ್ಯಾಣಿ ಸಹ ರಾಮೇಣ ಕೇಶವಃ ।
ಅತಿಮರ್ತ್ಯಾನಿ ಭಗವಾನ್ ಗೂಢಃ ಕಪಟಮಾನುಷಃ ॥ ೨೦ ॥

ಶೌನಕರ ಈ ಪ್ರಶ್ನೆಗೆ ಸೂತರ ಪ್ರತಿಕ್ರಿಯೆ ಬಹಳ ಆಕರ್ಷಕವಾಗಿದೆ. ಸೂತರು ವೇದವ್ಯಾಸರಿಗೆ ನಮಸ್ಕಾರ ಮಾಡುತ್ತಾರೆ. ಹೀಗೆ ನಮಸ್ಕಾರ ಮಾಡುವಾಗ ವೇದವ್ಯಾಸರು ಅವರ ಮಗ ಶುಕಾಚಾರ್ಯರು ಸರ್ವಸಂಗ ಪರಿತ್ಯಾಗ ಮಾಡಿ ಅರಣ್ಯಕ್ಕೆ ತೆರಳುವಾಗ 'ನನ್ನ ಪ್ರೀತಿಯ ಮಗನೇ!' ಎಂದು ಸಂಬೋಧಿಸಿದ್ದನ್ನು ನಿರ್ದೇಶಿಸಿ, ಅರಣ್ಯದಲ್ಲಿಯ ಮರಗಳೂ ಇದನ್ನೇ ಪ್ರತಿಧ್ವನಿಸಿದವು ಎಂದು ಹೇಳಿ ಮಗನ ಮೇಲೆ ಇಷ್ಟು ವಾತ್ಸಲ್ಯವಿರುವ ವೇದವ್ಯಾಸರಿಗೆ ನಮಸ್ಕಾರ ಎನ್ನುತ್ತಾರೆ:

ಯಂ ಪ್ರವ್ರಜಂತಮನುಪೇತಮಪೇತಕೃತ್ಯಂ
ದ್ವೈಪಾಯನೋ ವಿರಹಕಾತರ ಆಜುಹಾವ ।
ಪುತ್ರೇತಿ ತನ್ಮಯತಯಾ ತರವೋಽಪಿ ನೇದುಃ
ತಂ ಸರ್ವಭೂತಹೃದಯಂ ಮುನಿಮಾನತೋಽಸ್ಮಿ ॥ (೧.೨ ೨)

ಶ್ರೀವೇದವ್ಯಾಸರಿಗೆ ನಮಸ್ಕರಿಸಿದ ಮೇಲೆ ಸೂತನು ಮಹಾಭಾರತದ ಆರಂಭದ ಶ್ಲೋಕವನ್ನು ಹೋಲುವ ಒಂದು ಶ್ಲೋಕದಿಂದ ತನ್ನ ಕಥೆಯ ನಿರೂಪಣೆಯನ್ನು ಆರಂಭಿಸುವನು.

ನಾರಾಯಣಂ ನಮಸ್ಕೃತ್ಯ ನರಂ ಚೈವ ನರೋತ್ತಮಮ್ ।
ದೇವೀಂ ಸರಸ್ವತೀಂ ವ್ಯಾಸಂ ತತೋ ಜಯಮುದೀರಯೇತ್ ॥

ಶೌನಕ ಮತ್ತು ಋಷಿಗಳು ಶ್ರೀಕೃಷ್ಣನ ಮಹಿಮೆಯನ್ನು ವರ್ಣಿಸಲು ಕೇಳಿದ್ದಕ್ಕೆ ಅವರನ್ನು ಪ್ರಶಂಸಿಸುವನು.

ಮುನಯಃ ಸಾಧುಪೃಷ್ಟೋಹಂ ಭವದ್ಭಿಃ ಲೋಕಮಂಗಲಮ್ ।
ಯತ್ಕೃತಃ ಕೃಷ್ಣಸಂಪ್ರಶ್ನಃ ಯೇನಾತ್ಮಾಶು ಪ್ರಸೀದತಿ ॥ ೫ ॥

ವಾಸುದೇವೇ ಭಗವತಿ ಭಕ್ತಿಯೋಗಃ ಪ್ರಯೋಜಿತಃ ।
ಜನಯತ್ಯಾಶುವೈರಾಗ್ಯಂ ಜ್ಞಾನಂ ಯದಹೈತುಕಮ್ ॥ ೭ ॥

ಎಲ್ಲ ವೇದಗಳೂ ವಾಸುದೇವನನ್ನೇ ಹೇಳುವವು. ಎಲ್ಲ ಯಜ್ಞಗಳೂ ವಾಸುದೇವನನ್ನೇ ಕುರಿತಾಗಿರುವವು. ಎಲ್ಲ ಯೋಗ ಮತ್ತು ಕರ್ಮಗಳು ವಾಸುದೇವನಿಗೇ ಸಮರ್ಪಿತವಾಗಿರುವವು. ಜ್ಞಾನ, ಧರ್ಮ ತಪಸ್ಸು ಎಲ್ಲವೂ ವಾಸುದೇವನ ಪರವಾಗಿಯೇ ಇರುವವು ಎಂಬ ಭಾಗವತದ ಮುಖ್ಯಪ್ರಮೇಯವನ್ನು ಸೂತನು ನಿವೇದಿಸುವನು.

ವಾಸುದೇವಪರಾ ವೇದಾಃ ವಾಸುದೇವಪರಾ ಮಖಾಃ ।
ವಾಸುದೇವಪರಾ ಯೋಗಾಃ ವಾಸುದೇವಪರಾಃ ಕ್ರಿಯಾಃ ।
ವಾಸುದೇವಪರಂ ಜ್ಞಾನಂ ವಾಸುದೇವಪರಂ ತಪಃ ।
ವಾಸುದೇವಪರೋ ಧರ್ಮೋ ವಾಸುದೇವಪರಾ ಗತಿಃ ॥ (೧.೨, ೨೮,೩೦)

ಮುಂದೆ ಸೂತನು ಪರಮಾತ್ಮನ ಈ ಕೆಳಗಿನ ಅವತಾರಗಳನ್ನು ವರ್ಣಿಸುವನು. ೧. ಸನತ್ಕುಮಾರ ೨. ವರಾಹ ೩. ದೇವರ್ಷಿ-ಮಹಿದಾಸ ೪. ನರ-ನಾರಾಯಣ ೫. ಕಪಿಲ ೬. ಅತ್ರಿಪುತ್ರ ೭. ಯಜ್ಞ ೮. ನಾಭಿ ೯. ಪೃಥು ೧೦. ಮತ್ಸ್ಯ

೧೧. ಕೂರ್ಮ ೧೨. ಧನ್ವಂತರಿ ೧೩. ಮೋಹಿನೀ ೧೪. ನರಸಿಂಹ ೧೫. ವಾಮನ ೧೬. ಪರಶುರಾಮ ೧೭. ವೇದವ್ಯಾಸ ೧೮. ರಾಮ ೧೯. ಬಲರಾಮ ೨೦. ಕೃಷ್ಣ ೨೧. ಬುದ್ಧ ೨೨. ಕಲ್ಕಿ.

ಇವರಲ್ಲಿ ೧. ನರ ೨. ಪೃಥು ೩. ಬಲರಾಮ ಇವರು ಅವತಾರರಲ್ಲ. ಇವರು ಪರಮಾತ್ಮನ ವಿಶೇಷಾವೇಶ-ವುಳ್ಳವರಾಗಿದ್ದಾರೆ. ಇಲ್ಲಿ ಪರಮಾತ್ಮನ ಕೆಲವೇ ಅವತಾರಗಳನ್ನು ಹೇಳಲಾಗಿದೆ. ಆದರೆ ಅವನ ಅವತಾರಗಳು ಅನಂತವಾಗಿವೆ.

ಅವತಾರಾಃ ಹಿ ಅಸಂಖ್ಯೇಯಾಃ ಹರೇಃ ಸತ್ವನಿಧೇಃ ದ್ವಿಜಾಃ ॥ ೨೬ ॥

ಭಗವಂತನ ಎಲ್ಲ ಅವತಾರಗಳೂ ಸಮಾನ

ಅವತಾರಗಳ ವಿಷಯದಲ್ಲಿ ಒಂದು ಮುಖ್ಯವಾದ ಅಂಶವನ್ನು ಇಲ್ಲಿ ಗಮನಿಸಬೇಕು. ಪರಮಾತ್ಮನ ಎಲ್ಲ ಅವತಾರಗಳೂ ಸಮಾನವಾದವು. ಇವೆಲ್ಲವೂ ಅವನ ಸ್ವರೂಪಾಂಶರೂಪವಾದವು. ಶ್ರೀಕೃಷ್ಣನು ಮೂಲರೂಪೀ ಪದ್ಮನಾಭನ ಸ್ವರೂಪಾಂಶನು. ಇದೇ ರೀತಿ ಎಲ್ಲ ಅವತಾರಗಳೂ ಸ್ವರೂಪಾಂಶರೂಪವಾದವು.

ಏತೇ ಸ್ವಾಂಶ ಕಲಾಃ ಪುಂಸಃ ಕೃಷ್ಣಸ್ತು ಭಗವಾನ್ ಸ್ವಯಮ್ ॥ ೨೮ ॥

ಎಂಬ ಶ್ಲೋಕಕ್ಕೆ ಕೆಲವರು ಶ್ರೀಕೃಷ್ಣಾವತಾರವೊಂದೇ ಮೂಲರೂಪದ ಸ್ವರೂಪಾಂಶವು. ಉಳಿದ ಅವತಾರಗಳು ಕೃಷ್ಣಾವತಾರಕ್ಕಿಂತ ಕಡಿಮೆ ಎಂದು ಅರ್ಥ ಹೇಳುವುದು ಸರಿಯಲ್ಲ. ಇದರ ಹಿಂದಿನ ಶ್ಲೋಕವನ್ನು ನೋಡಿದರೆ ಈ ವಿಷಯವು ಇನ್ನೂ ಸ್ಪಷ್ಟವಾಗುವುದು.

ಋಷಯೋಮನವೋದೇವಾಃ ಮನುಪುತ್ರಾಃ ಮಹೌಜಸಃ ।
ಕಲಾಃ ಸರ್ವೇಹರೇರೇವ ಸಪ್ರಜಾಪತಯಃ ಸ್ಮೃತಾಃ ॥

ಎಂಬ ಶ್ಲೋಕದಲ್ಲಿ ಋಷಿಗಳು, ಮನುಗಳು, ಮನುಪುತ್ರರು ಇವರೆಲ್ಲ ಪರಮಾತ್ಮನ ಕಲಾಃ ಅಂದರೆ ಭಿನ್ನಾಂಶರು ಎಂದು ಹೇಳಲಾಗಿದೆ. ನಂತರದ ಶ್ಲೋಕದಲ್ಲಿ ಶ್ರೀಕೃಷ್ಣನು ಸ್ವರೂಪಾಂಶನು ಎಂದು ಹೇಳಲಾಗಿದೆ. ಇಲ್ಲಿ ಕೃಷ್ಣಾವತಾರ ಮತ್ತು ಇನ್ನಿತರ ಅವತಾರಗಳು ಪರಸ್ಪರ ಭಿನ್ನಾಂಶರು ಎಂದು ಹೇಳುವುದು ಪ್ರಸಕ್ತವಾಗಿಲ್ಲ. ಆದರೆ ಋಷಿಗಳು ಮನುಗಳು ಇತ್ಯಾದಿಗಳು ಭಿನ್ನಾಂಶರು, ಕೃಷ್ಣಾವತಾರವೇ ಮೊದಲಾದ ಎಲ್ಲ ಅವತಾರಗಳೂ ಸ್ವರೂಪಾಂಶ ಎಂದು ಹೇಳುವುದು ಪ್ರಸಕ್ತವಾಗಿದೆ.

ಸೂತನು ಮೇಲೆ ಹೇಳಿದ ಭಗವಂತನ ಅವತಾರಗಳನ್ನೂ ಅದರಲ್ಲಿ ಕೃಷ್ಣಾವತಾರವನ್ನು ವಿಶೇಷವಾಗಿಯೂ ನಿರೂಪಿಸಿ ಭಗವಂತನ ಈ ಎಲ್ಲ ಮಹಿಮೆಗಳನ್ನು ವರ್ಣಿಸುವುದೇ ಭಾಗವತದ ವಿಷಯ ಎಂದು ಹೇಳುತ್ತಾನೆ.

ಇದಂ ಭಾಗವತಂ ನಾಮ ಪುರಾಣಂ ಬ್ರಹ್ಮಸಂಹಿತಮ್ ।
ಉತ್ತಮಶ್ಲೋಕಚರಿತಂ ಚಕಾರ ಭಗವಾನ್ ಮುನಿಃ ॥ (೧.೩-೪೦)

ಭಾಗವತರಚನೆಯ ಸಂದರ್ಭದಲ್ಲಿ ಶ್ರೀವ್ಯಾಸ ಮತ್ತು ನಾರದರ ಸಮಾಗಮ ಮತ್ತು ಸಂವಾದಗಳನ್ನು ಈಗಾಗಲೇ ವಿವರಿಸಿರುವವು. ನಾರದರು ಹೋದಬಳಿಕ ಶ್ರೀವೇದವ್ಯಾಸರು ಸರಸ್ವತೀ ನದೀ ತೀರದಲ್ಲಿರುವ ಶಮ್ಯಾಪ್ರಾಸವೆಂಬ ಆಶ್ರಮದಲ್ಲಿ ತಮ್ಮ ಮಗ ಶುಕನಿಗೆ ಭಾಗವತವನ್ನು ಹೇಳಿಕೊಡುವರು.

ಬ್ರಹ್ಮನದ್ಯಾಃ ಸರಸ್ವತ್ಯಾಃ ಆಶ್ರಮಃ ಪಶ್ಚಿಮೇ ತಟೇ ।
ಶಮ್ಯಾಪ್ರಾಸ ಇತಿ ಪ್ರೋಕ್ತಃ ಋಷೀಣಾಂ ಸತ್ತ್ರವರ್ಧನಃ ॥ ೨ ॥

ತಸ್ಮಿನ್ ಋಷ್ಯಾಶ್ರಮೇ ವ್ಯಾಸೋ ಬದರೀಷಂಡಮಂಡಿತೇ ।
ಆಸೀನೋಽಪವಿಪಸ್ಪೃಶ್ಯ ಪ್ರಣಿದಧ್ಯೌಮನಸ್ಥಿರಮ್ ॥ ೩ ॥

ಅಪಶ್ಯತ್ ಪುರುಷಂ ಪೂರ್ಣಂ ಮಾಯಾಂಚ ತದಪಾಶ್ರಯಾಮ್ ॥ ೪ ॥

ಯಸ್ಯಾಂವೈಶ್ರೂಯಮಾಣಾಯಾಂ ಕೃಷ್ಣೇ ಪರಮಪುರುಷೇ ।
ಭಕ್ತಿರುತ್ಪದ್ಯತೇ ಪುಂಸಾಂ ಶೋಕಮೋಹಭಯಾಪಹಾ ॥ ೭ ॥

ಸ ಸಂಹಿತಾಂ ಭಾಗವತೀಂ ಕೃತ್ವಾನುಕ್ರಮ್ಯಚಾತ್ಮಜಮ್ ।
ಶುಕಮಧ್ಯಾಪಯಾಮಾಸ ನಿವೃತ್ತಿನಿರತಂ ಮುನಿಮ್ ॥ ೮ ॥

ವೇದವ್ಯಾಸರು ಶುಕರಿಗೆ ಭಾಗವತವನ್ನು ಉಪದೇಶಿಸುವುದರಲ್ಲಿ ಒಂದು ಉದ್ದೇಶವಿತ್ತು. ಪರೀಕ್ಷಿತರಾಜನು ಅನಿರೀಕ್ಷಿತವಾಗಿ ಒಂದು ಸಂಕಟಕ್ಕೆ ಒಳಗಾಗಿ ದುಃಖಪಡುವನು ಎಂಬುದು ಶ್ರೀವೇದವ್ಯಾಸರಿಗೆ ತಿಳಿದಿತ್ತು. ಈ ದುಃಖವನ್ನು ತಡೆದುಕೊಳ್ಳಲು ಅವನಿಗೆ ಭಾಗವತೋಪದೇಶದ ಅಗತ್ಯವಿತ್ತು. ಈ ಕಾರ್ಯವು ಶುಕನಂಥ ಮಹಾನ್ ವ್ಯಕ್ತಿಯಿಂದಲೇ ಸಾಧ್ಯವಿತ್ತು. ಶುಕರು ಸಂಪೂರ್ಣವಾಗಿ ಸರ್ವಸಂಗತ್ಯಾಗಮಾಡಿದ್ದರೂ ಕಷ್ಟದಲ್ಲಿರುವವರಿಗೆ ನೆರವಾಗುವ ಸ್ವಭಾವದವರಾಗಿದ್ದರು. ಪರೀಕ್ಷಿತರಾಜನು ಇಂಥ ನೆರವಿಗೆ ಅರ್ಹನಾಗಿದ್ದನು.

ಭಾಗವತದ ಕಥೆಯನ್ನು ಪರೀಕ್ಷಿತನಿಗೆ ಶುಕರಿಂದ ಭಾಗವತೋಪದೇಶದ ಈ ಘಟ್ಟಕ್ಕೆ ತರಲು ಪರೀಕ್ಷಿತನ ಜನ್ಮವೃತ್ತಾಂತ, ಮಹಾಭಾರತದ ಕೊನೆಯ ಕೆಲವು ಘಟನೆಗಳು ಇವುಗಳನ್ನು ಹೇಳುವುದು ಅಗತ್ಯವಾಗಿತ್ತು. ಆದ್ದರಿಂದ ಈ ವಿಷಯಗಳನ್ನೆಲ್ಲ ಏಳನೆಯ ಅಧ್ಯಾಯದಿಂದ ಹೇಳುತ್ತಾರೆ.

ಸವೈ ನಿವೃತ್ತಿನಿರತಃ ಸರ್ವತ್ರೋಪೇಕ್ಷಕೋಮುನಿಃ ।
ಕಸ್ಯ ವಾಬೃಹತೀಮೇತಾಮಾತ್ಮಾರಾಮಃ ಸಮಭ್ಯಸತ್ ॥ ೯ ॥

ಆತ್ಮಾರಾಮಾಶ್ಚಮುನಯೋನಿರ್ಗ್ರಂಥಾಅಪ್ಯುರುಕ್ರಮೇ ।
ಕುರ್ವಂತ್ಯಹೈತುಕೀಂ ಭಕ್ತಿಂ ಇತ್ಥಂಭೂತಗುಣೋ ಹರಿಃ ॥ ೧೦ ॥

ಹರೇರ್ಗುಣಾಕ್ಷಿಪ್ತಮತಿರ್ಭಗವಾನ್ ಬಾದರಾಯಣಃ ।
ಅಧ್ಯಗಾನ್ಮಹದಾಖ್ಯಾನಂನಿತ್ಯಂ ವಿಷ್ಣುಜನಪ್ರಿಯಮ್ ॥ ೧೧ ॥

ಪರೀಕ್ಷಿತೋಽಥರಾಜರ್ಷೇಃ ಜನ್ಮಕರ್ಮವಿಲಾಪನಮ್ ।
ಸಂಸ್ಥಾಂ ಚ ಪಾಂಡು ಪುತ್ರಾಣಾಂ ವಕ್ಷ್ಯೇ ಕೃಷ್ಣಕಥೋದಯಮ್ ॥ ೧೨ ॥

ಪರೀಕ್ಷಿತ್ ರಾಜನ ಜನ್ಮವೃತ್ತಾಂತ

ಪರೀಕ್ಷಿತ್‌ರಾಜನ ಕಥೆಯು ಅವನು ಮೃತನಾಗಿಯೇ ಹುಟ್ಟುವುದರಿಂದ ಆರಂಭವಾಗುತ್ತದೆ. ಅವನ ಮರಣದ ಘಟನೆಯಿಂದಲೇ ಮುಗಿಯುತ್ತದೆ. ಸಾಮಾನ್ಯರ ಜೀವನ ಜನ್ಮದಿಂದ ಮರಣದವರೆಗೆ. ಆದರೆ ಇವನ ಜೀವನ ಮರಣದಿಂದ ಮರಣದವರೆಗೆ ನಡೆಯುತ್ತದೆ. ಮೃತನಾಗಿಯೇ ಹುಟ್ಟಿದ ಇವನ ಜೀವನವನ್ನು ಶ್ರೀಕೃಷ್ಣಪರಮಾತ್ಮನು ಪುನರುಜ್ಜೀವನಗೊಳಿಸುತ್ತಾನೆ.

ಅಶ್ವತ್ಥಾಮ್ನಾ ವಿಸೃಷ್ಟೇನ ಬ್ರಹ್ಮಶೀರ್ಷ್ಣೋರುತೇಜಸಾ ।
ಉತ್ತರಾಯಾ ಹತೋಗರ್ಭಃ ಈಶೇನೋಜ್ಜೀವಿತಃ ಪುನಃ ॥ (೧.೧೧ ೧)

ಪರೀಕ್ಷಿತನು ಮೃತನಾಗಿಯೇ ಜನಿಸುವ ಘಟನೆಗೆ ಮೊದಲು ಕೆಲವು ದುರ್ಘಟನೆಗಳು ನಡೆಯುತ್ತವೆ. ಭೀಮಸೇನನು ದುರ್ಯೋಧನನ ತೊಡೆ ಮುರಿದು ಯುದ್ಧಭೂಮಿಯಲ್ಲಿ ದುರ್ಯೋಧನನು ನರಳುತ್ತಿದ್ದಾಗ ಅಶ್ವತ್ಥಾಮನು ಅವನನ್ನು ನೋಡಲು ಬರುವನು. ಇಂಥ ಸಂಕಟದ ಪ್ರಸಂಗದಲ್ಲಿಯೂ ದುರ್ಯೋಧನನು ಅಶ್ವತ್ಥಾಮನನ್ನು ಎರಡು ಉಪಕಾರ ಮಾಡಲು ಕೇಳಿಕೊಳ್ಳುವನು. ೧) ಪಾಂಡವರ ಸಂತಾನವನ್ನೆಲ್ಲ ನಿರ್ಮೂಲಮಾಡಬೇಕು. ೨) ದುರ್ಯೋಧನನ ಹೆಂಡತಿಯಲ್ಲಿ ಮಗನನ್ನು ಪಡೆದು ಅವನನ್ನು ಕೌರವರಾಜ್ಯಕ್ಕೆ

ಉತ್ತರಾಧಿಕಾರಿಯನ್ನಾಗಿ ಮಾಡಬೇಕು. ಈ ಮಾತಿಗೆ ಒಪ್ಪಿ ಅಶ್ವತ್ಥಾಮನು ಪಾಂಡವರ ಶಿಬಿರಕ್ಕೆ ಹೋಗಿ ಪಾಂಡವರ ಮಕ್ಕಳನ್ನೆಲ್ಲ ಕೊಂದುಬಿಡುವನು. ಇದರಿಂದ ದ್ರೌಪದಿಯು ದುಃಖಿತಳಾಗುವಳು. ಆಗ ಅರ್ಜುನನು ಅವಳನ್ನು ಸಮಾಧಾನಗೊಳಿಸುತ್ತ, ಅಶ್ವತ್ಥಾಮನ ತಲೆಯನ್ನು ಕಡಿದು ತರುವೆನು ಎಂದು ಹೇಳುವನು.

ಭರ್ತುಃ ಪ್ರಿಯಂ ದ್ರೌಣಿರಿತಿಸ್ಮಪಶ್ಯನ್
ಕೃಷ್ಣಾಸುತಾನಾಂ ಸ್ವಪತಾಂಶಿರಾಂ ಸಿ ।
ಅಪಾಹರತ್ ವಿಪ್ರಿಯಮೇತದಸ್ಯ ವಿಗರ್ಹಯಂತೀ ॥ ೧೪ ॥

ಮಾತಾಶಿಶೂನಾಂ ನಿಧನಂ ಸುತಾನಾಂ
ನಿಶಮ್ಯ ಘೋರಂ ಪರಿತಪ್ಯಮಾನಾ ।
ತದಾರುದದ್ಬಾಷ್ಪಕಲಾಕುಲಾಕ್ಷೀ
ತಾಂ ಸಾಂತ್ವಯನ್ನಾಹ ಕಿರೀಟಮಾಲೀ ॥ ೧೫ ॥

ತನ್ನಾಶುಚಸ್ತೇ ಪ್ರಮೃಜಾಶುಭದ್ರೇ
ಯದ್‌ಬ್ರಹ್ಮಬಂಧೋಃ ಶಿರ ಆತತಾಯಿನಃ ।
ಗಾಂಡೀವಮುಕ್ತೈಃ ವಿಶಿಖೈರುಪಾಹರೇ ॥ ೧೬ ॥

ದ್ರೌಪದಿಗೆ ಮಾತುಕೊಟ್ಟಂತೆ ಅರ್ಜುನನು ಅಶ್ವತ್ಥಾಮನನ್ನು ಬೆನ್ನಟ್ಟುವನು. ಅಶ್ವತ್ಥಾಮನು ಇವನಿಂದ ಪಾರಾಗಲು ಇವನ ಮೇಲೆ ಬ್ರಹ್ಮಾಸ್ತ್ರವನ್ನು ಬೀರುವನು. ಇದರಿಂದ ಸುತ್ತಲೂ ಬೆಂಕಿಯು ಹರಡುವುದು. ಇದರಿಂದ ಚಕಿತನಾದ ಅರ್ಜುನನು ಇದು ಏನು ಎಂದು ಶ್ರೀಕೃಷ್ಣನನ್ನು ಕೇಳುವನು ಮತ್ತು ಇದಕ್ಕೆ ಪರಿಹಾರವೇನು ? ಎಂದು ಕೇಳುವನು. ಇದಕ್ಕೆ ಶ್ರೀಕೃಷ್ಣನು ಅಶ್ವತ್ಥಾಮನು ಬ್ರಹ್ಮಾಸ್ತ್ರವನ್ನು ಬಿಟ್ಟಿರುವನು. ಆದರೆ ಅವನಿಗೆ ಇದನ್ನು ಉಪಸಂಹಾರ ಮಾಡಲು ಬರುವುದಿಲ್ಲ. ಆದ್ದರಿಂದ ಇದಕ್ಕೆ ಪ್ರತಿಯಾಗಿ ನೀನೂ ಬ್ರಹ್ಮಾಸ್ತ್ರವನ್ನು ಬಿಡು ಎಂದು ಹೇಳುವನು. ಅರ್ಜುನನೂ ಬ್ರಹ್ಮಾಸ್ತ್ರವನ್ನು ಬಿಡಲು ಪ್ರಲಯಕಾಲದ ಸಂವರ್ತಕ ಅಗ್ನಿಯಂತೆ ಎಲ್ಲ ಕಡೆಗೂ ಬೆಂಕಿಯು ಹರಡಿ ಸಮಸ್ತ ಭೂಮಂಡಲವೇ ಉರಿಯಲು ತೊಡಗುವುದು. ಆಗ ಅರ್ಜುನನು ಶ್ರೀಕೃಷ್ಣನ ಸೂಚನೆಯಂತೆ ಎರಡು ಬ್ರಹ್ಮಾಸ್ತ್ರಗಳನ್ನೂ ಉಪಸಂಹರಿಸಿ ಅಶ್ವತ್ಥಾಮನನ್ನು ಪಶುವನ್ನು ಕಟ್ಟುವಂತೆ ಹಗ್ಗದಿಂದ ಬಿಗಿದು ಪಾಂಡವರ ಶಿಬಿರಕ್ಕೆ ಒಯ್ಯುವನು.

I. **ಅಭ್ಯದ್ರವತ್ ದಂಶಿತ ಉಗ್ರಧನ್ವಾ ಕಪಿಧ್ವಜೋ ಗುರುಪುತ್ರೋರಥೇನ ॥ ೧೭ ॥**

II. **ಯದಾಽಶರಣಮಾತ್ಮಾನಮೈಕ್ಷತ ಶಾಂತವಾಹನಮ್ ।**
ಅಸ್ತ್ರಂ ಬ್ರಹ್ಮಶಿರೋ ಮೇನೇ ಆತ್ಮತ್ರಾಣಂ ದ್ವಿಜಾತ್ಮಜಃ ॥ ೧೯ ॥

ಅಥೋಪಸ್ಪೃಶ್ಯ ಸಲಿಲಂ ಸಂದಧೇಸ್ತ್ರಂ ಸಮಾಹಿತಃ ।
ಅಜಾನನ್ನಪಿ ಸಂಹಾರಂ ಪ್ರಾಣಕೃಚ್ಛ್ರ ಉಪಸ್ಥಿತೇ ॥ ೨೦ ॥

ತತಃಪ್ರಾದುಷ್ಕೃತಂ ತೇಜಃ ಪ್ರಚಂಡಂ ಸರ್ವತೋದಿಶಮ್ ।
ಪ್ರಾಪತತ್ತದಭಿಪ್ರೇಕ್ಷ್ಯ ವಿಷ್ಣುಂ ಜಿಷ್ಣುರುವಾಚಹ ॥ ೨೧ ॥

ಕಿಮಿದಂ ಸ್ವಿತ್‌ಕುತೋವೇತಿ ದೇವದೇವ ನ ವೇದ್ಮ್ಯಹಮ್ ।
ಸರ್ವತೋಮುಖಮಾಯಾತಿ ತೇಜಃ ಪರಮದಾರುಣಮ್ ॥ ೨೬ ॥

III. **ವೇತ್ಥೇದಂ ದ್ರೋಣಪುತ್ರಸ್ಯ ಬ್ರಾಹ್ಮಮಸ್ತ್ರಂ ಪ್ರದರ್ಶಿತಮ್ ।**
ನೈವಾಸೌವೇದಸಂಹಾರಂ ಪ್ರಾಣಬಾಧವಿಪಸ್ಥಿತೇ ॥ ೨೭ ॥

ನಹ್ಯಸ್ಯಾನ್ಯತಮಂ ಕಿಂಚಿದಸ್ತ್ರಂ ಪ್ರತ್ಯವಕರ್ಷಣಮ್ ।
ಜಹ್ಯಸ್ತ್ರತೇಜ ಉನ್ನದ್ಧಮಸ್ತ್ರಜ್ಞೋಹ್ಯಸ್ತ್ರತೇಜಸಾ ॥ ೨೮ ॥

IV. ಶ್ರುತ್ವಾಭಗವತಃ ಪ್ರೋಕ್ತಂ ಫಲ್ಗುನಃ ಪರವೀರಹಾ ।
ಸ್ಪೃಷ್ಟ್ವಾಪಃ ತಂ ಪರಿಕ್ರಮ್ಯ ಬ್ರಾಹ್ಮಂ ಬ್ರಾಹ್ಮಾಯ ಸಂದಧೇ ॥ ೨೯ ॥

ದೃಷ್ಟ್ವಾಽಸ್ತ್ರತೇಜಸ್ತು ತಯೋಃ ತ್ರೀನ್‌ಲೋಕಾನ್ ಪ್ರದಹನ್ಮಹತ್ ।
ದಹ್ಯಮಾನಾಃ ಪ್ರಜಾಃ ಸರ್ವಾಃ ಸಾಂವರ್ತಕಮಮಂಸತ ॥ ೩೦ ॥

ಪ್ರಜೋಪಪ್ಲವಮಾಲಕ್ಷ್ಯಲೋಕವ್ಯತಿಕರಂಚ ತಮ್ ।
ಮತಂಚವಾಸುದೇವಸ್ಯ ಸಂಜಹಾರಾರ್ಜುನೋದ್ವಯಮ್ ॥ ೩೧ ॥

ತತ ಆಸಾದ್ಯ ತರಸಾ ದಾರುಣಂ ಗೌತಮೀಸುತಮ್ ।
ಬಬಂಧಾಮರ್ಷತಾಮ್ರಾಷಃ ಪಶುಂಕ್ಷ ರಶನಯಾ ಯಥಾ ॥ ೩೨ ॥

ಅರ್ಜುನನು ಅಶ್ವತ್ಥಾಮನನ್ನು ಪಾಂಡವರ ಶಿಬಿರಕ್ಕೆ ಎಳೆದು ಒಯ್ಯುತ್ತಿದ್ದಾಗ ಶ್ರೀಕೃಷ್ಣನು ಇವನನ್ನು ಬಿಡಬೇಡ. ಕೊಂದುಬಿಡು. ಇವನು ನಿಷ್ಪಾಪಿಗಳಾದ ಪಾಂಡವರ ಮಕ್ಕಳನ್ನು ಕೊಂದಿದ್ದಾನೆ. ಇವನ ತಲೆಯನ್ನು ಕತ್ತರಿಸಿ ತರುವನು ಎಂದು ನೀನು ದ್ರೌಪದಿಗೆ ಮಾತುಕೊಟ್ಟಿರುವಿ ಎಂದು ಹೇಳುವನು. ಶ್ರೀಕೃಷ್ಣನು ಅರ್ಜುನನ ಧರ್ಮನಿಷ್ಠೆಯನ್ನು ಪರೀಕ್ಷಿಸಲು ಹೀಗೆ ಹೇಳಿದನು. ಶಿಬಿರಕ್ಕೆ ಬಂದಮೇಲೆ ಅಶ್ವತ್ಥಾಮನನ್ನು ದ್ರೌಪದಿಯ ಎದುರಿಗೆ ನಿಲ್ಲಿಸುವನು. ಆಗ ದ್ರೌಪದಿಯು ಇವನು ನಿನ್ನ ಗುರುಪುತ್ರನು ಆದ್ದರಿಂದ ಇವನನ್ನು ಕೊಲ್ಲಬೇಡ. ಇವನ ತಾಯಿಯು ಕಣ್ಣೀರು ಸುರಿಸುವಂತೆ ಮಾಡಬೇಡ ಎಂದು ಹೇಳುವಳು. ಯುಧಿಷ್ಠಿರನೂ ದ್ರೌಪದಿಯ ಮಾತನ್ನು ಅನುಮೋದಿಸುವನು. ಭೀಮಸೇನನು ಮಾತ್ರ ಇವನು ಮಲಗಿದ ಮಕ್ಕಳನ್ನು ಕೊಂದದ್ದರಿಂದ ಇವನನ್ನು ಕೊಲ್ಲಲೇಬೇಕು ಎನ್ನುವನು. ಆಗ ಶ್ರೀಕೃಷ್ಣನು ಮಧ್ಯಸ್ತಿಕೆ ಮಾಡಿ ಅರ್ಜುನ! ಈ ವಿಷಯದಲ್ಲಿ ದ್ರೌಪದಿಯ ಮನಸ್ಸಿನ ದುಃಖವು ಕಡಿಮೆಯಾಗುವಂತೆ ಮತ್ತು ಭೀಮಸೇನನಿಗೆ ತೃಪ್ತಿಯಾಗುವಂತೆ ಮಾಡು ಎಂದು ಹೇಳುವನು. ಈ ಸೂಚನೆಯನ್ನರಿತು ಅರ್ಜುನನು ಅಶ್ವತ್ಥಾಮನ ತಲೆಯಲ್ಲಿಯ ಮಣಿಯನ್ನು ಕಿತ್ತಿಕೊಂಡು ಅವನನ್ನು ಬಿಟ್ಟುಬಿಡುವನು. ಬ್ರಾಹ್ಮಣನಾದವನ್ನು ಕಾರಾಗೃಹಕ್ಕೆ ಹಾಕಿದರೆ, ದೇಶಬಿಟ್ಟು ಹೊರಗೆ ಹಾಕಿದರೆ, ಅಥವಾ ಅವನಿಗೆ ಲಂಚಕೊಟ್ಟರೆ ಅವನನ್ನು ಕೊಂದಂತೆಯೇ ಸರಿ.

i. ಶಿಬಿರಾಯ ನಿನೀಷಂತಂ ರಜ್ವಾಬಧ್ವಾರಿಪುಂ ಬಲಾತ್ ।
ಪ್ರಾಹಾರ್ಜುನಂ ಪ್ರಕುಪಿತೋ ಭಗವಾನಂಬುಜೇಕ್ಷಣಃ ॥ ೩೪ ॥

ಮೈನಂ ಪಾರ್ಥಾರ್ಹಸಿ ತ್ರಾತುಂ ಬ್ರಹ್ಮಬಂಧುಮಿಮಂ ಜಹಿ ।
ಯೋಽಸಾವನಾಗಸಃ ಸುಪ್ತಾನವಧೀನ್ನಿಶಿ ಬಾಲಕಾನ್ ॥ ೩೫ ॥

ಪ್ರತಿಶ್ರುತಂ ಚ ಭವತಾ ಪಾಂಚಾಲ್ಯೈಶೃಣ್ವತೋ ಮಮ ।
ಆಹರಿಷ್ಯೇಶಿರಸ್ತಸ್ಯ ಯಸ್ತೇ ಮಾನಿನಿ ಪುತ್ರಹಾ ॥ ೩೮ ॥

ಏವಂ ಪರೀಕ್ಷತಾ ಧರ್ಮಂ ಪಾರ್ಥಃ ಕೃಷ್ಣೇನ ಚೋದಿತಃ ।
ನೈಚ್ಛದ್ಧಂತುಂ ಗುರುಸುತಂ ಯದಪ್ಯಾತ್ಮಹನಂ ಮಹಾನ್ ॥ ೪೦ ॥

ii. ಅಥೋಪೇತ್ಯ ಸ್ವಶಿಬಿರಂ ಗೋವಿಂದಪ್ರಿಯಸಾರಥಿಃ ।
ನ್ಯವೇದಯತ್ತಂ ಪ್ರಿಯಾಯೈ ಶೋಚಂತ್ಯಾ ಆತ್ಮಜಾನ್ ಹತಾನ್ ॥ ೪೧ ॥

ತಥಾಹೃತಂ ಪಶುವತ್ ಪಾಶಬದ್ಧಂ ಅವಾಙ್ಮುಖಂ ಕರ್ಮಜುಗುಪ್ಸಿತೇನ ।
ನಿರೀಕ್ಷ್ಯ ಕೃಷ್ಣಾಪಕೃತಂ ಗುರೋಃ ಸುತಂ ವಾಮಸ್ವಭಾವಾ ಕೃಪಯಾ ನನಾಮ ॥ ೪೨ ॥

ಉವಾಚಾಸಹಂತ್ಯಸ್ಯ ಬಂಧನಾನಯನಂ ಸತೀ ।
ಮುಚ್ಯತಾಂ ಮುಚ್ಯತಾಮೇಷ ಬ್ರಾಹ್ಮಣೋ ನಿತರಾಂ ಗುರುಃ ॥ ೪೩ ॥

ಸ ಏಷಭಗವಾನ್‌ದ್ರೋಣಃ ಪ್ರಜಾರೂಪೇಣ ವರ್ತತೇ ।
ತಸ್ಯಾತ್ಮನೋರ್ಧಂ ಪತ್ನ್ಯಾಸ್ತೇ ನಾನ್ವಗಾದ್ ವೀರಸೂಃಕೃಪೀ ॥ ೪೫ ॥

ಮಾರೋದೀದಸ್ಯಜನನೀ ಗೌತಮೀ ಪತಿದೇವತಾ ।
ಯಥಾಽಹಂ ಮೃತವತ್ಸಾರ್ತಾ ರೋದಿಮ್ಯಶ್ರುಮುಖೀ ಮುಹುಃ ॥ ೪೭ ॥

iii. ಧರ್ಮ್ಯಂ ನ್ಯಾಯ್ಯಂ ಸಕರುಣಂ ನಿರ್ವ್ಯಲೀಕಂ ಸಮಂಮಹತ್ ।
ರಾಜಾಧರ್ಮಸುತೋರಾಜ್ಞ್ಯಾಃ ಪ್ರತ್ಯನಂದತ್‌ವಚೋದ್ವಿಜಾಃ ॥ ೪೯ ॥

iv. ತತ್ರಾಹಾಮರ್ಷಿತೋಭೀಮಃ ತಸ್ಯಶ್ರೇಯಾನ್‌ವಧಃ ಸ್ಮೃತಃ ।
ನ ಭರ್ತುರಾತ್ಮನಶ್ಚಾರ್ಥೇ ಯೋಽಹನ್‌ಸುಪ್ತಾನ್ ಶಿಶೂನ್ ವೃಥಾ ॥ ೫೨ ॥

v. ಬ್ರಹ್ಮಬಂಧುರ್ನಹಂತವ್ಯಃ ಆತತಾಯೀವಧಾರ್ಹಣಃ ।
ಮಯ್ಯೈವೋಭಯಮಾಮ್ನಾತಂ ಪರಿಪಾಹ್ಯನುಶಾಸನಮ್ ॥ ೫೩ ॥

ಕುರು ಪ್ರತಿಶ್ರುತಂ ಸತ್ಯಂ ಯತ್ತತ್ ಸಾಂತ್ವಯತಾ ಪ್ರಿಯಾಮ್ ।
ಪ್ರಿಯಂಚಭೀಮಸೇನಸ್ಯ ಪಾಂಚಾಲ್ಯೈಮಹ್ಯಮೇವಚ ॥ ೫೪ ॥

vi. ಅರ್ಜುನಶ್ಚ ಸಹಸಾಜ್ಞಾಯ ಹರೇರ್ಹಾರ್ದಮಥಾಸಿನಾ ।
ಮಣಿಂಜಹಾರಮೂರ್ಧನ್ಯಂ ದ್ವಿಜಸ್ಯ ಸಹಮೂರ್ಧಜಮ್ ॥ ೫೫ ॥

ವಿಮುಚ್ಯರಶನಾಬದ್ಧಂ ಬಾಲಹತ್ಯಾಹತಪ್ರಭಮ್ ।
ತೇಜಸಾಮಣಿನಾಹೀನಂ ಶಿಬಿರಾನ್ನಿರವಾಪಯತ್ ॥

ಬಂಧನಂ ದ್ರವಿಣಾದಾನಂ ಸ್ಥಾನಾನ್ನಿರ್ಯಾಪಣಂ ತಥಾ ।
ಏಷಹಿಬ್ರಹ್ಮಬಂಧೂನಾಂ ವಧೋನಾನ್ಯೋಽಸ್ತಿದೈಹಿಕಃ ॥ ೫೭ ॥

ಮಹಾಭಾರತದಲ್ಲಿ ಅಶ್ವತ್ಥಾಮನ ನಡತೆಯ ಭಿನ್ನರೀತಿಯಾದ ವರ್ಣನೆ

ಈ ಸಮಗ್ರ ಘಟನೆಯ ವರ್ಣನೆಯು ಅಶ್ವತ್ಥಾಮನು ಕನಸಿನಲ್ಲಿಕಂಡ ಘಟನೆಯು. ಪ್ರತ್ಯಕ್ಷವಾಗಿ ನಡೆದ ಘಟನೆಯು ಕೆಲವು ಅಂಶಗಳಲ್ಲಿ ಇದಕ್ಕಿಂತ ಭಿನ್ನವಾಗಿದೆ. ಈ ಅಂಶವನ್ನು ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ಮಹಾಭಾರತ ತಾತ್ಪರ್ಯ ನಿರ್ಣಯದಲ್ಲಿ ಈ ಕೆಳಗಿನಂತೆ ಸ್ಪಷ್ಟ ಪಡಿಸಿದ್ದಾರೆ.

ಸ್ವಪ್ನೇಹಿ ದ್ರೌಪದೇಯಾನಾಂ ವಧೋದೃಷ್ಟೋಽಽತ್ಮನಾ ನಿಶಿ ।
ಅರ್ಜುನೇನ ಪ್ರತಿಜ್ಞಾತಂ ದ್ರೌಪದ್ಯೈಸ್ತ್ವವಧಂ ಪ್ರತಿ ।
ನಿಬಧ್ಯಾನಯನಂ ಚೈವ ತೇನೈವ ಶಿಬಿರಂ ಪ್ರತಿ ।
ಮುಂಚೇತಿದ್ರೌಪದೀವಾಕ್ಯಂ ನೇತಿಭೀಮವಚಸ್ತಥಾ ।
ಕೃಷ್ಣವಾಕ್ಯಾತ್ ಮಣಿಂಹೃತ್ವಾ ದೇಶನಿರ್ಯಾಪಣಂ ತಥಾ ।
ಇತ್ಯಾದಿಸ್ವಪ್ನದೃಷ್ಟಂಯತ್ ಪ್ರಾಯಃ ಸತ್ಯಮಭೂದಿತಿ ॥ (ತಾ.ನಿ. ಅಧ್ಯಾಯ ೨೮ ೧೯೦-೧೯೨) ಶ್ಲೋಕ.

ಮಹಾಭಾರತದ ತಾತ್ಪರ್ಯ ನಿರ್ಣಯದಲ್ಲಿ ಅಶ್ವತ್ಥಾಮನು ಈ ಕನಸನ್ನು ಕಂಡ ಸಂದರ್ಭವನ್ನೂ ಪಾಂಡವರ ಮಕ್ಕಳನ್ನು ಹೇಗೆ ಕೊಲ್ಲಬೇಕು ಎಂಬುದಕ್ಕೆ ಅವನಿಗೆ ಉಪಾಯವು ತೋರಿದ ಸಂದರ್ಭವನ್ನೂ ವಿವರಿಸಿದ್ದಾರೆ.

ಅಶ್ವತ್ಥಾಮನು ಮೃತ್ಯುಶಯ್ಯೆಯಲ್ಲಿದ್ದ ದುರ್ಯೋಧನನ್ನು ನೋಡಿ ಪಾಂಡವರ ಮಕ್ಕಳನ್ನೆಲ್ಲ ಸಂಹಾರಮಾಡುವೆನು ಎಂದು ಮಾತುಕೊಟ್ಟು ಮರಳುವಾಗ ಅರಣ್ಯದಲ್ಲಿ ಒಂದು ನ್ಯಗ್ರೋಧ ಮರದ ಕೆಳಗೆ ಮಲಗುವನು. ಅಲ್ಲಿ ಒಂದು ಗೂಬೆಯು ನಿದ್ರಿಸುತ್ತಿದ್ದ ಕಾಗೆಗಳನ್ನು ಕೊಲ್ಲುವುದನ್ನು ನೋಡುವನು. ಇದರಿಂದ ತಾನೂ ಇದರಂತೆಯೇ ಪಾಂಡವರ ಮಕ್ಕಳನ್ನು ಕೊಲ್ಲಬೇಕೆಂದು ಆಲೋಚಿಸುವನು. ಮುಂದೆ ಅಲ್ಲಿಯೇ ಅರ್ಧ ನಿದ್ರಾವಸ್ಥೆಯಲ್ಲಿದ್ದಾಗ ಭಾಗವತದಲ್ಲಿ ಹೇಳಿದಂತೆ ಕನಸು ಕಾಣುವನು.

> **ತದೈವಹಾರ್ದಿಕ್ಯಕೃಪಾನ್ವಿತೋಽಯಾತ್ ಸುಯೋಧನಂ ದ್ರೋಣಿರಮುಂಶಯಾನಮ್ ।**
> **ಪ್ರಭಗ್ನಸಕ್ಥಿಶ್ವಶೃಗಾಲ ಭೂತ್ಯೈಃ ಸಂಭಕ್ಷ್ಯಮಾಣಂ ದದೃಶೇ ಶ್ವಸಂತಮ್ ॥**
>
> **ಸದುಃಖಶೋಕಾಭಿಹತೋಽವಿನಿಂದ್ಯ ಪಾರ್ಥಾನ್ ಮಯಾ ಭೂಪ ಕಿಮತ್ರಕಾರ್ಯಮ್ ।**
> **ಇತ್ಯಾಹ ನಿಷ್ಪಾಂಡವತಾಂ ಕುರುಷ್ವೇತ್ಯಮುಂ ವ್ಯಧಾತ್ ಪಾಂಸ್ವಭಿಷೇಕಿಣಂ ನೃಪಃ ॥**
>
> **ಉಚ್ಛಿದ್ಯಸಂತತಿಂ ಪಾಂಡೋಃ ಕೃತ್ವಾಸ್ವಕ್ಷೇತ್ರಸಂತತಿಮ್ ।**
> **ತಯಾ ಭೂರಕ್ಷಣಪ್ರದಾಸೋಽಭಿಷಿಕ್ತಃ ತಥೇತ್ಯಗಾತ್ ।**
> **ಸಕೃಷ್ಣಭೀಮಪಾರ್ಥಾನಾಂ ಭಯಾದೇವಪುನರ್ವನಮ್ ।**
> **ಕೃಪಸಾತ್ವತಸಂಯುಕ್ತೋ ವಿವೇಶ ಗಹನಂರಥೀ ।**
> **ತಸ್ಯಚಿಂತಯತೋ ದ್ರೋಣವಧಂ ದುರ್ಯೋಧನಸ್ಯಚ ।**
> **ನಾಗಾನ್ನಿದ್ರಾ ನಿಶೀಥೇಚ ಧ್ವಾಂಕ್ಷಾನ್ನ್ಯಗ್ರೋಧವಾಸಿನಃ ।**
> **ಹತಾನ್ ಸುಬಹುಸಾಹಸ್ರಾನೇಕೇನಾತಿಬಲೇನತು ।**
> **ಕೌಶಿಕೇನ ನಿರೀಕ್ಷ್ಯೈವ ಪ್ರಾಹತೌ ಕೃಪಸಾತ್ವತೌ ॥**
>
> **ನಿದರ್ಶನೇನೈತೇನ ಪ್ರೇರಿತಃ ಪರಮಾತ್ಮನಾ ।**
> **ಯಾಮಿ ಪಾಂಡುಸುತಾನ್ ಹಂತುಮಿತ್ಯುಕ್ತ್ವಾಽರುರುಹೇರಥಮ್ ॥**

(೨೮ನೇ ಅಧ್ಯಾಯ ೧೧೯-೧೨೫ ಶ್ಲೋಕ)

ಭಾಗವತದಲ್ಲಿ ಹೇಳಿದಂತೆ ನಡೆದ ಘಟನೆಗಳು ಅಶ್ವತ್ಥಾಮನ ಕನಸಿನಲ್ಲಿ ನಡೆದವು ಎಂದು ಹೇಳುವ ಮಹಾಭಾರತ ತಾತ್ಪರ್ಯ ನಿರ್ಣಯದಲ್ಲಿ ವಾಸ್ತವವಾಗಿ ನಡೆದ ಘಟನೆಗಳ ವಿವರಗಳನ್ನು ಹೀಗೆ ಕೊಡಲಾಗಿದೆ. ನ್ಯಗ್ರೋಧಮರದ ಕೆಳಗೆ ಮಲಗಿದಾಗ ಗೂಬೆಯು ಕಾಗೆಗಳನ್ನು ಕೊಂದ ಘಟನೆಯನ್ನು ಕಂಡ ಅಶ್ವತ್ಥಾಮನು ಪಾಂಡವರ ಶಿಬಿರಕ್ಕೆ ಹೋಗುತ್ತಾನೆ. ಆಗ ಅಲ್ಲಿ ದೃಷ್ಟದ್ಯುಮ್ನ ಮತ್ತು ಪಾಂಡವರ ಮಕ್ಕಳು ಮಾತ್ರ ಮಲಗಿರುವರು. ದ್ರೌಪದಿ ಮತ್ತು ಪಾಂಡವರು ಕೌರವರ ಶಿಬಿರಕ್ಕೆ ಹೋಗಿ ಮಲಗಿರುವರು. ಅಶ್ವತ್ಥಾಮನು ದೃಷ್ಟದ್ಯುಮ್ನನನ್ನೂ ಪಾಂಡವರ ಮಕ್ಕಳನ್ನೂ ಅಲ್ಲಿಯೇ ಇರುವ ಇನ್ನಿತರರನ್ನೂ ಕೊಲ್ಲುವನು. ದೃಷ್ಟದ್ಯುಮ್ನನ ಓರ್ವ ಸೇವಕನು ಅಲ್ಲಿಂದ ತಪ್ಪಿಸಿಕೊಂಡು ಹೋಗಿ ದ್ರೌಪದಿಗೆ ಈ ವಿಷಯ ತಿಳಿಸುವನು. ಅವಳು ಭೀಮಸೇನನಿಗೆ ತಿಳಿಸುವಳು. ಭೀಮಸೇನನು ಕೂಡಲೇ ಅಶ್ವತ್ಥಾಮನನ್ನು ಬೆನ್ನಟ್ಟುವನು. ಭೀಮಸೇನನ ಹೆದರಿಕೆಯಿಂದ ಅಶ್ವತ್ಥಾಮನು ಬ್ರಹ್ಮಾಸ್ತ್ರವನ್ನು ಪ್ರಯೋಗಿಸುವನು.

ಇದೇ ಸಮಯದಲ್ಲಿ ಶ್ರೀಕೃಷ್ಣ ಮತ್ತು ಅರ್ಜುನರೂ ಅಲ್ಲಿಗೆ ಬರುವರು. ಶ್ರೀಕೃಷ್ಣನು ಅರ್ಜುನನಿಗೆ ಬ್ರಹ್ಮಾಸ್ತ್ರವನ್ನು ಬ್ರಹ್ಮಾಸ್ತ್ರದಿಂದಲೇ ತಡೆಯಲು ಹೇಳುವನು. ಇದೊಂದು ವಿಚಿತ್ರ ಸನ್ನಿವೇಶವಾಗಿತ್ತು. ಭೀಮನನ್ನು ಯಾವ ಅಸ್ತ್ರವೂ ಆಕ್ರಮಿಸಲು ಸಾಧ್ಯವಿರಲಿಲ್ಲ. ಬ್ರಹ್ಮಾಸ್ತ್ರವು ವಿಫಲವಾಗುವಂತೆಯೂ ಇರಲಿಲ್ಲ. ಆದ್ದರಿಂದ ಶ್ರೀಕೃಷ್ಣನು ಅರ್ಜುನನಿಗೆ ಅಶ್ವತ್ಥಾಮನ ಬ್ರಹ್ಮಾಸ್ತ್ರವನ್ನು ತಡೆಯಲು ಹೇಳಿದ್ದನು. ಈ ಸಮಯಕ್ಕೆ ಶ್ರೀವೇದವ್ಯಾಸರು ಬರುವರು. ಎರಡೂ ಬ್ರಹ್ಮಾಸ್ತ್ರಗಳ ನಡುವೆ ನಿಲ್ಲುವರು. ಇಬ್ಬರಿಗೂ ತಮ್ಮ ತಮ್ಮ ಬ್ರಹ್ಮಾಸ್ತ್ರಗಳನ್ನು ಉಪಸಂಹರಿಸಲು ಹೇಳುವರು. ಅರ್ಜುನನು ಒಪ್ಪುವನು. ಆದರೆ ಅಶ್ವತ್ಥಾಮನಿಗೆ ತನ್ನ ಅಸ್ತ್ರವನ್ನು ಉಪಸಂಹರಿಸುವುದು ಸಾಧ್ಯವಿರಲಿಲ್ಲ. ದುರ್ಯೋಧನನ ಪತ್ನಿಯಲ್ಲಿ ಮಗನನ್ನು ಪಡೆಯಬೇಕೆಂದು ಹೇಳಿದ್ದರಿಂದ ಅವನ ಬ್ರಹ್ಮಚರ್ಯವು ನಷ್ಟವಾಗಿ

ಹೋಗಿದ್ದಿತು. ಆಗ ವೇದವ್ಯಾಸರು ಅವನಿಗೆ ತನ್ನ ತಲೆಯಲ್ಲಿದ್ದ ಮಣಿಯನ್ನು ಭೀಮನಿಗೆ ಕಿತ್ತುಕೊಡಲು ಹೇಳಿದರು ಮತ್ತು ಬ್ರಹ್ಮಾಸ್ತ್ರವನ್ನು ಮಾತಿನಿಂದ ಉಪಸಂಹರಿಸಲು ಹೇಳಿದರು. ಅವನು ಮಣಿಯನ್ನು ಕಿತ್ತುಕೊಟ್ಟನು. ಆದರೆ ಬ್ರಹ್ಮಾಸ್ತ್ರವನ್ನು ಪಂಚಪಾಂಡವರಿಂದ ಮಾತ್ರ ಹಿಂತೆಗೆದುಕೊಂಡನು. ಶ್ರೀಕೃಷ್ಣನು ಉತ್ತರೆಯ ಗರ್ಭದಿಂದಲೂ ಇದನ್ನು ಹಿಂದಕ್ಕೆ ತೆಗೆದುಕೊಳ್ಳಬೇಕೆಂದು ಸೂಚಿಸಿದನು. ಅಶ್ವತ್ಥಾಮನು ಒಪ್ಪಲಿಲ್ಲ. ಆಗ ಶ್ರೀಕೃಷ್ಣನು ನಾನು ಗರ್ಭವನ್ನು ರಕ್ಷಿಸುವನು ಎಂದು ಹೇಳಿ ನೀನು ಮೈತುಂಬ ಹುಣ್ಣುಗಳಾಗಿ ದುರ್ವಾಸನೆಯಿಂದ ಕುಡಿದವನಾಗಿ ಅರಣ್ಯದಲ್ಲಿ ಸಂಚರಿಸುತ್ತಿರು ಎಂದು ಶಾಪ ಕೊಟ್ಟನು. ಇದು ನಿಜವಾಗಿ ನಡೆದ ಘಟನೆಯು. ಇದನ್ನು ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ಮಹಾಭಾರತ ತಾತ್ಪರ್ಯ ನಿರ್ಣಯದಲ್ಲಿ ಮಹಾಭಾರತದಲ್ಲಿರುವುದಕ್ಕನುಗುಣವಾಗಿ ನಿರೂಪಿಸಿರುವರು.

i. ನಿದರ್ಶನೇನಹ್ಯೇತೇನ ಪ್ರೇರಿತಃ ಪರಮಾತ್ಮನಾ ।
ಯಾಮಿ ಪಾಂಡುಸುತಾನ್ ಹಂತುಮಿತ್ಯುಕ್ತ್ವಾಽರುರುಹೇರಥಮ್ ।
ನಿವಾರಿತೋಽಪಿ ತಾಭ್ಯಾಂ ಸ ಪ್ರಾದ್ರವತ್ ಶಿಬಿರಂಪ್ರತಿ ॥ ೧೨೫ ॥

ಪಾರಾವತಾಶ್ವಂಸ ತದಾ ಶಯಾನಮುಪೇತ್ಯಪದ್ಭ್ಯಾಂ ಸಮತಾಡಯಚ್ಚ ।
ಸಮಾಕ್ಷಿಪತ್‌ದ್ರೋಣಿಸುತೋಸ್ಯಕಂಠೇ ನಿಬಧ್ಯಮೌರ್ವೀಂಧನುಷೋಽಪ್ಯುರಸ್ಥಃ ।
ಮಮಂಥಕೃಚ್ಛ್ರೇಣವಿಹಾಯದೇಹಂ
ಯಯೌನಿಜಸ್ಥಾನಮಸೌಚ ವಹ್ನಿಃ ॥ ೧೪೨ ॥

ಸರ್ವಾನ್ ಸವ್ಯಾಪಸವ್ಯೇನ ತಥಾನ್ಯಾನ್ ಪಾಂಡವತ್ಮಾಜಾನ್ ।
ಋತ ಏಕಂ ಭೈಮಸೇನಿಂ ಕಾಶಿರಾಜಾತ್ಮಜಾತ್ಮಜಮ್ ।
ತಂ ತದಂತರ್ಹಿತಃ ಶರ್ವಃ ಕೈಲಾಸಮನಯತ್‌ಕ್ಷಣಾತ್ ॥ ೧೪೪ ॥

ಸಚೇದಿಪಾಂಚಾಲಕರೂಶಕಾಶೀನನ್ಯಾಂಶ್ಚ ಸರ್ವಾನ್ ವಿನಿಹತ್ಯವೀರಃ ।
ಶಿಶೂನ್ ಸ್ತ್ರಿಯಾಶ್ಚೈವನಿಹಂತುಮುಗ್ರಃ ಪ್ರಜ್ವಾಲಯತ್ ತಚ್ಛಿಬಿರಂ ಸಮಂತಾತ್ ॥ ೧೪೬ ॥

ಜಘ್ನೇವಿಷೂಂಸ್ತತ್ರಪಲಾಯಮಾನಾನ್ ದ್ವಾರಿಸ್ಥಿತೌಗೌತಮಸಾತ್ವತೌಚ ।
ನಿಜಘ್ನತುಃ ಪಾರ್ಷತಸ್ಯಸೂತಸ್ತ್ವೇಕಃ ಶೇಷಿತೋ ದೈವಯೋಗಾತ್ ॥ ೧೫೦ ॥

ಅನ್ಯಾಸಕ್ತೇಸಮುತ್ಥಾಯ ಪ್ರಾದ್ರವತ್‌ಯತ್ರಪಾರ್ಷತೀ ।
ತಸ್ಯಾಅಕಥಯತ್ ಸರ್ವಂ ಸಾ ಭೀಮಾಯಾಹ ದುಃಖಿತಾ ।
ಪ್ರಾದ್ರವತ್ ರಥಮಾರುಹ್ಯ ಸಧನ್ವೀಗೌತಮೀಸುತಮ್ ॥ ೧೫೨ ॥

ತದಂತರೇ ದ್ರೌಣಿರಪಿ ಪ್ರಯಾತಃ ಕೃಷ್ಣಾಸುತಾನಾಂ ಮುದಿತಃ ಶಿರಾಂಸಿ ।
ಆದಾಯ ಹಾರ್ದಿಕ್ಯಕೃಪಾನುಯಾತೋದುರ್ಯೋಧನಂ ಸನ್ನಿಕೃಷ್ಟಪ್ರಯಾಣಮ್ ॥ ೧೫೩ ॥

ತತ್ರೈಕಲಂ ದ್ರೋಣಸುತಂ ರಥೇನ ಯಾಂತಂರಥೀ ಮಾರುತಿರನ್ವಧಾವತ್ ॥ ೧೫೫ ॥

ಆದ್ರವಂತಂ ಪುನರ್ದೃಷ್ಟ್ವಾ ಭೀಮಂ ದ್ರೋಣಾತ್ಮಜೋರುಷಾ ।
ಆವೃತ್ಯಯುಧ್ಯನ್ ವಿಜಿತೋಸ್ತ್ರಂ ಬ್ರಹ್ಮಶಿರ ಆದದೇ ॥ ೧೫೬ ॥

ಏತಸ್ಮಿನ್ನಂತರೇ ಕೃಷ್ಣೋಧರ್ಮಜೇನಾರ್ಜುನೇ ನಚ ।
ತತ್ರಾಗಮತ್ತದಸ್ತ್ರಂಚ ಭೀಮಂಚಾವ್ಯರ್ಥತಾಂ ನಯನ್ ॥ ೧೫೭ ॥

ಅವಧ್ಯೋಭೀಮಸೇನಸ್ತದಸ್ತ್ರಂಚಾಮೋಘಮೇವಯತ್ ।
ವಿಷ್ಣುನೈವೋಭಯಂ ಯಸ್ಮಾತ್ ಕ್ಲೃಪ್ತಂ ಭೀಮೋಸ್ತ್ರಮೇವತತ್ ॥ ೧೫೮ ॥

ತದಸ್ತ್ರಂ ಪ್ರಜ್ವಲದ್ದೃಷ್ಟ್ವಾಽಪಾಂಡವತ್ವವಿಧಿತ್ಸಯಾ ।
ಧರಾಯಾಂ ದ್ರೌಣಿನಾಮುಕ್ತಂ ಕೃಷ್ಣೇನ ಪ್ರೇರಿತೋಽರ್ಜುನಃ
ಸ್ವಸ್ತ್ಯಸ್ತುದ್ರೋಣಪುತ್ರಾಯ ಭೂತೇಭ್ಯೋ ಮಹ್ಯಮೇವಚ ।
ಇತಿ ಬ್ರುವಂಸ್ತದೇವಾಸ್ತ್ರಂ ಅಸ್ತ್ರಶಾಂತ್ಯೈವ್ಯಸರ್ಜಯತ್ ॥ ೧೬೩ ॥

ತಥಾಪ್ಯಸ್ತ್ರದ್ವಯಂ ಯುಕ್ತಂ ಭೂತಾನಾಂ ನಾಶಕೃದ್‌ಧ್ರುವಮ್ ।
ತಸ್ಮಾನ್ನಿವಾರಯನ್‌ಯೋಗಂ ತಯೋರ್ಮಧ್ಯೇಽಭವತ್‌ಕ್ಷಣಾತ್ ।
ನಿಸ್ಸೀಮಶಕ್ತಿಃಪರಮಃಕೃಷ್ಣಃ ಸತ್ಯವತೀಸುತಃ ।

iii. ಸಂಸ್ಥಾಪ್ಯಸ್ತ್ರದ್ವಯಂದೂರೇ ತಾವಾಹಪುರುಷೋತ್ತಮಃ ।
ನಿವರ್ತ್ಯತಾಮಕ್ಷಮಿತಿ ಶಕ್ರಸೂನುಃ ತಥಾಕರೋತ್ ॥ ೧೭೦ ॥

ನಿವರ್ತನಾಪ್ರಭುಂ ದ್ರೌಣಿಂ ವಾಸುದೇವೋಭ್ಯಭಾಷತ ।
ಕ್ಷತ್ರತೇಜಾ ಬ್ರಹ್ಮಚಾರೀಕೌಮಾರಾದಪಿಪಾಂಡವಃ ।
ನಿವರ್ತನೇ ತತಃಶಕ್ತೋನಾಯಂದ್ರೋಣಾತ್ಮಜೋಽಪಿಸನ್ ॥ ೧೭೨ ॥

ಅಬ್ರಹ್ಮಚರ್ಯಾದಿತ್ಯುಕ್ತೇವ್ಯಾಸೋದ್ರೌಣಿಮಭಾಷತ ।
ನಿವರ್ತನಾಸಮರ್ಥಸ್ತ್ವಂ ದೇಹಿ ನೈಸರ್ಗಿಕಂ ಮಣಿಮ್ ॥ ೧೭೩ ॥

ಜಿತಃಪ್ರಾಗೇವಭೀಮೇನ ಭೀಮಾಯ್ಯೆವಮಹಾಪ್ರಭಮ್ ।
ಅಪಿಕೇವಲಯಾವಾಚಾಪಾರ್ಥೇಭ್ಯೋಽಸ್ತ್ರಂ ನಿವರ್ತಯ ।
ಇತ್ಯುಕ್ತೋಮೂರ್ಧಜಂ ರತ್ನಂ ಜರಾಮರಣನಾಶನಮ್
ಕ್ಷುತ್ತೃಟ್‌ಶ್ರಮಹರಂ ದಿವ್ಯಂ ಗಂಧಧ್ವಾಂತ ಹರಂ ಶುಭಮ್ ॥ ೧೭೪ ॥

ಉತ್ಕೃತ್ಯಭೀಮಾಯ ದದೌಮುಕ್ತಾಃ ಪಂಚೈವ ಪಾಂಡವಾಃ ॥ ೧೭೬ ॥

iv. ಯಾದವೇಶೋಽಥಗೌತಮ್ಯಾಃ ಸುತಮಾಹೈಕಸಂತತೇಃ ।
ವಾಚಾ ನಿವರ್ತಯಾಸ್ತ್ರಂ ತ್ವಮಿತ್ಯುಕ್ತೇ ದ್ರೌಣಿರಬ್ರವೀತ್ ॥ ೧೭೮ ॥

ಪಕ್ಷಪಾತಾದಿಚ್ಛಸಿ ತ್ವಂ ಭಾಗಿನೇಯಸ್ಯ ಸಂತತಿಮ್ ।
ತತ್ರೈವ ಪಾತಯಾಮ್ಯಸ್ತ್ರಂ ಉತ್ತರಾಗರ್ಭಕೃಂತನೇ ॥ ೧೭೯ ॥

ದುರ್ಮತೇ ಪಶ್ಯಮೇ ವೀರ್ಯಂ ಯತ್ತೇಶಕ್ಯಂ ಕುರುಷ್ವತತ್ ।
ಉಜ್ಜೀವಯಾಮ್ಯಹಂ ಗರ್ಭಂ ಯತತಃ ಶಕ್ತೋಽಪಿತೇ ।
ಸಂತತಿರ್ವರ್ಷಸಾಹಸ್ರಂ ಪಾಂಡವಾನಾಂ ಭವೇದ್ ಭುವಿ ॥ ೧೮೩ ॥

ದುರ್ಗಂಧಯುಕ್ತಃ ವ್ರಣಸಂಚಿತಾಂಗಃ ಸದಾಚರಃ ಸ್ಯಾದ್ವಿಪಿನೇಷು ಮಂದಃ ।
ಯಾವದ್ಭುವಿ ಸ್ಯಾದಿಹ ಪಾರ್ಥತಂತುಃ ವ್ಯಾಸೋಽಪಿ ತಂಪ್ರಾಹತಥೇತಿದೇವಃ ॥ ೧೮೭ ॥

ಭಾಗವತ ಮತ್ತು ಮಹಾಭಾರತಗಳಲ್ಲಿ ಅಶ್ವತ್ಥಾಮನು ಬ್ರಹ್ಮಾಸ್ತ್ರವನ್ನು ಪ್ರಯೋಗಿಸಿದ ಘಟನೆಯ ನಿರೂಪಣೆಯಲ್ಲಿಯ ಭೇದಗಳು

ಭಾಗವತದಲ್ಲಿ ವರ್ಣಿಸಿದ ಮತ್ತು ಮಹಾಭಾರತ ತಾತ್ಪರ್ಯ ನಿರ್ಣಯದಲ್ಲಿ ನಿರೂಪಿಸಿದ ಈ ಘಟನೆಯ ವಿವರಗಳಲ್ಲಿ ಈ ಕೆಳಗಿನ ವ್ಯತ್ಯಾಸಗಳು ಕಂಡುಬರುತ್ತವೆ.

೧. ಮಹಾಭಾರತದಲ್ಲಿ ಅಶ್ವತ್ಥಾಮನಿಂದ ಬ್ರಹ್ಮಾಸ್ತ್ರವು ಭೀಮನ ಮೇಲೆ ಎಸೆಯಲಾಗಿದೆ. ಭಾಗವತದಲ್ಲಿ ಅರ್ಜುನನ ಮೇಲೆ ಎಸೆಯಲಾಗಿದೆ.

೨. ಮಹಾಭಾರತ ಭಾಗವತ ಎರಡರಲ್ಲಿಯೂ ಅರ್ಜುನನೇ ಪ್ರತಿಯಾಗಿ ಬ್ರಹ್ಮಾಸ್ತ್ರವನ್ನು ಅಶ್ವತ್ಥಾಮನ ಮೇಲೆ ಎಸೆಯುತ್ತಾನೆ.

೩. ಮಹಾಭಾರತದಲ್ಲಿ ಶ್ರೀವ್ಯಾಸರು ಮಧ್ಯಪ್ರವೇಶಿಸಿ ಅರ್ಜುನ ಮತ್ತು ಅಶ್ವತ್ಥಾಮರಿಗೆ ಬ್ರಹ್ಮಾಸ್ತ್ರದ ಉಪಸಂಹಾರ ಮಾಡಲು ಹೇಳುತ್ತಾರೆ. ಭಾಗವತದಲ್ಲಿ ಈ ಸಂದರ್ಭದಲ್ಲಿ ವ್ಯಾಸರ ಪ್ರವೇಶವಿಲ್ಲ.

೪. ಭಾಗವತದಲ್ಲಿ ಅಶ್ವತ್ಥಾಮನ ತಲೆಯಿಂದ ಮಣಿಯನ್ನು ಅರ್ಜುನನು ಕಿತ್ತಿಕೊಂಡು ದ್ರೌಪದಿಗೆ ಕೊಡುತ್ತಾನೆ. ಮಹಾಭಾರತದಲ್ಲಿ ವ್ಯಾಸರು ಅಶ್ವತ್ಥಾಮನಿಗೆ ಮಣಿಯನ್ನು ಕಿತ್ತು ಭೀಮನಿಗೆ ಕೊಡಲು ಹೇಳುತ್ತಾರೆ. ಭೀಮನು ಅದನ್ನು ದ್ರೌಪದಿಗೆ ಕೊಡುತ್ತಾನೆ.

> ಕೃಷ್ಣಾಯೈ ತಂ ಮಣಿಂ ದತ್ವಾ ಭೀಮಸ್ತಾಂ ಪರ್ಯಸಾಂತ್ವಯತ್ ।
> ವಿಕೋಪಾಭೀಮವಾಕ್ಯೇನ ರಾಜ್ಞೀ ಸಾಚ ಮಣಿಂದದೌ ॥ ೧೯೮ ॥

೫. ಅಶ್ವತ್ಥಾಮನು ಪಾಂಡವರ ಮಕ್ಕಳನ್ನು ಕೊಲ್ಲುವುದನ್ನು ಮಹಾಭಾರತದಲ್ಲಿ ವಿವರವಾಗಿ ವರ್ಣಿಸಲಾಗಿದೆ.

೬. ಮಣಿಯ ವಿಶೇಷ ಶಕ್ತಿ ಮತ್ತು ಅಶ್ವತ್ಥಾಮನಿಗೆ ಶ್ರೀಕೃಷ್ಣನ ಶಾಪ ಇವು ಮಹಾಭಾರತದಲ್ಲಿ ಬರುತ್ತವೆ.

ಬ್ರಹ್ಮಾಸ್ತ್ರದ ಘಟನೆಯನ್ನು ನಿರೂಪಿಸಿದ ಮೇಲೆ ಭಾಗವತದಲ್ಲಿ ಉತ್ತರೆಯು ತನ್ನ ಗರ್ಭವನ್ನು ರಕ್ಷಿಸಲು ಶ್ರೀಕೃಷ್ಣನನ್ನು ಪ್ರಾರ್ಥಿಸುವಳು. ಶ್ರೀಕೃಷ್ಣನು ಅದನ್ನು ರಕ್ಷಿಸುವನು.

i. ಪಾಹಿ ಪಾಹಿ ಮಹಾಯೋಗಿನ್ ದೇವದೇವ ಜಗತ್ಪತೇ ।
ಅಭಿದವತಿ ಮಾಮೀಶ ಶರಸ್ತಪ್ತಾಯಸೋ ವಿಭೋ ॥
ಕಾಮಂ ದಹತು ಮಾಂ ನಾಥ ಮಾ ಮೇ ಗರ್ಭೋ ನಿಪಾತ್ಯತಾಮ್ ॥ (೧-೮, ೧೨,೧೩)

ಅಂತಸ್ಥಃ ಭೂತಾನಾಮಾತ್ಮಾ ಯೋಗೇಶ್ವರೋ ಹರಿಃ ।
ಸ್ವಮಾಯಯಾಽಽವೃಣೋದ್ಗರ್ಭಂ ವೈರಾಟ್ಯಾಃ ಕುರುತಂತವೇ ॥ ೧೭ ॥

ii. ಅಶ್ವತ್ಥಾಮ್ನಾ ವಿಸೃಷ್ಟೇನ ಬ್ರಹ್ಮಶೀರ್ಷ್ಣೋರುತೇಜಸಾ ।
ಉತ್ತರಾಯಾಃ ಹತೋ ಗರ್ಭಃ ಈಶೇನೋಜ್ಜೀವಿತಃ ಪುನಃ ॥
ಮಾತುರ್ಗರ್ಭಗತೋವೀರಃ ಸ ತದಾ ಭೃಗುನಂದನ । (೧.೧೧, ೫)
ದದರ್ಶ ಪುರುಷಂ ಕಂಚಿದ್ ದಹ್ಯಮಾನೋಽಸ್ತ್ರತೇಜಸಾ ।
ಅಂಗುಷ್ಠಮಾತ್ರಮಮಲಂ ಸ್ಫುರತ್‌ಪುರಟಮೌಲಿನಮ್ ।
ಶ್ರೀಮದ್ದೀರ್ಘಚತುರ್ಬಾಹುಂ ತಪ್ತಕಾಂಚನಕುಂಡಲಮ್ ।
ಪರಿಭ್ರಮಂತಮುಲ್ಕಾಭಾಂ ಭ್ರಾಮಯಂತಂ ಗದಾಂ ಮುಹುಃ ।
ವಿಧಮಂತಂ ಸನ್ನಿಕರ್ಷೇ ಪರ್ಯೈಕ್ಷತ ಕ ಇತ್ಯಸೌ ।
ಮಿಷತೋ ದಶಮಾಸಸ್ಯ ತತ್ರೈವಾಂತರ್ದಧೇಹರಿಃ ॥ (೧.೧೧ ೭,೯,೧೦)

ಶ್ರೀಕೃಷ್ಣನಿಗೆ ಕುಂತಿಯ ಪ್ರಾರ್ಥನೆ

ಪಾಂಡವರು ಬ್ರಹ್ಮಾಸ್ತ್ರದ ಸಂಕಟದಿಂದ ಪಾರಾದಮೇಲೆ ಕುಂತಿಯು ಶ್ರೀಕೃಷ್ಣನ ಸ್ತೋತ್ರವನ್ನು ಮಾಡುವಳು.

ಕೃಷ್ಣಾಯವಾಸುದೇವಾಯ ದೇವಕೀನಂದನಾಯಚ ।
ನಂದಗೋಪಕುಮಾರಾಯ ಗೋವಿಂದಾಯ ನಮೋನಮಃ ॥ (೧.೮ ೨೪)

ಪಾಂಡವರಿಗೆ ಬಂದ ವಿಪತ್ತುಗಳನ್ನೆಲ್ಲ ಕುಂತಿಯು ಉಲ್ಲೇಖಿಸುತ್ತಾಳೆ ಮತ್ತು ಶ್ರೀಕೃಷ್ಣನೇ ಈ ಎಲ್ಲ ವಿಪತ್ತುಗಳಿಂದಲೂ ಅವರನ್ನು ಪಾರುಮಾಡಿದನು ಎಂದು ಹೇಳುತ್ತಾಳೆ.

ವಿಷಾನ್ಮಹಾಗ್ನೇಃ ಪುರುಷಾದದಂಶನಾದಸತ್ಸಭಾಯಾ ವನವಾಸಕೃಚ್ಛ್ರತಃ ।
ಮೃಧೇ ಮೃಧೇಽನೇಕಮಹಾರಥಾಸ್ತ್ರತೋದ್ರೌಣ್ಯಸ್ತ್ರತಶ್ಚಾಸ್ಮ ಹರೇಽಭಿರಕ್ಷಿತಾಃ ॥ ೨೭ ॥

ವಿಷದಿಂದ ಅರಗಿನ ಮನೆಯಿಂದ ಬಕಾಸುರನಿಂದ ಹಿಡಿಂಬನಿಂದ ದ್ಯೂತದಲ್ಲಿಯ ಅವಮಾನದಿಂದ ಅರಣ್ಯವಾಸದ ಕಷ್ಟಗಳಿಂದ ಮತ್ತು ಬ್ರಹ್ಮಾಸ್ತ್ರದಿಂದ ಶ್ರೀಕೃಷ್ಣನು ತನ್ನ ಮಕ್ಕಳನ್ನು ರಕ್ಷಿಸಿದ್ದನ್ನು ನೆನಪಿಸಿಕೊಳ್ಳುತ್ತಾಳೆ. ಭಗವಂತನನ್ನು ಮರೆಯದಂತಾಗಲು ಇಂಥ ವಿಪತ್ತುಗಳೇ ತನಗೆ ಬರುತ್ತಿರಲಿ ಎಂದು ಪ್ರಾರ್ಥಿಸುತ್ತಾಳೆ.

ವಿಪದಃಸಂತುನಃ ಶಶ್ವತ್‌ತತ್ರ ತತ್ರ ಜಗತ್ಪತೇ ।
ಭವತೋದರ್ಶನಂ ಯತ್ ಸ್ಯಾದಪುನರ್ಭವದರ್ಶನಮ್ ॥ ೨೮ ॥

ಕುಂತಿಯ ಪ್ರಾರ್ಥನೆಯಂತೆ ಶ್ರೀಕೃಷ್ಣನು ದ್ವಾರಕೆಗೆ ಹೋಗುವುದನ್ನು ಮುಂದೆ ಹಾಕುತ್ತಾನೆ. ಯುದ್ಧ ಮತ್ತು ಅದರ ನಂತರದ ಘಟನೆಗಳಿಂದ ಖಿನ್ನನಾದ ಯುಧಿಷ್ಠಿರನಿಗೆ ಭೀಷ್ಮನನ್ನು ನೋಡಲು ಹೇಳುತ್ತಾನೆ. ಯುಧಿಷ್ಠಿರ ಭೀಮಾರ್ಜುನಾದಿಗಳು ಶ್ರೀಕೃಷ್ಣ ಎಲ್ಲರೂ ಭೀಷ್ಮನಿದ್ದಲ್ಲಿಗೆ ಹೋಗುತ್ತಾರೆ. ಅಲ್ಲಿ ನಾರದ ಪರ್ವತ ಭಾರದ್ವಾಜ ಇತ್ಯಾದಿ ಋಷಿಗಳೂ ಸೇರುತ್ತಾರೆ. ಭೀಷ್ಮನು ಶ್ರೀಕೃಷ್ಣನ ಸ್ತೋತ್ರವನ್ನು ಮಾಡುತ್ತಾನೆ.

ಭೀಷ್ಮನಿಂದ ಶ್ರೀಕೃಷ್ಣನ ಸ್ತೋತ್ರ, ಯುಧಿಷ್ಠಿರನಿಗೆ ಧರ್ಮೋಪದೇಶ

ಏಷಾವೈಭಗವಾನ್ ಸಾಕ್ಷಾತ್ ಆದ್ಯೋನಾರಾಯಣಃ ಪುಮಾನ್ ।
ಮೋಹಯನ್ ಮಾಯಯಾ ಲೋಕಂ ಗೂಢಃ ಚರತಿ ವೃಷ್ಣಿಷು ।

ಯುಧಿಷ್ಠಿರನು ತನಗೆ ಧರ್ಮವನ್ನು ಬೋಧಿಸಲು ಭೀಷ್ಮನನ್ನು ಪ್ರಾರ್ಥಿಸುತ್ತಾನೆ. ಭೀಷ್ಮನು ಧರ್ಮದ ವಿವಿಧ ಪ್ರಕಾರಗಳನ್ನು ಬೋಧಿಸುತ್ತಾನೆ.

ಯುಧಿಷ್ಠಿರಸ್ತದಾಕರ್ಣ್ಯ ಶಯಾನಂ ಶರಪಂಜರೇ ।
ಸಂಪೃಚ್ಛದ್ವಿವಿಧಾನ್ ಧರ್ಮಾನ್ ಋಷೀಣಾಮನುಶೃಣ್ವತಾಮ್ ॥ (೧.೯, ೩೧)

ದಾನಧರ್ಮಾನ್ ರಾಜಧರ್ಮಾನ್ ಮೋಕ್ಷಧರ್ಮಾನ್ ವಿಭಾಗಶಃ ।
ಸ್ತ್ರೀಧರ್ಮಾನ್ ಭಗವದ್ಧರ್ಮಾನ್ ಸಮಾಸವ್ಯಾಸಯೋಗತಃ ॥ ೩೨ ॥

ಧರ್ಮಾರ್ಥಕಾಮಮೋಕ್ಷಾಂಶ್ಚ ಸಹೋಪಾಯಾನ್ ಯಥಾಮುನೇ ।
ನಾನಾಖ್ಯಾನೇತಿಹಾಸೇಷು ವರ್ಣಯಾಮಾಸಧರ್ಮವಿತ್ ॥ ೩೩ ॥

ಮೇಲೆ ಹೇಳಿದಂತೆ ಯುಧಿಷ್ಠಿರನಿಗೆ ಧರ್ಮೋಪದೇಶಮಾಡಿ ಶ್ರೀಕೃಷ್ಣನ ಸ್ತೋತ್ರಮಾಡಿ ಭೀಷ್ಮನು ಪ್ರಾಣೋತ್ಕ್ರಮಣ ಮಾಡುತ್ತಾನೆ.

ಕೃಷ್ಣಏವಂ ಭಗವತಿ ಮನೋವಾಗ್‌ದೃಷ್ಟಿವೃತ್ತಿಭಿಃ ।
ಆತ್ಮನ್ಯಾತ್ಮಾನಮಾವಿಶ್ಯಸೋಂತಃಶ್ವಾಸ ಉಪಾರಮೇತ್ ॥ ೫೧ ॥

ಯುಧಿಷ್ಠಿರನ ರಾಜ್ಯಭಾರ

ಭೀಷ್ಮ ಮತ್ತು ಶ್ರೀಕೃಷ್ಣರ ಉಪದೇಶವನ್ನು ಮನಸ್ಸಿನಲ್ಲಿ ಇಟ್ಟುಕೊಂಡು ಯುಧಿಷ್ಠಿರನು ರಾಜ್ಯಭಾರವನ್ನು ಆರಂಭಿಸುತ್ತಾನೆ. ಅಶ್ವಮೇಧಯಾಗವನ್ನು ಮಾಡುತ್ತಾನೆ. ಅವನ ಉದಾರ ಆಡಳಿತದಲ್ಲಿ ರಾಷ್ಟ್ರವು ಅಭಿವೃದ್ಧಿ ಹೊಂದುತ್ತಿರುವುದನ್ನು ಭಾಗವತವು ಈ ಕೆಳಗಿನಂತೆ ವರ್ಣಿಸುತ್ತದೆ.

ಕಾಮಂ ವವರ್ಷ ಪರ್ಜನ್ಯಃ ಸರ್ವಕಾಮದುಘಾ ಮಹೀ ।
ನಿಷಿಚುಃ ಸ್ಮವ್ರಜಂಗಾವಃ ಪಯಸಾ ಆತ್ಮೂಧಸೋ ಮುದಾ ।
ನದ್ಯಃ ಸಮುದ್ರಾಗಿರಯಃ ಸವನಸ್ಪತಿವೀರುಧಃ ।
ಫಲಾನ್ಯೋಷಧಯಃ ಸರ್ವಾಃ ಕಾಮಮನ್ವೃತು ತಸ್ಯ ವೈ ।
ನಾಧಯೋವ್ಯಾಧಯಃ ಕ್ಲೇಶಾಃ ದೈವಭೂತಾತ್ಮಹೇತವಃ ।
ಅಜಾತಶತ್ರಾವಭವನ್ ಜಂತೂನಾಂ ರಾಜ್ಞಿ ಕರ್ಹಿಚಿತ್ ॥ (೧.೫, ೭)

ಶ್ರೀಕೃಷ್ಣನನ್ನು ಬೀಳ್ಕೊಡುವ ಸಮಾರಂಭ

ಯುಧಿಷ್ಠಿರನು ರಾಜ್ಯದಲ್ಲಿ ನೆಲೆಯೂರಿದ ಮೇಲೆ ಶ್ರೀಕೃಷ್ಣನು ದ್ವಾರಕೆಗೆ ಮರಳುವನು. ಅವನನ್ನು ಬೀಳ್ಕೊಟ್ಟ ಸಂದರ್ಭದ ವರ್ಣನೆ ಭಾರತೀಯ ಸಂಸ್ಕೃತಿ ಮ್ತು ಸಹೃದಯತೆಗಳ ಉತ್ತಮ ನಿದರ್ಶನವಾಗಿದೆ.

ಉಷಿತ್ವಾಹಸ್ತಿನಪುರೇ ಮಾಸಾನ್ ಕತಿಪಯಾನ್ ಹರಿಃ ।
ಆಮಂತ್ರ್ಯ ಚಾಭ್ಯನುಜ್ಞಾತಃ ಪರಿಷ್ವಜ್ಯ ಅಭಿವಾದ್ಯತಮ್ ।
ಆರುರೋಹ ರಥಂ ಕೈಶ್ಚಿತ್ ಪರಿಷ್ವಕ್ತೋಽಭಿವಾದಿತಃ । (೧೦.೮, ೯)

ಮೃದಂಗ ಶಂಖಾ ಭೇರ್ಯಶ್ಚವೀಣಾಪಣವಗೋಮುಖಾಃ ।
ಧುಂಧುರ್ಯಾನಕ ಘಂಟಾದ್ಯಾಃ ನೇದುರ್ದುಂದುಭಯಸ್ತಥಾ ।
ಪ್ರಾಸಾದಶಿಖರಾರೂಢಾಃ ಕುರುನಾರ್ಯೋದಿದೃಕ್ಷಯಾ ।
ವವೃಷುಃ ಕುಸುಮೈಃ ಕೃಷ್ಣೇ ಪ್ರೇಮವ್ರೀಡಸ್ಮಿತೇಕ್ಷಣಾಃ ।
ಸಿತಾತಪತ್ರಂಜಗ್ರಾಹ ಮುಕ್ತಾದಾಮ ವಿಭೂಷಿತಮ್ ।
ರತ್ನದಂಡಂ ಗುಡಾಕೇಶಃ ಪ್ರಿಯಃ ಪ್ರಿಯತಮಸ್ಯಹ ।
ಉದ್ಧವಃ ಸಾತ್ಯಕಿಶ್ಚೈವ ವ್ಯಜನೇ ಪರಮಾದ್ಭುತೇ ।
ವಿಕೀರ್ಯಮಾಣಃಕುಸುಮೈಃ ರೇಜೇ ಮಧುಪತಿಃ ಪಥಿ । (೧.೧೦, ೧೬,೧೯)

ಶ್ರೀಕೃಷ್ಣನನ್ನು ಬೀಳ್ಕೊಡುವ ಈ ಸಮಾರಂಭದಲ್ಲಿ ಮಹಿಳೆಯರು ಶ್ರೀಕೃಷ್ಣನನ್ನು ಹೊಗಳುತ್ತ ಅವನ ಅವತಾರಕಾರ್ಯದ ಮುಖ್ಯವಾದ ಘಟನೆಗಳನ್ನೆಲ್ಲ ಹೇಳುವರು.

ಶ್ರೀಕೃಷ್ಣನು ಪ್ರಯಾಣ ಮಾಡಿದ ಪ್ರದೇಶಗಳು

ಅವನ ಪ್ರಯಾಣವನ್ನು ವರ್ಣಿಸುವಾಗ ಅವನು ಹಾಯ್ದುಹೋದ ಪ್ರದೇಶಗಳನ್ನು ಭಾಗವತದಲ್ಲಿ ವರ್ಣಿಸಲಾಗಿದೆ. ಇದರಿಂದ ಪ್ರಾಚೀನ ಭಾರತದ ಪ್ರದೇಶಗಳ ಭೌಗೋಲಿಕ ವಿನ್ಯಾಸ ತಿಳಿದುಬರುತ್ತದೆ.

ಕುರುಜಾಂಗಲಪಾಂಚಾಲಾನ್ ಶೂರಸೇನಾನ್ ಸಯಾಮುನಾನ್ ।
ಬ್ರಹ್ಮಾವರ್ತಂ ಕುರುಕ್ಷೇತ್ರಂ ಮತ್ಸ್ಯಾನ್ ಸಾರಸ್ವತಾನಥ ।
ಮರುಧನ್ವಮತಿಕ್ರಮ್ಯಸೌವೀರಾಭೀರಸೈಂಧವಾನ್ ।
ಆನರ್ತಾನ್ ಭಾರ್ಗವೋಪಾಗಾತ್‌ಶ್ರಾಂತವಾಹೋಮನಾಗ್ ವಿಭುಃ ॥ (೧.೧೦ ೩೫, ೩೬)

ಪ್ರಾಚೀನಭಾರತದ ಪ್ರದೇಶಗಳ ವಿನ್ಯಾಸವನ್ನು ಪುರಾಣಗಳ ಆಧಾರದಿಂದ ಕೆಲವು ಆಧುನಿಕ ವಿದ್ವಾಂಸರು ಅಧ್ಯಯನ ಮಾಡಿದ್ದರೂ ಇದು ಸಮಗ್ರ ಮತ್ತು ಸಮರ್ಪಕವಾಗಿಲ್ಲ. ಈ ವಿಷಯದಲ್ಲಿ ಪುರಾಣಗಳಲ್ಲಿ ಅನೇಕ ವಿವರಗಳಿವೆ. ಅವು ಬೇರೆ ಬೇರೆ ಕಡೆಗೆ ಚದುರಿಹೋಗಿವೆ. ಪ್ರಾಚೀನ ವಿದ್ವಾಂಸರಾಗಲೀ ಆಧುನಿಕ ವಿದ್ವಾಂಸರಾಗಲೀ ಪುರಾಣಗಳಲ್ಲಿಯ ಈ ವಿವರಗಳಿಗೆ ಅಷ್ಟೊಂದು ಗಮನ ಕೊಟ್ಟಿಲ್ಲ. ಇವುಗಳನ್ನು ಸಮಗ್ರವಾಗಿ ಸಂಗ್ರಹಿಸಿ ಇತಿಹಾಸವನ್ನು ರೂಪಿಸಿದರೆ ನಮ್ಮ ನಾಗರಿಕತೆ ಮತ್ತು ಸಂಸ್ಕೃತಿಗಳ ವೈಭವಗಳ ಮನವರಿಕೆಯಾಗುವುದು.

ದ್ವಾರಕಾನಗರದ ವರ್ಣನೆ

i. ಮಧುಭೋಜದಶಾರ್ಹಾರ್ಹಕಕುರಾಂಧಕ ವೃಷ್ಣಿಭಿಃ ।
ಆತ್ಮತುಲ್ಯ ಬಲೈರ್ಗುಪ್ತಾಂ ನಾಗೈರ್ಭೋಗವತೀಮಿವ ॥

ಸರ್ವರ್ತುಸರ್ವವಿಭವೈಃ ಪುಣ್ಯವೃಕ್ಷಲತಾಶ್ರಮೈಃ ।
ಉದ್ಯಾನೋಪವನಾರಾಮೈರ್ವೃತಪದ್ಮಾಕರಶ್ರಿಯಮ್ ।
ಗೋಪುರದ್ವಾರಮಾರ್ಗೇಷು ಕೃತಕೌತುಕ ತೋರಣಮ್ ।
ಛತ್ರಧ್ವಜಪತಾಕಾಗ್ರೈರಂತಃ ಪ್ರತಿಹತಾತಪಾಮ್ ।
ಸಮ್ಮಾರ್ಜಿತಮಹಾಮಾರ್ಗರಥ್ಯಾಪಣಕಚತ್ವರಾಮ್ ।
ಸಿಕ್ತಾಂ ಗಂಧಜಲೈರುಪ್ತಾಂ ಫಲಪುಷ್ಪಾಕ್ಷತಾಂಕುರೈಃ ।
ದ್ವಾರಿದ್ವಾರಿ ಗೃಹಾಣಾಂಚ ದಧ್ಯಕ್ಷತ ಫಲೇಕ್ಷುಭಿಃ ।
ಅಲಂಕೃತಾಂ ಪೂರ್ಣಕುಂಭೈಃ ಬಲಿಭಿಃ ಧೂಪದೀಪಕೈಃ ॥ (೧.೧೧, ೪೮,೩೨)

ii. ನಿಶಮ್ಯಕೃಷ್ಣಮಾಯಾಂತಂ ವಸುದೇವೋಮಹಾಮನಾಃ ।
ಅಕ್ರೂರಶ್ಚೋಗ್ರಸೇನಶ್ಚರಾಮಶ್ಚಾದ್ಭುತವಿಕ್ರಮಃ ।
ವಾರಣೇಂದ್ರಂ ಪುರಸ್ಕೃತ್ಯ ಬ್ರಾಹ್ಮಣೈಃ ಸಸುಮಂಗಲೈಃ ।
ಪ್ರತ್ಯುಜ್ಜಗ್ಮೂರಥೈಃಹೃಷ್ಟಾಃ ಪ್ರಣಯಾಗತಸಾಧ್ವಸಾಃ ।
ವಾರಮುಖ್ಯಾಶ್ಚಶತಶೋಯಾನೈಸ್ತದ್ದರ್ಶನೋತ್ಸುಕಾಃ ।
ನಟನರ್ತಕಗಂಧರ್ವಾಃ ಸೂತಮಾಗಧಬಂದಿನಃ
ಗಾಯಂತಿ ಚೋತ್ತಮಶ್ಲೋಕ ಚರಿತಾನ್ಯದ್ಭುತಾನಿಚ । (೧.೧೧, ೩೩,೩೭)

ಈ ವಿವರಗಳನ್ನು ನೋಡಿದರೆ ಭಾರತೀಯ ಸಂಸ್ಕೃತಿಯ ಮತ್ತು ಜೀವನದ ವೈಭವ, ಸಹೃದಯತೆ ತಿಳಿದು ಬರುವುವು. ಇಂದು ನಮ್ಮ ಜೀವನದ ಪಾಶ್ಚಾತ್ಯೀಕರಣ ಮತ್ತು ಯಾಂತ್ರಿಕೀಕರಣದಿಂದ ನಮ್ಮ ಸಂಸ್ಕೃತಿಯ ಸೊಗಸೆಲ್ಲ ಕುಸಿಯುತ್ತಿದೆ. ಇದನ್ನು ಉಳಿಸಿಕೊಳ್ಳಲು ಇಂಥ ವರ್ಣನೆಗಳನ್ನು ಮೆಲಕುಹಾಕುವುದು ಅಗತ್ಯ.

ಧೃತರಾಷ್ಟ್ರ ಗಾಂಧಾರಿಯರ ಮರಣ

ಶ್ರೀಕೃಷ್ಣನು ಹೊರಟಮೇಲೆ ತೀರ್ಥಯಾತ್ರೆಗೆ ಹೋಗಿದ್ದ ವಿದುರನು ನಗರಕ್ಕೆ ತಿರುಗಿ ಬರುವನು. ತೀರ್ಥಯಾತ್ರೆಯಲ್ಲಿದ್ದಾಗ ಅವನು ಮೈತ್ರೇಯನಿಂದ ತತ್ವಜ್ಞಾನದ ಉಪದೇಶವನ್ನು ಪಡೆದಿರುವನು. ಯಮನೇ ಅಣೀಮಾಂಡವ್ಯ ಎಂಬ ಋಷಿಯ ಶಾಪದಿಂದ ವಿದುರನಾಗಿ ಜನಿಸಿದ್ದನು. ವಿದುರನು ಧೃತರಾಷ್ಟನಿಗೆ ವಿರಕ್ತನಾಗಿ ಅರಣ್ಯಕ್ಕೆ ಹೋಗಲು ಉಪದೇಶಿಸುವನು. ಇದರಂತೆ ಧೃತರಾಷ್ಟ್ರ ಮತ್ತು ಗಾಂಧಾರಿಯರು ಅರಣ್ಯಕ್ಕೆ ಹೋಗುವರು. ಯುಧಿಷ್ಠಿರನು ಪ್ರತಿನಿತ್ಯದಂತೆ ಧೃತರಾಷ್ಟನಿರುವಲ್ಲಿಗೆ ಹೋದಾಗ ಅವನು ಅಲ್ಲಿ ಇಲ್ಲದಿರುವುದನ್ನು ಕಂಡು ದುಃಖಿತನಾಗುವನು. ಇದೇ ಹೊತ್ತಿಗೆ ನಾರದರು ಬರುವರು. ಧೃತರಾಷ್ಟನು ಹಿಮಾಲಯಕ್ಕೆ ಹೋಗಿರುವನು ಮತ್ತು ಇನ್ನು ಐದು ದಿನಗಳಾದ ಮೇಲೆ ಮರಣವನ್ನು ಹೊಂದುವನು ಎಂದು ಹೇಳುವರು. ಗಾಂಧಾರಿಯೂ ಧೃತರಾಷ್ಟನೊಡನೆ ಅಗ್ನಿಪ್ರವೇಶಮಾಡುವಳು.

ಯಾದವರ ಯುದ್ಧ, ಶ್ರೀಕೃಷ್ಣನ ವೈಕುಂಠ ಪ್ರಯಾಣ

ಮುಂದೆ ಕೆಲದಿನಗಳಾದ ಮೇಲೆ ಯುಧಿಷ್ಠಿರನಿಗೆ ಅನೇಕ ಅಪಶಕುನಗಳು ಕಂಡುಬರುವವು. ಶ್ರೀಕೃಷ್ಣನ ಯೋಗಕ್ಷೇಮದ ವಿಷಯದಲ್ಲಿ ಅವನಿಗೆ ಚಿಂತೆಯುಂಟಾಗುವುದು. ಅರ್ಜುನನು ದ್ವಾರಕೆಗೆ ಹೋಗಿ ಆರುತಿಂಗಳಾದರೂ ಏಕೆ ತಿರುಗಿಬರಲಿಲ್ಲ ಎಂದು ಚಿಂತಿಸುವನು. ಶ್ರೀಕೃಷ್ಣನು ಈ ಲೋಕದಿಂದ ಮರಳಿಹೋಗುವ ಕಾಲವು ಬಂದಿತೇ ಎಂದು ಭಯಪಡುವನು.

ಸಂಪ್ರಸ್ಥಿತೇ ದ್ವಾರಕಾಯಾಂ ಜಿಷ್ಣೌ ಬಂಧು ದಿದೃಕ್ಷಯಾ ।
ಜ್ಞಾತುಂಮಾಯಾಮನುಷ್ಯಸ್ಯ ವಾಸುದೇವಸ್ಯ ಚೇಷ್ಟಿತಮ್ ।
ವ್ಯತೀತಾಃ ಕತಿಚಿನ್ಮಾಸಾಃ ತದಾತುಶತಶೋನೃಪಃ ।
ದದರ್ಶಘೋರರೂಪಾಣಿ ನಿಮಿತ್ತಾನಿ ಭೃಗೂದ್ವಹ ।
ಕಾಲಸ್ಯ ಚ ಗತಿಂರೌದ್ರಾಂ ವಿಪರ್ಯಸ್ತರ್ತುಧರ್ಮಿಣಃ ।
ಪಾಪೀಯಸೀಂ ನೃಣಾಂವಾರ್ತಾಂ ಕ್ರೋಧಲಾಭಾನೃತಾತ್ಮನಾಮ್ ।
ಜಿಹ್ಮಪ್ರಾಯಂ ವ್ಯವಹೃತಂ ಸಾಧ್ಯಮಿಶ್ರಂ ಚ ಸೌಹೃದಮ್ ।
ಪಿತೃಮಾತೃಸುಹೃದ್ ಭ್ರಾತೃದಂಪತೀನಾಂಚ ಕಲ್ಕಿತಾಮ್ । (I.13, 1.4)

ii. ಗತಾಃ ಸಪ್ತಾಧುನಾಮಾಸಾಃ ಭೀಮಸೇನತವಾನುಜಃ ।
ನಾಯಾತಿಕಸ್ಯವಾಹೇತೋಃ ನಾಹಂವೇದೇಹಮಂಜಸಾ ।
ಅಪಿದೇವರ್ಷಿಣಾದಿಷ್ಟಃ ಸಕಾಲಃ ಸಮುಪಸ್ಥಿತಃ ।
ಯದಾತ್ಮನೋಂಗಮಾಕ್ರೀಡಂ ಭಗವಾನುತ್ಸಿಸೃಕ್ಷತಿ । (೬-೧೨)

iii. ಊರ್ವಕ್ಷಿಬಾಹವೋಮಹ್ಯಂ ಸ್ಫುರಂತ್ಯಂಗಪುನಃ ಪುನಃ ।
ಶಿವೈಷೋದ್ಯಂತಮರುಣಮಭಿರೌತ್ಯನಲಾನನಾ ।
ಮಾಮಂಗಸಾರಮೇಯೋಽಯಮಭಿಧಾವತಿ ಅಭೀತವತ್ ।
ಶಸ್ತಾಃ ಕುರ್ವಂತಿ ಮಾಂಸವ್ಯಂ ದಕ್ಷಿಣಂ ಪಶವೋಽಪರೇ ।
ವಾಹಾಂಶ್ಚಪುರುಷವ್ಯಾಘ್ರಲಕ್ಷಯೇರುದತೋ ಮಮ ।
ಧೂಮ್ರಾಃ ದಿಶಃ ಪರಿಧಯಃ ಕಂಪಂತೇ ಕುಃಸಹಾದ್ರಿಭಿಃ ।
ಅಸೃಗ್‌ವರ್ಷಂತಿ ಜಲದಾಃ ಬೀಭತ್ಸಮಿವ ಸರ್ವತಃ ।
ಸೂರ್ಯಂ ಹತಪ್ರಭಂ ಪಶ್ಯಗ್ರಹಮರ್ದಂ ಮಿಥೋ ದಿವಿ ।
ನದ್ಯೋ ನದಾಶ್ಚ ಕ್ಷುಭಿತಾಃ ಸರಾಂಸಿಚ ಮನಾಂಸಿಚ ।
ನಜ್ವಲತ್ಯಗ್ನಿರಾಜ್ಯೇನ ಕಾಲೋಽಯಂ ಕಿಂ ವಿಧಾಸ್ಯತಿ ।
ನ ಪಿಬಂತಿ ಸ್ತನಂ ವತ್ಸಾಃ ನ ದುಹ್ಯಂತಿಚ ಮಾತರಃ ।
ದೈವತಾನಿರುದಂತೀವ ಸ್ವಿದ್ಯಂತಿಹಿ ಉಚ್ಚಲಂತಿಚ ।
ಮನ್ಯ ಏತೈರ್ಮಹೋತ್ಪಾತೈಃ ನೂನಂ ಭಗವತಃ ಪದೈಃ ।
ಅನನ್ಯ ಪುರುಷಸ್ತ್ರೀಭಿಃ ಹೀನಾಭೂರ್ಹತಸೌಭಗಾ ।
ಇತಿಚಿಂತಯತಸ್ತಸ್ಯ ದೃಷ್ಟಾರಿಷ್ಟೇನ ಚೇತಸಾ ।
ರಾಜ್ಞಃ ಪ್ರತ್ಯಾಗಮದ್‌ಬ್ರಹ್ಮನ್ ಯದುಪುರ್ಯಾಃ ಕಪಿಧ್ವಜಃ । (೧೩.೧೦, ೧೭)

ಯುಧಿಷ್ಠಿರನು ಮೇಲೆ ವಿವರಿಸಿದ ಅಪಶಕುನಗಳಿಂದ ಶ್ರೀಕೃಷ್ಣನ ವಿಷಯದಲ್ಲಿ ಚಿಂತಿಸುತ್ತಿರುವಾಗ ಅರ್ಜುನನು ದ್ವಾರಕೆಯಿಂದ ಬರುವನು. ಯಾದವರು ಪರಸ್ಪರ ಯುದ್ಧಮಾಡಿ ಮಡಿದುದನ್ನು ಶ್ರೀಕೃಷ್ಣನು ವೈಕುಂಠಕ್ಕೆ ಮರಳಿ ಹೋದುದನ್ನೂ ತಿಳಿಸುವನು.

ರಾಜನ್ ತ್ವಯಾಭಿಹೃಷ್ಟಾನಾಂ ಸುಹೃದಾಂ ನಃ ಸುಹೃತ್ ಪುರೇ ।
ವಿಪ್ರಶಾಪವಿಮೂಢಾನಾಂ ನಿಘ್ನತಾಂ ಮುಷ್ಟಿಭಿರ್ಮಿಥಃ ।
ವಾರುಣೀಂ ಮದಿರಾಂ ಪೀತ್ವಾಮದೋನ್ಮಾಥಿತಂಚೇತಸಾಮ್ ।
ಅಜಾನತಾಮಿವಾತ್ಮಾನಂ ಚತುಃಪಂಚಾವಶೇಷಿತಾಃ ॥ (೧.೧೪ ೨೨,೨೩)

ಶ್ರೀಕೃಷ್ಣನು ವೈಕುಂಠಕ್ಕೆ ತೆರಳಿದ ದಿನವೇ ಕಲಿಯು ಯುಧಿಷ್ಠಿರನ ರಾಜ್ಯದಲ್ಲಿ ಪ್ರವೇಶಿಸುವನು.

ಯದಾಮುಕುಂದೋಭಗವಾನಿಮಾಂಮಹೀಂ ಜಹೌ ಸ್ವತನ್ವಾಶ್ರವಣೀಯಸತ್ಕಥಃ ।
ತದಾಹರಾವಪ್ರತಿಬದ್ಧಚೇತಸಾಮಭದ್ರಹೇತುಃ ಕಲಿರನ್ವವರ್ತತ ॥ (I.15, 5)

ಪರೀಕ್ಷಿತನಿಗೆ ಪಟ್ಟಾಭಿಷೇಕ, ಯುಧಿಷ್ಠಿರನ ಅರಣ್ಯಾಗಮನ

ಕಲಿಯ ಪ್ರವೇಶದ ದುಷ್ಪರಿಣಾಮಗಳನ್ನು ಕಂಡ ಯುಧಿಷ್ಠಿರನು ಅರಣ್ಯಕ್ಕೆ ಹೋಗಲು ನಿರ್ಧರಿಸುವನು.

ಯುಧಿಷ್ಠಿರಸ್ತತ್ಪರಿಸರ್ಪಣಂಬುಧಃ ಪುರೇಚರಾಷ್ಟ್ರೇಚ ಗೃಹೇ ತಥಾತ್ಮನಿ ।
ವಿಭಾವ್ಯಲೋಭಾನೃತಜಿಹ್ಮಹಿಂಸನಾದ್ಯಧರ್ಮಚಕ್ರಂ ಗಮನಾಯ ಪರ್ಯಗಾತ್ ॥ ೬ ॥

ಯುಧಿಷ್ಠಿರನು ತನ್ನ ಮೊಮ್ಮಗನಾದ ಪರೀಕ್ಷಿತನನ್ನು ಪಟ್ಟಕ್ಕೆ ಕೂಡಿಸುವನು.

ಸ್ವರಾಟ್‌ಪೌತ್ರಂ ವಿನೀತಂ ತಮಾತ್ಮನೋಽನವಮಂಗುಣೈಃ ।
ತೋಯನೀವ್ಯಾಃ ಪತಿಂ ಭೂಮೇರಭ್ಯಷಿಂಚದ್ಗಜಾಹ್ವಯೇ ॥ ೭ ॥

ವಜ್ರನನ್ನು ಮಥುರಾನಗರದ ರಾಜ್ಯದಲ್ಲಿ ಪಟ್ಟಗಟ್ಟುವನು. ಪ್ರಜಾಪತಿ ಇಷ್ಟಿಯನ್ನು ಮಾಡುವನು. ತನ್ನ ತಮ್ಮಂದಿರೊಡನೆ ಹಿಮಾಲಯದಲ್ಲಿ ಗಂಧಮಾದನ ಗಿರಿಯಲ್ಲಿದ್ದ ನಾರಾಯಣಾಶ್ರಕ್ಕೆ ಹೋಗುವನು. ಇವರೆಲ್ಲ ಅಲ್ಲಿ ಪ್ರಾಣತ್ಯಾಗ ಮಾಡುವರು. ದ್ರೌಪದಿಯೂ ಪ್ರಾಣತ್ಯಾಗ ಮಾಡುವಳು.

ಪರೀಕ್ಷಿತ್ ರಾಜನಿಂದ ಕಲಿಯ ಶಾಸನ

ಪರೀಕ್ಷಿತ್ ರಾಜನು ಉತ್ತರದ ಮಗಳಾದ ಇರಾವತಿಯನ್ನು ಮದುವೆಯಾಗಿ ಜನಮೇಜಯನೇ ಮೊದಲಾದ ನಾಲ್ಕು ಮಕ್ಕಳನ್ನು ಪಡೆಯುವನು. ಅಶ್ವಮೇಧಯಾಗವನ್ನು ಮಾಡುವನು. ಕಲಿಯನ್ನು ಜಯಿಸುವನು.

ತನ್ನ ರಾಜ್ಯದಲ್ಲಿ ಕಲಿಯು ಪ್ರವೇಶಿಸಿರುವನು ಎಂದು ತಿಳಿದೊಡನೆ ಪರೀಕ್ಷಿತನು ದಂಡಯಾತ್ರೆಯನ್ನು ಕೈಕೊಳ್ಳುವನು. ಭದ್ರಾಶ್ವಕೇತುಮಾಲ ಇತ್ಯಾದಿ ದೇಶಗಳನ್ನು ಗೆಲ್ಲುತ್ತ ಹೋಗುವನು. ಒಂದುಕಡೆಗೆ ಧರ್ಮ ಮತ್ತು ಧರಾ ಇವರು ಎತ್ತು ಮತ್ತು ಹಸುವಿನ ರೂಪ ದುಃಖಿತಪ್ತರಾಗಿ ನಿಂತದ್ದನ್ನು ಕಾಣುವನು.

i. **ಯದಾ ಪರೀಕ್ಷಿತ್ ಕುರುಜಾಂಗಲೇವಸನ್ ಕಲಿಂ ಪ್ರವಿಷ್ಟಂ ನಿಜಚಕ್ರವರ್ತಿತೇ ।**
ನಿಶಮ್ಯವಾರ್ತಾಮನತಿಪ್ರಿಯಾ ತತಃ ಶರಾಸನಂ ಸಂಯುಗಶೋಚರಾದದೇ ।
ಭದ್ರಾಶ್ವಂಕೇತುಮಾಲಂಚ ಭಾರತಂ ಚೋತ್ತರಾನ್‌ಕುರೂನ್ ।
ಕಿಂಪುರುಷಾದೀನಿ ಸರ್ವಾಣಿ ವಿಜಿತ್ಯಜಗೃಹೇ ಕಲಿಮ್ । (I.16 11,12)

ii. **ತಸ್ಯೈವಂ ವರ್ತಮಾನಸ್ಯ ಪೂರ್ವೇಷಾಂ ವೃತ್ತಮನ್ವಹಮ್ ।**
ನಾತಿದೂರೇ ಕಿಲಾಶ್ಚರ್ಯಂ ಯದಾಸೀತ್ತನ್ನಿಬೋಧಮೇ ॥

ಈ ಎತ್ತು ಮತ್ತು ಹಸುಗಳನ್ನು ರಾಜನ ವೇಷದಲ್ಲಿದ್ದ ಓರ್ವನು ಪೀಡಿಸುತ್ತಿರುವುದನ್ನು ಕಂಡನು. ಪರೀಕ್ಷಿತನು ಎತ್ತನ್ನು ನೀನು ಯಾರು ಒಂದೇಕಾಲಮೇಲೆ ಏಕೆ ಇರುವಿ ಎಂದು ಕೇಳುವನು. ಇದರ ಕಾರಣವನ್ನು ಎತ್ತು ವಿವರಿಸಿ ಹೇಳುವುದು.

ತಪಃ ಶೌಚಂ ದಯಾ ಸತ್ಯಂ ಇತಿ ಪಾದಾಃ ಕೃತೇ ಕೃತಾಃ ।
ಅಧರ್ಮಾಂಗೈಃ ತ್ರಯೋಭಗ್ನಾಃ ಸ್ಮಯಸಂಗಮದೈಸ್ತವ ।
ಇದಾನೀಂ ಧರ್ಮಪಾದಸ್ತೇ ಸತ್ಯಂ ನಿರ್ವರ್ತಸೇ ಯತಃ ।

ತಂ ಜಿಘೃಕ್ಷತ್ಯಧರ್ಮೋಽಯಮನೃತೇನೈಧಿತಃ ಕಲಿಃ ।
ಇಯಂ ಚ ಭೂರ್ಭಗವತಾ ನ್ಯಾಸಿತೋರುಭರಾಸತೀ ॥ (೧.೧೭ ೧೩,೧೪)

ಶೋಚಂತ್ಯಶ್ರುಕಲಾಸಾಧ್ವೀದುರ್ಭಗೇವೋಜ್ಝತಾಧುನಾ ॥ ೨೫ ॥

ಎತ್ತು ತಾನು ಧರ್ಮನೆಂದೂ ತನ್ನ ಮೂರು ಕಾಲುಗಳಾದ ತಪಸ್ಸು, ಶೌಚ, ದಯಾ ಇವು ಸ್ಮಯ, ಸಂಗ ಮತ್ತು ಮದ ಎಂಬ ಮೂರು ದೋಷಗಳು ಹೆಚ್ಚಾದ್ದರಿಂದ ಈಗ ಕಾರ್ಯ ಮಾಡುತ್ತಿಲ್ಲ. ಸತ್ಯ ಎಂಬ ಇನ್ನುಳಿದ ಒಂದು ಕಾಲನ್ನೂ ಕಲಿಯು ಅನೃತದಿಂದ ಕತ್ತರಿಸುತ್ತಿದ್ದಾನೆ. ನನ್ನ ಜೊತೆಗಿರುವ ಈ ಹಸು ಭೂಮಿಯು. ಇವಳೂ ಬಹಳ ದುಸ್ಥಿತಿಯಲ್ಲಿದ್ದಾಳೆ ಎಂದು ಹೇಳುತ್ತದೆ. ಇದನ್ನು ತಿಳಿದ ಪರೀಕ್ಷಿತನು ತನ್ನ ಖಡ್ಗವನ್ನೆತ್ತಿ ಕಲಿಗೆ ತನ್ನ ರಾಷ್ಟ್ರವನ್ನು ಬಿಟ್ಟುಹೋಗಲು ಹೇಳುತ್ತಾನೆ. ತನಗೆ ಇರಲು ಕೆಲವು ಸ್ಥಾನಗಳನ್ನು ಕೊಡಬೇಕೆಂದು ಕಲಿಯು ಬೇಡಿಕೊಳ್ಳುತ್ತಾನೆ.

i. ನವರ್ತಿತವ್ಯಂ ಭವತಾಕಥಂಚಿತ್ ಕ್ಷೇತ್ರೇ ಮದೀಯೇ ತ್ವಮಧರ್ಮಬಂಧುಃ ।
ತ್ವಾಂವರ್ತಮಾನಂನರದೇವದೇಹೇಷ್ವನುಪ್ರವರ್ತೇಯಮಧರ್ಮಯೂಥಃ ॥
ಲೋಭೋಽನೃತಂಚೌರ್ಯಮಂಹೋ ಜ್ಯೇಷ್ಠಾಚ ಮಾಯಾಕಲಹಶ್ಚದಂಭಃ । (೧.೧೭ ೩೧)

ii. ಯತ್ರಕ್ವವಾಽಥ ವತ್ಸ್ಯಾಮಿ ಸಾರ್ವಭೌಮತವಾಜ್ಞಯಾ ।
ತನ್ಮೇಧರ್ಮಭೃತಾಂಶ್ರೇಷ್ಠ ಸ್ಥಾನಂ ನಿರ್ದೇಷ್ಟುಮರ್ಹಸಿ ।

ಕಲಿಯ ಪ್ರಾರ್ಥನೆಯನ್ನು ಮನ್ನಿಸಿ ರಾಜನು ಅವನಿಗೆ ದ್ಯೂತ, ಪಾನ, ಸ್ತ್ರೀ ಮತ್ತು ಪ್ರಾಣಿವಧೆಯ ಸ್ಥಳಗಳು ಹೀಗೆ ನಾಲ್ಕು ಸ್ಥಳಗಳನ್ನು ಕೊಡುತ್ತಾನೆ. ಬಂಗಾರ ಎಂಬ ಐದನೆಯ ಸ್ಥಾನವನ್ನೂ ಕೊಡುತ್ತಾನೆ. ಸುಳ್ಳುತನ, ಅಹಂಕಾರ, ಕಾಮ, ರಜೋಗುಣ, ವೈರ ಇವು ಕಲಿಯ ಆಕರಸ್ಥಾನಗಳಾಗಿವೆ.

ಅಭ್ಯರ್ಥಿತಃ ತದಾ ತಸ್ಮೈ ಸ್ಥಾನಾನಿಕಲಯೇ ದದೌ ।
ದ್ಯೂತಂ ಪಾನಂ ಸ್ತ್ರಿಯಃ ಸೂನಾಯತ್ರಾಧರ್ಮಶ್ಚತುರ್ವಿಧಃ ।
ಪುನಶ್ಚಯಾಚಮಾನಾಯ ಜಾತರೂಪಮದಾತ್ ಪ್ರಭುಃ ।
ತತೋಽನೃತಂ ಮದಃ ಕಾಮೋರಜೋ ವೈರಂಚ ಪಂಚಮಮ್ ।
ಅಮೂನಿ ಪಂಚ ಸ್ಥಾನಾನಿ ಹ್ಯಧರ್ಮಾ ಪ್ರಭವಃ ಕಲಿಃ ॥ (I.17, 35,37,38)

ಪರೀಕ್ಷಿತ್ ರಾಜನಿಗೆ ಶಾಪ

ಹೀಗೆ ಕಲಿಯನ್ನು ಜಯಿಸಿದ ಪರೀಕ್ಷಿತನು ಮುಂದೆ ತನ್ನ ಒಂದು ಅಪರಾಧದಿಂದ ತಾನೇ ಕಷ್ಟಕ್ಕೆ ಗುರಿಯಾಗುವನು. ಒಮ್ಮೆ ಪರೀಕ್ಷಿತ್‌ರಾಜನು ಬೇಟೆಯಾಡಲು ಹೊರಟನು. ಒಂದು ಜಿಂಕೆಯ ಬೆನ್ನು ಹತ್ತಿ ಅಡವಿಯಲ್ಲಿ ಬಹುದೂರ ಹೋದನು. ಇದರಿಂದ ಆಯಾಸವಾಗಿ ಹಸಿವೆ ನೀರಡಿಕೆಗಳು ಉಂಟಾದವು. ಆಗ ಸಮೀಪದ ಒಂದು ಆಶ್ರಮಕ್ಕೆ ಹೋಗಲು ಅಲ್ಲಿ ಓರ್ವ ಮುನಿಯು ಕಣ್ಣು ಮುಚ್ಚಿಕೊಂಡು ಧ್ಯಾನಮಗ್ನನಾಗಿದ್ದನ್ನು ಕಂಡನು. ಈ ಆಶ್ರಮದಲ್ಲಿ ತನಗೆ ಯೋಗ್ಯ ಸತ್ಕಾರ ದೊರೆಯಲಿಲ್ಲ ಎಂದು ರಾಜನಿಗೆ ಕೋಪವುಂಟಾಯಿತು. ಹತ್ತಿರದಲ್ಲಿ ಸತ್ತುಬಿದ್ದ ಒಂದು ಹಾವನ್ನು ಅವನ ಕೊರಳಿಗೆ ಹಾಕಿ ನಗರಕ್ಕೆ ಹಿಂತಿರುಗಿದನು. ಇದರಿಂದ ದುಃಖಿತನಾದ ಮುನಿಪುತ್ರನು ಇನ್ನು ಏಳು ದಿನಗಳಲ್ಲಿ ಈ ದುಷ್ಕೃತ್ಯವನ್ನು ಮಾಡಿದನು. ಹಾವು ಕಚ್ಚಿ ಸಾಯಲಿ ಎಂದು ಶಾಪ ಕೊಟ್ಟನು.

i. ಏಕದಾಧನುರುದ್ಯಮ್ಯ ವಿಚರನ್ ಮೃಗಯಾಂವನೇ ।
ಮೃಗಾನನುಗತಃ ಶಾಂತಃ ಕ್ಷುಧಿಸ್ತೃಷಿತೋಭೃಶಮ್ ।
ಜಲಾಶಯಮಚಕ್ಷಾಣಃ ಪ್ರವಿವೇಶ ಸ ಆಶ್ರಮಮ್ ।
ದದರ್ಶ ಮುನಿಮಾಸೀನಂಶಾಂತಂ ಮೀಲಿತಲೋಚನಮ್ ।
ಅಭೂತಪೂರ್ವಃಸಹಸಾಕ್ಷುತ್ತೃಡ್ಭ್ಯಾಮರ್ದಿತಾತ್ಮನಃ ।

ಬ್ರಾಹ್ಮಣಂ ಪ್ರತ್ಯಭೂದ್‌ಬ್ರಹ್ಮನ್ ಮತ್ಸರೋಮನ್ಯುರೇವಚ ।
ಸತು ಬ್ರಹ್ಮಋಷೇರಂಸೇ ಗತಾಸುಮುರಗಂರುಷಾ ।
ವಿನಿರ್ಗಚ್ಛನ್ ಧನುಷ್ಕೋಟ್ಯಾನಿಧಾಯ ಪುರಮಾಗಮತ್ ।

ii. ತಸ್ಯಪುತ್ರೋತಿತೇಜಸ್ವೀ ವಿಹರನ್ ಬಾಲಕೋಽರ್ಭಕೈಃ ।
ರಾಜ್ಞಾಽಘಂ ಪ್ರಾಪಿತಂ ತಾತಂಶ್ರುತ್ವಾತತ್ರೇದ ಮಬ್ರವೀತ್ ।
ಇತೋಲಂಘಿತಮರ್ಯಾದಂ ತಕ್ಷಕಃ ಸಪ್ತಮೇಽಹನಿ ।
ಧಕ್ಷ್ಯತಿಸ್ಮಕುಲಾಂಗಾರಂ ಚೋದಿತೋಮೇ ಪಿತೃದ್ರುಹಮ್ । (೧.೧೮, ೩೨,೩೭)

ಪರೀಕ್ಷಿತನ ಪ್ರಾಯೋಪವೇಶ, ಶುಕರ ಆಗಮನ

ಪರೀಕ್ಷಿತನು ತನ್ನ ಅಪರಾಧವನ್ನು ತಿಳಿದು ಪ್ರಾಯೋಪವೇಶನವನ್ನು ಕೈಕೊಳ್ಳುವನು. ರಾಜಚಿನ್ಹೆಗಳಾದ ಕಿರೀಟ, ರತ್ನಹಾರ ಇತ್ಯಾದಿಗಳನ್ನೆಲ್ಲ ತೆಗೆದು ಪವಿತ್ರಪ್ರಾಣಿಯಾಗಿ ಕೂಡುವನು. ಇದೇ ಸಮಯದಲ್ಲಿ ಶುಕರು ಅಲ್ಲಿಗೆ ಬರುವರು.

ಅಥೋವಿಹಾಯೇಮಮಮುಂಚಲೋಕಂ ವಿಮೃಶ್ಯತೌಹೇಯತಯಾ ಪುರಸ್ತಾತ್ ।
ಕೃಷ್ಣಾಂಘ್ರಿಸೇವಾಮಭಿಮೃಶ್ಯಮಾನಃ ಉಪವಿಶತ್‌ಪ್ರಾಯಮಮರ್ತ್ಯನದ್ಯಾಮ್ ।
ವಿಹಾಯಸರ್ವಂನರದೇವಚಿಹ್ನಂ ಕೇಯೂರಹಾರಾಂಗದ ಮೌಲಿರತ್ನಾನ್ ।
ರತ್ನಾಂಗುಲೀಯಾನ್ ವಿಮಲಾನ್ ನಿರಸ್ಯ ಪವಿತ್ರಪಾಣಿರ್ಮುನಿವೇಷ ಆಸ್ತೇ ।
ಏವಂಚತಸ್ಮಿನ್ನರದೇವದೇವೆ ಪ್ರಾಯೋಪವಿಷ್ಟೇದಿವಿದೇವಸಂಘಾಃ ।
ಪ್ರಶಸ್ಯಭೂಮೌ ವ್ಯಕಿರನ್ ಪ್ರಸೂನೈಃ ಮುದಾಮುಹುರ್ದುಂದುಭಯಶ್ಚನೇದುಃ । (೧.೧೯-೫,೧೮,೧೯)

ತತ್ರಾಗಮದ್‌ಭಗವಾನ್ ವ್ಯಾಸಪುತ್ರಃ ಯದೃಚ್ಛಯಾ ಗಾಮಟಮಾನೋಽನಪೇಕ್ಷಃ ।
ಅಲಕ್ಷ್ಯಲಿಂಗೋನಿಜಲಾಭತುಷ್ಟೋವೃತಶ್ಚಬಾಲೈರವಧೂತವೇಷಃ । (೧.೨೦ ೧)

ಪರೀಕ್ಷಿತನೂ ಅಲ್ಲಿ ನೆರೆದ ಇತರ ಋಷಿಗಳೂ ಶುಕರನ್ನು ಸ್ವಾಗತಿಸಿದರು. ಪರೀಕ್ಷಿತನು ನನಗೆ ಇಹಲೋಕದಲ್ಲಿಯೂ ಸ್ವರ್ಗಾದಿ ಪರಲೋಕಗಳಲ್ಲಿಯೂ ಆಸೆಯಿಲ್ಲ. ಮೃತ್ಯುಮುಖದಲ್ಲಿದ್ದವನು ಅವಶ್ಯವಾಗಿ ಪಡೆಯಬೇಕಾದ ಜ್ಞಾನವನ್ನು ನನಗೆ ಉಪದೇಶಿಸಿರಿ ಎಂದು ಶುಕರನ್ನು ಪ್ರಾರ್ಥಿಸುವನು.

ಪುರುಷಸ್ಯೇಹ ಯತ್ಕಾರ್ಯಂ ಮ್ರಿಯಮಾಣಸ್ಯಸರ್ವದಾ ।
ಯಚ್ಛ್ರೋತವ್ಯಮಥೋಜಪ್ಯಂಯತ್ಕರ್ತವ್ಯಂ ನೃಭಿಃ ಸದಾ ।
ಸ್ಮರ್ತವ್ಯಂ ಭಜನೀಯಂವಾಬ್ರೂಹಿ ಯದ್ವಾವಿಪರ್ಯಯಮ್ ॥ (೧.೨೦ ೧೮)

ಶುಕರು ತಾವು ತಮ್ಮ ತಂದೆಯಿಂದ ಭಾಗವತೋಪದೇಶವನ್ನು ಪಡೆದುದಾಗಿಯೂ ಈ ಭಾಗವತೋಪದೇಶವನ್ನು ಪಡೆಯುವುದೇ ಪರೀಕ್ಷಿತನ ಪರಿಸ್ಥಿತಿಯಲ್ಲಿ ಉತ್ತಮ ಉಪಾಯವೆಂದೂ ಹೇಳುವರು. ಹಿಂದೆ ಖಟ್ವಾಂಗನೆಂಬ ರಾಜನು ತನ್ನ ಆಯುಷ್ಯವು ಸ್ವಲ್ಪ ಉಳಿದಿರುವುದೆಂದು ತಿಳಿದು ಸರ್ವಸಂಗ ಪರಿತ್ಯಾಗ ಮಾಡಿ ಹರಿಪದವನ್ನು ಸೇರಿದನು. ನಿನಗೂ ಏಳು ದಿನಗಳ ಆಯುಷ್ಯವು ಮಾತ್ರ ಉಳಿದಿರುವದು. ಆದ್ದರಿಂದ ನಿನ್ನ ಆತ್ಮೋದ್ಧಾರಕ್ಕೆ ಸಹಾಯಕವಾಗುವ ಭಾಗವತೋಪದೇಶವನ್ನೇ ಪಡೆ ಎಂದು ಹೇಳುವರು.

ಇದಂ ಭಾಗವತಂ ನಾಮ ಪುರಾಣಂ ಬ್ರಹ್ಮಸಮ್ಮಿತಮ್ ।
ಅಧೀತವಾನ್‌ದ್ವಾಪರಾದೌಪಿತುರ್ದ್ವೈಪಾಯನಾದಹಮ್ ।
ಖಟ್ವಾಂಗೋನಾಮರಾಜರ್ಷಿಃ ಜ್ಞಾತ್ವೇಯತ್ತಾಮಿಹಾಯುಷಃ ।
ಮುಹೂರ್ತಾತ್ ಸಂಗಮುತ್ಸೃಜ್ಯ ಗತವಾನಭಯಂ ಹರಿಮ್ ।
ಉಪಕಲ್ಪಯ ತತ್ಸರ್ವಂ ಯತ್ತಾವತ್ ಸಾಂಪರಾಯಿಕಮ್ । (೨.೧೮ ೧೩,೧೪)

ಭಗವಂತನ ವಿರಾಟ್‌ರೂಪ

ಶುಕರು ಪರೀಕ್ಷಿತನಿಗೆ ಪರಮಾತ್ಮನ ವಿರಾಟರೂಪವನ್ನು ತಿಳಿದುಕೊಳ್ಳಲು ಹೇಳುವರು ಮತ್ತು ವಿರಾಟರೂಪವನ್ನು ವರ್ಣಿಸುವರು.

ಜಿತಾಸನೋ ಜಿತಶ್ವಾಸೋ ಜಿತಸಂಗೋಜಿತೇಂದ್ರಿಯಃ ।
ಸ್ಥೂಲೇಭಗವತೋ ರೂಪೇ ಮನಃ ಸಂಧಾರಯೇದ್ಧಿಯಾ ॥ (II 1.12)

i. **ಅಂಡಕೋಶೇಶರೀರೇಽಸ್ಮಿನ್ ಸಪ್ತಾವರಣಸಂಯುತೇ ।**
ವೈರಾಜಃ ಪುರುಷೋಯೋಽಸೌ ಭಗವಾನ್ ಧಾರಣಾಶ್ರಯೇ
ಪಾತಾಲಮೇತಸ್ಯಹಿಪಾದಮೂಲಂ ಪಠಂತಿಪಾರ್ಷ್ಣಿಪ್ರಪದೇರಸಾತಲಮ್ ।
ಮಹಾತಲಂ ವಿಶ್ವಸೃಜಃ ಸುಗುಲ್ಫೌ ತಲಾತಲಂವೈಪುರುಷಸ್ಯಜಂಘೇ ॥

ii. **ಇಂದ್ರಾದಯೋಬಾಹವ ಆಹುರಸ್ಯ ಕರ್ಣೌದಿಶಃ ಶ್ರೋತ್ರಮಮುಷ್ಯ ಶಬ್ದಃ ।**
ನಾಸತ್ಯದಸ್ರೌ ಪರಮಸ್ಯನಾಸೇ ಘ್ರಾಣಂಚ ಗಂಧೋಮುಖಮಗ್ನಿರಿದ್ಧಃ ।

iii. **ನದ್ಯೋಽಸ್ಯ ನಾಡ್ಯೋಥ ತನೂರುಹಾಣಿ ಮಹೀರುಹಾ ವಿಶ್ವತನೋರ್ನೃಪೇಂದ್ರ ।**
ಅನ್ನಂಚ ವೀರ್ಯಂ ಶ್ವಸಿತಂ ಮಾತರಿಶ್ವಾ ಗತಿರ್ವಯಃ ಕರ್ಮಗುಣಪ್ರವಾಹಃ ।
ಇಯಾನಸಾವೀಶ್ವರವಿಗ್ರಹಸ್ಯ ಯಃ ಸನ್ನಿವೇಶಃ ಕಥಿತೋ ಮಯಾತೇ ।
ಸಂಧಾರ್ಯತೇಽಸ್ಮಿನ್ ವಪುಷಿ ಸ್ಥವಿಷ್ಠೇ ಮನಃ ಸ್ವಬುಧ್ಯಾನಯತೋಽಸ್ತಿಕಿಂಚಿತ್ ॥ (II.1-25,26,27,29)

ಪರಮಾತ್ಮನ ವಿರಾಟ್ ರೂಪದ ಕಲ್ಪನೆಯು ಅಪೂರ್ವವಾದ ಕಲ್ಪನೆಯು. ಸಮಸ್ತ ವಿಶ್ವವೇ ಪರಮಾತ್ಮನ ರೂಪ ಎಂಬ ಕಲ್ಪನೆ ಇದರಲ್ಲಡಗಿದೆ. ಈ ಕಲ್ಪನೆ ಸಮಸ್ತ ವಿಶ್ವಕ್ಕೇ ಒಂದು ಪಾವಿತ್ರ್ಯವನ್ನು ತಂದುಕೊಡುತ್ತದೆ. ಪರಮಾತ್ಮನ ವಿರಾಟ್‌ರೂಪದ ವರ್ಣನೆ ವೇದ ಇತಿಹಾಸ-ಪುರಾಣಗಳಲ್ಲಿ ಅನೇಕ ಕಡೆಗೆ ಬರುತ್ತದೆ. ಇಲ್ಲಿ ಬಂದಿರುವ ವರ್ಣನೆಯಲ್ಲಿ ಎಲ್ಲ ಲೋಕಗಳು ಎಲ್ಲ ದೇವತೆಗಳು, ಈ ಭೂಮಿಯ ಮೇಲಿನ ನದಿಗಳು ಮರಬಳ್ಳಿಗಳು ಇವುಗಳನ್ನೆಲ್ಲ ಒಳಗೊಂಡ ವಿರಾಟ್ ರೂಪದ ವರ್ಣನೆಯಿದೆ. ಈ ಸ್ಕಂಧದ ಆರನೆಯ ಅಧ್ಯಾಯದಲ್ಲಿ ವಿರಾಟ್ ರೂಪದ ಇನ್ನಷ್ಟು ವಿವರಗಳಿವೆ. ಇದರಲ್ಲಿ ದೇವತೆಗಳು ಮುನಿಗಳು ನರರು ನಾಗ-ಖಗಗಳು, ಜಲಸ್ಥಲಗಳಲ್ಲಿಯ ಎಲ್ಲ ಜೀವಿಗಳನ್ನೂ ವಿರಾಟ್‌ರೂಪವು ಒಳಗೊಂಡಿದೆ ಎಂದು ವಿವರಿಸಲಾಗಿದೆ. ಪುರುಷ ಸೂಕ್ತದಲ್ಲಿ ವರ್ಣಿಸಿದ ವಿರಾಟ್ ಪುರುಷನ ವರ್ಣನೆಯ ಸಾರವೂ ಅದರಲ್ಲಿದೆ. ಈ ಎಲ್ಲ ನಿರೂಪಣೆಯಿಂದ ಈ ಎಲ್ಲವೂ ಪರಮಾತ್ಮನಿಂದ ಅಭಿನ್ನವಾಗಿವೆ ಎಂದು ತಿಳಿದುಕೊಳ್ಳಬಾರದು. ಇವೆಲ್ಲದರಲ್ಲಿಯೂ ಪರಮಾತ್ಮನು ನಿಯಾಮಕನಾಗಿ ಅಂತರ್ಯಾಮಿ-ಯಾಗಿ ಇರುವನು ಎಂದು ಮಾತ್ರ ತಿಳಿದುಕೊಳ್ಳಬೇಕು.

ಅಹಂಭವಾನ್ ಭವಶ್ಚೈವ ಯ ಇಮೇ ಮುನಯೋಽಗ್ರಜಾಃ ।
ಸುರಾಸುರನರಾ ನಾಗಾಃ ಖಗಾ ಮೃಗಸರೀಸೃಪಾಃ ॥

ಗಂಧರ್ವಾಪ್ಸರಸೋ ಯಕ್ಷಾಃ ರಕ್ಷೋಭೂತಗಣೋರಗಾಃ ।
ಪಶವಃ ಪಿತರಃ ಸಿದ್ಧಾಃ ವಿದ್ಯಾಧ್ರಾಶ್ಚಾರಣಾ ದ್ರುಮಾಃ ।
ಅನ್ಯೇಚ ವಿವಿಧಾ ಜೀವಾಃ ಜಲಸ್ಥಲನಭೌಕಸಃ ।
ಸರ್ವಂ ಪುರುಷ ಏವೇದಂ ಭೂತಂ ಭವ್ಯಂ ಭವಚ್ಚಯತ್ । (೨.೬ ೧೨,೧೪)

ವಿರಾಟಪುರುಷನ ಧ್ಯಾನ ಮಾಡಬೇಕು ಎಂದು ಹೇಳುವುದರ ಜೊತೆಗೆ ಪ್ರಾದೇಶಮಾತ್ರ ರೂಪವನ್ನೂ ಧ್ಯಾನಿಸಬೇಕು ಎಂದು ಶುಕರು ಹೇಳುತ್ತಾರೆ.

ಕೇಚಿತ್ ಸ್ವದೇಹಾಂತರ್ಹೃದಯಾವಕಾಶೇ ಪ್ರಾದೇಶಮಾತ್ರಂ ಪುರುಷಂವಸಂತಮ್ ।
ಚತುರ್ಭುಜಂ ಕಂಜರಥಾಂಗಶಂಖ ಗದಾಧರಂ ಧಾರಣಯಾ ಸ್ಮರಂತಿ ॥ (೨.೨, ೮)

ವಿರಾಟ್‌ರೂಪ ಮತ್ತು ಪ್ರದೇಶಮಾತ್ರ ರೂಪಗಳ ಧ್ಯಾನವನ್ನು ಮಾಡಬೇಕೆಂದು ಹೇಳಿದ ಮೇಲೆ ಜ್ಞಾನಿಯು ತನ್ನ ಚರಮದೇಹದಿಂದ ಹೇಗೆ ಹೊರಗೆ ಬರುವನು ಎಂಬುದನ್ನು ವರ್ಣಿಸಿದ್ದಾರೆ.

ಜ್ಞಾನಿಯ ದೇಹೋತ್ಕ್ರಮಣದ ವಿವರಗಳು

ನಾಭ್ಯಾಂ ಸ್ಥಿತಂ ಹೃದ್ಯವರೋಪ್ಯ ತಸ್ಮಾದುದಾನಗತ್ಯೋರಸಿತಂ ನಯೇನ್ಮುನಿಃ ।
ತತೋನುಸಂಧಾಯ ಧಿಯಾಮನಸ್ವೀ ಸ್ವತಾಲುಮೂಲಂ ಶನಕೈರ್ನಯೇತ ॥

ತಸ್ಮಾದ್ ಭ್ರುವೋರಂತರಮುನ್ನಯೇತ ನಿರುದ್ಧಸಪ್ತಾಶ್ವಪಥೋಽನಪೇಕ್ಷಃ ।
ಸ್ಥಿತ್ವಾ ಮುಹೂರ್ತಾರ್ಧಮಕುಂಠದೃಷ್ಟಿಃ ನಿರ್ಭಿದ್ಯಮೂರ್ಧನ್ ವಿಸೃಜೇತ್ ಪರಂತತಃ । (೨.೨ ೨೦,೨೨)

ಮುನಿಯು ನಾಭಿಯಲ್ಲಿದ್ದ ವಾಯುವನ್ನು ಹೃದಯಕ್ಕೆ ತಂದು ಅಲ್ಲಿಂದ ಎದೆಗೆ ತಂದು ಮುಂದೆ ತಾಲಮೂಲಕ್ಕೆ ಒಯ್ದು ಹುಬ್ಬುಗಳ ಮಧ್ಯಕ್ಕೆ ನಿಲ್ಲಿಸಬೇಕು. ಅಲ್ಲಿಂದ ನೆತ್ತಿಯಿಂದ ಹೊರಬರಬೇಕು.

ಅತಿ ಪರಿಪಕ್ವವಾದ ಭಕ್ತಿಯುಳ್ಳವರು ಬ್ರಹ್ಮಲೋಕಕ್ಕೆ ಹೋಗುವರು. ಅದಕ್ಕಿಂತ ಕಡಿಮೆ ಭಕ್ತಿಯುಳ್ಳವರು ಮಹರ್ಲೋಕಾದಿಗಳಿಗೆ ಹೋಗಿ ಅಷ್ಟಸಿದ್ಧಿಗಳನ್ನು ಪಡೆಯುವರು. ಯೋಗಿಗಳು ಅರ್ಚಿರಾದಿಗಳ ಮುಖಾಂತರ ವೈಶ್ವಾನರ ಮಾರ್ಗಕ್ಕೆ ಹೋಗುವರು. ಪಿಂಗಲಾನಾಡಿಯಿಂದ ಹೊರಬಂದವರು ದೇವಯಾನದಿಂದ ಪ್ರಯಾಣ ಮಾಡುವರು. ಇಡಾನಾಡಿಯ ಮುಖಾಂತರ ಬಂದವರು ಪಿತೃಯಾನದಿಂದ ಪ್ರಯಾಣ ಮಾಡುವರು. ಸುಷುಮ್ನಾ ನಾಡಿಯಿಂದ ಬಂದವರು ವಿಷುವತ್ತಾ ಮಾರ್ಗದಿಂದ ಹೋಗುವರು.

ಯದಿ ಪ್ರಯಾಸ್ಯನ್ನೃಪ ಪಾರಮೇಷ್ಠ್ಯಂ ವೈಹಾಯಸಾನಾಮುತ ಯದ್ವಿಹಾರಮ್ ।
ಅಷ್ಟಾಧಿಪತ್ಯಂ ಗುಣಸನ್ನಿವಾಯೇ ಸಹೈವ ಗಚ್ಛೇನ್ಮನಸೇಂದ್ರಿಯೈಶ್ಚ ।
ವೈಶ್ವಾನರಂ ಯಾತಿ ವಿಹಾಯಸಾಗತಃ ಸುಷುಮ್ನಯಾ ಬ್ರಹ್ಮಪಥೇನಶೋಚಿಷಾ ।
ವಿಧೂತಕಲ್ಕೋಥ ಹರೇರುದಸ್ತಾತ್ ಪ್ರಯಾತಿಚಕ್ರಂ ನೃಪಶೈಂಶುಮಾರಮ್ ॥

ದೇವಯಾನಂ ಪಿಗಲಾಭಿರಹಾನ್ಯೇತಿ ಶತಾಯುಷಾ ।
ರಾತ್ರೀರಿಡಾಭಿಃ ಪಿತೃಣಾಂವಿಷುವತ್ತಾಂ ಸುಷುಮ್ನಯಾ । (೨.೨, ೨೨,೨೩,೨೪)

ಪರಮಾತ್ಮನ ವಿಷಯದಲ್ಲಿ ಇನ್ನೂ ಹೆಚ್ಚು ತಿಳಿದುಕೊಳ್ಳಲು ಪರೀಕ್ಷಿತನು ಪರಮಾತ್ಮನು ಸೃಷ್ಟಿ ಸ್ಥಿತಿ ಸಂಹಾರಗಳನ್ನು ಹೇಗೆ ಮಾಡುವನು ತಿಳಿಸು ಎಂದು ಪ್ರಾರ್ಥಿಸುವನು.

ಭಗವಂತನ ಸೃಷ್ಟಿಸಂಹಾರ ಮಹಿಮೆಯನ್ನು ತಿಳಿಸಲು ಪರೀಕ್ಷಿತನ್ನ ಪ್ರಾರ್ಥನೆ

ಭೂಯ ಏವ ವಿವಿತ್ಸಾಮಿ ಭಗವಾನಾತ್ಮಮಾಯಯಾ ।
ಯಥೇದಂ ಸೃಜತೇ ವಿಶ್ವಂ ದುರ್ವಿಭಾವ್ಯಮಧೀಶ್ವರೈಃ ।
ಯಥಾಗೋಪಾಯತಿವಿಭುಃ ಯಥಾಸಂಯಚ್ಛತೇ ಪುನಃ ॥ (೨.೪ ೨೭)

ಈ ಮಹತ್ವದ ಪ್ರಶ್ನೆಗೆ ಉತ್ತರ ಕೊಡುವುದಕ್ಕಿಂತ ಮೊದಲು ಶುಕಾಚಾರ್ಯರು ಭಗವಂತನಿಗೆ ಪ್ರಾರ್ಥನೆಯನ್ನು ಸಲ್ಲಿಸುವರು.

ಯತ್ಕೀರ್ತನಂ ಯಚ್ಛ್ರವಣಂ ಯದೀಕ್ಷಣಂ ಯದ್ವಂದನಂ ಯತ್‌ಸ್ಮರಣಂ ಯದರ್ಹಣಮ್ ।
ಲೋಕಸ್ಯ ಸದ್ಯೋ ವಿಧುನೋತಿ ಕಲ್ಮಷಂ ತಸ್ಮೈಸುಭದ್ರಶ್ರವಸೇ ನಮೋನಮಃ ।

ತಪಸ್ವಿನೋ ದಾನಪರಾ ಯಶಸ್ವಿನೋ ಮನಸ್ವಿನೋ ಮಂತ್ರವಿದಃ ಸುಮಂಗಲಾಃ ।
ಕ್ಷೇಮಂ ನವಿಂದಂತಿ ವಿನಾ ಯದರ್ಪಣಂ ತಸ್ಮೈಸುಭದ್ರಶ್ರವಸೇ ನಮೋ ನಮಃ ।
ಕಿರಾತಹೂಣಾಂಧ್ರ ಪುಲಿಂದ ಪುಲ್ಕಸಾಂ ಅಭೀರಕಂಕಾಯವನಾಃಶಕಾದಯಃ ।
ಯೇನ್ಯೇಚಪಾಪಾ ಯದಪಾಶ್ರಯಾಶ್ರಯಾತ್ ಶುಧ್ಯಂತಿ ತಸ್ಮೈಪ್ರಭವಿಷ್ಣವೇನಮಃ ॥ (೨.೪, ೧೫,೧೬,೧೮)

ಹೀಗೆ ಪ್ರಾರ್ಥನೆಯನ್ನು ಸಲ್ಲಿಸಿದ ಮೇಲೆ ಶುಕರು ಸ್ವತಃ ಚತುರ್ಮುಖ ಬ್ರಹ್ಮನೇ ನಾರದರಿಗೆ ಭಾಗವತವನ್ನು ಉಪದೇಶಿಸಿದನು ಎಂದು ಹೇಳಿ ಬ್ರಹ್ಮನಾರದ ಸಂವಾದವನ್ನೇ ಉಲ್ಲೇಖಿಸುವರು.

ಏತದೇವಾತ್ಮಭೂರಾಜನ್ ನಾರದಾಯೇತಿ ಪೃಚ್ಛತೇ ।
ವೇದಗರ್ಭೋऽಭ್ಯಧಾತ್ಸರ್ವಂ ಯದಾಹ ಹರಿರಾತ್ಮನಃ ॥ (೨.೪ ೨೫)

ಈ ಶ್ಲೋಕದಲ್ಲಿ ಭಾಗವತದ ಉಪದೇಶದ ಪರಂಪರೆಯನ್ನು ನಾರಾಯಣ, ಬ್ರಹ್ಮಾ, ನಾರದ ಎಂದು ಉಲ್ಲೇಖಿಸಲಾಗಿದೆ.

ನಾರದರು ಚತುರ್ಮುಖರಿಗೆ ಜ್ಞಾನೋಪದೇಶ ಮಾಡಬೇಕೆಂದು ಈ ಕೆಳಗಿನಂತೆ ಪ್ರಾರ್ಥಿಸುತ್ತಾರೆ.

ಯದ್ರೂಪಂಯದಧಿಷ್ಠಾನಂ ಯತಃ ಸೃಷ್ಟಮಿದಂ ವಿಭೋ ।
ಯತ್ಸಂಸ್ಥಂ ಯತ್ಪರಂಯಚ್ಚ ತತ್ತತ್ತ್ವಂ ವದ ತತ್ತ್ವತಃ ॥ (೨.೫, ೨)

ಇಂಥ ಶ್ರೇಷ್ಠ ಪ್ರಶ್ನೆಯನ್ನು ಕೇಳಿದ್ದಕ್ಕೆ ಬ್ರಹ್ಮನು ನಾರದನನ್ನು ಅಭಿನಂದಿಸುತ್ತಾನೆ. ಇದರಿಂದ ಪರಮಾತ್ಮನ ಮಹಿಮೆಯ ಚಿಂತನೆ ಮಾಡುವ ಅವಕಾಶವು ನನಗೂ ದೊರೆಯುತ್ತದೆ ಎನ್ನುತ್ತಾನೆ.

ಸಮ್ಯಕ್ಕಾರುಣಿಕಸ್ಯೇದಂ ವತ್ಸತೇ ವಿಚಿಕಿತ್ಸಿತಮ್ ।
ಯದಹಂಚೋದಿತಃ ಸೌಮ್ಯಭಗವದ್ವೀರ್ಯದರ್ಶನೇ । (೨.೫, ೬)

ಸೃಷ್ಟಿಯ ವಿವರಗಳನ್ನು ಹೇಳುವ ಸಂದರ್ಭದಲ್ಲಿ ಬ್ರಹ್ಮನು ಎರಡು ಮುಖ್ಯವಾದ ಅಂಶಗಳನ್ನು ಹೇಳುತ್ತಾನೆ.

೧. ದ್ರವ್ಯ, ಕಾಲ, ಕರ್ಮ, ಸ್ವಭಾವ ಇವೆಲ್ಲ ಪರಮಾತ್ಮನಿಗೆ ಅಧೀನವಾಗಿವೆ.

೨. ಪರಮಾತ್ಮನು ಕೂಟಸ್ಥನಿತ್ಯನು. ಅವನು ಸೃಷ್ಟಿಮಾಡುವಾಗ ಅವನಲ್ಲಿ ಯಾವ ಪರಿಣಾಮವೂ ಆಗುವುದಿಲ್ಲ. ಅವನು ಜಗತ್ತಿನ ಕರ್ತನು ಉಪಾದಾನ ಕಾರಣನಲ್ಲ.

i. **ದ್ರವ್ಯಂ ಕರ್ಮಚ ಕಾಲಶ್ಚ ಸ್ವಭಾವೋಜೀವ ಏವಚ ।**
ವಾಸುದೇವಾತ್ ಪರೋಬ್ರಹ್ಮನ್ ನಚಾನ್ಯೋऽರ್ಥೋऽಸ್ತಿ ತತ್ತ್ವತಃ ।

ii. **ತಸ್ಯಾಪಿದ್ರಷ್ಟುರೀಶಸ್ಯ ಕೂಟಸ್ಥಸ್ಯಾಖಿಲಾತ್ಮನಃ ।**
ಸೃಜ್ಯಂ ಸೃಜಾಮಿ ಸೃಷ್ಟೋऽಹಮೀಕ್ಷಯೈವಾಭಿಚೋದಿತಃ । (೨.೪, ೧೪,೧೭)

ಈ ಹಿನ್ನೆಲೆಯಲ್ಲಿ ಭಾಗವತದ ಮುಖ್ಯ ಪ್ರಮೇಯವಾದ ಪರಮಾತ್ಮನ ಸರ್ವೋತ್ತಮತ್ವವನ್ನು ಹೃದಯಂಗಮವಾಗಿ ವರ್ಣಿಸುತ್ತಾನೆ.

ನಾರಾಯಣಪರಾವೇದಾ ದೇವಾ ನಾರಾಯಣಾಂಗಜಾಃ ।
ನಾರಾಯಣಪರಾ ಲೋಕಾಃ ನಾರಾಯಣಪರಾ ಮಖಾಃ ।
ನಾರಾಯಣಪರೋಯೋಗೋ ನಾರಾಯಣಪರಂತಪಃ ।
ನಾರಾಯಣಪರಂ ಜ್ಞಾನಂ ನಾರಾಯಣ ಪರಾಗತಿಃ । (೨.೫ ೧೫,೧೬)

ಈ ಮುಖ್ಯ ಪ್ರಮೇಯವನ್ನು ಪ್ರತಿಪಾದಿಸುವುದಕ್ಕಾಗಿಯೇ ಭಾಗವತದಲ್ಲಿಯ ಎಲ್ಲ ಕಥೆಗಳೂ ಎಲ್ಲ ಸನ್ನಿವೇಶಗಳೂ, ಎಲ್ಲ ಸಂವಾದಗಳೂ, ಎಲ್ಲ ಪ್ರಕ್ರಿಯೆಗಳೂ ಎಲ್ಲ ಸ್ತೋತ್ರಗಳೂ ಇರುವವು.

ಇಲ್ಲಿ ಸೃಷ್ಟಿ ಪ್ರಕ್ರಿಯೆಯು ವಿವರವಾಗಿ ಕೊಡಲ್ಪಟ್ಟಿದೆ.

ಸತ್ವಂ ರಜಸ್ತಮ ಇತಿ ನಿರ್ಗುಣಸ್ಯಗುಣಾಸ್ತ್ರಯಃ ।
ಸ್ಥಿತಿಸರ್ಗನಿರೋಧೇಷು ಗೃಹೀತಾ ಮಾಯಯಾ ವಿಭೋಃ ॥ ೧೮ ॥

ಪರಮಾತ್ಮನು ಸೃಷ್ಟಿಸ್ಥಿತಿಲಯಗಳನ್ನು ಮಾಡಲು ಸತ್ವರಜಸ್‌ತಮಸ್ ಎಂಬ ಮೂರು ಗುಣಗಳನ್ನು ತನ್ನ ಸ್ವತಂತ್ರ ಇಚ್ಛೆಯಿಂದ ತೆಗೆದುಕೊಳ್ಳುವನು.

ಕಾಲಂ ಕರ್ಮಸ್ವಭಾವಂಚ ಮಾಯೇಶೋ ಮಾಯಯಾ ಸ್ವಯಾ ।
ಆತ್ಮನ್ ಯದೃಚ್ಛಯಾ ಪ್ರಾಪ್ತಂ ವಿಬುಭೂಷುರುಪಾದದೇ ॥ ೨೦ ॥

ಪರಮಾತ್ಮನು ಕಾಲ, ಅದೃಷ್ಟ, ಸಾತ್ವಿಕಾದಿಸ್ವಭಾವ, ಪ್ರಕೃತಿ ಇವುಗಳನ್ನೆಲ್ಲ ಉಪಯೋಗಿಸಿಕೊಂಡು ತನ್ನ ಸ್ವತಂತ್ರ ಇಚ್ಛೆಯಿಂದ ಸೃಷ್ಟಿಯನ್ನು ಮಾಡುವನು. ಇವೆಲ್ಲ ಅವನಿಗೆ ಸರ್ವಥಾ ಅಧೀನವಾಗಿರುವವು.

ಗುಣವ್ಯತಿಕರಾತ್‌ಪರಿಣಾಮಸ್ವಭಾವತಃ ।
ಮಹತಃ ಜನ್ಮ ಪುರುಷಾಧಿಷ್ಠಿತಾತ್ ಅಭೂತ್ ॥ ೨೨ ॥

ಪರಿಣಾಮ ಸ್ವಭಾವದ ಗುಣಗಳ ಮಿಶ್ರಣದಿಂದ ಮಹತ್ತತ್ವವು ಉಂಟಾಗುವುದು. ಇದು ಬ್ರಹ್ಮನ ಶರೀರವಾಗಿರುವುದು.

ಮಹತಸ್ತು ವಿಕುರ್ವಾಣಾತ್ ರಜಸ್ತತ್ವೋಪಬೃಂಹಿತಾತ್ ।
ಸೋऽಹಂಕಾರ ಇತಿಪ್ರೋಕ್ತೋ ವಿಕುರ್ವನ್ ಸಮಭೂತ್ ತ್ರಿಧಾ ।
ವೈಕಾರಿಕಃ ತೈಜಸಶ್ಚ ತಾಮಸಶ್ಚೇತಿ ತದ್ವಿಧಾ ॥ (೨೩,೨೪)

ಮಹತ್ತತ್ವದಿಂದ ಅಹಂಕಾರ ತತ್ತ್ವವು ಉಂಟಾಗುವುದು. ಇದು ವೈಕಾರಿಕ, ತೈಜಸ, ತಾಮಸ ಎಂದು ಮೂರುವಿಧವಾಗಿರುವುದು.

i. **ತಾಮಸಾದಪಿ ಭೂತಾದೇಃ ವಿಕುರ್ವಾಣಾದಭೂನ್ನಭಃ ।**
ii. **ನಭಸೋऽಥವಿಕುರ್ವಾಣಾದಭೂತ್ ಸ್ಪರ್ಶಗುಣೋऽನಿಲಃ ।**
iii. **ವಾಯೋರಪಿ ವಿಕುರ್ವಾಣಾತ್ ಉಪಪದ್ಯತ ತೇಜಃ ।**
iv. **ತೇಜಸಸ್ತು ಅಂಭೋರಸಾತ್ಮಕಮ್ ।**
v. **ಅಂಭಸೋಗಂಧವಾನಭೂತ್** (೨೬-೩೦)

ತಾಮಸ ಅಹಂಕಾರದಿಂದ ಆಕಾಶ, ವಾಯು, ತೇಜಸ್, ಜಲ, ಪೃಥ್ವೀ ಉಂಟಾದವು. ವೈಕಾರಿಕ ಅಹಂಕಾರದಿಂದ ಮನಸ್ಸೂ ತೈಜಸ ಅಹಂಕಾರದಿಂದ ಹತ್ತು ಇಂದ್ರಿಯಗಳೂ ಉಂಟಾದವು.

ಸೃಷ್ಟಿಪ್ರಕ್ರಿಯೆಯ ನಿರೂಪಣೆಯ ಈ ಸಂದರ್ಭದಲ್ಲಿ ಹದಿನಾಲ್ಕು ಲೋಕಗಳ ಸೃಷ್ಟಿ, ನಾಲ್ಕು ವರ್ಣಗಳ ಸೃಷ್ಟಿ, ಅಂಡದಿಂದ ಚತುರ್ಮುಖ ಬ್ರಹ್ಮನು ಹೊರಗೆ ಬಂದುದು, ಅವನ ವಿರಾಟ್‌ರೂಪ ಇತ್ಯಾದಿಗಳು ನಿರೂಪಿತವಾಗಿವೆ. ಅವನು ಪುರುಷಯಜ್ಞ ಮಾಡಿದ್ದು ಉಲ್ಲೇಖಿಸಲ್ಪಟ್ಟಿದೆ.

ಸೃಷ್ಟಿ ಪ್ರಕ್ರಿಯೆಯನ್ನು ವಿವರಿಸಿದ ಮೇಲೆ ಪರಮಾತ್ಮನ ಈ ಕೆಳಗಿನ ಅವತಾರಗಳನ್ನು ಹೇಳಲಾಗಿದೆ. ವರಾಹ, ಯಜ್ಞ, ಕಪಿಲ, ದತ್ತ, ನಾರಾಯಣ-ನರ, ಪೃಥು, ಋಷಭ, ಹಯಗ್ರೀವ, ಮತ್ಸ್ಯ, ಕೂರ್ಮ, ನರಸಿಂಹ, ವಾಮನ, ಮಹಿದಾಸ, ಧನ್ವಂತರಿ, ಭಾರ್ಗವ, ರಾಮ, ಬಲರಾಮ, ಕೃಷ್ಣ, ವೇದವ್ಯಾಸ ಮತ್ತು ಕಲಿ.

ನಾರಾಯಣನ ಭಕ್ತರ ಹೆಸರುಗಳನ್ನು ಹೇಳಲಾಗಿದೆ. ಇವರಲ್ಲಿ ಮುಖ್ಯರಾದವರು- ಚತುರ್ಮುಖಬ್ರಹ್ಮ, ಶಿವ, ನಾರದ, ಪ್ರಲ್ಹಾದ, ಧ್ರುವ, ಪ್ರಾಚೀನಬರ್ಹ, ಋಭು, ಅಂಗ, ಐಲ, ಮುಚಕುಂದ, ಅಂಬರೀಷ, ಮಾಂಧಾತಾ, ಬಲಿ, ಸೌಭರಿ, ವಿಭೀಷಣ, ವಿದುರ. ಭಕ್ತರ ಈ ಪಟ್ಟಿಯನ್ನು ಒಂದು ಮಾರ್ಮಿಕವಾದ ಮಾತಿನಿಂದ ಮುಗಿಸಲಾಗಿದೆ. ಸ್ತ್ರೀಶೂದ್ರ ಹೊಣ ಶಬರರೂ ಭಗವದ್ಭಕ್ತಿಯಿಂದ ಉದ್ಧಾರವಾಗುತ್ತಾರೆ. ಅಂದಮೇಲೆ ಜ್ಞಾನಿಗಳಿಗೆ ಆಗುವ ಲಾಭವನ್ನು ಹೇಳುವ ಅಗತ್ಯವೇ ಇಲ್ಲ.

ತೇ ವೈ ವಿದಂತ್ಯತಿತರಾಂ ತವ ದೇವಮಾಯಾಂ
ಸ್ತ್ರೀಶೂದ್ರಹೂಣಶಬರಾ ಅಪಿ ಪಾಪಜೀವಾಃ ।
ತಿರ್ಯಗ್ ಜನಾ ಅಪಿ ಕಿಮು ಶ್ರುತಧಾರಣಾಯೇ ।

ನಾರದರು ಬ್ರಹ್ಮನಿಂದ ಭಾಗವತದ ಉಪದೇಶವನ್ನು ಪಡೆದು ಮತ್ತೆ ಯಾರು ಯಾರಿಗೆ ಉಪದೇಶ ಮಾಡಿದರು ಎಂದು ಪರೀಕ್ಷಿತನು ಶುಕನಿಗೆ ಕೇಳುತ್ತಾನೆ. ಪರೀಕ್ಷಿತನು ತಾನು ಈವರೆಗೆ ಕೇಳಿದ ಭಾಗವತದಲ್ಲಿಯ ಕೆಲವು ಮುಖ್ಯವಾದ ಪ್ರಮೇಯಗಳ ಅನುವಾದ ಮಾಡುತ್ತಾನೆ. ನನಗೆ ಇನ್ನೂ ಹೆಚ್ಚಿನ ಉಪದೇಶ ಮಾಡು ಎಂದು ಪ್ರಾರ್ಥಿಸುತ್ತಾನೆ.

ವಿಷ್ಣುಲೋಕದ ವರ್ಣನೆ

ಶುಕರು ಬ್ರಹ್ಮನು ವಿಷ್ಣುಲೋಕವನ್ನು ಕಂಡ ಸಂದರ್ಭವನ್ನು ವರ್ಣಿಸುತ್ತಾರೆ. ಅಲ್ಲಿಯ ವೈಭವವನ್ನೂ ವರ್ಣಿಸುತ್ತಾರೆ.

i. **ತಸ್ಮೈ ಸ್ವಲೋಕಂ ಭಗವಾನ್ ಸಭಾಜಿತಃ ಸಂದರ್ಶಯಾಮಾಸಪರಂ ನ ಯತ್ಪದಮ್ ।**
ವ್ಯಪೇತಸಂಕ್ಲೇಶ ವಿಮೋಹಸಾಧ್ವಸಮ್ ಸಂದೃಷ್ಟವದ್ಭಿಃ ವಿಬುಧೈರಭಿಷ್ಟುತಮ್ ।
ಶ್ಯಾಮಾವದಾತಾಃ ಶತಪತ್ರಲೋಚನಾಃ ಪಿಶಂಗವಸ್ತ್ರಾಃ ಸುರುಚಃ ಸುಪೇಶಸಃ ।
ಸರ್ವೇಚತುರ್ಬಾಹವ ಉನ್ಮಿಷನ್ಮಣಿಪ್ರವೇಕನಿಷ್ಕಾಭರಣಾಃ ಸುವರ್ಚಸಃ ।
ಶ್ರೀರ್ಯತ್ರರೂಪಿಣ್ಯುರುಪಾದಯೋಃ ಕರೋತಿ ಮಾನಂ ಬಹುಧಾವಿಭೂತಿಭಿಃ ।
ಪ್ರೇಂಖಶ್ರಿತಾಃ ಯಾಃ ಕುಸುಮಾಕರಾನುಗೈಃ ವಿಗೀಯಮಾನಾ ಪ್ರಿಯಕರ್ಮಗಾಯತೀ । (೨.೯, ೧೧,೧೨)

ii. **ದದರ್ಶ ತತ್ರಾಖಿಲಸಾತ್ವತಾಂ ಪತಿಂ ಶ್ರಿಯಃ ಪತಿಂ ಯಜ್ಞಪತಿಂ ಜಗತ್ಪತಿಂ ।**
ಕಿರೀಟಿನಂ ಕುಂಡಲಿನಂ ಚತುರ್ಭುಜಂ ಪೀತಾಂಶುಕಂ ವಕ್ಷಸಿ ಲಕ್ಷಿತಂ ಶ್ರಿಯಾ ॥ (೧೪.೧೬)

ಪರಮಾತ್ಮನು ಬ್ರಹ್ಮನಿಗೆ ಭಾಗವತೋಪದೇಶವನ್ನು ಮಾಡುತ್ತಾನೆ.

ಜ್ಞಾನಂ ಪರಮಗುಹ್ಯಂ ಯದ್ವಿಜ್ಞಾನಸಮನ್ವಿತಮ್ ।
ಸರಹಸ್ಯಂ ತದಂಗಂಚ ಗೃಹಾಣಗದಿತಂ ಮಯಾ ॥ ೩೦ ॥

ತಂ ನಾರದಃ ಪ್ರಿಯತಮೋ ರಿಕ್ಥಾದಾನಾಮನುವ್ರತಃ ।
ಶುಶ್ರೂಷಮಾಣಃ ಶೀಲೇನ ಪ್ರಶ್ರಯೇಣ ದಮೇನಚ ।
ತಸ್ಮಾ ಇದಂ ಭಾಗವತಂ ಪುರಾಣಂ ದಶಲಕ್ಷಣಮ್ ।
ಪ್ರೋಕ್ತಂ ಭಗವತಾಪ್ರಾಹಮುನಯೇ ಸರಸ್ವತ್ಯಾಂತಟೇನೃಪ ॥ (೨.೧೯, ೪೦,೪೩,೪೪)

ಭಾಗವತದ ದಶಲಕ್ಷಣಗಳು ಈ ಕೆಳಗಿನಂತಿವೆ.

ಅತ್ರ ಸರ್ಗೋ ವಿಸರ್ಗಶ್ಚ ಸ್ಥಾನಂ ಪೋಷಣಮೂತಯಃ ।
ಮನ್ವಂತರೇಶಾನುಕಥಾನಿರೋಧೋಮುಕ್ತಿರಾಶ್ರಯಃ ।

ದಶಮಸ್ಯ ವಿಶುದ್ಧ್ಯರ್ಥಂ ನವಾನಾಮಿಹಲಕ್ಷಣಮ್ ।
ವರ್ಣಯಂತಿಮಹಾತ್ಮಾನಃ ಶ್ರುತೇನಾರ್ಥೇನ ಚಾಂಜಸಾ ॥

ಇವುಗಳಲ್ಲಿ ಒಂಬತ್ತು ಲಕ್ಷಣಗಳನ್ನು ಹತ್ತನೆಯ ಅಧ್ಯಾಯದಲ್ಲಿ ವಿವರಿಸಿದ್ದಾರೆ. ಹತ್ತನೆಯ ಲಕ್ಷಣವು ಭಾಗವತದ ಮುಖ್ಯ ಪ್ರಮೇಯವಾಗಿದ್ದು ಭಾಗವತದಲ್ಲಿ ಎಲ್ಲಕಡೆಗೂ ತುಂಬಿದೆ.

ಭಾಗವತ ತಾತ್ಪರ್ಯ ನಿರ್ಣಯ

ಶ್ರೀ ಆನಂದತೀರ್ಥರು ಭಾಗವತಕ್ಕೆ ತಾತ್ಪರ್ಯ ನಿರ್ಣಯ ಎಂಬ ಸಂಕ್ಷಿಪ್ತವಾದ ವ್ಯಾಖ್ಯಾನವನ್ನು ಬರೆದಿರುವರು. ಭಾಗವತದ ೧೮ ಸಾವಿರ ಶ್ಲೋಕಗಳಲ್ಲಿ ೧೬೦೦ ನೂರು ಶ್ಲೋಕಗಳಿಗೆ ಮಾತ್ರ ಈ ವ್ಯಾಖ್ಯಾನವನ್ನು ಬರೆದಿರುವರು. ಇದರ ಉದ್ದೇಶ ಎರಡು ವಿಧವಾಗಿದೆ.

೧. ಭಾಗವತವು ಪಂಚರಾತ್ರದ ಪರಂಪರೆಗೆ ಸೇರಿದ ಗ್ರಂಥವಾಗಿದೆ. ಇದರಲ್ಲಿ ಪಂಚರಾತ್ರ ಸಂಪ್ರದಾಯದ ಅನೇಕ ಪಾರಿಭಾಷಿಕ ಪದಗಳು ಬರುತ್ತವೆ. ಅವುಗಳ ಅರ್ಥವನ್ನು ಪಂಚರಾತ್ರದ ಮೂಲಗ್ರಂಥಗಳ ವಚನಗಳನ್ನೇ ಉದಹರಿಸಿ ಸ್ಪಷ್ಟೀಕರಿಸುವುದು.

೨. ಭಾಗವತದಲ್ಲಿಯ ಕೆಲವು ಶ್ಲೋಕಗಳು ಮತ್ತು ಪದಗಳು ಮೇಲುನೋಟಕ್ಕೆ ಅದ್ವೈತಕ್ಕೆ ಅನುಕೂಲವಿರುವಂತೆ ಕಂಡುಬರುತ್ತವೆ. ಇದರ ಪ್ರಯೋಜನವನ್ನು ತೆಗೆದುಕೊಂಡು ಹಿಂದಿನ ಇಬ್ಬರು ವ್ಯಾಖ್ಯಾನಕಾರರಾದ ಚಿತ್ಸುಖ ಮತ್ತು ಪುಣ್ಯಾರಣ್ಯರು ಸಮಗ್ರ ಭಾಗವತಕ್ಕೇ ಅದ್ವೈತಪರವಾದ ಅರ್ಥವನ್ನು ಮಾಡಿದ್ದರು. ಇದರಿಂದ ಭಾಗವತದ ಮುಖ್ಯ ಉದ್ದೇಶವಾದ ಭಕ್ತಿಯ ಪ್ರಚಾರ ಮತ್ತು ಗುಣಪೂರ್ಣ ಪರಮಾತ್ಮನ ಉಪಾಸನೆ ಇವಕ್ಕೇ ಧಕ್ಕೆಯುಂಟಾಗಿತ್ತು. ನಿರ್ಗುಣಬ್ರಹ್ಮನ ಕಲ್ಪನೆ ಮತ್ತು ಭಕ್ತಿ ಪರಸ್ಪರ ಹೊಂದಿಕೆಯಾಗುವುದಿಲ್ಲ. ಆದ್ದರಿಂದ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ಈ ಅದ್ವೈತಪರವೆಂದು ತೋರುವ ಶ್ಲೋಕಗಳ ಮತ್ತು ಪದಗಳ ನಿಜವಾದ ಅರ್ಥದ ನಿರ್ಣಯವನ್ನು ಮಾಡಲು ತಾತ್ಪರ್ಯ ನಿರ್ಣಯವನ್ನು ಬರೆದರು.

ಭಾಗವತದ ಇನ್ನೊಂದು ವೈಶಿಷ್ಟ್ಯವೆಂದರೆ ಅನುಭಾವ ಅಂದರೆ ಅಪರೋಕ್ಷಾನುಭವದ ವರ್ಣನೆ. ಭಾಗವತದಲ್ಲಿ ಅನೇಕ ಕಡೆಗೆ ಇದು ಬರುವುದು. ಇದು ಸಮಾಧಿಭಾಷೆಯಲ್ಲಿ ಇರುವುದು. ತಾತ್ಪರ್ಯ ನಿರ್ಣಯದಲ್ಲಿ ಈ ಘಟ್ಟಗಳನ್ನೂ ವಿವರಿಸಲಾಗಿದೆ. ಭಾಗವತದಲ್ಲಿ ಭಾರತ, ಹರಿವಂಶ, ವಿಷ್ಣುಪುರಾಣಗಳಲ್ಲಿ ಬಂದ ಕೆಲವು ವಿಷಯಗಳನ್ನು ಉಲ್ಲೇಖಿಸಲಾಗಿದೆ. ಈ ಪುರಾಣಗಳಲ್ಲಿ ಈ ವಿಷಯಗಳನ್ನು ಹೇಳಿದ್ದರಲ್ಲಿ ಕೆಲವು ನಿರೂಪಣೆಯ ಭೇದಗಳಿವೆ. ತಾತ್ಪರ್ಯನಿರ್ಣಯದಲ್ಲಿ ಇವುಗಳ ಸಮನ್ವಯವನ್ನು ತೋರಿಸಲಾಗಿದೆ. ತಾತ್ಪರ್ಯ ನಿರ್ಣಯದ ಈ ಬಹುಮುಖ ಉಪಯುಕ್ತತೆಯನ್ನು ಶ್ರೀ ಸುಮಧ್ವವಿಜಯದಲ್ಲಿ ಸುಂದರವಾಗಿ ವರ್ಣಿಸಲಾಗಿದೆ.

ಪುರಾಣಸ್ಥಾನಪಾಂಥಾನಾಂ ಅಭಾಷಾತ್ರಯವೇದಿನಾಮ್ ।
ಭವತಾ ಸುಸುಖಾ ಚಕ್ರೇ ಶ್ರೀ ಭಾಗವತ ನಿರ್ಣಯಃ ॥

ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ಪಂಚರಾತ್ರ ಮತ್ತು ಇತರ ಆಕರ ಗ್ರಂಥಗಳಿಂದ ಪ್ರಮಾಣವಚನಗಳನ್ನು ಉದಾಹರಿಸುತ್ತಾರೆ. ಇಂಥವಚನಗಳು ಭಾಗವತ ತಾತ್ಪರ್ಯನಿರ್ಣಯದಲ್ಲಿಯೇ ಹೆಚ್ಚಾಗಿವೆ. ಸುಮಾರು ೨೨೪ ಆಕರಗ್ರಂಥಗಳಿಂದ ಪ್ರಮಾಣವಚನಗಳನ್ನು ತಾತ್ಪರ್ಯ ನಿರ್ಣಯದಲ್ಲಿ ಉದಾಹರಿಸಿದ್ದಾರೆ. ಶ್ರುತಿ-ಇತಿಹಾಸ ಪುರಾಣಗಳ ಅರ್ಥ ನಿರ್ಣಯದ ಮಾರ್ಗದರ್ಶಕ ತತ್ವಗಳು ತಾತ್ಪರ್ಯ ನಿರ್ಣಯದಲ್ಲಿ ವಿಪುಲವಾಗಿವೆ.

ಭಾಗವತ ಮತ್ತು ತಾತ್ಪರ್ಯ ನಿರ್ಣಯಗಳ ಮೇಲಿನ ವ್ಯಾಖ್ಯಾನಗಳು

ಭಾಗವತಕ್ಕೆ ೧೫ ವ್ಯಾಖ್ಯಾನಗಳಿವೆ. ಇವುಗಳಲ್ಲಿ ಶ್ರೀ ವಿಜಯಧ್ವಜತೀರ್ಥರ ಪದರತ್ನಾವಲೀ ಎಂಬ ವ್ಯಾಖ್ಯಾನವು ಮಾತ್ರ ಸಮಗ್ರ ಭಾಗವತದ ಮೇಲೆ ಇದೆ. ಇನ್ನುಳಿದವುಗಳಲ್ಲಿ ಶ್ರೀ ಯಾದವಾರ್ಯರ ಪ್ರಕಾಶಿಕಾ ಮತ್ತು

ಶ್ರೀಸತ್ಯಧರ್ಮರ ವ್ಯಾಖ್ಯಾನ ಈ ಎರಡೂ ಸೇರಿ ಸಮಗ್ರ ಭಾಗವತದ ವ್ಯಾಖ್ಯಾನಗಳಾಗುತ್ತವೆ. ಶ್ರೀಯಾದವಾರ್ಯರ ವ್ಯಾಖ್ಯಾನವು ಮೊದಲಿನ ಐದು ಸ್ಕಂಧಗಳು ಮತ್ತು ಏಳನೆಯ ಸ್ಕಂಧದ ಕೆಲವು ಭಾಗದ ಮೇಲೆ ಇದೆ. ಶ್ರೀಸತ್ಯಧರ್ಮರ ವ್ಯಾಖ್ಯಾನವು ಆರರಿಂದ ಹತ್ತು ಮತ್ತು ಹನ್ನೆರಡನೆಯ ಸ್ಕಂಧಕ್ಕೆ ಶ್ರೀನಿವಾಸತೀರ್ಥರ ವ್ಯಾಖ್ಯಾನವಿದೆ. ಶ್ರೀ ಸತ್ಯಾಭಿನವ ತೀರ್ಥರ ದುರ್ಘಟಭಾವದೀಪಿಕಾ ವ್ಯಾಖ್ಯಾನವು ಎಲ್ಲ ಸ್ಕಂಧಗಳಿಗೂ ಇದ್ದರೂ ಎಲ್ಲ ಶ್ಲೋಕಗಳಿಗೂ ಇಲ್ಲ. ತಾತ್ಪರ್ಯ ನಿರ್ಣಯದ ಕೆಲವರು ಮಾಡಿದ ವಿಮರ್ಶೆಗೆ ಉತ್ತರ ಕೊಡುವುದೇ ಈ ವ್ಯಾಖ್ಯಾನದ ಉದ್ದೇಶವಾಗಿದೆ.

ಚಿಟ್ಟೀ ವೆಂಕಟಾದ್ರಿ ಮತ್ತು ಶ್ರೀವ್ಯಾಸತತ್ತ್ವಜ್ಞರ ವ್ಯಾಖ್ಯಾನಗಳು ಕ್ರಮವಾಗಿ ಆರು ಮತ್ತು ಏಳನೆಯ ಸ್ಕಂಧಗಳಿಗೆ ಇವೆ. ಛಲಾರೀ ವ್ಯಾಖ್ಯಾನವು ಎಂಟು ಮತ್ತು ಒಂಬತ್ತನೆಯ ಸ್ಕಂಧಗಳಿಗಿದೆ.

ಛಲಾರಿಯವರು, ಶ್ರೀನಿವಾಸ ಮತ್ತು ನರಹರಿ ಎಂಬುವರು ತಾತ್ಪರ್ಯನಿರ್ಣಯಕ್ಕೆ ಮಾತ್ರ ಬರೆದ ವ್ಯಾಖ್ಯಾನಗಳಿವೆ. ವಿರೋಧೋದ್ಧಾರ ಎಂಬ ವ್ಯಾಖ್ಯಾನವು ಸಮಗ್ರ ಭಾಗವತಕ್ಕೆ ಇದ್ದರೂ ಎಲ್ಲ ಶ್ಲೋಕಗಳಿಗೂ ಇಲ್ಲ. ಇದರ ಮುಖ್ಯ ಉದ್ದೇಶ ಭಾಗವತದ ಹೇಳಿಕೆಗಳಲ್ಲಿ ಮೇಲು ನೋಟಕ್ಕೆ ಕಂಡುಬರುವ ವಿರೋಧವನ್ನು ಪರಿಹಾರ ಮಾಡುವುದು. ಆದ್ದರಿಂದ ಎಲ್ಲಿ ಆಪಾತತಃ ವಿರೋಧವು ಕಾಣುವುದೋ ಆ ಶ್ಲೋಕಗಳಿಗೆ ಮಾತ್ರ ವ್ಯಾಖ್ಯಾನ ಮಾಡಲಾಗಿದೆ.

ಭಾಗವತದ ಸಾರೋದ್ಧಾರವು ಒಂದು ಅಪೂರ್ವವಾದ ಗ್ರಂಥವು. ಜ್ಞಾನ, ಭಕ್ತಿ, ವೈರಾಗ್ಯ ಮತ್ತು ಭಗವಂತನ ವಿಶೇಷ ಮಹಿಮೆಯನ್ನು ಹೇಳುವ ಸುಮಾರು ೩೬೫ ಶ್ಲೋಕಗಳನ್ನು ಆಯ್ದು ೩೦ ವಿಷಯಗಳನ್ನಾಗಿ ವಿಂಗಡಿಸಿ ಭಾಗವತದ ಸಾರವನ್ನು ಇದರಲ್ಲಿ ಕೊಡಲಾಗಿದೆ. ಇವು ಭಾಗವತದ ಸಂದೇಶದ ಹೃದಯದಂತಿದ್ದು ನೈತಿಕ ಮತ್ತು ಧಾರ್ಮಿಕ ಜೀವವನ್ನು ನಡೆಸಲು ತುಂಬ ಮಾರ್ಗದರ್ಶಕವಾಗಿವೆ. ಈ ಸಾರೋದ್ಧಾರ ಗ್ರಂಥಕರ್ತರಾದ ಶ್ರೀ ವಿಷ್ಣುತೀರ್ಥರು ಸ್ವತಃ ಅವಧೂತರಾಗಿದ್ದರು. ಈ ಶ್ಲೋಕಗಳಿಗೆ ಇವರು ಒಂದು ಸರಳವಾದ ಆದರೆ ಪ್ರಮೇಯಗಳಿಂದ ತುಂಬಿದ ಶ್ರೇಷ್ಠ ವ್ಯಾಖ್ಯಾನವನ್ನು ಬರೆದಿದ್ದಾರೆ. ಭಾಗವತದ ಮೇಲಿನ ಈ ವ್ಯಾಖ್ಯಾನಗಳನ್ನು ಈ ಕೆಳಗೆ ತೋರಿಸಲಾಗಿದೆ.

೧) ಶ್ರೀ ವಿಜಯಧ್ವಜತೀರ್ಥರ ಪದರತ್ನಾವಲೀ	೧೨ ಸ್ಕಂಧಗಳಿಗೆ
೨) ಶ್ರೀ ಸತ್ಯಾಭಿನವರ ದುರ್ಘಟಭಾವದೀಪಿಕಾ	೧೨ ಸ್ಕಂಧಗಳಿಗೆ
೩) ಯದುಪತ್ಯಾಚಾರ್ಯರ ಪ್ರಕಾಶಿಕಾ	೧ರಿಂದ ೫ ಮತ್ತು ೭ನೆಯ ಸ್ಕಂಧದ ಕೆಲವು ಭಾಗ
೪) ಶ್ರೀ ಸತ್ಯಧರ್ಮತೀರ್ಥರ ವ್ಯಾಖ್ಯಾನ	೬ ರಿಂದ ೧೦ ಮತ್ತು ೧೨ ಸ್ಕಂಧಗಳು
೫) ಚಿಟ್ಟೀ ವೆಂಕಟಾದ್ರಿಗಳ ಸಜ್ಜನಹಿತಾ	೬ನೆಯ ಸ್ಕಂಧ
೬) ವ್ಯಾಸತತ್ತ್ವಜ್ಞರ ಮಂದನಂದಿನೀ	೭ನೆಯ ಸ್ಕಂಧ
೭) ಛಲಾರಿ ಶೇಷಾಚಾರ್ಯರ ಮಂದಬೋಧಿನೀ	೮-೯ ಸ್ಕಂಧಗಳು
೮) ಲಿಂಗೇರಿ ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರ ಪದಮುಕ್ತಾವಲೀ	೮ನೆಯ ಸ್ಕಂಧ
೯) ಬದರಹಳ್ಳಿ ಶ್ರೀನಿವಾಸತೀರ್ಥರ ವಿವರಣ	೧೧ನೆಯ ಸ್ಕಂಧ
೧೦) ಪಾಂಘ್ರಿ ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರ ವಿರೋಧೋದ್ಧಾರ	೧ ರಿಂದ ೧೨ ಸ್ಕಂಧಗಳು
೧೧) ಶ್ರೀನಿವಾಸರ ತಾತ್ಪರ್ಯ ಪ್ರಕಾಶ	
೧೨) ಶ್ರೀ ನರಹರಿಯ ತಾತ್ಪರ್ಯ ದೀಪಿಕಾ	

೧೩) ಶ್ರೀಛಲಾರಿಯವರ ತಾತ್ಪರ್ಯ ಪ್ರಬೋಧಿನೀ
೧೪) ಶ್ರೀ ವಿಷ್ಣುತೀರ್ಥರ ಭಾಗವತಸಾರೋದ್ಧಾರ
೧೫) ಭಗವಂತರಾಯನ ಭಾಗವತ ವ್ಯಾಖ್ಯಾನ — ೧೧-೧೨ ಸ್ಕಂಧಗಳು

ಶ್ರೀ ವಿಜಯಧ್ವಜತೀರ್ಥರನ್ನು ಬಿಟ್ಟು ಉಳಿದವರೆಲ್ಲ ೧೭ ಮತ್ತು ೧೮ನೆಯ ಶತಮಾನಕ್ಕೆ ಸೇರಿದವರು. ಶ್ರೀ ವಿಜಯಧ್ವಜರು ೧೫ನೆಯ ಶತಕದವರು. ಇವರೆಲ್ಲರ ಕಾಲ, ಗ್ರಂಥ ಇತ್ಯಾದಿ ವಿಷಯಗಳನ್ನು ಡಾ. ಬಿ.ಎನ್.ಕೆ. ಶರ್ಮಾ ಅವರು ದ್ವೈತವಾಙ್ಮಯದ ಇತಿಹಾಸ ಎಂಬ ತಮ್ಮ ಗ್ರಂಥದಲ್ಲಿ ವಿವರವಾಗಿ ಕೊಟ್ಟಿರುವರು.

ಈ ಗ್ರಂಥದ ಸಂಪಾದನೆಯ ಕಾರ್ಯಕ್ಕೆ ನನಗೆ ನೆರವಾದ ಶ್ರೀ ಜಯತೀರ್ಥಾಚಾರ್ಯ ಅಡವಿ, ಶ್ರೀ ಗುರುವೆಂಕಟಾಚಾರ್ಯರು, ಶ್ರೀ ರಮಾಕಾಂತಜೋಶಿ ಮತ್ತು ಶ್ರೀ ಕೃಷ್ಣಾಚಾರ್ಯ ಉಪಾಧ್ಯಾಯ ಇವರಿಗೆ ನಾನು ಕೃತಜ್ಞನಾಗಿದ್ದೇನೆ.

ಕೆ.ಟಿ. ಪಾಂಡುರಂಗಿ

श्रीमद् भागवतस्य विषयानुक्रमणिका

चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

षष्ठोऽध्यायः

सप्तमोऽध्यायः

अष्टमोऽध्यायः

नवमोऽध्यायः

दशमोऽध्यायः

❖ ❖ ❖